॥ श्रीजिनेन्द्राय नमः ॥

॥ संस्मारितातीतयुगप्रधानगीतार्थत्वादिगुणोपेतजगद्गुरुश्रीवृद्धिविजयसद्गुरुभ्यो नमः ॥

॥ आचार्यश्रीमद्विजयनेमिसूरिविरचितम् ॥

# ॥ हैमप्रभा व्याकरणम् ॥

यदीया भव्यानां सुविहितसपर्यैकलतिका स्तुतिर्बोधावाप्तौ सकृदपि कृता मुक्तिफलदा ।
विधत्तां मे बोधं विगततमसं स्तम्भनमणिः स सार्वः श्रीपार्श्वो क्षितिनयमिलत्तीर्थतरणिः ॥ १ ॥

यस्य ग्रन्थैर्विश्वविस्त्वं प्रथितमनुपमैर्व्याकरोपनिषज्जैर्यो लोकान् संव्याप्य नाम्नः प्रकटयति महीपालसेव्योऽर्थवत्ताम् ॥
आचार्याग्र्यं जितान्तर्गतरिपुनिचयं पूजनीयाङ्घ्रियुग्म-मीडे तं हेमचन्द्रं प्रविततकरुणामुक्तिदेवीं च भक्त्या ॥२॥

यं निःसपत्नगृहधाम मुदा विलेसुः सर्वे गुणाः स्मृतिपथं सुचिरं व्यतीताः ॥
यद्दर्शनेन गमिताश्च युगप्रधानाः श्रीमान् स वृद्धिविजयो जयति प्रकामम् ॥ ३ ॥

कुर्वेऽल्पबुद्धिरपि नेमिरिदं सुरद्रुगुर्वङ्घ्र्युपास्तिबलतो मितशब्दभासाम् ॥
हैमप्रभां शिशुहिताय विभक्तिनद्धां सम्भाव्यते किमिव नो महदाश्रयेण ॥ ४ ॥

अर्हम् ॥ १ । १ । १ ॥ एतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं सिद्धचक्रस्यादिबीजं मङ्गलार्थं शास्त्रादौ प-

णिदध्महे ॥ सिद्धिः स्याद्वादात् ॥ १ । १ । २ ॥ अधिकारोऽयम् । नित्यानित्याद्यनेकधर्माणामेकवस्तुनि स्वीकारः स्याद्वादः । तस्मात् शब्दानां निष्पत्तिर्ज्ञप्तिश्च ज्ञेया । एकस्यैव हि ह्रस्वदीर्घादिविधयो नानाकारकसंनिपातः सामानाधिकरण्यं विशेष्यविशेषणभावादयश्च स्याद्वादमन्तरेण नोपपद्यन्ते ॥ लोकात् ॥ १ । १ । ३ ॥ इहानुक्तानां संज्ञानां न्यायानां च वैयाकरणादेः सिद्धिर्भवतीति वेदितव्यम् ॥ वर्णसमाम्नायस्य च । तत्र ॥ औदन्ताः स्वराः ॥ १ । १ । ४ ॥ अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥ एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः ॥ १ । १ । ५ ॥ औदन्ताः । मात्रा कालविशेषः ॥ अ इ उ ऋ ऌ ह्रस्वाः । आ ई ऊ ॠ ॡ ए ऐ ओ औ दीर्घाः ॥ आ ३ ई ३ इत्यादयः प्लुताः ते चोदात्तानुदात्तस्वरितभेदात् त्रिधा । सानुनासिकनिरनुनासिकभेदेन पुनर्द्विधा । उच्चैरुदात्तः । नीचैरनुदात्तः । समाहारः स्वरितः । मुखनासिकेनोच्चार्यः सानुनासिकः । मुखेनैव निरनुनासिकश्च । एवम् अइउऋऌवर्णानां प्रत्येकमष्टादश भेदाः । सन्ध्यक्षराणां तु द्वादश । ऌकारस्य दीर्घादर्शनात् द्वादशेति पाणिनीयाः ॥ अनवर्णा नामी ॥ १ । १ । ६ ॥ औदन्ताः ॥ ऌदन्ताः समानाः ॥ १ । १ । ७ ॥ ए ऐ ओ औ सन्ध्यक्षरम् ॥ १ । १ । ८ ॥ अं अः अनुस्वारविसर्गौ ॥ १ । १ । ९ ॥ अकारावुच्चारणार्थौ ॥ कादिर्व्यञ्जनम् ॥ १ । १ । १० ॥ हपर्यन्तः । कखगघङ चछजझञ टठडढण तथदधन पफबभम यरलव शषसह । क आदिः कादिरिति अनुस्वारविसर्गयोरपि व्यञ्जनसंज्ञा ॥ अपञ्चमान्तस्थो धुट् ॥ १ । १ । ११ ॥ कादिः ॥ पञ्चको वर्गः ॥ १ । १ । १२ ॥ कादिषु मान्तेषु । ते च पञ्च कचटतपसंज्ञकाः ॥ आद्यद्वितीयशषसा अघोषाः ॥ १ । १ । १३ ॥ अन्यो घोषवान् ॥ १ । १ । १४ ॥ अघोषेभ्यः कादिः ॥ यरलवा अन्तस्थाः ॥ १ । १ । १५ ॥ यलवाः सानुनासिका निरनुनासिकाश्चेति द्विधा ॥ अं अः ᳵक ᳶप शषसाः शिट् ॥ १ । १ । १६ ॥ अकारककारपकारा उच्चारणार्थाः । ᳵक ᳶप पौ वज्रगजकुम्भाकृती ॥ तुल्यस्थानास्यप्रयत्नः स्वः ॥ १ । १ । १७ ॥ यत्र पुद्गलस्कन्धस्य वर्णभावापत्तिस्तत्स्थानम्

। अवर्णहविसर्गकवर्गाः कण्ठ्याः । इवर्णचवर्गयशास्तालव्याः । उवर्णपवर्गोपध्मानीया ओष्ठ्याः । ऋवर्णटवर्गरषा मूर्धन्याः । लृवर्णतवर्गलसा दन्त्याः । ए ऐ तालव्यौ । ओ औ ओष्ठ्यौ । वो दन्त्योष्ठ्यः । जिह्वामूलीयो जिह्व्यः । नासिक्योऽनुस्वारः । ङञणनमाः स्वस्थाननासिकास्थानाः । सपञ्चमान्तस्थो हकार उरस्यः । आस्यप्रयत्न आन्तरः संरम्भः । स सप्तधा स्पृष्टेषत्स्पृष्टविवृतेषद्विवृतविवृततरातिविवृततरातिविवृततमभेदात् । स्पृष्टं करणं वर्ग्याणाम्, ईषत्स्पृष्टमन्तस्थानाम्, विवृतं स्वराणाम्, ईषद्विवृतं शषसहानाम्, एदोतोर्विवृततरम्, ऐदौतोरतिविवृततरम्, अवर्णस्यातिविवृततमम् । आस्यग्रहणं बाह्यनिवृत्त्यर्थम् । ते च विवारसंवारश्वासनादघोषाघोषाल्पप्राणमहाप्राणोदात्तानुदात्तस्वरितभेदात् एकादश । तत्र महाप्राणस्य, 'आसन्नः ॥ ७ । ४ । १२० ॥' इत्यत्रोपयोगोऽन्येषां तु वेदे प्रयोजनमिति न्यासः । द्वितीयचतुर्थौ शषसहाश्च महाप्राणाः ॥ अनन्तः पञ्चम्याः प्रत्ययः ॥ १ । १ । ३८ ॥ पञ्चम्यर्थाद्विहितोऽन्तशब्दानिर्दिष्टः प्रत्ययः स्यात् ॥ स्यौजसमौशस्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुपां त्रयी त्रयी प्रथमादिः ॥ १ । १ । १८ ॥ इजशटङपाश्चेतः ॥ स्त्यादिर्विभक्तिः ॥ १ । १ । १९ ॥ सुप्स्यामहिपर्यन्तः स्यात् ॥ तदन्तं पदम् ॥ १ । १ । २० ॥ विभक्त्यन्तं पदं स्यात् ॥ सविशेषणमाख्यातं वाक्यम् ॥ १ । १ । २६ ॥ प्रयुज्यमानैरप्रयुज्यमानैर्वा विशेषणैः सहितं प्रयुज्यमानमप्रयुज्यमानं वाख्यातं वाक्यं स्यात् ॥ धर्मो वो रक्षतु ॥ क्रियार्थो धातुः ॥ ३ । ३ । ३ ॥ पूर्वापरीभूतावयवा साध्यमानलक्षणा क्रियार्थो यस्य स शब्दो धातुः ॥ न प्रादिरप्रत्ययः ॥ ३ । ३ । ४ ॥ प्रादिर्धातोरवयवो न, न चेत् ततः परः प्रत्ययः स्यात् । प्रादिश्चाद्यन्तर्गणः ॥ चादयोऽसत्त्वे ॥ १ । १ । ३० । अव्ययानि स्युः ॥ धातोः पूजार्थस्वतिगतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक् च ॥ ३ । १ । १ ॥ सम्बन्धी तदर्थद्योती । धातोरिति पञ्चमी षष्ठी च । क्रियायोगे प्रादीनां गतिसंज्ञा च वक्ष्यते । प्र परा अप सम् अनु अव निस् दुस् " एतौ सान्तावपि " वि आङ् नि प्रति परि उप अधि अपि सु उद् अति अभि ॥ अ-

प्रयोगीत् ॥ १ । १ । ३७ ॥ इह शास्त्रे उपदिश्यमानो वर्णस्तत्समुदायो वा प्रयोगेऽदृश्यमान इत् स्यात् ॥ × प्रसक्तस्यादर्शनं लुक्लुप्लोपसंज्ञम् ॥ × वर्णग्रहणे स्वसंज्ञस्य ग्रहणम् ॥ × तपरो वर्णस्तन्मात्रस्य ग्राहकः ॥ × नवेति विभाषा ॥ × स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रीयसंज्ञां विमुच्य । स्वपदशः शक्त्यनभ्युपगन्तॄणां मतेनेदमित्यन्यत्र विस्तरः ॥ × विरामः शब्दावसानम् ॥ × वर्णानामर्धमात्रातिरिक्तकालाव्यवायेन कथनं संहिता ॥ × स्वराव्यवहितव्यञ्जनसमुदायः संयोगः ॥ × ह्रस्वं लघु ॥ × संयोगे गुरु, दीर्घं च ॥ गुणोऽरेदोत् ॥ ३ । ३ । २ ॥ वृद्धिरारैदौत् ॥ ३ । ३ । १ ॥ शिर्घुट् ॥ १ । १ । २८ ॥ क्लीबे जश्शसादेशः ॥ पुंस्त्रियोः स्यमौजस् ॥ १ । १ । २९ ॥ घुट् स्यात् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धि-
चन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छा-
चार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां संज्ञाधिकारः ॥

---

॥ × स्वरस्य ह्रस्वदीर्घप्लुताः ॥ यत्र ह्रस्वादिशब्दैर्ह्रस्वादयो विधीयन्ते तत्र स्वरस्येति पदमुपतिष्ठते ॥

पञ्चम्या निर्दिष्टे परस्य ॥ ७ । ४ । १०४ ॥ यत्कार्यमुक्तं तदव्यवधेः स्यात् ॥ सप्तम्या पूर्वस्य ॥ ७ । ४ । १०५ ॥ निर्दिष्टे यत्कार्यमुच्यते तदव्यवधेः स्यात् ॥ षष्ठ्यान्त्यस्य ॥ ७ । ४ । १०६ ॥ षष्ठ्या निर्दिष्टे यदुक्तं तत् षष्ठ्युक्तान्त्यस्य स्यात् ॥ अनेकवर्णः सर्वस्य ॥ ७ । ४ । १०७ ॥ षष्ठ्युक्तोऽपि ॥ प्रत्ययस्य ॥ ७ । ४ । १०८ ॥ विधिः सर्वस्य स्यात् ॥ विशेषणमन्तः ॥ ७ । ४ । ११३ ॥ अभेदेनोक्तोऽवयवो विशेषणं विशेष्यसमुदायस्यान्तः स्यात् ॥ सप्तम्या आदिः ॥ ७ । ४ । ११४ ॥ सप्तम्यन्तस्य विशेष्यस्य यद्विशेषणं तत्तस्य आदिः स्यात् ॥ प्रत्ययः

प्रकृत्यादेः ॥ ७ । ४ । ११५ ॥ समुदायस्य विशेषणं नोत्पादिकस्य । यस्मात् प्रत्ययविधिः सा तस्य प्रकृतिः ॥ गौणो ङ्यादिः ॥ ७ । ४ । ११६ ॥ प्रकृत्यादेर्विशेषणम् ॥ कृत्सगतिकारकस्यापि ॥ ७ । ४ । ११७ ॥ प्रकृत्यादेर्विशेषणम् ॥ परः ॥ ७ । ४ । ११८ ॥ प्रत्ययः प्रकृतेः पर एव ॥ स्पर्धे ॥ ७ । ४ । ११९ ॥ परो विधिः ॥ आसन्नः ॥ ७ । ४ । १२० ॥ आसन्नानासन्नप्रसङ्गे यथास्वं स्थानार्थप्रमाणादिभिरासन्न एव विधिः ॥ × अपेक्षातोऽधिकारः । × परान्नित्यं नित्यादन्तरङ्गमन्तरङ्गाच्चानवकाशं बलीयः ॥ × अपवादात् क्वचिदुत्सर्गोऽपि ॥ × असिद्धं बहिरङ्गमन्तरङ्गे । × नानिष्टार्था शास्त्रप्रवृत्तिः । न्यायानां स्थविरयष्टिप्रायत्वम् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धि-चन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छा-चार्यश्रीविजयनेमिसूरिविरचितायां हैमप्रभायां परिभाषाप्रकरणम् ॥

## ॥ अथ स्वरसन्ध्यधिकारः ॥

**समानानां तेन दीर्घः** ॥ १ । २ । १ ॥ परेण समानेन सह । द्वयोः स्थाने एको दीर्घ इति सहार्थः । आसन्न आकारः । लोकात् संहिता । वृषभअजितौ इति स्थिते वृषभाजितौ । दधीदम् । भानूदयः । पितॄषभः । क्लृकारः । बहुवचनं व्याप्त्यर्थम्, तेन होतॢकार इत्यपि सिद्धम् ॥ **ऋलृति ह्रस्वो वा** ॥ १ । २ । २ ॥ समानानाम् । बाल ऋश्यः । कुरु ऋषभः । होतृ लृकारः । पक्षे बालर्श्य इत्यादि । ह्रस्वविधाने कार्यान्तरं न स्यादिति ह्रस्वस्यापि ह्रस्वः ॥ **लृत ऋलृऋलृभ्यां वा** ॥ १ । २ । ३ ॥ स्वरसमुदायरूपौ स्वरव्यञ्जनसमुदायरूपावेतौ वर्णान्तरे वा । ऋता क्लृकारः, पक्षे पूर्वेण ह्रस्व उत्तरेण ऋकारश्च । लृता क्लॄकारः । पक्षे दीर्घत्वं ह्रस्वत्वं च ॥ **ऋतो वा तौ च** ॥ १ । २ । ४ ॥ ऋत

ऋलृभ्यां सह यथासङ्ख्यं ऋलृ इत्येतौ वा स्याताम्, तौ च ऋकारलृकारौ ऋलृभ्यां सह वा स्याताम् । पितृषभः; पक्षे पितृ ऋषभः, पितॄषभः । लृता, होतृलृकारः । पक्षे होतॢ्लकारः । होतॄकारः । तौ च, पितृषभः । होतॢ्कारः । पक्षे पूर्ववत् ॥ ऋस्तयोः ॥ १ । २ । ५ ॥ तयोः पूर्वस्थानिनोर्लृकारऋकारयोर्यथासङ्ख्यमृलृभ्यां सह ॠ इति दीर्घः स्यात् । कॄषभः । होतॄकारः ॥ अवर्णस्येवर्णादिनैदोदरल् ॥ १ । २ । ६ ॥ अवर्णस्य इउऋलृवर्णैः सह ए ओ अर् अल् एते स्युः ॥ × यथासङ्ख्यमनुदेशः समसङ्ख्याकानाम् । देवेन्द्रः । नवोदकम् । महा ऋद्धिः । महार्द्धिः । र्होदर्हेत्यादिना द्वित्वे महर्द्धिः ॥ घुटो घुटि स्वे वा ॥ १ । ३ । ४८ ॥ व्यञ्जनात् परस्य लुक् । इति लुकि द्वित्वाभावे वा एकदमेकधम् । एकदेऽपि लुकि केवलैकधम् । महर्षिः । तवल्कारः ॥ अदीर्घाद्विरामैकव्यञ्जने ॥ १ । ३ । ३२ ॥ स्वरात् रहस्वरवर्जस्य वर्णस्यानु द्वे रूपे वा स्याताम् । तवल्ल्कारः ॥ अव्वर्गस्यान्तस्थातः ॥ १ । ३ । ३३ ॥ अनु द्वे वा स्तः ॥ तवल्कारः, ' द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि । तवल्कारादिषु प्राज्ञैर्बोध्यं रूपचतुष्टयम् ॥ अन्यित्य-धिकारात् त्वक्क् त्वग्ग् इत्यादौ कत्वे गत्वे च कृते पश्चाद्द्वित्वम् ॥ ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतरस्यार् ॥ १ । २ । ७ ॥ अवर्णस्य ऋता सह ॥ प्रार्णम् । ऋणार्णम् ॥ ऋते तृतीयासमासे ॥ १ । २ । ८ ॥ अवर्णस्य ऋता सहार् स्यात् । शीतार्त्तः । तृतीयेति किम् । परमर्त्तः । समासे इति किम् । दुःखेनर्त्तः ॥ ऋत्यारुपसर्गस्य ॥ १ । २ । ९ ॥ उपसर्गावर्णस्य ऋकारादौ धातौ परे ऋता सह आर् स्यात् । प्रार्च्छति ॥ नाम्नि वा ॥ १ । २ । १० ॥ उपसर्गावर्णस्य ऋकारादौ नामावयवे धातौ परे ऋता सह वा आर् स्यात् ॥ प्रार्षभीयति । प्रर्षभीयति ॥ लृत्याल्वा ॥ १ । २ । ११ ॥ उपसर्गावर्णस्य लृकारादौ नामावयवे धातौ परे लृता सहाल् वा ॥ उपाल्कारीयति, उपल्कारीयति ॥ ऐदौत्सन्ध्यक्षरैः ॥ १ । २ । १२ ॥ अवर्णस्य परैः सह ॥ तवैषा । तवैन्द्री । तवौदनः । तवौपगवः ॥ ऊटा ॥ १ । २ । १३ ॥ अवर्णस्य परेणोटा सहौत् स्यात् ॥ धौतः । धौतवान् ॥ प्रस्यैषैष्योढोढ्यूढे स्वरेण ॥ १ । २ । १४ ॥ अवर्णस्य परेण ऐ औ

आसवौ स्याताम् ॥ मैषः । मैष्यः । मौढः । प्रौढिः । प्रौढः ॥ स्वैरस्वैर्यक्षौहिण्याम् ॥ १ । २ । १५ ॥ अवर्णस्य परेण स्वरेण सह ऐ औ स्याताम् । स्वैरः । स्वैरी । नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् । स्वैरिणी । अक्षौहिणी सेना ॥ अनियोगे लुगेवे ॥ १ । २ । १६ ॥ अवर्णस्य लुक् । इहेव तिष्ठ । नियोगे तु इहैव तिष्ठ । अनियोगोऽनवधारणम् ॥ वौष्ठौतौ समासे ॥ १ । २ । १७ ॥ अवर्णस्य लुक् । बिम्बोष्ठी । बिम्बौष्ठी । स्थूलोतुः । स्थूलौतुः । समासे इति किम् । हे राजपुत्रौष्ठं पश्य ॥ ओमाङि ॥ १ । २ । १८ ॥ अवर्णस्य ओमि आङादेशे च परे लुक् स्यात् । अधोम्, आ ऊढा आढा, अधोढा, इदमेवाङ्ग्रहणं धातूपसर्गयोः कार्यमन्तरङ्गमिति ज्ञापयति ॥ उपसर्गस्याऽनिणेधेदोति ॥ १ । २ । १९ ॥ अवर्णस्य धातौ परे लुक् । मेलयति । प्रोखति । अनिणेधेति किम् । उपैति । मैधते ॥ वा नाम्नि ॥ १ । २ । २० ॥ नामावयवे एदोदादौ धातौ परे उपसर्गावर्णस्य वा लुक् । उपेडकीयति । उपैडकीयति । प्रोषधीयति । प्रौषधीयति । दधि अत्र इति स्थिते ॥ इवर्णादेरस्वे स्वरे यवरलम् ॥ १ । २ । २१ ॥ यथासङ्ख्यम् । दध्-य् अत्र इति जाते अदीर्घाद्विरामैति द्वित्वे प्राप्ते ॥ स्थानीवावर्णविधौ ॥ ७ । ४ । १०९ ॥ आदेशः स्थानिवत् स्यात् न चेत् स्थानिवर्णाश्रयं कार्यम् ॥ स्वरस्य परे प्राग्विधौ ॥ ७ । ४ । ११० ॥ वर्णविध्यर्थमिदम् । स्वरस्यादेशः परनिमित्तकः पूर्वविधौ विधेये स्थानीव स्यात् । इति स्थानिवद्भावे प्राप्ते ॥ न सन्धिङ्यक्किद्विदीर्घासद्विधावस्क्लुकि ॥ ७ । ४ । १११ ॥ स्वरस्यादेशः स्थानीव स्यात् इति पूर्वेणातिप्रसक्तस्थानिवद्भावनिषेधः । दध्ध्य् अत्रेति जाते ॥ तृतीयस्तृतीयचतुर्थे ॥ १ । ३ । ४९ ॥ धुट आसन्नः । इति पूर्वधस्य दः ॥ पदस्य ॥ २ । १ । ८९ ॥ संयोगान्तस्य लुक् । स च परे स्यादिविधौ च पूर्वस्मिन्नसन् द्रष्टव्यः । इति यलोपे प्राप्ते, बहिरङ्गस्य यस्यासिद्धत्वान्न भवति ॥ ततोऽस्याः ॥ १ । ३ । ३४ ॥ अञ्वर्गादन्तस्थाया द्वे वा स्याताम् । इति यद्वित्वे चातूरूप्यम् । दध्यत्र । दध्ध्यत्र । दद्ध्य्यत्र । दद्ध्यत्र । इवर्णादेरिति पञ्चमीव्याख्याने दधियत्र । मध्वत्र । पित्रर्थः । लाकृतिः ॥

पुत्रस्यादिन्पुत्रादिन्याक्रोशे ॥ १ । ३ । ३८ ॥ तस्य न द्वित्वम् । पुत्रादिनी त्वमसि पापे । पुत्रपुत्रादिनी भव । आक्रोशे किम् । पुत्रादिनी २ शिशुमारी । पुत्रपुत्रादिनी २ नागी ॥ ह्रादर्हस्वरस्यानु नवा ॥ १ । ३ । ३१ ॥ स्वरात् पराद्द्वित्वम् । अर्कः २ । ब्रह्म २ । अन्विति किम् ? प्रोर्णुनाव । दर्शनमित्यत्र द्वित्वे प्राप्ते ॥ न रात् स्वरे ॥ १ । ३ । ३७ ॥ शिटो द्वित्वम् । दर्शनम् ॥ ह्रस्वोऽपदे वा ॥ १ । २ । २२ ॥ इवर्णादीनामस्वे स्वरे न चेत् तौ निमित्तनिमित्तिनावेकत्र पदे स्याताम् ॥ नदि एषा । ह्रस्वविधानादसन्धिः । अत एव ह्रस्वस्यापि ह्रस्वः । नद्येषा । अपदे किम् । नद्यौ । नद्यर्थः ॥ एदैतोऽयाय् ॥ १ । २ । २३ ॥ स्वरे यथासङ्ख्यम् । नयनम् । नायकः ॥ ओदौतोऽवाव् ॥ १ । २ । २४ ॥ स्वरे यथासङ्ख्यम् । लवनम् । लावकः ॥ स्वरे वा ॥ १ । ३ । २४ ॥ अवर्णभोभगोऽघोभ्यः परयोः पदान्तस्थयोर्वययोः स्वरे परे लुग्वा स चासन्धिः । पट इह । पटविह । त इह । तयिह ॥ य्यक्ये ॥ १ । २ । २५ ॥ ओदौतोः क्यवर्जे यादौ प्रत्यये परे यथासङ्ख्यमवावौ स्याताम् । गव्यम् । नाव्यति । अक्य इति किम् । औयत । प्रत्यये किम् । गोयूतिः । क्रोशद्वये गव्यूतिरिति पृषोदरादित्वात् ॥ क्षय्यजय्यौ शक्तौ ॥ ४ । ३ । ९० ॥ अत्र येऽय् निपात्यते । क्षेतुं शक्यं क्षय्यम् । जेतुं शक्यं जय्यम् । शक्तौ किम् । क्षेयम् । जेयम् क्रय्यः क्रयार्थे ॥ ४ । ३ । ९१ ॥ क्रयाय प्रसारितोऽर्थः क्रय्यः । अन्यत्र क्रेयः ॥ ऋतो रस्तद्धिते ॥ १ । २ । २६ ॥ यादौ । पितरि साधु पित्र्यम् । तद्धिते किम् । जागृयात् ॥ एदोतः पदान्तेऽस्य लुक् ॥ १ । २ । २७ ॥ तेऽत्र । पटोऽत्र । पदान्ते किम् । नयनम् ॥ इतावतो लुक् ॥ ७ । २ । १४६ ॥ अव्यक्तानुकरणस्यानेक-स्वरस्य । पटत् इति पटिति ॥ न द्वित्वे ॥ ७ । २ । १४७ ॥ वीप्सायामनुकरणस्य द्वित्वे सत्यतो न लुक् । पटत्पटदिति ॥ तो वा ॥ ७ । २ । १४८ ॥ द्वित्वे केवलतो वा लुक् । पटत्पटेति ॥ धुटस्तृतीयः ॥ २ । १ । ७६ ॥ पदान्ते । पटत्पटदिति ॥ गोर्नाम्न्यवोऽक्षे ॥ १ । २ । २८ ॥ पदान्तस्थस्यौतः । गवाक्षः ।

नाक्षीति किम् । गोऽक्षाणि ॥ स्वरे वाऽनक्षे ॥ १ । २ । २९ ॥ गोरोतः पदान्तस्यस्यावः स्यात् । गवाग्रम् । गोऽग्रम् । अनक्षे किम् । गोऽक्षम् । ओतः किम् । चित्रग्वर्थः ॥ इन्द्रे ॥ १ । २ । ३० ॥ इन्द्रस्थे स्वरे परे गोरोतः पदान्तस्थस्यावः स्यात् । गवेन्द्रः । गवेन्द्रयज्ञः ॥ वाऽत्यसन्धिः ॥ १ । २ । ३१ ॥ गोरोतः पदान्तस्थस्य स्यात् । गोअग्रम् । गोऽग्रम् । गवाग्रम् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थस्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां स्वरसन्धिः ॥

## ॥ अथाऽसन्धिप्रकरणम् ॥

न सन्धिः ॥ १ । ३ । ५२ ॥ उक्तो वक्ष्यमाणश्च सन्धिर्विरामे न स्यात् । दधि अत्र । तत् लुनाति ॥ प्लुतोऽनितौ ॥ १ । २ । ३२ ॥ स्वरेऽसन्धिः । देवदत्त ३ अत्र न्वसि । अनिताविति किम् । सुश्लोक ३ इति सुश्लोकेति ॥ सम्मत्यसूयाकोपकुत्सनेष्वाद्याऽऽमन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः ॥ ७ । ४ । ८९ ॥ एतद्वृत्तेर्वाक्यस्यादिभूतमामन्त्र्यं द्विः स्यात् द्वित्वे चादौ स्वराणां मध्येऽन्त्यः स्वरः प्लुतो वा स्यात् । सम्मतौ, माणवक ३ माणवक २ शोभनः खल्वसि । असूयायाम्, अभिरूपक ३ अभिरूपक २ रिक्तन्ते आभिरूप्यम् । कोपे, अविनीतक ३ अविनीतक २ इदानीं ज्ञास्यसि जाल्म । कुत्सने, शक्तिके ३ शक्तिके २ रिक्ता ते शक्तिः ॥ भर्त्सने पर्यायेण ॥ ७ । ४ । ९० ॥ कोपेन निन्दाविष्करणं भर्त्सनं, तद्वृत्तेर्वाक्यस्य यदामन्त्र्यं तद्द्विः स्यात् द्वित्वे च क्रमेण पूर्वोत्तरपदयोः स्वरे-

ष्वन्त्यः प्लुतो वा स्यात् ॥ चौर ३ चौर चौर चौर ३ चौर चौर घातयिष्यामि त्वाम् ॥ त्यादेः साकाङ्क्षस्याङ्गेन ॥ ७ । ४ । ९१ ॥ भर्त्सनार्थे वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य वाक्यान्तराकाङ्क्षस्य अङ्ग इति निपातेन युक्तस्य प्लुतो वा स्यात् । अङ्ग कूज ३ (२) इदानीं ज्ञास्यसि जाल्म । त्यादेः किम् । अङ्ग देवदत्त मिथ्या वदसि । साकाङ्क्षस्य किम् । अङ्ग पच ॥ क्षियाशीः प्रैषे ॥ ७ । ४ । ९२ ॥ क्षिया आचारभ्रेषः । एतद्वृत्तेर्वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य प्लुतो वा भवति । क्षियायां, स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति । आशिषि, सिद्धान्तमध्येषीष्ठा ३ व्याकरणं च तात । असत्कारपूर्वकव्यापारणायाम्, त्वं ह पूर्वं ग्रामं गच्छ ३ चैत्रो दक्षिणम् २ ॥ चितीवार्थे ॥ ७ । ४ । ९३ ॥ सादृश्यार्थे चिति प्रयुक्ते वाक्यस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । अग्निश्चित् भाया ३ त् अग्निरिवेत्यर्थः ॥ प्रतिश्रवणनिगृह्याऽनुयोगे ॥ ७ । ४ । ९४ ॥ एतद्वृत्तेर्वाक्यस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । परोक्ताभ्युपगमे, गां मे देहि भो हन्त ते ददामि ३ (२) स्वयं प्रतिज्ञाने नित्यः शब्दो भवितुमर्हति ३ (२) श्रवणाभिमुख्ये, भो देवदत्त किं मार्ष ३ (२) उपालम्भे, अद्य श्राद्धमित्यात्थ ३ (२) ॥ विचारे पूर्वस्य ॥ ७ । ४ । ९५ ॥ विचारः संशयः । तद्विषये संशय्यमानस्य यत्पूर्वं तस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् अहिर्नु ३ रज्जुर्नु २ ॥ ओमः प्रारम्भे ॥ ७ । ४ । ९६ ॥ स्वरः प्लुतो वा स्यात् । ओ ३ म् २ ऋषभं प्रणमत । प्रारम्भे किम् । ओम् ददामि ॥ हेः प्रश्नाख्याने ॥ ७ । ४ । ९७ ॥ स्वरः प्लुतो वा । अकार्षीः कटं मैत्र, अकार्षं हि ३ (२) उत्तरेण सिद्धे नियमार्थमिदम् ॥ प्रश्ने च प्रतिपदम् ॥ ७ । ४ । ९८ ॥ प्रश्नप्रश्नाख्यानार्थस्य वाक्यस्य यत्पदं तस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा स्यात् । प्रश्ने, अगमः ३ पूर्वां ३ न् ग्रामा ३ न् देवदत्त ३ । (२) प्रश्नाख्याने, अगम ३ म् पूर्वां ३ न् ग्रामा ३ न् जिनदत्त ३ (२) दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत् ॥ ७ । ४ । ९९ ॥ वाक्यस्य यः स्वरेष्वन्त्यः स्वरो दूरादामन्त्र्यार्थपदस्थो गुरुरनन्त्योऽपि ऋद्वर्जस्वरश्च ऌकारश्चैकः प्लुतो वा

स्यात् ॥ आगच्छ भो देवदत्त ३ (२) सक्तून् पिब दे३वदत्त देवद३त्त देवदत्त ३ वा । आगच्छ भोः कल्ह३सशिख (२) । कृष्णमि ३त्र (२) ॥ हेहैष्वेषामेव ॥ ७ । ४ । १०० ॥ दूरादामन्त्र्यस्य सम्बन्धिषु स्वरः प्लुतो वा स्यात् है३मैत्र आगच्छ (२) आगच्छ मैत्र हे ३ (२) ॥ अस्त्रीशूद्रे प्रत्यभिवादे भोगोत्रनाम्नो वा ॥ ७ । ४ । १०१ ॥ यदभिवादितो गुरुः कुशलानुयोगादिमद्वाक्यं प्रयुङ्क्ते तत्रास्त्रीशूद्रविषयकस्य वाक्यस्य स्वरेष्वन्त्यः स्वरो भोसो गोत्रस्य नाम्नो वामन्त्र्यस्यांशः प्लुतो वा स्यात् ॥ अभिवादयेऽहं मैत्रोऽहं भोः, आयुष्मानेऽधि भोः ३ (२) अभिवादयेऽहं गार्ग्यं, आयुष्मानेऽधि गार्ग्य ३ (२) राजन्यविशोरपि गोत्रत्वम् नाम्नः, आयुष्मानेऽधि देवदत्त ३ (२) प्रश्नार्चाविचारे च सन्धेयसन्ध्यक्षरस्यादिदुत्परः ॥ ७ । ४ । १०२ ॥ एषु प्रत्यभिवादे च वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यस्वरस्य सन्धेयसन्ध्यक्षरस्य प्लुतो भवन् आकार इदुत्परः प्लुतो भवति ॥ एदैतोरिकारपरः ओदौतोरुकारपरः । प्रश्ने, अगम ३ः, पूर्वा ३न्, ग्रामा ३ न्, अग्निभूता ३ इ । पटा ३ उ । अर्चायां, शोभनः स्वल्वसि अग्निभूता ३ इ । पटा ३ उ । विचारे, वस्तव्यं किं निर्ग्रन्थस्य सागारिका ३ इ । उतानगारिके । प्रत्यभिवादे, आयुष्मानेऽधि अग्निभूता ३ इ । पटा३उ । सन्धेयेति किम् । कच्चि ३ त्, कुशल३म्, भवत्यो ३ः कन्ये ३ ॥ तयोर्य्वौ स्वरे संहितायाम् ॥ ७ । ४ । १०३ ॥ प्लुताकारात् परयोरिदुतोः स्वरेपरे संहितायां य्वौ स्याताम् । अगमः ३, अग्निभूता ३ यत्रागच्छ । अगमः ३ । पटा ३ वत्रागच्छ । संहितायां किम् । अग्रा ३ इन्द्रम् । स्वे दीर्घत्वस्यास्त्रे स्वरे ह्रस्वत्वस्य बाधनार्थं वचनम् ॥ इ ३ वा ॥ १ । २ । ३२ ॥ प्लुतः स्वरे परेऽसन्धिः । लुनीहि ३ इति लुनीहीति । उभयत्र विभाषेयम् ॥ ईदूदेद्द्विवचनम् ॥ १ । २ । ३४ ॥ ई ऊ ए इत्येवमन्तं द्विवचनम् स्वरे परेऽसन्धिः । मुनी इह । । साधू एतौ । माले इमे । पचेते इति ॥ अदोमुमी ॥ १ । २ । ३५ ॥ स्वरे असन्धी स्याताम् । अमुमुईचः । अमी अश्वाः ॥ चादिः स्वरोऽनाङ् ॥ १ । २ । ३६ ॥ स्वरेऽसन्धिः स्यात् । अ अपेहि । इ इन्द्रं पश्य । आ एवं किल मन्यसे । आ एवं नु तत् । अनाङिति किम् ।

आ उष्णमौष्णम् । "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥ १ ॥ ओदन्तः ॥ १ । २ । ३७ ॥ चादिः स्वरेऽसन्धिः । अहो अत्र । सौ नवेतौ ॥ १ । २ । ३८ ॥ सिनिमित्त ओदन्त इतौ वासन्धिः । पटो इति पटविति ॥ ऊँ चोञ् ॥ १ । २ । ३९ ॥ उञ् चादिरितो वा सन्धिरसन्धौ चोञ् ऊँ वा स्यात् । उ इति । ऊँ इति । विति ॥ अञ्वर्गात् स्वरे वोऽसन् ॥ १ । २ । ४० ॥ पर उञो वा स्यात् । क्रुङ् वास्ते । क्रुङ्ङ् उ आस्ते असत्त्वाद्द्वित्वम् ॥ अइउवर्णस्यान्तेऽनुनासिकोऽनीदादेः ॥ १ । २ । ४१ ॥ पदान्ते वा स्यात् । सामँ २ । कुमारीँ २ । मधुँ २ । ईदूदेदिसादिसूत्रसम्बन्धिनो निषेधः किम् । अग्नी । अमी । किमु ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थतादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां असन्ध्यधिकारः ॥

---

## ॥ अथ व्यञ्जनसन्धिः ॥

तृतीयस्य पञ्चमे ॥ १ । ३ । १ ॥ पदान्तस्यानुनासिको वा स्यात् । ककुम्मण्डलम् । ककुब्मण्डलम् ॥ प्रत्यये च ॥ १ । ३ । २ ॥ पदान्तस्थस्य तृतीयस्य पञ्चमे नित्यमनुनासिकः । वाङ्मयम् । च उत्तरत्र वानुवृत्त्यर्थः ॥ ततो हश्चतुर्थः ॥ १ । ३ । ३ ॥ पदान्तस्थात् पूर्वसवर्गो वा ॥ वाग्घीनः । वाग्हीनः तृतीयात् किम् । प्राङ् हसति ॥ अघोषे प्रथमोऽशिटः ॥ १ । ३ । ५ ॥ धुटः स्यात् । भेत्ता । प्रथमादधुटि शश्छः ॥ १ । ३ । ४ ॥ पदान्तस्थाद्वा स्यात् । वाक्छूरः । वाक्शूरः ॥ नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे ॥ १ । ३ । ८ ॥ पदान्तस्थस्य-

चटते सद्वितीये परे शषसाः स्युः । भवांश्चरः । भवाँश्चरः । भवांश्छ्यति२ । भवांष्टकः २ । भवांष्ठकारः २ । भवां-स्तनुः २ । भवांस्थुडति २ । अप्रशान इति किम् ? । प्रशान् चरः । अधुट्पर इति किम् ! । भवान्त्सरुकः । पदान्त इत्येव । भवन्तः ॥ पुमोऽशिट्यघोषेऽख्यागि रः ॥ १ । ३ । ९ ॥ अधुट्परेऽनुस्वारानुनासिकौ च पूर्वस्य । पुमिति पुंसोः सलुक्यनुकरणं पुंर्कोकिल इति जाते ॥ पुंसः ॥ २ । ३ । ३ ॥ रेफस्य कखपफेषु सः स्यात् । पुंस्कोकिलः २ । पुंस्पुत्रः २ । अशिटि किम् । पुंशिरः । अघोषे किम् । पुंदासः । अधुट्परे किम् । पुंक्षीरम् । अख्यागीति किम् । पुं-ख्यानम् ॥ नॄनः पेषु वा ॥ १ । ३ । १० ॥ नस्य रः स्यात् अनुस्वारानुनासिकौ च पूर्वस्य । नॄंर् पाहि इति जाते ॥ ॥ रः कखपफयोः ≍क ≍पौ ॥ १ । ३ । ५ ॥ पदान्तस्य यथासङ्ख्यं वा स्याताम् । नॄं≍पाहि, नॄँ≍पाहि ॥ रः पदान्ते विसर्गस्तयोः ॥ १ । ३ । ५३ ॥ विरामाघोषयोः । नॄंःपाहि । नॄँःपाहि । नॄन् पाहि ॥ शषसे शषसं वा ॥ १ । ३ । ६ ॥ पदान्ते रस्य कश्शेते । कः शेते । कष्षण्ढः । कः षण्ढः । कस्साधुः । कः साधुः ॥ चटते सद्वितीये ॥ १ । ३ । ७ ॥ पदान्ते रस्य । यथासङ्ख्यं शषसा नित्यं स्युः ॥ कश्चरः । कश्छत्रः । कष्टः । कष्ठः । कस्तः । कस्थः ॥ द्विः कानः कानि सः ॥ १ । ३ । ११ ॥ अनुस्वारानुनासिकौ च पूर्वस्य । कांस्कान् । काँस्कान् । द्विरुक्तस्येति किम् । कान् कान् पश्यति ॥ तौ मुमो व्यञ्जने स्वौ ॥ १ । ३ । १४ ॥ म्वागमस्य पदान्तस्थस्य च मस्य व्यञ्जने परे त-स्यैव स्वावनुस्वारानुनासिकौ क्रमेण स्याताम् । चंक्रम्यते । चङ्क्रम्यते । त्वं करोषि । त्वङ्करोषि । कं वः । कँव्वः ॥ म-नयवलपरे हे ॥ १ । ३ । १५ ॥ पदान्तस्य मस्यानुस्वारानुनासिकौ स्वौ क्रमात् स्तः । किं ह्मलयति । किम्ह्मलयति । किं ह्नुते । किन्ह्नुते । किं ह्यः । किँय्ह्यः । किं ह्वलयति । किँव्ह्वलयति । किं ह्लादते किँल्ह्लादते ॥ सम्राट् ॥ १ । ३ । १६ ॥ समो मस्य राजतौ क्विबन्ते परे अनुस्वाराभावो निपात्यते । सम्राट् । सम्राजौ ॥ स्सटि समः ॥ १ । ३ । १२ ॥ सः स्या-दनुस्वारानुनासिकौ च पूर्वस्य क्रमेण । संस्कर्त्ता । सँस्कर्त्ता ॥ लुक् ॥ १ । ३ । १३ ॥ समो मस्य स्सटि स्यात् । स-

स्कर्सा ॥ ङ्णोः कटावन्तौ शिटि न वा ॥ १ । ३ । १७ ॥ पदान्तस्थयोः । प्राङ्क्छेते । प्राङ्क्शेते । प्राङ्शेते । सुग-
ण्ट्छेते । सुगण्ट्सेते सुगण्शेते ॥ शिट्याद्यस्य द्वितीयो वा ॥ १ । ३ । ५९ ॥ प्राङ्ख्शेते । अफ्सराः । अप्सराः
॥ ङ्नः सः त्सोऽश्चः ॥ १ । ३ । १८ ॥ पदान्तस्थात् वा ॥ षट्त्सीदन्ति । षट् सीदन्ति । भवान्त्साधुः । भवान् सा-
धुः । श्चावयवश्चेत्सो न स्यादिति किम् । षट् श्च्योतन्ति ॥ नः शि ञ्च् ॥ १ । ३ । १९ ॥ पदान्तस्थस्य वा स्यात् ।
भवाञ्च्छूरः । भवाञ्च् शूरः । भवाञ् शूरः । धुटो धुटीति लुकि भवाञ्छूरः । अश्च इसेव । भवाञ्श्चोतति ॥ ह्रस्वान्-
ङणनो द्वे ॥ १ । ३ । २७ ॥ पदान्तस्य स्वरे परे स्याताम् । क्रुङ्ङिह । सुगण्णिह कुर्वन्नास्ते ॥ स्वरेभ्यः ॥ १ । ३
। ३० ॥ छस्य द्वित्वम् । इच्छति । बहुवचनात् पदान्त इति निवृत्तम् ॥ अनाङ्माङो दीर्घाद्वाच्छः ॥ १ । ३ । २८
॥ पदान्तस्थाद् द्वे स्याताम् । कन्याच्छत्रम् । कन्याछत्रम् । अनाङ्माङ इति किम् । आच्छाया । माच्छिदत् ॥ प्लुता-
द्वा ॥ १ । ३ । २९ ॥ पदान्तस्याद्दीर्घस्थानाच्छस्य द्वे रूपे स्याताम् ॥ आगच्छ भो इन्द्रभूते ३ च्छत्रमानय, छत्र-
मानय ॥ शिटः प्रथमद्वितीयस्य ॥ १ । ३ । ३५ ॥ द्वित्वं वा स्यात् । त्वं करोषि । त्वं करोषि । त्वं खनसि । त्वं
खनसि ॥ ततः शिटः ॥ १ । ३ । ३६ ॥ वा द्वित्वम् । तच्छ्शेते । तच् शेते । प्रथमद्वितीयाभ्यां किम् । भवान् साधुः
॥ म्नां धुड्वर्गेऽन्त्योऽपदान्ते ॥ १ । ३ । ३९ ॥ निमित्तस्यैवान्तु स्यात् । गन्ता । कम्पिता । बहुवचनं वर्णान्तरवा-
धनार्थम् । तेन कुर्वन्तीति सिद्धम् । अन्वित्यधिकाराद् व्यक्ता ॥ शिड्हेऽनुस्वारः ॥ १ । ३ । ४० ॥ अपदान्त-
स्थानां म्नामनु स्यात् । पुंसि । दंशः । बृंहणम् ॥ उदः स्थास्तम्भः सः ॥ १ । ३ । ४४ ॥ लुक् स्यात् ॥ उत्थाता ।
उत्तम्भिता ॥ तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ ॥ १ । ३ । ६० ॥ यथासङ्ख्यम् ॥ तच्शेते । तच्चारु ।
पेष्टा । तट्टीका । ईड्डे ॥ सस्य शषौ ॥ १ । ३ । ६१ ॥ श्चवर्गष्टवर्गाभ्यां योगे यथासङ्ख्यं स्याताम् ॥ श्चोतति । दो-
ष्णु । वल्भणिष ॥ न शात् ॥ १ । ३ । ६२ ॥ तवर्गस्य चवर्गः ॥ अश्नाति । प्रश्नः ॥ पदान्ताट्टवर्गादनाम्नगरी-

नवतेः ॥ १ । ३ । ६३ ॥ तवर्गस्य सस्य टवर्गषौ न स्याताम् ॥ षट्नयाः । षट्सु । अनाम्नगरीनवतेरिति किम् । षण्णाम् । षण्णगरी । षण्णवतिः ॥ षि तवर्गस्य ॥ १ । ३ । ६४ ॥ पदान्तस्थस्य टवर्गो न स्यात् । तीर्थकृत् षोडशः शान्तिः ॥ लि लौ ॥ १ । ३ । ६५ ॥ पदान्तस्थस्य तवर्गस्य स्याताम् । तल्लूनम् । भवाँल्लुनाति । "आसन्नः" इ-त्येव सिद्धे द्विवचनमन्यत्र अनुनासिकस्थानेऽप्यननुनासिकार्थम् । अप्ताभिः ॥ व्यञ्जनात् पञ्चमान्तस्थायाः सरूपे वा ॥ १ । ३ । ४७ ॥ लुक् ॥ क्रुङ्ङौ । क्रुङौ । क्रुङ्ङौ । आदित्यो देवतास्य । आदित्यः । आदित्य्यः ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थतादिगुणोपेतवृद्धि-
चन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छा-
चार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां व्यञ्जनसन्धिः ॥

## ॥ अथ रेफसन्धिः ॥

॥ ख्यागि ॥ १ । ३ । ५४ ॥ पदान्तस्थस्य रस्य विसर्ग एव । कः ख्यातः ॥ शिट्यघोषात् ॥ १ । ३ । ५५ ॥ पदान्तस्थस्य रस्य विसर्ग एव स्यात् । वासः क्षौमम् । अद्भिः प्सातम् ॥ व्यत्यये लुग्वा ॥ १ । ३ । ५६ ॥ शिटः परोऽघोष इति व्यत्ययः, तत्र सति पदान्तस्थस्य रस्य लुग्वा स्यात् । चक्षुश्च्योतति । चक्षु-श्श्च्योतति । चक्षुः श्च्योतति ॥ नमस्पुरसो गतेः कखपफि रः सः ॥ २ । ३ । १ ॥ नमस्कृत्य । पुरस्कृत्य । गतेः किम् । नमः कृत्वा । साक्षादादित्वान्नमसो वा गतिसंज्ञा । तिस्रः पुरः करोति । अनव्ययत्वात् पुरोऽसमव्ययमिति न गतिसंज्ञा ॥ तिरसो वा ॥ २ । ३ । २ ॥ गतेरस्य कखपफि सः स्यात् । तिरस्कृत्य । तिरःकृत्य । गतेः किम् । तिरःकृत्वा काष्ठं गतः ॥ शिरोधसः पदे समासैक्ये ॥ २ । ३ । ४ ॥ रः सः स्यात् । शिरस्पदम् । अधस्पदम् ।

समासे किम् । शिरः पदम् । ऐक्य इति किम् । परमशिरः पदम् ॥ अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्य- यस्य ॥ २ । ३ । ५ ॥ रः सः स्यात् तौ चेन्निमित्तनिमित्तिनावेकत्र समासे स्याताम् । अयस्कृत् । यशस्कामः । अयस्कंसः । पयस्कुम्भः । अयस्कुशा । अयस्कर्णी । अयस्पात्रम् । लिङ्गविशिष्टपरिभाषया, पयस्कुम्भी । शुनस्कर्णः । भास्कर इति तु कस्कादिः । कमिग्रहणेनैव कंसे लब्धे कंसग्रहणं ज्ञापयति उणादयोऽव्युत्पन्नानि नामानीति ॥ प्रत्यये ॥ २ । ३ । ६ ॥ अनव्ययस्य रस्य पाशकल्पके सः स्यात् । पयस्पाशम् । पयस्कल्पम् । यशस्कम् ॥ रोः काम्ये ॥२।३।७ ॥ अनव्ययस्य रोरेव काम्यप्रत्यये सः स्यात् । पयस्काम्यति । नियमः किम् । अहः काम्यति ॥ नामिनस्तयोः षः ॥२।३।८॥ पूर्वसूत्रद्वयविषये नामिनः परस्य रस्य षः स्यात् । सर्पिष्पाशम् । सर्पिष्काम्यति । तयोरिति किम् । मुनिः करोति । गीः काम्यति ॥ निर्दुर्बहिराविष्प्रादुश्चतुराम् ॥२।३।९॥ रस्य कखपफि षः स्यात् । निष्कृतम् । इत्यादि। बहुवचनाद्बिसुसोरपि । एकदेशविकृतस्यानन्यत्वान्नैष्कुल्यमित्यादि ॥ सुचो वा ॥ २ । ३ । १० ॥ सुजन्तस्य रस्य कखपफि षो वा स्यात् । द्विष्करोति । द्विः करोति २ । चतुष्फलति ३ ॥ वेसुसोऽपेक्षायाम् ॥ २ । ३ । ११ ॥ स्थानिनिमित्तयो रस्य कखपफि षः स्यात् । सर्पिष्करोति ३ । धनुष्खादति ३ । अपेक्षायां किम् । परमसर्पिःकुण्डम्। इसुसोः प्रत्यययोर्ग्रहणादिह न भवति । मुहुः पठति ॥ नैकार्थेऽक्रिये ॥ २ । ३ ।१२ ॥ न विद्यते क्रिया प्रवृत्तिनिमित्तं यस्य तस्मिन् समानाधिकरणे पदे यत्कखपफं तत्र परे इसुस्प्रत्ययान्तस्य रस्य षो न स्यात् । सर्पिः कालकम् । यजुः पीतकम् । एकार्थ इति किम् । सर्पिष्कुम्भे ३ । अक्रिय इति किम् । सर्पिष्क्रियते ३ ॥ समासेऽसमस्तस्य ॥२।३।१३ ॥पूर्वेण इसुस्प्रत्ययान्तस्य रः कखपफि षः स्यात् । सर्पिष्कुम्भः । धनुष्खण्डम् । समासे इति किम् । तिष्ठतु सर्पिः पिब त्वमुदकम् । असमस्तस्येति किम् । परमसर्पिःकुण्डम् ॥ भ्रातुष्पुत्रकस्कादयः ॥ २ । ३ । १४ ॥ यथासङ्ख्यम् । कृतषत्वसत्वाः साधवः । भ्रातुष्पुत्रः । परमयजुष्पात्रम् । कस्कः । कौतस्कुतः । बहुवचनमाकृतिगणार्थम् ॥ वार्पे-

त्यादयः ॥ १ । ३ । ५८ ॥ यथायोगमकृतद्वित्वाः कृतोत्वाभावाश्च स्युः । अहर्पति । अहः पतिः २ । प्रचेता रा-
जन् । प्रचेतो राजन् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृ-
द्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपो-
गच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां रेफसन्धिः ॥

---

## ॥ अथ स्यादिसन्धिः ॥

॥ देवस् अर्च्य इति स्थिते ॥

॥ सो रुः ॥ २ । १ । ७२ ॥ पदान्ते । उकार इत् । देवर् अर्च्य इति जाते ॥ अतोऽति रोरुः ॥ १ । ३ । २० ॥ अवर्णस्येत्योत्वे, एदोत इत्यकारलुकि देवोऽर्च्यः ॥ घोषवति ॥ १ । ३ । २१ ॥ अतः परस्य पदान्तस्थस्य रोः उः स्यात् ॥ धर्मो जेता । रोरित्यनुबन्धान्नेह । प्रातरत्र । धातर्गच्छ ॥ अवर्णभोभगोअघोर्लुगसन्धिः ॥ १ । ३ । २२ ॥ पदान्तस्थस्य रोर्घोषवति । देवा यान्ति । भो यासि । भगो हस । अघो वद । भोस् भगोस् अघोस् इति आमन्त्रणार्थाः सकारान्ता अव्ययाः ॥ व्योः ॥ १ । ३ । २३ ॥ अवर्णात् परयोः पदान्तस्थयोर्व्योर्घोषवति लुक् स्यात् ॥ वृक्ष याति । अध्य याति । वृक्षवृश्चमध्ययं चाचक्षाणौ वृक्षव् अध्यय् ॥ रोर्यः ॥ १ । ३ । २६ ॥ अवर्णभोभगोअघोभ्यः परस्य स्वरे परे ॥ कयास्ते । भोयत्र । भगोयत्र । अघोयत्र । स्वरे वेति पक्षे यत्लोपे क आस्ते । भो अत्र यासि ॥ अस्प-
ष्टावर्णत्वनुञि वा ॥ १ । ३ । २५ ॥ अवर्णभोभगोअघोभ्यः परयोः पदान्तस्थयोर्वयोरीषत्स्पृष्टतरौ यथासं

स्वरे परे स्याताम् । अवर्णात्तु परयोर्य्वोरुस्त्ववर्जे स्वरे परेऽस्पष्टौ वा स्याताम् ॥ पटवुँ २ । असावुँ २ । कयुँ २ । भोयँत्र २ । इत्यादि । पटविह ३ । तयिह । ३ ॥ अह्नः ॥ २ । १ । ७४ ॥ पदान्ते रुः स्यात् ॥ स चासन् परे स्यादिविधौ च पूर्वस्मिन् । दीर्घाहा निदाघः । अहोभ्याम् ॥ रो लुप्यरि ॥ २ । १ । ७५ ॥ पदान्तेऽह्नोऽरेफे परे स्यादेर्लुपि सत्यां रः स्यात् ॥ रुत्वापवादः । अहरधीते अहर्दत्ते । लुपीति किम् । हे दीर्घाहोऽत्र । अरीति किम् । अहोरूपम् ॥ ॥ रो रे लुग्दीर्घश्चादिदुतः ॥ १ । ३ । ४१ ॥ अग्नी । पुना रमते । अग्नी रथेन । पटू राजा । अन्विति किम् । मनोरथः ॥ ढस्तड्ढे ॥ १ । ३ । ४२ ॥ तन्निमित्ते ढे ढस्यानु लुक् दीर्घश्चादिदुतः । माढिः । लीढम् । गूढम् । तड्ढे किम् । मधुलिड् ढौकते ॥ तदः सेः स्वरे पादार्था ॥ १ । ३ । ४५ ॥ लुक् स्यात् । नियतपरिमाणमात्राक्षरपिण्डः पादः । सैष दाशरथी रामः । सा चेत् पादपूरणीति किम् । स एष भरतो राजा ॥ एतदश्च व्यञ्जनेऽनग्नञ्समासे ॥ १ । ३ । ४६ ॥ तदः सेर्लुक् स्यात् । एष दत्ते । स लाति । अनग्नञ्समासे किम् । एषकः कृती । सको याति । अनेषो याति । असो वाति ॥ " संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ १ ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां स्यादिसन्धिः ॥

## ॥ अथ स्वरान्ताः पुल्लिङ्गाः ॥

॥ अधातुविभक्तिवाक्यमर्थवन्नाम ॥ १ । १ । २७ ॥ शब्दरूपम् । इति नामत्वे ततः सौ रुत्वे विसर्गे च

देवः ॥ **समानामर्थेनैकः शेषः** ॥ ३ । १ । ११८ ॥ सहोक्तौ गम्यायामन्ये निवर्त्तन्ते ॥ **स्यादावसङ्ख्येयः** ॥ ३ । १ । ११९॥ सर्वस्मिन् स्यादौ विभक्तौ तुल्यरूपाणां सहोक्तावेकः शिष्यते न तु सङ्ख्येयवाची । इति वैकशेषे द्विवचने देवौ । बहुवचने देव जस् इति स्थिते ॥ **अत आः स्यादौ जस्भाम्ये** ॥१।४।१॥ लुगस्याऽदेत्यपदे । इत्यस्यापवादः । देवाः ॥ **समानादमोऽतः** ॥ १ । ४ । ४६ ॥ स्यादेर्लुक् स्यात् । देवम् । देवौ ॥ **शसोऽता सश्च नः पुंसि** ॥ १ । ४ । ४९ ॥ शसोऽता सह पूर्वसमानस्य दीर्घस्तत्सन्नियोगे च पुंसि सो नः ॥ देवान् ॥ **टाङसोरिनस्यौ** ॥ १ । ४ । ५ ॥ आत्परयोः । देवेन । देवाभ्याम् । ३ ॥ **भिस ऐस्** ॥ १ । ४ । २ ॥ आत्परस्य स्यादेः ॥ देवैः । ऐस्करणं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषाया अनित्यत्वे गमकम् । तेनातिजरसैः ॥ **ङेङस्योर्यातौ** ॥ १ । ४ । ६ ॥ आत्परयोः ॥ देवाय ॥ **एद्बहुस्भोसि** ॥ १ । ४ । ४ ॥ अतः स्यादौ । देवेभ्यः । २ । देवात् । देवस्य । देवयोः ॥ २ ॥ **ह्रस्वापश्च** ॥ १ । ४ । ३२ ॥ ह्रस्वान्तादाबन्तात् स्त्रीदूदन्ताच्च परस्यामो नाम् स्यात् ॥ **दीर्घो नाम्यतिसृचतसृष्रः** ॥ १ । ४ । ४७ ॥ पूर्वसमानस्य । देवानाम् । अष् इति प्रतिषेधान्नकारव्यवधानेऽपि दीर्घः । पञ्चानाम् । देवे । देव सु इत्यत्रैत्वे कृते ॥ **नाम्यन्तस्थाकवर्गात्पदान्तः कृतस्य सः शिड्नान्तरेऽपि** ॥ २ । ३ । १५ ॥ कृतस्थस्य वा षः स्यात् । देवेषु । शिटा नकारेण चेति प्रत्येकं वाक्यपरिसमाप्तेर्नेह । निंस्से । शिड्ग्रहणेनैव सिद्धे नकारोपादानं प्रस्थानानुस्वारव्यवाये निषेधार्थम् । पुंसु । सुहिन्सु । पदमध्ये किम् । दधिसेक् ॥ **वृत्त्यन्तोऽसषे** ॥ १ । १ । २५ ॥ परार्थाभिधायी समासादिर्वृत्तिस्तस्या अन्तः पदं न स्यात् । सस्य षत्वे तु पदमेव । इति सेक् शब्दे सस्य पदादित्वम् ॥ **अदेतः स्यमोर्लुक्** ॥ १ । ४ । ४४ ॥ आमन्त्र्यवृत्तेः । हे देव । स्यादेशत्वेनैवामोऽपि लुक्सिद्धौ पृथग्वचनं अम एवादेशस्य लुगिति नियमार्थम् । तेन कतरत् इत्यादि सिद्धम् । एवं जिनादयः । सर्व, विश्व, उभ, उभयट्, अन्य, अन्यतर, इतर, डतर, डतम, त्व, त्वत्, नेम, समसिमौ सर्वार्थौ, पूर्वपरावरदक्षिणोत्तरापराधराणि व्यव-

स्थायाम्, स्वमज्ञातिधनाख्यायाम्, अन्तरं बहिर्योगोपसंव्यानयोरपुरि, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, भवतु, अस्मद्, किम्, इत्यसंज्ञायां सर्वादिः । सर्वः । सर्वौ २ ॥ जस इः ॥ १ । ४ । ९ ॥ सर्वादेरदन्तस्य । सर्वे । तृतीयैकवचने सर्वेन इति जाते ॥ रषृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे ॥ २ । ३ । ६३ ॥ सर्वेण । निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वमेकपदत्वमित्यतो नेह । रामनाम । लादिवर्जनं किम् । विरलेन । मूर्च्छनं । दृढेन । तीर्थेन । रशना । रसना । अनन्त्यस्येति सर्वान् ॥ सर्वादेः स्मैस्मातौ ॥ १ । ४ । ७ ॥ अदन्तस्य ङेङस्योः । सर्वस्मै । सर्वस्मात् ॥ अवर्णस्यामः साम् ॥ १ । ४ । १५ ॥ सर्वादेः । एषे परषे च । सर्वेषाम् ॥ ङेः स्मिन् ॥ १ । ४ । ८ ॥ सर्वादेरदन्तस्य । सर्वस्मिन् । शेषं देववत् । तत्संबन्धिविज्ञानात् सर्वादिकार्यं गौणे न भवति अतिसर्वाः । अतिसर्वायेत्यादि । एवं विश्वादयोऽप्यदन्ताः । सहचरितासहचरितयोः सहचरितस्यैव ग्रहणमिति न्यायाद्विश्वशब्दः सर्वार्थो गृह्यते न जगद्वाची॥ उभशब्दस्य द्विवचनस्वार्थिकप्रत्ययविषयत्वात् स्याद्यादयो न सम्भवन्ति गणपाठस्तु हेत्वर्थप्रयोगे सर्वविभक्त्यर्थः । उभौ २ हेतू । उभाभ्याम् ३ हेतुभ्याम् । उभयोः २ हेत्वोः । उभयट्ककारोऽन्यर्थः । उभयो मणिः । उभये देवमनुष्याः । नास्य द्विवचनम् । अन्यस्मै । अन्यतरस्मै । डतरेणैव सिद्धेऽस्योपादानं डतमप्रत्ययान्तान्यतमशब्दस्य सर्वादित्वनिवृत्त्यर्थम् । अन्यतमाय । इतरस्मै । डतरडतमौ प्रत्ययौ । तयोः स्वार्थिकत्वात् प्रकृतिद्वारेणैव सिद्धे पृथगुपादानमत्र प्रकरणेऽन्यस्वार्थिकप्रत्ययान्तानामग्रहणार्थमन्यादिलक्षणदार्थं च। कतरस्मै। कतमस्मै । नेह । सर्वतमाय । त्वशब्दोऽन्यार्थः। त्वस्मै । त्वच्छब्दः समुच्चयपर्यायः। गणपाठे तस्य हेत्वर्थप्रयोगे सर्वविभक्त्यादयः प्रयोजनम् । त्वतं हेतुमित्यादि अज्ञातास्वतः त्वकतः नेमशब्दोऽर्धार्थः ॥ समसिमौ सर्वार्थौ । तसो नेह । समाय देशाय यावति । स्वाभिधेयापेक्षावधिनियमो व्यवस्था । तत्र पूर्वादयः सप्त सर्वादयः । नेह । दक्षिणाय गायकाय देहि । दक्षिणायै द्विजाः स्पृहयन्ति । स्वशब्द आत्मात्मीययोर्थस्त्वस्मै रोचते तस्त्वस्मै ददाति । ज्ञातौ धने च न । स्वाय दातुं स्वाय

स्पृहयति । बहिर्योगेन बाह्येन वा योगे उपसंव्याने अपसंव्यीयमाने चार्थेऽन्तरशब्दो न चेद्बहिर्योगेऽपि पुरि वर्तते । अ-
न्तरस्मै पटाय । अन्तरस्मै गृहाय । नेह । अन्तरायै पुरे कुप्यति । अथवानयोः पर्वतयोरन्तरात् तापस आयातो मध्या-
दित्यर्थः । त्यकौ । द्वियुष्मद्भवत्स्मदां स्यादाद्यो न सम्भवन्तीति सर्वविभक्त्यादयः प्रयोजनं गणपाठस्य । सर्वेऽप्य-
मी संज्ञायां न सर्वादयः । तेन सर्वो नाम कश्चित् तस्मै सर्वाय ॥ नवभ्यः पूर्वेभ्य इ स्मात् स्मिन् वा ॥ १ । ४ ।
१६ ॥ अदन्तेभ्यो जस्ङसिङीनाम् ॥ पूर्वे । पूर्वाः । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । शेषं सर्ववत् । एवं परादयः
॥ न सर्वादिः ॥ १ । ४ । १२ ॥ द्वन्द्वे सर्वादिः । पूर्वापरात् । पूर्वापरे । कतरकतमानाम् । कतरकतमकाः । अत्र
सर्वादित्वनिषेधात् कप्रत्यये स्वार्थिकप्रत्ययान्ताग्रहणात् द्वन्द्वे वेति जस इर्न स्यात् ॥ द्वन्द्वे वा ॥ १ । ४ । ११ ॥
द्वन्द्वसमासस्थस्यादन्तस्य सर्वादेः जस इर्वा स्यात् । पूर्वापरे । पूर्वापराः । शेषं देववत् ॥ तृतीयान्तात्पूर्वावरं योगे ॥
॥ १ । ४ । १३ ॥ परं सर्वादि न स्यात् । मासेन पूर्वाय । मासपूर्वाय । दिनेनावराय । दिनावराय । सम्बन्धे किम् ।
यास्यति चैत्रो मासेन पूर्वस्मै दीयतां कम्बलः ॥ तीयं ङित्कार्ये वा ॥ १ । ४ । १४ ॥ सर्वादिः । द्वितीयस्मै द्विती-
यायेत्यादि । शेषं देववत् । अर्थवतः प्रदिष्टोक्तस्य च ग्रहणान्नेह पटुजातीयाय । मुखतीयाय ॥ नेमार्धप्रथमचरम-
तयायाल्पकतिपयस्य वा ॥ १ । ४ । १० ॥ अदन्तस्य जस इः । नेमे नेमाः । शेषं सर्ववत् । अर्धे अर्धाः । प्रथमे
प्रथमाः । चरमे चरमाः । तयायौ प्रत्ययौ । द्वितये द्वितयाः । द्वये द्वयाः । अल्पे अल्पाः । कतिपये कतिपयाः । शेषं
देववत् । व्यवस्थितविभाषाविज्ञानात् संज्ञायां न स्यात् । अर्धो नाम केचित् । निर्जरः ॥ जराया जरस्वा ॥ २ । १
। ३ ॥ स्वरादौ स्यादौ परे । एकदेशविकृतस्यानन्यत्वात् । जरशब्दस्यापि जरस् । निर्जरसौ । निर्जरसः । २ । निर्ज-
रसम् । इनादीन् बाधित्वा परत्वाज्जरस् । निर्जरसा । निर्जरसैः । निर्जरसः । २ । निर्जरसोः २ । निर्जरसाम् । निर्जरसि
। शेषं पक्षे च देववत् ॥ मासनिशासनस्य शसादौ लुग्वा ॥ २ । १ । १०० ॥ स्यादौ । मासः । मासा । मास्भ्याम्

इति स्थिते ॥ नामसिद्य्व्यञ्जने ॥ १ । १ । २१ ॥ पदं स्यात् । सो रुः । अवर्णभो–इति लुकि । माभ्याम् । ३ । माभिः । माभ्यः । २ । मासः २ । मासोः । २ । मासाम् । मासि । माःसु २ । पक्षे धुटि च देववत् । अयीति किम् । वाच्यति । अन्तर्वर्तिन्या विभक्त्या पदत्वे सिद्धे सिद्ग्रहणं नियमार्थम् । तेन प्रत्ययान्तरे न भवति । भाग्वतम् । दन्तः ॥ दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषन् यकन् शकन् वा ॥ २ । १ । १०१ ॥ शसादौ स्यादौ । दतः । दन्तान् । पादः । पदः । पादान् । इत्यादि । यूषः ॥ अनोऽस्य ॥ २ । १ । १०८ ॥ ङीस्याद्यघुट्स्वरे लुक् । यूष्णः । यूष्णा ॥ नाम्नो नोऽह्नः ॥ २ । १ । ९१ ॥ पदान्ते लुक् स चासन् स्यादिविधौ । यूषभ्याम् । यूषभिः । यूषसु । असत्त्वाद् दीर्घत्वादि न भवति । अनह्नः किम् । अहरेति । अहोरूपम् । अत्र परविधौ रेफत्वयोरसत्त्वान्न लोपः स्यात् । सावकाशं च तदुभयं सम्बोधने ॥ ईङौ वा ॥ २ । १ । १०९ ॥ अनोऽस्य लुक् । यूष्णि यूषणि ॥ पक्षे देववत् ॥ व्यह्नः ॥ सङ्ख्यासायवेरह्नस्याहन्ङौ वा ॥ १ । ४ । ५० ॥ व्यह्नि । व्यहनि । व्यह्ने । शेषं देववत् ॥ एवं सायमह्नः सायाह्नः । विगतमहो व्यह्नः । इत्यदन्ताः । विश्वपाः । शसि ॥ लुगातोऽनापः ॥ २ । १ । १०७ ॥ ङीस्याद्यघुट्स्वरे ॥ विश्वपः । विश्वपा । विश्वपे । इत्यादि एवं हाहाः । अनाप इति किम् । शालाः । इत्यादन्ताः । मुनिः ॥ इदुतोऽस्त्रेरीदूत् ॥ १ । ४ । २१ ॥ औता । मुनी । अस्त्रेरिति किम् । अतिस्त्रियौ । कथमतिशस्त्री । अनर्थकत्वात् ॥ जस्येदोत् ॥ १ । ४ । २२ ॥ इदुतः । मुनयः ॥ टः पुंसि ना ॥ १ । ४ । २४ ॥ इदतः मुनिना ॥ ङित्यदिति ॥ १ । ४ । २३ ॥ स्यादाविदुतोरेदोतौ स्याताम् ॥ मुनये । अदितीति किम् । बुद्ध्यै । स्यादौ किम् । शुची ॥ एदोद्भ्यां ङसिङसो रः ॥ १ । ४ । ३५ ॥ वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः । मुनेः २ । ङिर्डौ ॥ १ । ४ । २५ ॥ इदुतः । डकार इत् ॥ डित्यन्त्यस्वरादेः ॥ २ । १ । ११४ ॥ लुक् । व्यपदेशिवदेकस्मिन् । मुनौ । अदिदित्येव । बुद्ध्याम् ॥ ह्रस्वस्य गुणः ॥ १ । ४ । ४१ ॥ आमन्त्र्यार्थस्य सेः ॥ सिना सह ।

हे मुने । श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् इति श्रुतत्वाद् ह्रस्वस्यैव गुणः । स्त्रियमतिक्रान्तोऽतिस्त्रिः ॥ स्त्रियाः ॥ २ । १ । ५४ ॥ इवर्णस्य स्वरादौ प्रत्यये इय् स्यात् । अतिस्त्रियौ । अक्षेरिति ज्ञापकात्परेणापि इयादेशेनेत्कार्यं न बाध्यते । अतिस्त्रयः ॥ वाम्शसि ॥ २ । १ । ५५ ॥ स्त्रिया इवर्णस्य इय् स्यात् । अतिस्त्रियम् । अतिस्त्रिम् । अतिस्त्रियः । अतिस्त्रीन् । अतिस्त्रियोः । अतिस्त्रीणाम् ॥ ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डाः ॥ १ । ४ । ८४ ॥ सख्युरितश्च परस्य शेषस्य स्यात् । सखा प्रियसखा ॥ सख्युरितोऽशावैत् ॥ १ । ४ । ८३ ॥ शेषे घुटि । सखायौ । सखायः । सखायम् । प्रियसखायौ । अशाविति किम् । अतिसखीनि कुलानि । इतः किम् । सख्यौ । इदमेवेद्ग्रहणं ज्ञापयति । नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, एकदेशविकृतमनन्यवदिति च ॥ न नाङिदेत् ॥ १ । ४ । २७ ॥ केवलसखिपतेष्टाया ना ङिति परे एदोत्कः स न स्यात् । सख्या । सख्ये । केवलेति किम् । प्रियसखिना । प्रियसखये ॥ खितिखीतीय उर् ॥ १ । ४ । ३६ ॥ परयोर्ङसिङसोः । सख्युः २ । य इति किम् । प्रियसखेः । खियः । खितीत्यादि किम् । मुख्यः । अपत्यः ॥ केवलसखिपतेरौ ॥१।४।२६ ॥ इदन्तात् ङेः ॥ सख्यौ । केवलेति किम् । प्रियसखौ । सखीमतिक्रान्तोऽतिसखिः । मुनिवत् । लिङ्गविशिष्टपरिभाषाया अनित्यत्वात् नाद् समासान्तः । ऐत्वं तु न सखिशब्दस्य लाक्षणिकत्वात् । पतिः । पत्या । पत्ये । पत्युः । पत्यौ । शेषं मुनिवत् । कतिशब्दो नित्यं बहुवचनान्तः ॥ डत्यतु सङ्ख्यावत् ॥ १ । १ । ३९ ॥ डतिष्णः सङ्ख्याया लुप् ॥ १।४।५४॥ जस्शसोः ॥ कति २ । तत्सम्बन्धिनोरित्येव । प्रियकतयः । प्रियकतीन् ॥ लुप्यय्वृल्लेनत् ॥ ७ । ४ । ११२ ॥ परप्रत्ययस्य लुपि सत्यां लुब्भूतपरनिमित्तकं पूर्वकार्यं न स्यात् य्वृल्लत्वमेनच मुक्त्वा । इति निषेधाभैकारः । लुपीति किम् । गोमान् "नन्ता सङ्ख्या डतिर्युष्मदस्मद स्युरलिङ्गकाः" । इति वचनात् डत्यन्तस्यालिङ्गत्वम् । एवं यतिततिशब्दौ । त्रिशब्दो नित्यं बहुवचनान्तः ॥त्रेस्त्र-

यः ॥१।४।३४॥ आमः । त्रयाणाम् । परमत्रयाणाम् । आम्सम्बन्धिविज्ञानात् । प्रियत्रीणाम् । द्विशब्दो नित्यं द्विवचनान्तः ॥ आद्वेरः ॥ २ ।१।४१॥ त्यदादेः स्यादौ तसादौ च ॥ द्वौ २ ॥ द्वाभ्याम् ३ । द्वयोः २ । अतिद्विर्मुनिवत् सम्बन्धिविज्ञानात् । उडुलोम्नोऽपत्यं पुमान् औडुलोमिः । औडुलोमी । एकत्वे द्वित्वे च मुनिवत् । बहुत्वे लोम्नोऽपत्येष्विति अप्रत्यये उडुलोमशब्दो देववत् । उडुलोमाः । एवं रविकविप्रमुखा मुनिवत् । वातं प्रमिमीते वातप्रमीः । वातप्रम्यौ । वातप्रम्यः । वातप्रमीम् । वातप्रमीन् । वातप्रमी । एवं ययीपपीप्रमुखाः । क्विबन्ते तु अमि शसि ङौ च विशेषः । क्विब्वृत्तेरिति यत्वम् । वातप्रम्यम् । वातप्रम्यः । वातप्रम्यि । बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी । दीर्घङ्याब्व्यञ्जनात् सेः ॥१।४।४५॥ लुक् । इति सिलुक् ॥ दीर्घेति किम् । निष्कौशाम्बिः । अतिखट्वः ॥ स्त्रीदूतः ॥ १।४।२९ ॥ नित्यस्त्रीलिङ्गादीदूदन्तात्परेषां स्यादेर्ङितां यथासङ्ख्यं दैदास्दास्दामः स्युः । बहुश्रेयस्यै । बहुश्रेयस्याः २ । बहुश्रेयस्याम् ॥ नित्यदिद्द्विस्वराम्बार्थस्य ह्रस्वः ॥ १ । ४।४३ ॥ आमन्त्र्यवृत्तेराबन्तस्य सिना सह । हे बहुश्रेयसि । नित्यदिदिति किम् । हे ग्रामणीः । हे सुश्रीः । कुमारीमिच्छति कुमारीवाचरति वा ब्राह्मणः कुमारी ॥ योऽनेकस्वरस्य ॥२।१।५६ ॥ धातोरिवर्णस्य स्वरादौ प्रत्यये ॥ कुमार्यौ । कुमार्यः । कुमार्यम् । कुमार्यै ब्राह्मणाय । कुमारीणाम् । अस्त्रिया इति निर्देशात्परेणापि इयुव्यत्वादिना स्त्रीदूदाश्रितं कार्यं न बाध्यते ॥ खरकुटीव खरकुटी । तस्मै खरकुट्यै ब्राह्मणाय । अतिलक्ष्मीः । अङ्यन्तत्वान्न लुक् । शेषं बहुश्रेयसीवत् । नयतीति नीः ॥ धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये ॥ ३।१।५०॥ नियौ । नियः ॥ निय आम् ॥१। ४ । ५१ ॥ ङेः सप्तम्येकवचनस्य । नियाम् ॥ संयोगात् ॥ २ । १ । ५२॥ धातोरिवर्णोवर्णयोः स्वरादौ प्रत्यये इयुवौ स्याताम् । य्वोरपवादः । सुश्रियौ । सुश्रियः । धातुसम्बन्धिनः संयोगादिति किम् । उन्न्यौ ॥ वेयुवोऽस्त्रियाः ॥ १ । ४ । ३० ॥ इयुवोः स्थानिनौ यौ स्त्रीदूतौ तदन्तात् स्त्रीवर्जात् परेषां स्यादेर्ङितां यथासङ्ख्यं दैदास्दास्दामो वा स्युः ॥ सुश्रियै । सुश्रिये । सुश्रियाः । सुश्रियः ॥ आमो नाम्वा ॥ १

। ४ । ३१ ॥ इयुवस्थानिनौ यौ स्त्रीदूतौ तदन्ताच्छब्दात् परस्य तदतत्संबन्धिनः । सुश्रियाम् । सुश्रीणाम् । सुश्रियाम् । सुश्रियि । प्रकर्षेण ध्यायतीति प्रधीः ॥ क्विब्वृत्तेरसुधियस्तौ ॥ २ । १ । ५८ ॥ क्विबन्तेनैव या वृत्तिस्समासस्तस्याः सुधीवर्जितायाः सम्बन्धिनो धातोरिवर्णोवर्णयोः स्थाने स्वरादौ स्यादौ य्वौ स्याताम् । इयुवोरपवादः । प्रध्यौ । प्रध्यः । प्रध्यम् । प्रध्यः । प्रध्याम् । असुधियः किम् । सुष्ठु ध्यायति सुधीः । सुधियौ । सुधियः । क्विब्वृत्तेरिति किम् । शुद्धा धीर्ययोस्तौ शुद्धधियौ । गतिकारकङस्युक्तानां प्राक् प्रत्ययोत्पत्तेः कृदन्तेन समासः । एवं परमधियौ । दुःस्थिता धीर्ययोस्तौ दुर्धियौ । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति । यवक्रीः । स्वरादौ संयोगादितीयादेशे सुधीवद्रूपाणि । सह खेन वर्त्तते सखः तमिच्छति सखायमिच्छति वा सखीयति ततः क्विप् अल्लोपयल्लोपौ । अल्लोपस्य स्थानिवत्त्वात् योऽनेकस्वरस्येति यत्वे प्राप्ते क्वौ लुप्तं न स्थानिवत् । सखीः । सख्यौ । सुतमिच्छति सुतीः । खितिखीतीय उरित्यत्र दीर्घस्यापि ग्रहणात् । सख्युः २ । सुत्युः । २ । लूनमिच्छति लूनीः । क्षाममिच्छति क्षामीः, प्रस्तीममिति प्रस्तीमीः । एषां ङसिङसोर्यत्वे कृते ॥ स्त्रादेशोऽषि ॥ २ । १ । ६१ ॥ परे कार्ये स्यादिविधौ च कर्त्तव्ये असन् ज्ञेयः । इति नत्वमत्वयोरसत्त्वादुर् । लून्युः २ । क्षाम्युः २ । प्रस्तीम्युः २ । शुष्कीपक्वीशब्दयोस्तु कत्ववत्त्वयोरसत्त्वात् तीत्वेऽपि यत्वाभावान्न उर् । शुष्कियः २ । पक्कियः २ । उन्नीः । उन्न्यौ । उन्न्यः । उन्न्याम् । ग्रामण्याम् । सेनान्याम् । परमं नयति परमनीः । परमन्यौ । परमश्चासौ नीश्चेति विग्रहे परमनीः । परमनियौ । परमनियः । इतीदन्ताः । साधुमुनिवत् । इत्युदन्ताः । हूहूः । हूहौ । हूहः । हूहूम् । हूहून् । अतिचमूः । अतिचम्वौ । शेषं बहुश्रेयसीवत् । सुलूः सुल्वौ । खलपूः । खलप्वौ । अत्र स्याद्युत्पत्तेः प्रागेव क्विबन्तेन समासः । उलूरुश्रीवत् । भूः सुधीवत् । दृन्भवतीति दृन्भूः ॥ दृन्पुनर्वर्षाकारैर्भुवः ॥ २ । १ । ५९ ॥ दृन्नादिभिः सह क्विब्वृत्तिसम्बन्धिनो भुवो धातोरुवर्णस्य स्वरादौ स्यादौ वः स्यात् ॥ दृन्भ्वौ । पुनर्भ्वौ । वर्षाभ्वौ । कारभ्वौ । करभ्वौ । का-

राभ्वौ इत्यादि केचित् । नियमसूत्रमिदं, तेन स्वयम्भुवौ । दृग्भुवौ । औणादिको दृग्भूर्हूहूवत् । कटप्रूः । संयोगादित्युवादेशः । कटप्रुवौ ॥ स्यादौ वः ॥ २ । १ । ५७ ॥ अनेकस्वरस्य धातोरुवर्णस्य स्वरादौ स्यादौ वः स्यात् । उवापवादः । वसुमिच्छति वसूः । वस्वौ । वस्वः । वस्वि । स्यादौ किम् । लुलुवतुः । इत्यूदन्ताः । पितृशब्दे सेडौः । पिता ॥ ॥ अर्डौ च ॥ १ । ४ । ३९ ॥ घुटि ऋतः । पितरौ ॥ ऋतो डुर् ॥ १ । ४ । ३७ ॥ ङसिङसोः । पितुः । पितरि ॥ ॥ ह्रस्वस्य गुणः ॥ १ । ४ । ४१ ॥ हे पितः । कर्त्ता ॥ तृस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्त्रो घुट्यार् ॥ १ । ४ । ३८ ॥ ऋतः शेषे । तृ इति तृन्तृचोर्ग्रहणम् । कर्त्तारौ । नप्तारौ । नेष्टारौ । त्वष्टारौ । क्षत्तारौ । होतारौ । पोतारौ । प्रशास्तारौ । अतिकर्त्तारौ । तृशब्देन नप्त्रादीनामृकारस्यारि सिद्धे पृथग्ग्रहणमर्थवद्ग्रहणपरिभाषां गमयति । व्युत्पत्तिपक्षे नप्त्रादिग्रहणं नियमार्थम् । तेन पित्रादीनां न । केचित्तु प्रस्तोतृ–उन्नेतृ–उद्गातृ–प्रतिहर्तृ–प्रतिस्थातृ–शब्दानामौणादिकानामारं मन्यन्ते । ना । नरौ । नरः । नरम् । नॄन् । नुः २ । न्रोः २ ॥ नुर्वा ॥ १ । ४ । ४८ ॥ नामि दीर्घः । नृणाम् । नॄणाम् ॥ क्रुशस्तुनस्तृच् पुंसि ॥ १ । ४ । ९१ ॥ शेषे घुटि परे । क्रोष्टा । क्रोष्टारौ । २ । क्रोष्टारः । क्रोष्टारम् । प्रियक्रोष्टा । बहिरङ्गपरिभाषाया जागरूकत्वात् ऋन्नित्यदित इति न कच् । घुटि किम् । क्रोष्टून् । शेषे किम् । क्रोष्टो ॥ टादौ स्वरे वा ॥ १ । ४ । ९२ ॥ क्रुशस्तुनस्तृच्पुंसि । क्रोष्ट्रा । क्रोष्टुना । आमि नित्यत्वात् पूर्वं नामादेशे क्रोष्टूनामित्येव । कृताकृतप्रसङ्गि नित्यम् । इति ऋदन्ताः । कॄ तॄ गॄ एषां धातूनामनुकरणे प्रकृतिवदनुकरणमिति विकल्पेनातिदेशात् ऋतां क्ङितीर् इतीरादेशे पदान्ते इति दीर्घे च । कीः किरौ किरः । तीः तिरौ तिरः । गीः गिरौ गिरः । इत्यादि । इरभावे । कॄः क्रौ क्रः । कॄम् कॄन्,इत्यादि । इति । ॠदन्ताः । ऋत्कार्यं लृकारेऽपि । विदा ऋफिडादित्वात् लत्वे । विदलौ । ङसिङसोर्विदुल् । इति लृदन्ताः । क्लृकारैकदेशस्याऽनुकरणे । क्लृः । क्लौ । क्लः । इत्यादि । इति ॡदन्ताः । अतिहेः । हे अतिहे । इत्येदन्ताः ॥ आ रायो व्यञ्जने ॥ २ । १ । ५ ॥ तदतत्सम्बन्धिनि स्यादौ ।

राः । रायौ । राभ्याम् । रासु । हे राः । एवं सुराः । अतिराः । इत्यैदन्ताः ॥ ओत औः ॥ १ । ४ । ७४ ॥ घुटि । गौः । गावौ । गावः । विहितविशेषणाद् ओकारविधानसामर्थ्याच्च चित्रगवः । द्यौः । द्यावौ । द्यावः । प्रियद्यौः । लुनातेर्विचि गुणे, लौः । ओतः किम् । चित्रगुः, इत्यत्र नौत्वम् ॥ आ अम् शसोऽता ॥ १ । ४ । ७५ ॥ ओतः । गाम् । सुगाम् । गाः । द्याम् । स्यादावित्येव । अचिनवम् । इत्योदन्ताः । सुनौः । सुनावौ । सुनावः । इत्यादि । इत्यौदन्ताः ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां स्वरान्ताः पुँल्लिङ्गाः ॥

---

## ॥ अथ स्वरान्ताः स्त्रीलिङ्गाः ॥

### ॥ दीर्घङ्याबिति सेर्लुकि पद्मा ॥

॥ औता ॥ १ । ४ । २० ॥ आबन्तस्य स्वसम्बन्धिना सह एकारः । पद्मे । स्वसम्बन्धिना किम् । बहुखट्वौ ॥ टौस्येत् ॥ १ । ४ । १९ ॥ आबन्तस्य स्वसम्बन्धिनि । पद्मया ॥ आपो ङितां यै यास् यास् याम् ॥ १ । ४ । १७ ॥ यथासङ्ख्यम् । पद्मायै । पद्मायाः २ । पद्मयोः २ । पद्मायाम् । एदापः ॥ १ । ४ । ४२ ॥ आमन्त्र्यार्थे सिना सह । हे पद्मे । एवं मालाशालाबहुखट्वाप्रभृतयः । नित्यदिदित्यादिना ह्रस्वे । हे अम्ब । हे प्रियाम्ब । द्विस्वरग्रहणादिह न । हे अम्बाडे ॥ सर्वादेर्डस्पूर्वाः ॥ १ । ४ । १८ ॥ आबन्तस्य ङितां यै यास् यास् यामः स्युः । सर्वस्यै । सर्वस्याः २ । सर्वस्याम् । द्वितीयस्यै । द्वितीयायै । तत्सम्बन्धित्रिज्ञानान्नेह । प्रियसर्वायै । कर्मधारये, दक्षिण-

पूर्वस्यै । बहुव्रीहौ तु । दक्षिणपूर्वायै । इत्यादि । जरा जरसौ जरे, इत्यादि । अतिजरे इत्यादौ विभक्तेरापा व्यवधानान्न जरस् । शसादौ पृतनायाः पृदिति केचित् । पृतः पृतनाः, इत्यादि । नासिका । शसादौ । नसः । नसा । इत्यादि । पक्षे घुटि च पद्मावत् । निशा । शसि । मासनिशा इत्यन्तस्य लुकि । निशः । घुटस्तृतीयः । निज्भ्याम् । सुपि जस्य प्रथमे सस्य शत्वे तस्य छत्वे निच्छु । घुटस्तृतीय इत्यस्याप्यसिद्धत्वाच्चजः कगमिति न गत्वम् । कश्चित्तु निड्भ्याम् । निड्भिः । निट्सु । निट्त्सु । इत्याह । तीर्थपा विश्वपावत् । मतिः ॥ स्त्रियां ङितां वा दै दास् दास् दाम् ॥ १ । ४ । २८ ॥ इदुदन्तात् । मत्यै । मतये । मत्याः । मतेः २ । मत्याम् । मतौ । अन्यसम्बन्धिनोऽपि भवति । कन्यापत्यै कन्यापतये पुरुषाय स्त्रियै वा । अत्र समासार्थस्य पुरुषत्वेऽपि पतिशब्दस्य स्त्रीत्वमस्त्येव । केचित्तु कन्यापतये पुरुषायेत्येवाहुः । कश्चित्तु पुरुषविशेषणमेवेच्छति । एवं बुद्धिश्रुतिस्मृत्यादयः । द्वेरत्वे सत्याप् । द्वे २ । द्वाभ्याम् ३ ॥ त्रिचतुरस्तिसृचतसृ स्यादौ ॥ २ । १ । १ ॥ स्त्रियाम् । इति तिस्रादेशे ॥ ऋतो रः स्वरेऽनि ॥ २ । १ । २ ॥ तिसृचतस्रृस्थस्य स्यादौ । सर्वापवादः । तिस्रः २ । तिसृभिः । तिसृभ्यः । तिसृणाम् । तिसृषु । अन्यसम्बन्धिन्यपि । प्रियास्तिस्रोऽस्य प्रियतिसा । प्रियतिस्रौ । प्रियास्त्रयः प्रियाणि त्रीणि वा यस्याः सा प्रियत्रिर्मतिवत् । अत्र त्रिशब्दस्य स्त्रियामवर्त्तनात् । आमि प्रियत्रीणाम् । प्रियत्रयाणामित्यन्ये अनीति किम् । तिसृणाम् । प्रियतिसृणी कुले । अत्र रादेशस्य परत्वान्नोऽन्तः । पूर्वं न स्यात् । देवी देव्यौ इत्यादि । एवं नद्यादयः । लक्ष्मीः । अङ्यन्तत्वान्न सेर्लुक् । एवमवीतन्त्र्यादयः । “अवीतन्त्रीतरीलक्ष्मीधीश्रीह्रीणामुदाहृतः । स्त्रीलिङ्गानाममीषां तु सिलोपो न कदाचन ॥ १ ॥ ग्रामण्ये स्त्रियै । अत्र नित्यस्त्रीत्वाभावान्न दायादेशः । अतिक्रमाय्ये इत्यादौ स्त्रीदूत इति वर्णविधित्वेन स्थानिवद्भावान्न दिदादेशः । धीः । धियौ । इत्यादि । एवं श्रीह्रीप्रभृतयः । स्त्री । स्त्रियौ । इत्यादि । अतिस्त्रिम् । अतिस्त्रियम् । स्त्रियमिच्छति स्त्रीवाचरतीति वा स्त्री । स्त्रियम् । स्त्रियः । अत्र धातुत्वान्नित्यमियादेशः । स्त्रीणामित्यत्र अस्त्रिया इति निर्देशेन स्त्रीदूदाश्रितेन कार्येणेयुव्यत्वादिबाधकल्प-

नाम्नाम् । स्त्रीषु । श्रीः । श्रियौ । श्रियै । श्रिये । अतिश्रियै । अतिश्रिये । स्त्रियै नराय वा । प्रवृत्तिनिमित्तैक्ये सति लिङ्गान्तरविशिष्टार्थानभिधायकत्वं नित्यस्त्रीत्वमिति मते प्रकृष्टा धीर्यस्य यस्या वा प्रधीः । प्रकृष्टा धीरिति विग्रहे वा लक्ष्मीवत् । अमि शसि च प्रध्यम् । प्रध्यः । पदान्तरं विना स्त्रियां वर्त्तमानत्वं नित्यस्त्रीत्वमिति मते तु प्रकृष्टं ध्यायतीति विग्रहेऽपि लक्ष्मीवत् सुष्ठुधीर्यस्या यस्य वा, शोभना धीः सुधीरिति वा विग्रहे सुधीरुभयमतेऽपि श्रीवत् । सुष्ठु ध्यायतीति विग्रहे परमते श्रीवत् । पूर्वमते तु नीवत् । ग्रामणीः पुंवत् । ग्रामनयनं पुंधर्म उत्सर्गतः ॥ **स्त्रियाम्** ॥ ३ । २ । ६९ ॥ क्रुशस्तुनस्तृच् । निर्निमित्तत्वात् पञ्चक्रोष्टृ इत्यत्र न तृच्निवृत्तिः ॥ **स्त्रियां नृतोऽस्वस्रादेर्ङीः** ॥ २ । ४ । १ ॥ क्रोष्ट्री देवीवत् । इतीदन्ताः । रज्जुतनुधेन्वादयो मतिवत् । इत्युदन्ताः ॥ भ्रूः श्रीवत् ॥ **भ्रूश्नोः** ॥ २ । १ । ५३ ॥ उवर्णस्य संयोगात् परस्य स्वरादौ प्रत्यये उव् स्यात् । भ्रुवौ । भ्रुवः । हे भ्रूः । हे सुभ्रु इत्यादौ स्त्रीपर्यायत्वादूङि कृते ह्रस्वो भविष्यति । भ्रुवाः । भ्रुवः । भ्रूणाम् । भ्रुवाम् । खलपूः पुंवत् । पुनर्भूः । हे पुनर्भु । पुनर्भ्वम् ॥ **कवर्गैकस्वरवति** ॥ २ । ३ । ७६ ॥ उत्तरपदे पूर्वपदस्थाद्रषृवर्णात् परस्य उत्तरपदान्तस्य नागमस्य स्यादेश्च नकारस्य णः स्यात् । न चेत् पकसम्बन्धी । पुनर्भूणाम् । वर्षाभूः । भेक्यां पुनर्नवायां स्त्री । हे वर्षाभु । वर्षाभूर्दर्दुरे पुमान् । भेकजातौ नित्यस्त्रीत्वाभावात् । हे वर्षाभूः । वर्षाभ्वौ । स्वयम्भूः पुंवत् । वधूजम्ब्वादयो देवीवत् । स्वसा । " स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥ १ ॥ स्वसारौ । स्वसारः । मातापितृवत् । शसि मातॄः । राः पुंवत् । द्यौर्गोवत् । नौर्ग्लौवत् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां स्वरान्ताः स्त्रीलिङ्गाः ॥

## ॥ अथ स्वरान्ता नपुंसकलिङ्गाः ॥

॥ अतः स्यमोऽम् ॥ १ । ४ । ५७ ॥ नपुंसकस्य । कुलम् २ । हे कुल । अमामादेशे सति अदेतः स्यमोरिति लुक् । तत्सम्बन्धिविज्ञानान्नेह । प्रियकुलः पुमान् । अमोऽकारोऽतिजरसमित्याद्यर्थः । अतः किम् । पयः अम्ग्रहणमुत्तरार्थम् ॥ औरीः ॥ १ । ४ । ५६ ॥ नपुंसकस्य । कुले २ ॥ नपुंसकस्य शिः ॥ १ । ४ । ५५ ॥ जस्शसोः । शकार इत् ॥ स्वराच्छौ ॥ १ । ४ । ६५ ॥ नपुंसकात् नोऽन्तः स्यात् ॥ नि दीर्घः ॥ १ । ४ । ८५ ॥ शेषघुट्परे ने परे स्वरस्य दीर्घः । कुलानि २ । शेषं देववत् । एवं धनवनादयः ॥ पञ्चतोऽन्यादेरनेकतरस्य दः ॥ १ । ४ । ५८ ॥ नपुंसकस्य स्यमोः । अन्यत् । अन्यद् । अन्यतरत् । इतरत् । कतरत् । कतमत् । अनेकतरस्येति किम् । एकतरम् । सम्बन्धिविज्ञानात् प्रियान्यम् । सर्वादेरित्येव । अन्यं नाम किञ्चित् । अतिजरम् । अतिजरसम् । सन्निपातन्यायस्यानित्यत्वाज्जरस् ॥ जरसो वा ॥ १ । ४ । ६० ॥ नपुंसकस्य स्यमोर्लुप् । अतिजरः २ । अतिजरसी । अतिजरे २ । शौ परत्वाज्जरस् ॥ धुटां प्राक् ॥ १ । ४ । ६६ ॥ स्वरात् परा या धुड्जातिस्तदन्तस्य नपुंसकस्य शौ धुड्भ्य एव प्राग् नोऽन्तः स्यात् । बहुवचनं जातिपरिग्रहार्थम् । तेन काष्ठतक्षि ॥ न्स्महतोः ॥ १ । ४ । ८६ ॥ न्सन्तस्य महतश्च स्वरस्य शेषे घुटि दीर्घः स्यात् । अतिजरांसि अतिजराणि २ शेषं पुंवत् । हृदयम् । हृदये २ । हृदयानि । हृन्दि । हृदयानि । उदानि । उदकानि । उदूनेत्यादि । आसनस्यान्तलुकि । आसानि । आसनानि । आस्ना । आस्यशब्दस्यासन्नादेश इति केचित् ॥ क्लीबे ॥ २ । ४ । ९७ ॥ स्वरान्तस्य ह्रस्वः । विश्वपम् ॥ अनतो लुप् ॥ १ । ४ । ५९ ॥ नपुंसकस्य स्यमोः । लुप्करणं स्थानिवद्भावनिषेधार्थम् । तेन यत् तदित्यादि । प्रियत्रि ॥ नामिनो लुग् वा ॥ १ । ४ । ६१ ॥ नपुंसकस्य स्यमोः । प्रियतिसृ ॥ अनाम् स्वरे नोऽन्तः ॥ १ । ४ । ६४ ॥ नाम्यन्तस्य नपुंसकस्य स्यादौ । प्रिय-

तिसृणी । प्रियतिसृणि ॥ वान्यतः पुमांष्टादौ स्वरे ॥ १ । ४ । ६२ ॥ नाम्यन्तो नपुंसकः । प्रियतिस्रा । प्रियतिसृणा । प्रियतिसृणाम् । शब्दा द्विविधाः । दध्यादिवत् केचित्स्वतो लिङ्गभाजः । परे गुणक्रियादिप्रवृत्तिनिमित्ताः । पटुचिकीर्ष्वादयस्तु विशेष्यानुरूपलिङ्गभाजः । वारि । हे वारे । हे वारि । ग्रामणि । ग्रामण्या । ग्रामणिना । ग्रामण्याम् । ग्रामणीनाम् । एवं सुधिप्रध्यादयः । प्ररि । एकदेशविकृतस्यानन्यत्वादात्वे । प्रराभ्याम् । प्ररीणाम् । प्रराणाम् इति केचित् ॥ दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान् ॥ १ । ४ । ६३ ॥ नाम्यन्तस्य नपुंसकस्य टादौ स्वरे । दध्ना । विशेषविधानात्परोऽपि नागमोऽनादेशेन बाध्यते । प्रियदध्ना नरेण । नात्र कच् । समासान्तविधेरनित्यत्वात् । अस्थि । सक्थि । अक्षि । मधु । त्रपु । पटु । पटवे । पटुने । शसादौ सानुशब्दस्य स्नूनि सानूनि इति केचित् । प्रियक्रोष्टु । प्रियक्रोष्ट्रा । प्रियक्रोष्टुना । अतिगु । अतिगवा । अतिगुना । एवं प्रद्युसुनुप्रभृतयः । कर्तृ । हे कर्तः । हे कर्तृ । कर्त्रा । कर्तृणा ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां स्वरान्ता नपुंसकलिङ्गाः ॥

---

## ॥ अथ व्यञ्जनान्ताः पुँल्लिङ्गाः ॥

॥ चजः कगम् ॥ २ । १ । ८६ ॥ धुटि प्रत्यये पदान्ते च तथासत्परे स्यादिविधौ च पूर्वस्मिन् । धुटस्तृतीय इति गत्वे विरामे वा इति कत्वे सुवाक् । सुवाग् । सुवाचौ । सुवाक्षु । कषयोः क्षः ॥ अञ्चोऽनर्चायाम् ॥ ४ । २ । ४६ ॥ एवोपान्त्यनकारस्य लुक् किति ङिति च । अनर्चायामिति किम् । अञ्चितोऽतिथिः ॥ अचः ॥ १ । ४ । ६९ ॥

धुडन्तस्याञ्चतेर्धातोस्तदतत्सम्बन्धिधुटि परे धुटः प्राग्नोऽन्तः स्यात् ॥ युजञ्च क्रुञ्चो नो ङः ॥ २ । १ । ७१ ॥ पदान्ते प्रकर्षेणाञ्चतीति विग्रहे क्विपि प्राङ् । प्राञ्चमिति ञत्वे प्राञ्चौ ॥ अच्च् प्राग्दीर्घश्च ॥ २ । १ । १०४ ॥ णिक्यघुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये । प्राचः । प्राचा । प्राग्भ्याम् । प्राक्षु । हे प्राङ् । एवं प्रत्यङ् । पूर्वोत्तरपदयोः पूर्वं कार्ये कृते पश्चात् सन्धिकार्यम् । प्रतीचः । अन्वाचयशिष्टत्वाद् दीर्घत्वस्य तदभावेऽपि चादेशो भवति । दृषचः । अच्-इति लुप्तनकारस्याञ्चतेर्ग्रहणात् पूजायां चादेशो न ॥ उदच उदीच् ॥ २ । १ । १०३ ॥ णिक्यघुड्वर्जे यकारादौ स्वरादौ च । उदीचः । उदग्भ्याम् ॥ सहसमः सध्रिसमि ॥ ३ । २ । १२३ ॥ क्विबन्तेऽञ्चतौ परे । सहाञ्चतीति सध्र्यङ् । समञ्चतीति सम्यङ् । समीचः ॥ तिरसस्तिर्यति ॥ ३ । २ । १२४ ॥ क्विबन्तेऽञ्चतौ परे । तिर्यङ् । तिर्यञ्चौ । अकारादाविति किम् । तिरश्चः । तिरश्चा । तिर्यग्भ्याम् । अमुमञ्चतीति विग्रहे अदस् अञ्च् इति स्थिते ॥ सर्वादिविष्वग्देवाड्डद्रिः क्व्यञ्चौ ॥ ३ । २ । १२२ ॥ अन्तः । अदद्र्यङ् ॥ वाद्रौ ॥ २ । १ । ४६ ॥ अन्तेऽदसो दस्य मः ॥ मादुवर्णोऽनु ॥ २ । १ । ४७ ॥ अदसो वर्णमात्रस्य आसन्नः । द्वावत्र दकारौ तत्र मविकल्पे चातूरूप्यम् । अदमुयङ् । अमुमुयङ् । अमुद्र्यङ् । अदमुयञ्चौ । शसि अदमुईचः । अदमुयग्भ्याम् । विश्वद्र्यङ् । देवद्र्यङ् । अर्चायां तु नलुगभावे अच इति नोऽन्तो न । शसादौ प्राञ्चः । प्राञ्चा । प्राङ्भ्याम् । प्राङ्षु । प्राङ्क्षु । इत्यादि । एवं प्रत्यञ्चादयः । क्रुञ्चेः क्विपि क्रुञ्च इति सौत्रनिर्देशान्नलुगभावो निपात्यते । क्रुङ् । क्रुञ्चौ । क्रुञ्चः ॥ संयोगस्यादौ स्कोर्लुक् ॥ २ । १ । ८८ ॥ धुटि प्रत्यये पदान्ते च ॥ यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः ॥ २ । १ । ८७ ॥ एषां चजोर्धातोः शस्य च धुटि प्रत्यये पदान्ते च षः स्यात् । मूलं वृश्चति मूलवृट् २ । मूलवृश्चौ । मूलवृड्त्सु । मूलवृट्सु । देवेट् २ । उपयट् २ । विबन्तत्वान्न य्वृत् । तीर्थसृट् २ । मृट् २ । सम्राट् २ । भ्राट् २ । भृट् २ । भृज्जौ । परिव्राट् २ ॥ युजोऽसमासे ॥ १ । ४ । ७१ ॥ धुडन्तस्य घुटि परे धुटः प्राग् नोन्तः । युनक्तीति युङ् । युञ्जौ । युजः । असमासे किम् । अश्वयुक् । ऋदि-

निर्देशः किम् । युजिंच् समाधावित्यस्य माभूत् । युज्यते इति युक् । युजौ । युजः । विभ्राक् । विभ्राग्भ्याम् । नात्र षः राजृसहिचरितस्यैव तत्र ग्रहणात् ॥ ऋत्विजूदिशृदृशृस्पृशृस्रजूदधृषुष्णिहो गः ॥ २ । १ । ६९ ॥ पदान्ते । ऋतौ यजतीति ऋत्विग् । ऋत्विजौ ॥ वसुराटोः ॥ ३ । २ । ८१ ॥ उत्तरपदयोर्विश्वस्य दीर्घः । विश्वाराट् । विश्वराजौ ॥ रात्सः ॥ २ । १ । ९० ॥ पदस्य संयोगान्तस्य रात्सस्यैव लुक् । इति नियमात् ऊर्क् । ऊर्ग् । ऊर्जौ । मरुत् । मरुतौ ॥ ऋदुदितः ॥ १ । ४ । ७० ॥ धुडन्तस्य घुटि परे धुटः प्राक् स्वरात्परो नोऽन्तः स्यात् । इति नागमे न्स्महतोरिति दीर्घे महान् । अत्र पदस्येत्यस्यासिद्धत्वान्नलुग् न । महान्तौ । हे महन् । महतः ॥ अभ्वादेरत्वसः सौ ॥ १ । ४ । ९० ॥ शेषे दीर्घः । भवान् । भवन्तौ । हे भवन् । एवं गोमान् । अभ्वादेः किम् । पिण्डग्रः । गोमन्तमिच्छति क्यनि क्विप् गोमान् । अर्थवत्परिभाषया सिद्धेऽभ्वादेरित्युक्तिरनिनस्मिनग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति, इति ज्ञापनार्था । स्वरणाः । शतृप्रत्ययान्तानां दीर्घाभावो विशेषः । पचन् । भवन् । महन् ॥ अन्तो नो लुक् ॥ ४ । २ । ९४ ॥ दुव्युक्तजक्षपञ्चतः परस्य शितोऽवितः । इति नलुकि, ददत् । दधत् । जक्षत् । जाग्रत् । दरिद्रत् । शासत् । चकासत् । 'दीध्यत् । वेव्यत्' इत्यपि केचित् । दधिमत् । दधिमद् । दधिमथौ । इत्यादि । त्यदादीनामाद्वेर इत्यत्वे ॥ लुगस्यादेत्यपदे ॥ २ । १ । ११३ ॥ अपदादावकारे एकारे च परेऽस्य लुक् स्यात् । अपदे इति किम् । दण्डाग्रम् । इत्यकारलुकि ॥ तः सौ सः ॥ २ । १ । ४२ ॥ त्यदादीनां स्वसम्बन्धिनि । स्यः । त्यौ । त्ये । शेषं सर्ववत् । सम्बन्धिविज्ञानान्नेह । प्रियत्यद् पुमान् । सः । तौ । ते । यः । यौ । ये । एषः । एतौ । एते ॥ त्यदामेनदेतदो द्वितीयाटौस्यवृत्त्यन्ते ॥ २ । १ । ३३ ॥ अन्वादेशे । कस्यचिद्वस्तुनः किञ्चित्क्रियादिकं विधातुं कथितस्य तेनान्येन वा शब्देन पुनरन्यद्विधातुं कथनमन्वादेशः । एतकं साधुमावश्यकमध्यापयाथो एनमेव सूत्राणि । अत्र साकोऽप्यादेशः । उषिष्टमेतदध्ययनमथो एनदनुजानीत । एतेन रात्रिरधीताथो एनेनाहरप्यधीतम् । एतयोः शीलं शोभनमथो एनयोर्महती

कीर्त्तिः । सर्वाणि शास्त्राणि ज्ञातवन्तावेतौ अथो एनयोस्तिष्ठतोर्नान्यः पूजार्हः । अवृत्त्यन्त इति किम्, अथो परमैतं पश्य । अन्तग्रहणं किम् । एनच्छ्रितकः । अत्रार्थात् प्रकरणाद्वापेक्ष्ये निर्ज्ञाते समासोऽन्वादेशश्च । द्वितीयाटौसीति किम् । एते मेधाविनो विनीता अथो एते शास्त्रस्य पात्रम् । एतस्मै सूत्रं देहि अथो एतस्मै अनुयोगमपि देहि । अभ्युदयनिःश्रेयसपद-मेतच्छासनमयो एतस्मै नमो भगवते । अन्वादेश इत्येव । जिनदत्तमध्यापय एतं च गुरुदत्तम् । " ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्यात् " ॥ गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये ॥ २ । १ । ७७ ॥ धात्ववयवस्य पदान्ते । बोधतीति भुद्, भुत् । बुधौ । बुधः । भुद्भ्याम् । राजा । राजानौ ॥ नाम्न्ये ॥ २ । १ । ९२ ॥ नाम्नो नस्य लुक् पदान्ते । हे राजन् । अस्मादेव ज्ञापकात् स्यादिलुकि स्थानिवद्भावेन विभक्त्यन्तत्वादधातुविभक्तीत्यादिना नामसंज्ञाया न निषेधः । तेन राजपुरुष इति सिद्धम् । राज्ञः । राज्ञा । राजभ्याम् । राज्ञि । राजनि । यज्वा ॥ न वमन्तसंयोगात् ॥ २ । १ । १११ ॥ परस्यानोऽकारस्य लुक् । यज्वनः । आत्मा । आत्मनः । प्रतिदिवा ॥ भ्वादेर्नामिनो दीर्घोर्वोर्व्यञ्जने ॥ २ । १ । ६३ ॥ असद्विधौ स्वरादेशस्य लोपस्य स्थानिवद्भावप्रतिषेधात् । प्रतिदीव्नः । भ्वादेरिति किम् । चतुर्भिः । वोर्भ्वादिसम्बन्धिविशेषणं किम्, दिव्नः । दिव्ना । नामिनो भ्वादिसम्बन्धिविशेषणं किम् । दधिव्रज्या । प्रत्यासत्त्या तस्यैवेति विशेषणाद् ग्रामणिव्रज्या ॥ इन्हन्पूषार्यम्णः शिस्योः ॥ १ । ४ । ८७ ॥ इन्नन्तस्य हनादीनां च स्वरस्य शौ शेषे सावेव च परे दीर्घः । दण्डी । दण्डिनौ । तपस्वी । वाग्मी । वृत्रहा । वृत्रहणौ । हे वृत्रहन् ॥ हनो ह्नो घ्नः ॥ २ । १ । ११२ ॥ हनो घि ॥ २ । ३ । ९४ ॥ हन्तेर्नो घि निमित्तकार्यिणोरन्तरे सति णो न स्यात् । वृत्रघ्नः । वृत्रहभ्याम् । बहिरङ्गपरिभाषया ह्रस्वस्य तः पित्कृति इति न स्यात् । वृत्रघ्नि । वृत्रहणि । पूषा । पूषणौ । अर्यमा । अर्यमणौ ॥ श्वन्युवन्मघोनो ङीस्याद्यघुट्स्वरे व उः ॥ २ । १ । १०६ ॥ सस्वरः । श्वा । श्वानौ । शुनः । युवा ।

यूनः । मघवा । मघोनः। नकारान्तनिर्देशाद् गोष्ठश्वेन । युवतीः। मघवतः। पश्य । अर्थवद्ग्रहणादिह न भवति । तत्त्वहृष्वना । अर्वा । अर्वाणौ । केचित्तु अर्वा अर्वन्तावित्यादि ॥ पथिन्मथिन्नृभुक्षः सौ ॥ १ । ४ । ७६ ॥ एषां नान्तानामन्तस्य सौ परे आः स्यात् ॥ एः ॥ १ । ४ । ७७ ॥ पथ्यादीनां नान्तानामिकारस्य घुटि परे आः स्यात् ॥ थो न्थ् ॥ १ । ४ । ७८ ॥ पथिमथोर्नान्तयोस्थस्य घुटि परे न्थ् स्यात् । पन्थाः । हे पन्थाः । नात्र सिलुक् वर्णविधौ स्थानिवद्भावनिषेधात् । पन्थानौ । नकारान्तनिर्देशान्नेह । पन्थानमिच्छति पथीः । पथ्यौ ॥ इन्ङीस्वरे लुक् ॥ १ । ४ । ७९ ॥ पथ्यादीनां ङ्यामघुट्स्वरादौ च स्यादौ परे इन् लुक् । पथः । पथा । अभेदनिर्देशः सर्वादेशार्थः । मन्थाः । मन्थानौ । मथः । मथा । ऋभुक्षाः । ऋभुक्षाणौ । ऋभुक्षः । डतिष्णेति जस्शसोर्लुपि पञ्च २ । पञ्चभिः ॥ सङ्ख्यानां ष्णाम् ॥ १ । ४ । ३३ ॥ आमो नाम् । पञ्चानाम् । पञ्चसु । एवं सप्तादयः । प्रियपञ्चादयो राजवत् । प्रियपञ्चः ॥ वाष्टन आः स्यादौ ॥ १ । ४ । ५२ ॥ तदतत्सम्बन्धिनि ॥ अष्ट और्जस्शसोः ॥ १ । ४ । ५३ ॥ स्वसम्बन्धिनोः अष्ट इति कृतात्वस्याष्टनो निर्देशः ॥ अष्टौ २ । अष्ट २ । अष्टाभिः । अष्टभिः । अष्टभ्यः । अष्टाभ्यः २ । अष्टानाम् । अष्टसु । अष्टासु । । परमाष्टौ । परमाष्ट । प्रियाष्टाः । प्रियाष्टा । प्रियाष्टौ । प्रियाष्टानौ । इत्यादि । केचित्तु जस्शसोर्व्यञ्जनादौ चात्वमिच्छन्ति ॥ अपः ॥ १ । ४ । ८८ ॥ स्वरस्य शेषे घुटि दीर्घः स्यात् । स्वाप् । स्वापौ । हे स्वप् ॥ अपोऽद्भे ॥ २ । १ । ४ ॥ स्यादौ । स्वद्भ्याम् । तुण्डिभमाचष्टे तुण्डिप् । तुण्डिभौ । एवं । गर्धप् । गर्दभौ । गर्धब्भ्याम् ॥ अयमियं पुंस्त्रियोः सौ ॥ २ । १ । ३८ ॥ त्यदामिदमः स्वसम्बन्धिनि । अयम् । परमायम् । साकोऽप्येवम् । त्यदामिति किम् । अतीदम् ना स्त्री वा ॥ दो मः स्यादौ ॥ २ । १ । ३९ ॥ त्यदामिदमः । इमौ २ । इमे । इमम् । इमकम् । त्यदामित्येव । प्रियेदमौ ॥ इदमः ॥ २ । १ । ३४ ॥ त्यदादेरिदमो द्वितीयाटौसि परे अन्वादेशे एनत् स्यादवृत्त्यन्ते । एनम् । एनौ । एनान् । एनेन । एनयोः २ ॥ अदूव्यञ्जने ॥ २ । १ । ३५ ॥ त्यदादे-

रिदमः स्यादावन्वादेशेऽवृत्त्यन्ते । आभ्याम् । एषु । अनक् इति वचनात् साकोऽपि विधिः ॥ टौस्यनः ॥ २ । १ । ३७ ॥ त्यदामनक इदमः । अनेन । अनक इति किम् । इमकेन ॥ अनक् ॥ २ । १ । ३६ ॥ त्यदादेर्व्यञ्जनादौ स्यादौ परे अक्वर्ज इदमत् स्यात् । आभ्याम् ॥ इदमदसोऽक्येव ॥ १ । ४ । ३ ॥ आत्परस्य भिस ऐस् । इमकैः । नियमः किम् । एभिः । परमैभिः । अस्मै । एभ्यः । अस्मात् । अस्य । अनयोः । एषाम् । अस्मिन् । एषु ॥ किमः कस्तसादौ च ॥ २ । १ । ४० ॥ त्यदाम् स्यादौ । साकोऽपि । कः । कौ । के । शेषं सर्ववत् । त्यदामित्येव । प्रियकिम् । मो नो म्वोश्च ॥ २ । १ । ६७ ॥ म्वादेः पदान्ते स चासन् परे । प्रशाम्यतीति प्रशान् । प्रशामौ । प्रशान्भ्याम् । एवं । मदान् । प्रतान् । परिक्रान् । नस्यासत्वादत्र नलोपो न ॥ वाः शेषे ॥ १ । ४ । ८२ ॥ घुटि परेऽनडुच्चतुरोरुतः । चत्वारः । प्रियचत्वाः । चतुरः । चतुर्णाम् ॥ अरोः सुपि रः ॥ १ । ३ । ५७ ॥ एव रस्य । चतुर्षु ॥ उतोऽनडुच्चतुरो वः ॥ १ । ४ । ८१ ॥ सम्बोधने सौ । हे प्रियचत्वः ॥ दिव औः सौ ॥ २ । १ । ११७ ॥ सुद्यौः । सुदिवौ । हे सुद्यौः ॥ उः पदान्तेऽनूत् ॥ २ । १ । ११८ ॥ दिवः । सुद्युभ्याम् । अनूत् किम् । द्युभवति । द्यौकामिः । अनुनासिके च च्छ्वः शूट् इति वक्ष्यमाणेन च्छस्य शत्वे तस्य षत्वे डत्वे टत्वे च शब्दप्राट् । शब्दप्राड् । शब्दप्राशौ । एवं विश् । तादृग् । तादृशौ । एवं सुदिश्सदृश्घृतस्पृशादयः ॥ नशो वा ॥ २ । १ । ७० ॥ पदान्ते गः । जीवनक् २ । जीवनट् २ । जीवनशौ ॥ सजुषः ॥ २ । १ । ७३ ॥ रुः स्यात् पदान्ते ॥ पदान्ते ॥ २ । १ । ६४ ॥ म्वादेर्वोर्म्वादेर्नामिनो दीर्घः । सह जुषते इति सजूः । सजुषौ ॥ णषमसत्परे स्यादिविधौ च ॥ २ । १ । ९० ॥ इतः सूत्रादारभ्य यत्परं कार्यं विधास्यते तस्मिन् स्याद्यधिकारविहिते च पूर्वस्मिन्नपि कर्तव्ये णत्वं षत्वं वा असिद्धं द्रष्टव्यम् । एतत्सूत्रनिर्दिष्टयोश्च णषयोः परे षे णोऽसन् । णषशास्त्रं वा ॥ इति षत्वस्यासिद्धत्वात् पिपठीः । पिपठिषौ । पिपठीःषु । पिपठीष्षु । दधृग् २ । दधृषौ । रत्नमुट् २ । रत्नमुषौ । एवं, प्रियषट् । षट् । षड्भिः । षण्णाम् । चिकीर्षतीति चिकीः । चिकीर्षौ

। चिकीर्षु । विवक्षतीति विवक् । कत्वस्यासत्त्वात् संयोगान्तलोपः । तट् २ । तक्षौ । ण्यन्तात् क्विपि तु । तक् २ । एवं, गोरट् गोरक् । दिधक् । पिपक् । सुपीः । सुपिसौ । सुतूः । सुतुसौ । विद्वान् । विद्वांसौ । हे विद्वन् ॥ क्वसुष्मतौ च ॥ २ । १ । १०५ ॥ अणिक्यघुटि यस्वरे प्रत्यये । विदुषः ॥ स्रंसुध्वंसुक्वस्सनडुहो दः ॥ २ । १ । ६८ ॥ पदान्ते स चासन् परे स्यादिविधौ च । विद्वद्भ्याम् । क्वस्सिति द्विःसकारपाठः किम् । विद्वान् । इदं च दत्वं येन नाप्राप्तिन्यायेन रुत्वढत्वयोरेव बाधकं संयोगान्तलोपे पुनः प्राप्ते चाप्राप्ते चारभ्यते इति न तस्य बाधकम् । एवं सेदिवान् । सेदिवांसौ । निमित्ताभावे नैमित्तिकस्याभाव इति इण्निवृत्तिः । सेदुषः । सेदिवद्भ्याम् । सुहिनस्तीति सुहिन् । नात्र दीर्घः न्सुमहतो- रित्यत्र साहचर्येण शुद्धक्विबन्तधातोरग्रहणात् । सुहिंसौ । ध्वद् २ । ध्वसौ । स्रत् २ ॥ पुंसोः पुमन्स् ॥ १ । ४ । ७३ ॥ तदतत्सम्बन्धिनि घुटि । पुमान् । पुमांसौ । हे पुमन् । पुंसः । पुंभ्याम् ३ । पुंसु । नात्र षत्वं । प्रस्थानिकानु- स्वारात् । श्रेयान् । श्रेयांसम् । हे श्रेयन् । उशना । उशनसौ ॥ वोशनसो नश्चामन्त्ये सौ ॥ १ । ४ । ८० ॥ लुक् । हे उशनन् । हे उशन । हे उशनः । एवमनेहा । हे अनेहः । पुरुदंशा । हे पुरुदंशः । वेधाः । वेधसौ २ । हे वेधः । सुवः । सुवसौ २ । पिण्डग्रः । पिण्डग्रसौ २ ॥ अदसो दः सेस्तु डौः ॥ २ । १ ४३ ॥ त्यदां सौ सः । असौ । असकौ । हे असौ । असकौ । हे असौ । हे असकौ । त्यदामिति किम् । अत्यदाः ॥ असुको वाकि ॥ २ । १ । ४४ ॥ त्यदां सावदसः । असुकः । हे असुक ॥ मोऽवर्णस्य ॥ २ । १ । ४५ ॥ त्यदादेरदसो दः । मादुव- र्णोऽनु । अमू २ ॥ बहुष्वेरीः ॥ २ । १ । ४९ ॥ अदसो मः परस्य । अमी । अमुम् । अमून् ॥ प्रागिनात् ॥ २ । १ । ४८ ॥ अदसो मः परस्य वर्णस्योवर्णः । अमुना । अमूभ्याम् ३ । अमीभिः । अमुष्मै । अमीभ्यः २ । अमुष्मात् । अमुष्य । अमुयोः २ । अमीषाम् । अमुष्मिन् । अमीषु । असकौ २ । अमुकौ । अमुके । अमुकैः । इत्यादि ॥ अन- डुहः सौ ॥ १ । ४ । ७२ ॥ तदतत्सम्बन्धिनि धुडन्तस्य घुटः प्राग् नोऽन्तः । अनड्वान् । नागमविधानसामर्थ्यान्न दः

। अनड्वाहौ २ । हे अनड्वन् । अनडुद्भ्याम् ३ । अनडुत्सु ॥ हो धुट्पदान्ते ॥ २ । १ । ८२ ॥ ढः । लिट् । लिड् । लिड्भ्याम् । एवं पर्णघुट्प्रमुखाः ॥ भ्वादेर्दादेर्घः ॥ २ । १ । ८३ ॥ हो धुटि प्रत्यये पदान्ते च । गोधुक् २ । गोदुहौ । गोधुक्षु । भ्वादेः किम् । दामलिट् २ ॥ मुहद्रुहष्णुहष्णिहो वा ॥ २ । १ । ८४ ॥ हो घो धुटि प्रत्यये पदान्ते च । मुक् २ । मुट् २ । मुहौ । ध्रुक् २ । ध्रुट् २ । स्नुक् २ । स्नुट् २ । स्नुहौ । स्निक् २ । स्निट् २ । उष्णिग् २ । उष्णिहौ । उष्णिग्भ्याम् ३ ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपे-
तवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीय-
तपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां व्यञ्जनान्ताः पुंलिङ्गाः ॥

---

## ॥ अथ व्यञ्जनान्ताः स्त्रीलिङ्गाः ॥

वाच्रुच्त्वचादयः प्राग्वत् । स्रक् । स्रग् । स्रजौ । स्रजः । आद्वेर इत्यत्वे आदित्वापि, स्या । त्ये । त्याः । सर्वा शब्दवत् । सा । या । एषा । एताम् । अन्वादेशे, एनाम् । समित् २ । समिधौ । सुपर्वा सुपर्वाणौ । ' मघा अप् कृत्तिका बहौ ' । आपः । अपः । अद्भिः । ककुप् । ककुभौ । इयम् । इमे । इमाः । इमाम् । एनाम् । अनया । आभ्याम् । आभिः । अस्यै । अत्र परत्वात्पूर्वमदादेशे पश्चात् ङस् । अस्याः । अनयोः । आसाम् । अस्याम् । आसु । का । के । काः । चतस्रः २ । चतसृभिः । चतसृभ्यः २ । चतसृणाम् । चतसृषु । हे चतस्रः । पदान्ते इति दीर्घे, गीः । गिरौ । गीर्भ्याम् । गीर्षु । एवं पुर्धुरादयः । द्यौः । पुंवत् । दिक् २ । दिशौ । दृक् २ । दृशौ । प्रावृट् । प्रावृड् । प्रावृषौ ।

आशीः । षत्वस्यासत्त्वादुत्वम् । आशिषौ । असौ । अमू । अमूः । अमूम् । अमुया । अमूभ्याम् । अमूभिः । अमुष्मै । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमूषु ॥ नहाहोर्धतौ ॥ २ । १ । ८६ ॥ हो धुटि प्रत्यये पदान्ते च । उपानत् । उपानहौ । उपानद्भ्याम् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां व्यञ्जनान्ताः स्त्रीलिङ्गाः ॥

## ॥ अथ व्यञ्जनान्ता नपुंसकलिङ्गाः ॥

प्राक् । प्राची । प्राञ्चि । प्रत्यक् । प्रतीची । प्रत्यञ्चि । एवं सम्यगादयः । गवाक् । गोअक् । गोक् । पूजायां गवाङ् । गोअङ् । गोङ् । गवाञ्ची । गोअञ्ची । गोञ्ची । गोची । सुवल् । सुवल्गी ॥ र्लो वा ॥ १ । ४ । ६७ ॥ रलाभ्यां परा या धुड्जातिस्तदन्तस्य नपुंसकस्य शौ परे धुड्भ्य एव प्राग् नोऽन्तो वा स्यात् । सुवल्गि । सुवल्गि । असृक् । असृजी । असृञ्जि । असानि । अस्ना । असृजा । ऊर्क् २ । ऊर्जी । ऊर्ञ्जि । ऊर्जि । बहूर्ञ्जि । बहूर्जि । अन्ये तु ऊर्जादौ नरजानां नियं संयोगं बहूर्जशब्दे तु रजानां वा संयोगमिच्छन्ति । जगत् । जगती । जगन्ति ॥ अवर्णादश्नोऽन्तो वातुरीङ्योः ॥ २ । १ । ११५ ॥ अकार उच्चारणार्थः । तुदत् । तुदन्ती । तुदती । तुदन्ति । भात् । भान्ती । भाती । भान्ति । अश्न इति किम् । क्रीणत् । क्रीणती ॥ श्यशवः ॥ २ । १ । ११६ ॥ ईङ्योरतुरन्तो नित्यम् । दीव्यन्ती । पचन्ती । भवत् । भवन्ती । महत् । महती । महान्ति । यकृन्ति । यकानि । शकृन्ति । शकानि । ददद् २ ।

ददती ॥ शौ वा ॥ ४ । २ । ९५ ॥ दृव्युक्तजक्षपञ्चतः परस्यान्तो नो लुक् । ददन्ति । ददति । जक्षन्ति । जक्षति । एवं जाग्रदादि । त्यद् । अमतो लुबिति लुब्विधानाभावात्म् । तद् । यद् । एतद् । अन्वादेशे एनत् इत्यादि । वेभिद् । वेभिदी । श्नावल्लोपस्य स्थानिवत्त्वेनाधुडन्तत्वाभ नोऽन्तः । स्वराच्छाविस्यपि न स्वविधौ स्थानिवत्त्वाभावात्तेः । वेभिदि । एवं चेच्छित् । अहः । अह्नी । अहनी । अहानि । अह्ना । अहोभ्याम् । अह्नि । अहनि । अहःसु । हे अहः । ब्रह्म । ब्रह्मणी । ब्रह्माणि ॥ क्लीबे वा ॥ २ । १ । ९३ ॥ आमन्त्र्ये नाम्नो नो लुक् । हे ब्रह्मन् । हे ब्रह्म । दण्डि । दण्डिनी । दण्डीनि । बहुवृत्रहाणि । बहुपूषाणि । बह्वर्यमाणि । स्वप् । स्वपी ॥ नि वा ॥ १ । ४ । ८९ ॥ अपः नागमे पूर्वस्वरस्य घुटि वा दीर्घः । स्वाम्पि । स्वम्पि । एवमत्यप् । बह्वप् । इदम् । इमे इमानि । इदम् । एनद् । इत्यादि । किम् । के । कानि । वाः । वारी । वारि । वारा । वार्भ्याम् । चत्वारि । विमलद्यु । विमलदिवी । वृत्त्यन्तोऽसषे इति पदत्वनिषेधादुत्वं न । धनुः । धनुषी । धनूंषि । धनुर्भ्याम् । चक्षुः । चक्षुषी । चक्षूंषि । हविः । हविषी । हवींषि । पिपठीः । पिपठिषी । पिपठिषि । पयः । पयसी । पयांसि । एवं वचःप्रमुखाः । सुपुम् । सुपुंसी । सुपुमांसि । अदः । अमू । अमूनि । शेषं पुंवत् । स्वनडुत् २ । स्वनडुही । स्वनड्वांहि । काष्ठतट् २ । काष्ठतक्षी २ । काष्ठतक्षि २ । काष्ठतड्भ्याम् ३ ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां व्यञ्जनान्ता नपुंसकलिङ्गाः ॥

# ॥ अथ युष्मदस्मत्प्रक्रिया ॥

## ॥ तयोरलिङ्गत्वम् ॥

॥ त्वमहं सिना प्राक् चाकः ॥ २ । १ । १२ ॥ युष्मदस्मदोर्यथासङ्ख्यं तदन्तसम्बन्धिना । त्वम् । अहम् । अतित्वम् । अत्यहम् । प्राक् चाक इति किम् । त्वकम् । अहकम् । अन्तरङ्गत्वादकि सति तन्मध्यपतितन्यायेन साकोऽप्यादेशः स्यात् ॥ मन्तस्य युवावौ द्वयोः ॥ २ । १ । १० ॥ युष्मदस्मदोः स्यादौ ॥ अमौ मः ॥ २ । १ । १६ ॥ युष्मदस्मद्भ्याम् । अकार उच्चारणार्थः ॥ युष्मदस्मदोः ॥ २ । १ । ६ ॥ व्यञ्जनादौ तदन्तसम्बन्धिनि स्यादौ आः स्यात् । युवाम् २ । आवाम् २ ॥ यूयं वयं जसा ॥ २ । १ । १३ ॥ युष्मदस्मदोः प्राक् चाकः । यूयम् । वयम् । प्राक् चाक इत्येव । यूयकम् । वयकम् ॥ त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ॥ २ । १ । ११ ॥ स्यादौ युष्मदस्मदोर्मन्तस्य । त्वाम् । माम् । अन्तरङ्गत्वात् स्यादिद्वारेणैव सिद्धे, प्रत्ययोत्तरपदग्रहणमन्तरङ्गानपि विधीन् बहिरङ्गापि लुब्बाधते इति ज्ञापनार्थम् । तेन तद् इत्यादि सिद्धम् ॥ शसो नः ॥ २ । १ । १७ ॥ युष्मदस्मद्भ्यां परस्य । युष्मान् । अस्मान् ॥ टाङ्योसि यः ॥ २ । १ । ७ ॥ युष्मदस्मदोः । त्वया । मया । युवाभ्याम् ३ । आवाभ्याम् ३ । युष्माभिः । अस्माभिः ॥ तुभ्यं मह्यं ङया ॥ २ । १ । १४ ॥ युष्मदस्मदोः । तुभ्यम् । मह्यम् । प्राक् चाक इत्येव । तुभ्यकम् । मह्यकम् ॥ अभ्यं भ्यसः ॥ २ । १ । १८ ॥ युष्मदस्मद्भ्यां परस्य चतुर्थीबहुवचनस्य ॥ शेषे लुक् ॥ २ । १ । ८ ॥ आत्वयत्वनिमित्तेतरस्यादौ युष्मदस्मदोरन्तस्य लुक् स्यात् । युष्मभ्यम् । अस्मभ्यम् । शेषे किम् । त्वयि । मयि ॥ ङसेश्चाद् ॥ २ । १ । १९ ॥ युष्मदस्मद्भ्यां परस्य पञ्चमीभ्यसः । त्वद् । मद् । युष्मद् । अस्मद् ॥ तव मम ङसा ॥ २ । १ । १५ ॥ युष्मदस्मदोः । तव । मम । प्राक् चाक इत्येव । तवक । ममक । युवयोः २ । आ-

वयोः २ ॥ आम आकम् ॥ २ । १ । २० ॥ युष्मदस्मद्भ्यां परस्य । युष्माकम् । अस्माकम् । त्वयि । मयि । युष्मासु । अस्मासु । युष्मानस्मान् वाचष्टे युष्मयतेरस्मयतेश्च क्विपि युष्म् अस्म् इति मान्तत्वे एकदेशविकृतन्यायेन सौ त्वम् । अहम् । युषाम् २ । असाम् २ । यूयम् । वयम् । युषाम् । असाम् । युषान् । असान् । युष्या । अस्या । युषाभ्याम् ३ । असाभ्याम् ३ । युषाभिः । असाभिः । तुभ्यम् । मह्यम् ॥ मोर्वा ॥ २ । १ । ४ ॥ शेषे स्यादौ युष्मदस्मदोर्लुक् । युषभ्यम् । असभ्यम् । युषत् । युष्मत् । तव । मम । युष्योः । अस्योः । युषाकम् । युष्माकम् । असाकम् । अस्माकम् । युष्यि । अस्यि । युषासु । असासु । त्वां मां वातिक्रान्तः अतित्वम् । अत्यहम् । अतित्वाम् ३ । अतिमाम् ३ । अतियूयम् । अतिवयम् । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् ३ । अतिमाभ्याम् ३ । अतित्वाभिः । अतिमाभिः । अतितुभ्यम् । अतिमह्यम् । अतित्वभ्यम् । अतिमभ्यम् । अतित्वत् २ । अतिमत् २ । अतितव । अतिमम । अतित्वयोः २ । अतिमयोः २ । अतित्वाकम् । अतिमाकम् । अतित्वयि । अतिमयि । अतित्वासु । अतिमासु । युवामावां वातिक्रान्तः अतित्वम् । अत्यहम् । अतियुवाम् ३ । अत्यावाम् ३ । अतियूयम् । अतिवयम् । अतियुवान् । अत्यावान् । अतियूयम् । अतिवयम् । अतियुवान् । अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् ३ । अत्यावाभ्याम् ३ । अतियुवाभिः । अत्यावाभिः । अतितुभ्यम् । अतिमह्यम् । अतियुवभ्यम् । अत्यावभ्यम् । अतियुवत् २ । अत्यावत् २ । अतितव । अतिमम । अतियुवयोः २ । अत्यावयोः २ । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु । युष्मानस्मान्वातिक्रान्तः । अतित्वम् । अत्यहम् । अतियुष्मान् ३ । अत्यस्मान् ३ । अतियूयम् । अतिवयम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् ३ । अत्यस्माभ्याम् । अतियुष्माभिः । अत्यस्माभिः ॥ अतितुभ्यम् । अतिमह्यम् । अतियुष्मभ्यम् । अत्यस्मभ्यम् । अतियुष्मत् २ । अत्यस्मत् २ । अतितव । अतिमम । अतियुष्मयोः २ । अत्यस्मयोः २ । अतियुष्माकम् । अत्यस्माकम् । अतियुष्मयि । अत्यस्मयि ।

अतियुष्मासु । अत्यस्मासु ॥ पदाद्युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे ॥ २ । १ । २१ ॥ युष्मदस्मदोः । अन्वादेशे नित्यं विधानादिह विकल्पः । धर्मो वो रक्षतु । धर्मो नो रक्षतु । युष्मानस्मान् वा । तपो वो दीयते । तपो नो दीयते । युष्मभ्यमस्मभ्यं वा । शीलं वः स्वम् । शीलं नः स्वम् । युष्माकमस्माकं वा । पदादिति किम् । युष्मान् धर्मो रक्षतु । द्वितीया चतुर्थीषष्ठ्येति किम् । ज्ञाने यूयं तिष्ठत । एकवाक्ये इति किम् । एकस्मिन् पदे निमित्तानिमित्तिनोर्भावे वाक्यान्तरे च मामूत् । अतियुष्मान् पश्यति । ओदनं पचत युष्माकं भविष्यति । एकवाक्यग्रहणात्सामर्थ्याभावेऽपि । इति स्म नः पिता कथयति । बहुत्वे इति वचनम् अपवादविषयेऽपि क्वचिदुत्सर्गः प्रवर्त्तते इति न्यायानुसारेण यथा क्यञ्विषये घ्यण् । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः, प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते इति न्यायेन वांनावादिविषयेऽस्याप्रवृत्तौ सिद्धायां बहुत्वे इति वचनं न्यायानुवादकम् । विभक्तिग्रहणं युक्स्यादिवचननिवृत्त्यर्थम् । तेन ज्ञाने युवां तिष्ठथ इत्यत्र वाम् न । युग्बहुत्वे इति सिद्धे विभक्तिग्रहणमुत्तरार्थं इति वा ॥ द्वित्वे वान्नौ ॥ २ । १ । २२ ॥ पदात् परयोर्युष्मदस्मदोर्युग्विभक्त्यैकवाक्ये । धर्मो वां धर्मो नौ आवां वा रक्षतु । एवं चतुर्थीषष्ठीभ्यामपि । युवां वा रक्षतु ॥ ङे ङसा ते मे ॥ २ । १ । २३ ॥ पदात्परयोर्युष्मदस्मदोरेकवाक्ये । धर्मस्ते दीयते । तुभ्यं मह्यं वा । धर्मस्ते स्वम् । धर्मो मे स्वम् । तव मम वा ॥ अमा त्वा मा ॥ २ । १ । २४ ॥ वा पदात् परयोर्युष्मदस्मदोरेकवाक्ये । धर्मस्त्वा त्वां वा पातु । धर्मो मा मां वा पातु ॥ असदिवामन्त्र्यं पूर्वम् ॥ २ । १ । २५ ॥ युष्मदस्मद्भ्यां पदम् । जनः, जनौ, जनाः, वा, त्वाम्, युवाम्, युष्मान्, वा पातु धर्मः । पूर्वमिति किम् । मयैतत् सर्वमाख्यातं युष्माकं मुनिपुंगवाः । व्यवहितेऽप्यत्र पूर्वशब्दः । तेन चैत्र धर्मो वोऽथो रक्षतु इत्यत्र सपूर्वादिति विकल्पो न ॥ जस्विशेष्यं वामन्त्र्ये ॥ २ । १ । २६ ॥ युष्मदस्मद्भ्यां पूर्वमामन्त्र्यमसत् विशेषणे । जिनाः शरण्या युष्मान्वो वा शरणं प्रपद्ये । अन्वादेशेऽपि । सिद्धाः क्षीणाष्टकर्माणोऽथो सिद्धाः शरण्या युष्मान् वो वा शरणं प्रपद्ये । जसिति किम् । साधो सुविहित वोऽथो शर-

ण्यं प्रपद्ये । विशेष्यमिति किम् । शरण्याः साधवो युष्मान् शरणं प्रपद्ये । आमन्त्र्ये इति किम् । आचार्या युष्मान् शरण्याः शरणं प्रपद्ये । सामर्थ्यात् तद्विशेषणभूते इत्येव । आचार्या उपाध्याया युष्मान् शरणं प्रपद्ये । एकाधिकरणयोर्विशेष्यविशेषणभावः ॥ नान्यत् ॥ २ । १ । २७ ॥ युष्मदस्मद्भ्यां पूर्वं जसन्तादन्यदामन्त्र्यं विशेष्यमामन्त्र्ये विशेषणे परेऽसदिव न स्यात् । साधो सुविहित त्वा शरणं प्रपद्ये । साधू सुविहितौ वां शरणं प्रपद्ये ॥ पादाद्योः ॥ २ । १ । २८ ॥ पदात् परयो युष्मदस्मदोर्वस्नसादिर्न ॥ "वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता । स एव नाथो भगवानस्माकं पापनाशनः ॥ १ ॥" द्विवचनं युष्मदस्मदोरभिसम्बन्धार्थम् । पादाद्योः किम् । "पान्तु वो देशनाकाले जैनेन्द्रा दशनांशवः भवकूपपतज्जन्तुजातोद्धरणरज्जवः ॥१॥" चाहहवैवयोगे ॥ २ । १ । २९ ॥ पदात् परयोर्युष्मदस्मदोर्न वस्नसादिः । ज्ञानं युष्मांश्च रक्षतु । एवम्, अह–ह–वा-एवैरप्युदाहार्यम् । योगग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम् । तेन ज्ञानं च शीलं च मे स्वमित्यादि सिद्धम् ॥ दृश्यर्थैश्चिन्तायाम् ॥ २ । १ । ३० ॥ धातुभिर्योगे युष्मदस्मदोर्वस्नसादिर्न । जनो युष्मान् संदृश्यागतः । जतो युवां समीक्ष्यागतः । जनो मामपेक्षते । भक्तस्तव रूपं निध्यायति । दृश्यर्थैरिति किम् । जनो वो मन्यते । चिन्तायामिति किम् । जनो वः पश्यति ॥ नित्यमन्वादेशे ॥ २ । १ । ३१ ॥ पदात् परयोर्युष्मदस्मदोर्युग्विभक्त्या वस्नसादिः । यूयं विनीतास्तद्वो गुरवो मानयन्ति । इत्यादि ॥ सपूर्वात् प्रथमान्ताद्वा ॥ २ । १ । ३२ ॥ पदात् परयोर्युष्मदस्मदोरन्वादेशे वस्नसादयः । यूयं विनीतास्तद्गुरवो वो युष्मान् वा मानयन्ति । इत्यादि । गम्येऽप्यन्वादेशे भवति । ग्रामे कम्बलो वो युष्माकं वा स्वमथो । विद्यमानपूर्वादिति किम् । पटो युष्माकं स्वम् अथो वः कम्बलः स्वम् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां युष्मदस्मत्प्रकरणम् ॥

## ॥ अथाऽव्ययानि ॥

॥ **स्वरादयोऽव्ययम्** ॥ १ । १ । ३० ॥ स्वर् । अन्तर् । सनुतर् । पुनर् । प्रातर् । सायम् । नक्तम् । अस्तम् । दिवा । दोषा । ह्यस् । श्वस् । कम् । शम् । योस् । १५ । मयस् । विहायसा । रोदसी । ओम् । भूस् । २० । भुवस् । स्वस्ति । समया । निकषा । अन्तरा । २५ । पुरा । बहिस् । अवस् । अधस् । असाम्प्रतम् । ३० ॥ अद्धा । ऋतम् । सत्यम् । इद्धा । मुधा । ३५ । मृषा । वृथा । मिथ्या । मिथो । मिथु । ४० । मिथस् । मिथुस् । मिथुनम् । अनिशम् । मुहुस् । ४५ । अभीक्ष्णम् । मङ्क्षु । झटिति । उच्चैस् । नीचैस् । ५० । शनैस् । अवश्यम् । सामि । साचि । विष्वक् । ५५ । अन्वक् । ताजक् । द्राक् । स्राक् । ऋधक् । ६० । पृथक् । धिक् । हिरुक् । ज्योक् । मनाक् । ६५ । ईषत् । ज्योषम् । जोषम् । तूष्णीम् । कामम् । ७० । निकामम् । प्रकामम् । अरम् । वरम् । परम् । ७५ । आरात् । तिरस् । मनस् । नमस् । भूयस् । ८० । प्रायस् । प्रबाहु । प्रबाहुक् । प्रबाहुकम् । आर्यं । ८५ । हलम् । आर्यहलम् । स्वयम् । अलम् । कु । ९० । बलवत् । अतीव । सुष्ठु । दुष्ठु । ऋते । ९५ । सपदि । साक्षात् । सन् । प्रशान् । सनात् । १०० । सनत् । सना । नाना । विना । क्षमा । १०५ । आशु । सहसा । युगपत् । उपांशु । पुरतस् । ११० । पुरस् । पुरस्तात् । शश्वत् । कुवित् । आविस् । प्रादुस् । ११६ । इति स्वरादयः । बहुवचनमाकृतिगणार्थम् । स्वरादयः स्वार्थस्य वाचका न तु चादिवद् द्योतकाः । अन्वर्थसंज्ञेयम् ॥ " सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् " ॥ अन्वर्थाश्रयणेन च तदन्तविज्ञानात् परमोच्चैरित्यादावप्यव्ययसंज्ञा ॥ **चादयोऽसत्त्वे** ॥ १ । १ । ३१ ॥ अव्ययानि स्युः । निपाता इत्यपि पूर्वेषाम् । सत्त्वं लिङ्गसङ्ख्यावत् द्रव्यम् । इदं तदित्यादिसर्वनामव्यपदेश्यं विशेष्यमिति यावत् । असत्त्वे इति किम् । चः समुच्चये । च । अह । ह । वा । एव । एवम् । नूनम् । शश्वत् । सु-

पव् । कूपत् । कुवित् । नेत् । चेत् । नचेत् । चण । कच्चित् । यत्र । नह । नहि । हन्त । माकिस् । नकिस् । मा । माङ् । न । नञ् । वाव । त्वाव । न्वाव । वावत् । त्वावत् । न्वावत् । त्वै । तुवै । न्वै । नुवै । रै । वै । श्रौषट् । वौषट् । वषट् । वट् । वाट् । वेट् । पाट् । प्याट् । फट् । हुंफट् । छंवट् । अघ[1] । आत् । स्वधा । स्वाहा । अलम् । चन । हि । अथ । ओम् । अथो । नो । नोहि । भोस् । भगोस् । अघोस् । अघो । हंहो । हो । अहो । आहो । उताहो । हा । ही । हे । है । हये । अयि । अये । अहहे । अंग । रे । अरे । अवे । ननु । शुकम् । सुकम् । नुकम् । हिकम् । नहिकम् । कंम् । हुम् । कुम् । उञ् । सुञ् । कम् । हम् । किम् । हिम् । अद् । कद् । यद् । तद् । इद् । चिद् । किद् । खिद् । उत । बत । इव । तु । नु । यच्च । कच्चन । किमुत । किल । किंकिल । किंस्वित् । उदस्वित् । आहोस्वित् । अहह । नहवै । नवै । नचा । अन्यत् । अन्यत्र । शप् । शव् । अथ । किम् । विषु । पद् । पशु । खलु । यदि नाम । यदुत । प्रत्युत । यदा । जातु । यदि । यथा कथा च । यथा । तथा । पुद् । घ । पुरा । यावत् । तावत् । दिष्ट्या । मर्या । आम । नाम । स्म । इतिह । सह । अमा । समम् । सत्रा । साकम् । सार्धम् । ईम् । सीम् । कीम् । आम् । आस् । इति । अव । अड । अट । बाढा । अनुषक् । स्वोस् । अ । आ । इ । ई । उ । ऊ । ऋ । ॠ । ऌ । ॡ । ए । ऐ । ओ । औ । प्रादयः । इति चादयः । बहुवचनमाकृतिगणार्थम् ॥ अधणूतस्वाद्याशसः ॥ १ । १ । ३२ ॥ एतदन्तं नामाव्ययम् । देवा अर्जुनतोऽभवन् । ततः । तत्र । इह । क्व । कदा । एतर्हि । अधुना । इदानीम् । सद्यः । अद्य । परेद्यवि । पूर्वेद्युः । उभयेद्युः । परुत् । परारि । ऐषमः । कर्हि । यथा । कथम् । पञ्चधा । एकधा । ऐकध्यम् । द्वैधम् । द्वेधा । पञ्चकृत्वः । द्विः । सकृत् । बहुधा । प्राक् । दक्षिणतः । पश्चात् । पुरः । पुरस्तात् । उपरि । उपरिष्टात् । दक्षिणा । दक्षिणाहि । दक्षिणेन

---

१ अघोऽर्थे

। द्वितीया करोति क्षेत्रम् । शुक्लीकरोति । अग्निसात् सम्पद्यते । द्वेधा करोति । बहुशः । अधणिति किम् । पथि द्वैधानि । आशस इति किम् । पचतिरूपम् ॥ **विभक्तिथमन्ततसाद्याभाः** ॥ १ । १ । ३३ ॥ अव्ययम् । अहंयुः । शुभंयुः । अस्तिक्षीरा ब्राह्मणी । कुतः । यथा । तथा । कथम् । अहम् । शुभम् । कृतम् । पर्याप्तम् । २ । येन । तेन । चिरेण । अन्तरेण । ३ । ते । मे । चिराय । अह्नाय । ४ । चिरात् । अकस्मात् । ५ । चिरस्य । अन्योन्यस्य । मम । ६ । एकपदे । अग्रे । प्रगे । प्राह्णे । हेतौ । रात्रौ । वेलायाम् । मात्रायाम् । ७ । अस्ति । नास्ति । असि । अस्मि । विद्यते । भवति । एहि । ब्रूहि । मन्ये । शङ्के । अस्तु । भवतु । पूर्यते । स्यात् । आस । आह । वर्त्तते । न वर्त्तते । याति । न याति । पश्य । पश्यत । आदह । आदङ्क । आतङ्क ॥ **वत्तस्याम्** ॥ १ । १ । ३४ ॥ एतदन्तमव्ययम् । वत्तसिसाहचर्यात्तद्धितस्यामो ग्रहणम् । मुनिवद्वृत्तम् । पीलुमूलतो विद्योतते विद्युत् । उच्चैस्तराम् ॥ **क्त्वा तुमम्** ॥ १ । १ । ३५ ॥ एतदन्तमव्ययम् । कृत्वा । प्रकृत्य । कर्त्तुम् । क्त्वातुम्साहचर्यादमित्युत्सृष्टानुबन्धयोर्णम्ख्णमोर्ग्रहणम् । यावज्जीवमदात् । स्वादुंकारं भुङ्क्ते ॥ **गतिः** ॥ १ । १ । ३६ ॥ अव्ययम् । अदःकृत्य । अत्राव्ययत्वात्सो न ॥ **अव्ययस्य** ॥ ३ । २ । ७ ॥ स्यादेर्लुप् । स्वसम्बन्धिविज्ञानान्नेह । अत्युच्चैसौ ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृ-
द्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपो-
गच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हैमप्रभायामव्ययप्रकरणम् ॥

## ॥ अथ स्त्रीप्रत्ययाः ॥

॥ **स्त्रियां नृतोऽस्वस्रादेर्ङीः** ॥ २ । ४ । १ ॥ राज्ञी । कर्त्री । स्वस्रादिषु तिसृचतस्रोः पाठः सन्निपातन्यायानित्यत्वज्ञापनार्थः । तेनातिदध्न्या या सा इत्यादि सिद्ध्यति ॥ **अधातूदृदितः** ॥ २ । ४ । २ ॥ नाम्नः स्त्रियां ङीः । भवती । पचन्ती । अतिभवती । अधात्विति किम् । सुकन् ॥ **अञ्चः** ॥ २ । ४ । ३ ॥ अञ्चन्तान्नाम्नः स्त्रियां ङीः । प्राची । प्रतीची ॥ **णस्वराघोषाद्वनो रश्च** ॥ २ । ४ । ४ ॥ नाम्नः स्त्रियां ङीः । वन इति वन् क्वनिप् ङ्वनिपामविशेषेण ग्रहणम् । ण, अवावरी । अवावेति केचित् । धीवरी । मेरुदृश्वरी । विहितविशेषणात् शर्वरी । नान्तत्वादेव ङीः सिद्धो नियमार्थं रविधानार्थं च वचनम् । णस्वराघोषादिति किम् । सहयुध्वा ॥ **वा बहुव्रीहेः** ॥ २ । ४ । ५ ॥ णस्वराघोषाद् विहितो यो वन् तदन्तात् स्त्रियां ङी रश्चान्तादेशः । प्रियावावरी । प्रियावावा स्त्री ॥ **वा पादः** ॥ २ । ४ । ६ ॥ बहुव्रीहेस्तन्निमित्तकपाच्छब्दात् स्त्रियां ङीर्वा । द्विपदी । द्विपाद् । पादमाचष्टे पाद् त्रयः पादोऽस्यास्त्रिपादित्यत्र तन्निमित्तकत्वाभावान्न ॥ **ऊध्नः** ॥ २ । ४ । ७ ॥ बहुव्रीहेः स्त्रियां ङीः । कुण्डोध्नी । अनो वेति विकल्पे प्राप्ते वचनम् । समासान्तविधौ ऊध्न् इत्यादेशे ङीः सिद्ध्यति किन्तु पञ्चभिः कुण्डोध्नीभिः क्रीत इत्यत्रेकणि तल्लुपि च पञ्चकुण्डोध्न् इति प्रकृतेः सौ पञ्चकुण्डोदिति स्यात् पञ्चकुण्डोधेति चेष्यते ॥ **अशिशोः** ॥ २ । ४ । ८ ॥ बहुव्रीहेः स्त्रियां ङीः । अशिश्वी ॥ **संख्यादेर्हायनाद् वयसि** ॥ २ । ४ । ९ ॥ बहुव्रीहेः स्त्रियां ङीः ॥ **अस्य ङ्यां लुक्** ॥ २ । ४ । ८६ ॥ द्विहायनी ॥ **चतुस्त्रेर्हायनस्य वयसि** ॥ २ । ३ । ७४ ॥ नो णः स्यात् । त्रिहायणी । चतुर्हायणी । वयसोऽन्यत्र, त्रिहायना, चतुर्हायना, शाला । कालकृता प्राणिनां शरीरावस्था वयः ॥ **दाम्नः** ॥ २ । ४ । १० ॥ सङ्ख्यादेर्बहुव्रीहेः स्त्रियां ङीः ॥ द्विदाम्नी । अनो वा इति विकल्पापवादः ॥ **अनो वा** ॥ २ । ४ । ११ ॥ बहुव्रीहेः स्त्रियां

ङीः । उत्तरत्रोपान्त्यवतः प्रतिषेधादुपान्त्यलोपिन एवायं विधिः । बहुराज्ञ्यौ । बहुराजानौ । बहुराजे ॥ नाम्नि ॥ २ । ४ । १२ ॥ अन्नन्ताद् बहुव्रीहेः स्त्रियां नित्यं ङीः । अधिराज्ञी नाम ग्रामः । अयमपि उपान्त्यलोपिन एव विधिः ॥ नोपान्त्यवतः ॥ २ । ४ । १३ ॥ अन्नन्ताद्बहुव्रीहेः स्त्रियां ङीः । सर्वापवादः । सुपर्वा । बहुव्रीहेरित्येव । अतिपर्वणी । नात्र रः । अव्युत्पत्तिपक्षाश्रयणात् ॥ मनः ॥ २ । ४ । १४ ॥ नाम्नः स्त्रियां ङीर्न । सीमा । सीमानौ । अनिनस्मन्निति न्यायेनातिमहिमेत्यादावपि ङीप्रतिषेधः । बहुव्रीहेरिति निवृत्तं योगविभागात् ॥ ताभ्यां वाप् डित् ॥ २ । ४ । १५ ॥ मन्नन्तादन्नन्ताच्च बहुव्रीहेः स्त्रियां वाप् स च डित् । सीमे । सीमानौ । सुपर्वे । सुपर्वाणौ ॥ अजादेः ॥ २ । ४ । १६ ॥ तस्यैव स्त्रियामाप् । बाधकबाधनार्थमनकारार्थं च वचनम् । अजा । बाला । ज्येष्ठा । पूर्वापहाणा । अपरापहाणा । त्रिफला । क्रुञ्चा । तस्यैवेति किम् । पञ्चाजी । अत एव ज्ञापकात् स्त्रीप्रकरणे तदन्तादपि भवति । तेन परमाजा । अतिभवतीत्यादि भवति ॥ ऋचि पादः पात्पदे ॥ २ । ४ । १७ ॥ आबन्तस्य कृतपाद्भावपादस्य ऋच्यर्थे स्त्रियां पात्पदेति निपात्यते । त्रिपात् । त्रिपदा । ऋचि किम् । द्विपदी । द्विपाद् ॥ आत् ॥ २ । ४ । १८ ॥ नाम्नः स्त्रियामाप् । खट्वा । या । सा ॥ इच्चापुंसोऽनित्क्याप्परे ॥ २ । ४ । १०७ ॥ विहितस्यापो ह्रस्वो वा । खट्विका । खट्वका । खट्वाका । अपुंस इति किम् । सर्विका । निर्द्रजनं किम् । दुर्गका । आबेव परो यस्मादिति किम् । अतिप्रियखट्वाका । विहितस्येति किम । अखट्विका । अत्र नित्यमित्त्वम् । क्वचि तु रूपत्रयम् ॥ स्वज्ञाजभस्त्राधातुत्ययकात् ॥ २ । ४ । १०८ ॥ आपोऽनित्क्याप्परे इर्वा । स्विका स्वका ज्ञातिः । ज्ञातिधनाख्यायामसर्वादित्वादकोऽभावे कः । आत्मीयायां तु नित्यमित्वम् । निःस्विका । निःस्वका । ज्ञिका । ज्ञका । अजिका २ । भस्त्रग्रहणं स्त्रीपुंससाधारणार्थम् । अभस्त्रिका २ । आर्यिका २ । चटकिका २ । धातुत्यवर्जनात् सुनयिका । सुपाकिका । इहत्यिका । वहपत्यिका । इत्यत्र न त्यप्रत्ययः । प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् । शुष्किकेत्यत्र कस्यासत्त्वान्न विकल्पः ॥ क्षेपप्लुतपुत्रवृन्दारकस्य ॥ २ । ४ ।

१०९ ॥ अनित्क्याप्परे वा इः । द्विके २ । एषका । एषिका । कृतषत्वनिर्देशान्नेह । एतिके । एतिकाः । साहचर्यात् सर्वादेरेव ग्रहणान्नेह । इच्छतीति एषिका । सूतिका । सूतका । पुत्रिका । पुत्रका । अत एव निर्देशात् ङ्यभावः । वृन्दारिका । वृन्दारका । आप्परे इति किम् । अनेषका । अद्वके ॥ वौ वर्तिका ॥ २ । ४ । ११० ॥ वेत्वं निपात्यते । वर्तिका २ । वेरन्यत्र वर्तिका ॥ अस्यायत्तत्क्षिपकादीनाम् ॥ २ । ४ । १११ ॥ अनित्क्याप्परे इः । वेति निवृत्तम् पृथग्योगात् । कारिका । अनिदिति पर्युदासात् शका । यदादिवर्जनं किम् । यका । सका । क्षिपका । बहुवचनमाकृतिगणार्थम् ॥ नरिका मामिका ॥ २ । ४ । ११२ ॥ इत्वं निपात्यते । कस्याप्रत्ययसम्बन्धित्वात् पूर्वेणाप्राप्ते वचनम् ॥ तारकावर्णकाष्टकाज्योतिस्तान्तवपितृदेवत्ये ॥ २ । ४ । ११३ ॥ निपात्यन्ते । अन्यत्र तारिका, वर्णिका, अष्टिका खारी ॥ गौरादिभ्यो मुख्यान्ङीः ॥ २ । ४ । १९ ॥ स्त्रियाम् । मुख्यादित्यधिकारोऽयम् । गौरी । शबली । अनड्वाही । अनडुही । बहुवचनमाकृतिगणार्थम् । मुख्यादिति किम् । बहुनदा भूमिः ॥ मत्स्यस्य यः ॥ २ । ४ । ८७ ॥ ङ्यां लुक् । मत्सी । कथं मात्सी । ङिनिमित्तादेशस्यापि ङीग्रहणेन ग्रहणात् ॥ व्यञ्जनात्तद्धितस्य ॥ २ । ४ । ८८ ॥ यो ङ्यां लुक् । मनुषी । तद्धितस्येति किम् । वैश्यी ॥ अणञेयेकण्नञ्स्नञ्टिताम् ॥ २ । ४ । २० ॥ अणादीनां योऽत् तदन्तात्तेषामेव स्त्रियां ङीः । औपगवी । औत्सी । स्त्रैणी । सौपर्णेयी । आक्षिकी । स्त्रैणी । पौंस्नी । जानुदघ्नी । साहचर्येण प्रत्ययग्रहणादागमटितो न भवति । पठिता विद्या । स्तनंधयीत्यादौ तु धातोष्टित्त्वस्यानन्यार्थत्वाद् भवति । मुख्यादिति किम् । बहुकुरुचरा नगरी ॥ वयस्यनन्त्ये ॥ २ । ४ । २१ ॥ अदन्तान्नाम्नः स्त्रियां ङीः । कुमारी । तरुणी । अनन्त्य इति किम् । वृद्धा । द्विवर्षेत्यादौ त्वर्थाद् वयो गम्यते ॥ द्विगोः समाहारात् ॥ २ । ४ । २२ ॥ अदन्तान्नाम्नः स्त्रियां ङीः । पञ्चपूली । दशराजी । त्रिफलेत्यजादौ ॥ “ पात्रादिवर्जितादन्तोत्तरपदः समाहारे । द्विगुरनावन्तान्तो वान्यस्तु सर्वो नपुंसकः ” ॥ १ ॥ परिमाणात्तद्धितलुक्यबिस्ताचितकम्बल्यात् ॥ २ । ४ । २३ ॥ द्विगोरद-

न्तात् स्त्रियां ङीः। द्विकुडवी। द्विपली। "ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् सङ्ख्या बाह्या तु सर्वतः" ॥ १ ॥ परिमाणादिति किम्। पञ्चाश्वा। तद्धितलुकीति किम्। द्विपण्या। बिस्तादिवर्जनात् द्विबिस्ता। त्र्याचिता। द्विकम्बल्या ॥ **काण्डात्प्रमाणादक्षेत्रे** ॥ २ । ४ । २४ ॥ द्विगोस्तद्धितलुकि स्त्रियां ङीः। द्विकाण्डी रज्जुः। प्रमाणादिति किम्। द्विकाण्डा शाटी। द्विकाण्डीत्यपि केचित्। अक्षेत्रे इति किम्। द्विकाण्डा क्षेत्रभक्तिः। अक्षेत्र इति द्विगुविशेषणं किम्। द्विकाण्डी वडवा ॥ **पुरुषाद्वा** ॥ २ । ४ । २५ ॥ प्रमाणवाचिनो द्विगोः स्त्रियां ङीः। द्विपुरुषी द्विपुरुषा परिखा। तद्धितलुकीत्येव। पञ्चपुरुषी ॥ **रेवतरोहिणाद्भे** ॥ २ । ४ । २६ ॥ स्त्रियां ङीः ॥ रेवती। रोहिणी। रेवतीरमण इत्यत्र रेवच्छब्दोऽस्ति। रोहिणी, कद्रुरोहिणीत्यत्र प्रकृत्यन्तरम् ॥ **नीलात्प्राण्योषध्योः** ॥ २ । ४ । २७ ॥ स्त्रियां ङीः। नीली गौः। नीली ओषधिः। अन्यत्र नीला शाटी ॥ **क्ताच्च नाम्नि वा** ॥ २ । ४ । २८ ॥ नीलात् स्त्रियां ङीः। नीली। नीला। प्रवृद्धविलूनी। प्रवृद्धविलूना ॥ **केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजात्** ॥ २ । ४ । २९ ॥ स्त्रियां ङीर्नाम्नि। केवली नाम ज्योतिः। मामकीत्यादि। मामकग्रहणस्य नियमार्थत्वात्। मामिका वृद्धिरित्यत्र अञ्लक्षणोऽपि ङीर्न। नाम्नीति किम्। केवला ॥ **भाजगोणनागस्थलकुण्डकालकुशकामुककटकबरात्पक्वावपनस्थूलाकृत्रिमामत्रकृष्णायसीरिरंसुश्रोणिकेशपाशे** ॥ २ । ४ । ३० ॥ स्त्रियां नाम्नि ङीः स्यात्। भाजी पक्वा चेत् भाजान्या। गोणी आवपनम्। गोणान्या। नागी स्थूला। नागान्या। स्थली अकृत्रिमा। स्थलान्या। कुण्डी अमत्रम्। कुण्डान्या। काली कृष्णा। कालान्या। कुशी आयसी। कुशान्या। कामुकी रिरंसुः। कामुकान्या। कटी श्रोणिः। कटान्या। कबरी केशपाशः। कबरान्या। जातौ तु नाम्न्येव तस्याः स्थौल्याभावात्। अमृते जारजः कुण्ड इति जातिवचनात् कुण्डशब्दात् जातिलक्षणो ङीर्भवत्येव। जानपदशब्दादपि वृत्ताविच्छत्यन्यः। जानपदी वृत्तिः। अन्यत्र जानपदा मदिरा ॥ **नवा शोणादेः** ॥ २ । ४ । ३१ ॥ स्त्रियां

ङीः । शोणी । शोणा । बह्वी । बहुः । गुणवचनादुत्तरेणैव भविष्यति । वृत्रघ्नी । वृत्रहा । चन्द्रभागान्नद्याम् । चन्द्रभागी चन्द्रभागा । अन्यत्र चन्द्रभागा ॥ इतोऽक्त्यर्थात् ॥ २ । ४ । ३२ ॥ नाम्नः स्त्रियां ङीर्वा । भूमी । भूमिः । अक्त्यर्थादिति किम् । कृतिः । अजननिः ॥ पद्धतेः ॥ २ । ४ । ३३ ॥ स्त्रियां ङीर्वा । पद्धती । पद्धतिः । क्त्यर्थ आरम्भः ॥ शक्तेः शस्त्रे ॥ २ । ४ । ३४ ॥ स्त्रियां ङीर्वा । शक्ती । शक्तिः । शस्त्रे किम् । शक्तिः सामर्थ्यम् ॥ स्वरादुतो गुणादखरोः ॥ २ । ४ । ३५ ॥ नाम्नः स्त्रियां ङीर्वा । पट्वी । पटुः । गुणाद् द्रव्यवृत्तेः प्रत्ययः । स्वरात् किम् । पाण्डुर्भूमिः । उत इति किम् । श्वेता । गुणादिति किम् । आखुः । अखरोरिति किम् । खरुः । "सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥ १ ॥ पूर्वार्धेन जातिर्गुणो न । आधेयश्चाक्रियाजश्चेत्यनेनोत्पाद्यस्यैकस्वभावस्य कर्मणो व्यवच्छेदः । अन्त्येन तु द्रव्यव्यवच्छेदः । केचित्तु द्रव्याश्रितिनित्यानित्यजातिमान् गुण इत्याहुः ॥ श्येतैतहरितभरतरोहिताद्वर्णात्तो नश्च ॥ २ । ४ । ३६ ॥ स्त्रियां ङीर्वा ॥ श्येनी । श्येता । एवमेन्यादयः । लत्वे लोहिनी । लोहिता । वर्णादिति किम् । श्येता । चो नस्य ङीसन्नियोगशिष्टतार्थः ॥ क्नः पलितासितात् ॥ २ । ४ । ३७ ॥ स्त्रियां ङीर्वा तत्सन्नियोगे तस्य क्नश्च । पलिक्नी । पलिता । असिक्नी । असिता ॥ असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः ॥ २ । ४ । ३८ ॥ अदन्तान्नाम्नः स्त्रियां ङीर्वा । अतिकेशी । अतिकेशा । सहादिवर्जनात् सकेशा । अकेशा । विद्यमानकेशा । स्वाङ्गात् किम् । बहुयवा । अक्रोडादिभ्य इति किम् । कल्याणक्रोडा । आदित्येव । परमशिखा ॥ " अविकारोऽद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते । च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥ १ ॥ बहुशोफा । बहुकफा । सुज्ञाता । दीर्घमुखा शाला इत्यत्र स्वाङ्गत्वाभावान्न ङीः । च्युतं चेत्यादि किम् । बहुकेशी रथ्या । पृथुमुखी पृथुमुखा प्रतिमा । कल्याणपाणिपादेत्यत्र स्वाङ्गसमुदायत्वात् वक्ष्यमाणनियमबलाद्वा न ङीः । द्विपदीत्यत्र तु द्विगुत्वान्नित्यं ङीः । अस्वाङ्गपूर्वपदादेवेच्छन्त्यन्ये । पाणिपादा ॥ नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ॥ २ । ४ । ३९

॥ सहादिवर्जपूर्वपदात् स्वाङ्गात् स्त्रियां ङीर्वा ॥ तुङ्गनासिकी । तुङ्गनासिका । कृशोदरी । कृशोदरा । बिम्बोष्ठी । बिम्बोष्ठा । दीर्घजङ्घी । दीर्घजङ्घा । समदन्ती । समदन्ता । चारुकर्णी । चारुकर्णा । तीक्ष्णशृङ्गी । तीक्ष्णशृङ्गा । मृदङ्गी । मृदङ्गा । सुगात्री । सुगात्रा । सुकण्ठी । सुकण्ठा । नियमार्थमिदम् तेन बहुस्वरसंयोगोपान्त्येभ्योऽन्येभ्यो न । सुललाटा । सुपार्श्वा । अङ्गगात्रकण्ठेभ्यो ङीं नेच्छन्त्यन्ये ॥ नखमुखादनाम्नि ॥ २ । ४ । ४० ॥ सहादिवर्जपूर्वपदात् स्वाङ्गात् स्त्रियां ङीर्वा । शूर्पनखी । शूर्पनखा । चन्द्रमुखी । चन्द्रमुखा । अनाम्नीति किम् । शूर्पणखा । पूर्वपदस्थादिति णत्वम् ॥ पुच्छात् ॥ २ । ४ । ४१ ॥ सहादिवर्जपूर्वपदात् स्वाङ्गात् स्त्रियां ङीर्वा । सुपुच्छी । सुपुच्छा ॥ कबरमणिविषशरादेः ॥ २ । ४ । ४२ ॥ पुच्छात् स्त्रियां नित्यं ङीः । कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ॥ पक्षाच्चोपमादेः ॥ २ । ४ । ४३ ॥ पुच्छाच्च स्त्रियां ङीः । उलूकपक्षी । उलूकपुच्छी ॥ क्रीतात् करणादेः ॥ २ । ४ । ४४ ॥ अदन्तात् स्त्रियां ङीः । अश्वक्रीती । करणग्रहणं किम् । सुक्रीता । आदेरिति किम् । अश्वेन क्रीता । केचित्तु धनेन क्रीतेति आबन्तेनापि समासमिच्छन्ति । धनक्रीता ॥ क्तादल्पे ॥ २ । ४ । ४५ ॥ नाम्नः करणादेः स्त्रियां ङीः ॥ अभ्रविलिप्ती द्यौः । अल्पे किम् । चन्दनानुलिप्ता ॥ स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्बहुव्रीहेः ॥ २ । ४ । ४६ ॥ क्तान्तात् स्त्रियां ङीः । शङ्खभिन्नी । कृतादिवर्जनात् दन्तकृतेत्यादि । बहुव्रीहेः किम् । हस्तपतिता ॥ अनाच्छादजात्यादेर्नवा ॥ २ । ४ । ४७ ॥ कृतादिवर्जितक्तान्ताद् बहुव्रीहेः स्त्रियां ङीः । शाङ्गरजग्धी । शाङ्गरजग्धा । आच्छादवर्जनात् वस्त्रच्छन्ना । जात्यादेः किम् । मासयाता । अकृताद्यन्तादित्येव । कुण्डकृता । क्तादित्येव । शाङ्गरप्रिया ॥ पत्युर्नः ॥ २ । ४ । ४८ ॥ बहुव्रीहेः पत्यन्तात् स्त्रियां ङीर्वा तद्योगेऽन्तस्य नश्च । दृढपत्नी । दृढपतिः । मुख्यादित्येव । बहुस्थूलपतिः पुरी ॥ सादेः ॥ २ । ४ । ४९ ॥ पत्युः स्त्रियां ङीर्वा तद्योगेऽन्तस्य नश्च । ग्रामपत्नी । ग्रामपतिः । सादेः किम् । पतिरियम् । मुख्यादित्येव । अतिपतिः । गौणादपीच्छन्त्यन्ये ॥ सपत्न्यादौ ॥ २ । ४ । ५० ॥ पत्युः स्त्रियां ङीर्नश्चान्तस्य । सपत्नी । समुदायनिपातनं स-

मानस्य समासार्थं पुंवद्भावप्रतिषेधार्थं च । सपत्नीभार्यः । सापत्नः ॥ ऊढायाम् ॥ २ । ४ । ५१ ॥ पत्युर्ङीः स्त्रियां नश्चान्तस्य । पत्नी ॥ पाणिगृहीतीति ॥ २ । ४ । ५२ ॥ ऊढायां निपात्यन्ते । इति शब्दः प्रकारार्थः । पाणिगृहीती । करगृहीती । ऊढायां किम् । पाणिगृहीता । बहुव्रीहेरेवेच्छन्त्यन्ये ॥ पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः ॥ २ । ४ । ५३ ॥ निपात्येते । पतिवत्नी । अन्तर्वत्नी । भार्येति किम् । पतिमती पृथ्वी । गर्भिणीति किम् । अन्तरस्यां शालायामस्ति ॥ जातेरयान्तनित्यस्त्रीशूद्रात् ॥ २ । ४ । ५४ ॥ अदन्तात् स्त्रियां ङीः । जातिः काचित् संस्थानव्यङ्ग्या । तटी । सकृदुपदेशव्यङ्ग्यत्वे सति अत्रिलिङ्गान्या । ब्राह्मणी । सत्यन्तं किम् । देवदत्ता । विशेष्यं किम् । शुक्ला । गोत्रचरणलक्षणा च तृतीया । नाडायनी । बह्वृची । यदाहुः " आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह " ॥ १ ॥ जातेः किम् । मुण्डा । यान्तादिवर्जनात् क्षत्रिया, खट्वा, शूद्रा । धवयोगे तु शूद्री । आदित्येव । आखुः । गवयी, द्रोणी, इत्यादि तु गौरादित्वात् । अन्तग्रहणं साक्षात्प्रतिपत्त्यर्थम् । तेन वतण्डी । महाशूद्री । आभीरजातिः । मुख्यादित्येव । बहुसूकरा भूमिः ॥ पाककर्णपर्णवालान्तात् ॥ २ । ४ । ५५ ॥ जातेः स्त्रियां ङीः । ओदनपाकी । आखुकर्णी । मुद्गपर्णी । गोवाली । जातेः किम् । बहुपाका यवागूः । नित्यस्त्रीताद्वचनम् । एवमुत्तरसूत्रत्रयेऽपि ॥ असत्काण्डप्रान्तशतैकाञ्चः पुष्पात् ॥ २ । ४ । ५६ ॥ जातेः स्त्रियां ङीः । शङ्खपुष्पी । सदादिवर्जनात् सत्पुष्पेत्यादि ॥ असंभस्त्राजिनैकशणपिण्डात्फलात् ॥ २ । ४ । ५७ ॥ जातेः स्त्रियां ङीः ॥ दासीफली । समादिवर्जनात् सम्फलेत्यादि । एकाचेच्छन्त्यन्ये । ओषध्य एताः ॥ अनञो मूलात् ॥ २ । ४ । ५८ ॥ जातेः स्त्रियां ङीः । दर्भमूली । अनञः किम् । अमूला ॥ धवाद्योगादपालकान्तात् ॥ २ । ४ । ५९ ॥ स्त्रियामदन्तान्ङीः । प्रष्ठी । धवादियोगादिति किम् । प्रसूता । योगादिति किम् । देवदत्ता । व्यतिरेकविवक्षायां प्राष्ठी । पालकान्तवर्जनात् गोपालिका । आदित्येव । सहिष्णुः ॥ पूतक्रतुवृषाकप्यग्निकुसितकुसिदादै च ॥ २ । ४ । ६०

॥ योगात् स्त्रियामेभ्यो धववाचिभ्यो ङीस्तद्योगे चैषामैरन्तस्य । पूतक्रतायी । एवं वृषाकपायी इत्यादयः । योगात् किम् । पूतक्रतुः ॥ मनोरौ च वा ॥ २ । ४ । ६१ ॥ धवाद्योगात् स्त्रियां मनोर्ङीर्वा तद्योगे औरैश्चान्तस्य । मनावी । मनायी । मनुः ॥ वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः ॥ २ । ४ । ६२॥ धवाद्योगात् ङीवृत्तेर्ङीः । वरुणानी । एवमिन्द्राणीत्यादयः । दीर्घोच्चारणं मतान्तरसंग्रहार्थम् । इन्द्रमाचष्टे इन्द् तद्भार्या इन्द्राणी ॥ मातुलाचार्योपाध्यायाद्वा ॥ २ । ४ । ६३ ॥ योगात् ङीवृत्तेर्ङीस्तद्योगे चानन्तः । मातुलानी । मातुली । आचार्यानी । आचार्यी । क्षुभ्नादित्वाण्णत्वाभावः । आचार्यीति नेच्छन्त्यन्ये ॥ उपाध्यायानी । उपाध्यायी । अन्ये तु मातुला आचार्या उपाध्यायेत्यपीच्छन्ति तदर्थं ङीरिति विकल्पनीयः ॥ सूर्याद्देवतायां वा ॥ २ । ४ । ६४ ॥ धवाद्योगात् स्त्रियां ङीस्तद्योगे चानन्तः । सूर्याणी । सूर्या । देवतायां किम् । मानुषी सूरी । सूर्याणीति नेच्छन्त्यन्ये ॥ सूर्यागस्त्ययोरीये च ॥ २ । ४ । ९ ॥ यो ङ्यां लुक् । सूरी । आगस्ती । ईये चेति किम् । सौर्यः । आगस्त्यः ॥ यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे ॥ २ । ४ । ६५ ॥ स्त्रियां ङीस्तद्योगे चानन्तः । यवानी यवनानी लिपिः । अरण्यानी । हिमानी । लिपीति, किम् । यावनी वृत्तिः । भार्या यवनी ॥ आर्यक्षत्रियाद्वा ॥ २ । ४ । ६६ ॥ आर्याणी । आर्या । क्षत्रियाणी । क्षत्रिया । धवयोगे तु आर्यी । क्षत्रियी ॥ यञो डायन् च वा ॥ २ । ४ । ६७ ॥ यञन्तात् स्त्रियां ङीस्तद्योगे च डायन्नन्तो वा । गार्ग्यायणी । गार्गी ॥ लोहितादिशकलान्तात् ॥ २ । ४ । ६८ ॥ यञन्तात् स्त्रियां ङीस्तद्योगे डायन् चान्तः । लौहित्यायनी । शाकल्यायनी ॥ षावटाद्वा ॥ २ । ४ । ६९ ॥ यञन्तात् स्त्रियां ङीस्तद्योगे डायन्नन्तः । पौतिमाष्यायणी । पौतिमाष्या । आवट्यायनी । आवट्या ॥ कौरव्यमाण्डूकासुरेः ॥ २ । ४ । ७० ॥ स्त्रियां ङीस्तद्योगे डायन् चान्तः । कौरव्यायणी । माण्डूकायनी । आसुरायणी ॥ इञ इतः ॥ २ । ४ । ७१ ॥ स्त्रियां ङीः । सौतंगमी । इतः किम् [illegible] ॥ नुर्जातेः ॥ २ । ४ । ७२ ॥ इदन्तात् स्त्रियां ङीः । कुन्ती । दाक्षी । इत इत्येव । विद् । दरद् । नुः

क्विप् । तित्तिरिः । जातेः किम् । निष्कौशाम्बिः ॥ उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ् ॥ २ । ४ । ७३ ॥ नुर्जातिवाचिनः स्त्रियाम् । कुरूः । कर्कन्धूः । ब्रह्मा बन्धुरस्या ब्रह्मबन्धूरित्यत्र परोऽपि कच् न तत्र बहुलाधिकारात् । उतः किम् । वधूः । ऊङि हि सति अतिवधूरिसम ह्रस्वः स्यात् । अप्राणिनः किम् । आखुः । जातेरित्येव पटुः । रज्वादिवर्जनात् अध्वर्युः । रज्जुः । हनुः । बहुवचनमाकृतिगणार्थम् । कथं भीरु गतं निवर्त्तते । ताच्छीलिकानां संज्ञाप्रकारत्वेन मनुष्यजातिवचनत्वात् भविष्यति । अन्ये तु किमभीरुररार्यसे इति प्रयोगाज्जातिवचनत्वमनिच्छन्त ऊङं न मन्यन्ते ॥ बाह्वन्तकद्रुकमण्डलोर्नाम्नि ॥ २ । ४ । ७४ ॥ स्त्रियामूङ् । भद्रबाहूः । कद्रूः । कमण्डलूः । नाम्नि किम् । वृत्तबाहुः । उपमानसहितसंहितसहशफवामलक्ष्मणाद्यूरोः ॥ २ । ४ । ७५ ॥ स्त्रियामूङ् । करभोरूः । एवं सहितोरूरित्यादयः । उपमानादेरिति किम् । पीनोरुः । कथं हस्तिस्वाम्यूरुः । नात्रोरुशब्द उपमानादिपूर्वः किन्तु स्वाम्यूरुः ॥ नारीसखीपङ्गूश्वश्रू ॥ २ । ४ । ७६ ॥ एते निपात्याः ॥ यूनस्तिः ॥ २ । ४ । ७७ ॥ स्त्रियाम् ङ्यपवादो योगः । युवतिः । युवतीत्यत्र तु इतोऽक्त्यर्थादिति ङीर्भविष्यति । मुख्यादित्येव । निर्यूनी ॥ अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्त्यस्य ष्यः ॥ २ । ४ । ७८ ॥ कारीषगन्ध्या । वाराह्या । अनार्षे किम् । वासिष्ठी । वृद्धे किम् । वाराही । अणिञ इति किम् । आर्त्तभागी । बहुस्वरेति किम् । दाक्षी । गुरूपान्त्यस्येति किम् । औपगवी । अणिञन्तस्य सतो बहुस्वरस्येति किम् । दौवार्या । स्त्रियामित्येव । वाराहिः । मुख्यस्येत्येव । बहुकारीषगन्धा । सौधर्मीत्यादि तु गौरादिपाठात् गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि भवति ॥ ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे ॥ २ । ४ । ८३ ॥ कारीषगन्धीपुत्रः । कारीषगन्धीपतिः । ष्येति किम् । इभ्यापुत्रः । केवलयोरिति किम् । कारीषगन्ध्यापुत्रकुलम् । तत्पुरुष इति किम् । कारीषगन्ध्यापतिः । मुख्य इत्येव । अतिकारीषगन्ध्यापुत्रः ॥ बन्धौ बहुव्रीहौ ॥ २ । ४ । ८४ ॥ मुख्याद्यन्तात्ष्यः केवले ईच् । कारीषगन्धीबन्धुः । केवल इत्येव । कारीषगन्ध्याबन्धुकुलम् । मुख्य इत्येव । अतिकारीषग-

न्ध्याबन्धुः ॥ मातमातृमातृके वा ॥ २।४।८९॥ बहुव्रीहावित्येव। कारीषगन्धीमातः, कारीषगन्ध्यामातः। कारीषगन्धीमाता, कारीषगन्ध्यामाता। कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः। मातेति निर्देशान्मातृशब्दस्य पुंवद्भावसामर्थ्यमन्तरेणापि पक्षे मातादेशः। अन्यथा मातृशब्देनैव गतत्वान्मातशब्दोपादानमनर्थकं स्यात्। मातृमातृकशब्दयोश्च भेदेनोपादानाद् ऋदन्तलक्षणः कच्प्रत्ययोऽपि विकल्प्यते॥ तिष्यपुष्ययोर्भाणि ॥ २।४।९०॥ यो लुक्। तैषी रात्रिः। पौषमहः। तिष्यपुष्ययोरिति किम्। सैध्यमहः। भाणीति किम्। तैष्यश्चरुः। अन्ये तु तिष्यपुष्ययोर्नक्षत्रे वर्तमानयोः सामान्येऽपि नित्यं सिध्यशब्दस्य विकल्पेन यलोपमिच्छन्ति॥ कुलाख्यानाम् ॥ २।४।७९॥ अनार्षवृद्धाणिञन्तानामन्तस्य स्त्रियां ष्यः। पौणिक्या। गौप्त्या। वृद्ध इत्येव। पौणिकी। अनार्ष इत्येव। गौतमी। गौरादित्वात् तु भौरिकी। भौलिकी। अबहुस्वरागुरूपान्त्यार्थं वचनम्॥ क्रौड्यादीनाम् ॥ २।४।८०॥ अणिञन्तानामन्तस्य स्त्रियां ष्यः॥ चौपयत्या। क्रौड्या। क्रौडेयः। अन्ये तु क्रौड्येयः। अनन्तरापत्यार्थोऽप्यारम्भः॥ भोजसूतयोः क्षत्रियायुवत्योः ॥ २।४।८१॥ अन्तस्य स्त्रियां ष्यः। भोज्या। सूत्या। अन्या तु भोजा सूता। अन्ये तु सूतसम्बन्धिनी युवतिः सूत्या न सर्वेत्याहुः॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा ॥ २।४।८२॥ स्त्रियामन्तस्य ष्यः॥ दैवयज्ञ्या। दैवयज्ञी। शौचिवृक्ष्या। शौचिवृक्षी। सात्यमुग्र्या। सात्यमुग्री। काण्ठेविद्ध्या। काण्ठेविद्धी। इञन्तमात्रनिर्देशात् पौत्रादौ प्राप्ते प्रथमापत्ये त्वप्राप्ते विभाषा।

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां स्त्रीप्रत्ययः ॥

## ॥ अथ कारकाणि ॥

॥ **क्रियाहेतुः कारकम्** ॥ २ । २ । १ ॥ कर्त्रादि । तच्च द्रव्याणां स्वपराश्रयसमवेतक्रियानिर्वर्त्तकं सामर्थ्यं शक्तिरित्याचक्षते । एतेन शक्तिमत्कारकमित्यपास्तम् । मणिसमवधाने अग्नेर्दाहकत्वाभावात् । शक्तिश्च सहभूर्यावद्द्रव्यभाविनी क्रियाकाल एवाभिव्यज्यते । अन्वर्थाश्रयणाच्च निमित्तत्वमात्रेण हेत्वादेर्न कारकसंज्ञा । तेनाश्वेन वास इत्यत्र न समासः ॥ **स्वतन्त्रः कर्त्ता** ॥ २ । २ । २ ॥ क्रियाहेतुः क्रियासिद्धौ स्वप्रधानो यः स कर्त्ता । देवदत्तः पचति । देवदत्तेन पाचयति चैत्रः । स्थाली पचति । मैत्रेण कृतः ॥ **कर्त्तुर्व्याप्यं कर्म** ॥ २ । २ । ३ ॥ कर्त्रा क्रियया यद्विशेषेणाप्तुमिष्यते तत्कारकं व्याप्यं कर्म च स्यात् । प्रसिद्धस्यानुवादेनाप्रसिद्धस्य विधानं लक्षणार्थः । तत्त्रेधा निर्वर्त्यं विकार्यं प्राप्यं च । तत्र यदसज्जायते जन्मना वा प्रकाश्यते तन्निर्वर्त्त्यम् । कटं करोति । पुत्रं प्रसूते । प्रकृत्युच्छेदेन गुणान्तराधानेन वा यद्विकारमापाद्यते तद्विकार्यम् । काष्ठं दहति । काण्डं लुनाति । यत्र तु क्रियाकृतो विशेषो नास्ति तत्प्राप्यम् । आदित्यं पश्यति । अस्य तु त्रिविधस्यापि अवान्तरव्यापारा निर्वृत्तिविकृत्याभासोपगमनानि । त्रिविधमप्येतत् त्रिविधम् । इष्टमनिष्टमनुभयं च । शिष्यं करोति । अहिं लङ्घयति । वृक्षच्छायां लङ्घयति । पुनस्तत्कर्म द्विविधं प्रधानेतरभेदात् तच्च द्विकर्मकेषु दुहिभिक्षिरुधिप्रच्छिचिग्रूब्रूशास्त्वर्थेषु याचिजयतिप्रभृतिषु नीहृकृषवहेषु च भवति । याचिरनुनयार्थस्तेन भिक्ष्यर्थाद्भेदः । गां दोग्धि पयः । यदर्थं क्रियारभ्यते तत्प्रधानं तत्सिद्ध्यै यत्क्रियया व्याप्यते गवादि तदप्रधानम् । प्रधानाविवक्षायां गवादेरेव प्राधान्यम् । आश्चर्यो गवां दोहोऽगोपेन । तत्र दुहादीनामप्रधाने कर्मणि कर्मजः प्रत्ययो भवति । गौर्दुह्यते पयो मैत्रेण । न्यादीनां तु प्रधाने कर्मणि । नीयते नीता वा ग्राममजा । गत्यर्थानामकर्मकाणां तु णिगन्तानामुभयत्र । बोध्यते शिष्यो धर्मम् । बोध्यते शिष्यं धर्म इति वा । भोज्यतेऽतिथिमोदनः । भोज्यतेऽतिथिरोदनम् । पाठ्यते

शिष्यो ग्रन्थम् । पाठ्यते शिष्यं ग्रन्थ इति वा । सर्वत्र चोक्ते कारके प्रथमा अभिधानं च प्रायेणेत्यादि कृत्तद्धितसमासैः । कर्तुः किम् । माषेष्वश्वं बध्नाति । वीति किम् । पयसा ओदनं भुङ्क्ते ॥ वा कर्मणामणिक्कर्त्ता णौ ॥ २ । २ । ४ ॥ कर्म । पाचयति चैत्रं चैत्रेण वा । अत्राविवक्षितकर्माणो ग्राह्या उत्तरत्र नित्यग्रहणात् । व्यापारमात्रविवक्षायामविवक्षितकर्माणो भवन्ति । गत्यर्थादीनां परत्वान्नित्य एव विधिः ॥ गतिबोधाहारार्थशब्दकर्मनित्याकर्मणामनीखाद्यदिह्वाशब्दायक्रन्दाम् ॥ २ । २ । ५ ॥ अणिगवस्थायां कर्त्ता णौ कर्म स्यात् । गमयति मैत्रं ग्रामम् । देशान्तरप्राप्तेरन्यत्र न भवति । स्त्रियं गमयति मैत्रेण चैत्रः । बोधशब्देन सामान्यविशेषयोर्ग्रहणम् । बोधयति गुरुः शिष्यं धर्मम् । दर्शयति रूपतर्कं कार्षापणम् । अन्ये तु बोधविशेषार्थस्य दृशेरेवेच्छन्ति । घ्रापयत्युत्पलं चैत्रेण मैत्रः । भोजयति बटुमोदनम् । शब्दः कर्म क्रिया व्याप्यं वा येषां ते शब्दकर्माणः । जल्पयति मैत्रं द्रव्यम् । अध्यापयति बटुं वेदम् । आसयति मैत्रं चैत्रः ॥ कालाध्वभावदेशैश्च सर्वेऽपि धातवः सकर्मका एवेत्यन्यकर्मापेक्षया नित्याकर्मका वेदितव्याः । गत्यर्थादीनामिति किम् । पाचयत्योदनं चैत्रेण मैत्रः । अणिक्कर्त्तेत्येव । गमयति चैत्रो मैत्रम्, तमपरः प्रयुङ्क्ते, गमयति चैत्रेण मैत्रं जिनदत्तः । नयतेः प्रापणोपसर्जनप्राप्त्यर्थत्वेन गत्यर्थत्वात् खाद्यदोराहारार्थत्वात् ह्वाशब्दायक्रन्दां च शब्दकर्मकत्वात् कर्मत्वे प्राप्ते प्रतिषेधार्थं वचनम् । नाययति भारं चैत्रेणेत्यादि कर्मसंज्ञा प्रतिषेधात् स्वव्यापाराश्रयं कर्तृत्वमेव । प्रेषणाध्येषणादिप्रयोजकव्यापारेण णिगन्तवाच्येनाणिकर्तुर्व्याप्यत्वात् कर्मसंज्ञा सिद्धैव नियमार्थं तु वचनम् । तेनान्यधातुसम्बन्धिनः कर्तृत्वमेव ॥ भक्षेर्हिंसायाम् ॥ २ । २ । ६ ॥ स्वार्थिकण्यन्तस्याणिक्कर्त्ता णौ कर्म स्यात् । भक्षयति सस्यं बलीवर्दान् मैत्रः । वनस्पतीनां प्रसवप्ररोहवृद्ध्यादिमत्त्वेन चेतनत्वात् तद्विशेषस्य सस्यस्य प्राणवियोगस्तद्भक्षणात् स्वाम्युपघातो वात्र हिंसा । हिंसायां किम् । भक्षयति पिण्डीं शिशुना । आहारार्थत्वात् प्राप्ते नियमार्थं वचनम् । तेन भक्षयति राजद्रव्यं नियुक्तेनेत्यादौ न ॥ वहेः प्रवेयः ॥ २ । २ । ७ ॥ अणिक्कर्त्ता णौ कर्म स्यात् । वाहयति भारं बलीवर्दान् मैत्रः

। भवेय इति किम् । वाहयति भारं चैत्रेण । भक्ष्यर्थस्य प्रापणार्थस्य च वहेर्भक्षकत्वादकर्मकस्य च नित्याकर्मकत्वात् पूर्वेण प्राप्ते नियमार्थं वचनम् । अविवक्षितकर्मकस्य तु पक्षे विध्यर्थं चेदम् ॥ हृक्रोर्नवा ॥ २ । २ । ८ ॥ अणिक्कर्त्ता णौ कर्म स्यात् । प्राप्तेऽप्राप्ते चायं विकल्पः । प्राप्ते विहारयति देशमाचार्यमाचार्येण वा । अत्र गत्यर्थत्वेन प्राप्तिः । विहारयति सैन्धवान् सैन्धवैर्वा । अप्राप्ते, हारयति द्रव्यं मैत्रं मैत्रेण वा । कारयति कटं चैत्रं चैत्रेण वा ॥ दृश्यभिवदोरात्मने ॥ २ । २ । ९ ॥ अणिक्कर्त्ता णौ वा कर्म । दर्शयते राजा भृत्यान् भृत्यैर्वा । अभिवादयते गुरुः शिष्यं शिष्येण वा । आत्मने इति किम् । दर्शयति रूपतर्कं कार्षापणम् । अभिवादयति गुरुं शिष्येण । प्राप्ते चाप्राप्तेऽयं विकल्पः ॥ नाथः ॥ २ । २ । १० ॥ आत्मनेपदविषयस्य व्याप्यं वा कर्म । सर्पिषः सर्पिर्वा नाथते । पक्षे षष्ठी । आत्मने इत्येव । पुत्रमुपनाथति पाठाय ॥ स्मृत्यर्थदयेशः ॥ २ । २ । ११ ॥ व्याप्यं कर्म वा । मातरं मातुर्वा स्मरति । माता मातुर्वा स्मर्यते । सर्पिषः सर्पिर्वा दयते । लोकानां लोकानीष्टे । यत्तत्र षष्ठ्या मातुः स्मृतमित्यादौ समासाभावार्थं नियमार्थं च वचनम् । तेनैषां कर्मैव शेषत्वेन विवक्ष्यते । अतो माता स्मृतम् ॥ कृगः प्रतियत्ने ॥ २ । २ । १२ ॥ व्याप्यं कर्म वा । एधोदकस्योपस्कुरुते एधोदकं वा बुद्ध्या । सतो गुणाधानमपायपरिहाराय वा । समीहायामिति किं । कटं करोति ॥ रुजार्थस्याज्वरिसन्तापेर्भावे कर्त्तरि ॥ २ । २ । १३ ॥ व्याप्यं वा कर्म । चौरस्य चौरं वा रुजति रोगः । पीडार्थस्य किम् । एति जीवन्तमानन्दः । अज्वरिसन्तापेरिति किम् । आयूनं ज्वरयति सन्तापयति वा रोगः । भावे कर्त्तरीति किम् । मैत्रं रुजति श्लेष्मा । चैत्रं रुजत्यध्वगमनं भावः । रोगो व्याधिरामयः । शिरोर्त्तिरित्यादयो भावाः ॥ जासनाटक्राथपिषो हिंसायाम् ॥ २ । २ । १४ ॥ व्याप्यं कर्म वा । चौरस्य चौरं वोज्जासयति । नटण् अवस्यन्दने साहचर्यात् । उन्नाटयति चौरस्य चौरं वा । चौरस्योत्क्राथयति । चौरमुत्क्राथयति । चौरस्य चौरं वा पिनष्टि । आकारोपान्त्यनिर्देशादाकारश्रुतौ स्यात् तेन दस्युमुदजीजसत् । अत एव क्राथेः कर्माभावे ह्रस्वत्वाभावः । हिंसायामिति किम्

। चौरं बन्धनाज्जासयति । अभावकर्तृकार्थं वचनम् ।। निप्रेभ्यो घ्नः ॥ २ । २ । १५ ॥ व्याप्यं कर्म वा । बहुवचनं समस्तव्यस्तविपर्यस्तपरिग्रहार्थम् । चौरस्य चौरं वा निप्रहन्ति । निहन्ति, प्रहन्ति, प्रणिहन्ति । हिंसायामित्येव । रागादीन्निहन्ति ॥ विनिमेयद्यूतपणं पणव्यवहोः ॥ २ । २ । १६ ॥ व्याप्यं कर्म वा । शतस्य शतं वा पणायति । दशानां दश वा व्यवहरति । विनिमेयद्यूतपणमिति किम् । साधून् पणायति । शलाकां व्यवहरति । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः ॥ उपसर्गाद्दिवः ॥ २ । २ । १७ ॥ व्याप्यौ विनिमेयद्यूतपणौ कर्म वा । शतस्य शतं वा प्रदीव्यति ॥ न ॥ २ । २ । १८ ॥ अनुपसर्गस्य दिवो विनिमेयद्यूतपणौ व्याप्यौ कर्म न ॥ शतस्य दीव्यति । अकर्मकत्वाद्दीव्यते द्यूतं देवितव्यं सुदेवमित्यादौ भावे आत्मनेपदक्तकृत्यखलः कर्तरि च क्तः सिद्धाः ॥ भूमिं दीव्यतीत्यत्र तु सन्धिपणः । द्यूतं दीव्यति, अक्षान् दीव्यतीत्यत्र न पणो व्याप्यं किन्तु क्रिया तत्साधनञ्च ॥ करणञ्च ॥ २ । २ । १९ ॥ दिवः करणं कर्मकरणञ्च युगपत् । अक्षानक्षैर्वा दीव्यति अक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र करणत्वात्तृतीया, कर्मत्वाच्चाणिक्कर्तुः कर्मत्वं परस्मैपदं च न भवति । अक्षान् दीव्यतीत्यत्र करणत्वनिमित्ता तृतीयैव परत्वात् स्यादिति न शङ्क्यं स्पर्धाभावात् । प्रतिकार्यं संज्ञा भिद्यन्ते इति न्यायाद्वा ॥ अधेः शीङ्स्थास आधारः ॥ २ । २ । २० ॥ कर्म । ग्राममधिशेते । अधितिष्ठति, अध्यास्ते । अकर्मका अपि धातवः सोपसर्गाः सकर्मका इति सिद्धं सकर्मकत्वं आधारबाधनार्थं तु वचनम् ॥ उपान्वध्याङ्वसः ॥ २ । २ । २१ ॥ आधारः कर्म स्यात् । ग्राममुपवसति । अनुवसति, अधिवसति, आवसति, साहचर्यादुपस्य स्थानार्थस्यैव ग्रहणम् । तेनेह न । ग्रामे उपवसति । अदाद्यनदाद्योरनदादेरेव ग्रहणमितिवसते र्न ॥ वाभिनिविशः ॥ २ । २ । २२ ॥ आधारः कर्म । व्यवस्थितविभाषेयम् । तेन ग्राममभिनिविशते, कल्याणेऽभिनिविशते ॥ कालाध्वभावदेशं वा कर्म चाकर्मणाम् ॥ २ । २ । २३ ॥ आधारः कर्म युगपद् । मासमास्ते । मासे आस्यते । क्रोशं स्वपिति । गोदोहमास्ते । कुरूनास्ते । अविवक्षितकर्माणोऽप्यकर्मकाः । मासं पचति । कालादि किम् । मासादे

आस्ते । अकर्म चेति किम् । मासमास्यते । गोदोहमासितः । अकर्मणामिति किम् । रात्रावुद्देशोऽधीतः । पचत्योदनं मासमित्यादि तु द्विकर्मकत्वाद् भविष्यति । अन्ये तु सकर्मकाणामकर्मकाणां च प्रयोगे कालाध्वभावानामत्यन्तसंयोगे सति नित्यं कर्मत्वमिच्छन्ति । दिवसं पचत्योदनमित्यादि । अनेन कर्मसंज्ञायां कर्मणि त्याद्यादयोऽपि । मास आस्यते । कालाध्वनोर्व्याप्ताविति च गुणद्रव्ययोगे एवेच्छन्ति न तु क्रियायोगे । अत्यन्तसंयोगादन्यत्र तु रात्रौ शेते इत्यादावाधारत्वमेव ॥ साधकतमं करणम् ॥ २ । २ । २४ ॥ क्रियायां कारकम् । दानेन भोगानाप्नोति । तमग्रहणमपादानादिसंज्ञायां तरतमयोगो नास्तीति ज्ञापनार्थम् । तेन कुसूलात्पचति । गङ्गायां घोषः । अस्य च कारकान्तरापेक्षया प्रकर्षो न स्वकक्षायाम् । तेनैकस्यां क्रियायामनेकमपि करणं भवति । नावा नदीस्रोतसा व्रजति । यद्व्यापारानन्तरं क्रियासिद्धिर्विवक्ष्यते तत्साधकतमम् ॥ कर्माभिप्रेयः सम्प्रदानम् ॥ २ । २ । २५ ॥ व्याप्येन क्रियया वा यं श्रद्धानुग्रहादिकाम्ययाभिसम्बध्नाति स कर्माभिप्रेयः । देवाय बलिं ददाति । शिष्याय ज्ञानमुपदिशति । राज्ञे कार्यमाचष्टे । पत्ये शेते । देवेभ्यो नमति । अभिग्रहणादिह न । घ्नतः पृष्ठं ददाति । इह च स्यात् छात्राय चपेटां प्रयच्छति ॥ स्पृहेर्व्याप्यं वा ॥ २ । २ । २६ ॥ सम्प्रदानं । वने पुष्पेभ्यः पुष्पाणि वा स्पृहयति । सम्प्रदानत्वपक्षेऽकर्मकत्वम् । तेन पुष्पेभ्यः स्पृह्यते मैत्रेणेत्यादौ भावे आत्मनेपदादयः ॥ क्रुद्द्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः ॥ २ । २ । २७ ॥ तत्सम्प्रदानम् । मैत्राय क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति, रुष्यति, इत्यादि, यं प्रतीति किम् । मनसा क्रुध्यति । मैत्रेण क्रुध्यते । कोप इति किम् । शिष्यस्य कुप्यति विनयार्थम् । सम्प्रदानसंज्ञया कर्मसंज्ञाया बाधनाद्भावे आत्मनेपदादयः । मैत्रायेर्ष्यते । इत्यादि ॥ नोपसर्गात् क्रुद्द्रुहा ॥ २ । २ । २८ ॥ यं प्रति कोपस्तत्सम्प्रदानम् । मैत्रमभिक्रुध्यति, अभिद्रुह्यति । क्रुधिद्रुही सोपसर्गौ सकर्मकौ ॥ अपायेऽवधिरपादानम् ॥ २ । २ । २९ ॥ अपायेनानधिष्ठितः । तदेतत्त्रिविधम् । निर्दिष्टविषयम् । उपात्तविषयम् २ । अपेक्षितक्रियम् ३ च । ग्रामादागच्छति ॥ कुसूलकात्पचति २ । साकाश्यकेभ्यः पा-

टलिपुत्रका अभिरूपतराः ३ । अपायश्च कायसंसर्गपूर्वको बुद्धिसंसर्गपूर्वकश्च विभाग उच्यते । तेनाधर्माज्जुगुप्सते, विरमति धर्मात्प्रमाद्यति, शृङ्गाच्छरो जायते । हिमवतो गङ्गा प्रभवति । मेषान्मेषोऽपसर्पति । विवक्षान्तरे त्वपादानत्वाभावे यथायोगं विभक्तयो भवन्ति । शृङ्गे शरो जायते इत्यादि ॥ क्रियाश्रयस्याधारोऽधिकरणम् ॥ २ । २ । ३० ॥ कर्त्तुः कर्मणो वा । आधारसंज्ञापि । तत्षोढा वैषयिकमौपश्लेषिकमभिव्यापकं सामीप्यकं नैमित्तिकमौपचारिकं चेति । दिवि देवाः । कटे आस्ते । तिलेषु तैलम् । गङ्गायां घोषः । युद्धे सन्नह्यते । अङ्गुल्यग्रे करिशतम् ॥ नाम्नः प्रथमैकद्विबहौ ॥ २ । २ । ३१ ॥ वर्त्तमानात् स्वार्थे । स्वार्थद्रव्यलिङ्गसङ्ख्योक्तशक्तिलक्षणः समग्रोऽसमग्रो वा पञ्चको नामार्थोऽर्थमात्रम् । तेषु शब्दस्यार्थे प्रवृत्तिनिमित्तं स्वरूपजातिगुणक्रियाद्रव्यसम्बन्धादिरूपं त्वतलादिप्रत्ययाभिधेयं स्वार्थः । स च भावो विशेषणं गुण इति चाख्यायतो डित्थः । गौः । शुक्लः । कारकः । दण्डी । राजपुरुषः । गार्ग्यः । यत्पुनरिदंतदित्यादिना व्यपदिश्यते स्वार्थस्य व्यवच्छेद्यं लिङ्गसङ्ख्याशक्त्याद्याश्रयः सत्त्वभूतं द्रव्यं विशेष्यमिति । इयं जातिः । अयं गुणः । इदं कर्मेति । यदर्थे सदसद्वा शब्देन एवावसीयते तदुच्चावचादिसंस्कारहेतुः स्त्री पुमान् नपुंसकमिति लिङ्गम् । तच्च शब्दधर्म इत्येके । अर्थधर्म इत्यन्ये । उभयथापि न दोषः । स्त्री पुमान् । नपुंसकम् । यस्यामेकद्विबहुवचनानि भवन्ति सा भेदप्रतिपत्तिहेतुः सङ्ख्या । एकः । द्वौ । बहवः । " निमित्तमेक इत्यत्र विभक्त्या नाभिधीयते । तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्त्तते " ॥ १ ॥ यस्यामनभिहितायां द्वितीयाद्या व्यतिरेकविभक्तयः षष्ठी च भवति । सा कारकरूपा तत्पूर्वकसम्बन्धरूपा च शक्तिः । क्रियते कटः । अर्थमात्रं चोपचरितमपि । उपचारश्च साहचर्यस्थानतादर्थ्यवृत्तमानधरणसामीप्ययोगसाधनाधिपत्यैः । कुन्ताः प्रविशन्ति इत्यादि । अलिङ्गसङ्ख्यमपि । उच्चैः । शक्तिप्रधानमपि यतः । द्योत्यमपि । प्रपचति । स्वरूपमात्रमपि । अध्यागच्छति । त्याद्यन्तपदसामानाधिकरण्ये प्रथमेति तत्त्वम् । यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते । नाम्न इति किम् । निरर्थकाद्वर्णाद्धातुवाक्याभ्यां च माभूत् ।

एकद्विबहावितिं च सङ्करनिवृत्त्यर्थम् । अव्ययेभ्यस्तु एकत्वाद्यभावेऽपि अव्ययस्येति लुब्विधानात् विभक्तिविधिः । तत्फलमथो स्वस्ते दृष्टम् ॥ आमन्त्र्ये ॥ २ । २ । ३२ ॥ नाम्नः प्रथमा । हे देव । आमन्त्र्ये इति किम् । राजा भव । षष्ठीप्राप्तौ वचनम् ॥ **गौणात् समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया** ॥ २ । २ । ३३ ॥ समया ग्रामम् । निकषा गिरिम् । हा मैत्रं व्याधिः । धिक् जाल्मम् । अन्तरान्तरेण च निषधं नीलं च विदेहाः । अन्तरेण धर्मं न सुखम् । साहचर्यान्निपातावेतौ । अतिवृद्धं कुरून्महद्बलम् । येन पश्चिमां गतः । तेन पश्चिमां नीतः । हा कृतं चैत्रस्येत्यादौ न साक्षात् हादियुक्तत्वेन विवक्षा । बहुवचनादन्येनापि योगे द्वितीया बुभुक्षितं न प्रतिभाति किञ्चित् । गौणादिति किम् । अन्तरा गार्हपत्यमाहवनीयं च वेदिः ॥ **द्वित्वेऽधोऽध्युपरिभिः** ॥ २ । २ । ३४ ॥ योगे गौणान्नाम्नो द्वितीया । षष्ठ्यपवादः । बहुवचनमेकद्विबहावितिं यथासङ्ख्यनिवृत्त्यर्थम् । अधोऽधः, अध्यधि, उपर्युपरि, ग्रामम् । एषां द्वित्वे इति किम् । अधः प्रासादस्य । असामीप्याद्द्वित्वं न ॥ **सर्वोभयाभिपरिणा तसा** ॥ २ । २ । ३५ ॥ युक्ताद् गौणान्नाम्नो द्वितीया । सर्वत उभयतोऽभितः परितो वा ग्रामं क्षेत्राणि ॥ **लक्षणवीप्स्येत्थंभूतेष्वभिना** ॥ २ । २ । ३६ ॥ युक्ताद्वर्त्तमानाद् गौणान्नाम्नो द्वितीया । वृक्षमभि विद्योतते विद्युत् । वृक्षं वृक्षमभिसेकः । साधुर्मैत्रो मातरमभि । लक्षणादिषु किम् । यदत्र ममाभि स्यात् तद्दीयताम् ॥ **भागिनि च प्रतिपर्यनुभिः** ॥ २ । २ । ३७ ॥ लक्षणादिषु वर्त्तमानाद् गौणान्नाम्नो द्वितीया । यदत्र मां प्रति, परि, अनु, वा स्यात् तद्दीयताम् । वृक्षं प्रति, परि, अनु वा विद्युत् । वृक्षं वृक्षं प्रति, परि, अनु, वा सिञ्चति । साधुर्देवदत्तो मातरं प्रतिपर्यनु वा । एतेषु किम् । अनु वनस्याशनिर्गता ॥ **हेतुसहार्थेऽनुना** ॥ २ । २ । ३८ ॥ हेतुर्जनकः । सहार्थस्तुल्ययोगो विद्यमानता च तद्विषयोऽपि उपचारात् । तयोर्वर्त्तमानादनुना युक्तात् द्वितीया । जिनजन्मोत्सवमन्वागच्छन् सुराः । गिरिमन्ववसिता सेना । तृतीयापवादो योगः ॥ **उत्कृष्टेऽनूपेन** ॥ २ । २ । ३९ ॥ युक्ताद् द्वितीया । अनु सिद्धसेनं कवयः । अनु मल्लवादिनं तार्किकाः । अनु-

हेमचन्द्रं वैयाकरणाः । उपोमास्वातिं सङ्ग्रहीतारः । उपजिनभद्रगणिक्षमाश्रमणं व्याख्यातारः । उपयशोविजयोपाध्यायं नव्यतार्किकाः । तस्मादन्ये हीना इत्यर्थः ॥ कर्मणि ॥ २ । २ । ४० ॥ नाम्नो द्वितीया । कटं करोति । इत्यादि । क्रियते कटः । कृतः कटः । शत्यः पटः । आरूढवानरो वृक्ष इत्यादिषु त्यादिकृत्तद्धितसमासैरभिहितत्वात् लोकशास्त्रयोश्चाभिहितेऽर्थे शब्दप्रयोगायोगाच्च भवति । कटं करोति । भीष्ममुदारं दर्शनीयमित्यादिषु तु भीष्मत्वादियुक्तस्य कटस्य कर्मत्वं प्रतिपाद्यं । न च जातिशब्दाः सम्भविनोऽपि गुणान् प्रतिपादयितुं समर्था इति तत्प्रतिपादनाय यथा भीष्मादिशब्दप्रयोगस्तथा तेभ्यो द्वितीयापि । नहि सामान्यवाचिनः कटशब्दादुत्पन्ना द्वितीया भीष्मादीनामनियताधाराणां गुणानां कर्मत्वमभिधातुं शक्नोति । यदि वा कटोऽपि कर्म भीष्मादयोऽपि । तत्र यद्यत् करोति ना व्याप्तुमिष्टं तत्सर्वं द्रव्यं गुणश्च कर्मेति पृथक् कर्मत्वे प्रत्येकं द्वितीया पश्चात्त्वेकवाक्यतया विशेषणविशेष्यभाव इति । अथवा द्रव्यस्य क्रियासु साक्षादुपयोगात् अस्तु कटस्यैव कर्मत्वं, भीष्मादीनां तु न केवला प्रकृतिः प्रयोक्तव्येति नियमादविभक्तिकानामप्रयोगार्हत्वात् एकविभक्तिमन्तरेण च सामानाधिकरण्यविशेषणत्वायोगात्, यथेश्वरसुहृदां स्वयं निर्धनत्वेऽपि तदेकयोगक्षेमत्वात् तद्धनेनैव फलभाक्त्वं भवत्येवमकर्मणामपि कटकर्मत्वेनैव कर्मत्वात् द्वितीया । कृतः कटो भीष्म उदारो दर्शनीय इत्यत्र तु करोतेरुत्पद्यमानः क्तो यस्य यस्य तया क्रियया सम्बन्धस्तस्य तस्य साकल्येन कर्मत्वमभिदधातीति क्वचिदपि द्वितीया न । कृतं पश्येत्यादौ तु कर्मादिसामान्यं कृद्भिरभिहितं तत्रापि अभिहितः सोऽर्थोऽन्तर्भूतो नामार्थः सम्पन्न इति कर्मादिशक्तियुक्तं द्रव्यं स्याद्यन्तैरभिधीयते । यथेदं कर्मेति । तत्र यासौ स्वरूपकालभिन्नायां क्रियायां सव्यापारतया कर्मादिरूपता तदभिधानाय यथायथं द्वितीयादयो भवन्ति । यत्र पुनरेकद्रव्याधारा प्रधानाप्रधानक्रियाविषयानेका शक्तिस्तत्र प्रधानविषयायां शक्तौ प्रत्ययैरभिहितायामप्रधानक्रियाविषया शक्तिः प्रधानशक्त्यनुरोधात् अभिहितवत्प्रकाशमाना विभक्त्युपपत्तौ निमित्तं न भवति, यथौदनः पक्त्वा भुज्यते देवदत्तेन । ग्रामो गन्तुमिष्यते देवदत्तेनेत्यत्र तु द्वितीयाचतुर्थ्यौ न

भवतः । इह च गौणत्वं क्रियापेक्षं । तेनाजां नयति ग्रामम् । कृतपूर्वी कटं, व्याकरणं सूत्रयतीत्यादौ यः कृतादिभिः कटादेरभिसम्बन्धः स प्रत्ययेऽर्थान्तराभिधायिन्युत्पन्ने कृतादीनामुपसर्जनत्वान्निवर्त्तते क्रियया तु सह सम्बन्धोऽस्तीति व्याप्यत्वाद् द्वितीया ॥ क्रियाविशेषणात् ॥ २ । २ । ४१ ॥ द्वितीया । स्तोकं पचति । द्वितीयार्थं वचनं न कर्मसंज्ञार्थम्, तेन कृद्योगे कर्मनिमित्ता न षष्ठी । ओदनस्य शोभनं पक्ता । मन्दं गन्ता ग्रामायेत्यादौ चतुर्थी न ॥ कालाध्वनोर्व्याप्तौ ॥ २ । २ । ४२ । द्योत्यायां वर्त्तमानान्नाम्नो द्वितीया । द्रव्यगुणक्रियारूपेणात्यन्तसम्बन्धो व्याप्तिः । मासं गुडधानाः, कल्याणी, अधीते वा । क्रोशं गिरिः, कुटिला नदी, अधीते वा । व्याप्तौ किम् । मासस्य मासे वा द्व्यहं गुडधानाः । क्रोशस्य क्रोशे वा एकदेशे कुटिला नदी । भावादपीच्छन्त्यन्ये । गोदोहं वक्रः ॥ सिद्धौ तृतीया ॥ २ । २ । ४३ ॥ कालाध्ववाचिभ्याम् । मासेन मासाभ्याम् मासैर्वावश्यकमधीतम् । क्रोशेन क्रोशाभ्याम् क्रोशैर्वा प्राभृतमधीतम् । सिद्धौ किम् । मासमधीत आचारो नानेन गृहीतः । भावादपीच्छन्त्यन्ये । गोदोहेन कृतः कटः ॥ हेतुकर्तृकरणेत्थंभूतलक्षणे ॥ २ । २ । ४४ ॥ नाम्नस्तृतीया । धनेन कुलम् । चैत्रेण कृतम् । दात्रेण लुनाति । अपि त्वं कमण्डलुना छात्रमद्राक्षीः । अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदित्यत्र तु लक्ष्यप्रधानो निर्देश इति न स्यात् । धान्येनार्थो मासेन पूर्व इत्यादौ तु हेतौ कृतभवत्वादिगम्यमानक्रियापेक्षया कर्तृकरणे वा तृतीया ॥ सहार्थे ॥ २ । २ । ४५ ॥ गम्यमाने नाम्नस्तृतीया । पुत्रेण सहागतः । "एकेनापि सुपुत्रेण सिंही स्वपिति निर्भरम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥ १ ॥ गौणादित्येव । सहोभौ चरतो धर्मम् ॥ यद्भेदैस्तद्वदाख्या ॥ २ । २ । ४६ ॥ यस्य भेदिनो भेदैस्तद्वतोऽर्थस्य निर्देशः स्यात् तद्वाचिनस्तृतीया स्यात् । अक्ष्णा काणः । पादेन खञ्जः । प्रकृत्या दर्शनीयः । तद्वद्ग्रहणं किम् । अक्षि काणं पश्य । आख्येति प्रसिद्धिपरिग्रहार्थम् । तेन अक्ष्णा दीर्घ इति न स्यात् । भेदग्रहणात् षष्ठीः प्रवेशय । षष्ठीनिवृत्त्यर्थं तु वचनम् ॥ कृताद्यैः ॥ २ । २ । ४७ ॥ निषेधार्थैर्युक्तात् तृतीया । कृतं तेन । किं गतेन । कृतम् भवतु

अलं किम् एवं प्रकाराः कृतादयः ॥ काले भान्नवाधारे ॥ २ । २ । ४८ ॥ तृतीया । पुष्येण पुष्ये वा पायसमश्नीयात् । काले किम् । पुष्येऽर्कः । भादिति किम् । तिलपुष्पेषु यत्क्षीरम् । आधारे किम् । अद्य पुष्यं विद्धि । षष्ठी माभूदिति वचनम् ॥ प्रसितोत्सुकाववद्धैः ॥ २ । २ । ४९ ॥ युक्तादाधारवृत्तेस्तृतीया वा । केशेषु केशैर्वा प्रसितः, उत्सुकः, अवबद्धः । बहुवचनमेकद्विबहाविति यथासङ्ख्यनिवृत्त्यर्थम् । पूर्ववद्वचनम् । साहचर्यात् प्रसित उत्सुकार्थः ॥ व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् ॥ २ । २ । ५० ॥ वा तृतीया । द्विद्रोणेन, द्विद्रोणं वा धान्यं क्रीणाति । पञ्चकेन पञ्चकं पञ्चकं वा पशून् क्रीणाति ॥ समो ज्ञोऽस्मृतौ वा ॥ २ । २ । ५१ ॥ व्याप्याचृतीया । मात्रा मातरं वा संजानीते । अस्मृताविति किम् । मातरं संजानाति । वा ग्रहणादुत्तरत्र वा निवृत्तिः ॥ दामः सम्प्रदानेऽधर्म्ये आत्मने च ॥ २ । २ । ५२ ॥ संपूर्वस्य वर्त्तमानात्तृतीया । दास्या सम्प्रयच्छते कामुकः । अधर्म्ये इति किम् । पत्न्यै सम्प्रयच्छति ॥ चतुर्थी ॥ २ । २ । ५३ ॥ सम्प्रदाने वर्त्तमानात् । शिष्याय धर्ममुपदिशति ॥ तादर्थ्ये ॥ २ । २ । ५४ ॥ सम्बन्धविशेषे द्योत्ये गौणान्नाम्नष्षष्ठ्यपवादश्चतुर्थी । यूपाय दारु । रन्धनाय स्थाली ॥ रुचिक्लृप्त्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ॥ २ । २ । ५५ ॥ वर्त्तमानाच्चतुर्थी । मैत्राय रोचते धर्मः । मूत्राय कल्पते यवागूः । मैत्राय शतं धारयति । गौणादित्येव । मूत्रमिदं सम्पद्यते यवागूः । मूत्रं सम्पद्यते यवाग्वा इति अपायविवक्षायां पञ्चमी ॥ प्रत्याङः श्रुवार्थिनि ॥ २ । २ । ५६ ॥ युक्तात् वर्त्तमानाच्चतुर्थी । द्विजाय गां प्रतिशृणाति, अनुगृणाति वा ॥ यद्वीक्ष्ये राधीक्षी ॥ २ । २ । ५८ ॥ वर्त्तेते तद्वृत्तेश्चतुर्थी । मैत्राय राध्यति ईक्षते वा । ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम् । दैव एवेत्य इच्छन्त्येके । राधीक्ष्यर्थधातुयोगेऽपीच्छन्त्यन्ये । वीक्ष्य इति किम् । मैत्रमीक्षते ॥ उत्पातेन ज्ञाप्ये ॥ २ । २ । ५९ ॥ वर्त्तमानाच्चतुर्थी । " वाताय कपिला विद्युदातपायाति लोहिनी । पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥ १ ॥ उत्पातेन किम् । राज्ञ इदं छत्रम् आयान्तं विद्धि राजानम् ॥ श्लाघह्नुस्थाशपा प्रयोज्ये ॥ २ । २ ।

६० ॥ युक्ताज्ज्ञाप्ये वर्त्तमानाच्चतुर्थी । मैत्राय श्लाघते ह्नुते तिष्ठते शपते वा ॥ प्रयोज्ये इति किम् । मैत्रायात्मानं श्लाघते । केचित्तु अप्रयोज्यो यो ज्ञाप्यो य आख्यायते तत्रैवेच्छन्ति ॥ **तुमोऽर्थे भाववचनात्** ॥ २ । २ । ६१ ॥ स्वार्थे षष्ठीहेतुतृतीयापवादश्चतुर्थी । पाकाय इज्यायै वा व्रजति । तुमोऽर्थे इति किम् । पाकस्य । भाववाचिघञाद्यन्तादिति किम् । पक्ष्यतीति पाचकस्य व्रज्या । तुम इति व्यस्तनिर्देश उत्तरार्थः ॥ **गम्यस्याप्ये** ॥ २ । २ । ६२ ॥ तुमो वर्त्तमानाच्चतुर्थी । द्वितीयापवादः । एधेभ्यः फलेभ्यो वा व्रजति । गम्यस्येति किम् एधानाहर्त्तुं याति ॥ **गतेर्नवाऽनाप्ते** ॥ २ । २ । ६३ ॥ आप्ये वर्त्तमानाच्चतुर्थी । ग्रामं ग्रामाय वा याति । विमनष्टः पन्थानं पथे वा याति । गतेः किम् । स्त्रियं गच्छति । मनसा मेरुं गच्छति । अनाप्त इति किम् । सम्प्राप्ते माभूत् । पन्थानं याति । कृद्योगे तु परत्वात् षष्ठ्येव । ग्रामस्य गन्ता । द्वितीयैवेत्यन्ये । ग्रामं गन्ता । चतुर्थी चेत्यपरे । ग्रामं ग्रामाय वा गन्ता ॥ **मन्यस्यानावादिभ्योऽतिकुत्सने** ॥ २ । २ । ६४ ॥ व्याप्ये वर्त्तमानाच्चतुर्थी वा । न त्वां तृणाय तृणं मन्ये । मन्यस्येति किम् । न त्वा तृणं मन्वे । नावादिवर्जनात् न त्वा नावमन्नं शुकं शृगालं काकं वा मन्ये । कुत्सन इति किम् । न त्वा रत्नं मन्ये । करणाश्रयणं किम् । युष्मदो माभूत् । अतीति किम् । त्वां तृणं मन्ये । कुत्सामात्रेऽपीच्छन्त्येके ॥ **हितसुखाभ्याम्** ॥ २ । २ । ६५ ॥ युक्ताच्चतुर्थी वा ॥ आतुराय आतुरस्य वा हितं सुखं वा ॥ **तद्भद्रायुष्यक्षेमार्थार्थेनाशिषि** ॥ २ । २ । ६६ ॥ गम्यायां युक्ताच्चतुर्थी वा । तदिति हितसुखयोः परामर्शः । हितं पथ्यं सुखं भद्रमायुष्यं क्षेममर्थः कार्यं वा जीवेभ्यो जीवानां वा भूयात् । तद्ग्रहणं तदर्थानामाशिषि नियमार्थम् ॥ **परिक्रयणे** ॥ २ । २ । ६७ ॥ वर्त्तमानाच्चतुर्थी वा । शताय शतेन वा परिक्रीतः । परीति किम् । शतेन क्रीणाति । करणाश्रयणं किम् । शताय परिक्रीतो मासम् । मासान्माभूत् ॥ **शक्तार्थवषड्नमःस्वस्तिस्वाहास्वधाभिः** ॥ २ । २ । ६८ ॥ युक्तान्नित्यं चतुर्थी । शक्तः प्रभुर्वा मल्लो मल्लाय । वषडग्नये । नमोऽर्हद्भ्यः । स्वस्ति प्रजाभ्यः । इन्द्राय स्वाहा । स्वधा पितृभ्यः । आशिषि परत्वान्नित्ययमेव । स्वस्ति संघाय

भूयात् । योगाभिधानादिह न । नमो जिनानामायतनेभ्यः । नमस्यति जिनानित्यत्रापि नमस्यधातुना योगो न नमसा । यथेवं कथं स्वयंभुवे नमस्कृत्येति । नानेनात्र चतुर्थी । किन्तु चतुर्थीत्यनेन । स्वयंभुवं नमस्कृत्येत्यत्र तु सम्प्रदानत्वाविवक्षायां द्वितीयैव ॥ पञ्चम्यपादाने ॥ २ । २ । ६९ ॥ ग्रामादागच्छति ॥ आङावधौ ॥ २ । २ । ७० ॥ युक्तात् वर्त्तमानात् पञ्चमी । आपाटलिपुत्राद्वृष्टो मेघः । आ कुमारेभ्यो यशो गतं गौतमस्य ॥ पर्यपाभ्यां वर्ज्ये ॥ २ । २ । ७१ ॥ वर्त्तमानाद्युक्तात्पञ्चमी । परि अप वा पाटलिपुत्राद्वृष्टो देवः । वर्ज्ये इति किम् । अपशब्दो मैत्रस्य ॥ यतः प्रतिनिधिप्रतिदाने प्रतिना ॥ २ । २ । ७२ ॥ तद्वाचिनः पञ्चमी । अभयकुमारः श्रेणिकतः प्रति । तिलेभ्यः प्रतिमाषानस्मै प्रयच्छति । यद्ग्रहणान्माषान्माभूत् ॥ आख्यातर्युपयोगे ॥ २ । २ । ७३ ॥ वर्त्तमानात्पञ्चमी । उपयोगो नियमपूर्वकविद्याग्रहणम् । उपाध्यायादधीते शास्त्रम्, आगमयति वा । आख्यातृग्रहणाच्छात्रान्माभूत् । उपयोगे किम् । नटस्य शृणोति । अपादानत्वेन सिद्धे उपयोगे एव यथा स्यादित्येवमर्थं वचनम् ॥ गम्ययपः कर्माधारे ॥ २ । २ । ७४ ॥ वर्त्तमानात् पञ्चमी । द्वितीयासप्तम्योरपवादः । प्रासादात्, आसनाद् वा प्रेक्षते । गम्येति किम् । प्रासादमारुह्यासने उपविश्य भुङ्क्ते । ननु यथा कुसूलात्पचतीत्यत्रादानाङ्गे पाके पचेर्वर्त्तमानात् अपादाने पञ्चमी एवमिहापि अपक्रमणाङ्गे दर्शने ईक्षेर्वर्त्तनात् अपादानत्वे भविष्यति । सत्यम् । अप्रयुज्यमानेऽपि यबन्ते तदर्थप्रतीतेर्द्वितीयासप्तम्यौ प्रसज्येतामिति सूत्रमारभ्यते ॥ प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः ॥ २ । २ । ७५ ॥ युक्तात् पञ्चमी । ततः प्रभृति । ग्रीष्मादारभ्य । अन्यो भिन्नो वा मैत्रात् । ग्रामात् पूर्वः । बहिरारादितरो वा ग्रामात् । गम्यमानेनापि दिक्शब्देन भवति । क्रोशाल्लक्ष्यं विध्यति । आराद्ग्रहणं आरादर्थैरिति विकल्पबाधनार्थम् । इतरशब्दो द्वयोरुपलक्षितयोरन्यतरवचनस्तेनान्यार्थात् भिद्यते । प्रत्यासत्तेर्यस्यैवान्यत्वादिधर्मनिमित्तोऽन्यशब्दादिना योगस्तत एव पञ्चमी । तेन जिनदत्तादन्योऽर्थो मैत्रस्येत्यादौ मैत्रादेर्न ॥ ऋणाद्धेतोः ॥ २ । २ । ७६ ॥ पञ्चमी । शताद्बद्धः । हेतोरिति किम् । शतेन बद्धः ॥ गुणादस्त्रि-

यां नवा ॥ २ । २ । ७७ ॥ हेतौ पञ्चमी । जाड्यात् जाड्येन वा बद्धः । हेतोः किम् । जाड्यस्यैतद्रूपम् । अस्त्रियां किम् । बुद्ध्या मुक्तः । गुणादिति किम् । धनेन कुलम् । अस्त्यत्राग्निर्धूमात्, नास्तीह घटोऽनुपलब्धेः, सर्वमनेकान्तात्मकं सत्त्वान्यथानुपपत्तेरित्यादौ गम्ययपः कर्माधारे इति पञ्चमी । ज्ञानहेतुत्वविवक्षायां हेतुत्वलक्षणा तृतीया ॥ आरादर्थैः ॥ २ । २ । ७८ ॥ युक्तात्पञ्चमी वा । आरात् दूरान्तिकयोः तन्त्रेणोभयग्रहणम् । दूरमन्तिकं वा ग्रामस्य ग्रामाद्वा । दूरं हितं ग्रामस्य ग्रामाद्वा भूयादित्यादौ हितादिना योगाभावान्न चतुर्थी । यदा तु विशेष्यतया योगस्तदा भवेदेव । अन्ये तु असत्त्ववचनैरेवारादर्थैरिच्छन्ति ॥ स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे ॥ २ । २ । ७९ ॥ पञ्चमी वा । यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणोऽसत्त्वम् । तेनैव ॥ रिरिष्टात्स्तादस्तादसतसाता ॥ २ । २ । ८२ ॥ एतदन्तैर्युक्तात्षष्ठी । उपरि, उपरिष्टात्, परस्तात्, पुरस्तात्, पुरः, दक्षिणतः, अधरात्, वा ग्रामस्य । पञ्चम्यपवादो योगः ॥ कर्मणि कृतः ॥ २ । २ । ८३ ॥ षष्ठी । अपां स्रष्टा । गवां दोहः । कर्मणीति किम् । शस्त्रेण भेत्ता । स्तोकं पक्ता । कृत इति किम् । भुक्तपूर्वी ओदनम् । द्वितीयापवादः ॥ वैकत्र द्वयोः ॥ २ । २ । ८५ ॥ द्विकर्मकेषु कृत्प्रत्ययान्तेषु धातुषु कर्मणि षष्ठी । अजाया नेता स्रुघ्नं स्रुघ्नस्य वा । अजामजाया वा नेता स्रुघ्नस्य । अन्ये तु नीवह्यादीनां द्विकर्मकाणां गौणे कर्मणि दुह्यादीनां प्रधाने विकल्पमिच्छन्ति । उभयत्रापि नित्यमेवेत्यपरे ॥ कर्त्तरि ॥ २ । २ । ८६ ॥ कृदन्तस्य षष्ठी । भवत आसिका । कर्त्तरि किम् । गृहे शायिका । तृतीयापवादः ॥ द्विहेतोरस्त्र्यणकस्य वा ॥ २ । २ । ८७ ॥ कृतः कर्त्तरि षष्ठी । विचित्रा सूत्रस्य कृतिराचार्यस्याचार्येण वा ॥ द्विहेतोरित्येकवचननिर्देशः किम् । आश्चर्यमोदनस्य नाम पाकोऽतिथीनां च प्रादुर्भावः । अस्त्र्यणकस्येति किम् । चिकीर्षा मैत्रस्य काव्यानाम् । भेदिका चैत्रस्य काष्ठानां । अन्ये तु घञलोर्द्विहेत्वोः कर्मण्येव षष्ठीमिच्छन्ति न कर्त्तरि । आश्चर्यमिन्द्रियाणां जयो यूना । नित्यं प्राप्ते विभाषेयम् ॥ कृत्यस्य वा ॥ २ । २ । ८८ ॥ कर्त्तरि षष्ठी । त्वया तव वा कार्यः कटः । घ्यण्तव्यानीययक्यपः कृत्याः । कर्त्तरीत्येव । प्रवचनीयो गुरु-

द्वादशाङ्गस्य ॥ नोभयोर्हेतोः ॥ २ । २ । ८९ ॥ कर्तृकर्मणोः षष्ठीहेतोः कृत्यस्योभयोरेव न षष्ठी । नेतव्या ग्राममजा
मैत्रेण । उभयोर्हेतोरिति किम् । उपस्थानीयः पुत्रः पितुः । उपस्थानीयः पिता पुत्रस्य ॥ तृन्नुदन्ताव्ययक्स्वानातृ-
श्शतृङ्णिकच्खलर्थस्य ॥ २ । २ । ९० ॥ कर्मकर्त्रोर्न षष्ठी । तृन्, वदिता जनापवादान् । उदन्त, कन्यामलंकरि-
ष्णुः, श्रद्धालुस्तत्त्वम् । अव्यय, कटं कृत्वा ओदनं भोक्तुं व्रजति । क्सु, तत्त्वं विद्वान् । आन इति उत्सृष्टानुबन्धनिर्दे-
शात् कानशानानशां ग्रहणम् । कटं चक्राणः । मलयं पवमानः । ओदनं पचमानः । अतृश्, अधीयंस्तत्त्वार्थम् । शतृ, कटं
कुर्वन् । ङि, परीषहान् सासहिः । णकच्, कटं कारको व्रजति । चिन्निर्देशाण्णकस्य न भवति पुत्रपौत्रस्य दर्शकः ।
खलर्थः । ईषत्करः कटो भवता । सुज्ञानं तत्त्वं भवति । क्तयोरसदाधारे ॥ २ । २ । ९१ ॥ कर्मकर्त्रोर्न षष्ठी । क्त इति
क्तक्तवतोर्ग्रहणम् । कृतः कटो मैत्रेण । ग्रामं गतवान् । असदाधार इति किम् । राज्ञां पूजितः । इदं सक्तूनां पीतम् । शी-
लितो मैत्रेण रक्षितश्चैत्रेणेत्यत्र तु भूते क्तः । वर्तमानताप्रतीतिस्तु प्रकरणादिना । अन्ये तु ज्ञानेच्छार्चार्थञीच्छील्यादि-
भ्योऽतीते क्तं नेच्छन्ति तन्मतेऽपशब्दावेतौ ॥ वा क्लीबे ॥ २ । २ । ९२ ॥ विहितस्य क्तस्य कर्तरि षष्ठी । मयूरस्य
मयूरेण वा नृत्तम् । क्लीबे किम् । चैत्रेण कृतम् । पूर्वेण प्रतिषेधे प्राप्ते विकल्पोऽयम् ॥ अकमेरुकस्य ॥ २ । २ । ९३ ॥
कर्मणि न षष्ठी । भोगानभिलाषुकः । अकमेरिति किम् । दास्याः कामुकः । ग्रामं गमी आगामी वा । शतं दायी । ए-
ष्यदृण इति किम् । साधु दायी वित्तस्य ॥ सप्तम्यधिकरणे ॥ २ । २ । ९५ ॥ कटे आस्ते । दिवि देवाः । तिलेषु तै-
लम् ॥ नवा सुजर्थैः काले ॥ २ । २ । ९६ ॥ सुजर्थप्रत्ययान्ताद्वर्तमानात् सप्तमी । द्विरह्नि अह्नो वा भुङ्क्ते । पञ्चकृत्वो मासे
मासस्य वा भुङ्क्ते । सुजर्थैरिति किम् । अह्नि भुङ्क्ते । बहुव्रीह्याश्रयणं किम् । सुजर्थप्रत्ययस्याप्रयोगे गम्यमाने तदर्थे
माभूत् । काल इति किम् । द्विः कांस्यपात्र्यां भुङ्क्ते । आधारत्वाविवक्षायां शैषिकी षष्ठी सिद्धैव नियमार्थं तु वचनम् ॥
कुशलायुक्तेनासेवायाम् ॥ २ । २ । ९७ ॥ तात्पर्ये युक्तादाधारवाचिनो वा सप्तमी । कुशलो विद्यायां विद्याया वा

। आयुक्तस्तपसि तपसो वा । आसेवायामिति किम् । कुशलश्चित्रे न करोति । आयुक्तो गौः शकटे । आकृष्य युक्त इत्यर्थः । आधारस्याविवक्षायां विकल्पे सिद्धेऽनासेवायामाधाराविवक्षानिवृत्त्यर्थं वचनम् ॥ **स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः** ॥ २ । २ । ९८ ॥ एभिर्युक्ताद्वा सप्तमी । गोषु गवां वा स्वामी, ईश्वरः, अधिपतिः, दायादः, साक्षी, प्रतिभूः, प्रसूतो वा, सप्तम्यर्थं वचनम् ॥ **व्याप्ये क्तेनः** ॥ २ । २ । ९९ ॥ नित्यं सप्तमी । अधीतमनेनेति अधीति व्याकरणे । इष्टी यज्ञे । क्तेन इति किम् । कृतपूर्वी कटम् । इन इति किम् । उपश्लिष्टो गुरून् मैत्रः । व्याप्य इति किम् । मासमधीती व्याकरणे । मासान् माभूत् ॥ **तद्युक्ते हेतौ** ॥ २ । २ । १०० ॥ वर्त्तमानात् सप्तमी । “ चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ” ॥ १ ॥ व्याप्येन युक्त इति किम् । धनेन वसति । हेताविति किम् । देवस्य पादौ स्पृशति । हेतुतृतीयापवादः ॥ **अप्रत्यादावसाधुना** ॥ २ । २ । १०१ ॥ युक्तात्सप्तमी । असाधुर्मैत्रो मातरि । प्रत्यादिप्रयोगाभाव इति किम् । असाधुर्मैत्रो मातरं प्रति परि अनु अभि वा ॥ **साधुना** ॥ २ । २ । १०२ ॥ अप्रत्यादौ युक्तात् सप्तमी । साधुर्मैत्रो मातरि । अप्रत्यादावित्येव । साधुर्मातरं प्रति परि अनु अभि वा ॥ **निपुणेन चार्चायाम्** ॥ २ । २ । १०३ ॥ साधुना युक्तादप्रत्यादौ सप्तमी । षष्ठ्यपवादः । मातरि निपुणः साधुर्वा । अर्चायामिति किम् । निपुणो मैत्रो मातुः । माता एवैनं निपुणं मन्यते । अप्रत्यादावित्येव । निपुणो मैत्रो मातरं प्रति पर्यनु वा ॥ **स्वेशेऽधिना** ॥ २ । २ । १०४ ॥ वर्त्तमानाद्युक्तात्सप्तमी । अधि मगधेषु श्रेणिकः । अधि श्रेणिके मगधाः । षष्ठीबाधनार्थो योगः ॥ **उपेनाधिकिनि** ॥ २ । २ । १०५ ॥ युक्तात् सप्तमी । उप खार्यां द्रोणः । अधिकिनीति किम् । अधिके माभूत् । तेन उप द्रोणे खारीति न स्यात् ॥ **यद्भावो भावलक्षणम्** ॥ २ । २ । १०६ ॥ यस्य भावेनान्यो भावो लक्ष्यते तद्वाचिनः सप्तमी । देवार्चनायां क्रियमाणायां गतः, कृतायामागतः । अत्र कालतः प्रसिद्धेन देवार्चनेनाप्रसिद्धं गमनं लक्ष्यते । गम्यमानेनापि भावेन भावलक्षणे भवति । आम्रेषु कलायमाम्रेषु गतः, पक्के-

व्यागतः । गम्यमानमपि विभक्तिनिमित्तं भवति । यथा, वृक्षे शाखा । यद्ग्रहणं प्रकृत्यर्थम् । भाव इति किम् । यो जटाभिस्तस्य भोजनम् । भावलक्षणमिति किम् । यस्य भोजनं स मैत्रः । तृतीयापवादो योगः ॥ गते गम्येऽध्वनोऽन्तेनैकार्थ्यं वा ॥ २ । २ । १०७ ॥ कुतश्चिदवधेर्विवक्षितस्याध्वनोऽवसानमन्तो यद्भावो भावलक्षणं तस्याध्ववाचिशब्दस्य अध्वन एव अन्तेन सह ऐकार्थ्यं सामानाधिकरण्यं वा स्यात् । तद्विभक्तिस्तस्मात् स्यादित्यर्थः गते गम्ये । लोकमध्याल्लोकान्तमुपर्यधश्च सप्तरज्जूनामनन्ति । सप्तसु रज्जुषु वा । गते किम् । दग्धेषु लुप्तेष्विति वा प्रतीतो माभूत् । गम्य इति किम् । गवीधुमतः साङ्काश्यं चतुर्षु योजनेषु गतेषु । अध्वन इति किम् । कार्त्तिक्या आग्रहायणी मासे । अन्तेनेति किम् । अथ नश्चतुर्षु गव्यूतेषु भोजनम् । नन्वनेन सहाध्वनोऽभेदोपचारात् सिद्धमेवैकार्थ्यं किमनेन । सत्यम् । कालेऽप्येवं माभूदिति वचनम् ॥ षष्ठीवानादरे ॥ २ । २ । १०८ ॥ यद्भावो भावलक्षणं तद्वृत्तेः । रुदतो लोकस्य, रुदति लोके वा प्राव्राजीत् ॥ सप्तमी चाविभागे निर्धारणे ॥ २ । २ । १०९ ॥ गम्ये गौणान्नाम्नः षष्ठी । जातिगुणक्रियासंज्ञादिभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्धारणम् । क्षत्रियो नृणां नृषु वा शूरः । कृष्णा गवां गोषु वा बहुक्षीरा । धावन्तो यातां यात्सु वा शीघ्रतमाः । युधिष्ठिरः शूरतमः कुरूणां कुरुषु वा । अविभाग इति किम् । मैत्राश्चैत्रात्पटुः । पञ्चमीबाधनार्थं वचनम् । केचित् पञ्चमीमपीच्छन्ति । गोभ्यः कृष्णा सम्पन्नक्षीरतमा ॥ क्रियामध्येऽध्वकाले पञ्चमी च ॥ २ । २ । ११० ॥ वर्त्तमानान्नाम्नः सप्तमी । इहस्थोऽयमिष्वासः क्रोशात् क्रोशे वा लक्ष्यं विध्यति । अद्य भुक्त्वा मुनिर्द्व्यहे द्व्यहाद्वा भोक्ता । स्थितनिःसृत्यादिपदाध्याहारे सप्तमीपञ्चम्यौ सिद्धे एव सत्यम्, यदा तु अस्यैव क्रियाकारकसम्बन्धस्य फलभूता शेषसम्बन्धलक्षणोत्तरावस्था विवक्ष्यते यथा द्विरह्नो भुङ्क्ते तदापि क्रियामध्ये षष्ठी माभूदिति वचनम् ॥ अधिकेन भूयसस्ते ॥ २ । २ । १११ ॥ योगे सप्तमीपञ्चम्यौ । अधिको द्रोणः खार्यां खार्या वा ॥ तृतीयाल्पीयसः ॥ २ । २ । ११२ ॥ अधिकेन भूयोवाचिना योगे । अधिका खारी द्रोणेन । पृथग्नाना पञ्चमी च

॥ २ । २ । ११३ ॥ युक्तात्तृतीया । पृथग्मैत्रात् मैत्रेण वा । नाना चैत्रात् चैत्रेण वा । अन्यार्थत्वे पूर्वेण पञ्चमी सिद्धैव तृतीयार्थं वचनम् । असहायार्थत्वे तु पञ्चम्यर्थमपि । अन्ये तु द्वितीयामपीच्छन्ति ॥ **ऋते द्वितीया च** ॥ २ । २ । ११४ ॥ युक्तात्पञ्चमी । ऋते धर्मात् धर्मं वा कुतः सुखम् । द्वितीयां नेच्छन्त्येके ॥ **विना ते तृतीया च** ॥ २ । २ । ११५ ॥ युक्ताद् द्वितीयापञ्चम्यौ । विना वातात् वातेन वातं वा । द्वितीयां नेच्छन्त्यन्ये ॥ **तुल्यार्थैस्तृतीयाषष्ठ्यौ** ॥ २ । २ । ११६ ॥ युक्ताद् । मात्रा मातुर्वा तुल्यः समो वा । उपमा नास्ति कृष्णस्येत्यादौ उपमादयो न तुल्यार्थाः । गौणाधिकारात् गौरिव गवय इत्यादौ न । तृतीयामविकल्प्य षष्ठीविधानं सप्तमीबाधनार्थम् । तेन गवां गोभिस्तुल्यः स्वामीत्यत्र न सप्तमी ॥ **द्वितीयाषष्ठ्यावेनेनानञ्चेः** ॥ २ । २ । ११७ ॥ युक्तात् । पूर्वेण ग्रामं ग्रामस्य वा । अनञ्चेरिति किम् । प्राग्ग्रामात् ॥ **हेत्वर्थैस्तृतीयाद्याः** ॥ २ । २ । ११८ ॥ युक्तात् प्रत्यासत्तेस्तैरेव समानाधिकरणात् । धनेन हेतुनेत्यादि । एवं निमित्तादियोगेऽपि । समानाधिकरणादिति किम् । अन्नस्य हेतुः । अन्ये तु हेत्वर्थशब्दयोगे तु षष्ठीमेवेच्छन्ति । असर्वाद्यर्थमिदम् ॥ **सर्वादेः सर्वाः** ॥ २ । २ । ११९ ॥ हेत्वर्थैर्युक्तात् । को हेतुः, कं हेतुमित्यादि । तत्समानाधिकरणादित्येव । कस्य हेतुः । प्रथमां नेच्छन्त्येके । द्वितीयामपरे ॥ **असत्त्वारादर्थाट्टाङसिङ्यम्** ॥ २ । २ । १२० ॥ गौणादिति निवृत्तम् । दूरेण दूरात् दूरे दूरं वा । अन्तिकेन अन्तिकात् अन्तिके अन्तिकं वा ग्रामस्य ग्रामाद्वा वसति । एवं विप्रकृष्टेन अभ्यासेनेत्यादि । केचिदारादर्थैः पञ्चम्यन्तैर्युक्तात् पञ्चमीं नेच्छन्ति । पञ्चम्या अपि दर्शनान्न तत्सर्वसम्मतम् । दूरादावसथान्मूत्रम् । असत्त्व इति किम् । दूरः पन्थाः ॥ **जात्याख्यायां नवैकोऽसङ्ख्यो बहुवत्** ॥ २ । २ । १२१ ॥ सम्पन्ना यवाः, सम्पन्नो यवः । जातेरेकत्वादेकवचन एव प्राप्ते बहुवचनार्थं बहुवद्भाव उच्यते । जातीति किम् । चैत्रः । आख्यायामिति किम् । काश्यपप्रतिकृतिः काश्यपः । भवत्ययं जातिशब्दो न त्वनेन जातिराख्यायते किन्तर्हि प्रतिकृतिः । एक इति किम् । सम्पन्नौ व्रीहियवौ । " मगधेषु स्तनौ पीनौ कलिङ्गेष्वक्षिणी शुभे

इत्यादावपि सव्येतरत्वावान्तरजातिद्वयोपाधियोगात् एकत्वं नास्तीति बहुवद्भावो न । जातिमात्रविवक्षायां तु स्यादेव । असङ्ख्य इति किम् । एको व्रीहिः सम्पन्नः सुभिक्षं करोति । अत्र विशेषणभूतसङ्ख्याप्रयोगोऽस्तीति एके व्रीहयः सम्पन्नाः सुभिक्षं कुर्वन्तीति न स्यात् ॥ अविशेषणे द्वौ चास्मदः ॥ २ । २ । १२२ ॥ एकोऽर्थो वा बहुवत् । आवां ब्रूवः । वयं ब्रूमः । अहं ब्रवीमि । वयं ब्रूमः । अविशेषणे किम् । आवां गार्ग्यौ ब्रूवः । अहं चैत्रो ब्रवीमि । कथं नाढ्ये च दक्षा वयम् इत्यादि, दक्षत्वादीनां विधेयत्वेनाविशेषणत्वाद् भविष्यति । यदनूद्यमानमवच्छेदकं तद्विशेषणमिति । एकानेकस्वभावस्यात्मनोऽनेकस्वभावविवक्षायां बहुवचनं सिद्धमेव, सविशेषणप्रतिषेधार्थन्तु वचनम् ॥ फल्गुनी प्रोष्ठपदस्य भे ॥ २ । २ । १२३ ॥ वर्त्तमानस्य द्वावर्थौ बहुवद्वा । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः । भ इति किम् । फल्गुनीषु जाते फल्गुन्यौ माणविके । द्वावित्येव । तेन एकस्मिन् ज्योतिषि न स्यात् । दृश्यते फल्गुनी । एकवचनान्तः प्रयोग एव नास्तीत्यन्ये, शब्दपरनिर्देशात् पर्यायस्य माभूत् । अद्य पूर्वे भद्रपदे ॥ गुरावेकश्च ॥ २ । २ । १२४ ॥ गौरवार्हेऽर्थे वर्त्तमानस्य शब्दस्य द्वावेकश्चार्थो बहुवद्वा । त्वं गुरुः, यूयं गुरवः । युवां गुरू, यूयं गुरवः । एष मे पिता, एते मे पितरः । आपः, दाराः गृहाः, वर्षाः, पञ्चालाः, जनपदः, गोदौ ग्रामः, खलतिकं वनानि, पञ्चालप्रथुरे, पञ्चाभिरूपो मनुष्य इति सर्वलिङ्गसङ्ख्ये वस्तुनि स्याद्वादमनुपतति मुख्योपचरितार्थानुपातिनि शब्दात्मनि रूढितस्तल्लिङ्गसङ्ख्योपादानव्यवस्थानुसर्त्तव्या ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां कारकाणि ॥

## ॥ अथ समासप्रकरणम् ॥

॥ समर्थः पदविधिः ॥ ७ । ४ । ११२ ॥ सर्वः । सामर्थ्यं व्यपेक्षा एकार्थीभावश्च परस्परं साकाङ्क्षत्वं व्यपेक्षा, भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकार्थोपस्थापकत्वमेकार्थीभावः । व्यपेक्षायां सम्बद्धार्थः सम्प्रेक्षितार्थो वा पदविधिः साधुः । एकार्थीभावे तु विग्रहवाक्यार्थाभिधाने यः शक्तः सङ्गतार्थः संसृष्टार्थो वा पदविधिः स साधुः । अत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानात् द्व्यर्थानि अर्थान्तराभिधायीनि वा । पदविधिश्च समासनामधातुकृत्तद्धितोपपदविभक्तियुष्मदस्मदादेशप्लुतरूपः । धर्मश्रितः । पुत्रीयति । कुम्भकारः । औपगवः । नमो देवेभ्यः । धर्मस्ते मे स्वम् । अङ्गकूज ३ इदानीं ज्ञास्यसि जाल्म । सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न । क्वचित्तु विशेषणयोगेऽपि गमकत्वात् समासः । देवदत्तस्य गुरुकुलम् । समर्थ इति किम् । पश्य धर्मं श्रितो मैत्रो गुरुकुलमित्यादि । पदोक्तेर्वर्णविधिरसामर्थ्येऽपि स्यात् । तिष्ठतु दध्याशान त्वं शाकेन । एवं समास–नामधातु–कृत्–तद्धितेषु, वाक्ये व्यपेक्षा, वृत्तावेकार्थीभावः, शेषेषु पुनर्व्यपेक्षयैव सामर्थ्यम् ॥ नाम नाम्नैकार्थ्ये समासो बहुलम् ॥ ३ । १ । १८ ॥ लक्षणमिदमधिकारश्च । तेन विशेषसंज्ञाभावेऽप्यनेन समासः । विस्पष्टं पटुः । विस्पष्टपटुः । दारुणाध्यापकः । सर्वचर्मीणो रथः । कन्ये इव । श्रुतपूर्वः । नामेति किम् । चरन्ति गावो धनमस्य । नाम्नेति किम् । चैत्रः पचति । बहुलग्रहणात् क्वचिदनामनाम्ना च । भात्यर्कं नभः । अनुव्यचलत् ॥ ऐकार्थ्ये ॥ ३ । २ । ८ ॥ स्यादेर्लुप् । चित्रगुः ॥ सुज्वार्थे सङ्ख्या सङ्ख्येये सङ्ख्यया बहुव्रीहिः ॥ ३ । १ । १९ ॥ ऐकार्थ्ये समासः । सुजर्थो वारो वार्थः संशयो विकल्पो वा । द्वित्राः । द्विदशाः । सङ्ख्येति किम् । गावो वा दश वा । सङ्ख्ययेति किम् । दश वा गावो वा । सङ्ख्येयेति किम् । द्विर्विंशतिर्गवाम् । सुज्वार्थ इति किम् । द्वावेव न त्रयः ॥ आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे ॥

३ । १ । २० ॥ सङ्ख्या नाम्नैकार्थ्ये समासः सङ्ख्येये वाच्ये स च बहुव्रीहिः । आसन्नदशाः । अदूरदशाः । अधिकदशाः । अध्यर्धविंशाः । अर्धपञ्चमविंशाः ॥ प्रमाणीसङ्ख्याड्डः ॥ ७ । ३ । १२८ ॥ बहुव्रीहेः समासान्तः । स्त्रीप्रमाणाः । द्वित्राः ॥ विंशतेस्तेर्डिति लुक् ॥ ७ । ४ । ६७ ॥ अध्यर्धविंशाः ॥ बहुगणं भेदे ॥ १ । १ । ४० ॥ सङ्ख्यावत् ॥ अव्ययम् ॥ ३ । १ । २१ ॥ सङ्ख्यया ऐकार्थ्ये समस्यते द्वितीयाद्यन्यार्थे सङ्ख्येये वाच्ये स च बहुव्रीहिः । उपदशाः । उपबहवः । उपगणाः । योगविभाग उत्तरार्थः ॥ एकार्थं चानेकं च ॥ ३ । १ । २२ ॥ एकमव्ययं च नाम्ना द्वितीयाद्यन्तान्यपदार्थे समस्यते स च बहुव्रीहिः । आरूढवानरो वृक्षः । सुसूक्ष्मजटकेशः । उच्चैर्मुखः । व्यधिकरणत्वादव्ययस्य न स्यादित्यव्ययानुकर्षणार्थश्चकारः । एकार्थं किम् । पञ्चभिर्भुक्तमस्य । द्वितीयाद्यन्यार्थ इत्येव । वृष्टे मेघे गतः । वृष्टे मेघे गतं पश्येत्यत्र तु बहिरङ्गा द्वितीयान्तता । शब्दे कार्यासम्भवादर्थे लब्धे यदर्थग्रहणं तदन्यपदार्थस्य या लिङ्गसङ्ख्याविभक्तयस्ता यथा स्युरित्येवमर्थम् । राजन्वती भूरनेनेत्यादौ तु बहुलग्रहणान्न स्यात् ॥ परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ् ॥ ३ । २ । ४९ ॥ उत्तरपदे । दर्शनीयभार्यः । उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः । पट्वी च मृद्वी च पट्वीमृद्व्यौ ते भार्ये यस्य स पट्वीमृदुभार्यः । अत्र द्वन्द्वपदानां परस्परार्थसङ्क्रमात् स्त्र्यर्थेन भार्याशब्देन सामानाधिकरण्यमिति पुंवद्भावः । पूर्वस्य तु व्यवधानान्न । विशेष्यवशादिति किम् । द्रुणीभार्यः । स्त्रीति किम् । खलपुदृष्टिः । स्त्र्येकार्थ इति किम् । कल्याणीवस्त्रम् । कल्याणीनेत्राः । कल्याणीमाता । अनूङिति किम् । करभोरूभार्यः । प्रसज्यप्रतिषेधादैडविडभार्यः ॥ गोश्चान्ते ह्रस्वोऽनंशिसमासेयो बहुव्रीहौ ॥ २ । ४ । ९६ ॥ गौणस्याक्विपो ङ्याद्यन्तस्य च । चित्रगुः । चित्राजरद्गुः । कर्मधारयपूर्वपदे तु चित्रजरद्गवीकः । निष्कौशाम्बिः । अतिखट्वः । अतिब्रह्मबन्धुः । गौणस्येत्येव । गौः । अक्विप इत्येव । प्रियकुमारी चैत्रः । गोश्चेति किम् । अतितन्त्रीः । अन्ते इति किम् । गोकुलम् । कुमारीप्रियः । कन्यापुरम् । अत्र गोशब्दो ङ्याद्यन्तं च समासार्थे न्यग्भूतत्वाद्गौणम् । सुगोप्रिय इत्यादौ तु

यदपेक्षयान्तत्वं न तदपेक्षया गौणत्वमिति न स्यात् । अतिराजकुमारिरित्यादौ तु गौणी ङ्यादिः इति मुख्ये स्त्रीप्रत्यये प्रत्ययः प्रकृत्यादेरिति न्यायो नोपतिष्ठते । राजकुमारीशब्दस्य तु मुख्यत्वमेव, तेन ङ्यादिप्रत्ययान्तमात्रमिह विधानानपेक्षमेव गृह्यते । बहुकुमारीक इत्यत्र तु प्रथममेव कचि कृते अन्त्यत्वाभावान्न । अनंशीत्यादि किम् । अर्धपिप्पली । बहुश्रेयसी ना ॥ नाप्प्रियादौ ॥ ३ । २ । ५३ ॥ अप्प्रत्ययान्ते स्त्र्येकार्थे उत्तरपदे प्रियादौ च परे परतः स्त्री पुंवन्न ॥ कल्याणीपञ्चमारात्रयः । पूरण्यबन्तस्य ग्रहणाद् बह्वृचश्चरणः । कल्याणीप्रियः । अप्प्रियादाविति किम् । कल्याणपञ्चमीकः । प्रिया, मनोज्ञा, कल्याणी, सुभगा, दुर्भगा, स्वा, क्षान्ता, कान्ता, वामना, समा, सचिवा, चपला, बाला, तनया, दुहितृ, भक्ति, इति प्रियादिः । वामेत्यप्यन्ये ॥ तद्धिताककोपान्त्यपूरण्याख्याः ॥ ३ । २ । ५४ ॥ परतः स्त्रियः पुंवन्न । मद्रिकाभार्यः । कारिकाभार्यः । पञ्चमीभार्यः । दत्ताभार्यः । तद्धिताककेति किम् । पाकभार्यः ॥ तद्धितः स्वरवृद्धिहेतुररक्तविकारे ॥ ३ । २ । ५५ ॥ परतः स्त्री पुंवन्न । माथुरीभार्यः । तद्धित इति किम् । कुम्भकारभार्यः । स्वर इति किम् । वैयाकरणभार्यः । वृद्धिहेतुरिति किम् । अर्घमस्थभार्यः । अन्ये तु वृद्धिमात्रहेतोर्ञिर्णतस्तद्धितस्य प्रतिषेधमिच्छन्ति । तन्मते वैयाकरणी भार्यः । अरक्तविकार इति किम् । काषायबृहतिकः । लौहेषः ॥ स्वाङ्गान्ङीर्जातिश्चामानिनि ॥ ३ । २ । ५६ ॥ परतः स्त्री पुंवन्न । दीर्घकेशीभार्यः । कठीभार्यः । शूद्राभार्यः । आकृतिग्रहणा जातिरत्रिलिङ्गा च यान्विता । आजन्मनाशमर्थानां सामान्यमपरे विदुः ॥१॥ अत्र प्रथमजातिलक्षणानुसारेण, कुमारीभार्यः किशोरीभार्य इति स्यात् । नहि कुमारत्वाद्युत्पत्तेः प्रभृत्याविनाशमनुवर्तते । स्वाङ्गात् किम् । पटुभार्यः । अमानिनीति किम् । दीर्घकेशमानिनी ॥ बहुव्रीहेः काष्ठे टः ॥ ७ । ३ । १२६ ॥ अङ्गुल्यन्तात् समासान्तः । द्व्यङ्गुलं काष्ठम् । काष्ठे किम् । पञ्चाङ्गुलिर्हस्तः अङ्गुलेरिति निर्देशादङ्गुलीशब्दान्तात् न । द्व्यङ्गुलीकम् । टो ङ्यर्थः । दीर्घाङ्गुली ॥ सक्थ्यक्ष्णः स्वाङ्गे ॥ ७ । ३ । १२६ ॥ एतदन्ताद्बहुव्रीहेष्टः । दीर्घसक्थः । स्वक्षी । स्वाङ्ग इति किम् । दीर्घसक्थ्यनः

॥ द्वित्रेर्मूर्ध्नो वा ॥ ७ । ३ । १२७ ॥ बहुव्रीहेः । द्विमूर्धः । द्विमूर्धा । त्रिमूर्धः । त्रिमूर्धा ॥ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदभद्रपदम् ॥ ७ । ३ । १२९ ॥ एते बहुव्रीहयो डान्ता निपात्यन्ते ॥ पूरणीभ्यस्तत्प्राधान्येऽप् ॥ ७ । ३ । १३० ॥ पूरणप्रत्ययान्ता या स्त्री तदन्ताद् बहुव्रीहेरप् स्यात् पूरण्याः प्राधान्ये समासार्थत्वे सति । कल्याणीपञ्चमा रात्रयः । कल्याणीतुरीयाः । पूरणीभ्य इति किम् । द्वितीयाकल्याणीकाः । स्त्रीत्वनिर्देशः किम् । कल्याणपञ्चमका दिवसाः । बहुवचनं व्याप्त्यर्थम् । तेन कल्याणीपञ्चमा इत्यत्र परोऽपि ऋन्नित्यदित इति कच् न । तत्प्राधान्य इति किम् । कल्याणपञ्चमीकः पक्षः ॥ नञ्सुव्युपत्रेश्चतुरः ॥ ७ । ३ । १३१ ॥ बहुव्रीहेरप् समासान्तः । अचतुरः । सुचतुरः । विचतुरः । उपचतुराः । त्रिचतुराः । समासान्तविधेरनित्यत्वात् इह न । त्रिचत्वारो गुणाः । उपचत्वाः ॥ अन्तर्बहिर्भ्यां लोम्नः ॥ ७ । ३ । १३२ ॥ बहुव्रीहेरप् । अन्तर्लोमः । बहिर्लोमः ॥ भान्नेतुः ॥ ७ । ३ । १३३ ॥ बहुव्रीहेरप् । मृगनेत्रा निशा । भादिति किम् । देवदत्तनेतृका । नेत्रशब्देनैव सिद्धे नेतृशब्दात् कच् माभूदिति वचनम् ॥ नाभेर्नाम्नि ॥ ७ । ३ । १३४ ॥ बहुव्रीहेरप् । पद्मनाभः । नाम्नीति किम् । विकसितवारिजनाभि । अघोनाभम् महत्त्वानित्यव्ययीभावेऽपि तिष्ठद्ग्वादिषु तथा पाठात् सिद्धम् ॥ नञ्बहोर्ऋचो माणवचरणे ॥ ७ । ३ । १३५ ॥ बहुव्रीहेरप् यथासङ्ख्यम् । अनृचो माणवः । बह्वृचश्चरणः । माणवचरणे इति किम् । अनृक्कं साम । बह्वृक्कं सूक्तम् । ऋक्पूरित्येव सिद्धे नियमार्थं वचनम् ॥ नञ्सुदुर्भ्यः सक्तिसक्थिहलेर्वा ॥ ७ । ३ । १३६ ॥ बहुव्रीहेरप् । असक्तः । असक्तिः । सुसक्तः । सुसक्तिः । दुःसक्तः । दुःसक्तिः । एवं सक्थिहलिभ्याम् । नञ्सुदुर्भ्य इति किम् । गौरसक्थी स्त्री । हलसक्थशब्दाभ्यां सिद्धे कजभावार्थं वचनम् । तेनाहलिक इत्यादि न । सक्तिशब्दात्कोऽच्छन्त्यन्ये ॥ प्रजाया अस् ॥ ७ । ३ । १३७ ॥ नञादिभ्यो बहुव्रीहेः । अप्रजाः । सुप्रजाः । दुष्प्रजाः ॥ मन्दाल्पाच्च मेधायाः ॥ ७ । ३ । १३८ ॥ नञादिभ्यश्च बहुव्रीहेरस् । मन्दमेधाः । अल्पमेधाः । अमेधाः । सुमेधाः । दुर्मेधा ना ॥

जातेरीयः सामान्यवति ॥ ७ । ३ । १३९ ॥ बहुव्रीहेः । ब्राह्मणजातीयः । सामान्याश्रयेऽन्यपदार्थे इति किम् । बहुजातिर्ग्रामः । अजातीय इत्यत्र सामान्यवानन्यपदार्थः । प्रतिषेधस्तु नञर्थः । सामान्यग्रहणं किम् । दुर्जातेः सूतपुत्रस्य । अत्र जातिशब्दो जन्मपर्यायः । पितृस्थानीयः । गृहस्थानीय इति तु अधिकरणप्रधानेन स्थानीयशब्देन भविष्यति ॥ भृतिप्रत्ययान्मासादिकः ॥ ७ । ३ । १४० ॥ बहुव्रीहेः । पञ्चकमासिकः । भृतिप्रत्ययादिति किम् । सुमासः । भृतिग्रहणं किम् । वार्षिकमासकः । प्रत्ययग्रहणं किम् । भृतिमासकः । मासात् किम् । पञ्चकदिवसकः ॥ द्विपदाद् धर्मादन् ॥ ७ । ३ । १४१ ॥ बहुव्रीहेः । साधुधर्मा । विकल्पमिच्छन्त्येके । तद्धर्मा । तद्धर्मकः । द्विपदादिति किम् । परमस्वधर्मः । परमः स्वधर्मो यस्य स परमस्वधर्म इत्यत्र तु प्रत्यासत्तेर्द्विपदस्य बहुव्रीहेर्यदि धर्म एवोत्तरपदं तदान् स्यादिति नियमान्न ॥ सुहरिततृणसोमाज्जम्भात् ॥ ७ । ३ । १४२ ॥ बहुव्रीहेरन् । सुजम्भा, हरितजम्भा, तृणजम्भा, सोमजम्भा, ना । जम्भो भक्ष्ये दन्ते च । स्वादिभ्यः किम् । चारुजम्भः । पतितजम्भः ॥ दक्षिणेर्मा व्याधयोगे ॥ ७ । ३ । १४३ ॥ बहुव्रीहेर्निपात्यः । ईर्मं बहु व्रणं वा । दक्षिणेर्मा मृगः । व्याधयोग इति किम् । दक्षिणेर्मः पशुः ॥ सुपूत्युत्सुरभेर्गन्धादिद्गुणे ॥ ७ । ३ । १४४ ॥ बहुव्रीहेः । सुगन्धि, पूतिगन्धि, उद्गन्धि, सुरभिगन्धि, द्रव्यम् । उत्तरत्रागन्तोर्वा वचनादिह स्वाभाविकाद्भवति । स्वादिभ्यः किम् । तीव्रगन्धं हिङ्गु । गन्धादिति किम् । सुरसः । गुण इति किम् । द्रव्ये सुगन्ध आपणिकः ॥ वागन्तौ ॥ ७ । ३ । १४६ ॥ स्वादिभ्यः परो यो गन्धस्तदन्ताद्बहुव्रीहेरित् । सुगन्धिः । सुगन्धो वा कायः । एवं पूतिगन्धिः पूतिगन्धः इत्यादि ॥ वाल्पे ॥ ७ । ३ । १४३ ॥ यो गन्धस्तदन्ताद् बहुव्रीहेरित् । सूपगन्धि सूपगन्धं वा भोजनम् । असामानाधिकरण्येऽपि उष्ट्रमुखादित्वाद् बहुव्रीहिः ॥ वोपमानात् ॥ ७ । ३ । १४७ ॥ परो यो गन्धस्तदन्ताद्बहुव्रीहेरित् । उत्पलगन्धि उत्पलगन्धं वा मुखम् ॥ पात्पादस्याहस्त्यादेः ॥ ७ । ३ । १४८ ॥ उपमानात् परस्य बहुव्रीहौ । कचोऽपवादः । व्याघ्रपात् । अहस्त्यादेरिति किम् । हस्तिपादः । अश्वपादः

अपि ॥ गड्वादिभ्यः ॥ ३ । १ । १५६ ॥ बहुव्रीहौ सप्तम्यन्तं वा प्राक् स्यात् । गडुकण्ठः । कण्ठेगडुः । मध्येगुरुः । गुरुमध्यः । व्यवस्थितविभाषया वहेगडुरित्येव ॥ प्रियः ॥ ३ । १ । १५७ ॥ बहुव्रीहौ प्राग्वा स्यात् । प्रियगडुः । गडुप्रियः ॥

॥ इति बहुव्रीहिः ॥

तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ॥ ३ । १ । २६ ॥ नाम नाम्ना अन्यपदार्थे समासः स्यात् ॥ इज् युद्धे ॥ ७ । ३ । ७४ ॥ यः समासस्तस्मात् समासान्तः स्यात् ॥ इच्यस्वरे दीर्घ आच्च ॥ ३ । २ । ७२ ॥ उत्तरपदे पूर्वपदस्य । केशाकेशि । दण्डादण्डि । मुष्टीमुष्टि । मुष्टामुष्टी । तत्रेति तेनेति किम् । केशांश्च २ गृहीत्वा कृतं युद्धं । मुखं च प्रहृत्य कृतं युद्धं । आदायेति प्रहृत्येति किम् । केशेषु २ च स्थित्वा, दण्डैश्च २ आगत्य कृतं युद्धं गृहकोकिलाभ्याम् । सरूपेणेति किम् । हस्ते च पादे च गृहीत्वा कृतं युद्धम् । युद्ध इति किम् । हस्ते च २ गृहीत्वा कृतं सख्यम् । युद्धविषयनिर्देशाद्युद्धोपाधिकायामन्यस्यामपि क्रियायां भवति । बाहूबाहवि व्यासजेतामिति ॥ द्विदण्ड्यादि ॥ ७ । ३ । ७५ ॥ इजन्तः साधुः । द्विदण्डि हन्ति । उभादन्ति । क्रियाविशेषणान्येतानि ॥ नदीभिर्नाम्नि ॥ ३ । १ । २७ ॥ अन्यपदार्थे नाम समस्यते सोऽव्ययीभावः । बहुवचनात् विशेषाणां स्वरूपस्य च ग्रहणम् । नाम्नि किम् । शीघ्रगङ्गो देशः । अन्यपदार्थ इत्येव । कृष्णवेण्णा ॥ अमव्ययीभावस्यातोऽपञ्चम्याः ॥ ३ । २ । २ ॥ स्यादेः । उन्मत्तगङ्गं देशः । अत इति किम् । अधिस्त्रि । अपञ्चम्या इति किम् । उपकुम्भात् ॥ वा तृतीयायाः ॥ ३ । २ । ३ ॥ अतोऽव्ययीभावस्याम् । किं न उपकुम्भेन, उपकुम्भम् । तत्सम्बन्धिन्यास्तृतीयाया इति किम् । किं नः प्रियोपकुम्भेन ॥ सप्तम्या वा ॥ ३ । २ । ४ ॥ अतोऽव्ययीभावस्याम् । उपकुम्भम् उपकुम्भे वा निधेहि । सम्बन्धिग्रहः किम् । प्रियोपकुम्भे । योगविभाग उत्तरार्थः ॥ ऋद्धनदीवंश्यस्य ॥ ३ । २ । ५ ॥

एददन्तस्याव्ययीभावस्यादन्तस्य सप्तम्या अम्। सुमगधम्। उन्मत्तगङ्गम्। एकविंशतिभारद्वाजं वसति। प्रतिपदोक्तस्यैव ग्रहणादिह न। उपगङ्गे। नित्यार्थं वचनम्॥ अनतो लुप्॥ ३।२।६॥ अव्ययीभावस्य स्यादेः। उपवधु। अनत इति किम्। उपकुम्भात्। तत्सम्बन्धिविज्ञानादिह न। प्रियोपवधुः॥ संख्या समाहारे॥ ३।१।२८॥ नदीभिः सहाव्ययीभावः समासः। द्वियमुनम्। पञ्चनदम्। समाहारे किम्। एकनदी। द्विग्वपवादः। अन्ये तु पूर्वपदप्राधान्येऽव्ययीभावः समाहारे तु द्विगुरेवेत्याहुः॥ वंश्येन पूर्वार्थे॥ ३।१।२९॥ सङ्ख्या समस्यते सोऽव्ययीभावः। विद्यया जन्मना वा एकसन्तानो वंशः। एकमुनि व्याकरणस्य। सप्तकाशि राज्यस्य। विद्यया तद्वतामभेदविवक्षायामेकमुनि व्याकरणम्। पूर्वार्थे इति किम्। द्विमुनिकं व्याकरणम्। अन्ये तु पूर्वार्थे इति विशेषं नेच्छन्ति तन्मते कर्मधारयद्विगुबहुव्रीहिप्रसङ्गेऽव्ययीभावः॥ पारेमध्येऽग्रेऽन्तः षष्ठ्या वा॥ ३।१।३०॥ समासोऽव्ययीभावः। आद्यानां त्रयाणामेदन्तत्वं निपात्यते। पारेगङ्गम्। मध्येगङ्गम्। अग्रेवणम्। अन्तर्गिरम्। अन्तर्गिरि। पक्षे, गङ्गापारम्। गङ्गामध्यम्। वनाग्रम्। गिर्यन्तः॥ यावदियत्त्वे॥ ३।१।३१॥ यावदित्यनव्ययं चेह गृह्यते। अव्ययमेवेत्यन्ये। नाम नाम्ना पूर्वपदार्थे समस्यते सोऽव्ययीभावः। यावदमत्रं भोजय। इयत्त्व इति किम्। यावद्दत्तं तावद्भुक्तम्॥ पर्यपाङ्बहिरच्पञ्चम्या॥ ३।१।३२॥ पूर्वपदार्थे वाच्ये समासोऽव्ययीभावः। परित्रिगर्त्तम्। अपत्रिगर्त्तम्। आग्रामम्। बहिर्ग्रामम्। प्राग्ग्रामम्। पर्यादिसाहचर्यादञ्चतिर्धैनलुबन्तोऽव्ययं गृह्यते। तेनेह न। प्राग्ग्रामाच्चैत्रः प्रतिपदविहितपञ्चम्या ग्रहणादिहाव्ययीभावो न। अपशालः। पञ्चम्येति किम्। परि वृक्षं विद्युत्॥ लक्षणेनाभिप्रत्याभिमुख्ये॥ ३।१।३३॥ पूर्वपदार्थे समस्यते सोऽव्ययीभावः। अभ्यग्नि प्रत्यग्नि शलभाः पतन्ति। लक्षणेनेति किम्। स्रुघ्नं प्रति गतः। पूर्वपदार्थ इत्येव। अभ्यङ्का गावः॥ दैर्घ्येऽनुः॥ ३।१।३४॥ लक्षणवाचिना पूर्वपदार्थे समासोऽव्ययीभावः। अनुगङ्गं वाराणसी। दैर्घ्ये इति किम्। वृक्षमनुविद्युत्॥ समीपे॥ ३।१।३५॥

अनुः समीपिवाचिना पूर्वपदार्थे समस्यते सोऽव्ययीभावः । अनुवनमशनिर्गता । विभक्तीत्यादिना सिद्धे विकल्पार्थं वचनं लक्षणनेत्यस्य निरुक्तर्थम् ॥ तिष्ठद्गुप्रभृतीनि च ॥ ३ । १ । ३६ ॥ अव्ययीभावा निपात्यन्ते । यथायोगमन्यस्य पूर्वस्य वार्थे ॥ तिष्ठद्गुकालः । अबो नाभम् । आयतीगवम् । तिष्ठद्ग्वादिराकृतिगणः । इतिशब्दः स्वरूपपरिग्रहार्थः । तेनेह समासान्तरं न । परमं तिष्ठद्गु इत्यादि वाक्यमेव भवति । अत एव प्रदक्षिणसम्प्रतिभ्यां सह नञ्समासेन सिद्धावप्रदक्षिणासम्प्रत्योः पाठः । इजन्तस्य च तिष्ठद्ग्वादिपाठः इज् युद्धे इत्यनेनेजन्तस्य समासान्तरप्रतिषेधार्थः द्विदण्ड्यादेरव्ययीभावार्थश्च । अन्ये तु परपदेनैव समासं प्रतिषेधयन्ति । तन्मते परमतिष्ठद्गु इत्यादयः साधवः ॥ नित्यं प्रतिनाऽल्पे ॥ ३ । १ । ३७ ॥ नामाव्ययीभावः समासः । शाकप्रति । अल्प इति किम् । वृक्षं प्रति विद्युत् । नित्यग्रहणादन्यत्र समासो वाक्यं च भवति ॥ सङ्ख्याक्षशलाकं परिणा द्यूतेऽन्यथावृत्तौ ॥ ३ । १ । ३८ ॥ नित्यं समस्यते सोऽव्ययीभावः । एकपरि, अक्षपरि, शलाकापरि, एकेनाक्षेण शलाकया न तथा वृत्तं यथा पूर्वं जये इत्यर्थः । अक्षशलाकयोरेकवचनान्तयोरेवेष्यते । सङ्ख्यादीति किम् । पाशकेन न तथा वृत्तम् । परिणेति किम् । अक्षेण परिवृत्तम् । द्यूत इति किम् । रथस्याक्षेण न तथा वृत्तम् ॥ विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिपश्चात्क्रमख्यातियुगपत्सदृक्सम्पत्साकल्यान्तेऽव्ययम् ॥ ३ । १ । ३९ ॥ नाम नाम्ना पूर्वपदार्थे वाच्ये समस्यते सोऽव्ययीभावः । विभक्तिर्विभक्त्यर्थः कारकं, तत्र अधिस्त्रि । समीपे, उपकुम्भम् । समृद्धिः, सुमद्रम् । विगता ऋद्धिर्व्यृद्धिः, दुर्यवनम् । अर्थाभावे, निर्मक्षिकम् । अव्ययोऽतीतत्वम्, अतिवर्षम् । असम्प्रतीति सम्प्रति उपभोगाद्यभावः, अतिकम्बलम् । पश्चात्, अनुरथम् । क्रमे, अनुज्येष्ठम्, ख्यातिः, इतिभद्रबाहु । युगपत्, सचक्रं धेहि । सदृक्, सव्रतम् । सम्पत्, सब्रह्म साधूनाम् । साकल्ये, सतृणमभ्यवहरति, अन्ते, सपिण्डैषणमधीते । पूर्वपदार्थे किम् । सुमद्राः । अव्ययमिति किम् । समीपं कुम्भस्य ॥ अकालेऽव्ययीभावे ॥ ३ । २ । १४६ ॥ सहस्य स उत्तरपदे । इति सः । अकाले किम्

सहपूर्वाह्णम् ॥ **योग्यतावीप्सार्थानतिवृत्तिसादृश्ये** ॥ ३ । १ । ४० ॥ अव्ययं नाम्ना सह पूर्वपदार्थे समस्यते सोऽव्ययीभावः । अनुरूपं चेष्टते । प्रत्यर्थम् । वीप्सायां द्वितीयाविधानाद्वाक्यमपि । अर्थमर्थं प्रति । यथाशक्ति । सशीलमनयोः । सहगित्येव सिद्धे सादृश्यग्रहणं मुख्यसादृश्यपरिग्रहार्थम् ॥ **यथाऽथा** ॥ ३ । १ । ४१ ॥ नाम नाम्ना पूर्वपदार्थे समस्यते सोऽव्ययीभावः । यथारूपं चेष्टते । यथावृद्धमर्चय । यथासूत्रमधीष्व । अथा इति किम् । यथा चैत्रस्तथा मैत्रः । पूर्वेणैव सिद्धे सादृश्ये प्रतिषेधार्थं वचनम् ॥ **प्रतिपरोऽनोरव्ययीभावात्** ॥ ७ । ३ । ८७ ॥ अक्ष्णः समासान्तोऽत् स्यात् । प्रत्यक्षम् । परशब्दसमानार्थः । परस् शब्दोऽव्ययम् । परोक्षम् । अन्वक्षम् । कथं प्रत्यक्षोऽर्थः । परोक्षः काल इति अभ्रादेराकृतिगणत्वेनाप्रत्यये भविष्यति । प्रत्यादिभ्यः परस्याक्षिशब्दस्य प्रयोगो माभूदिति वचनम् ॥ **अनः** ॥ ७ । ३ । ८८ ॥ अव्ययीभावादत् ॥ **नोऽपदस्य तद्धिते** ॥ ७ । ४ । ६१ ॥ अन्त्यस्वरादेर्लुक् । उपतक्षम् ॥ **नपुंसकाद्वा** ॥ ७ । ३ । ८९ ॥ अनोऽव्ययीभावादत् । उपचर्मम् । उपचर्म । पूर्वेण नित्यं प्राप्ते विकल्पः ॥ **गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा** ॥ ७ । ३ । ९० ॥ अव्ययीभावादत् । अन्तर्गिरम् । अन्तर्गिरि । उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपाग्रहायणम् । उपाग्रहायणि । उपस्रुचम् । उपस्रुक् ॥ **सङ्ख्याया नदीगोदावरीभ्याम्** ॥ ७ । ३ । ९१ ॥ सङ्ख्यादेर्नदीगोदावर्यन्तादव्ययीभावादत् । पञ्चनदम् । द्विगोदावरम् । सङ्ख्याया इति किम् । उपनदि । अव्ययीभावादित्येव । एकनदी । इह नदीग्रहणं नित्यार्थम् ॥ **शरदादेः** ॥ ७ । ३ । ९२ ॥ अव्ययीभावादत् । उपशरदम् । प्रतित्यदम् । अपञ्चमवर्ग्यान्तपाठो नित्यार्थः । अव्ययीभावादित्येव । परमशरत् ॥ **जराया जरस् च** ॥ ७ । ३ । ९३ ॥ अव्ययीभावादत् । उपजरसम् ॥ **सरजसोपशुनानुगवम्** ॥ ७ । ३ । ९४ ॥ एतेऽव्ययीभावा अदन्ता निपात्याः । सरजसं भुङ्क्ते, उपशुनमास्ते, अनुगवमनः । दैर्घ्येऽनुरित्यव्ययीभावः । दैर्घ्यादन्यत्र न, अनुगु यानम् ।

॥ इत्यव्ययीभावः ॥

ऊर्याद्यनुकरणच्विडाचश्च गतिः ॥ ३ । १ । २ ॥ प्रादयः । ते च प्राग्धातोः । एवमुत्तरेषु । ऊरीकृत्य । उररीकृत्य । स्वाहाकृत्य । शुक्लीकृत्य । पटपटाकृत्य । प्रकृत्य । ऊर्यादीनां च्विडाच्सहचर्यात् कृभ्वस्तिभिरेव योगे गतिसंज्ञा । अतश्च दधातिकरोतिभ्याम् । प्रादुराविश्शब्दौ कृञ्योगे विकल्पार्थं साक्षादादावपि पठ्येते ॥ कारिका स्थित्यादौ ॥ ३ । १ । ३ ॥ गतिः । स्थितिर्मर्यादा वृत्तिर्वा । आदिना यत्नधात्वर्थनिर्देशौ गृह्येते । कारिकाकृत्य । स्थित्यादौ किम् । कारिकां कृत्वा ॥ भूषादरक्षेपेऽलंसदसत् ॥ ३ । १ । ४ ॥ गतिसंज्ञम् । अलं कृत्य, सत्कृत्य, भूषादिष्विति किम् । अलं कृत्वा ॥ अग्रहानुपदेशेऽन्तरदः ॥ ३ । १ । ५ ॥ यथासङ्ख्यं गती । अन्तर्हत्य । अदःकृत्य । अग्रहेत्यादि किम् । अन्तर्हत्वा मूषिकां श्येनो गतः । अदःकृत्वा गत इति परस्य कथयति । अदस्शब्दोऽव्ययमिति केचित् ॥ कणे मनस्तृप्तौ ॥ ३ । १ । ६ ॥ गम्यायां गती । कणे हत्य, मनोहत्य पयः पिबति । तृप्ताविति किम् । तन्दुलावयवे कणे हत्वा मनोहत्वा गतः ॥ पुरोऽस्तमव्ययम् ॥ ३ । १ । ७ ॥ गती । पुरस्कृत्य । अस्तंगत्य । अव्ययं किम् । पुरःकृत्वा, नगरीरित्यर्थः । अस्तं कृत्वा, क्षिप्तमित्यर्थः ॥ गत्यर्थवदोऽच्छः ॥ ३ । १ । ८ ॥ गतिः । अच्छगत्य । अच्छोद्य । गत्यर्थवद इति किम् । अच्छकृत्वा अव्ययमित्येव । उदकमच्छं गत्वा ॥ तिरोऽन्तर्धौ ॥ ३ । १ । ९ ॥ गतिः । तिरोभूय । अन्तर्धाविति किम् । तिरोभूत्वा स्थितः ॥ कृञो नवा ॥ ३ । १ । १० ॥ तिरोऽन्तर्धौ गतिः । तिरस्कृत्य । तिरःकृत्य । पक्षे तिरःकृत्वा । अन्तर्धावित्येव । तिरःकृत्वा काष्ठं गतः ॥ मध्ये पदे निवचने मनस्युरस्यनत्याधाने ॥ ३ । १ । ११ ॥ कृञा योगे गतयो वा स्युः । मध्येकृत्य, मध्येकृत्वा, पदेकृत्य, पदेकृत्वा, निवचनेकृत्य, निवचने कृत्वा, मनसि कृत्य, मनसिकृत्वा, उरसिकृत्य, उरसिकृत्वा, अनुपश्लेषे आश्चर्ये वेति किम् । मध्येकृत्वा धान्यराशिं स्थिता हस्तिनः । पदेकृत्वा शिरः शेते ॥ अव्ययमित्येव । मध्येकृत्वा वाचं तिष्ठति ॥ उपाजेऽन्वाजे ॥ ३ । १ । १२ ॥ एतौ दुर्बलस्य भग्नस्य वा बलाधानार्थौ कृञो योगे गती वा स्याताम् । उपाजे कृत्य । उपाजे कृत्वा । अन्वाजे

कृत्य । अन्वाजे कृत्वा ॥ स्वाम्येऽधिः ॥ ३ । १ । १३ ॥ कृग्योगे वा गतिः । चैत्रं ग्रामे अधिकृत्य, अधिकृत्वा वा गतः । स्वाम्ये इति किम् । ग्राममधि कृत्वा, उद्दिश्येत्यर्थः । सार्थकत्वे उपसर्गत्वात् नित्यं प्राप्ते पक्षे निषेधार्थं वचनम् । अनर्थकत्वे तु विधानार्थम् । प्रादिरुपसर्ग इति वर्त्तते । तेनोपसर्गसंज्ञाऽपि विकल्प्यते इति कृत्वा धातोः प्राक्त्वेऽप्यनियमः ॥ साक्षादादिश्च्व्यर्थे ॥ ३ । १ । १४ ॥ कृग्योगे गतिर्वा । साक्षात्कृत्य, साक्षात्कृत्वा । मिथ्याकृत्य, मिथ्याकृत्वा । च्व्यर्थ इति किम् । यदा साक्षाद्भूतमेव किञ्चित्करोति तदा साक्षात्कृत्वेत्येव भवति । च्व्यन्तानां तु ऊर्यादिसूत्रेण नित्यमेव गतिसंज्ञा । लवणीकृत्य । अर्थेप्रभृतयः सप्तम्येकवचनान्तप्रतिरूपकाः स्वभावात् निपातनाद्वा । लवणादीनामेतत्सूत्रविहितगतिसंज्ञासन्नियोगेनैव मान्तत्वं निपात्यते । लवणंकृत्य ॥ नित्यं हस्तेपाणावुद्वाहे ॥ ३ । १ । १५ ॥ कृग्योगे गती । हस्तेकृत्य । पाणौकृत्य । उद्वाह इति किम् । हस्ते कृत्वा कार्षापणं गतः । नित्यग्रहणाद्वा निवृत्तिः ॥ प्राध्वं बन्धे ॥ ३ । १ । १६ ॥ कृग्योगे गतिः । प्राध्वं कृत्य । बन्धे किम् । प्राध्वं कृत्वा शकटं गतः ॥ जीविकोपनिषदावौपम्ये ॥ ३ । १ । १७ ॥ कृग्योगे गती स्याताम् । जीविकाकृत्य । उपनिषत्कृत्य । औपम्ये किम् । जीविकां कृत्वा, उपनिषदं कृत्वा गतः ॥ गतिकन्यस्तत्पुरुषः ॥ ३ । १ । ४२ ॥ नाम्ना सह नित्यं समासः । ऊरीकृत्य । कुब्राह्मणः । बहुव्रीह्यादिलक्षणरहित इति किम् । कुपुरुषः । एवमुत्तरत्र ॥ दुर्निन्दाकृच्छ्रे ॥ ३ । १ । ४३ ॥ नाम्ना सह नित्यं समासस्तत्पुरुषः । दुष्पुरुषः । दुष्कृतम् । अन्य इति किम् । दुष्पुरुषकः ॥ सुः पूजायाम् ॥ ३ । १ । ४४ ॥ नाम्ना नित्यं समासस्तत्पुरुषः । सुराजा । अन्य इति किम् । सुमद्रम् ॥ अतिरतिक्रमे च ॥ ३ । १ । ४५ ॥ पूजायां नाम्ना नित्यं समासस्तत्पुरुषः । अतिस्तुत्यः । अतिराजा । बहुलाधिकारादतिक्रमे क्वचिन्न । अति श्रुत्वा । अतिस्तुत्वा ॥ आङल्पे ॥ ३ । १ । ४६ ॥ नाम्ना सह समासस्तत्पुरुषः । आकडारः । आबद्धमित्यादौ क्रियायोगे गतिलक्षण एव समासः ॥ प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः ॥ ३ । १ । ४७ ॥ प्राचार्यः । समर्थः । अतिखट्वः । उद्वेलः

। अवकोकिलः । परिवीरुत् । पर्यध्ययनः । उत्सङ्ग्रामः । निष्कौशाम्बिः । अपशाखः । बाहुलकात् षष्ठीसप्तम्यन्तेनापि । अन्तर्गार्ग्यः । मत्युरसम् । गताद्यर्था इति किम् । वृक्षं परि विद्युत् । अन्य इत्येव । प्राचार्यको देशः । बहुवचनमाकृतिगणार्थम् । एवमुत्तरत्र ॥ अव्ययं प्रवृद्धादिभिः ॥ ३ । १ । ४८ ॥ नित्यं समासस्तत्पुरुषः । पुनः मवृद्धम् । अन्तर्भूतः ॥ ङस्युक्तं कृता ॥ ३ । १ । ४९ ॥ कृत्प्रत्ययविधायके सूत्रे नाम्ना नित्यं समासस्तत्पुरुषः । कुम्भकारः । इह च गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास इष्यते । तेन मष्ठीत्यादिसिद्धिः । यदि पुनर्विभक्त्यन्तैः कृदन्तैः समासस्तदा विभक्तेः प्रागेवापः प्राप्तावकारान्तत्वाभावात् ङीर्न । तथा च (माषान् वापिन्) माषवापिणी इत्यादिसिद्धिः । विभक्त्यन्तेन तु समासेऽन्तरङ्गत्वाद्विभक्तेः प्रागेव ङीप्राप्तौ नकारस्यानन्त्यत्वात् णत्वं न स्यात् । पूर्वपदस्य च विभक्त्यन्तत्वनियमात् चर्मक्रीतीत्यादिषु पदकार्यं नलोपादि सिद्धम् ॥ ङस्युक्तमिति किम् । अलं कृत्वा ॥ तृतीयोक्तं वा ॥ ३ । १ । ५० ॥ दंशेस्तृतीयया इत्यारभ्य यत्तत्कृता समासस्तत्पुरुषः । मूलकोपदंशम् मूलकेनोपदंशम् भुङ्क्ते । वा शब्दो नित्यसमासनिवृत्त्यर्थस्तेनोत्तरत्र वाक्यमपि ॥ नञ् ॥ ३ । १ । ५१ ॥ नाम्ना समासस्तत्पुरुषः । असः । निवर्त्यमानतद्भावश्चोत्तरपदार्थः पर्युदासे नञ्समासार्थः । नञर्थश्चतुर्धा । तत्सदृशः, अब्राह्मणः, तद्विरुद्धः, अधर्मः, तदन्यः, अनग्निः, तदभावः, अवचनम्, अनेके इत्यादिरसाधुरेव । प्रसज्यप्रतिषेधे तु नञ् पदार्थान्तरेण सम्बध्यते इति उत्तरपदं वाक्यवत् स्वार्थे एव वर्तते तत्रासामर्थ्येऽपि यथाऽभिधानं बाहुलकात् समासः । असूर्यंपश्या राजदाराः । अन्य इत्येव । अमक्षिकाकः । अमक्षिकम् । पूर्वापराधरोत्तरमभिन्नेनांशिना ॥ ३ । १ । ५२ ॥ अंशवाचि समस्यते स तत्पुरुषः । पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । पूर्वादिग्रहणं किम् । दक्षिणं कायस्य । अभिन्नेनेति किम् । पूर्वं छात्राणामामन्त्रयस्व । प्रसज्यप्रतिषेधः किम् । पूर्वं पाणिपादस्य । पूर्वग्राम इत्यादौ तु न ग्रामशब्दात् प्रासादादिभेदप्रतीतिः । अंशिनेति किम् । पूर्वं नाभेः कायस्य ॥ सायाह्

ह्नादयः ॥ २ । १ । ५२ ॥ अंशितत्पुरुषाः साधवः । सायाह्नः । मध्यंदिनम् । बहुवचनमाकृतिगणार्थम्
पूर्वे पञ्चालाः, उत्तरे पञ्चाला इतिवत्समुदायवाचिनामंशेऽपि प्रवृत्तिदर्शनात् सामानाधिकरण्ये सति कर्मधारयेणैव सिद्धं
पूर्वकायः सायाह्न इति तत्पुरुषविधानमिह पूर्वत्र च षष्ठीसमासबाधनार्थम् ॥ समेंऽशेऽर्धं नवा ॥ ३ । १ ।
५४ ॥ अंशिनाभिन्नेन समासस्तत्पुरुषः । अर्धपिप्पली । पिप्पल्यर्धम् । समेंऽश इति किम् । ग्रामार्धः । कर्मधारये-
णैव सिद्धे भेदविवक्षायां पक्षे षष्ठीसमासबाधनार्थमसमांशे च कर्मधारयनिषेधार्थं च वचनम् । अंशिनेत्येव ।
पिप्पल्या अर्धं चैत्रस्य । अभिन्नेनेत्येव । अर्धं पिप्पलीनाम् । अर्धपिप्पल्य इत्यादयस्तु अंशिसमासे एकशेषात् । अत्र स-
मेंऽशेऽर्धशब्द आविष्टलिङ्गी नपुंसकः । असमांशे पुंल्लिङ्गः । अन्ये त्वसमांशे वाच्यलिङ्गमेनमाहुः । असमांशे एव च षष्ठीस-
मासं समांशे एवं च नित्यमंशिसमासमिच्छन्ति ॥ जरत्यादिभिः ॥ ३ । १ । ५५ ॥ अंशिभिरभिन्नैरर्धो वा समास-
स्तत्पुरुषः । असमांशार्थ आरम्भः । अर्धजरती । जरत्यर्धः । अर्धोक्तम् । उक्तार्धः । इदमपि षष्ठीसमासबाधनार्थम् ॥
द्वित्रिचतुष्पूरणाग्रादयः ॥ ३ । १ । ५६ ॥ अंशवाचिनोऽभिन्नेनांशिना वा समासस्तत्पुरुषः । वा ग्रहणात् पक्षे ष-
ष्ठीतत्पुरुषः पूरणेन निषिद्धोऽपि । द्वितीयं भिक्षाया, द्वितीयभिक्षा, भिक्षाद्वितीयम् । एवं तृतीयभिक्षा, तुर्यभिक्षा, तुरीय-
भिक्षा, चतुर्थभिक्षेत्यादि । अग्रहस्तः, हस्ताग्रम् । तलपादः, पादतलम् । अग्रादिग्रहणं किम् । पञ्चमं भिक्षायाः । पूरणेति
किम् । द्वौ भिक्षायाः ॥ कालो द्विगौ च मेयैः ॥ २ । १ । ५७ ॥ समस्यते स तत्पुरुषः । मासजातः । अहस्सुतः । कथं
द्व्यहजातः । समाहारद्विगौ काल इत्यंशेन भविष्यति । इह च यद्यपि विग्रहे जातादि कालस्य विशेषणं तथापि शब्दश-
क्तिस्वाभाव्यात् समासो जातादिप्रधानस्तेन समासे लिङ्गं सङ्ख्या च तदीयतदीयमेव भवति । मासजाता । काल इति
किम् । द्रोणो धान्यस्य । कालइत्येकवचनं द्विगोरन्यत्र प्रयोजकम् तेन मासौ मासा वा जातस्येत्यत्र न भवति । द्विगुग्र-
हणं त्रिपदसमासार्थम् । अन्यथा नाम नाम्नेत्यनुवृत्तेर्द्वयोरेव स्यात् । चो द्विगुरहितकालपरिग्रहार्थः । मेयैरिति किम् ।

मासश्चैत्रस्य । जातादेरेव हि मेयत्वम् जन्मादेः प्रभृति जातादिसम्बन्धित्वेनैवादित्यगतः परिच्छेदात् न द्रव्यमात्रस्य । क्तान्तेनैव च मेयेन प्रायेणायं समासः । तेन मासो गच्छत इत्यादौ न । अयमपि षष्ठीसमासापवादो योगः ॥ स्वयं स्वामी क्तेन ॥ ३ । १ । ५८ ॥ समासस्तत्पुरुषः । स्वयं धौतम् । स्वामिकृतम् । क्तेनेति किम् । स्वयं कृत्वा ॥ द्वितीया खट्वा क्षेपे ॥ ३ । १ । ५९ ॥ क्तान्तेन सह समासस्तत्पुरुषः । खट्वारूढो जाल्मः । नित्यसमासोऽयम् वाक्येन क्षेपानवगमात् । क्षेपे किम् । खट्वामारूढ उपाध्यायोऽध्यापयति ॥ कालः ॥ ३ । १ । ६० ॥ द्वितीयान्तं क्तान्तेन समासस्तत्पुरुषः । रात्र्यारूढाः । अहरतिसृताः । अव्याप्त्यर्थ आरम्भः ॥ व्याप्तौ ॥ ३ । १ । ६१ ॥ द्वितीयान्तं कालवाचि व्यापकेन समासस्तत्पुरुषः । मुहूर्त्तसुखम् । क्षणपाठः । दिनगुडः । व्याप्ताविति किम् । मासं वृको याति ॥ श्रितादिभिः ॥ ३ । १ । ६२ ॥ द्वितीयान्तं समासस्तत्पुरुषः । धर्मश्रितः । शिवगतः ॥ प्राप्तापन्नौ तयाच ॥ ३ । १ । ६३ प्रथमान्तावेतौ द्वितीयान्तेन समासस्तत्पुरुषस्तद्योगे चानयोरत् । प्राप्तजीविका । आपन्नजीविका । श्रितादित्वाज्जीविका । प्राप्ता जीविकापन्ना इत्यपि भवति ॥ ईषद्गुणवचनैः ॥ ३ । १ । ६४ ॥ समासस्तत्पुरुषः । ये गुणे वर्त्तित्वा तद्योगाद्गुणिनि वर्त्तन्ते गुणमुक्तवन्तो गुणवचनाः । ईषत्पिङ्गलः । ईषद्रक्तः । गुणवचनैरिति किम् । ईषद्गार्ग्यः । समासे तद्धितादयः प्रयोजनम् । ऐषत्पिङ्गलम् ॥ तृतीया तत्कृतैः ॥ ३ । १ । ६५ ॥ गुणवचनैः समासस्तत्पुरुषः । शङ्कुलाखण्डः । मदपटुः । कृतार्थो वृत्तावन्तर्भूत इति कृतशब्दो वृत्तौ न प्रयुज्यते । तृतीयार्थकृतैरिति किम् । अक्ष्णा काणः । काणत्वादि ह्यत्र काण्डादिना कृतं नाक्ष्यादिना अक्ष्यादिना परं सम्बन्धमात्रम् । यदा तु तत्कृतत्वविवक्षायां कर्त्तरि करणे वा तृतीया तदा भवत्येव समासः, अक्षिकाण इत्यादि । गुणवचनैरित्येव । गोभिर्वपावान् । दध्ना पटुः । पाटवमित्यर्थः न ह्येतौ पूर्वं गुणमुक्त्वा साम्प्रतं द्रव्ये वर्त्तेते इति गुणवचनौ न स्तः । अत एव शुद्धगुणवाचिनापि न समासः । घृतेन पाटवम् । अत्रापि समासो भवतीति कश्चित् । अन्ये तु गुणमात्रवृत्तिभिरपि समासमिच्छन्ति । शङ्कुलाखण्डश्चैत्रस्य ॥

चतस्रार्धम् ॥ ३ । १ । ६६ ॥ तृतीयान्तस्तत्कृतार्थेन समासस्तत्पुरुषः अर्धचतस्रो मात्राः । चतस्रेति किम् । अर्धेन चत्वारो द्रोणाः ॥ ऊनार्थपूर्वाद्यैः ॥ ३ । १ । ६७ ॥ तृतीयान्तं समासस्तत्पुरुषः । माषोनम् । माषविकलम् । मासपूर्वः । मासावरः । आकृतिगणत्वाद् धान्यार्थ इत्यादीनां सिद्धिः । पूर्वादियोगे यथायथं हेत्वादौ तृतीया ॥ कारकं कृता ॥ ३ । १ । ६८ ॥ तृतीयान्तं समासस्तत्पुरुषः । आत्मकृतम् । कृत्सगतिकारकस्यापि । नखनिर्भिन्नः । बहुलाधिकारात् स्तुतिनिन्दार्थतायां प्रायः कृत्यैः सह समासः । काकपेया नदी । बाष्पच्छेद्यानि तृणानि । कारकं किम् । गोभिर्वपावान् । बहुलाधिकारादेव क्तवतुना क्त्वया तव्यानीयाभ्यां च न भवति । दात्रेण लूनवान् इत्यादि ॥ न विंशत्यादिनैकोच्चान्तः ॥ ३ । १ । ६९ ॥ तृतीयान्तस्समासस्तत्पुरुषस्तत्सन्नियोगे एकस्य । एकान्न विंशतिः । एकाद् न विंशतिः । एवं एकान्न त्रिंशत्, एकाद् न त्रिंशत् । अत एव निर्देशात् नञत् इति न स्यात् ॥ चतुर्थी प्रकृत्या ॥ ३ । १ । ७० ॥ विकारवाचि समासस्तत्पुरुषः । यूपदारु । परिणामिकारणेनेति किम् । रन्धनाय स्थाली ॥ हितादिभिः ॥ ३ । १ । ७१ ॥ चतुर्थ्यन्तं समासस्तत्पुरुषः । गोहितम् । गोसुखम् । हित, सुख, रक्षित, बलि, आकृतिगणात्, अश्वघासः । परस्मैपदम् । आत्मनेपदमित्यादि । कृत्यप्रत्ययान्तं चेह पठ्यते । देवदेयम् । इह न स्यात् । ब्राह्मणाय दातव्यम् ॥ तदर्थार्थेन ॥ ३ । १ । ७२ ॥ चतुर्थ्यन्तं समासस्तत्पुरुषः । पित्रर्थं पयः । आतुरार्था यवागूः । क्तेऽर्थो वाच्यवदिति वाच्यलिङ्गता । नित्यसमासश्चायं चतुर्थ्यैव तदर्थस्योक्तत्वात् । समासस्तु वचनाद् भवति । चतुर्थ्यन्तार्थार्थेनेति किम् । पित्रेऽर्थः ॥ पञ्चमी भयाद्यैः ॥ ३ । १ । ७३ ॥ समासस्तत्पुरुषः । वृकभयम् । वृकभीतः । आकृतिगणत्वात्, स्थानभ्रष्ट इत्यादीनां सिद्धिः । बहुलाधिकारादिह न । प्रासादात् पतितः ॥ क्तेनासत्त्वे ॥ ३ । १ । ७४ ॥ वर्तमाना या पञ्चमी तदन्तं समासस्तत्पुरुषः । स्तोकान्मुक्तः । अल्पान्मुक्तः । असत्त्वे ङसेरित्यलुप् । क्तेनेति किम् । स्तोकान्मोक्षः । असत्त्वे इति किम् । स्तोकाद्बद्धः । समासे तद्धिताद्युत्पत्तिः फलम् ॥ परः शतादिः ॥ ३ । १ । ७५

॥ पञ्चमीतत्पुरुषः साधुः । परः शताः । परः सहस्राः ॥ षष्ठ्ययत्नाच्छेषे ॥ ३ । १ । ७६ ॥ नाम्ना समासस्तत्पुरुषः । राजपुरुषः । जिनभद्रगणेः क्षमाश्रमणस्य भाष्यमित्यादौ सापेक्षत्वाभ्न । देवदत्तस्य गुरुकुलमित्यादौ सापेक्षत्वेऽपि गमकत्वात् स्यात् । न चेत्सशेषो ' नाथः, इत्यादेर्यत्नादिति किम् । सर्पिषो नाथितम् । शेष इति किम् । रुदतः प्रव्रजितः । मनुष्याणां क्षत्रियः शूरतमः । कथं सर्पिर्ज्ञानमित्यादि । कृद्योगेऽत्र षष्ठी इत्युत्तरेण सम्बन्धे त्वनेनैव गोस्वामीत्यादिषु तु अयत्नजा शेषे एव षष्ठी । स्वामीश्वरादिसूत्रस्य पाक्षिकसप्तमीविधानार्थत्वात् । सङ्घस्य भद्रं भूयादित्यादावसामर्थ्यादनभिधानात् न समासः ॥ कृति ॥ ३ । १ । ७७ ॥ कर्मणि कृतः कर्त्तरि इति च या कृन्निमित्ता षष्ठी तदन्तं नाम्ना समासस्तत्पुरुषः । सर्पिर्ज्ञानम् । सिद्धसेनकृतिः । गणधरोक्तिः ॥ याजकादिभिः ॥ ३ । १ । ७८ ॥ षष्ठ्यन्तं समासस्तत्पुरुषः । ब्राह्मणयाजकः । गुरुपूजकः । आकृतिगणत्वात् तुल्यार्थैरपि । गुरुसदृशः । तत्प्रयोजको हेतुश्च । जनिकर्तुः प्रकृतिः । कर्मजा तृचाचेति प्रतिषेधाय वादो योगस्तुल्यार्थैर्विध्यर्थश्च ॥ पत्तिरथौ । गणकेन ॥ ३ । १ । ७९ ॥ षष्ठ्यन्तौ समासस्तत्पुरुषः । पत्तिगणकः । रथगणकः । पत्तिरथाविति किम् । धनस्य गणकः । ज्योतिर्गणक इति तु अकेन क्रीडाजीवे इति भविष्यति । कर्मजा तृचा चेत्यस्यापवादोऽयम् ॥ सर्वपश्चादादयः ॥ ३ । १ । ८० ॥ षष्ठीतत्पुरुषाः साधवः । सर्वपश्चात् । सर्वचिरम् । अव्ययेन वक्ष्यमाणप्रतिषेधापवादोऽयम् । बहुवचनं शिष्टप्रयोगानुसरणार्थम् ॥ अकेन क्रीडाजीवे ॥ ३ । १ । ८१ ॥ षष्ठ्यन्तं गम्ये समासस्तत्पुरुषः । उद्दालकपुष्पभञ्जिका । नखलेखकः । क्रीडाजीवे इति किम् । पयसः पायकः । अत्र नित्यसमासः ॥ न कर्त्तरि ॥ ३ । १ । ८२ ॥ या षष्ठी तदन्तमकान्तेन समस्यते । तव शायिका । कर्त्तरीति किम् । इक्षुभक्षिका ॥ कर्मजा तृचा च ॥ ३ । १ । ८३ ॥ षष्ठी कर्तृविहिताकान्तेन न समस्यते । भक्तस्य भोजकः । अपां स्रष्टा । कर्मजेति किम् । गुणो गुणिविशेषकः । सम्बन्धेऽत्र षष्ठी । कर्त्तरीत्येव । पयः पायिका । भूभर्त्ता इत्यादौ पतिपर्यायो भर्तृशब्द इति सम्बन्धषष्ठ्यां याजकादिपाठात् कर्मष-

ष्ठ्या नायं समासः । क्रियाशब्दस्य तु कमात्परत्वात् अनेन प्रतिषेधः । भुवो भर्ता ॥ तृतीयायाम् ॥ ३ । १ । ८४ ॥ कर्तरि सत्यां कर्मजा षष्ठी न समस्यते । साध्विदं शब्दानामनुशासनमाचार्येण । तृतीयायामिति किम् । साध्विदं शब्दानुशासनमाचार्यस्य । कर्तृषष्ठ्यामपि न समास इति कश्चित् । गोदोहोऽगोपालकेन इति तु सम्बन्धषष्ठ्या भविष्यति ॥ तृप्तार्थपूरणाव्ययातृश्शत्रानशा ॥ ३ । १ । ८५ ॥ षष्ठ्यन्तं न समस्यते । फलानां तृप्तः । तीर्थकृतां षोडशः । राज्ञः साक्षात् । रामस्य द्विषन् । चैत्रस्य पचन् । मैत्रस्य पचमानः । एतैरिति किम् । ब्राह्मणस्य कर्तव्यम् । राज्ञः पाटलिपुत्रकस्य धनमित्यादौ धनादिपदापेक्षया षष्ठीत्यसामर्थ्यान्न समासः । विशेषणसमासस्तु निरपेक्षत्वेन सामर्थ्याद् भवत्येव । पाटलिपुत्रराजस्येति । षष्ठीसमासे त्वनियमेन पूर्वनिपातः ॥ ज्ञानेच्छार्चार्थाधारक्तेन ॥ ३ । १ । ८६ ॥ ज्ञानेच्छार्चार्थेभ्यो यो वर्तमाने क्तो यश्चाद्यर्थाच्चाधारे इति आधारे क्तस्तदन्तेन षष्ठ्यन्तं न समस्यते राज्ञां ज्ञातः । इष्टः, पूजितः । इदमेषां यातम् । इदमेषां भुक्तम् । राजपूजित इत्यादिस्तु बहुलाधिकारात् । इष्टेन भूतकालक्तेन तृतीयासमास इति केचित् । अन्ये तु कृद्योगजाया एव षष्ठ्या इह समासप्रतिषेधे सम्बन्धे षष्ठीसमासा एव इत्याहुः ॥ अस्वस्थगुणैः ॥ ३ । १ । ८७ ॥ ये गुणाः स्वात्मन्येवावतिष्ठन्ते न द्रव्ये ते स्वस्थाः । तत्प्रतिषेधेनास्वस्थगुणवाचिभिः षष्ठ्यन्तं न समस्यते । पटस्य शुक्लः । गुडस्य मधुरः । अत्रार्थात् प्रकरणाद्वापेक्ष्यस्य वर्णादेर्निर्ज्ञाते य इमे शुक्लादयस्ते पटादेरिति सामर्थ्योपपत्तेः समासः प्राप्तः प्रतिषिध्यते । पटस्य शौक्ल्यमित्यादौ पूर्वेषु च शुक्लादेर्गुणस्य द्रव्येऽपि क्वचिदर्शनादस्वास्थ्यमस्त्येव । गुणशब्देन चेह लोकप्रसिद्धा रूपादयोऽभिमेताः । तेन यत्नगौरवमित्यादौ न प्रतिषेधः । अस्वस्थगुणैरिति किम् । घटवर्णः । चन्दनगन्धः । बहुलाधिकारात् कण्टकस्य तैक्ष्ण्यमित्यादौ समासो न स्यात् । कुसुमसौरभ्यमित्यादौ तु स्यात् ॥ सप्तमी शौण्डाद्यैः ॥ ३ । १ । ८८ ॥ समासस्तत्पुरुषः । पानशौण्डः । अक्षधूर्तः । बहुवचनात् शिरःशेखरादयः ॥ सिंहाद्यैः पूजायाम् ॥ ३ । १ । ८९ ॥ सप्त-

म्यन्तं समासस्तत्पुरुषः । समरसिंहः । भूमिवासवः । उपमया पूजावगमः ॥ काकाद्यैः क्षेपे ॥ ३ । १ । ९० ॥ सप्तम्यन्तं समासस्तत्पुरुषः । तीर्थकाकः । तीर्थश्वा । क्षेपे किम् । तीर्थे काकस्तिष्ठति ॥ पात्रे समितेत्यादयः ॥ ३ । १ । ९१ ॥ एते सप्तमीतत्पुरुषाः क्षेपे निपात्याः । पात्रे समितः । गेहे शूरः । इति शब्दः समासान्तरनिवृत्त्यर्थः । तेन परमाः पात्रे, समिताः पात्रे, समितानां पुत्र, इत्यादौ समासान्तरं न । बहुवचनाद् वनकुम्म्यादयः ॥ क्तेन ॥ ३ । १ । ९२ ॥ सप्तम्यन्तं समासस्तत्पुरुषः क्षेपे । भस्मनि हुतम् । अवतप्ते नकुलस्थितम् । सर्वत्रोपमानेन क्षेपो गम्यते । नित्यसमासाश्चैते । पात्रे समितादयश्च ॥ तत्राहोरात्रांशम् ॥ ३ । १ । ९३ ॥ तत्रेति सप्तम्यन्तमहरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन समासस्तत्पुरुषः । तत्र कृतम् । पूर्वाह्णकृतम् । पूर्वरात्रकृतम् । तत्राहोरात्रांशमिति किम् । घटे कृतम् । अन्यजन्मकृतं कर्मेत्यत्र तु कारकं कृतेति समासः । अहोरात्रग्रहणं किम् । शुक्लपक्षे कृतम् । अंशग्रहणं किम् । अह्नि भुक्तम् । बहुलाधिकाराद्रात्रिवृत्तमित्यादि । क्तेनेत्येव । तत्र भोक्ता ॥ नाम्नि ॥ ३ । १ । ९४ ॥ सप्तम्यन्तं नाम्ना समासस्तत्पुरुषः । अरण्ये तिलकाः । नित्यसमासोऽयम् ॥ कृद्येनावश्यके ॥ ३ । १ । ९५ ॥ सप्तम्यन्तं समासस्तत्पुरुषः । मासदेयम् । कृदिति किम् । मासे पित्र्यम् । य इति किम् । मासे स्तुत्यः । आवश्यक इति किम् । मासे देया भिक्षा ॥ विशेषणं विशेष्येणैकार्थं कर्मधारयश्च ॥ ३ । १ । ९६ ॥ समासस्तत्पुरुषः । नीलोत्पलम् । विशेषणविशेष्ययोः सम्बन्धिशब्दत्वादेकतरोपादानेनैव द्वये लब्धे द्वयोरुपादानमुभयोर्व्यवच्छेद्यव्यवच्छेदकत्वे समासो यथा स्यादित्येवमर्थम् । तेनेह न । तक्षकः सर्पः । लोहितस्तक्षकः । आम्रवृक्षः । शिंशपावृक्षोऽस्तपर्वत इत्यादौ आम्रादयो वृक्षवत् फलतत्सहचरितमाधुर्यस्थैर्यादिगुणविशेषवाचका इति भवति समासः । एवं तक्षकाहिः शेषाहिरित्यादयोऽपि यदि च षष्ठी समासः प्रधानानुयाय्यप्रधानमिति न्यायात् अप्रधानस्य प्रधानेन समासः । प्राधान्यं च द्रव्यशब्दानां द्रव्यस्यैव साक्षात् क्रियासम्बन्धात् । उत्पलादिशब्दाश्च जातिशब्दा अपि उत्पत्तेः प्रभृत्याविनाशात् द्रव्येण जातेः सम्बन्धात् द्रव्य-

शब्दा उच्यन्ते । गुणक्रिययोस्तु तथात्वाभावान्न तन्निमित्ता शब्दा द्रव्यशब्दा इति नीलोत्पलमित्येव भवति न तूत्पलनीलमिति गुणादिशब्दानामेव समासे तु कामचारेण पूर्वापरनिपात इति, खञ्जकुण्टः कुण्टखञ्ज इत्यादि । कृष्णसारङ्ग इत्यादौ तु सारङ्गादीनां समुदायवाचित्वात् प्राधान्यं, कृष्णादीनां त्ववयववाचित्वेनाप्राधान्यमिति कृष्णादीनामेव पूर्वनिपातः । एकार्थमिति किम् । वृद्धोक्षा । बहुलाधिकारात् क्वचिन्न समासः, रामो जामदग्न्यः । क्वचिन्नित्यः । कृष्णसर्पः । जातिशब्दानामवयवद्वारेण समुदायेऽपि वृत्तेः सामानाधिकरण्यम् । भूयोऽवयववाचिनश्च प्राधान्यात् विशेष्यत्वमितरस्य तु विशेषणत्वम् । चकारस्तत्पुरुषकर्मधारयसंज्ञासमावेशार्थः ॥ **पूर्वकालैकसर्वजरत्पुराणनवकेवलम्** ॥ ३ । १ । ९७ ॥ परेण नाम्ना समासस्तत्पुरुषः कर्मधारयश्च । पूर्वकालोऽपरकालेन । स्नातानुलिप्तः । एकशाटी । सर्वान्नम् । जरद्गविः । पुराणवैयाकरणः । नवोक्तिः । केवलज्ञानम् । एकार्थमित्येव । स्नात्वानुलिप्तः । पूर्वेणैव सिद्धे पृथग्वचनं पूर्वनिपातस्य विषयप्रदर्शनार्थं पूर्वापरकालवाचिनोरद्रव्यशब्दत्वादनियमे प्राप्ते पूर्वकालवाचिन एव पूर्वनिपातनियमार्थञ्च ॥ **दिगधिकं संज्ञातद्धितोत्तरपदे** ॥ ३ । १ । ९८ ॥ नाम्ना समासस्तत्पुरुषः कर्मधारयश्च । दक्षिणकोशलाः । पूर्वेषुकामशमी । दक्षिणशालः । अधिकषाष्टिकः । उत्तरगवधनः । अधिकगवप्रियः । तत्पुरुषलक्षणः समासान्तः । उत्तरपदेऽपि नित्यसमासः त्रयाणामेकार्थाभाव एवोत्तरपदसम्भवात् तत्र च द्वयोर्व्यपेक्षाभावात् । संज्ञादिग्रहणं किम् । उत्तरा वृक्षाः । नियमार्थमिदम् । दक्षिणा गावोऽस्य सन्ति स दक्षिणगुरित्यत्र सन्तीत्येतदनपेक्षयान्तरङ्गत्वेन बहुव्रीहिभावात् उक्तार्थत्वेन मत्वर्थीयतद्धितविषयाभाव एव नास्तीत्यनेन न समासः ॥ **सङ्ख्या समाहारे च द्विगुश्चानाम्न्ययम्** ॥ ३ । १ । ९९ ॥ परेण नाम्ना समासस्तत्पुरुषः कर्मधारयश्च संज्ञातद्धितयोर्विषये उत्तरपदे च परे । पञ्चाम्राः । सप्तर्षयः । द्वैमातुरः । अध्यर्धकंसः । पञ्चगवधनः । पञ्चनावप्रियः । पञ्चराजी । समाहारे चेति किम् । अष्टौ प्रवचनमातरः । अस्य नियमार्थत्वाद् विशेषणं विशेष्येणेत्यादिनापि न । एकस्याप्यनेकपर्यायोपनिपातिनोऽनेकत्वसम्भवे समाहारोपप-

सेरेकापूपीत्यपि । द्विगुश्चेति चकारः तत्पुरुषकर्मधारयसंज्ञासमावेशार्थः । अनाम्नीति किम् । पाञ्चर्षम् । अयं ग्रहणमुत्तरत्र द्विगुश्चेत्यस्यानुवृत्त्यर्थम् ॥ निन्द्यं कुत्सनैरपापाद्यैः ॥ ३ । १ । १०० ॥ समासस्तत्पुरुषः कर्मधारयश्च । वैयाकरणखसूचिः । मीमांसकदुर्दुरूढः । निन्द्यमिति किम् । वैयाकरणश्चौरः । कुत्सनैः किम् । कुत्सितो ब्राह्मणः । बहुलाधिकाराद्विशेषणसमासोऽपि न । भवतीत्यन्ये । अपापाद्यैरिति किम् । पापवैयाकरणः । हतविधिः । प्रवृत्तिनिमित्तमत्र कुत्स्यते । विशेष्यस्य पूर्वनिपातार्थं वचनम् । बहुवचनं प्रयोगानुसरणार्थम् ॥ उपमानं सामान्यैः ॥ ३ । १ । १०१ ॥ एकार्थं समासस्तत्पुरुषः कर्मधारयश्च स्यात् । शस्त्रीश्यामा । मृगचपला । उपमानमिति किम् । देवदत्ता श्यामा उपमानोपमेयसाधारणधर्मवाचिभिरिति किम् । अग्निर्माणवकः । उपमानं सामान्यैरेवेति नियमार्थं वचनम् । तेनाग्निर्माणवक इत्यादौ विशेषणसमासोऽपि न ॥ उपमेयं व्याघ्राद्यैः साम्यानुक्तौ ॥ ३ । १ । १०२ ॥ एकार्थमुपमानवाचिभिः समासस्तत्पुरुषः कर्मधारयश्च स्यात् । पुरुषव्याघ्रः । श्वसिंही । साम्यानुक्ताविति किम् । पुरुषव्याघ्रः शूर इति माभूद् । इदमेव प्रतिषेधवचनं ज्ञापकं प्रधानस्य सापेक्षत्वेऽपि समासस्तेन राजपुरुषो दर्शनीय इत्यादि सिद्धम् । बहुवचनमाकृतिगणार्थम् । तेन वाग्वज्र इत्यादयोऽपि भवन्ति । पूर्वेण विशेषणसमासे प्रतिषिद्धे विध्यर्थमिदम् ॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ॥ ३ । १ । १०३ ॥ एकार्थं नाम्ना समासस्तत्पुरुषः कर्मधारयश्च । पूर्वपुरुषः । अपरपुरुष इत्यादि । विशेषणं विशेष्येणेत्यादिनैव सिद्धे स्पर्द्धे परमिति पूर्वनिपातनस्य विषयप्रदर्शनार्थम् । अद्रव्यवाचिनोरनियमेन पूर्वापरभावप्रसक्तौ पूर्वनिपातनियमार्थं वचनम् । तेन पूर्वजरन्, वीरपूर्वः, पूर्वपटुः, एकवीर, इत्यादौ तु वीरादेः परस्य स्पर्धे पूर्वनिपातो न बहुलाधिकारात् ॥ श्रेण्यादिकृताद्यैश्च्व्यर्थे ॥ ३ । १ । १०४ ॥ एकार्थं गम्ये समासस्तत्पुरुषः कर्मधारयश्च स्यात् । श्रेणिकृता । च्व्यर्थे इति किम् । श्रेणयः कृताः । च्व्यन्तानां च्व्यर्थस्य च्विनैवोक्तत्वात् नानेन समासः । गत्यादिसूत्रेण तु नित्यसमासः । श्रेणीकृताः । बहुवचनमाकृतिगणार्थम् । यत्र सामर्थ्यं

नास्ति तमेति शब्दाध्याहारो द्रष्टव्यः । अनिर्धना निर्धना इत्युपकृताः । श्रेणिकृता इत्यादौ क्रियाकारकसम्बन्धमात्रं न विशेषणविशेष्यभाव इति वचनम् ॥ क्तं नञादिभिन्नैः ॥ ३ । १ । १०५ ॥ एकार्थे समासस्तत्पुरुषः कर्मधारयश्च स्यात् । कृताकृतम् । अशितानशितम् । इटः क्तावयवत्वाद्विकारस्य त्वेकदेशविकृतानन्यत्वाच्च भेदकत्वम् । तेन क्लिष्टाक्लिशितम् । आदिग्रहणात् पीतावपीतम् । क्तमिति किम् । कर्त्तव्यमकर्त्तव्यं च । नञादिभिन्नैरिति किम् । कृतंमकृतम् । कृताकृतादिषु ईषदसमाप्तिद्योतकस्य नञः प्रयोगात् तदादयोऽपीषदसमाप्तिद्योतका एवापादयो ग्राह्याः । नञादिभिरेव भिन्नैरित्यवधारणात् कृतं चाविहितं चेत्यादौ न समासः । अवयवधर्मेण समुदायव्यपदेशात् कृताकृतादिष्वैकार्थ्यम् । क्रियाशब्दत्वादनियमेन पूर्वापरनिपाते प्राप्ते पूर्वनिपातनियमार्थं वचनं तेनाकृतकृतमित्यादि न ॥ सेट् नानिटा ॥ ३ । १ । १०६ ॥ क्तान्तं नञादिभिन्नेन न समस्यते । पूर्वापवादः । क्लिशितमक्लिष्टम् । इट्ग्रहणमर्थभेदाहेतोर्विकारस्योपलक्षणम् । तेन शितमशातम् । विन्नावित्तमिति तु क्तादेशोऽपि इति परे समासे नत्वस्यासत्त्वाद् भविष्यति । सेडिति किम् । कृताकृतम् । अनिटेति किम् । अशितानशितम् ॥ सन्महत्परमोत्तमोत्कृष्टं पूजायाम् ॥ ३ । १ । १०७ ॥ पूज्यवचनैः समासस्तत्पुरुषः कर्मधारयश्च । सत्पुरुषः । महापुरुषः । जातीयैकार्थेऽच्वेरिति डाः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः । पूजायामिति किम् । सन्घटोऽस्तीत्यर्थः । महाजन इत्यादौ तु न पूजा समासस्तु बहुलवचनाद् भविष्यति । पूजायामेवेति नियमार्थं पूर्वनिपातव्यवस्थार्थंश्च । तेन सच्छुक्ल इत्यादावनियमेन न पूर्वनिपातः । परमजरन्नित्यादौ च स्पर्धे परमिति यथापरं पूर्वनिपातश्च सिद्धः ॥ वृन्दारकनागकुञ्जरैः ॥ ३ । १ । १०८ ॥ पूजायां पूज्यवाच्येकार्थे समासस्तत्पुरुषः कर्मधारयश्च । गोवृन्दारकः । गोनागः । गोकुञ्जरः । वृन्दारकादीनां जातिशब्दत्वेऽप्युपमानात् पूजावगतिः । पूजायामिति किम् । सुसीमो नागः । पूजायामेवेति नियमार्थं साम्योक्तावपि विध्यर्थं च वचनम् । तेन गोनागो बलवानिति सिद्धम् ॥ कतरकतमौ जातिप्रश्ने ॥ ३ । १ । १०९ ॥ जात्यर्थेन समासस्तत्पुरुषः कर्मधारयश्च । कतरकठः

। कतमगार्ग्यः । जातिप्रश्न एवेति नियमार्थं वचनम् । कतरः शुक्लः । कतमो गन्ता ॥ किं क्षेपे ॥ ३ । १ । ११० ॥ कुत्स्यवाचिना समासस्तत्पुरुषः कर्मधारयश्च । किं राजा । किं गौः । न किमः क्षेपे इति समासान्तप्रतिषेधः । क्षेपे एवेति नियमार्थं वचनम् । तेन को राजा मथुरायामित्यत्र न ॥ **पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यायकधूर्त्तप्रशंसारूढैर्जातिः** ॥ ३ । १ । १११ ॥ समासस्तत्पुरुषः कर्मधारयश्च । इभ्यपोटा । नागयुवतिः । अग्निस्तोकम् । दधिकतिपयम् । गोगृष्टिः । गोधेनुः । गोवशा । गोवेहत् । गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । मृगधूर्त्तः । धूर्तग्रहणं प्रवृत्तिनिमित्ताश्रयकुत्सार्थां समासार्थम् । गोमतल्लिका । गोत्रकाण्डम् । रूढग्रहणादिह न । गौ रमणीया । जातिरिति किम् । देवदत्ता पोटा । विशेष्यस्य जातेः पूर्वनिपातार्थं वचनम् ॥ **चतुष्पाद् गर्भिण्या** ॥ ३ । १ । ११२ ॥ समासस्तत्पुरुषः । कर्मधारयश्च गोगर्भिणी । जातिरित्येव । कालाक्षी गर्भिणी । चतुष्पादिति किम् । ब्राह्मणी गर्भिणी । पूर्वनिपातार्थं वचनम् ॥ **युवा खलतिपलितजरद्वलिनैः** ॥ ३ । १ । १११ ॥ समासस्तत्पुरुषः कर्मधारयश्च । युवखलतिः । युवतिश्चासौ पलितो युवपलितः । युवजरन् । युववलिनः । पूर्वनिपातनियमार्थं वचनम् ॥ **कृत्यतुल्याख्यमजात्या** ॥ ३ । १ । ११४ ॥ समासस्तत्पुरुषः कर्मधारयश्च । भोज्योष्णम् । स्तुल्यपटुः । तुल्यसन् । सदृशमहान् । अजात्येति किम् । भोज्य ओदनः । जात्या समासस्याजातेः पूर्वत्वस्य च प्रतिषेधार्थं वचनम् ॥ **कुमारः श्रमणादिना** ॥ ३ । १ । ११५ ॥ समासस्तत्पुरुषः कर्मधारयश्च । कुमारश्रमणा । कुमारप्रव्रजिता । श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी बन्धकी दासी एतैः स्त्रीलिङ्गैः स्त्रीलिङ्गः कुमारशब्दः समस्यते शेषैस्तूभयलिङ्गः । अत एव पाठान्नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति न्यायो ज्ञाप्यते । पुँल्लिङ्गैस्तु पूर्वनिपाते कामचारः । अभिरूपकपटुमृदुपण्डितकुशलचपलनिपुणकुमारशब्दस्य पूर्वनिपातनियमार्थं सूत्रम् ॥ **मयूरव्यंसकेत्यादयः** ॥ ३ । १ । ११६ ॥ एते तत्पुरुषसमासा निपात्यन्ते । मयूरव्यंसकः । कम्बोजमुण्डः । एहीडादयोऽन्यपदार्थे । एहीडं कर्म । आ-

ख्यातमाख्यायेन सातसे । अश्नीतपिबता । ह्यन्तं स्वकर्मणा बहुलमाभीक्ष्ण्ये कर्तरि समासाभिधेये । कुरुकटो वत्ता । गतप्रत्यागतादयः । गतप्रत्यागतम् । क्रयक्रयिका । शाकपार्थिवादयः । शाकपार्थिवः । त्रिभागः । सर्वश्वेतः । अविहितलक्षणस्तत्पुरुषोऽत्र ज्ञेयः । यच्चेह लक्षणे नानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । इतिशब्दः स्वरूपावधारणार्थः तेन परममयूरव्यंसक इति न समासः । उत्तरपदेन भवत्येवेत्यन्ये । मयूरव्यंसकप्रिय इत्यादि । बहुवचनाद्विस्पष्टपटुरित्यादयः ॥ राजदन्तादिषु ॥ ३ । १ । १४९ ॥ अप्राक्प्राग्निपातं प्राक् स्यात् । राजदन्तः । लिप्तवासितम् ॥ कडारादयः कर्मधारये ॥ ३ । १ । १५८ ॥ प्राग्वा स्युः ॥ कडारजैमिनिः । जैमिनिकडारः । काणद्रोणः । द्रोणकाणः ॥ जातमहद्वृद्धादुक्ष्णः कर्मधारयात् ॥ ७ । ३ । ९५ ॥ अत् समासान्तः । जातोक्षः । महोक्षः । वृद्धोक्षः । कर्मधारयादिति किम् । जातस्योक्षा जातोक्षा ॥ स्त्रियाः पुंसो द्वन्द्वाच्च ॥ ७ । ३ । ९६ ॥ कर्मधारयाच्चात् समासान्तः । स्त्रीपुंसौ । स्त्रीपुंसः । शिखण्डी । द्वन्द्वाच्चेति किम् । स्त्रियाः पुमान् स्त्रीपुमान् ॥ द्विगोरन्नह्नोऽट् ॥ ७ । ३ । ९९ ॥ समाहारार्थात् । पञ्चतक्षी । पञ्चतक्षम् । द्व्यहः । द्विगोरिति किम् । समह्नः । समाहार इत्येव । द्व्युक्षा । अह्न इदमड्विधानं समाहारे परस्यापि सर्वांशेत्यटो बाधनार्थं तस्मिन् हि सत्यह्नादेशोऽपि स्यात् ॥ द्वित्रेरायुषः ॥ ७ । ३ । १०० ॥ समाहारार्थात् द्विगोरट् । द्व्यायुषम् । त्र्यायुषं । समाहारइत्येव । द्व्यायुष्प्रियः ॥ वाञ्जलेरलुकः ॥ ७ । ३ । १०१ ॥ द्वित्रिभ्यां परात् अञ्जलेर्द्विगोरट् न चेत् स तद्धितलुगन्तः । द्व्यञ्जलम् । द्व्यञ्जलि । त्र्यञ्जलमयम् । त्र्यञ्जलिमयम् । अलुक इति किम् । द्व्यञ्जलिर्घटः । नित्योऽयं विधिरित्येके ॥ खार्या वा ॥ ७ । ३ । १०२ ॥ द्विगोरलुकोऽट् । द्विखारम् । द्विखारि । केचित् पुंस्त्वमपीच्छन्ति । द्विखारिः । स्त्रीत्वमप्यन्ये । द्विखारी । पञ्चखारधनः । पञ्चखारी धनः । द्विगोरित्येव । उपखारि । अलुक इत्यस्य प्रत्युदाहरणं नास्ति विशेषाभावात् ॥ वार्धाच्च ॥ ७ । ३ । १०३ ॥ खार्याः समासादलुकोऽट् । अर्धखारम् । अर्धखारी । प्रतिपदोक्तग्रहणान्नेह । अर्धखारी । विधानसामर्थ्यादडन्तस्य न स्त्रियां वृत्तिः । चकारो द्विगोरनु-

कर्षणार्थस्तेनोत्तरत्र द्वयमनुवर्तते ॥ **नावः** ॥ ७ । ३ । १०४ ॥ अर्धात् परात् समासाद् द्विगोश्चालुकोऽट् । अर्धनावम् । अर्धनावी । पञ्चनावम् । अलुक इत्येव । द्विनौः ॥ **गोस्तत्पुरुषात्** ॥ ७ । ३ । १०५ ॥ अलुकोऽट् । राजगवी । तत्पुरुषात् इति किम् । चित्रगुः । अलुक इत्येव । पञ्चगुः पटः ॥ **राजन्सखेः** ॥ ७ । ३ । १०६ ॥ तत्पुरुषादट् । देवराजः । राजसखः । नान्तनिर्देशादिह न । मद्रराज्ञी । पृथग्योगादलुक इति निवृत्तम् । पञ्चराजः ॥ **राष्ट्राख्याद् ब्रह्मणः** ॥ ७ । ३ । १०७ ॥ तत्पुरुषादट् । सुराष्ट्रब्रह्मः । राष्ट्राख्यादिति किम् । देवब्रह्मा नारदः । आख्याग्रहणं राष्ट्रवाच्यर्थम् ॥ **कुमहद्भ्यां वा** ॥ ७ । ३ । १०८ ॥ ब्रह्मान्तात् तत्पुरुषादट् । कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा ॥ **ग्रामकौटात् तक्ष्णः** ॥ ७ । ३ । १०९ ॥ तत्पुरुषादट् । ग्रामतक्षः । कौटतक्षः ॥ **गोष्ठातेः शुनः** ॥ ७ । ३ । ११० ॥ तत्पुरुषादट् । गोष्ठश्वः । अतिश्वो वराहः ॥ **प्राणिन उपमानात्** ॥ ७ । ३ । १११ ॥ शुनस्तत्पुरुषादट् । व्याघ्रश्वः । अत एव वचनात् श्वन्शब्दस्य परनिपातः । प्राणिन उपमानादिति पूर्वपदविज्ञानादिह न । वानरः श्वेव वानरश्वा । प्राणिन इति किम् । फलकश्वा । उपमानभूतश्वान्तात् तत्पुरुषादिच्छन्त्येके । तन्मते वानरश्वेत्यत्र समासान्तविधेरनित्यत्वाच्च ॥ **अप्राणिनि** ॥ ७ । ३ । ११२ ॥ य उपमानभूतः श्वा तदन्तात् तत्पुरुषादट् । आकर्षश्वः । अप्राणिनीति किम् । वानरश्वा ॥ **पूर्वोत्तरमृगाच्च सक्थ्नः** ॥ ७ । ३ । ११३ ॥ उपमानार्थाच्च तत्पुरुषादट् । पूर्वसक्थम् । उत्तरसक्थम् । मृगसक्थम् । फलकसक्थम् ॥ **उरसोऽग्रे** ॥ ७ । ३ । ११४ ॥ तत्पुरुषादट् । अश्वोरसम् । सेनायाः मुख्यमित्यर्थः । अश्वोरसम् प्रधानमित्यर्थः ॥ **सरोऽनोश्मायसो जातिनाम्नोः** ॥ ७ । ३ । ११५ ॥ तत्पुरुषादट् यथासम्भवम् । जालसरसम् । उपानसम् । स्थूलाश्मः । कालायसम् । जातिनाम्नोरिति किम् । परमसरः ॥ **अह्नः** ॥ ७ । ३ । ११६ ॥ तत्पुरुषादट् । परमाहः । रात्राह्नाहः पुंसि ॥ **सङ्ख्यातादह्नश्च वा** ॥ ७ । ३ । ११७ ॥ अह्नस्तत्पुरुषादट् । सङ्ख्याताह्नः । सङ्ख्याताहः । चकार उत्तरत्राह्नादेशस्यादृसन्नियोगार्थः । अन्यथा हि अटोऽपवादोऽह्नादेशो वि-

श्रयेत । तथा च स्त्रियां ङीर्न स्यात् ॥ सर्वांशसङ्ख्याव्ययात् ॥ ७ । ३ । ११८ ॥ अहन्नन्तात् तत्पुरुषादट् अह्न-श्चाह्नः । सर्वाह्नः । पूर्वाह्णः । द्व्यहः । अत्यही कथा ॥ सङ्ख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत् ॥ ७ । ३ । ११९ ॥ सर्वादेश्च तत्पुरुषात् । सङ्ख्यातरात्रः । एकरात्रः । पुण्यरात्रः । वर्षारात्रः । दीर्घरात्रः । सर्वरात्रः । पूर्वरात्रः । द्विरा-त्रः । त्रिरात्रः । अतिरात्रः । एकग्रहणं सङ्ख्याग्रहणेनानेनैकस्याग्रहणार्थम् । तेन पूर्वसूत्रे एकस्याग्रहणम् । एकमहः ए-काहम् ॥ अद्विधानं ङ्यभावार्थम् ॥ पुरुषायुषद्विस्तावत्रिस्तावम् ॥ ७ । ३ । १२० ॥ एते तत्पुरुषा अदन्ता नि-पात्याः । पुरुषायुषम् । द्विस्तावा । त्रिस्तावा वेदिः ॥ श्वसोवसीयसः ॥ ७ । ३ । १२१ ॥ तत्पुरुषादत् । श्वोवसीय-सम् ॥ निसश्च श्रेयसः ॥ ७ । ३ । १२२ ॥ श्वसश्च तत्पुरुषादत् । निःश्रेयसम् । श्वःश्रेयसम् ॥ नञव्ययात् सङ्ख्या-या डः ॥ ७ । ३ । १२३ ॥ तत्पुरुषात् । अदशाः । निस्त्रिंशः खड्गः । नञव्ययादिति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थम् । स-ङ्ख्याया इति किम् । निःशकृत् । तत्पुरुषादित्येव । अत्रिः । डित्वमन्त्यस्वरादिलोपार्थम् ॥ सङ्ख्याव्ययादङ्गुलेः ॥ ७ । ३ । १२४ ॥ तत्पुरुषात् डः । द्व्यङ्गुलम् । निरङ्गुलम् । तत्पुरुषादित्येव । अपाङ्गुलि । आत्माङ्गुलम्, प्रमाणाङ्गु-लमुत्सेधाङ्गुलम्, इत्यत्र तु अङ्गुलशब्दः प्रमाणवाची प्रकृत्यन्तरम् ॥ नञ्तत्पुरुषात् ॥ ७ । ३ । ७१ ॥ समासान्तो न । अनृक् । अराजा । तत्पुरुषादिति किम् । अधुरं शकटम् ॥ पुंवत्कर्मधारये ॥ ३ । २ । ५७ ॥ परतः स्त्री अनूङ् स्त्र्येका-र्थे उत्तरपदे । प्रतिषेधनिवृत्त्यर्थ आरम्भः । कल्याणप्रिया । भद्रकभार्या । माथुरवृन्दारिका । चन्द्रमुखवृन्दारिका । वा-तण्ड्यवृन्दारिका । परतः स्त्रीत्येव । खट्वावृन्दारिका । अनूङित्येव । ब्रह्मबन्धूवृन्दारिका ॥ च्वौ क्वचित् ॥ ३ । २ । ६० ॥ परतः स्त्र्यनूङ् पुंवत् । महद्भूताकन्या । क्वचिदिति किम् । गोमती भूता ॥ सर्वादयोऽस्यादौ ॥ ३ । २ । ६१ ॥ परतः स्त्रियः पुंवत् । सर्वस्त्रियः । भवत्पुत्रः । अस्यादाविति किम् । सर्वस्यै । बहुवचनाद् भूतपूर्वसर्वादेरपि । द-क्षिणोत्तरपूर्वाणाम् ॥ मृगक्षीरादिषु वा ॥ ३ । २ । ६२ ॥ परतः स्त्री उत्तरपदे पुंवत् । मृगक्षीरम् । मृगीक्षीरम् ।

काकशावः । काकीशावः । मृगक्षीरादयः प्रयोगतोऽनुसर्तव्याः । पुंस्त्रीलिङ्गपूर्वपदभेदेन समासविवक्षायां सूत्रानारम्भे मृगक्षीरादयो न सिध्यन्ति ॥ महतः करघासविशिष्टे डाः ॥ ३ । २ । ६८ ॥ वोत्तरपदे । वैयधिकरण्यार्थमिदम् । महाकरः । महत्करः । महाघासः । महद्घासः । महाविशिष्टः । महद्विशिष्टः ॥ स्त्रियाम् ॥ ३ । २ । ६९ ॥ महतः करादावुत्तरपदे नित्यं डाः । महाकरः । महाघासः । महाविशिष्टः ॥ जातीयैकार्थेऽच्वेः ॥ ३ । २ । ७० ॥ महत उत्तरपदे डाः । महाजातीयः । महावीरः । जातीयैकार्थे इति किम् । महत्तरः । अच्वेरिति किम् । महद्भूता कन्या ॥ न पुंवन्निषेधे ॥ ३ । २ । ७१ ॥ महतः उत्तरपदे डाः । महतीप्रियः ॥

॥ इति तत्पुरुषः ॥

---

॥ अथ द्वन्द्वः ॥

॥ चार्थे द्वन्द्वः सहोक्तौ ॥ ३ । १ । ११७ ॥ नाम नाम्ना । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चत्वारश्चार्थाः । तत्रैकमर्थं प्रति त्यादीनां क्रियाकारकद्रव्यगुणानां तुल्यबलानामविरोधिनामनियतक्रमयौगपद्यानामात्मरूपभेदेन चीयमानता समुच्चयः । चैत्रः पचति पठति च । गुणप्रधानभावमात्रविशिष्टः समुच्चय एवान्वाचयः । यथा बटो भिक्षामट गां चानय । द्रव्याणामेव परस्परसव्यपेक्षाणामुद्भूतावयवभेदः समूह इतरेतरयोगः । यथा चैत्रश्च मैत्रश्च घटं कुर्वाते । स एव तिरोहितावयवभेदः संहतिप्रधानः समाहारः । धवश्च खदिरश्च पलाशश्च तिष्ठति तत्राद्ययोर्न समासः सहोक्त्यभावात् । प्लक्षन्यग्रोधौ । वाक्त्वचम् । नाम नाम्नेत्युक्तावपि लघ्वक्षरादि सूत्रे (३–१–१६०) एकग्रहणाद् बहूनामपि । धवखदिरपलाशाः । होतृपोतृनेष्टोद्गातारः । द्वयोर्द्वयोर्द्वन्द्वे हि होतापोतानेष्टोद्गातारः । चार्थ इति किम् । वीप्सासहोक्तौ माभूत् । ग्रामो ग्रामो रमणीयः । सहोक्ताविति किम् । प्लक्षश्च न्यग्रोधश्च वीक्ष्येताम् । वर्त्तिपदैः प्रत्येकं पदा-

र्थानां युगपदभिधानं सहोक्तिः । उत्तरपदेन समुदायेन वा यद्वार्त्तिपदार्थाभिधानं सा सहोक्तिरित्यन्ये । वर्त्तिपदार्थानामेव सह क्रियादिसम्बन्धस्य यद्वाक्येनाभिधानं सा सहोक्तिरित्यपरे । एकविंशत्यादयः सङ्ख्याद्वन्द्वा एकवचनान्ताः समुदायसङ्ख्यैकत्वानुरोधात् । समाहारेऽपि चाशतात् द्वन्द्वे इति वचनात् स्त्रीलिङ्गाः ॥ **धर्मार्थादिषु द्वन्द्वे** ॥ ३ । १ । १५९ ॥ अमासमात्त्वं वा प्राक् । धर्मार्थौ । अर्थधर्मौ । शब्दार्थौ । अर्थशब्दौ ॥ **लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम्** ॥ ३ । १ । १६० ॥ द्वन्द्वे प्राक् । शरशीर्यम् । अग्नीषोमौ । वायुतोयम् । असखीति किम् । सुतसखायौ । अश्वशशम् । प्लक्षन्यग्रोधौ । श्रद्धामेधे । लघ्वादीति किम् । कुक्कुटमयूरौ । मयूरकुक्कुटौ । एकमिति किम् । शङ्खदुन्दुभिवीणाः । द्वन्द्व इत्येव । विस्पष्टपटुः ॥ **मासवर्णभ्रात्रनुपूर्वम्** ॥ ३ । १ । १६१ ॥ द्वन्द्वे प्राक् । फाल्गुनचैत्रौ । ब्राह्मणक्षत्रियौ । ब्राह्मणक्षत्रियवैश्याः । बलदेववासुदेवौ ॥ **भर्तुतुल्यस्वरम्** ॥ ३ । १ । १६२ ॥ द्वन्द्वेऽनुपूर्वं प्राक् । अश्विनीभरणीकृत्तिकाः । हेमन्तशिशिरवसन्ताः । तुल्यस्वरमिति किम् । आर्द्रामृगशिरसी । ग्रीष्मवसन्तौ ॥ **सङ्ख्या समासे** ॥ ३ । १ । १६३ ॥ अनुपूर्वं प्राक् । द्वित्राः । द्विशती । एकादश ॥ **समानामर्थेनैकः शेषः** ॥ ३ । १ । ११८ ॥ **स्यादावसङ्ख्येयः** ॥ ३ । १ । ११९ ॥ **त्यदादिः** ॥ ३ । १ । १२० ॥ एवैकः शिष्यते त्यदादिनान्येन च सहोक्तौ । स च चैत्रश्च तौ । त्यदादीनां मिथः सहोक्तौ स्पर्धे परमिति परमेव शिष्यते । स च यश्च यौ । अहं च स च त्वं च वयम् । बहुलाधिकारात् क्वचित्पूर्वमपि । स च यश्च तौ । स्त्रीपुंनपुंसकानां सह वचने स्यात्परं लिङ्गमिति यथा परमेव लिङ्गं भवति । सा च चैत्रश्च तौ । सा च कुण्डे च तानि । स च कुण्डं च ते । परलिङ्गो द्वन्द्वोऽशीति समासार्थस्य लिङ्गातिदेशात् तद्विशेषणस्य त्यदादेरपि तल्लिङ्गतैव न्याय्येति ते कुक्कुटमयूर्यौ ॥ **पुष्यार्थाद्भे पुनर्वसुः** ॥ ३ । १ । १२९ ॥ सहोक्तौ अर्थः सङ्ख्येकार्थः स्यात् । उदितौ पुष्यपुनर्वसू । अर्थग्रहणात् तिष्यपुनर्वसू । समाहारे तु पुष्यपुनर्वसु । पुष्यार्थादिति किम् । आर्द्रापुनर्वसवः । पुनर्वसुरिति किम् । पुष्यमघाः । भ इति किम् । पुष्यपुनर्वसवो बालाः स ।

सहोक्ताविल्येव । पुष्यपुनर्वसवो मुग्धाः ॥ **विरोधिनामद्रव्याणा नवा द्वन्द्वः स्वैः** ॥ ३ । १ । १३० ॥ एकार्थः स्यात् । सुखदुःखम् । सुखदुःखे । लाभालाभं लाभालाभौ । विरोधिनामिति किम् । कामक्रोधौ । अद्रव्याणामिति किम् । शीतोष्णे जले । स्वैरिति किम् । बुद्धिसुखदुःखानि । सर्वमिदं विकल्पानुक्रमणं नियमार्थम् । विरोधिनामेवाद्रव्याणामेव स्वैरेवेति च । तथा प्रत्युदाहरणे इतरेतरयोग एव ॥ **अश्ववडवपूर्वापराधरोत्तराः** ॥ ३ । १ । १३१ ॥ त्रयो द्वन्द्वा एकार्था वा स्युः । स्वैश्चेत् । अश्ववडवम् । अश्ववडवौ । निर्देशोदव ह्रस्वः । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् । अधरोत्तरे । पशुत्वादेव सिद्धेऽश्ववडवग्रहणं तत्पर्यायनिवृत्त्यर्थम् । हयवडवे । स्वैरित्येव । अजावश्ववडवाः । न्यायादेव विकल्पे सिद्धे पूर्वापरादिग्रहणं पदान्तरनिवृत्त्यर्थम् । तेन पूर्वपश्चिमावित्यादौ न विकल्पः ॥ **पशुव्यञ्जनानाम्** ॥ ३ । १ । १३२ ॥ स्वैर्द्वन्द्व एकार्थो वा । गोमहिषं । गोमहिषौ । दधिघृतम् । दधिघृते । अश्वमहिषमित्यत्र तु परत्वात् " नित्यवैरस्य ॥ ( ३–१–१४१ ) इति नित्यमेकत्वविधिः । स्वैरित्येव । गोनरौ ॥ **तरुतृणधान्यमृगपक्षिणां बहुत्वे** ॥ ३ । १ । १३३ ॥ प्रत्येकं स्वैर्द्वन्द्व एकार्थो वा स्यात् । प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । कुशकाशम् । कुशकाशाः । तिलमाषम् । तिलमाषाः । ऋश्यैणम् । ऋश्यैणाः । हंसचक्रवाकम् । हंसचक्रवाकाः । एकस्यापि पदस्य बहुत्वे भवति । बहुत्वे किम् । प्लक्षन्यग्रोधौ । स्वैरित्येव । प्लक्षयवाः । मृगाणामिहोपादानममृगैरबहुत्वे चैकत्वाभावार्थम् ॥ **सेनाङ्गक्षुद्रजन्तूनाम्** ॥ ३ । १ । १३४ ॥ बह्वर्थानां स्वैर्द्वन्द्व एकार्थो नित्यं पृथग्योगात् । अश्वरथम् । केचित्तु सेनाङ्गपशूनां पशुलक्षणं विकल्पमिच्छन्ति । हस्त्यश्वम् । हस्त्यश्वाः । इह आनकुलं क्षुद्रजन्तवः । यूकालिक्षम् ॥ **फलस्य जातौ** ॥ ३ । १ । १३५ ॥ बह्वर्थस्य स्वैर्द्वन्द्व एकार्थो नित्यम् । बदरामलकम् । जातौ किम् । एतानि बदरामलकानि सन्ति । बहुत्वे किम् । बदरामलके २ । स्वैरित्येव । बदरशृगालाः ॥ **अप्राणिपश्वादेः** ॥ ३ । १ । १३६ ॥ द्रव्यवाचिनो जात्यर्थस्य स्वैर्द्वन्द्व एकार्थः । आराशस्त्रि । जातावित्येव । सह्यविन्ध्यौ । प्राण्यादिवर्जनं किम् । ब्राह्मणक्षत्रियविट्शूद्राः २ । गो-

महिषौ २ । प्लक्षन्यग्रोधौ । २ ॥ अश्वरथौ २ । बदरामलके २ । अप्राणीति पर्युदासेन द्रव्यस्यैव ग्रहणादिह न । रूप-
रसगन्धस्पर्शाः । पूर्वयोगारम्भाद् बहुत्व इति निवृत्तम् ॥ प्राणितूर्याङ्गाणाम् ॥ ३ । १ । १३७ ॥ स्वैर्द्वन्द्व एकार्थः
। कर्णनासिकम् । मार्दङ्गिकपाणविकम् । स्वैरित्येव । पाणिपुत्रौ । व्यक्तिविवक्षायां प्राण्यङ्गप्राण्यङ्गादिसम्भेदे एकत्व-
निराकरणार्थश्च यत्नः । एतज्ज्ञापनार्थमेव बहुवचनम् ॥ चरणस्य स्थेणोऽद्यतन्यामनुवादे ॥ ३ । १ । १३८ ॥
कर्तृत्वेन सम्बन्धिनः स्वैर्द्वन्द्व एकार्थः । प्रत्यष्ठात् । कठकालापम् । उदगात्कठकौथुमम् । अनुवाद इति किम् । उदगुः क-
ठकालापाः । अप्रसिद्धं कथयति । अन्ये तु स्थेणोऽद्यतनीप्रयोगादनुप्रयोगाद्वा चरणद्वन्द्वस्येत्यनुवादस्तत्रेच्छन्ति । तन्मते इह
न । कठकालापाः । प्रत्यष्ठुः ॥ अक्लीबेऽध्वर्युक्रतोः ॥ ३ । १ । १३९ ॥ स्वैर्द्वन्द्व एकार्थः । अर्काश्वमेधम् । अक्लीब
इति किम् । गवामयनादित्यानामयने । प्रसज्यप्रतिषेधाद्राजसूयवाजपेये । अध्वर्युग्रहणं किम् । इषुवज्रौ । क्रतोः किम् ।
दर्शपौर्णमासौ ॥ निकटपाठस्य ॥ ३ । १ । १४० ॥ स्वैर्द्वन्द्व एकार्थः । पदकक्रमकम् । निकटेति किम् । याज्ञि-
कवैयाकरणौ । पाठस्येति किम् । पितापुत्रौ । पुत्रे इत्यात्वम् ॥ नित्यवैरस्य ॥ ३ । १ । १४१ ॥ स्वैर्द्वन्द्व एकार्थः । अ-
हिनकुलम् । देवासुरम् । श्वावराहम् । शुनः ( ३-२-९० ) इति दीर्घत्वम् । श्वचण्डालम् । पशुविकल्पः पक्षिविकल्पश्च
। परत्वाद् अनेन बाध्यते । नित्यवैरस्येति किम् । देवासुराः । देवासुरम् । अन्ये तु वैर एवाभिधेये इच्छन्ति श्वावराहं वै-
रम् । वैरिषु तु यथाप्राप्तम् । दक्षिणाद्ग्रामगमनं प्रशस्तं श्वसृगालयोः ॥ नदीदेशपुरां विलिङ्गानाम् ॥ ३ । १ । १४२ ॥
स्वैर्द्वन्द्व एकार्थः । गङ्गाशोणम् । कुरु कुरुक्षेत्रम् । मथुरापाटलिपुत्रम् । देशत्वादेव सिद्धे पुरग्रहणं ग्रामनिषेधार्थम् । आ-
म्बवशाल्वकिन्यौ पुर्देशसम्भेदेऽपीत्यपरे । श्रावस्तीमध्यदेशम् । मगधश्रावस्ति । पृथग्नदीपुर्ग्रहणाद्देशशब्देन जनपदग्रहणम्
। तेनेह न । गौरीकैलासौ । विलिङ्गानां किम् । गङ्गायमुने ॥ पात्र्यशूद्रस्य ॥ ३ । १ । १४३ ॥ स्वैर्द्वन्द्व एकार्थः ।
तक्षायस्कारम् । पात्र्येति किम् । जनङ्गमबुक्कसाः । शूद्रस्येति किम् । ब्राह्मणक्षत्रियविशः ॥ गवाश्वादिः ॥ ३ । १ ।

१४४ ॥ द्वन्द्व एकार्थः । गवाश्वम् । गवाविकम् । नित्यवैरस्यापवादत्वे श्वचण्डालम् । कुब्जीकुब्जम् । दासीदासम् । भागवती भागवतम् । विभाषेतेषु पुरुषः स्त्रियाः ( ३-१-१२६ ) ॥ इत्येकशेषो न निपातनात् । गवाश्वादिषु यथोच्चारितरूपग्रहणा-दन्यत्र नायं विधिः । गौश्वौ २ । गो अश्वे २ ॥ न दधिपय आदिः ॥ ३ । १ । १४५ ॥ द्वन्द्व एकार्थः । दधिपयसी । सर्पिर्मधुनी ॥ सङ्ख्याने ॥ ३ । १ । १४६ ॥ वर्त्तिपदार्थानां द्वन्द्व एकार्थो न । दशगोमहिषाः । बहवः पाणिपादाः ॥ वान्तिके ॥ ३ । १ । १४७ ॥ वर्त्तिपदार्थानां सङ्ख्यानस्य गम्ये द्वन्द्व एकार्थः । उपदशम् । गोमहिषम् । उपदशाः । गोमहिषाः । स्त्रियाः पुंसो द्वन्द्वाच्च । स्त्रीपुंसम् । स्त्रीपुंसौ ॥ ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसाहोरात्ररात्रिंदिवं नक्तंदिवाहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम् ॥ ७ । ३ । ९७ ॥ एते द्वन्द्वा अदन्ता निपात्याः । ऋक्सामे । ऋग्यजुषम् । धेन्वनडुहम् । वाङ्मनसे । अहोरात्रः । रात्रिंदिवम् । नक्तंदिवम् । अहर्दिवम् । ऊर्वष्ठीवम् । पदष्ठीवम् । अक्षिभ्रुवम् । दारगवम् ॥ चवर्गदषहः समाहारे ॥ ७ । ३ । ९८ ॥ द्वन्द्वादत्समासान्तः । वाक्त्वचम् । सम्पद्विपदम् । वाक्त्विषम् । छत्रोपानहम् । समाहार इति किम् । प्रावृट्शरद्भ्याम् । चवर्गादिति किम् । इषत्समित् । द्वन्द्वादित्येव । पञ्चवाक् ॥

॥ इति द्वन्द्वः ॥

॥ अथैकशेषः ॥

भ्रातृपुत्राः स्वसृदुहितृभिः ॥ ३ । १ । १२१ ॥ सहोक्तौ शिष्यन्ते । बहुवचनं पर्यायार्थम् । भ्राता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ ॥ पिता मात्रा वा ॥ ३ । १ । १२२ ॥ सहोक्तावेकः शिष्यते । श्वशुरौ । श्वश्रूश्वशुरौ । द्विवचनं जातौ यद्योगे च वर्त्तमानयोः श्वश्रोः परिग्रहार्थम् । तेन जातौ तन्मात्रभेदे पुरुषः स्त्रियेति नित्य-

विधिर्न ॥ वृद्धो यूना तन्मात्रभेदे ॥ २ । १ । १२४ ॥ सहोक्तौ शिष्यते । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्ध किम् । गर्गगार्ग्यायणौ । यूनेति किम् । गार्ग्यगर्गौ । न चेत् प्रकृतिभेदोऽर्थभेदो वान्य इति किम् । मार्गवात्स्यायनौ । भागवित्तिभागवित्तिकौ ॥ स्त्री पुंवच्च ॥ ३ । १ । १२५ ॥ वृद्धो यूना सहोक्तौ शिष्यते तन्मात्रभेदे । गार्गी च गार्ग्यायणश्च गार्ग्यौ । गार्गी च गार्ग्यायणौ गर्गाः तान् गर्गान् ॥ पुरुषः स्त्रियाः ॥ ३ । १ । १२६ ॥ सहोक्तावेकः शिष्यते तन्मात्रभेदे । पुरुषशब्दः प्राणिनि पुंसि रूढः । ब्राह्मणी च ब्राह्मणश्च ब्राह्मणौ । पुरुषः किम् । तीरं नदनदीपतेः । तन्मात्रभेद इत्येव । स्त्रीपुंसौ ॥ ग्राम्याशिशुद्विशफसङ्घे स्त्री प्रायः ॥ ३ । १ । १२७ ॥ स्त्रीपुरुषसहोक्तौ शिष्यते तन्मात्रभेदे । गावश्च स्त्रियो गावश्च नरा इमा गावः । ग्राम्येति किम् । रुरवश्चेमे रुरवश्चेमा इमे रुरवः । अशिश्विति किम् । बर्कर्यश्च बर्कराश्च बर्कराः । द्विशफेति किम् । गर्दभाश्च गर्दभ्यश्च गर्दभाः । सङ्घे किम् । गौश्चायं गौश्चेयमिमौ गावौ । प्रायः किम् । छाग्यश्च छागाश्च छागाः । तन्मात्रभेदे इत्येव । अजाविकम् । स्त्रीशेषार्थं वचनम् ॥ क्लीबमन्यनैकं च वा ॥ ३ । १ । १२८ ॥ सहोक्तावेकं शिष्यते तन्मात्रभेदे शिष्यमाणम् । शुक्लश्च शुक्लं च शुक्लं शुक्ले वा शुक्लश्च शुक्लश्च शुक्ला च शुक्लं शुक्लानि वा । अन्येनेति किम् । शुक्लं च शुक्लं च शुक्ले । तन्मात्रभेदे इत्येव । हिमहिमान्यौ । अत्र प्रवृत्तिनिमित्तलक्षणार्थभेदोप्यस्तीति नैकशेषः ॥

॥ इत्येकशेषः ॥

---

॥ अथ समासान्ताः ॥

॥ समासान्तः ॥ ७ । ३ । ६९ ॥ विधास्यमानः प्रत्ययः तद्ग्रहणेन गृह्यते । अधिकारोऽयम् ॥ न किमः क्षेपे ॥ ७ । ३ । ७० ॥ परं यदृगादि तदन्तात् समासात् समासान्तः । किन्धूः । किंसखा । क्षेपे इति किम् । केषां राजा

किं राजः ॥ पूजास्वतेः प्राक्टात् ॥ ७ । ३ । ७२ ॥ परं यदगादि तदन्तात् समासान्तो न । सुधूः । अतिधूः । पूजेति किम् । अतिराजोऽरिः । प्राक्टादिति किम् । स्वङ्गुलं काष्ठम् ॥ ऋक्पूः पथ्यपोत् ॥ ७ । ३ । ७६ ॥ समासादत्समासान्तः । अर्धर्चः । त्रिपुरम् । जलपथः । बहपम् । पुरपथाभ्यां सिद्धे पुर्पथोरुपादानमेतद्विषयमयोगनिवृत्त्यर्थम् ॥ धुरोऽनक्षस्य ॥ ७ । ३ । ७७ ॥ समासादत्समासान्तः । राजधुरा । अनक्षस्येति किम् । अक्षधूः । दृढधूरक्षः ॥ सङ्ख्यापाण्डूदक्कृष्णाद्भूमेः ॥ ७ । ३ । ७८ ॥ समासादत्समासान्तः । द्विभूमम् । पाण्डुभूमम् । उदग्भूमम् । कृष्णभूमम् । सङ्ख्यादेः किम् । सर्वभूमिः ॥ उपसर्गादध्वनः ॥ ७ । ३ । ७९ ॥ अत्समासान्तः । प्राध्वो रथः ॥ समवान्धात्तमसः ॥ ७ । ३ । ८० ॥ समासान्तोऽत् । सन्तमसम् । अनुतमसम् । अवतमसम् ॥ प्रत्यन्ववात्सामलोम्नः ॥ ७ । ३ । ८२ ॥ प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमः । अनुलोमः । अवलोमः ॥ ब्रह्महस्तिराजपल्याद्वर्चसः ॥ ७ । ३ । ८३ ॥ समासान्तोऽत् । ब्रह्मवर्चसम् । हस्तिवर्चसम् । राजवर्चसम् । पल्यवर्चसम् । कथं त्विषिमान् राजवर्चस्वीति । समासान्तविधेरनित्यत्वात् एतच्च ऋक्पूः पथ्यपोत् इति निर्देशात् सिद्धम् ॥ प्रतेरुरसः सप्तम्याः ॥ ७ । ३ । ८४ ॥ समासान्तोऽत् । प्रत्युरसम् । सप्तम्या इति किम् । प्रत्युरः ॥ अक्ष्णोऽप्राण्यङ्गे ॥ ७ । ३ । ८५ ॥ समासान्तोऽत् । लवणाक्षम् । अप्राण्यङ्ग इति किम् । अजाक्षी ॥ सङ्कटाभ्याम् ॥ ७ । ३ । ८६ ॥ अक्ष्णः समासान्तोऽत् । समक्षम् । कटाक्षः । प्राण्यङ्गार्थं वचनम् ॥

॥ इति समासान्ताः ॥

---

न नाम्येकस्वरात् खित्युत्तरपदे मः ॥ ३ । २ । ९ ॥ लुप् । स्त्रियं मन्यः । नावं मन्यः । श्रियं मन्यं कुलमित्यत्रात्मसमानाधिकरणश्रीशब्दस्य नपुंसके ह्रस्वभावादाविष्टलिङ्गत्वाच्च नामो लोपः । अन्ये तु मध्वादिवत्स्वलिङ्गस्त्री-

करणेन ह्रस्वत्वबाधो लुप् च भवतीति कन्यके । कन्याके स्थितस्य कृतम् । उत्तरपदग्रहणादैकार्थ्येऽसत्यप्यसावयवः ॥ वाधी-
ति किम् । क्ष्मं कन्वः । एकस्वरादिति किम् । वधु कन्यः । स्त्रीति किम् । वीवाती ॥ असत्त्वे ङसेः ॥ ३ । २ ।
१० ॥ उत्तरपदे न लुप् । स्तोकान्मुक्तः । असत्त्वे इति किम् । स्तोकभयम् । उत्तरपद इत्येव । निःस्तोकः ॥ ब्राह्म-
णाच्छंसी ॥ ३ । २ । ११ ॥ अत्र ङसेर्लुगभावो निपात्यते । ब्राह्मणाच्छंसिनौ । निपातनादत्विग्विशेषादन्यत्र लुबेव
। ब्राह्मणशंसिनी स्त्री ॥ ओजोऽञ्जः सहोम्भस्तमस्तपसष्टः ॥ ३ । २ । १२ ॥ उत्तरपदे परे न लुप् । ओजसा
कृतम् । अञ्जसा कृतम्, सहसा कृतम्, अम्भसा कृतम् । तमसा कृतम् । तपसा कृतम्, कथं सततनैशतमो हृतमन्यत
इति । उत्तरपदस्य सम्बन्धिशब्दत्वात् यत्र पूर्वपदीभूतस्तमःशब्दस्तत्रैवायं निषेधः यत्र तु पदान्तरेण समस्तस्तत्र नायं
निषेधः । ट इति किम् । ओजो भावः । तमसो नेच्छन्त्यन्ये । तपसोऽन्ये ॥ पुंजनुषोऽनुजान्धे ॥ ३ । २ । १३ ॥
टो न लुप् । पुंसानुजः । जनुषान्धः । ट इत्येव । पुमनुजा ॥ आत्मनः पूरणे ॥ ३ । २ । १४ ॥ उत्तरपदे टो न लुप्
। आत्मना द्वितीयः । आत्मना षष्ठः । आत्मचतुर्थ इति तु बहुव्रीहिः ॥ मनसश्चाज्ञायिनि ॥ ३ । २ । १५ ॥ उत्तर-
पदे आत्मनष्टो न लुप् । मनसा ज्ञायी । आत्मनो नेच्छन्त्येके ॥ नाम्नि ॥ ३ । २ । १६ ॥ उत्तरपदे मनसष्टो न लुप् ।
मनसा देवी । नाम्नि किम् । मनोदत्ता कन्या ॥ परात्मभ्यां ङेः ॥ ३ । २ । १७ ॥ उत्तरपदे नाम्नि न लुप् । पर-
स्मैपदम् । आत्मनेपदम् । नाम्नि किम् । परहितम् ॥ अदन्तव्यञ्जनात् सप्तम्या बहुलम् ॥ ३ । २ । १८ ॥ उत्तरपदे
नाम्नि न लुप् । अरण्ये तिलकाः । युधिष्ठिरः । बहुलवचनात् कचिद्विकल्पः । त्वचि सारः । त्वक्सारः । कचिन्नभवति ।
जलकुक्कुटः । अदन्तव्यञ्जनादिति किम् । भूमिपाशः । नाम्नीत्येव । तीर्थकाकः । गविष्ठिर इति तु शिवादिपाठात् गवि युधेः
स्थिरस्य ( २-३-२५ ) इति निर्देशाद्वा । अन्तरङ्गत्वादयादेशे सति व्यञ्जनान्तत्वादेव न सेत्स्यति अन्तरङ्गानपि वि-
धीन् बहिरङ्गोपि लुप् बाधते इति न्यायात् । तदभावे नदीकुक्कुट्यादिष्वप्यन्तरङ्गत्वात्कृते अलुप् प्रसज्यते ॥ प्राकार-

स्य व्यञ्जने ॥ ३ । २ । १९ ॥ नाम्नि अव्यञ्जनात् सप्तम्या उत्तरपदे न लुप् । मुकुटेकार्षापणः । समिधिमाषकः । हली वीप्साया दानस्य चान्तर्भावः ॥ प्रागिति किम् ? यूथपशुः । कार इति किम् ? अभ्यर्हितपशुः । व्यञ्जने किम् ? अविकटोरणः । अव्यञ्जनादित्येव । नद्यांदोहः । नियमार्थोऽयं योगः । त्रिविधश्चात्र नियमः । प्रागामेव । कारस्यैव नाम्नि । व्यञ्जनादावेवेति ॥ तत्पुरुषे कृति ॥ ३ । २ । २० ॥ अव्यञ्जनात् सप्तम्या उत्तरपदे न लुप् । स्तम्बेरमः । भस्मनिहुतम् । बहुलाधिकारात् क्वचिदन्यतोऽपि । गोषुचरः । क्वचिन्न निषेधः । मद्रचरः । क्वचिद्विकल्पः । दिविषत् । द्युसत् । क्वचिदन्यदेव । हृदिस्पृक् । तत्पुरुषे किम् । धन्वकारकः । कृतीति किम् । अक्षशौण्डः । अव्यञ्जनादित्येव । कुरुचरः । ननु परमकारके तिष्ठतीत्यादौ कथं सप्तम्या लुप्, उच्यते, अन्तरङ्गत्वात् प्रथमान्तस्य परमादिशब्दस्य कारकशब्देन समास इति सप्तम्येव नास्ति । यद्वा कृतीति कृन्निमित्ताया एव सप्तम्या लुप्प्रतिषेधः । इह तु तिष्ठत्यादिक्रियापेक्षा इति लुप् स्यादेव ॥ मध्यान्ताद् गुरौ ॥ ३ । २ । २१ ॥ सप्तम्या न लुप् । मध्येगुरुः । अन्तेगुरुः । लुपमपीच्छन्त्यन्ये ॥ अमूर्धमस्तकात् स्वाङ्गादकामे ॥ ३ । २ । २२ ॥ अव्यञ्जनात् सप्तम्या उत्तरपदे न लुप् । कण्ठेकालः । अमूर्धमस्तकादिति किम् । मूर्धशिखः । मस्तकशिखः । स्वाङ्गात् किम् ? अक्षशौण्डः । अकाम इति किम् । मुखकामः । अव्यञ्जनादित्येव । अङ्गुलित्रणः । करकमलमित्यादि तु बहुलाधिकारात् सिद्धम् ॥ बन्धे घञि नवा ॥ ३ । २ । २३ ॥ अव्यञ्जनात् सप्तम्या न लुप् । हस्तेबन्धः । हस्तबन्धः । चक्रेबन्धः । चक्रबन्धः । घञीति किम् ? अजन्ते, हस्तबन्धः ॥ कालात्तनतरतमकाले ॥ ३ । २ । २४ ॥ अव्यञ्जनान्तात् सप्तम्या वा न लुप् । पूर्वाह्णेतनः २ । पूर्वाह्णेतराम् । पूर्वाह्णतरे । पूर्वाह्णेतमाम् । पूर्वाह्णतमे । पूर्वाह्णेकाले २ । कालादिति किम् ? शुक्लतरे । शुक्लतमे । अव्यञ्जनादित्येव । रात्रितरायाम् । नवा खित्कृदन्त इत्यत्रान्तग्रहणादुत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्य ग्रहणम् । तेनात्र तनतरतमप्रत्ययानां स्वरूपेणैव ग्रहणम् ॥ शयवासिवासेष्वकालात् ॥ ३ । २ । २५ ॥ अव्यञ्जनात् सप्त-

म्या लुप् नवा । बिलेशयः । बिलशयः । वनेवासी । वनवासी । ग्रामेवासः । ग्रामवासः । बहुलाधिकारात् मनसिशय इति लुबभावः । इच्छय इत्यादौ तु नित्यं लुप् । अकालादिति किम् । पूर्वाह्णशयः । अव्यञ्जनादित्येव । भूमिशयः ॥ वर्षक्षरवराप्सरःशरोरोमनसो जे ॥ ३ । २ । २६ ॥ सप्तम्या उत्तरपदे वा लुप् । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । वरेजः । वरजः । अप्सुजम् । अब्जम् । सरसिजम् । सरोजम् । शरेजम् । शरजम् । उरसिजः । उरोजः । मनसिजः । मनोजः ॥ द्युप्रावृड्वर्षाशरत्कालात् ॥ ३ । २ । २७ ॥ सप्तम्या जे उत्तरपदे न लुप् । दिविजः । प्रावृषिजः । वर्षासुजः । शरदिजः । कालेजः ॥ अपो ययोनिमतिचरे ॥ ३ । २ । २८ ॥ सप्तम्या न लुप् । अप्सव्यः । अप्सुयोनिः । अप्सुमतिः । अप्सुचरः ॥ नेन्सिद्धस्थे ॥ ३ । २ । २९ ॥ सप्तम्या अलुप् । स्थण्डिलवर्ती । सांकाश्यसिद्धः । समस्थः । शयवासीत्यादियोगद्वयविकल्पः, द्युप्रावृड् इत्यादियोगद्वयविधिः, अनेन प्रतिषेधश्च तत्पुरुषे कृतीत्यस्यैव प्रपञ्चः । ते वै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्चेति ॥ षष्ठ्याः क्षेपे ॥ ३ । २ । ३० ॥ गम्ये उत्तरपदे न लुप् । चौरस्यकुलम् । चौरकुलमिति तु तत्त्वाख्याने ॥ पुत्रे वा ॥ ३ । २ । ३१ ॥ उत्तरपदे क्षेपे षष्ठ्या न लुप् । दास्याःपुत्रः । दासीपुत्रः ॥ पश्यद्वाग्दिशो हरयुक्तिदण्डे ॥ ३ । २ । ३२ ॥ परस्याः षष्ठ्याः यथासंख्यं लुप् न । पश्यतोहरः । वाचोयुक्तिः । दिशोदण्डः ॥ अदसोऽकञायनणोः ॥ ३ । २ । ३३ ॥ अदसः परस्याः षष्ठ्या अकञ्विषये उत्तरपदे आयनणि च परे न लुप् । आमुष्यपुत्रिका । आमुष्यायणः । नडादित्वात् आयनण् ॥ देवानांप्रियः ॥ ३ । २ । ३४ ॥ षष्ठ्या लुबभावो निपात्यते । देवानांप्रियः । ऋजुर्मूर्खो वा ॥ शेपपुच्छलाङ्गूलेषु नाम्नि शुनः ॥ ३ । २ । ३५ ॥ परस्याः षष्ठ्याः उत्तरपदेषु न लुप् । शुनःशेपः । शुनःपुच्छः । शुनोलाङ्गूलः । नाम्नि किम् । श्वशेपम् । सिंहस्यशेपम् इत्यादिमतान्तरसंग्रहार्थं बहुवचनम् अनाम्न्यपि विध्यर्थम् ॥ वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम् ॥ ३ । २ । ३६ ॥ षष्ठ्यलुपि निपात्यते नाम्नि । वाचस्पतिः । वा-

स्तोष्पतिः । दिवस्पतिः । दिवोदासः ॥ नाम्नि किम् । वाक्पतिरित्यादि ॥ ऋतां विद्यायोनिसम्बन्धे ॥ ३ । २ । ३७ ॥ ऋदन्तानां विद्याकृते योनिकृते च सम्बन्धे हेतौ सति प्रवृत्तानां सम्बन्धिन्याः षष्ठ्यास्तत्रैव हेतौ सति प्रवृत्ते उत्तरपदे न लुप् ॥ होतुःपुत्रः । होतुरन्तेवासी । पितुःपुत्रः । पितुरन्तेवासी । ऋतामिति किम् ? आचार्यपुत्रः । बहुवचनं यथासंख्यनिवृत्त्यर्थम् । षष्ठीनिर्देश उत्तरार्थः । विद्यायोनिसम्बन्धे इति किम् । भर्तृगृहम् । पूर्वपदविशेषणं किम् ? भर्तृशिष्यः । उत्तरपदविशेषणं किम् । होतृधनम्॥ स्वसृपत्योर्वा ॥ ३ । २ । ३८ ॥ विद्यायोनिसम्बन्धनिमित्तानामृदन्तानां षष्ठ्या योनिसम्बन्धनिमित्तयोरुत्तरपदयोर्लुब् न ॥ होतुःस्वसा । होतृस्वसा । स्वसुःपतिः । स्वसृपतिः । विद्यायोनिसम्बन्ध इत्येव । भर्तृस्वसा । होतृपतिः । पूर्वेण नित्यं प्रतिषेधे प्राप्ते विकल्पोऽयम् ॥ मातृपितुः स्वसुः ॥ २ । ३ । १८ ॥ सस्य समासे षः ॥ मातृष्वसा । पितृष्वसा । समास इत्येव । मातुः स्वसा ॥ अलुपि वा ॥ २ । ३ । १९ मातृपितुः स्वसुः सस्य समासे षः ॥ मातुःष्वसा । मातुःस्वसा । पितुःष्वसा । पितुःस्वसा ॥ इत्यलुक्समासः ॥

## ॥ अथ समासाश्रयविधयः ॥

॥ आद्वन्द्वे ॥ ३ । २ । ३९ ॥ विद्यायोनिसम्बन्धे निमित्ते सति प्रवर्त्तमानानामृतामुत्तरपदे पूर्वपदस्य ॥ होतापोतारौ । मातापितरौ । ऋतामित्येव । गुरुशिष्यौ । होतृपोतृनेष्टोद्गातार इत्यादौ प्रथमयोस्तु न । अन्त्यस्यैवोत्तरपदस्त्वात् । द्वयोर्द्वयोर्द्वन्द्वे तु होतापोतानेष्टोद्गातार इत्यपि ॥ होता च पोता च नेष्टोद्गातारौ चेति होतृपोतृनेष्टोद्गातारः । ऋतां द्वन्द्व इति किम् । पितृपितामहौ । विद्यायोनिसम्बन्ध इति किम् । कर्तृकारयितारौ । प्रत्यासत्त्या समस्यमानानामेवेह परस्परं विद्यायोनिसम्बन्धो द्रष्टव्यस्तेन चैत्रस्य स्वसृदुहितरावित्यत्र मा भूत् । पितृभ्रातरावित्यत्रापि न परस्परस-

स्यन्यः, भ्रातुरनपेक्ष्यत्वात् । मातापितराविस्यादौ तु स्वकर्मणि सहिता एव ते प्रवर्त्तन्ते इत्यदोषः । केचित्तु स्वसादुहितरावित्यत्रापीच्छन्ति ॥ पुत्रे ॥ ३ । २ । ४० ॥ उत्तरपदे विद्यायोनिसम्बन्धे निमित्ते सति ऋताआः । मातापुत्रौ । होतापुत्रौ ॥ वेदसहश्रुतावायुदेवतानाम् ॥ ३ । २ । ४१ ॥ द्वन्द्वे उत्तरपदे पूर्वपदस्यात् ॥ इन्द्रासोमौ । सूर्याचन्द्रमसौ । वेदेति किम् ? शिववैश्रवणौ । सहेति किम् ? विष्णुशक्रौ । श्रुताविति किम् । चन्द्रसूर्यौ । वायुवर्जनं किम् । अग्निवायू । वाय्वग्नी । देवतानामिति किम् । यूपचषालौ ॥ ईः षोमवरुणेऽग्नेः ॥ ३ । २ । ४२ ॥ वेदसहश्रुतावायुदेवतानां द्वन्द्वे उत्तरपदे ॥ षोमेतिनिर्देशात् ईसन्नियोगे षत्वं च निपात्यते । अग्नीषोमौ । अग्नीवरुणौ ॥ इर्वृद्धिमत्यविष्णौ ॥ ३ । २ । ४३ ॥ उत्तरपदे देवताद्वन्द्वेऽग्नेः । ईकाराकारयोरपवादः । आग्निवारुणीमनड्वाहीमालभेत । वृद्धिमतीत्येव । अग्निवरुणौ ॥ दिवो द्यावा ॥३।२।४४॥ देवताद्वन्द्वे उत्तरपदे । द्यावाभूमी ॥ दिवस्दिवः पृथिव्यां वा ॥ ३ ।२ । ४५ ॥ दिवो देवताद्वन्द्वे उत्तरपदे । दिवस्पृथिव्यौ । दिवःपृथिव्यौ । द्यावापृथिव्यौ । अत्र विसर्गान्तनिर्देशान्न सस्य रुत्वम् ॥ उषासोषसः ॥ ३ । २ । ४६ ॥ देवताद्वन्द्वे उत्तरपदे । उषासासूर्य्यम् । सूर्यशब्दस्यापीति केचित् । उषासासोमौ ॥ मातरपितरं वा ॥ ३ । २ ।४७ ॥ द्वन्द्वे मातृपितृशब्दयोः पूर्वोत्तरपदयोर्ऋकारस्यार इति निपात्यते । मातरपितराभ्याम् । मातापितृभ्याम् । एकशेषे तु पितरौ । उत्तरपदस्यारं नेच्छन्त्यन्ये ॥ वर्चस्कादिष्ववस्करादयः ॥ ३ । २ । ४८ ॥ कृतशषसाद्युत्तरपदाः साधवः । अवस्करोऽन्नमलम् । अवकरोऽन्यः । गोष्पदम् । गोपदम् । हरिश्चन्द्र ऋषिः । हरिचन्द्रोन्यः । बहुवचनमाकृतिगणत्वप्रतिपत्त्यर्थम् ॥ ऋदुदित्तरतमरूपकल्पब्रुवचेलड्गोत्रमतहते वा ह्रस्वश्च ॥ ३ । २ । ६३ ॥ परतः स्त्री स्त्र्येकार्थेषूत्तरपदेषु चकारात् पुंवच्च । पचन्तितरा । पचत्तरा । पचन्तीतरा । एवं तमादिषु । ब्रुवादयः कुत्साशब्दाः । ऋदुदिति किम् ? कुमारितरा ॥ एकार्थ इत्येव । पचन्त्विहता ॥ ङ्यः ॥ ३ । २ । ६४ ॥ परतः स्त्रियास्तरादिषु ब्रुवादिषु चोत्तरपदेषु एकार्थेषु ह्रस्वः । परत्वात् यथाप्राप्तं पुंवद्भावं बाधते । गौरितरा ।

एवं तमादिषु । **भोगवद्गौरिमतोर्नाम्नि** ॥ ३ । २ । ६५ ॥ ङीप्रत्ययस्य तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेष्वेकार्थेषु ह्रस्वः । भोगवतितरा । गौरिमतितमा । भोगवतिरूपा । गौरिमतिकल्पा । भोगवतिब्रुवा । गौरिमतिचेली । भोगवतिगोत्रा । गौरिमतिमता । भोगवतिहता । नाम्नीति किम् ? भोगवतितरा । भोगवत्तरा । भोगवतीतरा ॥ **नवैकस्वराणाम्** ॥ ३ । २ । ६६ ॥ ङ्यन्तानां तरादिषु ब्रुवादिषूत्तरपदेषु च स्त्र्येकार्थेषु ह्रस्वः । स्त्रितरा । स्त्रीतरा । एकस्वराणामिति किम् ? कुटीतरा । ङ्य इत्येव । श्रीतरा । नित्यदितामनेकस्वराणामपीच्छन्त्येके । तन्मते आमलकितरेत्याद्यपि ॥ **ऊङः** ॥ ३ । २ । ६७ ॥ तरादिषु ब्रुवादिषूत्तरपदेषु च स्त्र्येकार्थेषु वा ह्रस्वः । ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरा ॥ **हविष्यष्टनः कपाले** ॥ ३ । २ । ७३ ॥ उत्तरपदे दीर्घः । अष्टाकपालं हविः । हविषीति किम् । अष्टकपालम् । कपाल इति किम् । अष्टपात्रं हविः । **गवि युक्ते** ॥ ३ । २ । ७४ ॥ अष्टन उत्तरपदे दीर्घः ॥ अष्टागवं शकटम् । अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहौ उत्तरपदे द्वयोर्द्विगुः । तत्र दीर्घत्वेनैव युक्तार्थप्रतीतेर्गतार्थत्वाद्युक्तशब्दनिवृत्तिः ॥ अथवा समाहारद्विगुः । तद्युक्तं शकटमष्टागवं साहचर्यादुपचारात् । युक्त इति किम् ? अष्टगवम् ॥ **नाम्नि** ॥ ३ । २ । ७५ ॥ अष्टन उत्तरपदे दीर्घः । अष्टापदः कैलासः । नाम्नीति किम् ? अष्टदण्डः ॥ **कोटरामिश्रकासिध्रकपुरगसारिकस्य वणे** ॥ ३ । २ । ७६ ॥ उत्तरपदे दीर्घो नाम्नि ॥ कोटरावणम् । एवं मिश्रकादीनां पूर्वपदस्थादित्येव णत्वे सिद्धे कृतणत्वस्य वनशब्दस्य निर्देशो णत्वमात्वसन्नियोगे एवेति नियमार्थः । तेन कुबेरवनम् ॥ **अञ्जनादीनां गिरौ** ॥ ३ । २ । ७७ ॥ उत्तरपदे दीर्घो नाम्नि । अञ्जनागिरिः । नाम्नीत्येव । अञ्जनस्य गिरिः अञ्जनगिरिः । बहुवचनमाकृतिगणार्थम् ॥ **ऋषौ विश्वस्य मित्रे** ॥ ३ । २ । ७९ ॥ उत्तरपदे नाम्नि दीर्घः ॥ विश्वामित्रो नाम ऋषिः ॥ **नरे** ॥ ३ । २ । ८० ॥ विश्वशब्दस्य उत्तरपदे नाम्नि दीर्घः ॥ विश्वानरो नाम कश्चित् । नाम्नीत्येव । विश्वनरो राजा ॥ **चितेः कचि** ॥ ३ । २ । ८३ ॥ दीर्घः । एकचितीकः ॥ **स्वामिचिह्नस्याविष्टाष्ट-**

पञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य कर्णे ॥ ३ । २ । ८४ ॥ उत्तरपदे दीर्घः ॥ दात्राकर्णः पशुः । स्वामिचिह्नस्येति किम् । लम्बकर्णः । विष्टादिवर्जनं किम् । विष्टकर्णः ॥ गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ ॥ ३ । २ । ८५ ॥ उत्तरपदे दीर्घः ॥ उपानत् । नीवृत् । प्रावृट् । श्वावित् । नीरुक् । ऋजीषट् । परीतत् । जलासट् । गतिकारकस्येति किम् । पटुरुक् । केचित्तु रुजाविच्छन्ति न रुचौ । तेन रुजिरुच्योर्मतभेदेन विकल्पः । अहिग्रहणादन्यत्र धातुग्रहणे तदादिविधिस्तेनायस्कृतम् ॥ घञ्युपसर्गस्य बहुलम् ॥ ३ । २ । ८६ ॥ उत्तरपदे दीर्घः । नीक्लेदः । क्वचिन्न । निषादः । क्वचिद्विकल्पः । प्रतीवेशः । प्रतिवेशः । प्रतीपादः २ । क्वचिद्विषयभेदेन । प्रासादो गृहम् । प्रसादोऽन्यः । उपसर्गस्येति किम् ? चन्दनसारः । घञीति किम् । अवसायः । बहुलवचनादनुपसर्गस्यापि अघञ्यपि च । दक्षिणापथः । क्वचिदनुत्तरपदेऽपि विकल्पः । पूरुषः । पुरुषः । काशशब्दे च घञन्ते विकल्पः । नीकाशः । निकाशः ॥ नामिनः काशे ॥ ३ । २ । ८७ ॥ उपसर्गस्याजन्ते उत्तरपदे दीर्घः । नीकाशः । वीकाशः । बहुलाधिकारान्निकाश इत्यपि । नामिन इति किम् । प्रकाशः ॥ दस्ति ॥ ३ । २ । ८८ ॥ नाम्यन्तस्योपसर्गस्य दीर्घः ॥ नीत्तम् । सूत्तम् । द इति किम् । वितीर्णम् । तीति किम् । सुदत्तम् । नामिन इत्येव । प्रत्तम् ॥ अपील्वादेर्वहे ॥ ३ । २ । ८९ ॥ नाम्यन्तस्य उत्तरपदे दीर्घः । ऋषीवहम् । घान्ते तु ऋषिवहः । अपील्वादेरिति किम् । पीलुवहम् ॥ शुनः ॥ ३ । २ । ९० ॥ उत्तरपदे दीर्घः । श्वादन्तः । बाहुलकात् क्वचिद्विकल्पः । श्वापुच्छम् । श्वपुच्छम् । क्वचिद्विषयान्तरे । श्वापदम् व्याघ्रादिः । शुनःपदं श्वपदम् । क्वचिन्न । श्वकल्पः । श्वमुखः ॥ एकादश षोडश षोडन् षोढा षड्ढा ॥ ३ । २ । ९१ ॥ द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक्शतादनशीतिबहुव्रीहौ ॥ ३ । २ । ९२ ॥ सङ्ख्यायामुत्तरपदे । द्वादश । त्रयोविंशतिः । अष्टात्रिंशत् । द्व्यनशीतीत्यादि किम् । त्र्यशीतिः । द्वित्राः । प्राक्शतादिति किम् । द्विशतम् ॥ चत्वारिंशदादौ वा ॥ ३ । २ । ९३ ॥ द्वित्र्यष्टानां प्राक्शतादुत्तरपदे द्वात्रयोऽष्टा इत्येते आदेशा वाऽनशीतिबहुव्रीहौ । द्वाचत्वारिंशत् । द्विचत्वा-

रिंशत् । त्रयश्चत्वारिंशत् । त्रिचत्वारिंशत् । अष्टाचत्वारिंशत् । अष्टचत्वारिंशत् । अनशीतिबहुव्रीहावित्येव । त्र्यशीतिः । पूर्वेण नित्यं प्राप्ते विकल्पार्थम् ॥ हृदयस्य हृल्लेखयदण्लासेषु ॥ ३ । २ । ९४ ॥ हृल्लासः । हृल्लेखः । अण्सन्निधानाल्लेखशब्दोऽणन्तो गृह्यते । तेन घञन्ते हृदयलेखः । हार्दम् । हृद्यः । अणीत्येव सिद्धे लेखग्रहणं ज्ञापकम् । उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न । तेन हृदयपरमलेखः । खित्यनव्ययस्येत्यादौ तु असम्भवात् तदन्तविधिः । हृदयशब्दपर्यायेण हृच्छब्देनैव सिद्धे हृदादेशविधानं लासादिषु हृदयशब्दप्रयोगनिवृत्त्यर्थम् । अन्यत्र तूभयम् । सौहार्द्यम् । सौहृद्यम् ॥ पदः पादस्याज्यातिगोपहतेषु ॥ ३ । २ । ९५ ॥ पदाजिः । पदातिः । अत एव निर्देशादजेर्वी न । पदगः । पदोपहतः । कथं दिग्धपादोपहत इति । उत्तरपदसन्निधापितेन पूर्वपदेन पादशब्दस्य विशेषणात् ॥ हिमकाषिहतिषु च ॥ ३ । २ । ९६ ॥ हिमादिषूत्तरपदेषु पादसम्बन्धिनि ये च पादस्य । पद्धिमम् । पद्धतिः । पत्काषी । पद्याः शर्कराः । कथं पाद्यम् । पाद्यार्घ्ये इति निपातनात् । पादसम्बन्धिनि य इति किम् । द्विगुसमाससम्बन्धिनि मा भूत् । द्विपाद्यम् । यद्वा प्राण्यङ्गवचनस्य पादशब्दस्यानुवर्त्तनात् । अन्ये तु गोपहतयोरपीच्छन्ति । पद्गः । पदुपहतः । हास्तिपद इति तु कौपिञ्जलहास्तिपदादणिति निर्देशात् ॥ ऋचः शे ॥ ३ । २ । ९७ ॥ पादस्य पत् । गायत्रीं पच्छः शंसति । ऋच इति किम् । पादशः श्लोकं वक्ति । द्विःशकारपाठात् ऋचः पादान् पश्येत्यत्र न ॥ शब्दनिष्कघोषमिश्रेषु वा ॥ ३ । २ । ९८ ॥ पादस्य पत् । पच्छब्दः । पादशब्दः । पन्निष्कः । पादनिष्कः । पद्घोषः । पादघोषः ॥ नस् नासिकायास्तःक्षुद्रेषु ॥ ३ । २ । ९९ ॥ नस्तः । नःक्षुद्रः ॥ उदकस्योदः पेषंवासवाहनधिषु ॥ ३ । २ । १०४ ॥ उदपेषं पिनष्टि । उदधिर्घटः । उदवासः । उदवाहनः । अनाम्न्यर्थं वचनम् । नाम्न्युत्तरेणैव सिद्धम् ॥ वैकव्यञ्जने पूर्ये ॥ ३ । २ । १०५ ॥ उत्तरपदे उदकस्योदः । उदकुम्भः । उदककुम्भः । व्यञ्जन इति किम् । उदकामत्रम् । एकेति किम् । उदकस्थालम् । पूर्य इति किम् ? उदकदेशः ॥ मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहे

वा ॥ ३ । २ । १०६ ॥ उदमन्थः । उदकमन्थः । इत्यादि । अपूर्यार्थो यत्नः ॥ नाम्न्युत्तरपदस्य च ॥ ३ । २ । १०७ ॥ उदकस्य पूर्वपदस्योदः । उदमेघः । उदधिः । लवणोदः । कालोदः ॥ ते लुग्वा ॥ ३ । २ । १०८ ॥ पूर्वोत्तरपदे नाम्नि । सत्यभामा । सत्या । भामा । शब्दशास्त्रेऽपि प्रकरणादेरर्थविशेषनिश्चयः ॥ द्व्यन्तरनवर्णोपसर्गादप ईप् ॥ ३ । २ । १०८ ॥ द्वीपम् । अन्तरीपम् । नीपम् । समीपम् । उपसर्गादिति किम् । स्वापः । अनवर्णेति किम् ? प्रापम् ॥ अनोर्देशे ऊप् ॥ ३ । २ । ११० ॥ अपः । अनूपो देशः । देश इति किम् । अन्वीपं वनम् । कथं कूपः सूपः यूपः । पृषोदरादित्वात् ॥ खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च ॥ ३ । २ । १११ ॥ स्वरस्योत्तरपदे । झंमन्यः । पुंवद्भावो ह्रस्वत्वेन परत्वाद् बाध्यते । कालिंमन्या । अरुंतुदः । खितीति किम् । झमानी । अनव्ययेति किम् । दोषामन्यमहः । अव्ययप्रतिषेधात् खिति तदन्तग्रहणम् । अरुर्ग्रहणादनव्ययस्य व्यञ्जनान्तस्य न गीर्मन्यः । कृद्ग्रहणे गतिकारकस्यापि ग्रहणात् कूलमुद्रुजः ॥ सत्यागदास्तोः कारे ॥ ३ । २ । ११२ ॥ मोन्तः । सत्यंकारः । अगदंकारः । अस्तुंकारः ॥ लोकम्पृणमध्यन्दिनानभ्याशमित्यम् ॥ ३ । २ । ११३ ॥ एते कृतपूर्वपदमान्ता निपात्यन्ते । अन्ये तु प्रीणातेर्णिगन्तस्याचि ह्रस्वत्वं निपात्य लोकंप्रिण इत्युदाहरन्ति । कश्चित्त्वकृतह्रस्वमेव मन्यते लोकंप्रीण इति ॥ भ्राष्ट्राग्नेरिन्धे ॥ ३ । २ । ११४ ॥ मोऽन्तः ॥ भ्राष्ट्रमिन्धः । अग्निमिन्धः ॥ अगिलाद्गिलगिलगिलयोः ३ । २ । ११५ ॥ मोन्तः । तिमिङ्गिलः । तिमिङ्गिलगिलः । अगिलादिति पर्युदासाद् व्यञ्जनान्ताच्च । धूर्गिलः । अगिलादिति किम् । तिमिङ्गिलगिलः । अगिलादिति तु निषेधो गिलान्तस्यापि निवृत्त्यर्थः ॥ भद्रोष्णात् करणे ॥ ३ । २ । ११६ ॥ मोन्तः । भद्रंकरणम् । उष्णंकरणम् ॥ नवाऽखित्कृदन्ते रात्रेः ॥ ३ । २ । ११७ ॥ मोऽन्तः । रात्रिंचरः । रात्रिचरः । रात्रिंकरणम् । रात्रिकरणम् । खिद्वर्जनं किम् । रात्रिम्मन्यमहः । कृदन्तेति किम् । रात्रिसुखम् । अन्तेति किम् । रात्रयिता । इकमेवान्तग्रहणं ज्ञापकम् । इहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं न तदन्तस्य

। तेन कालासनेत्यत्र न तद्लक्षणम् । योगविभागात्तु तीर्थंकरः तीर्थंकर इत्यपि सिध्यति ॥ धेनोर्भव्यायाम् ॥ ३ । २ । ११८ ॥ मोऽन्तो वा । धेनुंभव्या । धेनुभव्या । केचित्तु नित्यमिच्छन्ति ॥ अषष्ठीतृतीयादन्याद्दोऽर्थे ॥ ३ । २ । ११९ ॥ वा । अन्यदर्थः । अन्यार्थः । षष्ठ्यादिवर्जनं किम्? । अन्यस्य अन्येन वा अर्थः अन्यार्थः ॥ आशीराशास्थितास्थोत्सुकोतिरागे ॥ ३ । २ । १२० ॥ वेति निवृत्तं पृथग्योगात् । अषष्ठ्यतृतीयादन्याद्दः । अन्यदाशीः । अन्यदाशा । अन्यदास्थितः । अन्यदास्था । अन्यदुत्सुकः अन्यदूतिः । अन्यद्रागः । अषष्ठीतृतीयादित्येव । अन्यस्यान्येन वाऽऽशीरन्याशीः ॥ ईयकारके ॥ ३ । २ । १२१ ॥ पृथग्योगादषष्ठीतृतीयादिति निवृत्तम् । अन्याद् दोन्तः । अन्यदीयः । अन्यत्कारकः ॥ नञत् ॥ ३ । २ । १२५ ॥ उत्तरपदे । अचौरः । नकारः किम् ? । पायनपुत्रः । उत्तरपदे किम् । न भुङ्क्ते ॥ त्यादौ क्षेपे ॥ ३ । २ । १२६ ॥ पदे नञत् । अपचसि त्वं जाल्म । त्यादौ किम् ? । न पाचको जाल्मः । क्षेपे किम् ?। न पचति चैत्रः । क्षेपे नञः श्रवणनिवृत्त्यर्थमनुत्तरपदार्थं च वचनम् ॥ नगोऽप्राणिनि वा ॥ ३ । २ । १२७ ॥ नगः । अगः । गिरिः । अप्राणिनि किम् । अगोऽयं शीतेन ॥ नखादयः ॥ ३ । २ । १२८ ॥ नखः । नभ्राट् । नवेदाः । नासत्यौ । न न भ्राजते इति नभ्राट् इति तु पृषोदरादित्वात् । एवं नपान्नपुंसकं नाचिकेत इत्यादयः । अत एव निपातनात् स्त्रीपुंसयोः पुंसकादेशः, कित् ज्ञापनार्थो जुहोत्यादौ, इत्यादि । बहुवचनादाकृतिगणोऽयम् । तेन नास्तिकः । नभ इत्यादि ॥ अन् स्वरे ॥ ३ । २ । १२९ ॥ नञ उत्तरपदे । अनन्तो जिनः । अनादिः । अन् इति स्वरूपनिर्देशाद् द्वित्वनलोपौ न ॥ कोः कत्तत्पुरुषे ॥ ३ । २ । १३० ॥ स्वरे । कदश्वः । तत्पुरुषे किम्? । कूष्ट्रो देशः । स्वर इत्येव । कुब्राह्मणः ॥ रथवदे ॥ ३।२।१३१ ॥ कोः कत् । कद्रथः । कद्वदः । तत्पुरुष एवेत्यन्ये । अन्यत्र कुरथो राजा ॥ तृणे जातौ ॥ ३ । २ । १३२ ॥ कोः कत् । कत्तृणा रोहिषाख्या तृणजातिः । जाताविति किम् । कुतृणानि ॥ कत्त्रिः ॥ ३ । २ । १३३ ॥ कोः त्रिभो वा । कत्त्रयः । त्रिभो नेच्छन्त्यन्ये ॥ किंचित् ।

मानिष्येव सिद्धे कवीति करणं किमोऽपि परिग्रहार्थमिति न्यासः ॥ काक्षपथोः ॥ ३ । २ । १३४ ॥ काक्षः । काप-
थम् । अनीषदर्थार्थं वचनम् ॥ साक्षोऽपि भवति । पथीति निर्देशादव्युत्पन्नपथशब्दे न । कुपथः ॥ पुरुषे वा ॥ ३ । २
। १३५ ॥ कोः का । कापुरुषः । कुपुरुषः । अनीषदर्थे इदम् । ईषदर्थे तु परत्वान्नित्यमेव । तथापि विकल्प एवेति क-
श्चित् ॥ अल्पे ॥ ३ । २ । १३६ ॥ कोरुत्तरपदे का । कामधुरम् । स्वरादावपि परत्वादीषदर्थे कादेश एव । काम्लम्
॥ काकवौ वोष्णे ॥ ३ । २ । १३७ ॥ कोः । कोष्णम् । कवोष्णम् । पक्षे । यथाप्राप्तम् । कदुष्णम् । बहुव्रीहौ तु
कूष्णो देशः । अभ्यस्तत्वादावपीच्छति । काग्निः । कवाग्निः । कदग्निः ॥ कृत्येऽवश्यमो लुक् ॥ ३ । २ । १३८ ॥ अव-
श्यकार्यम् । कृत्य इति किम् । अवश्यं लावकः ॥ समस्ततहिते वा ॥ ३ । २ । १३९ ॥ लुक् । सततम् । सन्ततम् ।
सहितम् । संहितम् ॥ तुमश्च मनःकामे ॥ ३ ।२ । १४०॥ समश्च लुक् । भोक्तुमनाः । गन्तुकामः । समनाः । सकामः
। सहशब्देनापि सिद्धौ समः श्रुतिनिवृत्त्यर्थं वचनम् ॥ मांसस्यानड्घञि पचि नवा ॥ ३ । २ । १४१ ॥ लुक् ।
मांस्पचनम् । मांसपचनम् । मांस्पाकः । मांसपाकः । अनड्घञीति किम् । मांसपक्तिः ॥ दिक्शब्दात् तीरस्य तारः
॥३।२।१४२॥ वा ॥ दक्षिणतारम् । दक्षिणतीरम् ॥ सहस्य सोऽन्यार्थे ॥३ । २ । १४३॥ उत्तरपदे वा ॥ पुत्रेण सह
सपुत्रः । सहपुत्रः । अन्यार्थे किम् । सहजः । सहकृत्वप्रियः । प्रियसहकृत्वा इत्यत्र बहुव्रीहौ यदुत्तरपदं तस्मिन् परे
विधानात् सादेशो न ॥ नाम्नि ॥ ३ । २ । १४४ ॥ योगारम्भाद्वेति निवृत्तम् ॥ अन्यार्थे उत्तरपदे सहस्य सः । सा-
श्वत्थं वनम् । अन्यार्थ इत्येव । सहदेवः ॥ अदृश्याधिके ॥ ३ । २ । १४५ ॥ उत्तरपदेऽन्यार्थे सहस्य सः । साग्निः
कपोतः । सद्रोणा खारी । नित्यार्थमिदम् ॥ ग्रन्थान्ते ॥ ३ । २ । १४७ ॥ उत्तरपदेऽव्ययीभावे सहस्य सः । सकलं
ज्योतिषमधीते । कलादिशब्दाः सहचाराद्ग्रन्थवाचिनः । कालार्थमिदम् ॥ नाशिष्यगोवत्सहले ॥ ३ । २ । १४८ ॥
उत्तरपदे सहस्य सः । स्वस्ति गुरवे सहशिष्याय । भद्रं सहसखायाचार्याय । आशिषि किम् । सपुत्रः । गवादिवर्जनं

किम् । स्वस्ति तुभ्यं सगवे २ । सवत्साय २ । सहलाय २ ॥ समानस्य धर्मादिषु ॥ ३ । २ । १४९ ॥ उत्तरपदेषु सः ॥ सधर्मा । सनामा । बहुवचनादाकृतिगणोऽयम् । अन्ये तु धर्मादिषु वचनान्तेषु नवसु विकल्पमिच्छन्ति । अपरे तु नामादिषु द्वादशस्वेव नित्यमिच्छन्ति । अन्ये तु नैवेच्छन्ति । सधर्मादिशब्दांस्तु सहशब्देन समानपर्यायेण साधयन्ति । समानशब्दप्रयोगे तु समानधर्मेत्याद्येवेति मन्यन्ते । सोदर्यसतीर्थ्यौ तु वक्ष्यमाणनिपातनात् ॥ सब्रह्मचारी ॥ ३ । २ । १५० ॥ निपात्यते । समानो ब्रह्मचारी समाने ब्रह्मणि व्रतं चरति वा सब्रह्मचारी । निपातनाद् व्रतशब्दस्यापि लोपः ॥ दृग्दृशदृक्षे ॥ ॥ ३ । २ । १५१ ॥ उत्तरपदे समानस्य सः ॥ सदृक् । सदृशः । सदृक्षः । दृशदृक्षसाहचर्यात् टक्सक्सहचरितक्विबन्तस्यैव दृशो ग्रहणादिह न । समाना दृक् समानदृक् ॥ अन्यत्यदादेराः ॥ ३ । २ । १५२ ॥ दृग्दृशदृक्षेषूत्तरपदेषु । अन्यादृग् । अन्यादृशः । अन्यादृक्षः । त्यादृक् । त्यादृशः । त्यादृक्षः ॥ " यत्तदेतदो डावादिः " इति डावतौ यावान् तावान् एतावान् भविष्यति ॥ इदंकिमीत्की ॥ ३ । २ । १५३ ॥ दृगादावुत्तरपदे । ईदृक् । कीदृक् । " इदं किमोऽतुरिय् किय् चास्य " इति इयान्, कियान्, इति भविष्यति ॥ पृषोदरादयः ॥ ३ । २ । १५५ ॥ निपात्यन्ते । पृषोदरम् । बलाहकः । शकन्धुः । कर्कन्धुः । कुलटा इत्यादि । बहुवचनमाकृतिगणार्थम् । "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥१॥" ॥ वावाप्योस्तनिक्रीधाग्नहोर्वपी ॥ ३ । २ । १५६ ॥ यथासङ्ख्यम् । वतंसः । अवतंसः । वक्रयः । अवक्रयः । पिधानम् । अपिधानम् । पिनद्धम् । अपिनद्धम् । धातुनियमं नेच्छन्त्येके । पृषोदरादिप्रपञ्च एषः । तेन शिष्टप्रयोगोऽनुसरणीयः ॥ समासेऽग्नेः स्तुतः ॥ २ । ३ । १६ ॥ सस्य षः । अग्निष्टुत् ॥ ज्योतिरायुर्भ्यां च स्तोमस्य ॥ २ । ३ । १७ ॥ अग्नेश्च परस्य सस्य षः समासे । ज्योतिःष्टोमः । आयुःष्टोमः । अग्निष्टोमः ॥ निनद्याः स्नातेः कौशले ॥ २ । ३ । २० ॥ समासे सस्य षः । निष्णः । निष्णातः । नदीष्णः । नदीष्णातः । नद्याः स्नातस्य नेच्छन्त्येके । कौशले किम् । नि-

ष्णातः । नदीष्णः ॥ प्रतेः स्नातस्य सूत्रे ॥ २ । ३ । २१ ॥ सस्य षः समासे । प्रतिष्णातं सूत्रम् ॥ स्नानस्य नाम्नि ॥ २ । ३ । २२ ॥ प्रतेः सस्य षः समासे सूत्रे । प्रतिष्णानं सूत्रम् । नाम्नि किम् । प्रतिस्नानमन्यत् ॥ वेः स्त्रः ॥ २ । ३ । २३ ॥ सस्य षः समासे नाम्नि । विष्टरो वृक्षः । नाम्नीत्येव । विस्तरो वचसाम् ॥ अभिनिष्टानः ॥ २ । ३ । २४ ॥ निपात्यते नाम्नि ॥ अभिनिष्टानो वर्णः । विसर्गस्यैषा संज्ञा । वर्णमात्रस्येत्यन्ये । नाम्नीत्येव । अभिनिस्तानो मृदङ्गः ॥ गवियुधेः स्थिरस्य ॥ २ । ३ । २५ ॥ सस्य षः समासे नाम्नि । गविष्ठिरः । युधिष्ठिरः ॥ एत्यकः ॥ २ । ३ । २६ ॥ नाम्यन्तस्थाकवर्गात्सस्य षः समासे नाम्नि ॥ हरिषेणः । एति किम् । हरिसिंहः । नाम्नीत्येव । पृथुसेनः । अकः किम् । विष्वक्सेनः ॥ भादितो वा ॥ २ । ३ । २७ ॥ सस्य षः समासे नाम्नि एकारे ॥ रोहिणिषेणः । रोहिणिसेनः । इतः किम् । पुनर्वसुषेणः ॥ विकुशमिपरेः स्थलस्य ॥ २ । ३ । २८ ॥ सस्य षः समासे । नाम्नीति निवृत्तम् । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । ह्रस्वशमीशब्दनिर्देशाद्दीर्घान्तान्न । शमीस्थलम् । दीर्घादप्येके । परिष्ठलम् । एभ्य इति किम् । भूमिस्थलम् ॥ कपेर्गोत्रे ॥ २ । ३ । २९ ॥ स्थलस्य सस्य समासे षः ॥ कपिष्ठलो नाम गोत्रस्य प्रवर्त्तयिता । गोत्रमिह लौकिकं गृह्यते । लोके चाद्यपुरुषा येऽपत्यसन्ततेः प्रवर्त्तयितारो यन्नाम्नाऽपत्यसन्ततिर्व्यपदिश्यते तेऽभिधीयन्ते । गोत्रे किम् । कपीनां स्थलं कपिस्थलम् ॥ गोऽम्बाम्बसव्यापद्वित्रिभूम्यग्निशेकुशङ्कुकङ्गुमञ्जिपुञ्जिबर्हिःपरमेदिवेः स्थस्य ॥ २ । ३ । ३० ॥ सस्य षः समासे । गोष्ठम् । अम्बाष्ठः । ङ्यापो बहुलं नाम्नीति ह्रस्वत्वे अम्बष्ठः, श्लिष्टनिर्देशादुभाभ्यामपि । आम्बष्ठः । सव्यष्ठः इत्यादि । परमेष्ठः दिविष्ठः इत्यत्र अत एव निपातनात् सप्तम्या अलुप् ॥ तत्पुरुषे कृतीति तु नेनसिद्धस्थेति प्रतिषेधान्नोपतिष्ठते ॥ निर्दुःसोः सेधसन्धिसाम्नाम् ॥ २ । ३ । ३१ ॥ सस्य षः समासे । निषेधः । दुःषेधः । सुषेधः । इत्यादि ॥ प्रष्ठोऽग्रगे ॥ २ । ३ । ३२ ॥ निपात्यते । प्रष्ठः । प्रस्थोऽन्यः । भीरुष्ठानादयः ॥ २ । ३ । ३३

॥ भीरुष्ठानम् । अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । समास इत्येव । भीरोः स्थानमित्यादि । बहुवचनमाकृतिगणार्थम् ॥ निष्प्राग्रेऽन्तः खदिरकार्श्यांम्रशरेक्षुप्लक्षपीयूक्षाभ्यो वनस्य ॥ २ । ३ । ६६ ॥ नस्य णः ॥ निर्वणम् । प्रवणम् । इत्यादि ॥ कार्श्यवणमित्यत्र वचनसामर्थ्याद्ककारव्यवधानेऽपि णत्वम् । बहुवचनं व्याप्त्यर्थम् । तेन संज्ञायामसंज्ञायां च भवति । अन्यथा कोटरमिश्रकसिध्रकेसादिनियमबलेन संज्ञायां न स्यात् ॥ द्वित्रिस्वरौषधिवृक्षेभ्यो नवाऽनिरिकादिभ्यः ॥ २ । ३ । ६७ ॥ वनस्य नस्य णः । दूर्वावणम् । दूर्वावनम् । नीवारवणम् । नीवारवनम् । शिग्रुवणम् । शिग्रुवनम् । शिरीषवणम् । शिरीषवनम् । "ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः॥ फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः॥१॥" इति यद्यपि भेदोऽस्ति तथाऽप्यतिबहुलार्थबहुवचनबलाद् वृक्षग्रहणे वनस्पतीनामपि ग्रहणम् अत एव यथासंख्यमपि न । तथा संज्ञायामसंज्ञायां च भवति । द्वित्रिस्वरेति किम् । देवदारुवनम् । ओषधिवृक्षेभ्य इति किम् । विदारीवनम् । अनिरिकादिभ्य इति किम् । इरिकावनम् । मिरिकावनम् । इत्यादि । इरिकादिराकृतिगणः । इरिकादिवर्जनाद्विशेषाणामेव विधिः, तेनेह न । द्रुमवनम् ॥ गिरिनद्यादीनाम् ॥ २ । ३ । ६८ ॥ नस्य णो वा ॥ गिरिणदी । गिरिनदी । गिरिणखः । गिरिनखः । इत्यादि, बहुवचनाद्यथादर्शनमन्यत्रापि ॥ पानस्य भावकरणे ॥ २ । ३ । ६९ ॥ पूर्वपदस्थेभ्यो रषृवर्णेभ्यः परस्य नस्य णो वा ॥ क्षीरपाणम् । क्षीरपानं भाजनम् । भावकरण इति किम् । क्षीरपानो घोषः ॥ देशे ॥ २ । ३ । ७० ॥ पूर्वपदस्थाद्रषृवर्णात् पानस्य नस्य नित्यं णः । क्षीरपाणा उशीनराः तात्स्थ्यान्मनुष्याभिधानेऽपि देशो गम्यते । देश इति किम् । क्षीरपाना गोपालकाः ॥ योगविभागान्नित्यम् ॥ ग्रामाग्रान्नियः ॥ २ । ३ । ७१ ॥ नस्य णः । ग्रामणीः । अग्रणीः ॥ वाह्याद्वाहनस्य ॥ २ । ३ । ७२ ॥ वोढव्यं वाह्यम् । तदर्थवाचिनो रेफादिमतः पूर्वपदाद्वाहनस्य नस्य णः । इक्षुवाहणम् । उह्यतेऽनेनेति वहनम् । तस्मात् स्वार्थिकः प्रज्ञाद्यण्, अतो वा निपातनाद्धुपान्त्यदीर्घत्वम् । वाह्यादिति किम् । सुरवाहनम् । नरवाहनम् ॥ अतोऽह्नस्य ॥ २ । ३ ।

७६ ॥ रेफादिमतः पूर्वपदात्परस्य णः । पूर्वाह्णः । अत इति किम् । निरह्नः । अह्न इत्यकारान्तनिर्देशादिह न । दीर्घाह्नी शरत् ॥ वोत्तरपदान्तनस्यादेरयुवपक्वाह्नः ॥ २ । ३ । ७८ ॥ पूर्वपदस्थाद्रषृवर्णात्परस्य णः । व्रीहिवापिणौ । व्रीहिवापिनौ । व्रीहिवापाणि । व्रीहिवापानि कुलानि । माहिष्वण् । माहिन्वन् । बहुलवचनादनाम्न्यपि समासः । समासे हि पूर्वोत्तरपदव्यवहारः । पुरुषवारिणी इत्यत्र तु परमपि विकल्पं बाधित्वाऽन्तरङ्गत्वान्नित्यं णत्वम् । व्रीहिवापेण । व्रीहीवापेन । अनन्त्यस्येत्यधिकाराच्च, माषवापान् । उत्तरपदेति किम् । गर्गभगिणी । अन्तेति किम् । गर्गभगिनी । नेह नकारोऽन्तः किन्तु ङीप्रत्ययः । न चैवं माषवापिणीत्यत्र विकल्पो न प्राप्नोति नस्योत्तरपदन्त्वाभावादिति वाच्यम् । गतिकारकोपपदानामिति न्यायेन ङीप्रत्ययात्प्रागेव समासात् । विभक्त्यन्तत्वाभावेऽपि रूढत्वादुत्तरपदत्वम् । अयुवपक्वाह्न इति किम् । आर्ययूना । प्रपक्वेन । दीर्घाह्नी शरत् । अलचटतवर्गशसान्तर इत्येव । गर्दभवाहिनी ॥ येदूतोऽनव्ययस्त्वदीघ्ङीयुवः पदे ॥ २ । ४ । ९८ ॥ ह्रस्व उत्तरपदे । लक्ष्मिपुत्रः । लक्ष्मीपुत्रः । ब्रह्मबन्धुपुत्रः २ । ईदूत इति किम् । खट्वापादः । अव्ययादिवर्जनं किम् । काण्डीभूतम् । श्वकहूपुत्रः । कारीषगन्धीपुत्रः । गार्गीपुत्रः । श्रीकुलम् । भ्रूकुलम् ॥ ङ्यापो बहुलं नाम्नि ॥ २ । ४ । ९९ ॥ उत्तरपदे ह्रस्वः ॥ भरणिगुप्तः । शिलवहम् । क्वचिद्विकल्पः । रेवतिमित्रः । रेवतीमित्रः । क्वचिन्न, नान्दीमुखम् । फल्गुनीमित्रः ॥ त्वे ॥ २ । ४ । १०० ॥ ङ्याबन्तस्य बहुलं ह्रस्वः । रोहिणित्वम् । रोहिणीत्वम् । अजत्वम् । अजात्वम् ॥ भ्रुवोऽच्च कुंसकुट्योः ॥ २ । ४ । १०१ ॥ ह्रस्व उत्तरपदयोः । भ्रुकुंसः । भ्रकुंसः । भ्रुकुटिः । भ्रकुटिः । भ्रूकुंसभ्रूकुटिशब्दावपीच्छन्त्यन्ये ॥ मालेषीकेष्टकस्यान्तेऽपि भारितूलचिते ॥ २ । ४ । १०२ ॥ उत्तरपदे ह्रस्वः । मालभारी । उत्पलमालभारी । मालभारिणी । इषीकतूलम् । मुञ्जेषीकतूलम् । इष्टकचितम् । पक्वेष्टकचितम् । इदमेवान्तग्रहणं ज्ञापकम् । ग्रहणवता नाम्ना न तदन्तविधिरिति । तेन दिग्धपादोपहतः सौत्रनाडिरित्यादि सिद्धम् ॥ गोण्या मेये ॥ २ । ४ । १०३ ॥ ह्रस्वः । गोण्या मिता गोणिः । अस्य मानवाचित्वेऽ-

पि उपचारान्मेये वृत्तिः । मेय इति किम् । गौणी । इति समासाश्रयविधयः ॥

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधायिनी वृत्तिः । विग्रहो वृत्त्यर्थप्रतिपादकं वाक्यम् । स च लौकिकोऽलौकिकश्चेति द्विधा । लौकिको यथा, राज्ञः पुरुष इति । अयं साधुः परिनिष्ठितत्वात् । अलौकिकः, राजन् अस् पुरुष स् इति । अयञ्च प्रयोगानर्हत्वादसाधुः । समासः कश्चिन्नित्यः कश्चिद्वैकल्पिकश्च । अविग्रहः स्वघटकयावत्पदाघटितविग्रहो वा नित्यसमासः । यथा उन्मत्तगङ्गम् । हरौ इति अधिहरि । इत्यादि । तदितरो वैकल्पिकः । यथा राज्ञः पुरुषः, राजपुरुष इत्यादि । समासश्चतुर्द्धेति तु प्रायोवादः । बहुव्रीह्यव्ययीभावतत्पुरुषद्वन्द्वाधिकारबहिर्भूतानामपि विस्पष्टपटुरित्यादीनां समासानां विधानात् । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । इत्यपि प्रवादः प्रायोऽभिप्राय एव । शाकमति उन्मत्तगङ्गमित्याद्यव्ययीभावे निष्कौशाम्बिरित्यादौ तत्पुरुषे त्रिचतुरा इत्यादिबहुव्रीहौ पाणिपादमित्यादिद्वन्द्वे च तत्त्वाभावात् । किन्तु वक्ष्यमाणरीत्या षड्विधाः समासाः । स्याद्यन्तस्य स्याद्यन्तेन, राजपुरुषः । त्याद्यन्तेन, अनुव्यचलत् । नाम्ना, कुम्भकारः । धातुना, अजस्रम् । त्याद्यन्तस्य त्याद्यन्तेन अश्नीतपिबता । स्याद्यन्तेन, कुरुकुटः । तत्पुरुषविशेषः कर्मधारयः । तद्विशेषो द्विगुः । अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव । तत्पुरुषस्य कचिदेव । बहुव्रीहिर्द्विविधः । तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च । अवयवार्थः क्रियान्वयी यस्य स आद्यः । यथा, लम्बकर्ण आगच्छतीति । तदितरो द्वितीयः, यथा, दृष्टसागरः । नात्रावयवार्थस्य क्रियान्वयित्वम् ॥ इति सर्वसमासशेषः ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धि-
चन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छा-
चार्यश्रीविजयनेमिसूरिविरचितायां हेमप्रभायां समासप्रकरणम् ॥

## ॥ अथ तद्धिताः ॥

तद्धितोऽणादिः ॥ ६ । १ । १ ॥ वक्ष्यमाणाः । औपगवः ॥ वाऽऽद्यात् ॥ ६ । १ । ११ ॥ पदद्वयमधिधिकृतं स्यात् । तेन पक्षे वाक्यं समासश्च । सूत्रादौ च निर्दिष्टात्प्रत्ययः ॥ प्राग्जितादण् ॥ ६ । १ । १२ ॥ पादत्रयं यावत् येऽर्थास्तेषु वा । औपगवः । माञ्जिष्ठम् ॥ वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ॥ ७ । ४ । १ ॥ प्रकृतेः । दाक्षिः । भार्गवः ॥ धनादेः पत्युः ॥ ६ । १ । १४ ॥ प्राग्जितीयेऽर्थेऽण् ॥ अवर्णेवर्णस्य ॥ ७ । ४ । ६८ ॥ अपदस्य तद्धिते लुक् ॥ धानपतः । आश्वपतः ॥ अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः ॥ ६ । १ । १५ ॥ प्राग्जितीयेऽर्थेऽपत्याद्यर्थे । दैत्यः । आदित्यः । आदित्य्यः । याम्यः । प्राजापत्यः । अणपवादे च, आदित्यः । अत्र परत्वात् इञ् स्यात् । ञ्योहि प्राग्जितीयमणं बाधित्वा सावकाश इत्यणपवादग्रहणम् । अण्ग्रहणं किम् । वास्तोष्पत्यमभार्यः । असत्यण्ग्रहणे स्वापवादविषयेऽप्यस्य समावेशे वास्तोष्पत्याभार्य इति स्यात् । अनिदमीति किम् । आदितीयम् ॥ बहिषष्टीकण् च ॥ ६ । १ । १६ ॥ ञ्यः प्राग्जितीयेऽर्थे ॥ प्रायोऽव्ययस्य ॥ ७ । ४ । ६५ ॥ तद्धितेऽपदस्यान्त्यस्वरादेर्लुक् । बाहीकः । बाह्यः ॥ कल्यग्नेरेयण् ॥ ६ । १ । १७ ॥ प्राग्जितीयेऽर्थेऽनिदम्यणपवादे च । कालेयम् । आग्नेयम् । अणपवादे च कालेयम् । आग्नेयम्, अत्र रूप्यमयटौ स्याताम् ॥ पृथिव्या ञाञ् ॥ ६ । १ । १८ ॥ पार्थिवः । पार्थिवा । पार्थिवी । अणपवादे च पार्थिवः । अत्रैण् स्यात् ॥ उत्सादेरञ् ॥ ६ । १ । १९ ॥ औत्सम् । औदपानम् । अणपवादे च उत्सस्यापत्यम् औत्सः इत्यादौ इञेयणकञ् च स्युः ॥ बष्कयादसमासे ॥ ६ । १ । २० ॥ अञ् । बाष्कयः । असमास इति किम् । सौबष्कयिः अत्र ॥ देवाद्यञ् च ॥ ६ । १ । २१ ॥ अञ् । दैव्यम् । दैवम् ॥ अः स्थाम्नः ॥ ६ । १ । २२ ॥ अश्वत्थामः ॥ इत्यपत्यादिप्राग्जितीयार्थसाधारणाः प्रत्ययाः ॥ द्वि-

गोरनपत्ये यस्वरादेर्लुग्वृद्धिः ॥ ६ । १ । २४ ॥ प्राग्जितीयेऽर्थे भूतस्य प्रत्ययस्य । द्विरथः । पञ्चकपालः । अनपत्य इति किम् । द्वैमातुरः । अद्विरिति किम् । पाञ्चकपालम् ॥ प्राग्वतः स्त्रीपुंसाद् नञ्स्नञ् ॥ ६ । १ । २५ ॥ येऽर्थास्ते-ष्वनिदम्यणपवादे च । स्त्रैणम् । पौंस्नम् । प्राग्वत इति किम् ? स्त्रीवत् ॥ त्वे वा ॥ ६ । १ । २६ ॥ स्त्रीपुंसाभ्यां नञ्-स्नञौ । स्त्रैणम् । स्त्रीत्वम् । स्त्रीता । पौंस्नम् । पुंस्त्वम् । पुंस्ता ॥ गोः स्वरे यः ॥ ६ । १ । २७ ॥ गव्यम् । गव्यः । स्वर इति किम् । गोमयम् ॥ ङसोऽपत्ये ॥ ६ । १ । २८ ॥ यथाभिहितमणादयः ॥ अस्वयम्भुवोऽव् ॥ ७ । ४ । ७० ॥ उवर्णान्तस्यापदस्य तद्धिते ॥ औपगवः । अपत्य इत्यत्र लिङ्गसंख्यादि न विवक्षितम् । औपगवौ । औपगवी । तस्येदम्, इत्ये-वाणादिसिद्धौ अपत्यविवक्षायां तदपवादबाधनार्थं वचनम् । भानोरपत्यं भानवः । कम्बल उपगोः अपत्यं चैत्रस्येत्यत्र तु असामर्थ्यान्न ॥ आद्यात् ॥ ६ । १ । २९ ॥ अपत्ये यस्तद्धितः स परमप्रकृतेरेव । पौत्राद्यपत्यं सर्वपूर्वजानामा परमप्रकृतेः पारंपर्येण संबन्धादपत्यं भवतीति अनन्तरवृद्धयुवभ्योऽपि प्रत्ययः प्राप्नोतीति नियमार्थ आरम्भः । उपगोरपत्यमनन्तरं वृद्धं वा औपगवः । तस्यापि औपगविः । औपगवेरपि औपगवः ॥ पौत्रादि वृद्धम् ॥ ६ । १ । २ ॥ परमप्रकृतेरपत्यम् । गार्ग्यः । पौत्रादीति किम् । गार्गिः ॥ वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री युवा ॥ ६ । १ । ३ ॥ वंश्यः पित्रादि-रात्मनः कारणम् । ज्यायान् भ्राता वयोधिक एकपितृक एकमातृको वा । गार्ग्यायणः । वंश्यज्यायोभ्रात्रोरिति किम् । अ-न्यस्मिन् जीवति गार्ग्यः । अस्त्रीति किम् । गार्गी ॥ सपिण्डे वयःस्थानाधिके जीवद्वा ॥ ६ । १ । ४ ॥ जीवति प्रपौत्राद्यस्त्री युवा । वयो यौवनादि । स्थानं पिता पुत्र इत्यादि । पितृव्ये पितामहस्य भ्रातरि वा वयोधिके जीवति जीवद्गार्ग्य-स्यापत्यं गार्ग्यः गार्ग्यायणो वा । अन्यत्र गार्ग्यः ॥ युववृद्धं कुत्सार्चे वा ॥ ६ । १ । ५ ॥ यथासंख्यं युवा । गार्ग्यः गा-र्ग्यायणो वा जाल्मः । अन्यत्र गार्ग्यायण एव । वृद्धमर्चितं गार्ग्यायणः गार्ग्यो वा । अन्यत्र गार्ग्य एव । अस्त्रीत्येव । स्त्री गार्गी ॥ वृद्धाद्यूनि ॥ ६ । १ ३० ॥ यून्यपत्ये विवक्षिते यःप्रत्ययः स आद्यात् वृद्धात् परमप्रकृतेर्यो वृद्धप्रत्ययस्तदन्ता-

द्भवति । आद्यात् इत्यस्यापवादः । गार्ग्यस्यापत्यं युवा गार्ग्यायणः । एवं दाक्षायणादिः । यूनीति किम् । गार्ग्यः । आद्या-दित्येव । औपगविः ॥ **अत इञ्** ॥ ६ । १ । ३१ ॥ ङसन्तादपत्ये । अणोऽपवादः । दाक्षिः । अत इति किम् । शौभंयः । कैलालपः । केचित्त्वाभ्यामणमपि नेच्छन्ति । ननु कथं प्रदीयतां दाशरथाय मैथिलीति । तस्येदमिति विवक्षायां भविष्यति ॥ **वहीनरस्यैत्** ॥ ७ । ४ । ४ ॥ ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य । वैहीनरिः ॥ **य्वः पदान्तात्प्रागैदौत्** ॥ ७ । ४ । ५ ॥ ञ्णिति तद्धिते इवर्णोवर्णयोस्तत्प्राप्तौ वृद्धिप्रसंगे तयोरेव स्थाने यौ य्वौ पदान्तौ ताभ्यां प्राग् यथासंख्यमैदौतौ स्याताम् । वैयसनम् । सौवश्विः । परत्वान्नित्यत्वाच्च वृद्धेः प्रागेव सर्वत्रानेनैदौतौ । य्व इति किम् । सौपर्णेयः । पदान्तादिति किम् । यत इमे याताः । तत्प्राप्तावित्येव । दाध्यश्विः । वृद्ध्यपवादश्चैदौदागमः । तेन पुंवद्भावप्रतिषेधो न । वैयाकरणभार्य्यः ॥ **द्वारादेः** ॥ ७ । ४ । ६ ॥ य्वयोस्समीपस्य स्वरेष्वादेस्स्वरस्य वृद्धिप्राप्तौ ताभ्यामेव प्रागैदौतौ ञ्णिति तद्धिते । दौवारिकः । श्वादेरितीति प्रतिषेधाद् द्वारादिपूर्वाणामपि । दौवारपालिः ॥ **न ऽस्वङ्गादेः** ॥ ७ । ४ । ९ ॥ ञ्णिति तद्धिते य्वः प्रागैदौतौ । व्यावक्रोशी । स्वाङ्गिः । व्याङ्गिः ॥ **श्वादेरिति** ॥ ७ । ४ । १० ॥ ञ्णिति तद्धिते वः प्रागौर्न । श्वाभस्त्रिः । इतीति किम् । शौवहानम् ॥ **इञः** ॥ ७ । ४ । ११ ॥ श्वादेर्वः प्रागौर्न ञ्णिति तद्धिते । श्वाभस्त्रम् ॥ **बाह्वादिभ्यो गोत्रे** ॥ ६ । १ । ३२ ॥ अपत्य इञ् । स्वापत्यसंतानस्य स्वव्यपदेशकारणमृषिरनृषिर्वा यः प्रथमस्तदपत्यं गोत्रम् । बाहविः । औपवाकविः । नैवाकविः । इतःप्रभृति गोत्र इत्यधिकारात् गोत्रे सम्भवति ततोऽन्यत्र प्रतिषेधः । **शीर्षः स्वरे तद्धिते** ॥ ३ । २ । १०३ ॥ शिरसः । हास्तिशीर्षिः । स्थौलशीर्षिः ॥ **वर्मणोऽचक्रात्** ॥ ६ । १ । ३३ ॥ अपत्ये इञ् । ऐन्द्रवर्मिः । अचक्रादिति किम् । चाक्रवर्मणः । अनो लोपे प्राप्ते ॥ **अणि** ॥ ७ । ४ । ५२ ॥ अन्नन्तस्यान्त्यस्वरादेर्लुग् न । इति निषेधः ॥ **संयोगादिनः** ॥ ७ । ४ । ५३ ॥ संयोगात्परो य इन् तदन्तस्यान्त्यस्वरादेरणि लुग् न । शांखिनः ॥ **गाथिविदथिकेशिपणिगणिनः** ॥ ७ । ४ । ५४ ॥ अण्यन्त्यस्वरादेर्लुग्न । गाथिनः ।

वैदथिनः। कैशिनः । पाणिनः । गाणिनः ॥ **अवर्मणो मनोऽपत्ये** ॥ ७ । ४ । ५९ ॥ अण्यन्त्यस्वरादेर्लुक्। सौषामः । अवर्मण इति किम् । चाक्रवर्मणः ॥ **हितनाम्नो वा** ॥ ७ । ४ । ६० ॥ अपत्यार्थेऽण्यन्त्यस्वरादेर्लुक् । हैतनामः । हैतनामनः । **षादिहन्धृतराज्ञोऽणि** ॥ २ । १ । ११० ॥ अतो लुक् । औक्ष्णः । भ्रौणघ्नः। वार्त्रघ्नः। धार्तराज्ञः। **लोम्नोऽपत्येषु** ॥ ६ । १ । २३ ॥ अः । उडुलोमाः । बहुवचननिर्देशात् एकस्मिन्नपत्ये द्वयोश्च बाह्वादित्वादिञेव । औडुलोमिः । औडुलोमी ॥ **अजादिभ्यो धेनोः** ॥ ६ । १ । ३४ ॥ अपत्ये इञ् । आजधेनविः । बाष्कधेनविः । अजादयः प्रयोगतोऽनुसर्तव्याः॥ **ब्राह्मणाद्वा** ॥६।१।३५॥ धेनोरपत्य इञ् । ब्राह्मणधेनविः। ब्राह्मणधेनवः॥ **भूयःसंभूयोऽम्भोमितौजसः स्लुक् च** ॥ ६ । १ । ३६ ॥ अपत्ये इञ् । भौयिः । सांभूयिः। आम्भिः। आमितौजिः। भूयसोनेच्छन्त्यन्ये। अकृतसोऽपीच्छन्त्येके ॥ **शालङ्क्यौदिषाडिवाड्वलि** ॥ ६ । १ । ३७ ॥ इञन्ता निपात्यन्ते । शालङ्किः । औदिः । षाडिः । वाड्वलिः । **व्यासवरुटसुधातृनिषादबिम्बचण्डालादन्त्यस्य चाक्** ॥ ६ । १ । ३८ ॥ अपत्ये इञ् तद्योगे एषाम् । वैयासकिः । वारुटकिः । सौधातकिः । नैषादकिः । वृद्धे तु परत्वाद्विदादिलक्षणोऽञ् । नैषादः । बैम्बकिः। चाण्डालकिः। कर्मारव्याघ्राग्निसर्पेभ्योऽपीच्छन्त्यन्ये ॥ **पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ्** ॥ ६ । १ । ३९ ॥ पौनर्भवः । पौत्रः । दौहित्रः । नानान्द्रः। अनन्तर इति किम्। वृद्धेऽञ् न भवति। अथो ञित्करणमुत्तरार्थम्। इह तु आञि अणि वा नास्ति विशेषः॥ **परस्त्रियाः परशुश्चासावर्ण्ये** ॥ ६ । १ । ४० ॥अनन्तरेऽञ्। पारशवः। असावर्ण्य इति किम् । पारस्त्रैणेयः ॥ **विदादेर्वृद्धे** ॥ ६ । १ । ४१ ॥ अञ् । बैदः ॥ और्वः। बैदौ । वृद्ध इति किम्। वैदिः। **यञञोऽश्यापर्णान्तगोपवनादेः** ॥ ६ । १ । १२६ ॥बहुगोत्रार्थस्य यः प्रत्ययस्तस्यास्त्रियां लुप् । गर्गाः। बिदाः। अश्यापर्णेत्यादि किम् । गौपवनाः ॥ **गर्गादेर्यञ्** ॥ ६ ॥ १ । ४२ ॥ वृद्धे । गार्ग्यः । वात्स्यः । गर्गाः। वत्साः । वृद्ध इत्येव । गार्गिः । गोत्र इत्येव। गर्गो नाम कश्चित् तस्यापत्यं वृद्धं गार्गिः । वैयाघ्रपद्यः । आवट्यः । कात्यः । पौतिमाष्यः । कौण्डिन्यः ॥ **जातिश्च णितद्धि-**

नामस्वरे ॥ ३ । २ । ५१ ॥ अन्या परतः स्त्री विषयभूते पुंवद्भावः । इति पुंवद्भावस्तु न । कौण्डिन्यागस्त्येति निर्देशेन तस्यानित्यत्वात् । विपयसप्तम्याश्रयणेन पट्व्या भावः पाटवम् ॥ कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च ॥ ६ । १ । १२७ ॥ बहुगोत्रार्थयोर्यञोऽणश्चास्त्रियां लुप् । कुण्डिनाः । अगस्तयः । प्रत्ययलुपं कृत्वादेशकरणमागस्तीयाः इत्येवमर्थम् । अस्त्रियामित्येव । कौण्डिन्यः । आगस्त्यः स्त्रियः । मधुबभ्रोर्ब्राह्मणकौशिके ॥ ६ । १ । ४३ ॥ वृद्धे यञ् । माधव्यो ब्राह्मणः । बाभ्रव्यः कौशिकः । अन्यत्र माधवः । बाभ्रवः । बभ्रोः कौशिके नियमार्थं वचनम् । गर्गादिपाठस्तु लोहितादिकार्यार्थः ॥ कपिबोधादाङ्गिरसे ॥ ६ । १ । ४४ ॥ वृद्धे यञ् । काप्यः आङ्गिरसः । एवं बौध्यः । अन्यः कापेयः । बौधिः । कपिशब्दस्य गर्गादिपाठेऽपि नियमार्थमिहोपादानम् । लोहितादिकार्यार्थो गणपाठः ॥ वतण्डात् ॥ ६ । १ । ४५ ॥ आङ्गिरसे वृद्धे यञेव । वातण्ड्यः आङ्गिरसः । अन्यत्र वातण्ड्यः । वातण्डः । शिवाद्यण्बाधनार्थं वचनम् । स्त्रियां लुप् ॥ ६ । १ । ४६ ॥ वतण्डादाङ्गिरसे यञः । वतण्डी । अन्यत्र शिवादिपाठाद् वातण्डी । लोहितादिपाठाद् वातण्ड्यायनी ॥ कुञ्जादेर्ञायन्यः ॥ ६ । १ । ४७ ॥ वृद्धे कौञ्जायन्यः । ब्राध्नायन्यः । वृद्ध इत्येव । कौञ्जिः ॥ स्त्रीबहुष्वायनञ् ॥ ६ । १ । ४८ ॥ कुञ्जादेर्बहुत्वविशिष्टे वृद्धे स्त्रियां वाऽबहुत्वेऽपि आयनञ् । कौञ्जायनी । ब्राध्नायनी । कौञ्जायनाः । ब्राध्नायनाः ॥ अश्वादेः ॥ ६ । १ । ४९ ॥ वृद्धे आयनञ् । आश्वायनः । शाङ्खायनः । गोत्र इत्येव । अश्वो नाम कश्चित् तस्यापत्यं वृद्धमाश्विः ॥ शपभरद्वाजादात्रेये ॥ ६ । १ । ५० ॥ वृद्धे आयनञ् । शापायनः । भारद्वाजायनः । अन्यत्र शापिः । भारद्वाजः । भर्गात्त्रैगर्ते ॥ ६ । १ । ५१ ॥ वृद्धे आयनञ् । भार्गायणस्त्रैगर्तः । अन्यो भार्गिः ॥ आत्रेयाद्भारद्वाजे ॥ ६ । १ । ५२ ॥ यून्यायनञ् । आत्रेयायणो भारद्वाजः । आत्रेयोऽन्यः । त्रिदार्भ्रादणिञोः ॥ ६ । १ । १४० ॥ त्रिदार्भ्रश्च योऽपत्यप्रत्ययस्तदन्तात्परस्य यून्यण इञश्च लुप् । इतीञो लुप् । तैकायनिः पिता । तैकायनिः पुत्रः । वासिष्ठः पिता । वासिष्ठः पुत्रः ॥ नडादिभ्य आयनण् ॥ ६ । १ । ५३ ॥

वृद्धे । नाडायनः । चारायणः । आमुष्यायणः ॥ दाण्डिहास्तिनोरायने ॥ ७ । ४ । ४९ ॥ अन्त्यस्वरादेर्लुग् न ॥ दाण्डिनायनः ॥ हास्तिनायनः। वृद्ध इत्येव । नाडिः॥ यञिञोः ॥ ६ । १ । ५४ ॥ वृद्धे यून्यायनण् । गार्ग्यायणः । दाक्षायणः ॥ हरितादेरञः ॥ ६ । १ । ५५ ॥ विदाद्यन्तर्गणो हरितादिः ॥ वृद्धे योऽञ् तदन्ताद्यून्यायनण् । हारितायनः । कैन्दासायनः॥ क्रोष्टुशलङ्कोर्लुक् च ॥ ६ । १ । ५६ ॥ वृद्धे आयनण् । क्रौष्टायनः । शालङ्कायनः॥ दर्भकृष्णाग्निशर्मरणाशरद्वच्छुनकादाग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्ये ॥६ । १ । ५७॥ वृद्धे यथासंख्यमायनण्। दार्भायण आग्रायणः । कार्ष्णायनो ब्राह्मणः । आग्निशर्मायणो वार्षगण्यः । राणायनो वाशिष्ठः । शारद्वतायनो भार्गवः । शौनकायनो वात्स्यः । अन्यत्र दार्भिरित्यादि ॥ जीवन्तपर्वताद्वा ॥ ६ । १ । ५८ ॥ वृद्धे आयनण् । जैवन्तायनः । जैवन्तिः। पार्वतायनः । पार्वतिः । वृद्ध इत्येव । जैवन्तिः ॥ द्रोणाद्वा ॥ ६ । १ । ५९ ॥ अपत्यमात्रे आयनण् । द्रौणायनः । द्रौणिः॥ शिवादेरण् ॥ ६ । १ । ६० ॥ अपत्ये । इञादेरपवादः । शैवः । प्रौष्ठः॥ ऋषिवृष्ण्यन्धककुरुभ्यः ॥ ६ । १ । ६१ ॥ अपत्येऽण् । वाशिष्ठः। वैश्वामित्रः । गौतमः । वासुदेवः । श्वाफल्कः । नाकुलः । दौर्य्योधनिस्तु क्रियाशब्दत्वात् । बाह्वादित्वाद्यौधिष्ठिरिः आर्जुनिः ॥ कन्यात्रिवेण्याः कनीनत्रिवणं च ॥ ६ । १ । ६२ ॥ अपत्येण् । कानीनः। त्रैवणः ॥ शुङ्गाभ्याम्भारद्वाजे ॥ ६ । १ । ६३ ॥ अपत्येऽण् । शौङ्गो भारद्वाजः । लिङ्गविशिष्टपरिभाषया सिद्धे एयण्बाधनार्थ-द्विवचनेन स्त्रीलिङ्गः शुङ्गाशब्द उपादीयते ॥ विकर्णच्छगलाद्वात्स्यात्रेये ॥६ । १ । ६४॥ अपत्येऽण् । वैकर्णः। छागलः॥ णश्च विश्रवसो विश्लुक् च वा ॥ ६। १ । ६५ ॥ अपत्येऽण् । वैश्रवणः। रावणः। आदेशार्थं वचनम् । एवमुत्तरत्र ॥ संख्यासंभद्रान्मातुर्मातुर् च ॥ ६ । १ । ६६ ॥ अपऽत्येण् । द्वैमातुरः । सांमातुरः । भाद्रमातुरः ॥ संबन्धिनां सम्बन्धे ॥ ७ । ४ । १२१ ॥ संबन्धिशब्दानां यत्कार्यमुक्तं तत्संबन्ध एव । इतिवचनाद्धान्यमातुर्न । तेन द्वैमातुः । शुभ्रादिपाठाद्वैमातेयः ॥ अदोर्नदीमानुषीनाम्नः ॥ ६ । १ । ६७ ॥ अपत्येऽण् । यामुनः मणेतः । दैवदत्तः। अदोरिति

किम् । सान्द्रभासेयः ॥ पीलासाल्वामण्डूकाद्वा ॥ ६ । १ । ६८ ॥ अपत्येऽण् । पैलः । पैलेयः । साल्वः । साल्वेयः । माण्डूकः । माण्डूकिः ॥ दितेश्चैयण् वा ॥६ । १ । ६९॥ मण्डूकादपत्येऽञ् । दैतेयः । दैत्यः । माण्डूकेयः। माण्डूकिः॥ ङ्याप्त्यूङः ॥ ६ । १ । ७० ॥ अपत्ये एयण् । सौपर्णेयः ॥ एयेऽग्नायी ॥ ३ । २ । ५२ ॥ तद्धिते परतः स्त्री पुंवत् । आग्नेयः। जातिश्च णितद्धितयस्वरे इति सिद्धे नियमार्थमिदम्। तेन यौवतेय इत्यादौ न पुंवत्॥ वैनतेयः। यौवतेयः॥ अकद्रूपाण्ड्वो-रुवर्णस्यैये ॥७ । ४ । ६९॥ तद्धिते लुक्। कामण्डलेयः । कद्रूपाण्ड्वोस्तु । काद्रवेयः। पाण्डवेयः॥ द्विस्वरादनद्याः ॥ ६ । १ । ७१ ॥ ङ्याप्त्यूङन्तादपत्ये एयण्। दात्तेयः । अनद्या इति किम् । सैप्रः ॥ इतोऽनिञः ॥ ६ । १ । ७२ ॥ द्विस्वरादपत्ये एयण् । नाभेयः । नैधेयः । अनिञ इति किम् । दाक्षायणः। द्विस्वरादित्येव । मारीचः ॥ शुभ्रादिभ्यः ॥ ६ । १ । ७३ ॥ अपत्येऽण्। शौभ्रेयः । वैष्टपुरेयः। गाङ्गेयः ॥ प्रवाहणस्यैये॥ ७ । ४ । २१ ॥ ञ्णिति तद्धिते स्वरेष्वादेर्वृद्धिः प्रस्यतु वा। प्रावाहणेयः। प्रवाहणेयः। उत्तरपदवृद्धेः प्रवाहणेयीभार्य्य इत्यत्र पुंवद्भावप्रतिषेधः प्रयोजनम् ॥ एयस्य ॥ ७ । ४ । २२॥ एयान्तांशात्मात्परस्य वाहनस्य ञ्णिति तद्धिते स्वरेष्वादेर्वृद्धिः प्रस्यतु वा । प्रावाहणेयिः। प्रवाहणेयिः ॥ एये जिह्माशिनः ॥७ । ४ । ४७॥ अन्त्यस्वरादेर्लुग्न । जैह्माशिनेयः ॥ श्यामलक्षणाद्वाशिष्ठे ॥६।१।७४॥ अपत्ये एयण्। श्यामेयो लाक्षणेयो वाशिष्ठः । अन्यत्र श्यामायनः लाक्षणिः । अवृद्धे तु श्यामिः॥ विकर्णकुषीतकात्काश्यपे ॥ ६ । १ । ७५॥ अपत्ये एयण् । वैकर्णेयः कौषीतकेयः काश्यपः । वैकर्णिः कौषीतकिरन्यः॥ भ्रुवो भ्रुव् च ॥ ६ । १ ७६ ॥ अपत्ये एयण्। भ्रौवेयः॥ कल्याण्यादेरिन् चान्तस्य॥ ६ । १ । ७७॥ अपत्ये एयण् । काल्याणिनेयः ॥ हृद्भगसिन्धोः॥ ७ । ४ । २५ ॥ हृदाद्यन्तानां पूर्वपदस्योत्तरपदस्य च स्वरेष्वादेर्वृद्धिर्ञ्णिति तद्धिते। सौहार्दम् । सौभागिनेयः । साक्तुसैन्धवः । बहुलाधिकारात् सौहृदं दौहृदमित्यपि ॥ अनुशतिकादीनाम् ॥ ७ । ४ । २७ ॥ ञ्णिति तद्धिते पूर्वोत्तरपदयोः स्वरेष्वादेः स्वरस्य वृद्धिः । पारस्त्रैणेयः ॥ कुलटाया वा ॥ ६ । १ । ७८ ॥ अपत्ये एयण् इन् चान्तस्य । आदेशार्थं वचनम्।

कौलटिनेयः । कौलटेयः ॥ **चटकाण्णैरः स्त्रियां तु लुप्** ॥ ६ । १ । ७९ ॥ अपत्ये । चाटकैरः । लिंगविशिष्टपरिभाषया चटकाया अपि चाटकैरः । स्त्रियां तु चटका । अस्त्रियामित्येव सिद्धे प्रत्ययान्तरबाधनार्थं णैरविधानम् ॥ **क्षुद्राभ्य एरण् वा** ॥ ६ । १ । ८० ॥ अपत्ये । अङ्गहीना अनियतपुंस्का वा स्त्रियः क्षुद्राः । काणेरः । काणेयः । दासेरः । दासेयः । नाटेरः । नाटेयः । बहुवचनं क्षुद्रार्थपरिग्रहार्थम् ॥ **गोधाया दुष्टे णारश्च** ॥ ६ । १ । ८१ ॥ अपत्ये एरण् । गौधारः । गौधेरः । योऽहिना गोधायां जन्यते । गौधेयोऽन्यः । शुभ्रादित्वादेयण् ॥ **जण्टपण्टात्** ॥ ६ । १ । ८२ ॥ अपत्ये णारः । जाण्टारः । पाण्टारः । केचित्तु पाण्डार इत्याद्यपीच्छन्ति ॥ **चतुष्पाद्भ्य एयञ्** ॥ ६ । १ । ८३ ॥ अपत्ये । कामण्डलेयः । सौरभेयः । **गृष्ट्यादेः** । ६ । १ । ८४ ॥ अपत्ये एयञ् । गार्ष्टेयः । हार्ष्टेयः । मित्रयोरपत्यमिति विग्रहे ऋष्यणि प्राप्ते एयञ् ॥ **केकयमित्रयुप्रलयस्य यादेरिय् च** ॥ ७ । ४ । २ ॥ ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः इतीयादेशे प्राप्ते ॥ **सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम्** ॥ ७ । ४ । ३० ॥ एते निपात्यन्ते । इति युलोपः । मैत्रेयः ॥ **यस्कादेर्गोत्रे** ॥ ६ । १ । १२५ ॥ यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यस्कादेर्यः प्रत्ययस्तस्यास्त्रियां लुप् । यस्काः । लह्याः । मित्रयवः । गोत्र इति किम् । यास्काश्छात्राः ॥ **वाडवेयो वृषे** ॥ ६ । १ । ८५ ॥ एयणेयञ् वा निपात्यते । वृषो यो गर्भे बीजं निषिञ्चति । वडवाया वृषो वाडवेयः । अपत्येऽणेव । वाडवः । एयञेयणोरुभयोरपि व्यवस्थापनार्थं निपातनम् । अन्यथाऽन्यतरोऽपत्ये प्रसज्येत ॥ **रेवत्यादेरिकण्** ॥ ६ । १ । ८६ ॥ अपत्ये । रैवतिकः । आश्वपालिकः ॥ **वृद्धस्त्रियाः क्षेपे णश्च** ॥ ६ । १ । ८७ ॥ अपत्ये इकण् । पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य क्षेपः ॥ **तद्धितय-स्वरेऽनाति** ॥ २ । ४ । ९२ ॥ व्यञ्जनात्परस्यापत्ययस्य तद्धिते लुक् । गार्गो गार्गिको वा जाल्मः । वृद्धेति किम् । कारिकेयो जाल्मः । स्त्रिया इति किम् । औपगविर्जाल्मः । क्षेप इति किम् । गार्गेयो माणवकः । मातुः संविज्ञानार्थमिदमुच्यते ॥ **भ्रातुर्व्यः** ॥ ६ । १ । ८८ ॥ अपत्ये । भ्रातृव्यः । शत्रुरपि उपचाराद्भ्रातृव्यः ॥ **ईयः स्वसुश्च** ॥ ६ । १ । ८९ ॥

भ्रातुरपत्ये । भ्रात्रीयः । स्वस्रीयः ॥ **मातृपित्रादेर्डेयणीयणौ** ॥ ६ । १ । ९० ॥ स्वसुरपत्ये । वचनभेदाच्च यथा-संख्यम् । मातृष्वसेयः । मातृष्वस्रीयः । पैतृष्वसेयः । पैतृष्वस्रीयः ॥ **श्वशुराद्यः** ॥ ६ । १ । ९१ ॥ अपत्ये । श्वशुर्यः । सम्बन्धिनां सम्बन्धे । स्वशुरो नाम कश्चित् तस्यापत्यं श्वाशुरिः ॥ **जातौ राज्ञः** ॥ ६ । १ । ९२ ॥ अपत्ये यः ॥ **अनोऽस्ये ये** ॥ ७ । ४ । ५१ ॥ अन्त्यस्वरादेर्लुग् न । राजन्यः क्षत्रियजातिश्चेत् । राजनोऽन्यः । अय इति किम् । राज्यम् ॥ **क्षत्रादियः** ॥६।१।९३॥ अपत्ये जातौ । क्षत्रियो जातिश्चेत् । क्षात्रिरन्यः॥ **मनोर्याणौ षश्चान्तः**॥६।१।९४॥ अपत्ये जातौ । मनुष्याः । मानुषाः । मानुषी । जातावित्येव । मानवाः ॥ **माणवः कुत्सायाम्** ॥ ६ । १ । ९५ ॥ मनुशब्दादौत्सर्गिकेऽण्प्रत्यये णत्वं निपात्यते । मनोरपत्यं कुत्सितं मूढं माणवः ॥ **कुलादीनः** ॥ ६ । १ । ९६ ॥ अपत्ये । कुलीनः । उत्तरसूत्रे समासे प्रतिषेधादिह कुलान्तः केवलश्च गृह्यते । बहुकुलीनः ॥ **यैयकञावसमासे वा** ॥ ६ । १ । ९७ ॥ कुलान्तात् कुलाच्चापत्ये । कुल्यः । कौलेयकः । कुलीनः । बहुकुल्यः । बाहुकुलेयकः । बहुकुलीनः । असमास इति किम् । आढ्यकुलीनः ॥ **दुष्कुलादेयण् वा** ॥ ६ । १ । ९८ ॥ अपत्ये । दौष्कुलेयः । दुष्कुलीनः ॥ **महाकुलाद्वाञीनञौ** ॥ ६ । १ । ९९ ॥ अपत्ये । माहाकुलः । माहाकुलीनः । महाकुलीनः ॥ **कुर्वादेर्ञ्यः** ॥ ६ । १ । १०० ॥ अपत्ये । कौरव्यः । शाङ्कव्यः । अक्षत्रियवचनस्येह कुरोर्ग्रहणम् । क्षत्रियवचनात्तु वक्ष्यमाणो द्रिसंज्ञको ञ्यः ॥ **सम्राजः क्षत्रिये** ॥६।१।१०१॥ अपत्ये ञ्यः । साम्राज्यः क्षत्रियश्चेत् । अन्यत्र साम्राजः । अन्ये साम्राजिरित्याहुः। तत्र सम्राट् बाह्वादिषु द्रष्टव्यः॥ **सेनान्तकारुलक्ष्मणादिञ् च** ॥ ६ । १ । १०२ ॥ ञ्योऽपत्ये । हारिषेणिः । हारिषेण्यः । तान्तुवायिः । तान्तुवाय्यः । लाक्ष्मणिः । लाक्ष्मण्यः ॥ **सुयाम्नः सौवीरेष्वायनिञ्** ॥ ६ । १ । १०३ ॥ अपत्ये । सौयामायनिः । सौवीरेभ्योऽन्यत्र सौयामः ॥ **पाण्टाहृतिमिमताण्णश्च** ॥ ६ । १ । १०४ ॥ सौवीरेषु जनपदे योऽर्थ-स्तद्वृत्तेरपत्ये आयनिञ्। पाण्टाहृतः पाण्टाहृतायनिर्वा सौवीरगोत्रः॥ मैमतः। मैमतायनिः। सौवीरेष्वित्येव। पाण्टाहृतायनः।

नीयं चूर्णम् । मोहनीयं कर्म । ज्ञानावरणीयम् । दर्शनावरणीयम् ॥ असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः ॥ ५।१।१६ ॥ अवश्यलाव्यम् । अवश्यलवितव्यम् । नन्दनः । नन्दकः । असरूप इति किम् ? । ध्यणि यो न स्यात् । कार्यम् । प्राक्क्तेरिति किम् ? । कृतिः । चितिः । घञादिर्मा भूत् । चिकीर्षा । क्तिर्न भवति ॥ ते कृत्याः ॥ ५ । १ । ४७ ॥ ध्यण्–तव्य–अनीय–य–क्यप् इत्येते कृत्यसंज्ञाः । तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च ॥ ऋवर्णव्यञ्जनाद् ध्यण् ॥ ५ । १ । १७ ॥ धातोः । कार्यम् । हार्यम् ॥ क्तेऽनिटश्चजोः कगौ घिति ॥ ४ । १ । १११ ॥ धातोः । पाक्यम् । वाक्यम् । भोग्यम् । क्तेऽनिट इति किम् ? । संकोच्यम् । क्तेऽनिट इति विद्यमानस्य विशेषणादिह न । उदाजः ॥ पाणिसमवाभ्यां सृजः ॥ ५ । १ । १८ ॥ ध्यण् । ऋदुपान्त्यक्यपोऽपवादः । पाणिसर्ग्या रज्जुः । समवसर्ग्यः । समवेतिसमुदायपरिग्रहार्थं द्विवचनम् । अन्यत्र सृज्यम् ॥ उवर्णादावश्यके ॥ ५ । १ । १८ ॥ द्योत्ये धातोर्ध्यण् । लाव्यम् । पाव्यम् । यन्नियोगात्कर्त्तव्यमर्थप्रकरणादिना निश्चितं तत्रायं प्रत्ययः । लाव्यमवश्यम् । पाव्यमवश्यम् । अवश्यलाव्यम् । अवश्यपाव्यम् । अत्रावश्यंशब्देनाप्यवश्यंभावो द्योत्यते । मयूरव्यंसकादित्वात्समासः। अवश्यस्तुत्य इति परत्वात् क्यप् ॥ आसुयुवपिरपिलपित्रपिडिदभिचम्यानमः ॥५।१।२०॥ ध्यण् । यापवादः।आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । अपत्राप्यम् । डेप्यम् । दभिः सौत्रो बन्धने । दाभ्यम्। आचाम्यम्। आनाम्यम् । आनमेर्नेच्छन्त्येके ॥ वाधारेऽमावास्या ॥५।१।२१॥ अमापूर्वाद्वसतेराधारे ध्यण्, धातोः पक्षे ह्रस्वश्च निपात्यते। अमा सह वसतोऽस्यां सूर्याचन्द्रमसाविति अमावस्या अमावास्या वा। पक्षे यत्कृत्वा ह्रस्वनिपातनम् अमावास्याया वा इत्यत्रामावस्याशब्दस्यापि ग्रहणार्थम् ॥ न्यङ्क्वुद्गमेघादयः ॥ ४।१।११२ ॥ यथासङ्ख्यं कृतकत्वाः कृतगत्वाः कृतघत्वा निपात्यन्ते । न्यञ्चेरुपत्यये न्यङ्कुः । तञ्चिवञ्चिशुचीनां रक्ति । तक्रम् । वक्रम् । शुक्रः । शोकः। उब्जेर्घञ् । उद्गः। न्युद्गः। सृजेः कर्त्तर्यच् । सर्गः । मिहेरचि संज्ञायां हस्य घत्वम् । मेघः। अन्यत्र मेहः। ओघः प्रवाहः।

एवमविहितलक्षणानि कत्वगत्वघत्वानि द्रष्टव्यानि ॥ न वञ्चेर्गतौ ॥ ४।१।११३ ॥ कत्वम् । वञ्चं वञ्चति । गन्तव्यं गच्छतीत्यर्थः । गताविति किम् ? । वङ्कं काष्ठम् । कुटिलमित्यर्थः ॥ यजेर्यज्ञाङ्गे ॥ ४ । १ । ११४ ॥ गत्वं न । पञ्च प्रयाजाः । त्रयोऽनुयाजाः । यज्ञाङ्गे इति किम् ? । प्रयागः । अनुयागः ॥ घ्यण्यावश्यके ॥ ४ । १ । ११५ ॥ चजोः कगौ न । अवश्यपाच्यम् । अवश्यरञ्ज्यम् । आवश्यक इति किम् ? । पाक्यम् ॥ निप्राद्युजः शक्ये ॥ ४ । १ । ११६ ॥ गम्ये घ्यणि गो न । नियोज्यः । प्रयोज्यः । शक्य इति किम् ? । नियोग्यः ॥ भुजो भक्ष्ये ॥ ४ । १ । ११७ ॥ घ्यणि न गः । भोज्यमन्नं पयो वा । अन्यत्र भोग्यः कम्बलः । प्रावरणीय इत्यर्थः । भक्ष्यमभ्यवहार्यम् । न खरविशदमेव ॥ त्यजयजप्रवचः ॥ ४ । १ । ११८ ॥ घ्यणि कगौ न । त्याज्यम् । याज्यम् । अत एव प्रतिषेधाद्यजेर्घ्यणपि । प्रवचिग्रहणं शब्दसंज्ञार्थम् । प्रवाच्यो नाम पाठविशेषः । तदुलक्षितो ग्रन्थोऽप्युच्यते । उपसर्गनियमार्थं वा । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां निषेधो नान्योपसर्गपूर्वस्य । अधिवाक्यं नाम दशरात्रस्य यज्ञस्य यद्दशममहः यस्मिन् याज्ञिका अधिब्रुवते तस्मिन्नेवाभिधानम् । अधिवाच्यमन्यत्र ॥ वचोऽशब्दनाम्नि ॥ ४ । १ । ११९ ॥ गम्ये घ्यणि को न । वाच्यमाह । अशब्दनाम्नीति किम् ?। वाक्यम् । विशिष्टः पदसमुदायः ॥ भुजन्युब्जं पाणिरोगे ॥ ४ । १ । १२० ॥ निपात्यते । भुज्यतेऽनेनेति भुजः पाणिः । न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो रोगविशेषः । घञि गत्वाभावः पूर्वत्र गुणाभावश्च निपात्यते । पाणिरोग इति किम् ? । भोगः । न्युद्गः ॥ वीरुन्न्यग्रोधौ ॥ ४ । १ । १२१ । विपूर्वस्य रुहेः क्विपि न्यक्पूर्वस्य चाचि वीरुन्न्यग्रोधशब्दौ धान्तौ निपात्येते । वीरुत् । न्यग्रोधः । अवरोध इत्यप्यन्ये ॥ सञ्चाय्यकुण्डपाय्यराजसूयं क्रतौ ॥ ५ । १ । २२ ॥ घ्यणन्तं निपात्यते आधारे कर्मणि वा । सञ्चीयते सोमोऽस्मिन् सञ्चीयते वाऽसाविति सञ्चाय्यः क्रतुः । सञ्चेयोऽन्यः । कुण्डैः पीयते सोमोऽस्मिन् कुण्डैः पीयते इति वा कुण्डपाय्यः क्रतुः । कुण्डपानोऽन्यः । अत्र निपातनादायादेशः । राजा सूयतेऽस्मिन् राज्ञा वा सोतव्य इति

राजसूयः । अत्र निपातनाद्दीर्घः ॥ **प्रणाय्यो निष्कामासम्मते** ॥ ५ । १ । २३ ॥ प्राणाय्योऽन्तेवासी । विषयेष्वनभिलाष इत्यर्थः । निपातनादायादेशः । प्रणाय्यश्चौरः । सर्वलोकासम्मत इत्यर्थः । प्रणेयोऽन्यः ॥ **धाय्यापाय्यसांनाय्यनिकाय्यमृङ्मानहविर्निवासे** ॥५।१।२४॥ यथासङ्ख्यं घ्यणन्तं निपात्यते । निपातनादायादेशः । दधातेर्ऋचि, धीयते समिदग्नावनयेति धाय्या ऋक् । रूढिवशात्काश्चिदेव ऋच उच्यन्ते । अन्यत्र धेया मीयतेऽनेनेति पाय्यम मानम् । अत्र माङ आदिपत्वं च । सम्पूर्वान्नयतेर्हविषि समो दीर्घत्वं च । सांनाय्यं हविः । निकाय्यो निवासः । अत्र चिनोतेरादिकत्वं च ॥ **परिचाय्योपचाय्यानाय्यसमूह्यचित्यमग्नौ** ॥ ५ । १ । २५ ॥ घ्यणन्तं निपात्यते । परिचीयत इति परिचाय्योऽग्निः । एवम् उपचाय्यः । अनाय्यो दक्षिणाग्निः । केचिदग्निविशेषादन्यत्राप्यनित्यविशेषइच्छन्ति । आनाय्यो गोधुक् । अनित्य इत्यर्थः । समुह्यत इति समूह्यः । वहेर्घ्यण् ऊत्वं च वस्य । अन्ये तु सम्पूर्वाद्दूहेरग्नावेवेति नियमार्थं घ्यणं निपातयन्ति । अग्नेरन्यत्र समूहितव्य इत्येव । चिनोतेः क्यपि ॥ **ह्रस्वस्य तः पित्कृति** ॥ ॥ ४ । ४ । ११३ ॥ धातोरन्तः । चित्योऽग्निः । चेयोऽन्यः । ह्रस्वस्येति किम् ? । ग्रामणीः । कृतीति किम् ? । अजुहवुः । ग्रामणि कुलं वृत्रह कुलमित्यत्र तु असिद्धं बहिरङ्गमन्तरङ्ग इति न भवति । सुशूरित्यादावन्तरङ्गत्वाद्विशेषविहितत्वाच्च ग्रहदीर्घत्वं च भवति ॥ **याज्या दानर्चि** ॥ ५।१।२६ ॥ यजेः करणे घ्यण् स्यात् । इज्यतेऽनयेति याज्या ॥ **तव्यानीयौ** ॥ ५।१।२७ ॥ धातोः । शयितव्यम् । शयनीयम् । कर्त्तव्यः । करणीयः । बहुलाधिकारादन्यत्रापि । शेतेऽस्मिन्निति शयनीयः पल्यङ्कः । स्नान्त्येनेनेति स्नानीयं चूर्णम् ॥ **निंसनिक्षनिन्दः कृति वा** ॥ २ । ३ । ८४॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य नो णः । प्रणिंसितव्यम् । प्रनिंसितव्यम् । प्रणिक्षितव्यम् । प्रनिक्षितव्यम् । प्रणिन्दितव्यम् । प्रनिन्दितव्यम् ॥ **स्वरात्** ॥ २ । ३ । ८५ ॥ अदुरुपसर्गान्तःस्थाद्रादेः कृतो नो णः । प्रयाणीयम् । स्वरात् किम् ? । प्रमग्नः ॥ **नाम्यादेरेव ने** ॥२।३।८६ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य धातोः परस्य स्वरादुत्तरस्य कृतो ना-

णः । प्रेङ्खणीयम् । नाम्यादेरिति किम् ? । प्रमङ्गनीयम् । एवकार इष्टावधारणार्थः न एव सति नाम्यादेरिति विपरीत-नियमो मा भूत् । व्यञ्जनान्तादेवायं नियमः । ण्यन्तात्तु परत्वाद्विकल्प एव ॥ व्यञ्जनादेर्नाम्युपान्त्याद्वा ॥ २।३।८७ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य धातोः परस्य स्वरादुत्तरस्य कृतो नो णः ॥ प्रकोपणीयम् । प्रकोपनीयम् । व्यञ्जनादेरिति किम् ? । प्रोहणीयम् । नाम्युपान्त्यादिति किम् ? । प्रवपणम् । स्वरादित्येव । प्रभुग्नः । अदुरित्येव । दुर्मोहनः । अक-चटादिवर्जनं किम् ? । प्रभेदनम् ॥ णेर्वा ॥ २ । ३ । ८८ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य धातोर्विहितस्य कृतः स्व-रात्परस्य नो णः । प्रमङ्गणीयम् । प्रमङ्गनीयम् । विहितेति किम् ? । प्रयाप्यमाणः २ । अत्र क्येन व्यवधानेऽपि ॥ निर्विण्णः ॥ २ । ३ । ८९ ॥ क्तनकारस्य णत्वं निपात्यते । निर्विण्णः ॥ न ख्यापूग्भूभाकमगमप्यायूवेपो णेश्च ॥ २ । ३ । ९० ॥ अदुरुपसर्गान्तःस्थाद्रादेः परात्परस्य कृतो नस्य णः । प्रख्यानीयम् । प्रख्यापनीयम् । प्रपवनी-यम् । प्रपावनीयम् । प्रभवनम् । प्रभावनम् । प्रभानम् । प्रभावना । प्रकामिनौ । प्रकामना । अप्रगमनिः । प्रगमना । प्रप्यानः । प्रप्यायनः । प्रवेपनीयम् । प्रवेपना । ख्यातेर्णत्वमिति कश्चित् ॥ देशेऽन्तरोऽयनहनः ॥ २ । ३ । ९१ ॥ नो ण् न । अन्तरयनः अन्तर्हननीयो देशः ॥ षात्पदे ॥२।३।९२॥ परस्य नो ण् न । सर्पिष्पानम् । निष्पानम् । पद इति किम् ? । पुष्णाति । सर्पिष्केण ॥ पदेऽन्तरेऽनाङ्यतद्धिते ॥ २।३।९३ ॥ नो ण् न । प्रावनद्धम् । रोषभीमुख-खेन । माषकुम्भवापेन । माषकुम्भस्य वाप इति माषाः कुम्भो वापोऽस्येति वा समासे वोत्तरपदान्तेति विकल्पे प्राप्ते माषस्य कुम्भवाप इति समासे च कवर्गैकस्वरेति नित्ये प्राप्ते प्रतिषेधः । व्यवधायकस्योत्तरपदावयवत्वे नेच्छन्त्यन्ये । अपरे तु तस्य पूर्वपदावयवत्वे नेच्छन्ति । अनाङीति किम् ? । प्राणद्धम् । अतद्धित इति किम् ? । आर्द्रगोमयेण ॥ घ एचातः ॥ ५ । १ । २८ ॥ स्वरान्ताद्धातोः । दित्स्यम् । चेयम् । जेयम् । नेयम् । लव्यम् । भव्यम् । एचातः । देयम् । धेयम् ॥ शकितकिचतियतिशसिसहियजिभजिपवर्गात् ॥ ५ । १ । २९ ॥ यः । घ्यणोपवादः ।

। शक्यम् । तक्यम् । चत्यम् । यत्यम् । शस्यम् । सह्यम् । यज्यम् । भज्यम् । तप्यम् । लभ्यम् । गम्यम् ॥ आङो यि ॥ ४ । ४ । १०४ ॥ लभः स्वरात्परः प्रत्यये नोऽन्तः । आलम्भ्या गौः । यीति किम् ? । आलब्धा । उपात्स्तुतौ ॥ ४ । ४ । १०५ ॥ लभः स्वरात्परो यादौ प्रत्यये नोऽन्तः । उपलम्भ्या विद्या । स्तुताविति किम् ? । उपलभ्या वार्ता । यजेर्गत्वप्रतिषेधाद् भजेश्च बाहुलकाद् घ्यणपि । याज्यम् । भाग्यम् । यजिभजिभ्यां नेच्छन्त्येके । असित्र-घ्य इत्यादि तु न जनवध इति वृद्धिनिषेधे घ्यणा भविष्यति ॥ यममदगदोऽनुपसर्गात् ॥ ५ । १ । १३० ॥ यः । यम्यम् । मद्यम् । गद्यम् । अनुपसर्गादिति किम् ? । आयाम्यम् । यमेर्ग्रहणं नियमार्थम् । अनुपसर्गादेव यथा स्यात् । बहुवचनात्करणेऽपि माद्यत्यनेनेति मद्यम् । सोपसर्गादपि नियम्यम् । चरेराङस्त्वगुरौ ॥ ५ । १ । १३१ ॥ अनु-पसर्गाद् यः । चर्यं भवता । आचर्यम् । आचर्यो देशः । अगुराविति किम् ? । आचार्यो गुरुः । वर्योपसर्या-वद्यपण्यमुपेयर्तुमतीगर्ह्यविक्रेये ॥ ५ । १ । ३२ ॥ यथासङ्ख्यं यान्तं निपात्यते । शतेन वर्या कन्या । सम्भ-क्तव्या मैत्रीप्रापादनीयेत्यर्थः । वृत्या ऽन्या । स्त्रीलिङ्गनिर्देशादिह न । वार्या ऋत्विजः । अन्यस्तु सुग्रीवो नाम वर्योऽसौ इति प्रयोगदर्शनात् पुंल्लिङ्गेऽपीच्छति । सामान्यनिर्देशात्तदपि सङ्गृहीतम् । उपसर्या गौः । गर्भग्रहणे प्राप्तकालेत्यर्थः । अन्यत्र उपसार्या । अवद्यं पापम् । गर्ह्यमित्यर्थः । अनूद्यमन्यत् । कथमवाद्या निरुपपदाद् घ्यण् ततो नञ्समासः । पण्यः कम्बलः । अन्यत्र पाण्यः साधुः ॥ स्वामिवैश्येऽर्यः ॥ ५ । १ । ३३ ॥ अर्तेः स्वामिवैश्य-योर्यो निपात्यते । अर्यः स्वामी वैश्यो वा । अन्य आर्यः ॥ वह्यं करणे ॥ ५ । १ । ३४ ॥ वहेः करणे यः स्यात् । वह्यं शकटम् । वाह्यमन्यत् ॥ नाम्नो वदः क्यप् च ॥ ५ । १ । ३५ ॥ अनुपसर्गाद्यः । ब्रह्मोद्यम् । ब्रह्मवद्यम् । नाम्न इति किम्? । वाद्यम् । अनुपसर्गादित्येव । प्रवाद्यम् ॥ हत्याभूयं भावे ॥५।१।३६॥ अनुपसर्गान्नाम्नः क्यबन्तं

निपात्यते । ब्रह्मणो वधः ब्रह्महत्या । हन्तेः क्यप् तकारोऽन्तादेशश्च । ब्रह्मभूयं गतः । देवभूयम् । भाव इति किम् ? । श्वघात्या सा । हन्तेर्भावे घ्यण् न भवत्यनभिधानात् । तथा च बहुलाधिकारः । नाम्न इत्येव । घातः । भव्यम् ॥ अग्निचित्या ॥ ५ । १ । ३७ ॥ अग्नेः पराच्चिनोतेः स्त्रीभावे क्यब् निपात्यते अग्नेश्चयनमग्निचित्या ॥ खेयमृषोद्ये ॥ ५ । १ । ३८ ॥ क्यबन्ते निपात्येते । खन्यत इति खेयम् । निपातनादन्त्यस्वरादेरेत्वम् । निखेयम् । मृषोद्यत इति मृषोद्यम् ॥ कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याज्यसूर्यं नाम्नि ॥ ५ । १।३९॥ क्यबन्तं निपात्यते । कुप्यं धनम् । गुपेः क्यप् आदिकत्वं च । गोप्यमन्यत् । भिनत्ति कूलानि भिद्यः । उज्झत्युदकमिति उद्ध्यः । निपातनाद्धत्वम् । नदविशेषाविमौ । सिध्यन्ति त्वेषन्ति पुष्यन्ति अस्मिन् कार्य्याणीति सिध्यः, तिष्यः, पुष्यः । युञ्जन्ति तदिति युग्यं वाहनम् । निपातनाद्गः आञ्जन्त्यनेनेति आज्यं घृतम् । सरति सुवति वा कर्मसु लोकानिति सूर्यो देवता । सर्तेः क्यप् ऋकारास्योर् सुवतेर्वा क्यप् रोन्तश्च ॥ दृवृगस्तुजुषेतिशासः ॥ ५ । १ । ४० ॥ क्यप् आदृत्यः । प्रावृत्यः । वृङस्तु वार्य्या ऋत्विजः । स्तुत्यः । जुष्यः । एतीति इणिकोर्ग्रहणम् । इत्यः । अधीत्यः। अयतेरिङश्च न । उपेयम् । अध्येयम् । इकोऽप्यध्येयमित्येके । ईयतेरप्युपेयमिति । शिष्यः कथमनिवार्यो गजैरन्यैरिति ?, सम्भवतेरन्यत्रापि वृङ् ॥ ऋदुपान्त्यादकृपिचृदृचः ॥ ५ । १ । ४१ ॥ धातोः क्यप् । वृत्यम् । वृध्यम् । अकृपीत्यादि किम ? । कल्प्यम् । चर्त्यम् । अर्च्यम् ॥ कृवृषिमृजिशंसिगुहिदुहिजपो वा ॥ ५ । १ । ४२ ॥ क्यप् । कृत्यम् । कार्यम् । वृष्यम् । वर्ष्यम् । मृज्यम् । मार्ग्यम् । शस्यम् । शंस्यम् । गुह्यम् । गोह्यम् । दुह्यम् । दोह्यम् । जप्यम् । जाप्यम् । जपेरपि पक्षे घ्यण् विकल्पसामर्थ्यात् ॥ जिविपून्यो हलिमुञ्जकल्के ॥ ५ । १ । ४३॥ वाच्ये क्यप् । जीयते निपुणेनेति जित्यो हलिः । महद्धलं हलिः । पूङ् पूग् वा । विपूयो मुञ्जः । पूगो नेच्छन्त्येके । विनेतव्यो मध्ये तैला-

दिना विनीयः कल्कः । हलिमुञ्जकल्क इति किम् ? । जेयम् । विपठ्यम् । विनेयम् ॥ पदास्वैरिबाह्यापक्ष्ये ग्रहः ॥ ५ । १ । ४४ ॥ क्यप् । घ्यणोऽपवादः । प्रकर्षेण गृह्यत इति प्रगृह्यं पदम् । गृह्याः कामिनः । रागादिपरतन्त्रा इत्यर्थः । ग्रामगृह्या श्रेणिः । बाह्येत्यर्थः । स्त्रीलिङ्गनिर्देशाल्लिङ्गान्तरेऽनभिधानम् । त्वद्गृह्यः त्वत्पक्षाश्रित इत्यर्थः । गुणगृह्याः । अन्यत्र ग्राह्यं वचः । भृगोऽसंज्ञायाम् ॥ ५ । १ । ४५ ॥ क्यप् । भृत्यः । पोष्य इत्यर्थः । असंज्ञायामिति किम् ?। भार्यो नाम क्षत्रियः । भार्या पत्नी । न च स्त्रियां भृगो नाम्नि इति क्यप् दुर्वार इति वाच्यम् । तस्य भाव एव विधानात् ॥ समो वा ॥ ५ । १ । ४६ ॥ भृगः क्यप् । सम्भृत्यः । सम्भार्यः ॥ प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ ॥ ५ । ४ । २९ ॥ भवता कटः कार्यः । भवान् हि प्रेषितोऽनुज्ञातः । भवतोऽवसरः कटकरणे ॥ शक्तार्हे कृत्याश्च ॥५।४।३५॥ वोढुमर्हः शक्तो वा वाह्यः ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां कृत्यप्रक्रिया ॥

---

णकतृचौ ॥ ५ । १ । ४८ ॥ धातोः । पाचकः । पक्ता । पाठकः । पठिता । शमकः । दमकः । दायकः । दाता । एषकः। एषिता । एष्टा । लम्भकः। लब्धा । विवृत्सकः। विवृत्सिता । पापचकः। पापाचकः ॥तुः॥४।४।५३॥ अनात्मनेपदविषयात् क्रमः परस्य स्ताद्यशित आदिरिट् । क्रमिता । अनात्मन इत्येव । प्रक्रन्ता ॥ अजे वा ॥ ४ । ४ । ३ ॥ विषयभूतेऽजेर्वी । प्रवेता । प्राजिता । प्रवयणः प्राजनो दण्डः । अनो वक्ष्यते ॥ अर्हे तृच् ॥ ५ । ४ ।

३७ ॥ कर्त्तरि वाच्ये धातोः । भवान् कन्याया वोढा । सप्तम्या बाधा माभूदित्यर्हे तृज्विधानम् ॥ अच् ॥ ५ । १ । ४९ ॥ धातोः । करः । हरः । पचः । पठः ॥ अचि ॥ ३।४।१५ ॥ यङो लुप् । चेच्यः । नेन्यः॥ नोतः ॥३।४।१६॥ विहितस्य यङोचि परे लुप् । योयूयः । रोरूयः ॥ लिहादिभ्यः ॥ ५ । १ । ५० ॥ अच् । लेहः । शेषः । सेवः । मेषः । न्यग्रोधः । दर्शः । कद्वदः । अनिमिष इति बहुलाधिकारात् कोऽपि । पृथग्योगो बाधकबाधनार्थः । बहुवचनमाकृतिगणार्थम् ॥ चराचरचलाचलपतापतवदावदघनाघनपाटूपटं वा ॥ ४ । १ । १३ ॥ एते अचि कृतद्वित्वादयो वा निपात्यन्ते । चराचरः । चलाचलः । पतापतः । वदावदः । घनाघनः । पाटूपटः । पक्षे चरः । चलः । पतः। वदः । हनः । पाटः । केचित्तु पटूपट इति निपातयन्ति । चिक्लिदचक्नसम् ॥ ४ । १ । १४ ॥ केऽचि च कृतद्वित्वं निपात्यते । चिक्लिदः । चक्नसः । यद्वोभयत्र घञर्थे कः । चक्रुः । ययुः । बभ्रुः इत्यौणादिकाः । ब्रुवः ॥ ५ । १ । ५१ ॥ अजन्तो निपात्यते । ब्राह्मणमात्मानं ब्रूते ब्राह्मणब्रुवः । अणत्वचादेशगुणबाधनार्थं निपातनम् । स्यसितस्य ॥ २ । ३ । ४७ ॥ परिनिवेः सस्य षः । परिषयः । निषयः । विषयः । परिषितः । निषितः । विषितः । सय इति सिनोतेरजन्तस्यालन्तस्य घान्तस्य वा सित इति क्तान्तस्य रूपम् । स्यतेर्वा नियमार्थम् परिनिविपरस्यैव क्तान्तस्य स्यतेर्यथा स्यादिति । तेन प्रतिसित इत्यादि सिद्धम् ॥ निर्दुःसुवेः समसूतेः ॥ २ । ३ । ५६ ॥ सस्य षः । निःषमः । दुःषमः । सुषमः । विषमः । निःषूतिः । दुःषूतिः । सुषूतिः विषूतिः । नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् सुषमेत्यादि । समसूतीति नाम्नोर्ग्रहणाद्धातोर्नैरूप्ये च न भवति । अन्ये तु समसूत्योर्धात्वोरेवेच्छन्ति ॥ वेः स्कन्दोऽक्तयोः ॥ २ । ३ । ५१ ॥ सस्य षो वा । विष्कन्ता । विस्कन्ता । न चेत् क्तक्तवतू स्यातामिति किम् ? । विस्कन्नः । विस्कन्नवान् ॥ परेः ॥ २ । ३ । ५२ ॥ स्कन्दः सस्य षो वा । परिष्कन्ता

परिस्कन्ता । परिष्कण्णः । परिस्कन्नः । केचित्तु परिपूर्वस्य स्कन्देरजन्तस्य घञन्तस्य वा प्राच्यभरतविषये प्रयोगे नित्यं षत्वमन्यत्र विकल्पमिच्छन्ति । प्राच्यभरतविषये प्रयोगे षत्वाभावमन्यत्र विकल्पमिच्छन्त्यन्ये । तदुभयं नारम्भणीयम् । अनेनैव सिद्धत्वात् । नन्द्यादिभ्योऽनः ॥ ५ । १ । ५२ ॥ नामगणदृष्टेभ्यः । विशिष्टविषयार्थो रूपनिग्रहार्थश्च सप्रत्ययपाठः । नन्दयतीति नन्दनः । वाशनः । मदनः । सहनः । रमणः । लवणः । सङ्क्रन्दनः । सर्वदमनः । नर्दनः। बहुवचनमाकृतिगणार्थम् ॥ ग्रहादिभ्यो णिन् ॥ ५ । १ । ५३ ॥ ग्राही । स्थायी । उपस्थायी । मन्त्री । गुणैश्चिरं विशेते विसिनोति वा विशयी विषयी च प्रदेशः । निपातनात्षत्वम् । ग्रहादिराकृतिगणः ॥ नाम्युपान्त्यप्रीकृगृज्ञः कः ॥ ५ । १ । ५४ ॥ धातोः । विक्षिपः । विलिखः । बुधः । प्रियः । किरः । गिरः । ज्ञः । काष्ठभेद इति परत्वादण् ॥ वौ विष्करो वा ॥ ४ । ४ । ९७ ॥ वाच्ये निपात्यते । विष्किरः । विकिरो वा पक्षी । अन्ये तु विकिरशब्दस्यापि प्रयोगः पक्षिणोऽन्यत्र नास्तीत्याहुः ॥ गेहे ग्रहः ॥ ५ । १ । ५५ ॥ कः । गृह्णाति धान्यादिकमिति गृहम् । पुंसि गृहाः। दुर्गस्त्वेकवचनान्तमेवाह तात्स्थ्याद् गृहा दाराः ॥ उपसर्गादातो डोऽश्यः ॥ ५ । १ । ५६ ॥ धातोः । आह्वः । प्रह्वः । प्रदः । प्रधः । उपसर्गादिति किम् ? । दायः । अश्य इति किम् ? । अवश्यायः । पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् इति णो बाध्यते नाण् । तेन गोसन्दायः । उपसर्गाणामव्यवधायकत्वादण् ॥ व्याघ्राघ्रे प्राणिनसोः ॥ ५ । १ । ५७ ॥ यथासङ्ख्यं निपात्येते । विविधमाजिघ्रति व्याघ्रः प्राणी । आजिघ्रति आघ्रा नासिका ॥ घ्राध्मापाट्धेदृशः शः ॥ ५ । १ । ५८ ॥ जिघ्रतीति जिघ्रः । विजिघ्रः । धमः । घ्रादिसाहचर्यात् पिबतेर्ग्रहणं न पातेः । पाययतेस्तु लाक्षणिकत्वान्न भवति । पिबः । धयः । उद्धयः । उत्पश्यः । ट्धेष्टित्वादुद्धयी । उपसर्गादिच्छन्त्यन्ये ॥ साहिसातिवेद्युदेजिधारिपारिचेतेरनुपसर्गात् ॥ ५ । १ । ५९॥ शः । साहयतीति साहयः

। सातिः सौत्रो धातुः । सातयः । वेदयः । उदेजयः । धारयः । पारयः । चेतयः । अनुपसर्गादिति किम् ? । प्रसाहयिता । छत्रधार इति परत्वादणेव ॥ **लिम्पविन्दः** ॥ ५ । १ । ६० ॥ अनुपसर्गाच्छः । लिम्पः । विन्दः ॥ **निगवादेर्नाम्नि** ॥ ५ । १ । ६१ ॥ यथासंख्यं लिम्पविन्दःशः । निलिम्पा देवाः । गोविन्दः । कुविन्दः । अरविन्दः । नाम्नीति किम् ? । निलिपः ॥ **वा ज्वलादिदुनीभूग्रहास्रोर्णः** ॥ ५ । १ । ६२ ॥ अनुपसर्गाद्वा । ज्वलः । ज्वालः । चलः । चालः । दवः । दावः । नयः । नायः । दुनीभ्यां नित्यमेवेत्येके । भवः । भावः । व्यवस्थितविभाषेयम् । तेन ग्राहो मकरादिः । ग्रहः सूर्यादिः । आस्रवः । आस्रावः । अनुपसर्गादित्येव । प्रज्वलः ॥ **अवहृसासंस्रोः** ॥ ५ । १ । ६३ ॥ णः । अवहारः । अवसायः । संस्रावः । स्रव इत्यपि कश्चित् ॥ **तन्व्यधीण्श्वसातः** ॥ ५ । १ । ६४ ॥ धातोर्णः । तानः । उत्तानः । व्याधः । प्रत्यायः । अत्यायः । अतिपूर्वाद्देवेण इत्येके । श्वासः । अवश्यायः । प्रतिश्यायः । ग्लायः । ददः दधः इति तु ददिदध्योरचा सिद्धम् ॥ **नृत्खन्रञ्जः शिल्पिन्यकट्** ॥ ५ । १ । ६५ ॥ कर्त्तरि । नर्त्तकः । नर्त्तकी । खनकः । अकङ्घिनोरिति न लुक् । रजकः । शिल्पिनीति किम् ? । नर्तिका ॥ **गस्थकः** ॥ ५ । १ । ६६ ॥ शिल्पिनि कर्त्तरि ॥ गाथकः । गाङः प्रत्यये शिल्पी न गम्यते इति गायतेर्ग्रहणम् ॥ **टनण्** ॥ ५ । १ । ६७ ॥ गायतेः शिल्पिनि कर्त्तरि । गायनः । गायनी । एतौ प्रत्ययावशिल्पिन्यपीत्येके ॥ **हः कालव्रीह्योः** ॥ ५ । १ । ६८ ॥ कर्त्रोष्टनण् । जहाति जहीते वा भावान् हायनः संवत्सरः । जहत्युदकं दूरोत्थानाद् जिहते वा द्रुतम् हायना व्रीहयः ॥ **प्रुसृल्वोऽकः साधौ** ॥ ५ । १ । ६९ ॥ वर्त्तमानात् । साधु प्रवते इति प्रवकः । सरकः । लवकः । साधाविति किम् ? । प्रावकः ॥ **आशिष्यकन्** ॥ ५ । १ । ७० ॥ गम्यायां धातोः । जीवतादित्याशास्यमानो जीवकः । नन्दकः । जीवका । आशिषीति किम् ? । जीविका ॥ **तिक्कृतौ नाम्नि** ॥ ५ । १ । ७१ ॥ आशिषि तिक् सर्वे

कृतश्च ॥ अहन्पञ्चमस्य क्विक्ङिति ॥ ४ । १ । १०७ ॥ धुडादौ स्वरस्य दीर्घः । शम्यात् इति शान्तिः । पञ्चमस्येति किम् ? । त्यक्त्वा । अहन्निति किम् ? । वृत्रहणि । धुटीत्येव । यम्यते । कश्चित्त्वाचारक्तावपि दीर्घत्वमिच्छति। तौ सनस्तिकि ॥ ४ । २ । ६४ ॥ लुगातौ वा । षणू, सतिः । सातिः । सन्तिः । षण्, सतिः । सातिः । सान्तिः। ॥ न तिकि दीर्घश्च ॥ ४ । २ । ५८ ॥ यमिरम्यादीनां तनादीनां च लुक् । यन्तिः । रन्तिः । नन्तिः । गन्तिः । हन्तिः । मन्तिः । वन्तिः । तन्तिः । क्षन्तिः । क्षणिति लाक्षणिको णः । अन्यस्त्वौपदेशिकमिमं मन्यते । तन्मते क्षण्टिः । वीरो भूयादिति वीरभूः । क्विप् । देवदत्तः । वतः । शर्ववर्मा । मन् । वर्द्धमानः ॥ कर्मणोऽण् ॥ ५ । १ । ७२ ॥ निर्वर्त्यविकार्यप्राप्यरूपाद् धातोः । अजाद्यपवादः । निर्वर्त्यात् । कुम्भकारः । विकार्यात् । काणुलावः । प्राप्यात् वेदाध्यायः । ग्रामं गच्छतीत्यादौ प्राप्यकर्मणोऽनभिधानाच्च । महान्तं कटं करोतीति सापेक्षत्वादनभिधानाच्च । तथा च बहुलाधिकारः । निर्वर्त्यविकार्याभ्यामपि क्वचिन्न । संयोगं जनयति । वृक्षं छिनत्ति ॥ शीलिकामिभक्ष्याचरीक्षिक्षमो णः॥ ५ । १ । ७३॥ कर्मणः । धर्मशीलः । धर्मशीला । धर्मकामा । वायुभक्षा । कल्याणाचारा । सुखप्रतीक्षा । बहुक्षमा । अल्यन्तैः शीलादिभिर्बहुव्रीहौ धर्मशीलादयः सिध्यन्ति । अणूबाधनार्थं वचनम् । एवंप्रायेषु च बहुव्रीह्याश्रयणे अम्भोतिगमेति स्यात् । अम्भोऽतिगामीति चेष्यते । कामीति ण्यन्तस्योपादानादण्यन्तादणेव,पयस्कामीति । ण्यन्तस्य तु पयःकामेति । अत एव ण्यन्तनिर्देशादण्यन्तनिर्देशे कृकमिकंसेत्यादौ केवलस्यैव कमेर्ग्रहणम्॥गायोऽनुपसर्गाट्टक् ॥५।१।७४ ॥ कर्मणः । वक्रगः । वक्रगी । अनुपसर्गादिति किम् ? । वक्रसंगायः । गायतिनिर्देशाद्गाङ् न गृह्यते ॥सुराशीधोः पिबः॥५।१।७५॥ कर्मणोऽनुपसर्गात् टक् । सुरापः। सुरापी । शीधुपी । संज्ञायां सुरापा । सुरापीति तु पातिपिबत्योः। तत्र धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वात् ।आतो डोऽह्वावामः॥५।१।७६॥ कर्मणोऽनुपसर्गाद्धातोः। गोदः।

पार्ष्णित्रम् । अह्वावाम इति किम् ?। स्वर्गह्वायः । तन्तुवायः ॥ धान्यमायः । कथं मित्रह्व इति ? क्वचिदित्यनेन डः । नुअपसर्गादित्येव गोप्रदायः ॥ समः ख्यः ॥ ५ । १ । ७७॥ कर्मणो डः । गां संख्याति संचष्टे वा गोसंख्यः ॥ दश्चाङः ॥ ५ । १ । ७८ ॥ कर्मणः ख्यो डः । दायादः । स्त्र्याख्यः ॥ प्राज्ञश्च ॥ ५ । १ । ७९ ॥ कर्मणो दारुपाज्ञः । पथिप्रज्ञः । प्रपाप्रदः । इह पूर्वत्र च ज्ञाख्यासाहचर्याद्दारूपं गृह्यते । पूर्वसूत्रे तु दागेव, तस्यैवाङा योगात् । तेन स्तनौ प्रधयतीति स्तनप्रधायः ॥ आशिषि हनः ॥ ५ । १ । ८० ॥ कर्मणो डः । शत्रुहः । गतावपीति कश्चित् । क्रोशहः ॥ क्लेशादिभ्योऽपात् ॥ ५ । १ । ८१ ॥ कर्मभ्यो हनो डः । अनाशीरर्थमिदम् । क्लेशापहः । तमोऽपहः । ज्वरापहः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि । दार्वाघाटः चार्वाघाट इत्यत्र घटतेरण् संज्ञायाम् । दार्वाघातः चार्वाघात इति तु हन्तेरेवासंज्ञायाम् । एवं घटिहनिभ्यामसंज्ञायां वर्णसंघाटः वर्णसंघातः पदसंघाटः पदसंघात इत्यादि सिध्यति । हन्तेरेव वा पृषोदरादित्वाद्वर्णविकारः ॥ कुमारशीर्षाण्णिन् ॥ ५ । १ । ८२ ॥ कर्मणो हन्तेः । कुमारघाती । शीर्षघाती । अत एव निपातनाच्छिरसः शीर्षादेशः प्रकृत्यन्तरं वा ॥ अचित्ते टक् ॥ ५ । १ । ८३ ॥ कर्मणो हन्तेः कर्तरि । वातघ्नं तैलम् । पित्तघ्नं घृतम् । पतिघ्नी पाणिरेखा । बहुलाधिकारात्संज्ञायां सुघ्नादयः । अचित्त इति किम् ? । पापघातो यतिः ॥ जायापतेश्चिन्हवति ५ । १ । ८४ ॥ कर्मणो हन्तेः कर्तरि टक् । जायाघ्नो ब्राह्मणः । पतिघ्नी कन्या ॥ ब्रह्मादिभ्यः ॥ ५ । १ । ८५ ॥ कर्मभ्यो हन्तेष्टक् । ब्रह्मघ्नः । शत्रुघ्नः । गोघ्नः पापी । बहुलाधिकारात्संप्रदानेऽपि । गां हन्ति यस्मै गोघ्नोऽतिथिः ॥ बहुवचनाद्यथादर्शनमन्येभ्योऽपि भवति । हस्तिबाहुकपाटाच्छक्तौ ॥ ५ । १ । ८६॥ गम्यायां कर्मणो हन्तेष्टक् । चित्तवदर्थं सूत्रम् ॥ हस्तिघ्नो मनुष्यः । बाहुघ्नो मल्लः । कपाटघ्नश्चौरः ॥ शक्ताविति किम् । हस्तिघातो रसदः ॥ नगरादगजे ॥ ५ । १ । ८७॥ कर्मणो हन्तेः

कर्त्तरि टक् । नगरघ्नो व्याघ्रः । अगज इति किम् ? । नगरघातो हस्ती ॥ राजघः ॥ ५ । १ । ८८॥ राज्ञः कर्मणो हन्तेष्टक् घादेशश्च निपात्यते । राजघः॥ पाणिघताडघौ शिल्पिनि ॥ ५ । १ । ८९॥ टगन्तौ निपात्येते । पाणिघः ताडघः शिल्पी । पाणिना ताडेन च हन्तीति करणादपि केचित् । शिल्पिनीति किम् ? । पाणिघातः । ताडघातः । कुक्ष्यात्मोदराद् भृगः खिः ॥ ५ । १ । ९० ॥ कर्मणः । खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्चेति मागमः । कुक्षिम्भरिः । आत्मंभरिः । उदरंभरिः । उदरात्केचिदिच्छन्ति ॥ अर्होऽच् ॥ ५ । १ । ९१ ॥ कर्मणः । अणोऽपवादः । पूजार्हस्साधुः ॥ धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद् ग्रहः ॥ ५ । १ । ९२ ॥ कर्मणोऽच् । धनुर्ग्रहः । दण्डग्रहः । त्सरुग्रहः । लाङ्गलग्रहः। अङ्कुशग्रहः । ऋष्टिग्रहः । यष्टिग्रहः । शक्तिग्रहः । तोमरग्रहः । घटग्रहः॥ नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् घटीग्रहः । अणपीत्येके । धनुर्ग्राहः ॥ सूत्राद्धारणे ॥ ५ । १ । ९३ ॥ कर्मणो ग्रहेरच् । सूत्रं कर्पासादिमयं लक्षणसूत्रं वा गृह्णाति सूत्रग्रहः प्राज्ञः सूत्रधारो वा । अन्ये त्ववधारणे एवेच्छिन्ति । तन्यते सूत्रग्रहः प्राज्ञ एवोच्यते । धारण इति किम् ? । यो हि सूत्रं गृह्णाति न तु धारयति स सूत्रग्राहः ॥ आयुधादिभ्यो धृगोऽदण्डादेः ॥ ५ । १ । ९४ ॥ कर्मणोऽच् । धनुर्धरः । शक्तिधरः । आदिग्रहणाद् भूधरः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि । अदण्डादेरिति किम् ? । दण्डधारः । कुण्डधारः हृगो वयोऽनुद्यमे ॥ ५ । १ । ९५ ॥ कर्मणो गम्येऽच् । प्राणिनां कालकृतावस्था वयः । अस्थिहरः श्वशिशुः । कवचहरः क्षत्रियकुमारः । उद्यम उत्क्षेपणमाकाशे धारणं वा तदभावे । अंशहरो दायादः । मनोहरः प्रासादः । मनोहरा माला । वयोऽनुद्यम इति किम् ? । भारहारः ॥ आङः शीले ॥ ५ । १ । ९६ ॥ कर्मणो हरतेर्गम्येऽच् । शीलं स्वाभाविकी प्रवृत्तिः । पुष्पाणि आहरतीत्येवंशीलः पुष्पाहरः । आङ इति किम् ?। पुष्पाणि हर्त्ता । शील इति किम् ? । पुष्पाहारः । सुखाहर इत्यशीलेऽनुद्यमे पूर्वेणाच् ।

लिहादिप्रपञ्चः प्रकरणमिदम् ॥ **दृतिनाथात्पशाविः** ॥ ५ । १ । ९७ ॥ कर्मणो हृगः कर्त्तरि । दृतिहरिः श्वा । नाथहरिः सिंहः । पशाविति किम् ?। दृतिहारो व्याधः । नाथहारी गन्त्री ॥ **रजःफलेमलाद्ग्रहः** ॥५ । १ । ९८ ॥ । फलेग्रहिर्वृक्षः । सूत्रनिर्देशादेत्वम् । मलग्रहिः कम्बलः । रजोमलाभ्यां केचिदेवेच्छन्ति ॥ **देवावातादापः** ॥ ५ । १ । ९९ ॥ कर्मण इः । देवापिः । वातापिः ॥ **शकृत्स्तम्बाद्वत्सव्रीहौ कृगः** ॥ ५ । १ । १०० ॥ कर्मणो यथासंख्यं कर्त्तरीः । शकृत्करिर्वत्सः । स्तम्बकरिर्व्रीहिः ॥ **कियत्तद्बहोरः** ॥ ५ । १ । १०१॥ कर्मणः करोतेः । किंकरः। यत्करा । तत्करा । बहुकरा । बहुकरीति सङ्ख्यावचनादुत्तरेण टः । हेत्वादौ टे किंकरीत्यपि ॥**सङ्ख्याहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्तानन्तकारबाह्वरुर्धनुर्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनि-दोषादिनदिवसाट्टः** ॥ ५ । १ । १०२ ॥ कर्मणः करोतेः । अहेत्वाद्यर्थं सूत्रम् । सङ्ख्येत्यर्थप्रधानमपि । तेनैकादिपरिग्रहः । सङ्ख्याकरः । एककरः । द्विकरः । कस्कादित्वात् सः । अहस्करः । दिवाकरः । विभाकरः । निशाकरः । प्रभाकरः । भास्करः । चित्रकरः । कर्तृकरः । आदिकरः । अन्तकरः । अनन्तकरः । कारकरः । बाहुकरः । अरुष्करः । धनुष्करः । नान्दीकरः । लिपिकरः । लिबिकरः । बलिकरः । भक्तिकरः । क्षेत्रकरः । जङ्घाकरः । क्षपाकरः । क्षणदाकरः । रजनिकरः । दोषाकरः । दिनकरः । दिवसकरः ॥ **हेतुतच्छीलानुकूले शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात्** ॥ ५ । १ । १०३ ॥ कर्त्तरि कर्मणः करोतेष्टः । यशस्करी विद्या । शोककरी कन्या । क्रीडाकरः । श्राद्धकरः । प्रेषणकरः । वचनकरः । हेत्वादिष्विति किम् ? । कुम्भकारः । शब्दादिनिषेधः किम् ? । शब्दकार इत्यादि । तच्छीले ताच्छिलिकश्च प्रत्यय उदाहार्यः॥ **भृतौ कर्मणः** ॥ ५ । १ । १०४ ॥ कर्मशब्दात् कर्मणः परात्करोतेर्भृतौ गम्यायां टः । भृतिर्वेतनम् । कर्मकरो भृतकः ॥ **क्षेमप्रियमद्रभद्रात्खाण्** ॥५।१।१०५॥ कर्मणः करोतेः । क्षेमंकरः ।

क्षेमकारः। प्रियंकरः। प्रियकारः। मद्रंकरः। मद्रकारः। भद्रंकरः। भद्रकारः। भद्रात्केचिदेवेच्छन्ति। एभ्य इति किम्?। तीर्थंकरः। हेत्वादिषु। तीर्थंकरः तीर्थकार इत्यपि कश्चित्। खोवेति सिद्धेऽणूग्रहणं हेत्वादिषु टबाधनार्थम्। कथं योगक्षेमकरी लोकस्येति। उपदविधिषु तदन्तविधेरनाश्रयणात्। अत एव संख्यादिसूत्रेऽन्तग्रहणेऽप्यनन्तग्रहणम्। उत्तरत्र च भयग्रहणेऽप्यभयग्रहणम्॥ **मेघर्त्तिभयाभयात्खः**॥ ५।१।१०६॥ कर्मणः कृगः। मेघंकरः। ऋतिंकरः। भयंकरः। अभयंकरः॥ **प्रियवशाद्वदः**॥ ५।१।१०७। कर्मणः खः। प्रियंवदः। वशंवदः॥ **द्विषन्तपपरन्तपौ**॥ ५।१।१०८॥ द्विषत्पराभ्यां कर्मभ्यां परात् ण्यन्तात्तपेः खो ह्रस्वत्वं द्विषत्तकारस्य मकारश्च निपात्यते। द्विषन्तपः। परन्तपः। निपातनस्येष्टविषयत्वादिह न। द्विषतीतापः। अण्यन्तस्य च तपेर्न। द्विषत्तापः॥ **परिमाणार्थमितनखात्पचः**॥ ५।१।१०९॥ कर्मणः खः। प्रस्थंपचा स्थाली। द्रोणंपचा दासी। मितंपचा ब्राह्मणी। नखंपचा यवागूः॥ **कूलाभ्रकरीषात्कषः**॥ ५।१।११०॥ कर्मणः खः। कूलंकषा नदी अभ्रंकषो गिरिः। करीषंकषा वात्या॥ **सर्वात्सहश्च**॥ ५।१।१११॥ कर्मणः कषः खः। सर्वंसहो मुनिः। सर्वंकषः खलः॥ **भृवृजितॄतपदमेश्च नाम्नि**॥ ५।१।११२॥ कर्मणः सहेः खः। विश्वंभरा वसुधा। पतिंवरा कन्या। शत्रुंजयः पर्वतः। रथन्तरं साम। शत्रुन्तपो राजा। दमिरन्तर्भूतण्यर्थो ण्यन्तश्च। गृह्यते। बलिं दाम्यति दमयति वा बलिंदमः कृष्णः। शत्रुंसहो राजा। नाम्नीति किम्?। कुटुम्बभारः। केचित्तु रथेन तरतीत्यकर्मणोऽपीच्छन्ति॥ **धारेर्धर्च**॥ ५।१।११३॥ कर्मणः खः संज्ञायाम्। वसु धारयतीति वसुन्धरा पृथ्वी। युगन्धरस्तीर्थंकरः॥ **पुरन्दरभगन्दरौ**॥ ५।१।११४॥ संज्ञायां खान्तौ निपात्यते। पुरन्दरः शक्रः। भगन्दरो व्याधिः। दारयतेर्ह्रस्वः पुरोऽमन्तता च निपात्यते॥ **वाचंयमो व्रते**॥ ५।१।११५॥ व्रते गम्ये वाचः कर्मणः पराद्यमः खो वाचोऽमन्तश्च स्यात्। वाचंयमो व्रती। व्रत इति किम्

? । वाग्यामोऽन्यः ॥ मन्याण्णिन् ॥ ५ । १ । ११६ ॥ कर्मणः । पण्डितमानी बन्धोः । श्यनिर्देश उत्तरार्थः । मनुतेर्निवृत्त्यर्थश्च ॥ कर्त्तुः खश् ॥ ५ । १ । ११७ ॥ प्रत्ययार्थात् कर्त्तुः कर्मणः परामन्यतेः खश् । पण्डितमात्मानं मन्यते पण्डितंमन्यः । पटुंमन्या । कर्त्तुरिति किम ? । दर्शनीयमानी चैत्रस्य ॥ एजेः ॥ ५ । १ । ११८ ॥ कर्मणः खश् । अङ्गमेजयः ॥ शुनीस्तनमुञ्जकूलास्यपुष्पात् ट्धेः ॥ ५ । १ । ११९ ॥ कर्मणः खश् । शुनिन्धयः । स्तनन्धयः । मुञ्जन्धयः । कूलन्धयः । आस्यन्धयः । पुष्पन्धयः । मुञ्जादिभ्यः केचिदेवेच्छन्ति । ट्धेष्टकारो ङ्यर्थः । स्तनन्धयी सर्पजातिः । नाडीघटीखरीमुष्टिनासिकावाताद् ध्मश्च ॥ ५ । १ । १२० ॥ कर्मणः पराट्ट्धेः खश् । नाडिंधमः । नाडिंधयः । घटिंधमः । घटिंधयः । खरिंधमः । खरिंधयः । मुष्टिंधमः । मुष्टिंधयः । नासिकन्धमः । नासिकन्धयः । वातन्धमः । वातन्धयः ङ्यन्तनिर्देशात्तदभावे न खश् नाडिंधमः । नाडिंधयः ॥ पाणिकरात् ॥ ५ । १ । १२१ ॥ कर्मणो ध्मः खश् । पाणिंधमः । करंधमः । ट्धेरपीति कश्चित् । पाणिन्धयः । करन्धयः । पाणिन्धमाः पन्थान इति तद्योगात् । मञ्चाः क्रोशन्तीतिवत् ॥ कूलादुद्रुजोद्वहः ॥ ५ । १ । १२२ ॥ कर्मणः खश् । कूलमुद्रुजो गजः । कूलमुद्वहा नदी ॥ वहाभ्राल्लिहः ॥ ५ । १ । १२३ ॥ कर्मणः खश् । वहंलिहो गौः । अभ्रंलिहः प्रासादः । बहुविध्वरुस्तिलात्तुदः ॥ ५ । १ । १२४ ॥ कर्मणः खश् । बहुन्तुदं युगम् । विधुन्तुदो राहुः । अरुन्तुदः काकः । बहोर्नेच्छन्त्यन्ये ॥ ललाटवातशर्धात्तपाजहाकः ॥ ५ । १ । १२५ ॥ कर्मणो यथासङ्ख्यं खश् । ललाटंतपः सूर्यः । वातमजा मृगाः । शर्धंजहा माषाः ॥ असूर्योग्राद् दृशः ॥ ५ । १ । १२६ ॥ कर्मणः खश् । सूर्यमपि न पश्यन्ति असूर्यंपश्या राजदाराः । असामर्थ्येऽपि गमकत्वात्ससमासः । उग्रम्पश्यः ॥ इरंमदः ॥ ५ । १ । १२७ । कर्मणः इति निवृत्तम् । इरापूर्वान्मदेः खश् श्याभावश्च निपात्यते ॥ इरम्मदः ॥ नग्नपलितप्रियान्धस्थूलसुभगा-

ढ्यतदन्ताच्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञ् ॥ ५ । १ । १२८ ॥ अनग्नो नग्नो भवति नग्नंभविष्णुः । नग्नंभावुकः । पलितंभविष्णुः । पलितंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । अन्धंभविष्णुः । अन्धंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । सुभगंभविष्णुः । सुभगंभावुकः । आढ्यंभविष्णुः । आढ्यंभावुकः । तदन्तेभ्यः । अननग्नोऽनग्नो भवति । अनग्नंभविष्णुः । अनग्नंभावुकः। सुनग्नंभविष्णुः। सुनग्नंभावुकः । अच्वेरिति किम् ?। आढ्यीभविता ॥ कृगः खनट् करणे ॥ ५ । १ । १२९ ॥ नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः । नग्नंकरणं द्यूतम् । पलितंकरणम् । प्रियंकरणम् । अन्धंकरणम् । स्थूलंकरणं दधि । सुभगंकरणम् । आढ्यंकरणम् । सुनग्नंकरणम् । अच्वेरित्येव नग्नीकुर्वन्त्यनेन अत्र खनट्प्रतिषेधसामर्थ्यादनडपि न । नहि नग्नीकरणमित्यत्र अनट्खनटो रूपे समासे स्त्रियां वा विशेषोऽस्ति । केचित्तु च्व्यन्तपूर्वादपि खनटमिच्छन्ति । नग्नीकरणं द्यूतम् ॥ भावे चाशिताद्भुवः खः ॥ ५ । १ । १३० ॥ करणे । आशितेन तृप्तेन भूयते भवता आशितंभवो भवतः । आशितो भवत्यनेन अशितंभवः । ओदनः ॥ नाम्नो गमः खड्डौ च विहायसस्तु विहः ॥ ५ । १ । १३१ ॥ खः ॥ तुरो गच्छति तुरङ्गः । भुजङ्गः । प्लवङ्गः। विहङ्गः । तुरगः । भुजगः । प्लवगः । विहगः । उरसा गच्छति उरगः । पृषोदरादित्वात् सलोपः । सुतं सुतेन वा गच्छति सुतङ्गमो नाम हस्ती । मितङ्गमोऽश्वः । तुरङ्गमोऽश्वः । भुजङ्गमः सर्पः । प्लवङ्गमो भेकः । विहङ्गमः नभसङ्गमश्च पक्षी । नभसशब्दोकारान्तोऽप्यस्ति । उरङ्गम इत्यपि कश्चित्॥सुगदुर्गमाधारे॥५।१।१३२॥ सुदुर्भ्यां गमेराधारे डः। सुगः दुर्गः पन्थाः। असरूपत्वादनडपि। सुगमनः। दुर्गमनः। सुगमः। दुर्गमः इति तु कर्मणि ॥निर्गो देशे ॥५।१।१३३॥ निःपूर्वाद्गमेराधारे डः ॥ निर्गो देशः । देश इति किम् ? । निर्गमनः ॥ शमो नाम्न्यः॥ ५ । १ । १३४ ॥ नाम्नः । शंभवोऽर्हन् । शं करोतीति शङ्करः । हेत्वादिष्वपि परत्वादयमेव । शङ्करा नाम परिव्राजिका । नाम्नीति किम् ?।

शङ्करी जिनदीक्षा ॥ **पार्श्वादिभ्यः शीङः** ॥ ५ । १ । १३५ ॥ नामभ्यः अः ॥ पार्श्वाभ्यां शेते पार्श्वशयः । पृष्ठशयः । दिग्धसहशयः । बहुवचनाद्यथादर्शनमन्येभ्योऽपि ॥ **ऊर्ध्वादिभ्यः कर्त्तुः** ॥ ५ । १ । १३६ ॥ शीङः अः ॥ ऊर्ध्वशयः । उत्तानशयः । बहुवचनं प्रयोगानुसरणार्थम् ॥ **आधारात्** ॥ ५ । १ । १३७ ॥ नाम्नः शीङः अः ॥ खशयः । गिरिश इति संज्ञायां लोमादित्वाच्छः **चरेष्टः** ॥ ५ । १ । १३८ ॥ आधारवाचिनः । कुरुचरः । कुरुचरी ॥ **भिक्षासेनादायात्** ॥ ५ । १ । १३९ ॥ चरेष्टः भिक्षाचरः । सेनाचरः । आदायचरः ॥ **पुरोऽग्रतोऽग्रे सर्त्तेः** ॥ ५ । १ । १४० ॥ टः ॥ पुरःसरः । अग्रतःसरः । अग्रेसरः । सप्तम्यलुप् । एकारान्तमव्ययं वा । सूत्रनिपातनाद्रेकारः ॥ **पूर्वात्कर्त्तुः** ॥ ५ । १ । १४१ ॥ सर्त्तेष्टः । पूर्वसरः । पूर्वो भूत्वा सरतीत्यर्थः । कर्त्तुरिति किम् ? । पूर्वं देशं सरति पूर्वसारः ॥ **स्थापास्नात्रः कः** ॥ ५ । १ । १४२ ॥ नाम्नः । समस्थः द्विपः । नदीष्णः । आतपत्रम् ॥ **शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपं प्रियालसहस्तिसूचके** ॥ ५ । १ । १४३ ॥ यथासङ्ख्यं कप्रत्ययान्तं निपात्यते । शोकापनुदः प्रियः । तुन्दपरिमृजोऽलसः । स्तम्बेरमो हस्ती । कर्णेजपः सूचकः । एष्विति किम् ? । शोकापनोदो धर्माचार्यः ॥ **मूलविभुजादयः** ॥ ५ । १ । १४४ ॥ कान्ता यथादर्शनं निपात्यन्ते । मूलविभुजो रथः । कुमुदं कैरवम् । महीध्रः शैलः ॥ **दुहेर्डुघः** ॥ ५ । १ । १४५ ॥ नाम्नः । कामदुघा गौः । असरूपत्वात्क्विप् । कामधुक् ॥ **भजो विण्** ॥ ५ । १ । १४६ ॥ नाम्नः । पादभाक् । त्रिभाक् । अर्द्धभाक् । इकार उच्चारणार्थः ॥ **मन्वन्क्वनिप्विच् क्वचित्** ॥५।१।१४७॥ नाम्नः पराद् धातोरेते प्रत्ययाः । मन्,सुशर्मा । वन्, भूरिदावा । क्वचिद्ग्रहणात्केवलादपि । शर्म । वर्म । हेम ॥वन्याङ् पञ्चमस्य ।।४।२।६५॥ वन्,विजावा । ङित्करणं ध्वावा इत्यादौ गुणनिषेधार्थम्। क्वनिप्,प्रातरित्वा । केवलादपि । कृत्वा । विच्,कीलालपाः। पाम्परेट्। केवलादपि। रेट्। रोट् ॥क्विप् ॥५।१।

१४८॥नाम्नः पराद्धातोर्यथालक्ष्यम । उखास्रत् । वहाभ्रट्। घञ्युपसर्गस्य बहुलमिति बहुलग्रहणादुभयत्र दीर्घः।शकहूः। प्रतिभूः। केवलादपि । पाः । वाः । कीः। गीः॥**गमां क्वौ** ॥ ४ । २ ।५९॥ गमादीनां यथादर्शनं क्वौ विङति लुक् । जनगत् । संयत् । परीतत् । सुमत् । सुवत् ॥ **क्वौ** ॥ ४ । ४ । ११९ ॥ शास आस इस् । मित्रशीः । आङः इतीसि आशीः ॥ **छदेरिस्मन्त्रट्क्वौ** ॥ ४ । २ । ३३ ॥ णौ ह्रस्वः । छदिः । छद्मा छत्री । उपच्छत् ॥ सदिसूद्विषद्रुहदुह-युजविदभिदछिदजिनीराजिभ्यश्च । दिविषत् । भीरुष्ठानादित्वात् षत्वम् । अण्डसूः । प्रसूः । इत्यादि । ग्रामणीः । अग्रणीः ॥ **स्पृशोऽनुदकात्** ॥ ५ । १ । १४९ ॥ नाम्नः क्विप् । घृतस्पृक् । अनुदकादिति किम् ? । उदकस्पर्शः । अनुदक इति पर्युदासादनुपसर्गं नाम गृह्यते । तेनेह न । उपस्पृशति ॥ **अदोऽनन्नात्** ॥ ५ । १ । १५० ॥ नाम्नः क्विप् । आमात् । अनन्नादिति किम ? । अन्नादः । क्विप्सिद्धोऽन्नप्रनिषेधार्थं वचनम् ॥ **क्रव्यात्क्रव्यादावामपक्वादौ** ॥ ५ । १ । १५१ ॥ क्विवणन्तौ साधू । क्रव्यात् आममांसभक्षकः । क्रव्यादः पक्वमांसभक्षकः । सिद्धौ प्रत्ययौ विषयनियमार्थं वचनम् ॥ **त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशष्टक्सकौ च** ॥ ५ । १ । १५२ ॥ व्याप्ये कर्मणि वर्त्तमानात् व्याप्य एव क्विप् । स इव दृश्यते तादृशः । तादृक्षः । तादृक् । अन्यादृशः । अन्यादृक्षः । अन्यादृक् । सदृशः । सदृक्षः । सदृक् । व्याप्ये वर्त्तमानादिति किम ? । तस्मिन्निव दृश्यते । व्याप्य एवेति किम ? । तमिव पश्यन्तीत्यत्र कर्त्तरि मा भूत् ॥ **कर्त्तुर्णिन्** ॥ ५ । १ । १५३ ॥ उपमानभूतान्नाम्नः । उष्ट्रक्रोशी । ध्वाङ्क्षरावी ॥ **अजातेः शीले** ॥ ५ । १ । १५४ ॥ नाम्नः पराद्धातोर्णिन् । उष्णभोजी । शीतभोजी । अजातेरिति प्रसज्यप्रति-षेधादसत्त्ववाचिन उपसर्गादपि । प्रत्यासारी । अजातेरिति किम ? । ब्राह्मणानामन्त्रयिता ॥ शील इति किम ? । उष्णभोज आतुरः ॥ **साधौ** ॥ ५ । १ । १५५ ॥ नाम्नः पराद्धातोर्णिन् । साधुकारी । साधुदायी । चारुनर्त्ती ।

बहुलाधिकारात्साधु वादयति गायति वेत्यादौ न । अश्लीलार्थं सूत्रम् ॥ ब्रह्मणो वदः ॥ ५ । १ । १५६ ॥ णिन् ।
ब्रह्मवादी ॥ व्रताभीक्ष्ण्ये ॥ ५ । १ । १५७ ॥ गम्ये नाम्नः पराद्धातोर्णिन् । स्थण्डिलस्थायी । क्षीरपायिणः उशी-
नराः । बहुलाधिकारादिह न । कुल्माषखादाश्चोलाः ॥करणाद्यजो भूते ॥ ५ । १ । १५८ ॥ नाम्नो णिन् । अग्नि-
ष्टोमयाजी । करणादिति किम् ? । गुरूनिष्टवान् ॥ निन्द्ये व्याप्यादिन् विक्रयः ॥ ५ । १ । १५९ ॥ नाम्नो भूते
कर्त्तरि । सोमविक्रयी । घृतविक्रयी । निन्द्य इति किम् ? । धान्यविक्रायः ॥ हनो णिन् । ५ । १ । १६० ॥ व्या-
प्यान्नाम्नो भूतार्थात् निन्द्ये कर्त्तरि । पितृव्यघाती । निन्द्य इति किम् ? । शत्रुघातः घञन्तान्मत्वर्थीयेनेना सिद्धे
भूतकुत्साभ्यामन्यत्र तन्निवृत्त्यर्थं सूत्रम् । अन्यत्रापीच्छत्यन्यः । एवं पूर्वसूत्रेऽपि ॥ ब्रह्मभ्रूणवृत्रात् क्विप् ॥ ५ ।
१ । १६१ ॥ कर्मणो भूतार्थाद्धन्तेः । ब्रह्महा । भ्रूणहा । वृत्रहा । क्विबित्यनेनैव सिद्धे नियमार्थं वचनम् । चतुर्विध-
श्चात्र नियमः । ब्रह्मादिभ्य एव । तेन पुरुषं हतवान् पुरुषघात इत्यत्र न क्विप् । हन्तेरेव, तेन ब्रह्माधीतवान् ब्रह्माध्याय
इत्यत्राणेव । क्विबेव । तेन ब्रह्माणं हतवान् ब्रह्महा इत्यत्र नाणूणिनौ । भूते एव, तेन ब्रह्माणं हन्ति हनिष्यति वा
ब्रह्मघात इत्यत्राणेव ॥ कृगः सुपुण्यपापकर्ममन्त्रपदात् ॥ ५ । १ । १६२ ॥ कर्मणो भूते वर्त्तमानात् क्विप् । सु-
कृत् । पुण्यकृत् । पापकृत् । कर्मकृत् । मन्त्रकृत् । पदकृत् । इदमपि नियमार्थम् । त्रिविधश्चात्र नियमः । कृग एव ।
तेन मन्त्राध्याय इत्यत्र न क्विप् । भूते एव । तेन कर्मकार इत्यत्र न क्विबेव । तेन कर्म कृतवान् कर्मकार इति न । एभ्य
एवेति नियमाभावात् शास्त्रकृत् तीर्थकृदित्यादि सिद्धम् ॥ सोमात्सुगः ॥ ५ । १ । १६३ ॥ कर्मणो भूतार्थात् क्विप्
सोमसुत् । अत्रापि चतुर्विधो नियमः । एवमुत्तरसूत्रेऽपि ॥ अग्नेश्चेः ॥ ५ । १ । १६४ ॥ व्याप्यात्पराद्भूतार्थात् क्विप् ।
अग्निचित् । कर्मण्यग्न्यर्थे ॥ ५ । १ । १६५ ॥ कर्मणश्चिनोतेर्भूतार्थात् कर्मणि कारके क्विप् । श्येन इव चीयते स्म

श्येनचित् । बहुलाधिकाराद्रूढिविषय एवायम् ॥ दृशः क्वनिप् ॥ ५ । १ । १६६ ॥ व्याप्याद् भूतार्थात् । मेरुदृश्वा । सामान्यसूत्रेण क्वनिपि सिद्धे भूतकाले प्रत्ययान्तरबाधनार्थं वचनम् ॥ सहराजभ्यां कृग्युधेः ॥ ५ । १ । १६७॥ कर्मभ्यां भूतार्थात् क्वनिप् । सहकृत्वा । सहयुध्वा । राजकृत्वा । राजयुध्वा । युधिरन्तर्भूतण्यर्थः । कर्मण इत्येव । राज्ञा युद्धवान् ॥ अनोर्जनेर्डः ॥ ५ । १ । १६८ ॥ कर्मणो भूतार्थात् । पुमनुजः ॥ सप्तम्याः ॥ ५ । १ । १६९ ॥ नाम्नो भूतार्थाज्जनेर्डः । उपसरजः। मन्दुरजः ॥ अजातेः पञ्चम्याः ॥ ५ । १ । १७० ॥ भूतार्थाज्जनेर्डः । बुद्धिजः। अजातेरिति किम् ? । हस्तिनो जातः ॥ क्वचित् ॥ ५ । १ । १७१ ॥ उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण डः । किंजः । अनुजः । स्त्रीजः । अजः । द्विजः । प्रजाः । उक्तधातुनामकारकेभ्योऽन्यतोऽपि । ब्रह्मज्यः । वराहः । परिखः । आखः ॥ सुयजोर्ङ्वनिप् ॥ ५ । १ । १७२॥ भूते । सुत्वा । सुत्वानौ । यज्वा । यज्वानौ । क्वनिब्वन्भ्यां सिद्धे भूते नियमार्थं वचनम् ॥ जृषोऽतृः ॥ ५ । १ । १७३ ॥ भूतार्थात् । जरन् । जरती ॥ क्तक्तवतू ॥ ५ । १ । १७४॥ धातोर्भूते । क्रियते स्म कृतः। करोति स्म कृतवान् ॥ आरम्भे ॥५।१।१०॥ आदिकर्मणि भूतादित्वेन विवक्षिते धातोर्विहितः क्तः कर्तरि वा । प्रकृतः कटं सः । प्रकृतः कटस्तेन । समुदायस्याभूतत्वेऽपि कटैकदेशे कटशब्दोपचारात्तस्य निर्वृत्तत्वाद् भूत एव धात्वर्थं इति पूर्वसूत्रेणादिकर्मण्यपि क्तक्तवतू । प्रकृतवान् कटं सः॥ श्लिषशीङ्स्थासवसजन-रुहजॄभजेः क्तः॥५।१।९॥कर्तरि वा। आश्लिष्टः कान्तां कामुकः। आश्लिष्टा कान्ता कामुकेन। आश्लिष्टं कामुकेन। अतिशयितो गुरुम् । अतिशयितो गुरुः। अतिशयितं शिष्येण । उपस्थितो गुरुं शिष्यः। उपस्थितो गुरुः शिष्येण । उपासिता गुरुं ते । उपासितो गुरुस्तैः। अनूषिता गुरुं ते । अनूषितो गुरुस्तैः। अनुजातास्तां ते । अनुजाता सा तैः। आरूढोऽश्वं सः । आरूढोऽश्वस्तेन । अनुजीर्णास्तां ते । अनुजीर्णा सा तैः । विभक्ताः स्वं ते । विभक्तं स्वं तैः॥ गत्यर्थाकर्मकपि-

वभुजेः ॥ ५ । १ । ११ ॥ कर्तरि क्तो वा । गतो मैत्रो ग्रामम् । गतो मैत्रेण ग्रामः । गतं मैत्रेण । आसितो भवान् । आसितं भवता । पयः पीता गावः। इदं गोभिः पीतम् । अन्नं भुक्तास्ते । इदं तैर्भुक्तम् ॥ अद्यर्थाच्चाधारे ॥ ५ । १ । १२ ॥ गत्यर्थाकर्मकपिबभुजेश्च क्तो वा । इदमेषां जग्धम् यातम् शयितम् पीतम् भुक्तं वा । पक्षे कर्तृकर्मभावे ॥ ह्रादो ह्रद् क्तयोश्च ॥ ४ । २ । ६७ ॥ क्तौ ॥ रदादमूर्छमदः क्तयोर्दस्य च ॥ ४ । २ । ६९ ॥ तो धातोर्दस्य च नः । ह्रन्नः । ह्रन्नवान् । पूर्णः । पूर्णवान् । भिन्नः । भिन्नवान् । अमूर्छमद इति किम् ? । मूर्तः । मत्तः । रदाचरस्येति किम् ? । चरितम् । दितम् ॥ ऋल्वादेरेषां तो नोऽप्रः ॥ ४ । २ । ६८ ॥ एषां क्तिक्तक्तवतूनाम् । तीर्णः । तीर्णवान् । लूनः । लूनवान् । धूनः । धूनवान् । अप्र इति किम् ? । पूर्तः । पूर्तवान् ॥ सूयत्याद्योदितः ॥ ४ । २ । ७० ॥ क्तयोस्तो नः । सूनः । सूनवान् । दूनः । दूनवान् । लग्नः । लग्नवान् ॥ व्यञ्जनान्तस्थातोऽख्याध्यः ॥ ४ । २ । ७१ ॥ धातोर्यद्व्यञ्जनं तस्मात्परस्या अन्तस्थायाः परादातः क्तयोस्तो नः । स्त्यानः । स्त्यानवान् । व्यञ्जनेति किम् ? । यातः । अन्तस्थेति किम् ? । स्नातः । धातोर्व्यञ्जनेति किम् ? । निर्यातः । अख्याध्य इति किम् ? । ख्यातः । ध्यातः ॥ पूदिव्यञ्चेर्नाशाद्यूतानपादाने ॥ ४ । २ । ७२ ॥ यथासंख्यं क्तयोस्तस्य नः । पूना यवाः । विनष्टा इत्यर्थः । आद्यूनः ॥ वेटोऽपतः ॥ ४ । ४ । ६२ ॥ धातोरेकस्वरात् क्तयोरादिरिड् न । समक्नः । संगत इत्यर्थः । क्त्वायां वेडयम् । अपत इति किम् ? । पतितः । नाशाद्यूतानपादान इति किम् ? । पूतम् । द्यूतम् । उदक्तमुदकं कूपात् ॥ सेर्ग्रासे कर्मकर्तरि ॥४।२।७३॥ क्तयोस्तो नः । सिनो ग्रासः। ग्रास इति किम् ?। सितं कर्म स्वयमेव । कर्मकर्तरीत्येव । सितो ग्रासो मैत्रेण ॥क्षेः क्षी चाध्यार्थे ॥ ४ । २ । ७४॥ क्षेः परस्य क्तयोस्तो नः। क्षीणः क्षीणवान् वा मैत्रः । अध्यार्थ इति किम् ? क्षितमस्य । भावे क्तः ॥ वाऽऽक्रोशदैन्ये ॥ ४ । २ । ७५ ॥ गम्ये क्षेः

परस्याद्यार्थे क्तयोस्तो नःक्षी च। क्षीणायुः क्षितायुर्वा जाल्मः।क्षीणकः क्षितकस्तपस्वी। अद्यार्थ इत्येव । क्षितं जाल्मस्य कश्चित्तु भावेऽपि विकल्पमिच्छति । भावकर्मणोर्भाषायां क्त एव नास्तीति कश्चित् ॥ ऋह्रीघ्राघ्रात्रोन्दनुदविन्तेर्वा ॥ ४ । २ । ७६ ॥ क्तयोस्तो नः । ऋणम् । ऋतम् । ह्रीणः २ । ह्रीणवान् २ । घ्राणः २ । घ्राणवान् २ । घ्राणः २ । घ्राणवान् २ । त्राणः २ । त्राणवान् २ ॥ डीङ्ञ्यैदितः क्तयोः ॥ ४ । ४ । ६१ ॥ आदिरिड् न । डीनः । शूनः । समुन्नः२। समुन्नवान् २। नुन्नः २। नुन्नवान् २। विन्नः । विन्नवान् । प्रथमाभ्यामप्राप्ते घ्रादिभ्यस्तु प्राप्ते विकल्पः। तेन दान्तानां पूर्वेण दस्यापि नत्वम् । तकारनत्वाभावपक्षे च सन्नियोगशिष्टत्वाद्दस्यापि न । व्यवस्थितविभाषेयम् । तेन ऋणमित्युत्तमर्णाधमर्णयोरेव । अन्यत्र ऋतं सत्यम् । त्रायतेः संज्ञायां न । त्रातः ॥ दुगोरू च ॥ ४ । २ । ७७ ॥ क्तयोस्तो नः । दूनः । दूनवान् । गूनः ॥ क्षैशुषिपचो मकवम् ॥ ४ । २ । ७८ ॥ क्तयोस्तो यथासंख्यम् । क्षामः। क्षामवान् । शुष्कः । शुष्कवान् । पक्वः । पक्ववान् ॥ निर्वाणमवाते ॥ ४ । २ । ७९ ॥ कर्तरि निपात्यते । निर्वाणो मुनिः । वाते तु,निर्वातो वातः । निर्वातं वातेन ॥ अनुपसर्गाः क्षीबोल्लाघकृशफुल्लोत्फुल्लसंफुल्लाः ॥ ४ । २ । ८० ॥ क्षीबृङ् उत्पूर्वो लाघृङ् केवलः परिपूर्वश्च कृशच् एभ्यः परस्य क्ततकारस्य लोप इडभावश्च निपात्यते । क्षीबः । उल्लाघः । कृशः । परिकृशः। ञिफला इत्यस्मात्केवलादुत्संपूर्वाच्च क्तस्य लादेशो भावारम्भविवक्षायामिडभावश्च निपात्यते । फुल्लः । उत्फुल्लः । संफुल्लः । केचित्तु क्तवतावपीदमिच्छन्ति । तदर्थं क्तक्तवत्वोस्तशब्दावधि निपातनम् । अत एव बहुवचनम् । अनुपसर्गा इति किम् ? । प्रक्षीबितः । निपातनस्येष्टविषयत्वात्फल निष्पत्तावित्यस्य फलित इत्येव ॥ भित्तं शकलम् ॥ ४ । २ । ८१ ॥ भिदेः परस्य क्तस्य नत्वाभावो निपात्यते शकलपर्यायश्चेत् । भित्तं शकलम् । भिन्नमन्यत् ॥ वित्तं धनप्रतीतम् ॥ ४ । २ ।८२॥ विद्यते लभ्यते इति वित्तम् धनम् । विद्यते उप-

लभ्यतेऽसौ वित्तः प्रतीतः । अन्यत्र विन्नः । वेत्तेस्तु विदितम् ॥ आदितः ॥ ४ । ४ । ७१ ॥ क्तयोरादिरिड् न । ति चोपान्त्येत्युत्वम् । प्रफुल्लः । आदितां धातूनां भावरम्भविवक्षायां वेट्त्वादन्यत्र वेटोऽपतः इति नित्यमिट्प्रतिषेधे प्राप्ते योगविभागो यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति न्यायज्ञापनार्थम् । तेन विदक् ज्ञाने, विदितः ॥ क्तयोरनुपसर्गस्य ॥ ४ । १ । ९२ ॥ पाप्यः पीः । पीनम् । पीनवन्मुखम् । अनुपसर्गस्येति किम् ? । प्रप्यानो मेघः ॥ आङोऽन्धूधसोः ॥ ४ । १ । ९३ ॥ प्यायः क्तयोः परतः पीः । आपीनोऽन्धुः । आपीनमूधः। अन्यत्र आप्यानश्चन्द्रः । आङ एवेति नियमात् । प्राप्यानमूधः ॥ स्फायः स्फीर्वा ॥ ४ । १ । ९४ क्तयोः । स्फीतः । स्फातः । स्फीतवान् । स्फातवान् ॥ प्रसमः स्त्यः स्तीः ॥ ४ । १ । ९५ ॥ प्रसंस्तीतः । प्रसंस्तीतवान् । प्रसम इति किम् ? । संप्रस्त्यानः ॥ प्रात्तश्च मो वा ॥ ४ । १ । ९६ ॥ स्त्यः क्तयोः स्तीः । प्रस्तीमः । प्रस्तीतः ॥ श्यः शीर्द्रवमूर्त्तिस्पर्शे नश्चास्पर्शे ॥ ४।१।९७ ॥ मूर्तिः काठिन्यम् । द्रवमूर्त्तिस्पर्शार्थस्य श्यः क्तयोः शीः तद्योगे च क्तयोस्तोऽस्पर्शविषये नश्च । शीनम् । शीनवद् घृतम् । शीतं वर्तते । शीतो वायुः ॥ प्रतेः ॥ ४ । १ । ९८ ॥ श्यः क्तयोः परतः शीः क्तयोस्तस्य नश्च । प्रतिशीनः । प्रतिशीनवान् ॥ वाऽभ्यवाभ्याम् ॥ ४ । १ । ९९ ॥ श्यः क्तयोः शीस्तद्योगे क्तयोस्तस्य नश्चास्पर्शे । अभिशीनः। अभिशीनवान् । अभिश्यानः। अभिश्यानवान्। अवशीनः। अवशीनवान् । अवश्यानः अवश्यानवान् । पर्शे तु,अभिशीतो वायुः। अभ्यवाभ्यामिति किम् ?। संश्यानः ॥ श्रः शृतं हविःक्षीरे ॥४।१।१००॥ श्रातेः श्रायतेश्च क्ते हविषि क्षीरे चार्थे शृर्निपात्यते । शृतं हविः शृतं क्षीरं स्वयमेव । अन्यत्र श्राणा यवागूः ॥ श्रपेः प्रयोक्त्रैक्ये ॥ ४ । १०१ ॥ श्रातेः श्रायतेर्वा ण्यन्तस्य प्रयोक्त्रैक्ये क्ते हविःक्षीरयोः शृर्निपात्यते । शृतं हविः क्षीरं वा चैत्रेण । अन्यत्र श्रपिता यवागूः प्रयोक्त्रैक्य इत्येव । श्रपितं हविश्चैत्रेण मैत्रेण । लग्नकृच्छ्योरुपतापाङ्गविकृत्योः ॥

॥ ४ । २ । ४७ ॥ उपान्त्यनः विङति लुक् । विलिगितः । विकपितः। उपतापाङ्गविकृत्योरिति किम ? । विलङ्गितः । विकम्पितः ॥ उति शवहङ्कः क्तौ भावारम्भे ४ । ३ । २६ ॥ उपान्त्ये सति सेटौ वा किद्वत् । कुचितम । कोचितमनेन । प्रकुचितः । प्रकोचितः। रुदितम २ । प्ररुदितः २ ॥ न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः ॥ ४ । ३ । २७ ॥ सेटौ क्तक्तवतू किद्वत् । डयितः । डयितवान् । शयितः । शयितवान् ॥ पूङ्क्लिशिभ्यो नवा ॥ ४ । ४ । ४५ ॥ क्तक्तवतुक्त्वामादिरिट् । पवितः । पूतः । क्लिशितः । क्लिष्टः । प्रधर्षितः । प्रक्ष्वेदितः । प्रस्वेदितः । प्रमेदितः । सेटावित्येव । डीनः । डीनवान् ॥ मृषः क्षान्तौ ॥ ४ । ३ । २८ ॥ सेटौ क्तक्तवतू न किद्वत् । मर्षितः । मर्षितवान् । क्षान्ताविति किम ? । अपमृषितं वाक्यमाह । सासूयमित्यर्थः सेट्क्तयोः ॥ ४ । ३ । ८४ ॥ णेर्लुक् । कारितः।कारितवान् ॥प्राद्दागस्त आरम्भे क्ते ॥ ४ । ४ । ७॥ वा । प्रत्तम । प्रदत्तम । प्रादिति किम ?। परीत्तम॥ निविस्वन्ववात् ॥ ४ । ४ । ८ ॥ दागः क्ते त्तो वा । नीत्तम । निदत्तम । वीत्तम २ । सूत्तम २ । अनूत्तम २। अवत्तम २ ॥ स्वरादुपसर्गाद्दस्ति कित्यधः॥ ४ । ४ । ९ ॥ त्तो नित्यम । प्रत्तः । परीत्त्रिमम । उपसर्गादिति किम ? । दधि दत्तम । स्वरात्किम । निर्दत्तम । दासंज्ञकस्येतिकिम । प्रदाता व्रीहयः । तीति किम ? । प्रदायः । अध इति किम?। निधीतः॥ दत् ॥ ४ । ४ । १०॥ अधो दासंज्ञकस्य तादौ किति । दत्तः। अध इत्येव । धीतः॥दोसोमास्थ इः ॥ ४ । ४ । ११ ॥ तादौ किति । दितः । सितः । मितः । स्थितः ॥ छाशोर्वा ॥ ४ । ४ । १२ ॥ तादौ कितीः । अवच्छितः । अवच्छातः । निशितः । निशातः ॥ शो व्रते ॥ ४ । ३ । १३॥ श्यतेः क्ते व्रतविषये प्रयोगे नित्यमिः संशितं व्रतम । संशितः साधुः ॥ धागः ॥ ४ । ४ । १५ ॥ तादौ किति हिः । विहितः॥ यपि चादोजग्ध् ॥ ४ । ४ । १६ ॥ तादौ किति । जग्धः ॥ क्तयोः ॥ ४ । ४ । ४० ॥ निष्कुषः परायोरादिरिट् । निष्कुषितः । निष्कुषि-

तवान् ॥ **क्षुधवसस्तेषाम्** ॥ ४ । ४ । ४३ ॥ क्तक्तवतुक्त्वामादिरिट् । क्षुधितः। उषितः ॥ **लुभ्यञ्चेर्विमोहार्चे** ॥ ४ । ४ । ४४ ॥ यथासंख्यं क्तक्तवतुक्त्वामादिरिट् । विलुभितः । अञ्चितः । विमोहार्चे इति किम ?। लुब्धो जाल्मः। उदक्तं जलम् ॥ **संनिवेरर्दः** ॥ ४ । ४ । ६३ ॥ क्तयोरादिरिड् न । समर्णः । न्यर्णः । व्यर्णः । संनिवेरिति किम ? । अर्दितः ॥ **अभिदूरेऽभेः** ॥ ४ । ४ । ६४ ॥ अभ्यर्णः । अन्यत्र । अभ्यर्दितो दीनः शीतेन ॥ **वर्त्तेर्वृत्तं ग्रन्थे** ॥ ४ । ४ । ६५ ॥ वृतेर्ण्यन्तात् क्ते ग्रन्थविषये वृत्तं निपात्यते । वृत्तो गुणश्छात्रेण । अन्यत्र वर्त्तितं कुङ्कुमम् ॥ **धृषशसः प्रगल्भे** ॥ ४ । ४ । ६६ ॥ आभ्यां परयोः क्तयोः प्रगल्भ एवार्थे आदिरिड् न । धृष्टः । विशस्तः । प्रगल्भ इति किम ? । धर्षितः । विशसितः ॥ **कषः कृच्छ्रगहने** ॥ ४ । ४ । ६७ ॥ क्तयोरादिरिड् न । कष्टं दुःखम् । कष्टं वनम् । दुरवगाहमित्यर्थः । अन्यत्र कषितं स्वर्णम् ॥ **घुषेरविशब्दे** ॥ ४ । ४ । ६८ ॥ क्तयोरादिरिड् न । घुष्टा रज्जुः । अन्यत्र अवघुषितं वाक्यम् ॥ **बलिस्थूले दृढः** ॥ ४ । ४ । ६९ ॥ दृहेर्दृंहेर्वा क्तान्तस्य निपात्यते । दृढः । अन्यत्र दृहितम् । दृंहितम् ॥ **क्षुब्धविरिब्धस्वान्तध्वान्तलग्नम्लिष्टफाण्टबाढपरिवृढं मन्थस्वरमनस्तमःसक्तास्पष्टानायासभृशप्रभौ** ॥ ४ । ४ । ७० ॥ निपात्यते । क्षुब्धः समुद्रः । क्षुब्धं वल्लवैः । विरिब्धः स्वरः । रिभः सौत्रः । रेभेर्वा इत्वं निपातनात् । स्वान्तं मनः । ध्वान्तं तमः । लग्नं सक्तम् । म्लिष्टमस्पष्टम् । फाण्टमनायाससाध्यम् । बाढं भृशम् । परिवृढः प्रभुः ॥ **नवा भावारम्भे** ॥ ४ । ४ । ७२ ॥ आदितो धातोः क्तयोरादिरिड् न । मिन्नम् । मेदितम् । प्रमिन्नः । प्रमेदितः ॥ **शकः कर्मणि** ॥ ४ । ४ । ७३ ॥ क्तयोरादिरिड् वा न । शक्तः शकितो वा घटः कर्त्तुम् **णौ दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्तम्** ॥ ४ । ४ । ७४ ॥ क्तान्तानां दमादीनामेते वा निपात्यन्ते । दान्तः । दमितः । शान्तः । शमितः । पूर्णः । पूरितः । दस्तः । दासितः ।

स्पष्टः । स्पाशितः । छन्नः । छादितः । ज्ञप्तः । ज्ञापितः ॥श्वसजपवमरुषत्वरसंघुषास्वनामः ॥ ४ । ४ । ७५ ॥ क्तयोरादिरिड् वा न । श्वस्तः । श्वसितः । विश्वस्तवान् २ । जप्तः २ । वान्तः २ । रुष्टः २ । तूर्णः २ । संघुष्टः २ । आस्वान्तः २ । अभ्यान्तः २ ॥ हृषेः केशलोमविस्मयप्रतिघाते ॥ ४ । ४ । ७६ ॥ क्तयोरादिरिड् वा । हृष्टा हृषिता वा केशाः । हृष्टं हृषितं लोमभिः । हृष्टो हृषितश्चैत्रः । हृष्टा हृषिता दन्ताः । केशलोमकर्तृका क्रिया केशलोमशब्देनोच्यते ॥ अपचितः ॥ ४ । ४ । ७७ ॥ अपाच्चायेः क्तान्तस्य इडभावश्चिचश्च निपात्यते वा । अपचितः । अपचायितः ॥ तत्र क्वसुकानौ तद्वत् ॥ ५ । २ । २ ॥ परोक्षामात्रविषये धातोः परौ क्वसुकानौ, तौ च परोक्षेव । तत्र क्वसुः परस्मैपदत्वात्कर्त्तरि । कानस्त्वात्मनेपदत्वाद्भावकर्मणोरपि । शुश्रुवान् । पेचानः । बहुलाधिकारात् श्रुसदवसभ्यः कानो न भवति ॥ घसेकस्वरातः क्वसोः ॥ ४ । ४ । ८२ ॥ परोक्षाया आदिरिट् । जक्षिवान् । आदिवान् । सेदिवान् । ऊषिवान् । पेचिवान् । ययिवान् । परोक्षाया इत्येव । विद्वान् । स्क्रसृ इत्यादिना सिद्धे एभ्य एव क्वसोदिरिट् इति नियमार्थं वचनम् ॥गमहनविद्लृविशदृशोवा॥ ४ । ४ । ८३॥ क्वसोरादिरिट् । जग्मिवान् । जगन्वान् । जघ्निवान् । जघन्वान् । विविदिवान् । विविद्वान् । विविशिवान् । विविश्वान् । ददृशिवान् । ददृश्वान् ॥ वेयिवदनाश्वदनूचानम् ॥ ५ । २ । ३ ॥ भूते क्वसुकानान्तं कतरि निपात्यते । इणः क्वसुर्निपात्यते । ईयिवान् । समीयिवान् । नञोऽश्नातेः क्वसुरिडभावश्च । अनाश्वान् । अनोर्वचेर्वृगादेशाद्वा कानः । अनूचानः । पक्षेऽद्यतन्यादिः । निपातनस्येष्टविषयत्वात्कर्तुरन्यत्र अनूक्तमित्याद्येव ॥ दाश्वत्साह्वन्मीढ्वत् ॥ ४ । १ । १५॥ एते क्वसावकृतद्वित्वादयो निपात्यन्ते । दाश्वान् । दाश्वांसौ । साह्वान् । मीढ्वान् ॥ शत्रानशावेष्यति तु सस्यौ ॥ ५ । २ । २० ॥ सदर्थाद्धातोः । यान् । शयानः । यास्यन् ॥ अतो म आने ॥ ४ । ४ । ११४ ॥ शयिष्यमाणः ॥ पचमानः । अत इति

किम् ? । शयानः ॥ आसीनः ॥ ४ । ४ । ११५ ॥ आस्तेः परस्यानस्यादेरीर्निपात्यते । आसीनः । उदासीनः ॥ तौ माङ्याक्रोशेषु॥ ५ । २ । २१॥ मा पचन् वृषलो ज्ञास्यति । मा पचमानोऽसौ मर्तुकामः "मा जीवन् यः परावज्ञा–दुःखदग्धोऽपि जीवति । तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥ १ ॥" शत्रानशोरनुवृत्तावपि तौग्रहणमवधारणार्थम् । तेनात्र विषयेऽसरूपविधिनाऽप्यद्यतनी न । भवतीत्यपि कश्चित् ॥ वा वेत्तेः क्वसुः ॥ ५ । २ । २२॥ सदर्थात् । तत्त्वं विद्वान् । विदन् ॥ पूङ्यजः शानः ॥ ५ । २ । २३ ॥ सदर्थात् । पवमानः । यजमानः । आनशायोगे न षष्ठीसमासो न च यजेरफलवति कर्तरि सोऽस्तीति वचनम् ॥ वयःशक्तिशीले ॥ ५ । २ । २४ ॥ गम्ये सदर्थाद्धातोः शानः । स्त्रियं गच्छमानाः । समश्नानाः । परान्निन्दमानाः ॥ धारीङोऽकृच्छ्रेऽतृश् ॥ ५ । २ । २५ ॥ सत्यर्थे वर्तमानात् । धारयन्नाचाराङ्गम् । अधीयन् द्रुमपुष्पीयम् ॥ सुग्द्विषार्हः सत्रिशत्रुस्तुत्ये ॥ ॥५।२। २६॥ सदर्थादतृश् । सर्वे सुन्वन्तः। चौरं द्विषन् । पूजामर्हन् । एष्विति किम् ? । सुरां सुनोति ॥तृन् शीलधर्मसाधुषु ॥ ५ । २ । २७ ॥ सदर्थाद् धातोः । शीले, कर्ता कटम् । धर्मः कुलाद्याचारस्तत्र, वधूमूढां मुण्डयितारः श्राविष्ठायनाः । साधौ, गन्ता खेलः । साधु गच्छतीत्यर्थः । बहुवचनं सन्भिक्षाशंसेरुरित्यादौ यथासंख्यपरिहारार्थम्॥ भ्राज्यलंकृग्निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः ॥ ५ । २ । २८ ॥ शीलादिसदर्थात् । भ्राजिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । भविष्णुः । सहिष्णुः । रोचिष्णुः । वर्तिष्णुः । वर्धिष्णुः । चरिष्णुः । प्रजनिष्णुः । अपत्रपिष्णुः । भ्राजेर्नेच्छन्त्येके ॥ उदः पचिपतिपदिमदेः ॥ ५ । २ । २९ ॥ शीलादिसदर्थादिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उत्पदिष्णुः । उन्मदिष्णुः ॥ भूजेः ष्णुक् ॥ ५ । २ । ३०॥ शीलादिसदर्थात् । भूष्णुः। जिष्णुः ॥ स्थाग्लाम्लापचिपरिमृजिक्षेः स्नुः ॥ ५ । २ । ३१ ॥ शीलादिसदर्थात् । स्थास्नुः । ग्लास्नुः । म्ला-

स्नुः । पस्नुः । परिमास्नुः । क्षेष्णुः । म्लादिभ्यः केचिदेवेच्छन्ति ॥ **त्रसिगृधिधृषिक्षिपः क्नुः** ॥ ५ । २ । ३२॥ शीलादिसदर्थात् । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥ **सन्भिक्षाशंसेरुः** ॥ ५ । २ । ३३ ॥ शीलादिसदर्थात् । चिकीर्षुः । भिक्षुः । आशंसुः ॥ **विन्दिच्छू** ॥ ५ । २ । ३४ ॥ शीलादिसदर्थाभ्यां वेत्तीच्छतिभ्यामुर्यथासंख्यं नुपान्त्यच्छादेशौ च निपात्येते । विन्दुः । इच्छुः ॥ **शॄवन्देरारुः** ॥ ५ । २ । ३५ ॥ शीलादिसदर्थात् । विशरारुः । वन्दारुः ॥ **दाधेसिशदसदो रुः** ॥५।२।३६॥ शीलादिसदर्थात् । दारुः। धारुः । सेरुः । शद्रुः सद्रुः। ट्धेग्रहणाद्दारूपमिह गृह्यते न संज्ञा ॥ **शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः**॥ ५ । २ । ३७ ॥ शीलादिसदर्थात् । शयालुः । श्रद्धालुः । निद्रालुः । तन्द्रालुः । निपातनात्सदो दस्य नः। तन्द्रेति सौत्रो वा । दयालुः । पतिगृहिस्पृहयोऽदन्ताश्चौरादिकाः । पतयालुः । गृहयालुः । स्पृहयालुः । मृगयतेरपि कश्चित् । मृगयालुः ॥ **ङौ सासहिवावहिचाचलिपापति** ॥ ५ । २ । ३८ ॥शीलादिसदर्थानां सहिवहिचलिपतीनां यङन्तानां ङौ सति यथासंख्यमेते निपात्यन्ते। अत एव वचनान्ङिरपि । सासहिः। वावहिः। चाचलिः । पापतिः। निपातनान्न्यागमाभावः ॥ **सस्त्रिचक्रिदधिजज्ञिनेमि** ॥ ५ । २ । ३९ ॥ एते शीलादिसदर्थाः कृतद्विर्वचना ङिप्रत्ययान्ता निपात्यन्ते । सरातीत्येवं शीलः सस्त्रिः । चक्रिः । दधिः । जज्ञिः । नेमिः । एत्वद्वित्वाभावौ निपातनात् ॥ **शॄकमगमहनवृषभूस्थ उकण्** ॥ ५ । २ । ४० ॥ शीलादिसदर्थात् । शारुकः । कामुकः । आगामुकः । घातुकः । वर्षुकः । भावुकः । स्थायुकः ॥ **लषपतपदः** ॥ ५ । २ । ४१ ॥ शीलादिसदर्थादुकण् । अभिलाषुकः । उत्पातुकं ज्योतिः । उपपादुका देवाः । योगविभाग उत्तरार्थः ॥ **भूषाक्रोधार्थजुसृगृधिज्वलशुचश्चानः** ॥ ५ । २ । ४२ ॥ शीलादिसदर्थात् लषपतपादः । भूषणः कुलस्य । क्रोधनः । कोपनः । जवतिः सौत्रो वेगाख्ये संस्कारे वर्तते । जवनः। सरणः। गर्धनः। ज्वलनः। शोचनः। अभिलषणः ।

पतनः। अर्थस्य पदनः। पदेरिदित्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम् । उत्तत्र सकर्मकेभ्योऽपि विधिरित्येकेषां दर्शनम्। तन्मते शीलादिप्रत्ययेषु वासरूपविधेरप्रवृत्तिज्ञापनार्थम् तेन चिकीर्षिता कटमित्यादि न भवति। कथं तर्हि कम्पना कम्प्रा शाखेति । न ण्यादिसूत्रे दीपिग्रहणात्क्वचिद् वासरूपविधिप्रवृत्तेः॥ चलशब्दार्थादकर्मकात्॥५।२।४३॥ शीलादिसदर्थादनः॥ चलनः। कम्पनः। शब्दनः। रवणः। अकर्मकादिति किम् ?। पठिता विद्याम् ॥इङितो व्यञ्जनाद्यन्तात्।.५।२।४४॥ शीलादिसदर्थादनः । स्पर्धनः । वर्तनः । णेरतश्च विषय एव लोपे व्यञ्जनान्तत्वादिहापि । चितण् । चेतनः। जुगुप्सनः व्यञ्जनाद्यन्तादिति किम् ?। एधिता । शयिता । अकर्मकादित्येव । वसिता वस्त्रम् ॥ न णिङ्यसूददीपदीक्षः ॥ ५ । २ । ४५ ॥ शीलादिसदर्थादनः । भावयिता । क्ष्मायिता । सूदिता । दीपितादीक्षिता कथं मधुसूदन इति । नन्द्यादिषु पाठाद् भविष्यति ॥ द्रमक्रमो यङः ॥ ५ । २ । ४६ ॥ शीलादिसदर्थादनः । दन्द्रमणः । चङ्क्रमणः । सकर्मकार्थं वचनम् य इति प्रतिषेधनिवृत्त्यर्थं च ॥ यजिजपिदंशिवदादूकः ॥ ५ । २ । ४७ ॥ यङन्ताच्छीलादिसदर्थात् । यायजूकः । जजपूकः । दन्दशूकः । वावदूकः । अन्येभ्योपीति केचित् । दंदहूकः ॥ जागुः ॥ ५ । २ । ४८ ॥ शीलादिसदर्थादूकः । यङ इति निवृत्तम् । जागरूकः । शमष्टकाद् घिनण् ॥ ५ । २ । ४९ ॥ शीलादिसदर्थात् । शमी । दमी । तमी । श्रमी । भ्रमी । क्षमी । प्रमादी । क्लमी । घञन्तान्मत्वर्थीयेन सिद्धे तृन्बाधनार्थं सूत्रम् ॥ युजभुजभजत्यजरञ्जद्विषदुषद्रुहदुहाभ्याहनः ॥ ५ । २ । ५० ॥ शीलादिसदर्थाद् घिनण् । योगी । भोगी । भागी । त्यागी ।अकट् घिनोश्च रञ्जेः रागी । द्वेषी । दोषी । द्रोही दोही अभ्याघाती ।अकर्मकादित्येव । गां दोग्धा॥ आङः क्रीडमुषः॥५।२।५१॥ आक्रीडी । आमोषी.। शीलार्थं प्रत्ययान्ताः प्रायेण रूढिप्रकारा यथादर्शनं प्रयुज्यन्ते तेनोपसर्गान्तराधिक्ये न । एवमुत्तरत्रापि ॥ प्राच्च यमयसः॥५।२।५२॥ आङः शीलादिसदर्थाद् घिनण्।प्रयामी । अयामी। प्रयासी।

आयासी ॥ **मथलपः** ॥ ५ । २ । ५३ ॥ प्राच्छीलादिसदर्थाद्घिनण् । प्रमाथी । प्रलापी ॥ **वेश्च द्रोः** ॥ ५ । २ । ५४ ॥ प्राच्छीलादिसदर्थाद्घिनण् । विद्रावी । प्रद्रावी ॥ **विपरिप्रात्सर्तेः** ॥ ५ । २ । ५५ ॥ शीलादिसदर्थाद्घिनण् । विसारी । परिसारी । प्रसारी ॥ **समःपृचैप्ज्वरेः** ॥ ५ । २ । ५६ ॥ शीलादिसदर्थाद्घिनण् । सम्पर्की । संज्वारी । ण्यन्तादपि केचिदिच्छन्ति । संज्वरी ॥ त्वरयतेरपि कश्चित् । संत्वरी ॥ **संवेःसृजः** ॥ ५ । २ । ५७ ॥शीलादिसदर्थाद्घिनण् । संसर्गी । विसर्गी ॥ **संपरिव्यनुप्राद्वदः** ॥ ५ । २ ।५८॥ शीलादिसदर्थाद्घिनण् । संवादी। परिवादी । विवादी । अनुवादी । प्रवादी ॥ **वेर्विचकत्थस्रम्भुकषकसलसहनः** ॥ ५ । २ । ५९ ॥ शीलादिसदर्थाद्घिनण् । विवेकी । विकत्थी । विस्रम्भी । विकाषी । विकासी । विलासी । विघाती । **व्यपाभेर्लषः**॥ ५ । २ ।६० ॥शीलादिसदर्थाद्घिनण् । विलापी । अपलाषी । अभिलाषी ॥ **संप्राद्वसात्** ॥ ५ । २ । ६१ ॥ शीलादिसदर्थाद्घिनण् । संवासी । प्रवासी । शब्निर्देशाद्वस्तेर्न ॥ **समत्यपाभिव्यभेश्चरः** ॥ ५ । २ । ६२ ॥ शीलादिसदर्थाद्घिनण् । संचारी । अतिचारी । अपचारी। अभिचारी । व्यभिचारी ॥ **समनुव्यवाद्रुधः** ॥ ५ । २ । ६३ ॥ शीलादिसदर्थाद्घिनण । संरोधी । अनुरोधी । विरोधी । अवरोधी ॥ **वेर्दहः** ॥ ५ । २ । ६४॥ शीलादिसदर्थाद्घिनण् । विदाही॥ **परेर्देविमुहश्च** ॥ ५ । २ ।६५॥दहः शीलादिसदर्थाद्घिनण् । देवीति देवृधातोर्ण्यन्तस्य ण्यन्तस्य च ग्रहणम् । परिदेवी । परिमोही । परिदाही ॥ **क्षिपरटः** ॥ ५ । २ । ६६ ॥ परेः शीलादिसदर्थाद्घिनण् । परिक्षेपी । परिराटी ॥ **वादेश्च णकः** ॥ ५ । २ । ६७ ॥ शीलादिसदर्थात्परेः क्षिपरटः । परिवादकः । वदेरपिकश्चिदिच्छति । परिक्षेपकः । परिराटकः । णकतृचाविति सिद्धे पुनर्विधानमसरूपविधिना शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययो नेति ज्ञापनार्थम् ॥ **निन्दहिंसक्लिशखादविनाशिव्याभाषासूयानेकस्वरात्** ॥ ५ । २ । ६८ ॥ शीलादिसदर्थाण्णकः । निन्दकः ।

हिंसकः । क्लेशकः । खादकः । विनाशकः । व्याभाषकः । असूयकः । दरिद्रायकः। अनेकस्वरत्वादेव सिद्धेऽसूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम् । विनाशिग्रहणमन्यस्य ण्यन्तस्य निवृत्त्यर्थम्। अनेकस्वरान्नेच्छन्त्यन्ये ।: उपसर्गाद्देवृदेविक्रुशः ॥ ५ । २ । ६९ ॥ शीलादिसदर्थाण्णकः । आदेवकः । परिदेवकः । आक्रोशकः । परिक्रोशकः । वृङ्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः ॥ ५ । २ । ७० ॥ शीलादिसदर्थात् । वराकः । वराकी । भिक्षाकः । लुण्टाकः । जल्पाकः । कुट्टाकः ॥ प्रात्सुजोरिन् ॥ ५ । २ । ७१ ॥ शीलादिसदर्थात् । प्रसवी । प्रजवी ॥ जीण्दृक्षिविश्रिपरिभूवमाभ्यमाव्यथः ॥ ५ । २ । ७२ ॥ शीलादिसदर्थादिन् । जयी । अत्ययी । आदरी । क्षयी । विश्रयी । परिभवी । वमी । अभ्यमी । अव्यथी ॥ सृघस्यदो मरक् ॥ ५ । २ । ७३ ॥ शीलादिसदर्थात् । सृमरः । घस्मरः । अद्मरः ॥ भञ्जिभासिमिदो घुरः ॥ ५ । २ । ७४ ॥ शीलादिसदर्थात् । भङ्गुरं काष्ठम् । भासुरं वपुः । मेदुरः ॥ वेत्तिच्छिद्भिदः कित् ॥ ५ । २ । ७५ ॥ शीलादिसदर्थाद् घुरः । विदुरः । छिदुरः । भिदुरः ॥भियो रुरुकलुकम् ॥ ५ । २ । ७६ ॥ शीलादिसदर्थात्कित् । भीरुः । भीरुकः । भीलुकः ॥ सृजीण्नशष्ट्वरप् ॥ ५ । २ । ७७ ॥ शीलादिसदर्थात्कित् । सृत्वरः । सृत्वरी । जित्वरः । इत्वरः । नश्वरः ॥ गत्वरः ॥ ५ । २ । ७८ ॥ शीलादिसदर्थाद्गमः ष्ट्वरप् मश्च तो निपात्यते । गत्वरः । गत्वरी ॥ स्म्यजसहिंसदीपकम्पकमनमोरः ॥ ५ । २ । ७९॥ शीलादिसदर्थात्। स्मेरं मुखम्। न जस्यति अजस्रम् श्रवणम्। हिंस्रः। दीप्रः। कम्प्रः। कम्रा युवतिः। बहुलाधिकारत्कर्मण्यपि, कम्यते इति कम्रः ॥ तृषिधृषिस्वपो नजिङ् ॥ ५ । २ ।८०॥ शीलादिसदर्थात् । तृष्णक् । तृष्णजौ । धृष्णक् । स्वप्नक् ॥ स्थेशभासपिसकसो वरः ॥ ५ । २ । ८१॥ शीलादिसदर्थात् । स्थावरः । ईश्वरः । कथमीश्वरीति । अश्नोतीशादेरिण्यौणादिके वरटि । भास्वरः । पेस्वरः । विकस्वरः ॥ यायावरः ॥ ५ । २ । ८२ ॥ यातेर्यङन्ताच्छीलादिसदर्थाद्वरः।

यायावरः ॥ **दिद्युद्ददृज्जगज्जुहूवाक्प्राड्धीश्रीद्रूस्रूज्वायतस्तूकटप्रूभ्राजादयः क्विपः** ॥ ५। २। ८३॥ एते शब्दाः क्विबन्ताः शीलादौ सत्यर्थे निपात्यन्ते । दिद्युत् । दृणातीति ददृत् । जगत् । जुहूः। एषु द्वित्वम् । दृणातिजुहोत्योर्ह्रस्वत्वदीर्घत्वे च । वक्तीति वाक् । पृच्छतीति प्राट् । प्राशौ । दधाति ध्यायति वा धीः श्रीः । शतद्रूः । स्रूः । जूः। आयतस्तूः। कटप्रूः।परिव्राट् । एषु दीर्घत्वम् । दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकारः । बहुलाधिकारादशीलादावपि । धीः। सुधीः।प्रधीः। भ्राजादि, विभ्राट् । भाः। भासौ । भुवः संज्ञायामेव । भूः पृथ्वी । शंभूः शिवः । प्रतिभूः उत्तमर्णाधमर्णयोरन्तरस्थः ।: शीलादिष्वसरूपविधिर्नास्तीति सामान्यलक्षणक्विपोऽप्राप्त्या पुनर्विधिः ॥ इति शीलादिप्रत्ययाः ॥

---

**शंसंस्वयंविप्राद् भुवो डुः** ॥ ५ । २ । ८४ ॥ सत्यर्थे । शं सुखं तत्र भवति । शम्भुः शंकरः । सम्भुर्जनिता । स्वयंभुः । विभुः । प्रभुः॥ **पुव इत्रो दैवते** ॥ ५ । २ । ८५॥ सदर्थात् कर्तरि । पुनाति पवते वा पवित्रोऽर्हन् । करणेऽप्यन्ये ॥ **ऋषिनाम्नोः करणे** ॥ ५ । २ । ८६॥ सदर्थात् पुव इत्रः। पवित्रोऽयमृषिः । पवित्रो दर्भः। ऋषौ कर्तर्यपि केचित् ॥ **लूधूसूखनचरसहार्तेः** ॥ ५ । २ । ८७ ॥ सदर्थात् करणे इत्रः । लुनात्यनेन लवित्रम् । धुवित्रम् । सवित्रम् । निरनुबन्धत्वान्न धूग्सूङोर्ग्रहणं किन्तु धुवतिसुवत्योरेव।धूनोतेरपि कश्चित् । खनित्रम् । चरित्रम् । सहित्रम् । अरित्रम् ॥ **नीदांवृशस्युयुजस्तुतुदसिसिचमिहपतपानहस्त्रट्** ॥ ५ । २।८७॥ सदर्थात् करणे । नेत्रम् । दात्रम् । त्रवर्जनान्नेट् । शस्त्रम् ।योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । पात्रम् । नद्ध्रीः ॥ **हलक्रोडास्ये पुवः** ॥ ५ । २ । ८८ ॥ सदर्थात् करणे त्रट् । पोत्रम् । हलस्य सूकरस्य च मुखम् ॥ **दंशेस्त्रः** ॥ ५ । २ । ९० ॥ सदर्थात् करणे । दंष्ट्रा ॥ **धात्री** ॥ ५ । २ । ९१ ॥ ट्धेर्धागो वा कर्मणि त्रट् । धात्री स्तनदायि-

न्यामलकी च ॥ ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः ॥ ५ । २ । ९२ ॥ सत्यर्थे । राज्ञां ज्ञातो बुद्ध इष्टो मतोऽर्चितः पूजितः । ञीत्, ञिमिदा, मिन्नः । क्ष्विण्णः । शील्यादि,शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट उद्यतः । संयतः शयितस्तुष्टो । रुष्टो । रुषितः । आशितः ।१। कान्तोऽभिव्याहृतो हृष्टस्तृप्तः सृप्तः स्थितो भृतः । अमृतो मुदितः पूर्तः शक्तोऽक्तः श्रान्तविस्मितौ ।२। संरब्धारब्धदयिता दिग्धः स्निग्धोऽवतीर्णकः। आरूढो मूढ आयस्तः क्षुधितक्लान्तव्रीडिताः । ३ । मत्तश्चैव तथा क्रुद्धः श्लिष्टः सुहित इत्यपि । लिप्तदृप्तौ च विज्ञेयौ सति लग्नादयस्तथा । ४ । बहुलाधिकाराद्यथाभिधानमेभ्यो भूतेऽपि क्तो भवति । तथा च तृतीयासमासोपि सिद्धः'अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः इति' वर्तमानक्ते तु षष्ठ्येव । कान्तो हरिश्चन्द्र इव प्रजानामिति । अन्ये तु ज्ञानाद्यर्थेभ्यः तक्रकौण्डिन्यन्यायेन भूते क्तस्य वर्तमानक्तेन बाधात् त्वया ज्ञातो मया ज्ञात इत्यादिरपशब्द इति मन्यन्ते ॥

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां पूर्वकृदन्तप्रक्रिया ॥

## ॥ अथोणादयः ॥

उणादयः ॥ ५ । २ । ९३ ॥ सत्यर्थे वर्तमानाद्धातोर्बहुलम् ॥ भीमादयोऽपादाने ॥ ५ । १ । १४ ॥ बिभेत्यस्मादिति भीमः । एवं भीष्मः । भयानकः ॥ संप्रदानाच्चान्यत्रोणादयः ॥ ५ । १ । १५ ॥ अपादानात् । करोतीति कारुः । वायुः । पायुः । बहुलवचनात् प्रायः संज्ञाशब्दाः केचित्त्वसंज्ञाशब्दा इत्यनुक्ता अपि प्रत्यया भवन्ति ।

ऋफिडः। ऋफिड्डः। क्वचिद् भूतेऽपि। भसितं तदिति भस्म। कषितोऽसौ कषिः। ऋचन्ति तयेति ऋक्। उक्तं च— संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्य्यानुबन्धोपपदं विज्ञातव्यमुणादिषु ॥ १ ॥ तथा दाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम्। कार्यसशेषविधेश्च तदूह्यं नैगमरूढिभवं हि सुसाधु ॥ २ ॥ नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्। यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥ ३ ॥

## ॥ अथोणादिविवृतिः ॥

कृवापाजिस्वदिसाध्यशौदृस्नासनिजानिरहीणभ्य उण् ॥१॥ सत्यर्थे वर्तमानेभ्यः संप्रदानापादानाभ्यामन्यत्र कारके भावे च संज्ञायां विषये बहुलमुण् प्रत्ययः। करोति करति कृणोति वा कारुः कारी नापितादिः इन्द्रश्च। वायुः नभस्वान्। पायुः अपानमुपस्थश्च। जायुः औषधं पित्तं वा। स्वद्यते इदमनेन वा स्वादुः रुच्यः। स्वदनं वा स्वादुः। उत्तमक्षमादिभिः तपोविशेषैर्भावितात्मा साध्नोति साधुः। सम्यग्दर्शनादिभिः परमपदं साधयति वा साधुः संयतः। उभयलोकफलं वा साधयति साधुः धर्मशीलः। अश्नुते तेजसा सर्वं केदारं वा इत्याशुः सूर्यो व्रीहिश्च। अशनं वा आशु क्षिप्रम्। अश्नुते इति वा आशुः शीघ्रगामी शीघ्रकारी च। दरति दृणाति दीर्यते वा दारु काष्ठं भव्यं च। स्नायुः अस्थिनहनम्। सानु पर्वतैकदेशः। जानु ऊरुजङ्घासंधिमण्डलम्। जानीत्याकारनिर्देशात् 'न जनवधः' इति प्रतिषिद्धापि वृद्धिर्भवति। राहुः सैंहिकेयः। एत्यायुः पुरुषः शकटम् औषधम् जीवनम् पुरूरवःपुत्रो वा। जरायुः गर्भवेष्टनम् जलमलम् वा। जटायुः पक्षी। धनायुः देशः। रसायुः भ्रमरः ॥ अः ॥ २ ॥ सर्वस्माद्धातोर्यथाप्रयोगमकारः प्रत्ययो भवति। भवः। तरः। वरः। प्लवः। शयः। शरः। परः। करः। स्तवः। चरः। वदः ॥ म्लेच्छोडेर्हस्वश्च वा ॥ ३ ॥ म्लिच्छः मूकः। म्लेच्छः कुमनुष्यजातिः। इडः ईडो देवताविशेषो मेदिनी च ॥ नञः क्रमिगमिशमि-

खन्याकमिभ्यो ङित् ॥ ४ ॥ न क्रामति नक्रः जलचरो ग्राहः । नगः वृक्षः पर्वतश्च । नशः यक्षः । नखः करजः । नास्य खमस्तीति वा नख इत्यपि । नाकः स्वर्गः। नात्राकमस्तीति नाक इत्यपि ॥ तुदादिविषिगुहिभ्यः कित् ॥५॥ तुदः । नुदः । क्षिपः । सुरः । बुधः । सुरत् ऐश्वर्यदीप्त्योः । तुदादिर्न धातुगणः किं तर्हि भिन्न इति । तेन बुधादीनामिति लिङ्गपरिणामस्तु ज्ञेयः । शिवः । तुदादीनां यथासंभवं कारकविधिः । विष्लृंकी व्याप्तौ । वेवेष्टि विषम् प्राणहरं द्रव्यम् । गुहौंग् संवरणे । गूहति गुहः स्कन्दः । गुहा पर्वतैकदेशः ॥ विन्देर्नलुक् च ॥ ६ ॥ विदः गोत्रकृद् वृक्षजातिश्च ॥ कृगो द्वे च ॥ ७ ॥ चक्रं रथाङ्गमायुधं च ॥ कनिगदिमनेः सरूपे ॥ ८ ॥ किदिति निवृत्तम् । कनति दीप्यते कन्कनः कान्तः । गदति अव्यक्तं वदति, गद्यतेऽव्यक्तं कथ्यते वा गद्गदोऽव्यक्तवाक्, गद्गदमव्यक्तं वचनम् । मन्मनः अविस्पष्टवाक् । सरूपग्रहणं 'व्यञ्जनस्यानादेर्लुक्' इत्यादिकार्यनिवृत्त्यर्थम् ॥ ऋतष्टित् ॥ ९ ॥ ऋकारान्ताद्धातोरकारः प्रत्ययो भवति स च बहुलं टित् धातोश्च सरूपे द्वे रूपे भवतः । दीर्यते भिद्यतेऽनेन श्रोत्रमिति दर्दरः वाद्यविशेषः पर्वतश्च । दर्दरी सस्यलुण्टिः । कर्करः क्षुद्राश्मा । कर्करी गलन्तिका बर्बरः म्लेच्छजातिः । बर्बरी केशविशेषः । भर्भरः छद्मवान् । भर्भरी श्रीः । जर्जरः अदृढः । जर्जरी स्त्री । झर्झरः वाद्यविशेषः । झर्झरी झल्लरिका । गर्गरः राजर्षिः । गर्गरी महाकुम्भः । मर्मरः शुष्कपत्रप्रकरः । तद्धर्मोऽन्योऽपि क्षोदासहिष्णुर्दानवश्च । मर्मरायां दूर्वायामित्यत्र टित्त्वेऽपि ङीर्न भवति बहुलाधिकारात् । तत एव च ऋकारान्तादपि । घर्घरः सदोषाव्यक्तवाक् । घर्घरी किङ्किणिका ॥ किच्च ॥ १० ॥ मुमुरः ज्वलदङ्गारचूर्णम् । पुपुरः फेनः । तितिरः संक्रमः । भुर्भुरः संचयः । शिर्शिरः पुञ्जः ॥ पॄपलिभ्यां टित पिप् च पूर्वस्य ॥ ११ ॥ पृणाति छायया पिप्परी वृक्षजातिः । पलत्यातुरं पिप्पली औषधजातिः ॥ क्रमिमथिभ्यां चन्मनौ च ॥ १२ ॥ क्रामति सुखमनेनास्मिन्वा चङ्क्रमः । मथति चित्तं रागिणां

मन्मथः कामः ॥१२॥ गमेर्जम् च वा ॥१३॥ गच्छति पादविहरणं करोति जङ्गमः चरः। गच्छत्यमाध्यस्थ्यं गङ्गमः चपलः ॥ अदुपान्त्यऋदुभ्यामश्रान्तः ॥ १४ ॥ शलशलः। सलसलः। हलहलः। कलकलः। मलमलः। घटघटः। वदवदः। पदपदः। करकरः। मरमरः। दरदरः। सरसरः। वरवरः। अनुकरणशब्दा एते ॥ मषिमसेर्वा ॥ १५ ॥ मष हिंसायां। मषमषः। मष्मषः। मसैच् परिमाणे। मसमसः। मम्मसः ॥१५॥ हृसृफलिकषेरा च ॥१६॥ हृंग् हरणे। हरति नयति शस्त्राण्यस्खलन् लक्ष्यम् हराहरः योग्याचार्यः। सृं गतौ। धावति वायुना नीयमानः समन्तात् सरासरः। सारङ्गः। फलनिष्पत्तौ। फलति निष्पादयति नानाविधानि पुष्पफलानि फलाफलमरण्यम्। कष हिंसायाम्। कषति विदारयति कषाकषः कृमिजातिः ॥ इदुदुपान्त्याभ्यां किदिदुतौ च ॥ १७ ॥ किलत् श्वैत्यक्रीडनयोः। किलिकिलः। हिलत् हावकरणे। हिलिहिलः। शिलत् उञ्छे। शिलिशिलः। छुरत् छेदने। छुरुच्छुरः। मुरत् संवेष्टने। मुरुमुरः। घुरत् भीमार्थशब्दयोः। घुरुघुरः। पुरत् अग्रगमने। पुरुपुरः। षुरत्। ऐश्वर्यदीप्त्योः। सुरुसुरः। कुरत् शब्दे। कुरुकुरः। चुरण् स्तेये। चुरुचुरः। हुल हिंसासंवरणयोश्च। हुलुहुलः। गुजत् शब्दे। गुजुगुजः। गुडत् रक्षायाम्। गुडुगुडः। कुटत् कौटिल्ये। कुटुकुटः। पुटत् संश्लेषणे। पुटुपुटः। कुणत् शब्दोपकरणयोः। कुणुकुणः। मुणत् प्रतिज्ञाने। मुणुमुणः। अनुकरणशब्दा एते ॥ जजलतितलकाकोलीसरीसृपादयः ॥ १८ ॥ एते अप्रत्ययान्ता निपात्यन्ते। जलं घात्ये। अस्य द्वित्वे पूर्वस्य जभावः। जजलः। यस्य जाजलिः पुत्रः। तिलत् स्नेहने। अस्य द्वित्वे पूर्वस्य च तिभावे धातोरिकारस्याकारे तितलः। कुल बन्धुसंस्त्यानयोः। अस्य द्वित्वे पूर्वस्य च काभावे कालोली क्षीरकाकोलीति च वल्लीजातिः। सृप्लृं गतौ। अस्य द्वित्वे गुणाभावे पूर्वस्य च सरीभावे सरीसृपः उरगजातिः। आदिग्रहणाद्यथादर्शनमन्येऽपि॥ १८॥ बहुलं गुण[illegible]ो चादेः ॥१९॥ धातोः किदः प्रत्य-

यो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य चेकारोकारावन्तौ भवतः यथादर्शनं च गुणवृद्धी भवतः । केलिकिलः कैलिकिलश्च हसनशीलः । हिलत् हावकरणे । हेलिहिलः हैलिहिलश्च विलसनशीलः । शेलिशिलः शैलिशिलः । शुभि दीप्तौ । शोभते पुनः पुनरिति शोभुशुभः । शौभुशुभः । णुदंत् प्रेरणे । नुदति पुनः पुनरिति नोदुनुदः । नौदुनुदः । गुडत् रक्षायाम् । गुडति भ्राम्यति पुनः पुनरिति गोलुगुलः । गौलुगुलः । बुलण् निमज्जने । बोलयति पुनःपुनरिति बोलुबुलः । बौलुबुलः । तत्तद्धात्वर्थास्तच्छीला अनुवादविशेषा वैते ॥१९॥णेर्लुप्॥२०॥धातोरप्रत्ययसन्नियोगे बहुलं णेर्लुप् भवति । वज्रं धारयतीति वज्रधर इन्द्रः । एवं चक्रधरः विष्णुः । भूधरः अद्रिः । जलधरः मेघः । बाहुलकात्प्रत्ययान्तरेऽपि । देवयतीति दिव् द्यौः व्योम स्वर्गश्च । पुण्यं कारयन्तीति पुण्यकृतो देवाः । एवं पर्णं शोषयतीति पर्णशुट् । "वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे । ततः पर्णरुहः पश्चात्ततो देवः प्रवर्षति" ॥ १ ॥ तथा महनः कारयांचक्रुराक्रन्दानिति प्राप्ते महतश्चक्रुराक्रन्दानिति भवति । महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः । घोषयांचक्रुरित्यर्थः ॥ भीण्शलिबलिकल्यतिमर्च्यर्चिमृजिकुतुस्तुदाधाराश्राकापानिहानञ्शुभ्यः कः ॥ २१ ॥ ञिभींक् भये । बिभेति दुन्दुभात्परस्माच्च भेकः मण्डूकः कातरश्च । बिभेति वायोर्भेको मेघः । इंण्क् गतौ । एत्यद्वितीय एकः असहायः संख्या प्रधानमसमानमन्यश्च । पलफलशल गतौ । शलन्त्यात्मरक्षणाय तमिति शल्कः शरणम् । शलति त्यक्तं बहिरिति शल्कं गृहीतरसं शकलम् । शल्कः काष्ठत्वक् मलिनं च काष्ठम् मुद्गरः करणं च । वलि संवरणे । वल्कः दशनः वासः त्वक् च । कलि शब्दसंख्यानयोः । कल्कः कषायः दम्भः पिष्टपिण्डश्च । अत सातत्यगमने । अत्कः । आत्मा वायुः व्याधितः चन्द्रः उत्पातश्च । मर्च सौत्रो धातुः प्राप्तौ । मर्कः देवदारुः वायुः दानवः मनः पन्नगः विघ्नकारी च । 'चजः कगम्' इति कत्वम् । अर्च पूजायाम् । अर्कः सूर्यः पुष्पजातिः का(ष्ठा)टजातिश्च । मृजौक् शुद्धौ

। मार्कः वायुः । कुंक् शब्दे । कोकश्चक्रवाकः । तुंक् हिंसावृत्तिपूरणेषु । तोकमपत्यम् । ष्टुंगृक् स्तुतौ । स्तोकमल्पम् । डुदांगृक् दाने । दाकः यजमानः यज्ञश्च । डु धांगृक् धारणे च । धाकः ओदनः अनड्वान् अम्भः स्तम्भश्च । रांक् दाने । राकः दाता अर्थः सूर्यश्च ।राका पौर्णमासी कुमारः रजस्वला च । त्रैङ् पालने । त्राकः धर्मः शरणस्थानीयश्च । कैं शब्दे । काकः वायसः । पां पाने, पांक् रक्षणे वा । पाकः बालः असुरः पर्वतश्च । ओहांक् त्यागे । निहाकः निःस्नेहः निर्मोकश्च । निहाका गोधा । शुं गतौ । न शवतीति अशोकः ॥ विचिपुषिमुषिशुष्यविसृशुसुभूधूमूनीवीभ्यः कित् ॥ २२ ॥ विचृंपी पृथग्भावे । विक्कः करिपोतः । पुषंच् पुष्टौ । पुष्कः निशाकरः । मुषश् स्तेये । मुष्कः चौरः मांसलो वा । मुष्कौ वृषणौ । शुषंच् शोषणे । शुष्कमपगतरसम् । अव रक्षणादिषु । ऊकः कुन्दुमः । सृं गतौ । सृकः वायुः बाणः सृगालः बकः निरयश्च । सृका आयुधविशेषः । वृगट् वरणे वृङ्श् संभक्तौ वा । वृकः मृगजातिः आदित्यः धूर्तः जाठरश्चाग्निः । शुं गतौ । शुकः कीरः ऋषिश्च । षुंगट् अभिषवे । सुकः निरामयः । भू सत्तायाम् । भूकः कालः छिद्रं च । धूत् विधूनने धूगट् कम्पने धूग्श् कम्पने वा । धूकः वायुः व्याधिश्च । धूका पताका । मूङ् बन्धने । मूकः अवाक् । णींग् प्रापणे । नीकः खगः ज्ञाता च । नीका उदकहारिका ज्ञातिश्च । वींक् प्रजनादिषु । वीकः वायुः व्याधिः नाशः अर्थः मनः वसन्तश्च । वीका पक्षिजातिः नेत्रमलं च ॥ कृगो वा ॥२३॥ डु कृंग् करणे । कर्कः अग्निः सारङ्गः दर्भः श्वेताश्वश्च कृकः शिरोग्रीवम् ॥ घुयुहिपितुशोर्दीर्घश्च ॥ २४ ॥ घुङ् शब्दे । घूकः कौशिकः । युक् मिश्रणे । यूका क्षुद्रजन्तुः स्वेदजः । हिंट् गतिवृद्ध्योः । हीकः पक्षी । पिंत् गतौ । पीकः उपस्थो जलाश्रयश्च । तुंक् वृत्त्यादिषु । तूकः उपस्थः पर्वतश्च । शुं गतौ । शूकः कियारुः अभिषवः शोकश्च । शूका हृल्लेखः ॥ ह्रियो रश्च लो वा ॥ २५ ॥ ह्रियः कित् कः प्रत्ययो भवति रेफस्य च लकारो वा भवति । ह्रीकः ह्लीकः लज्जापरः नकुलश्च ।

हीको लिङ्ग्यपि ॥ **निष्कतुरुष्कोदर्कालर्कशुल्कश्वफल्ककिञ्जल्कोल्काब्रुक्कच्छेककेकायस्कादयः** ॥ २६ ॥
एते कप्रत्ययान्ता निपात्यन्ते । नेः सीदतेर्डिच्च । निष्कः सुवर्णादिः । तूरैचि त्वरायाम् । अस्य ह्रस्व उषश्चान्तः ।
तुरुष्कः वृक्षः म्लेच्छश्च । उदः परादर्तेः । उदर्कः क्रियाफलम् । अली भूषणादौ । अस्मादर् चान्तः । अलर्कः उन्मत्तो
मदालसात्मजश्च । पलफलशल गतौ इत्यस्योपान्त्योत्वं च ।शुल्कं रक्षानिर्वेशः । शुनः परात्फालेर्ह्रस्वश्च । श्वफल्कः अन्ध-
कविशेषः । किमः परात् जॄषो रस्य लश्च । किञ्जल्कः पुष्परेणुः । ज्वलेरुलादेशश्च उलेः सौत्रस्य वा उल्का औत्पातिकं
ज्योतिः अग्निज्वाला च । वृजैकि वर्जने । अगुणत्वं च । वृक्कः मुष्कः । छ्यतिकायन्योरेत्वं च । छेकः मनीषी ।
केका मयूरवाक् । यमेर्मस्य सः ।यस्कः ।आदिग्रहणात् ढक्कास्पृक्कादयोऽपि॥ **दृकॄनॄस्तॄधृवृभ्रस्तुकुक्षुलङ्घिचरिचटिक-
टिकण्टिचणिचषिफलिवमितम्यविदेविवन्धिकनिजनिमशिक्षारिकूरिवॄनिचल्लिमल्लिसल्लयल्लिभ्योऽकः**
॥ २७ ॥ दॄश् विदारणे । दरकः भीरुः । कॄत् विक्षेपे । करकः जलभाजनम् कमण्डलुश्च । करका वर्षापाषाणः । नॄश्
नये । नरकः निरयः । सृं गतौ सरका मद्यविशेषः कंपभाजनविशेषश्च । परका मधुपानवारः । डुडु भृंग्क् पोषणे च ।
भरकः गोण्यादिः । धृंङ् अवध्वंसने । धरकः सुवर्णोन्मानानियुक्तः । वृग्ट् वरणे । वरकः । वधूजातिसहायः वाजसने-
यभेदश्च । मृंत् प्राणत्यागे । मरकः । जनोपद्रवः । ष्टुंग्क् स्तुतौ । स्तवकः पुष्पगुच्छः । कुंङ् शब्दे । कवकमभक्ष्यद्रव्य-
विशेषः । टुक्षुक् शब्दे । क्षवकः राजसर्षपः । लघुङ् गतौ । लङ्घकः रङ्गोपजीवी । चर भक्षणे च । चरकः मुनिः
चटण् भेदे । चटकः पक्षी । कटे वर्षावरणयोः । कटकः वलयः । कटु गतौ । कण्टकः तरुरोम । चणशब्दे । चणकः
मुनिः धान्यविशेषश्च । चषी भक्षणे । चषकः पानभाजनम् । फलनिष्पत्तौ । फलकः खेटकम् । टु वमू उद्गिरणे । वमकः
कर्मकरः । तमूच् काङ्क्षायाम् । तमकः व्याधिः क्रोधश्च । अव रक्षणादौ । अवका शैवलम् । देवृङ् देवने । देवका

अप्सराः । देविका नदी । बन्धंश् बन्धने । बन्धकः चारकपालः । कनै दीप्त्यादीषु । कनकं सुवर्णम् । जनैचि प्रादुर्भावे । जनकः सीतापिता । मश रोषे च । मशकः क्षुद्रजन्तुः । क्षर संचलने ण्वन्तः । क्षारकं बालमुकुलम् । कुरत् शब्दे । कोरकं प्रौढमुकुलम् । वृतूङ् वर्तने । वर्तका वर्तिका वा शकुनिः । वल्लि संवरणे । वल्लकी वीणा । मल्लि धारणे मल्लकः शरावः मल्लिका पुष्पजातिः दीपाधारश्च । सल्लः सौत्रः । सल्लकी वृक्षः । सत्कृत्य लक्यते स्वाद्यते गजैरिति वा सल्लकी । अली भूषणादिषु । अलकः केशविन्यासः । अलका पुरी ॥ को रुरुण्टिरण्टिभ्यः ॥ २८ ॥ कुशब्दात् परेभ्य एभ्योऽकः प्रत्ययो भवति । रुकु शब्दे । कुरुवकः वृक्षः । रुटु स्तेये । कुरुण्टको वर्णगुच्छः । रण्टिः प्राणहारणे सौत्रः । कुरण्टकः स एव ॥ ध्रुधून्दिरुचितिलिपुलिकुलिक्षिपिक्षुपिक्षुपिक्षुभिलिखिभ्यः कित् ॥ २९ ॥ ध्रुं स्थैर्ये च । ध्रुवकः स्थिरः । ध्रुवका आवपनविशेषः । धूत् विधूनने । धुवकं धूननम् । धुवकः प्रधानं । स्त्री धुवका आवपनविशेषः । उन्दैप् क्लेदने । उदकं जलम् । रुचि अभिप्रीत्यां च । रुचकः आभरणविशेषः । तिलत् स्नेहने । तिलकः विशेषकः वृक्षश्च । पुलत् समुच्छ्राये, पुल महत्त्वे वा । पुलकः रोमाञ्चः । कुल बन्धुसंस्त्यानयोः । कुलकं संयुक्तम् । क्षिपींत् प्रेरणे । क्षिपकः वायुः । क्षिपका आयुधम् । क्षुपः सौत्रो ह्रस्वीभावे । क्षुपकः गुल्मः । क्षुभच् संचलने । क्षुभकः पाञ्चालकः । लिखत् अक्षरविन्यासे । लिखकः चित्रकरः ॥ छिदिभिदिपिटेर्वा ॥ ३०॥ एभ्योऽकः प्रत्ययो भवति स च किद्वा । छिदृंपी द्वैधीकरणे । छिदकः खड्गः क्षुरश्च । छेदकः परशुः । भिदृंपी विदारणे । भिदकं जलं पिशुनश्च । भेदकं वज्रम् । पिट शब्दे च । पिटकः क्षुद्रस्फोटकः । पेटकं संघातः ॥ कृषेर्गुणवृद्धी च वा ॥३१॥ कृषेरकः प्रत्ययो भवति गुणवृद्धी चास्य वा भवतः । कृषंत् विलेखने । कर्षकः कृषकः परशुः । कर्षकः कृषकः कुटुम्बी ॥ नञः पुंसे ॥ ३२ ॥ नञः परात्पुंसण् अभिमर्दने इत्यस्मात् किदकः प्रत्ययो भवति

। नपुंसकं तृतीयाप्रकृतिः । नखादित्वात् नञ् न भवति ॥ कीचकपेचकमेनकार्भकधमकवधकलघकजहकैरकैडकाश्मकलमकक्षुल्लकवट्टकवकाढकादयः ॥ ३३ ॥ कीचकादयः शब्दा अकप्रत्ययान्ता निपात्यन्ते । कचि बन्धने । अस्योपान्त्यस्येत्वं च । कीचकः वंशविशेषः । डु पचींष् पाके । मचि कल्कने । मनिन् ज्ञाने । एषामुपान्त्यस्यैत्वं च । पेचकः करिजघनभागः । मेचकः वर्णः । मेनका अप्सराः । अर्तेर्भश्चान्तः । अर्भकः बालः । ध्मां शब्दाग्निसंयोगयोः । अस्य धमादेशश्च । धमकः कीटः कर्मारश्च । अन्यत्रापि धमादेशो दृश्यते । वने, धान्तः । हन्तेर्वधश्च । वधकः हन्ता व्याधिश्च । वधकं पद्मबीजं । अन्यत्रापि दृश्यते । वृत्रं हन्ति अचि वृत्रवधः शक्रः । वधिता निर्मोचकः । वध्यः । वधनम् । लघुङ् गतौ । नलुक् च । लघकः असमीक्ष्यकारी । जहातेर्द्वे रूपे अन्तलुक् च । जहकः निर्मोचकः कालः क्षुद्रश्च । ईरिक् गतिकम्पनयोः । ईडिक् स्तुतौ । अनयोर्गुणश्च । एरका उदकतृणजातिः । एडका अविजातिः । अशौटि व्याप्तौ । अस्य मोऽन्तः । अश्मका जनपदः । रमिं क्रीडायाम् । अस्य लमादेशः । लमक ऋषिविशेषः । क्षुदृंपी संपेषे । अस्य क्षुल्लादेशश्च । क्षुल्लकं दभ्रम् । क्षुधं लातीति क्षुल्लः क्षुल्ल एव क्षुल्लक इति वा । वट वेष्टने । अस्य वोऽन्तश्च । वट्वका तृणपुञ्जः । आङ्पूर्वात् ढौकतेर्डिच्च । आढकम् । मानम् । आदिग्रहणादृष्टहस्तन्त्रात् कला आपिबन्तीति कलापकाः शास्त्राणि । कथण वाक्यप्रबन्धे । कथयतीति कथकः तोटकाख्यायिकादीनां वर्णयिता । एवमुपकचम्पकफलहकादयोऽपि ॥ शलिबलिपतिवृतिनभिपटितटितडिगडिभन्दिवन्दिमन्दिनमिकुदुपूमनिखजिभ्य आकः ॥ ३४ ॥ फलफलशल गतौ । शलि चलने च वा । शलाका एषणी पूरणरेखा द्यूतोपकरणं सूची च । बल प्राणनधान्यावरोधयोः । बलाका जलचरी शकुनिः । पत्लृ गतौ । पताका वैजयन्ती । वृतूङ् वर्तने । वर्तिका शकुनिजातिः । णभच् हिंसायाम् । नभाकः चक्रवाकजातिः तमः काकश्च । पट गतौ । पटाका वैजयन्ती । वृतूङ् वर्तने ।

पक्षिजातिश्च । तट उच्छ्राये । तटाकं सरः । तडण् आघाते । तडाकं तदेव । गड सेवने । गडाकः शाकजातिः । भदुङ् सुखकल्याणयोः । भन्दाकं शासनम् । वदुङ् स्तुत्यभिवादनयोः । वन्दाकः चीवरभिक्षुः । मदुङ् स्तुत्यादिषु । मन्दाका औषधी । णमं प्रह्वत्वे । नमाका म्लेच्छजातिः । कुंङ् शब्दे । कवाकः पक्षी । टुदुंङ् उपतापे । दवाकः म्लेच्छः । पूङ् पवने पवाका वात्या । मनिंच् ज्ञाने । मनाका हस्तिनी । खज मन्थे । खजाकः आकरः मन्थाः दर्विः आकाशं बन्धकी शरीरं पक्षी च ॥ शुभिगृहिविदिपुलिगुभ्यः कित् ॥ ३५ ॥ एभ्यः किदाकः प्रत्ययो भवति । शुभि दीप्तौ । शुभाका पक्षिजातिः । गृहणी ग्रहणे । गृहाकः । विदंक् ज्ञाने । विदाका भूतग्रामः । पुल महत्त्वे । पुलाकः अर्धस्विन्नविधो धान्यविशेषः । गुंङ् शब्दे गुंत् पुरीषोत्सर्गे वा । गुवाकं पूगफलम् ॥ पिषेः पिन्पिण्यौ च ॥ ३६ ॥ पिष्लृंप् संचूर्णने इत्यस्मात्किदाकः प्रत्ययो भवति अस्य च पिन् पिण्य इत्यादेशौ भवतः । पिनाकमैशं धनुः शूलं वा । पिनाकः दण्डः । पिण्याकस्तिलादिखलः ॥ मवाकश्यामाकवार्ताकवृन्ताकज्योन्ताकगूवाकभद्राकादयः ॥ ३७ ॥ एते आकप्रत्ययान्ता निपात्यन्ते । मव्य बन्धने । यलोपः । मवाकः रेणुः । श्यैङ् गतौ मोऽन्तश्च । श्यामाकः जघन्यो व्रीहिः । वृतेर्वृद्धिश्च । वार्ताकी शाकविशेषः । तत्फलं वार्ताकम् । स्वराच्चोऽन्तश्च । वृन्ताकी उच्चवृहती । तत्फलं वृन्ताकम् । ज्युङ् गतौ । न्तश्च प्रत्ययादिः । ज्यवतेऽस्मिन् स्विद्यमान इति ज्योन्ताकम् स्वेदसत्त्वविशेषः । गुंत् पुरीषोत्सर्गे, गुंङ् शब्दे वा । ऊवादेशश्च । गूवाकं पूगफलम् । भदुङ् सुखकल्याणयोः । अस्य भद्रादेशश्च । भद्राकः अकुटिलः । आदिग्रहणात् । स्योनाकचार्वाकपराकादयो भवन्ति ॥ क्रीकल्यलिदलिस्फटिदूषिभ्य इकः ॥ ३८ ॥ डु क्रींग्श् द्रव्यविनिमये । क्रयिकः क्रेता । कलि शब्दसंख्यानयोः । कलिका कोरकः । उत्कलिका ऊर्मिः । अली भूषणादौ । अलिकं ललाटम् । दल विशरणे । दलिकं दारु । स्फटस्फुट्ट विशरणे । स्फटिकः मणिः । दुषंच् वैकृत्ये । दूषिका

नेत्रमलः ॥ आङः पणिपनिपदिपतिभ्यः ॥ ३९ ॥ पणि व्यवहारस्तुत्योः । आपणिकः पत्तनवासी व्यवहारज्ञो वा । पनि स्तुतौ । आपनिकः स्तावकः इन्द्रनीलः इन्द्रकीलो वा । पदिंच् गतौ । आपदिकः इन्द्रनीलः इन्द्रकीलो वा । पत्लृ गतौ । आपतिकः पथि वर्तमानः मयूरः श्येनः कालो वा । आपणिकादयश्चत्वारो वणिजोऽपि ॥ नसिवसिकसिभ्यो णित् ॥ ४० ॥ णसि कौटिल्ये । नासिका घ्राणम् । वसं निवासे । वासिका माल्यदामविशेषः छेदनद्रव्यं च । कस गतौ । कासिका वनस्पतिः ॥ पापुलिकृषिकुशिव्रश्चिभ्यः कित् ॥ ४१ ॥ एभ्यः किदिकः प्रत्ययो भवति । पां पाने । पिकः कोकिलः । पुल महत्त्वे । पुलिकः मणिः । कृषींत् विलेखने । कृषिकः पामरः तृणजातिश्च । क्रुशं आह्वानरोदनयोः । क्रुशिकः क्रोष्टुकः उलूकश्च । ओ व्रश्चौत् छेदने । वृश्चिकः सविषः कीटः राशिश्च नक्षत्रपादनवकरूपः॥ प्राङः पणिपनिकषिभ्यः ॥ पणि व्यवहारस्तुत्योः । प्रापणिकः वणिक् । पनि स्तुतौ । प्रापनिकः पथिकः । कष हिंसायाम्। प्राकषिकः वायुः खलः नर्तकः मालाकारश्च । प्रपूर्वात्पणेराङ्पूर्वाच्च कषेरिच्छन्त्यन्ये । प्रपणिकः गन्धविक्रयी । आकषिकः न कर्तव्यः ॥ मुषेर्दीर्घश्च ॥ ४३ ॥ मूषिक आखुः ॥ स्यमेः सीम् च ॥ ४४ ॥ स्यमू शब्दे । सीमिकः वृक्षः उदककृमिश्च । सीमिका उपजिह्विका । सीमिकं वल्मीकम् । केचित्सिमिति ह्रस्वोपान्त्यमादेशं प्रत्ययस्य च दीर्घत्वमिच्छन्ति । सिमीकः सूक्ष्मकृमिः ॥ कुशिकहृदिकमक्षिकेतिकपिपीलिकादयः ॥ ४५ ॥ एते किदिकप्रत्ययान्ता निपात्यन्ते । कुषेः श च । कुशिकः मुनिः । हृगो दोऽन्तश्च । हृदिकः यादवः । मषेः सोऽन्तश्च । मक्षिका क्षुद्रजातिः । एतेस्तोऽन्तश्च । एतिकः मुनिः । पीलेर्द्वे च । पिपीलिका मध्यक्षामा कीटजातिः । आदिग्रहणात् गन्दिकगुरिकगुलिकादयो भवन्ति ॥ स्यमिकषिदूष्यनिमनिमलिवल्यलिपालिकणिभ्य ईकः॥ ४६ ॥ स्यमूशब्दे । स्यमीकः वृक्षः वल्मीकः नृपगोत्रं च । स्यमीकं जलम् । स्यमीका कृमिजातिः । कष हिंसायाम् । कषीका कुद्दालिका । दुषंच् वैकृत्ये

ण्यन्तः । दूषीका नेत्रमलः वीरणजातिः वर्तिः लता च । अनक् प्राणने । अनीकं सेनासमूहः सङ्ग्रामश्च । मनिच् ज्ञाने । मनीकः सूक्ष्मः । मलि धारणे । मलीकम् अञ्जनम् अरिश्च । वलि संवरणे । वलीकः बलवान् पटलान्तश्च । वलीकं वेश्मदारु । अली भूषणादौ । अलीकम् असत्यम् । अलीका पण्यस्त्री । व्यलीकमपराधः । व्यलीका लज्जा । पलण् रक्षणे च । पालीकं तेजः । कण शब्दे । कणीकः पटवासः । कणीका भिन्नतण्डुलावयवः वनस्पतिबीजं च ॥ जॄपॄदॄशॄ-भॄमॄभ्यो द्वेरश्चादौ ॥ ४७ ॥ एभ्य ईकः प्रत्ययो भवति द्वे च रूपे भवत एषां चादौ रो भवति । जॄष् जरसि । जर्जरीका शतपत्री । पॄश् पालनपूरणयोः । पर्परीका जलाशयः सूर्यश्च । पर्परीकः अग्निः कुररः भक्ष्यम् कुर्कुरश्च । दॄश् विदारणे । दर्दरीकः दाडिमः इन्द्रः वादित्रविशेषः वादित्रभाण्डं च । शॄश् हिंसायाम् । शर्शरीकः कृमिः विकलेन्द्रियः दुष्टाश्वः लावकश्च । शर्शरीका माङ्गल्याभरणम् । वृग्ट् वरणे । वर्वरीकः संवरणम् उरणः पतत्री केशसंघातश्च । वर्वरीका सरस्वती । मृत् प्राणत्यागे । मर्मरीकः अग्निः शूरः श्येनश्च ॥ ऋच्यृजिहृषीषिदृशिमृडिशिलिनिली-भ्यः कित् ॥ ४८ ॥ एभ्यः किदीकः प्रत्ययो भवति । ऋचत् स्तुतौ । ऋचीकः । ऋजि गतिस्थानार्जनोपार्जनेषु । ऋजीकं वज्रम् बलं स्थानं च । हृषू अलीके, हृषच् तुष्टौ वा । हृषीकमिन्द्रियम् । इषत् इच्छायाम् । ईष उञ्छे । ईषगतिहिंसादर्शनेषु वा । इषीका ईषीका च तृणशलाका । दृशृं प्रेक्षणे । दृशीकं मनोज्ञम् । दृशीका रजस्वला । मृडत् सुखने । मृडीकं सुखकृत् सुखं च । शिलत् उञ्छे । शिलीकः सस्यविशेषः । लीङ्च् श्लेषणे निपूर्वः । निलीकं वृत्तम् । बाहुलकादीकक्॥मृदेर्वोऽन्तश्च वा ॥४९॥ मृदेः किदीकः प्रत्ययो भवति वकारश्चान्तो भवति। मृदश् क्षोदे । मृद्वीका मृदीका च द्राक्षा ॥ सृणीकास्तीकप्रतीकपूतीकसमीकवाहीकवाह्लीकवल्मीककल्मलीकतिन्तिडीककङ्क-णीककिङ्किणीकपुण्डरीकचञ्चरीकफर्फरीकझर्झरीकघर्घरीकादयः ॥ ५० ॥ एते किदीकप्रत्ययान्ता निपात्य-

न्ते ॥ सर्तेर्णोऽन्तश्च । सृणीकः वायुः अग्निः अशनिः उन्मत्तश्च । सृणीका लाला । अस्तेस्तोऽन्तश्च । अस्तीकः जरत्कारुसुतः । प्रांक् पूरणे । प्रातेस्तोऽन्तो ह्रस्वश्च । प्राति शरीरमिति प्रतीकः वायुः अवयवः सुखं च । सुप्रतीकः दिग्गजः। पुवस्तोऽन्तश्च । पूतीकं तृणजातिः । सम्पूर्वस्य एतेर्लुक् च । संयन्त्यस्मिन्निति समीकं संग्रामः । बहिवह्योर्दीर्घश्च वाहीकः वाह्लीकः एतौ देशौ । वलेर्मोऽन्तश्च । वल्मीकः नाकुः । कलेर्मलश्चान्तः । कल्मलीकम् ज्वाला । तिमेस्तिड् चान्तः । तिन्तिडीकः पक्षी वृक्षाम्लश्च । तन्तिडीक इति पूर्वस्यात्वं नेच्छन्त्येके । चङ्क्ष्यतेः कङ्कण् च । कङ्कणीकः घण्टाजालम् । किमः परात्कणतेः किण् च । किङ्किणीका घण्टिका । पुणेर्डर् चान्तः पुण्डतेर्वार् । पुण्डरीकं पद्मं छत्रं व्याघ्रश्च । चञ्चेररू चान्तः । चञ्चरीकः भ्रमरः । पिपर्तेर्गुणो द्वित्वं पकारयोः फत्वं रश्चान्तः पूर्वस्य । फर्फरीकं पल्लवं पादुका मर्दलिका च । झीर्यतेर्द्वित्वं तृतीयाभावः पूर्वस्य रश्चान्तः । झर्झरीकः देहः । झर्झरीका वादित्रभाण्डम् । एवं घरतेर्घर्घरीका घण्टिका । आदिग्रहणादन्येऽपि ॥ **मिवमिकटिभल्लिकुहेरुकः** ॥ ५१ ॥ डु मिंगृट् प्रक्षेपणे । मयुकः आतपः । बाहुलकात् ' मिग्मीगो '—इति नात्वम् । टु वमू उद्गिरणे । वमुकः जलदः । कटे वर्षावरणयोः । कटुकः रसविशेषः । भल्लि परिभाषणहिंसादानेषु । भल्लुकः ऋक्षः । कुहणि विस्मापने । कुहुकमाश्चर्यम् ॥ **संविभ्यां कसेः** ॥ ५२ ॥ कस गतौ । संकसुकः सुकुमारः परापवादशीलः श्राद्धाग्निश्च । संकसुकं व्यक्ताव्यक्तं संकीर्णं च । विकसुकः गुणवादी परिश्रान्तश्च ॥ **क्रमेः क्रुम् च वा** ॥ ५३ ॥ क्रमेरुकः प्रत्ययो भवति अस्य च क्रुम इत्यादेशो वा भवति।

पादविक्षेपे । क्रुमुकः बन्धनम् । आदेशविधानबलाच्च न गुणः । क्रमुकः पूगतरुः ॥ **कमितिमेर्दोऽन्तश्च** ॥ ५४ ॥ कमूङ् कान्तौ । कन्दुकः क्रीडनम् । तिमच् आर्द्रभावे । तिन्दुकः वृक्षः ॥ **मण्डेर्मड्डू च** ॥ ५५ ॥ मडु भूषायाम् । मड्डुकः वाद्यविशेषः ॥ **कण्यणेर्णित्** ॥ ५६ ॥ आभ्यां णिदुकः प्रत्ययो भवति । कण अण शब्दे । काणुकः काकः

हिंस्रश्च । काणुकम् आणुकं च अक्षिमलम् ॥ **कञ्चुकांशुकनंशुकपाकुकहिबुकचिबुकजम्बुकचुलुकचूचुकोल्मुकभावुकपृथुकमधुकादयः** ॥ ५७ ॥ एते किदुकप्रत्ययान्ता निपात्यन्ते । कचि बन्धने । अशौटि व्याप्तौ । नशौच् अदर्शने । एषां स्वरान्नोऽन्तश्च । कञ्चुकः कूर्पासः । अंशुकं वस्त्रम् । नंशुको रणरेणुः प्रवासशीलः चन्द्रः प्रावरणं च । पचेः पाक् च । पाकुकः लघुपाची सूपः सूपकारः अध्वर्युश्च । हिनोतिचिनोतिजमतीनां बोऽन्तश्च । हिबुकं लग्नाच्चतुर्थस्थानम् रसातलं च । चिबुकं मुखाधोभागः । जम्बुकः शृगालः । चुलुम्पः सौत्रः अन्त्यस्वरादिलोपश्च । चुलुम्पतीति चुलुकः करकोशः । चतेश्चूच् च । चूचुकः स्तनाग्रभागः । ज्वलेरुल्म् च । उल्मुकम् अलातम् । भातेर्वोऽन्तश्च । भावुकः भगिनीपतिः । प्रथिष् प्रख्याने । पृथुकः शिशुः व्रीह्याद्यभ्यूषश्च । मचि कल्कने धश्चान्तादेशः । मधुकं यष्टीमधु । आदिग्रहणाद्वालुकीवालुकादयो भवन्ति ॥ **मृमन्यञ्जिजलिबलितलिमलिमल्लिभालिमण्डिबन्धिभ्य ऊकः** ॥ ५८ ॥ मृङ् प्राणत्यागे । मरूकः मयूरः मृगः निदर्शनेभः तृणं च । मनिच् ज्ञाने । मनूकः कृमिजातिः । अञ्जौप् व्यक्तिम्रक्षणगतिषु । अञ्जूकः हिंस्रः । जल घात्ये । जलूका जलजन्तुः । बलप्राणनधान्यावरोधयोः । बलूकः उत्पलमूलं मत्स्यश्च । तलण् प्रतिष्ठायाम् । तलूकः । त्वक्कृमिः । मलि धारणे । मलूकः सरोजशकुनिः । मल्लिधारणे । मल्लूकः कृमिजातिः भलिण् आभण्डने । भालूकः ऋक्षः । मडु भूषायाम् । मण्डूकः दुर्दुरः । बन्धश् बन्धने । बन्धूकः बन्धुजीवः ॥ **शल्यणोर्णित्** ॥ ५९ ॥ आभ्यां णिदूकः प्रत्ययो भवति । पलफलशल गतौ । शालूकः जलकन्दः बलवांश्च । अण शब्दे । आणूकम् अक्षिमलम् ॥ **कणिभल्लेर्दीर्घश्च वा** ॥ ६० ॥ आभ्यामूकः प्रत्ययो दीर्घश्चानयोर्वा भवति । कण शब्दे । कणूकः धान्यस्तोकः । काणूकः पक्षी । काणूकम् अक्षिमलः तमो वा । भल्लि परिभाषणहिंसादानेषु । भल्लूकः भाल्लूकश्च ऋक्षः ॥ **शम्बूकशाम्बूकवृधूकमधूकोलूकोरुवूकवरूकादयः** ॥ ६१ ॥ एते ऊकप्रत्ययान्ता

निपात्यन्ते । शमेर्बोऽन्तो दीर्घश्च वा । शम्बूकः शङ्खः । शाम्बूकः स एव । वृङ्श् वरणे । अस्य हृधभावश्च । हृधूकः मातृवाहकः । हृधूकं जलम् । मदेर्धश्च । मदयतीति मधूकः वृक्षः । अलेरुच्चोपान्त्यस्य । उलूकः काकारिः । उरु पूर्वाद्वातेः किच्च । उरु वाति उरुवूकः एरण्डः । वृधेर्लोपश्च । वर्धते इति वरूकः तृणजातिः । आदिग्रहणादनूकवावदूकादयो भवन्ति ॥ किरोऽङ्को रो लश्च वा ॥ ६२ ॥ किरतेरङ्कः प्रत्ययो भवति रेफस्य च लकारादेशो वा भवति । । करङ्कः समुद्रः । कलङ्कः लाञ्छनम् ॥ रालापाकाभ्यः कित् ॥ ६३ ॥ एभ्यः किदङ्कः प्रत्ययो भवति । रांक् दाने । रङ्कः अवलोयान् । लांक् दाने । लङ्का पुरी । पांक् रक्षणे । पङ्कः कर्दमः । कैं शब्दे । कङ्कः पक्षी ॥ कुलिचिरिभ्यामिङ्कक् ॥ ६४ ॥ आभ्यामिङ्कक् प्रत्ययो भवति । कुल बन्धुसन्त्यानयोः । कुलिङ्कः चटकः । चिर हिंसायाम् सौत्रः । चिरिङ्कं जलयन्त्रम् ॥ कलेरविङ्कः ॥ ६५ ॥ कलेरविङ्कः प्रत्ययो भवति । कलि शब्दसंख्यानयोः । कलविङ्कः गृहचटकः ॥ क्रमेरेलकः ॥ ६६ ॥ क्रमू पादविक्षेपे इत्यस्मादेलकः प्रत्ययो भवति । क्रमेलकः करभः ॥ जीवेरातृको जैव् च ॥ ६७ ॥ जीव प्राणधारणे इत्यस्मादातृकः प्रत्ययो भवति जैव् इत्यादेशश्च । जैवातृकः आयुष्मान् चन्द्रः आम्रः वैद्यः मेघश्च । जैवातृका जीववत्सा स्त्री ॥ हृभूलाभ्य आणकः ॥ ६८ ॥ एभ्य आणकः प्रत्ययो भवति । हृंग् हरणे । हराणकः । चौरः । भू सत्तायाम् । भवाणकः गृहपतिः । लांक् आदाने । लाणकः हस्ती ॥ प्रियः कित् ॥ ६९ ॥ प्रींग्श् तृप्तिकान्त्योरित्यस्मादाणकः प्रत्ययो भवति स च कित् । प्रियाणकः पुत्रः ॥ धाल्रूशिङ्घिभ्यः ॥ ७० ॥ योगविभाग उत्तरार्थः । एभ्य आणकः प्रत्ययो भवति । डु धांगक् धारणे च । धाणकः दीनारद्वादशभागः हविषां ग्रहः छिद्रपिधानं च । लूग्श् छेदने । लवाणकः कालः तृणजातिः । दात्रं च । शिघु आघ्राणे । शिङ्घाणकः नासिकामलः ॥ शीभीराजेश्चानकः ॥ ७१ ॥ शीभीराजिभ्यो धाल्रूशिङ्घिभ्यश्चानकः प्रत्ययो भवति ।

शीङ्क् स्वप्ने । शयानकः अजगरः शैलश्च । ञिभींक् भये । बिभेत्यस्मादिति भयानकः भीमः व्याघ्रः वराहः राहुश्च । राजृग् दीप्तौ राजानकः क्षत्रियः । डु धांग्क् धारणे च । धानकः हेमादिपरिमाणम् । लूग्श् छेदने । लवानकः देश विशेषः दात्रं च । शिङ्घन्त्यनेनेति शिङ्घानकः । श्लेष्मायुः पुरीषं च ॥ अणेर्डित् ॥ ७२ ॥ अणेर्डिदानकः प्रत्ययो भवति । अण शब्दे । आनकः पटहः ॥ कनेरीनकः ॥ ७३ ॥ कनै दीप्तिकान्तिगतिषु इत्यस्मादीनकः प्रत्ययो भवति । कनीनकः कनीनिका वाक्षितारका ॥ गुङ ईधुकैधुकौ ॥ ७४ ॥ गुङ् शब्दे इत्यस्मादीधुकएधुक इत्येतौ प्रत्ययौ भवतः । गवीधुकं नगरम् धान्यजातिश्च । गवेधुका तृणजातिः ॥ वृतेस्तिकः ॥ ७५ ॥ वृतूङ् वतने इत्यस्मात्तिकः प्रत्ययो भवति । वर्त्तिका चित्रकरोपकरणम् शकुनिः द्रव्यगुटिका च ॥ कृतिपुतिलतिभिदिभ्यः कित् ॥ ७६ ॥ एभ्यः कित्तिकः प्रत्ययो भवति । कृतैत् छेदने । कृत्तिका नक्षत्रम् । पुतिलती सौत्रौ । पुत्तिका मधुमक्षिका । लत्तिका वाद्यविशेषः गौः गोधा च । गोपूर्वाद्गोलत्तिका गृहगोलिका । अवपूर्वादवलत्तिका गोधा आलत्तिका गानमारम्भः । भिदृंपी विदारणे । भित्तिका कुड्यम् माषादिचूर्णम् शरावती च नदी ॥ इष्यशिमसिभ्यस्तकक् ॥ ७७ ॥ एभ्यस्तकक् प्रत्ययो भवति । इषत् इच्छायाम् । इष्टका मृद्विकारः । अशौटि व्याप्तौ । अष्टकाः श्राद्धतिथयस्तिस्रः अष्टम्यः पितृदेवत्यं च । मसैच् परिणामे । मस्तकः शिरः ॥ भियो द्वे च ॥ ७८ ॥ ञि भींक् भये इत्यस्मात्तकक् प्रत्ययो भवति द्वे रूपे च भवतः । बिभीतकः अक्षः ॥ हृरुहिपिण्डिभ्य ईतकः ॥ ७९ ॥ एभ्य ईतकः प्रत्ययो भवति । हृंग् हरणे । हरीतकी पथ्या । रुहं जन्मनि । रोहीतकः वृक्षविशेषः । पिडुङ् संघाते । पिण्डीतकः करहाटः ॥ कुषेः कित् कुषश् निष्कर्षे इत्यस्मात्किदीतकः प्रत्ययो भवति । कुषीतकः ऋषिः ॥ बलिबिलिशलिदमिभ्य आहकः ॥ ८१ ॥ एभ्य आहकः प्रत्ययो भवति । बल प्राणनधान्यावरोधयोः । बलाहकः मेघः वातश्च । बिलत् भेदने । बिलाहकः

वज्रः । बाहुलकान्न गुणः । शल गतौ । शलाहकः वायुः । दमूच् उपशमे । दमाहकः शिष्यः ॥ चण्डिभल्लिभ्या-
मातकः ॥ ८२ ॥ आभ्यामातकः प्रत्ययो भवति चडुङ् कोपे । चण्डातकं नर्तक्यादिवासः । भल्लि परिभाषणहिंसा-
दानेषु । भल्लातकः वृक्षः ॥ श्लेष्मातकाम्रातकामिलातकपिष्टातकादयः ॥ ८३ ॥ एते आतकप्रत्ययान्ता निपा-
त्यन्ते । श्लिषेर्मश्च परादिः । श्लेष्मातकः कफेलुः । अमेर्द्वौ रश्चान्तः । आम्रातकः वृक्षः । नञः परस्य म्लायतेर्मिल्
च । अमिलातकम् वर्णपुष्पम् । पिषेस्तोऽन्तश्च । पिष्टातकं वर्णचूर्णम् । आदिग्रहणात्कोशातक्यादयो भवन्ति ॥ शमि-
मनिभ्यां खः ॥ ८४ ॥ शमूच् उपशमे । शङ्खः कम्बुः निधिश्च । मनिच् ज्ञाने । मङ्खः मागधः कृपणः चित्रपटश्च ।
मङ्खा मङ्गलम् ॥ श्यतेरिच्च वा ॥ ८५ ॥ शोंच् तक्षणे इत्यस्मात् खः प्रत्यय इश्चास्यान्तादेशो वा भवति । शिखा
चूडा ज्वाला च । विशिखा आपणः । विशिखः बाणः । शाखा विटपः । विशाखा नक्षत्रम् । विशाखः स्कन्दः ॥
पूमुहो पुन्मूरौ च ॥ ८६ ॥ पूङ् पवने मुहौच् वैचित्ये इत्येताभ्यां खः प्रत्ययोऽनयोश्च यथासंख्यं पुन् मूर् इत्यादे-
शौ भवतः । पुङ्खः बाणबुन्धभागः मङ्गलाचारश्च । मूर्खः अज्ञः ॥ अशौडित् ॥ ८७ ॥ अशौटि व्याप्तावित्यस्मात् डित्
खः प्रत्ययो भवति । अश्नुत इति खमाकाशमिन्द्रियं च । नास्य खमस्ति नखः । शोभनानि खानि अस्मिन् सुखम् ।
दुष्टानि खान्यस्मिन् दुःखम् ॥ उषेः किल्लुक् च ॥ ८८ ॥ उषू दाहे इत्यस्मात् कित् खः प्रत्ययो लुक् चान्त्यस्य
भवति । ओषन्त्यस्यामिति उखा स्थाली ऊर्ध्वक्रिया वा ॥ महेरुच्चास्य वा ॥ ८९ ॥ मह पूजायामित्यस्मात् खः
प्रत्ययः कित् अन्तलुक् अकारस्य चोकारादेशो वा भवति । मुखमानम् । मखः यज्ञः अध्वर्युः ईश्वरश्च ॥ न्युङ्खादयः
॥ ९० ॥ न्युङ्खादयः शब्दाः खप्रत्ययान्ता निपात्यते । नयतेः ख उन्चान्तः । न्युङ्खाः षडोङ्काराः । आदिग्रहणादन्येऽपि
॥ मयेधिभ्यामूखेखौ ॥ ९१ ॥ मयि गतौ एधि वृद्धौ इत्याभ्यां यथासंख्यमूखेख इत्येतौ प्रत्ययौ भवतः । मयूखः

रश्मिः । एधिखः वराहः ॥ गम्यमिरम्यजिगमदिछागडिखडिगृभृवृस्तृभ्यो गः ॥ ९२ ॥ गम्लृं गतौ । गङ्गा देवनदी । अम गतौ । अङ्गम् । शरीरावयः । अङ्गः समुद्रः वह्निः राजा च । अङ्गा जनपदः । रमि क्रीडायाम् । रङ्गः नाट्यस्थानम् । अज क्षेपणे च । वेगः त्वरा रेतश्च । गदव्यक्तायां वाचि । गद्गः वाग्विकलः । अदंक् भक्षणे । अद्गः समुद्रः अग्निः पुरोडाशश्च । छोंच् छेदने । छागः बस्तः । गड सेचने । गङ्गः मृगजातिः । खडण् भेदे । खङ्गः मृगविशेषोऽसिश्च । गत् निगरणे । गर्गः ऋषिः । डुडुभृंगक् पोषणे च । भर्गः रुद्रः सूर्यश्च । वृगट् वरणे । वर्गः संघातः । औस्तृ शब्दोपतापयोः । स्वर्गः नाकः ॥ पूमुदिभ्यां कित् ॥ ९३ । पूगृश पवने । पूगः संघः क्रमुकश्च । मुदि हर्षे । मुद्गः धान्यविशेषः ॥ भृवृभ्यां नोऽन्तश्च ॥ ९४ ॥ आभ्यां किद्गः प्रत्ययो नकारश्चान्तो भवति । डु डु भृंगक् पोषणे च । भृङ्गः पक्षी भ्रमरः वर्णविशेषः लवङ्गश्च । वृगट् वरणे । वृङ्गः पक्षी उपपतिः ॥ द्रमो णिद्वा ॥ ९५ ॥ द्रम गतावित्यस्माद्गः प्रत्ययो भवति स च णिद्वा । द्राङ्गं शीघ्रम् । द्राङ्गः पांशुः । द्रङ्गः नगरम् । द्रङ्गा शुल्कशाला ॥ शङ्गशार्ङ्गादयः ॥ ९६ ॥ शङ्गादयः शब्दा गप्रत्ययान्ता निपात्यन्ते । शृश् हिंसायामित्यस्य ह्रस्वो नोऽन्तश्च । शृङ्ग विषाणम् शिखरं च । तस्यैव नोऽन्तो वृद्धिश्च । शार्ङ्गः पक्षी । आदिग्रहणात् हृंग् हरणे हार्गः परितोषः । मृंत् । प्राणत्यागे । मार्गः पन्थाः ॥ तडेरागः ॥ ९७ ॥ तडागम् सरः ॥ पतितमितृपृकृगॄल्वादेरङ्गः ॥ ९८ ॥ पतॢ गतौ । पतङ्गः पक्षी शलभः सूर्यः शालिविशेषश्च । तमूच् काङ्क्षायाम् । तमङ्गः हर्म्यनिर्यूहः । तॄ प्लवनतरणयोः । तरङ्गः ऊर्मिः । पॄ पालनपूरणयोः । परङ्गः खगः वेगश्च । कॄश् विक्षेपे । करङ्गः कर्मशीलः । शॄश् हिंसायाम् । शरङ्गः पक्षिविशेषः । लूगृश् छेदने । लवङ्गः सुगन्धिवृक्षः । आदिग्रहणादन्येभ्योऽपि ॥ सृवृनॄभ्यो णित् ॥ ९९ ॥ सृं गतौ । सारङ्गः हरिणः चातकः शबलवर्णश्च । वृगट् वरणे । वारङ्गः काण्डखड्गयोः,

शल्यं शकुनिश्च । नॄश नये । नारङ्गः वृक्षजातिः ॥ **मनेर्मन्मातौ च** ॥ १०० ॥ मनिच् ज्ञाने इत्यस्मादङ्गः प्रत्ययो मत्मातौ चास्यादेशौ भवतः । मतङ्गः ऋषिः हस्ती च । मातङ्गः हस्ती अन्त्यजातिश्च ॥ **विडिविलिकुरिमृदिपिशिभ्यः कित्** ॥ १०१ ॥ विड आक्रोशे । विडङ्गः वृक्षजातिः गृहावयवश्च । विलत् वरणे, विलत् भेदने वा । विलङ्गः औषधम् । कुरत् शब्दे । कुरङ्गः हरिणः । कुरङ्गी भोजकन्या । मृदश क्षोदे । मृदङ्गः मुरजः । पिशत् अवयवे । पिशङ्गः वर्णः ॥ **स्फुलिकलिपल्यादृभ्य इङ्गक्** ॥ १०२॥ स्फुलत् संचये च । स्फुलिङ्गः स्फुलिङ्गा च अग्निकणः । कलि शब्दसंख्यानयोः । कलिङ्गः राजा । कलिङ्गा जनपदः । पल गतौ । पलिङ्ग ऋषिः शिला च । पातेः पिङ्गः । भातेः भिङ्गः । द्वावपि वर्णविशेषौ । ददातेः दिङ्गः अध्यक्षः । दधातेः धिङ्गः श्रेष्ठी । लातेः लिङ्गं स्त्रीत्वादि हेतुश्च । आलिङ्गः वाद्यविशेषः । श्यतेः शिङ्गः वनस्पतिः किशोरश्च ॥ **भलेरिदुतौ चातः** ॥ १०३ ॥ भलिण् आभण्डने इत्यस्मादिङ्गक् प्रत्ययो भवति अकारस्य चेकारोकारौ भवतः । भिलिङ्गः कर्मारोपकरणम् । भुलिङ्गः ऋषिः पक्षी च । भुलिङ्गाः साल्वावयवाः॥ **अदेर्णित्** ॥ १०४ ॥ अदंक् भक्षणे इत्यस्मात् णिदिङ्गक् प्रत्ययो भवति । आदिङ्गः वाद्यजातिः ॥ **उच्चिलिङ्गादयः** ॥ १०५ ॥ उच्चिलिङ्गादयः शब्दा इङ्गकप्रत्ययान्ता निपात्यन्ते । उत्पूर्वाच्चलेरस्येत्वं च । उच्चिलिङ्गः दाडिमी । आदिग्रहणादन्येऽपि ॥ **माङस्तुलेरुङ्गक् च** ॥ १०६ ॥ माङ्पूर्वात्तुलण् उन्माने इत्यस्मात् उङ्गक् इङ्गक् च प्रत्ययौ भवतः । मातुलुङ्ग बीजपूरः । मातुलिङ्गः स एव ॥ **कमितमिशमिभ्यो डित्** ॥ १०७ ॥ कमूङ् कान्तौ । कुङ्गा जनपदः । तमूच् काङ्क्षायाम् । तुङ्गः महावर्ष्मा । शमूच् उपशमे । शुङ्गः मुनिः । शुङ्गा विनता । शुङ्गाः कन्दल्यः ॥ **सुर्तेः सुर्चं** ॥ १०८ ॥ सृं गतावित्यस्मादुङ्गः प्रत्ययः सुर्चास्यादेशो भवति । सुरुङ्गा गूढमार्गः ॥ **स्थार्त्तिजनिभ्यो घः** ॥ १०९ ॥ एभ्यो घः प्रत्ययो भवति । ष्ठां गतिनिवृत्तौ । स्थाघः गाधः । ऋं प्रापणे च । अर्घः मूल्यम् मानप्रमाणं पादोदकादिः

च । जनैचि प्रादुर्भावे । जङ्घा शरीरावयवः ॥ मघाघङ्काघदीर्घादयः ॥ ११० ॥ एते घप्रत्ययान्ता निपात्यन्ते । मङ्घेर्नलोपश्च । मघा नक्षत्रम् । हन्तेर्हस्य घश्च । घङ्कुः घस्मरः । घङ्का काङ्क्षा । अमेर्लुक् च । अघं पापम् । दृणातेर्दीर् । दीर्घ आयातः उच्चश्च । आदिशब्दादन्येऽपि ॥ सर्तेरघः ॥ १११ ॥ सृं गतावित्यस्मादघः प्रत्ययो भवति । सरघा मधुमक्षिका ॥ कुपूसमिण्भ्यश्चट् दीर्घश्च ॥ ११२ ॥ कुपूभ्यां सम्पूर्वाच्चेणश्च चट् प्रत्ययो दीर्घश्च भवति । टो ङ्यर्थः । कुङ् शब्दे । कूचः हस्ती । कूची प्रमदा चित्रभाण्डम् उदश्विद्विकारश्च पूग्श् पवने । पूचः पूची मुनिः । इंणक् गतौ । समीचः ऋत्विक् । समीचं मिथुनयोगः । समीची पृथ्वी उदीची च । दीर्घवचनाद्गुणो न भवति ॥ कूर्चचूर्चादयः ॥ ११३ ॥ कूर्च इत्यादयः शब्दाश्चट्प्रत्ययान्ता निपात्यन्ते । कवतेः किरतेः करोतेर्वा ऊरादेशश्चान्तस्य । कूर्चं श्मश्रु आसनं तन्तुवायोपकरणं यतिपवित्रकं च । कूर्चमिव कूर्चकः चिंकेति च भवति । चरतेश्चोरयतेर्वा चूरादेशश्च । चूर्चः बलवान् । आदिशब्दादन्येऽपि ॥ कल्यविमदिमणिकुकणिकुटिकृभ्योऽचः ॥ ११४ ॥ कलि शब्दसंख्यानयोः । कलचः गणकः । अव रक्षणादौ । अवचः उच्चैस्तरः । मदैच् हर्षे । मदचः मत्तः । मण शब्दे । मणचः शकुनिः । कुंङ् शब्दे । कवचं वर्म । कण शब्दे । कणचः कुणपः । कुटत् कौटिल्ये । कुटचः वृक्षजातिः । कृत् विक्षेपे । करचः धान्यावपनम् ॥ क्रकचादयः ॥ ११५ ॥ क्रकच इत्यादयः शब्दा अचप्रत्ययान्ता निपात्यन्ते । क्रमेः कश्च । क्रकचः करपत्त्रः। आदिशब्दादन्येऽपि ॥ पिशेराचक् ॥ ११६ ॥ पिशत् अवयवे इत्यस्मादाचक् प्रत्ययो भवति । पिशाचः व्यन्तरजातिः ॥ मृत्रपिभ्यामिचः ॥ ११७ ॥ आभ्यामिचः प्रत्ययो भवति । मृंत् प्राणत्यागे । मरिचमूषणम् । त्रपौषि लज्जायाम् । त्रपिचा कुथा ॥ म्रियतेरीचण् ॥ ११८ ॥ मृंत् प्राणत्यागे इत्यस्मादीचण् प्रत्ययो भवति । मारीचः रावणमातुलः ॥ लषेरुचः कश्च ॥ ११९ ॥ लषी कान्तावित्यस्मादुचः प्रत्ययोऽन्त्यस्य च को भवति । लकुचः

वृक्षजातिः ॥ गुडेरूचट् ॥ १२० ॥ गुडूची छिन्नरुहा । कुटादित्वात् ङित्वम् ॥ सिवेर्डित् ॥ १२१ ॥ षिवूच् ऊतौ इत्यस्मादूचट् प्रत्ययो डित् भवति । सूचः पिशुनः स्तिभिश्च । सूची संधानकरणी ॥ चिमेर्डोच्चडश्चौ ॥ १२२ ॥ चिमिभ्यां प्रत्येकं डोचडश्च इति प्रत्ययौ भवतः । वचनभेदान्न यथासंख्यम् । चिगृट् चयने । चोचः वृक्षविशेषः । चञ्चा तृणमयः पुरुषः । डुमिंग्ट् प्रक्षेपणे । मोचा कदली । मञ्चः पर्यङ्कः ॥ कुटिकुलिकल्युदिभ्य इञ्चक् ॥ १२३ ॥ कुटेः, कुटिञ्चः क्षुद्रकर्कटः । कुलेः, कुलिञ्चः राशिः । कलेः, कलिञ्चः उपशाखावयवः । उद आबाते सौत्रः । उदिञ्चः कोणः येन तूर्यं वाद्यते, परपुष्टश्च ॥ तुदिमदिपद्यदिगुगमिकचिभ्यश्छक् ॥ १२४ ॥ एभ्यश्छक् प्रत्ययो भवति । तुदींत् व्यथने । तुच्छः स्तोकः । मदैच् हर्षे । मच्छः मत्स्यः प्रमत्तपुरुषश्च । मच्छा स्त्री । पदिंच् गतौ । पच्छः शिला । अदंक् भक्षणे । अच्छः निर्मलः । गुंङ् शब्दे । गुच्छः स्तबकः । गम्लृं गतौ । गच्छः क्षुद्रवृक्षः । कचि बन्धने । कच्छः कूर्मपादः कुक्षिः नद्यवकुटारश्च । कच्छा जनपदः । बाहुलकात् कत्वाभावः ॥ पीपूङो ह्रस्वश्च ॥ १२५ ॥ आभ्यां छक् प्रत्ययो ह्रस्वश्च भवति । पींङ्च् पाने । पिच्छम् शकुनिपत्त्रम् । पिच्छः गुणविशेषः । यद्वान् पिच्छिल उच्यते । पूङ् पवने । पुच्छं वालधिः ॥ गुलुञ्छपिलिपिञ्छैधिच्छादयः ॥ १२६ ॥ एते छप्रत्ययान्ता निपात्यन्ते । गुडेलं उम् चान्तः । गुलुञ्छः स्तबकः। पीलेरिपिनोन्तो ह्रस्वश्च । पिलिपिञ्छः रक्षोविशेषः । एधेरिट् च । एधिच्छः नगः । आदिग्रहणात् पिञ्छादयोऽपि भवन्ति ॥ वियो जक् ॥ १२७ ॥ वींक् प्रजनकान्त्यसनखादनेषु च इत्यस्मात् जक् प्रत्ययो भवति । वीजम् उत्पत्तिहेतुः ॥ पुवः पुन् च ॥ १२८ ॥ पूङ् पवने इत्यस्मात् जक् प्रत्ययोऽस्य च पुन् इत्यादेशो भवति । पुञ्जः राशिः ॥ कुवः कुब्कुनौ च ॥ १२९ ॥ कुंङ् शब्दे इत्यस्माज्जक् प्रत्ययोऽस्य च कुब् कुन् इत्यादेशौ भवतः । कुब्जः वक्रानताङ्गः गुच्छश्च । कुञ्जः हनुः पर्वतैकदेशश्च । निकुञ्जः गहनम् ॥ कुटेरजः ॥ १३० ॥ कुटजः वृक्षवि-

शेषः । कुटादित्वात् ङित्त्वम् । कुटजी ॥ भिषेर्भिषभिष्णौ च वा ॥ भिषेरजः प्रत्ययो भिषभिष्ण इत्यादेशौ चास्य वा भवतः। भिषिः सौत्रः । भिषजः । आदेशबलाश्च गुणः । भिष्णजः वैद्यः । भेषजमौषधम् ॥ मुर्वेर्मुर् च ॥ १३२ ॥ मुर्वै बन्धने इत्यस्मादजः प्रत्ययोऽस्य च मुरित्यादेशो भवति । मुरजः मृदङ्गः ॥ बलेर्वोऽन्तश्च वा ॥ १३३॥ बल प्राणनधान्यावरोधयोरित्यस्मात् अजः प्रत्ययो वकारश्चान्तो वा भवति । बल्वजः मुञ्जविशेषः । बलजा सबुसो धान्यपुञ्जः ॥ उटजादयः ॥ उटजादयः शब्दा अजप्रत्ययान्ता निपात्यन्ते । वटेर्वस्योत्वं च । उटजं मुनिकुटीरः । आदिशब्दात् भूर्जभरुजादयो भवन्ति ॥ कुलेरिजक् ॥ १३५ ॥ कुल बन्धुसंस्त्यानयोरित्यस्मात् इजक् प्रत्ययो भवति । कुलिजं मानम्॥ कृगोऽञः ॥ १३६ ॥ करोतेरञः प्रत्ययो भवति । करञ्जः वृक्षजातिः ॥ झमेर्झः ॥ १३७ ॥ झमू अदन इत्यस्मात् झः प्रत्ययो भवति । झञ्झा ससीकरो मेघवातः ॥ लुषेष्टः ॥ १३८ ॥ लोष्टो मृत्पिण्डः ॥ नमितनिजनिवनिसनोलुक् च ॥ १३९ ॥ एभ्यष्टः प्रत्ययो भवति लुक् चान्तस्य भवति । णमं प्रह्वत्वे । नटः भरतपुत्रः । तनूयी विस्तारे । तटं कूलम् । जनैचि प्रादुर्भावे । जटा ग्रथितकेशसंघातः । वन षण संभक्तौ । वटः न्यग्रोधः । सटा अग्रथितः केशसंघातः ॥ जनिपणिकिजुभ्यो दीर्घश्च ॥ १४० ॥ एभ्यष्टः प्रत्ययो दीर्घश्चैषां गुणापवादो भवति । जनैचि प्रादुर्भावे । पणि व्यवहारस्तुत्योः । जाण्टः । पाण्टः । पक्षिविशेषावेतौ । किजू सौत्रौ । कीटः क्षुद्रजन्तुः । जूटः मौलिः ॥ घटाघाटाघण्टादयः ॥ १४१ ॥ एते टप्रत्ययान्ता निपात्यन्ते । हन्तेर्घघाघनश्च । घटा वृन्दम् । घाटा स्वाङ्गम् । घण्टा वाद्यविशेषः । आदिग्रहणाच्छटादयो भवन्ति ॥ दिव्यविश्रुकुकर्विशकिकङ्किकृपिचपिचभिकम्येधिकर्किमर्किंकक्खिलट्कूसभृवृभ्योऽटः॥१४२॥ दिवूच् क्रीडादौ । देवटः देवकुलविशेषः शिल्पी च । अव रक्षणादौ । अवटः प्रपातः कूपश्च । श्रुंट् श्रवणे । श्रवटः छत्रम् । कुंक् शब्दे । कवटः उच्छिष्टम् । कर्वं गतौ । कर्वटं क्षुद्रपत्तनम् । शकॢटं शक्तौ । शकटम्

अनः । ककुङ् गतौ । कङ्कटः सन्नाहः । कङ्कटं सीमा । कृपौङ् सामर्थ्ये । कर्पटं वासः । चप सान्त्वने । चपटः रसः । चमू अदने । चमटः घस्मरः । कमूङ् कान्तौ । कमटः वामनः । एधि वृद्धौ । एधटः वल्मीकः । कर्किमर्कौ सौत्रौ । कर्कटः कपिलः कुलीरश्च । कर्कटी त्रपुसी । मर्कटः कपिः क्षुद्रजन्तुश्च । कक्ख हसने । कक्खटः कर्कशः । तॄ तरणप्लवनयोः । तरटः पीनः । डुकृंग् करणे । करटः काकः करिकपोलश्च । सृं गतौ । सरटः कृकलासः । डुडुभृंग्क् पोषणे च । भरटः प्लवविशेषः भृत्यः कुलालश्च । वृग्ट् वरणे । वरटः क्षुद्रधान्यम् प्रहारश्च ॥ कुलिबिलिभ्यां कित् ॥ १४३ ॥ आभ्यां किदटः प्रत्ययो भवति । कुल बन्धुसंस्त्यानयोः । कुलटा बन्धकी । बिलत् वरणे । बिलटा नदी ॥ कपटकीकटादयः ॥ १४४ ॥ कपटादयः शब्दा अटप्रत्ययान्ता निपात्यन्ते । कम्पेर्नलोपश्च । कपटं माया । ककेरत इच्च । कीकटः कृपणः । आदिशब्दाल्लघटपर्पटादयो भवन्ति ॥ अनिशॄपॄवृललिभ्य आटः ॥ १४५ ॥ एभ्य आटः प्रत्ययो भवति । अनक् प्राणने । अनाटः शिशुः । शॄश् हिंसायाम् । शराटः शकुन्तः । पॄश् पालनपूरणयोः । पराट आयुक्तकः । वृग्श् भक्तौ । वराटः सेवकः । ललिण् ईप्सायाम् । ललाटम् अलिकम् ॥ सृसृपेः कित् ॥ १४६ ॥ आभ्यां किदाटः प्रत्ययो भवति । सृं गतौ । सराटः पुरस्सरः । सृप्लं गतौ । सृपाटः अल्पः कुमुदादिपत्त्रं च । सृपाटी उपानत् कुप्यम् अल्पपुस्तकश्च ॥ किरो लश्च वा ॥ १४७ ॥ किरतेः किदाटः प्रत्ययो लश्चान्तो वा भवति । किलाटो भक्ष्यविशेषः । किराटो वणिक् म्लेच्छश्च ॥ कपाटविराटशृङ्गाटप्रपुन्नाटादयः ॥ १४८ ॥ एते आटप्रत्ययान्ता निपात्यन्ते । कम्पेर्नलोपश्च । कपाटः अररिः । जपादीनां पो वेति वत्वे कवाटः । वृङ इत्वं च । विराटः राजा । श्रयतेः शृङ् च । शृङ्गाटं जलजविशेषः विपणिमार्गश्च । प्रपूर्वात् पुणेर्नश्च । प्रपुन्नाटः एडगजः । आदिशब्दात् खल्वाटादयोऽपि भवन्ति ॥ चिरेरिटो भ् च ॥ १४९ ॥ चिरेः सौत्रादिटः प्रत्ययो भवति । भकारश्चान्तादेशो भवति । चिर्भिटी वालुङ्की ॥ टिण्टश्चर

च वा॥१५०॥ चिरेर्ष्टिदिण्टः प्रत्ययश्चर इति चास्यादेशो वा भवति। चिरिण्टी चरिण्टी च प्रथमवयाः स्त्री ॥तॄकॄकृपिकम्पिकृषिभ्यः कीटः॥१५१॥ एभ्यः किदीटः प्रत्ययो भवति। तॄ प्लवनतरणयोः। तिरीटं कूलवृक्षः मुकुटं वेष्टनं च। कॄत् विक्षेपे। किरीटं मुकुटं हिरण्यं च। कृपौङ् सामर्थ्ये। कृपीटं हिरण्यं जलं च। कपुङ् चलने। कम्पीटं कम्पः कम्पं च। कृषींत् विलेखने। कृषीटं जलम् ॥ खञ्जेररीटः ॥ १५२ ॥ खजु गतिवैकल्ये इत्यस्मादरीटः प्रत्ययो भवति। खञ्जरीटः खञ्जनः ॥ गॄजॄदॄवॄभॄभ्य उट उडश्च ॥ १५३ ॥ एभ्य उट उडश्च प्रत्ययौ भवतः। भिन्नविभक्तिनिर्देश उटस्योत्तरत्रानुवृत्त्यर्थः। अप्रकृतस्यापि उडस्य विधानमिह लाघवार्थम्। गॄश् शब्दे। गरुटः गरुडश्च गरुत्मान्। जॄषूच् जरसि। जरुटः जरुडश्च वनस्पतिः। दॄश् विदारणे। दरुटः दरुडश्च बिडालः। वॄग्श् वरणे। वरुटः वरुडश्च मेषः। भॄश् भजने च। भरुटः भरुडश्च मेष एव ॥ मङ्केर्मकमुकौ च ॥ १५४ ॥ मकुङ् मण्डने इत्यस्मात् उटः प्रत्ययो मक मुक इत्यादेशौ चास्य भवतः। मकुटः मुकुटश्च किरीटः ॥ नर्कुटकुक्कुटोत्कुरुटमुरुटपुरुटादयः ॥ १५५ ॥ एते उटप्रत्ययान्ता निपात्यन्ते। नृतेः कश्च। नर्कुटः बन्दी। कुकेः कोऽन्तश्च। कुक्कुटः कृकवाकुः। उत्पूर्वात् कुगः कुर् च। उत्कुरुटः कचवरपुञ्जः। मुरिपुर्योर्गुणाभावश्च। मुरुटः यत् वेण्वादिमूलमृजूकर्तुं न शक्यते। पुरुटः जलजन्तुः। आदिशब्दात् स्थपुटादयोऽपि भवन्ति ॥ दुरो द्रः कूटश्च दुर् च ॥ १५६ ॥ दुर्पूर्वात् दृणातेः किदूट उटश्च प्रत्ययौ दुर्चास्यादेशो भवति। दुर्दुरूटः दुर्मुखः। दुर्दुरुटः अदेशकालवादी ॥ बन्धेः ॥ १५७ ॥ बन्धंश् बन्धने इत्येतस्मात् किदूट प्रत्ययो भवति। वधूटी प्रथमवयाः स्त्री ॥ चपेरेटः ॥ १५८ ॥ चप सांत्वने इत्यस्मादेटः प्रत्ययो भवति। चपेटः चपेटा वा हस्ततलाहतिः ॥ ग्रो णित् ॥ १५९ ॥ गॄत् निगरणे इत्यस्मात् णिदेटः प्रत्ययो भवति। गारेटः ऋषिः ॥ कृशाकृशाखेरोटः ॥ १६० ॥ एभ्यः ओटः प्रत्ययो भवति। डु कृंग् करणे। करोटः भृत्यः शिरः कपालं च। करोटं भाज-

नविशेषः ॥ शक्लृंट् शक्तौ । शकोटः बाहुः ॥ शाखृ श्लाखृ व्याप्तौ । शाखोटः वृक्षविशेषः ॥ कपोटवकोटाक्षोटक- कोटादय. ॥ १६१ ॥ एते ओटप्रत्ययान्ता निपात्यन्ते । कबृङ् वर्णे पश्च । कपोटः वर्णः [illegible] चनेः कश्च । वकोटः बकः । अश्नातेः सश्च परादिः । अक्षोटः फलवृक्षः । कृगः कोऽन्तश्च । कर्कोटः नागः । आदिशब्दादन्येऽपि भवन्ति ॥ **वनिकणिकाश्युषिभ्यष्ठः** ॥ १६२ ॥ वन भक्तौ । वण्ठः अनिविष्टः । कण शब्दे । कण्ठः कन्धरा । काशृङ् दीप्तौ । कार्ष्ठ दारु । काष्ठा दिक् अवस्था च । उषू दाहे । ओष्ठः दन्तच्छदः ॥ **पिविशिकुणिपृषिभ्यः कित्** ॥ १६३ ॥ एभ्यः कित् ठः प्रत्ययो भवति । पींङ् च् पाने । पीठमासनम् । विशंत् प्रवेशने । विष्ठा पुरीषम् । कुणत् शब्दोपकरणयोः । कुण्ठः अतीक्ष्णः । पृषू सेचने । पृष्ठः अङ्कुशः शरीरैकदेशश्च ॥ **कुषेर्वा** ॥ १६४ ॥ कुषश् निकर्षे इत्यस्मात् ठः प्रत्ययो भवति स च वा कित् । कुष्ठं व्याधिः गन्धद्रव्यं च । कोष्ठः कुशूलः उदरं च ॥ **शमेर्लुक् च वा** ॥ १६५ ॥ शमूच् उपशमे इत्यस्मात् ठः प्रत्ययो भवति लुक् चान्तस्य वा भवति । शठः धूर्तः । शण्ठः स एव नपुसकं च ॥ **पष्ठैधिठादयः** ॥ १६६ ॥ पष्ठादयः शब्दाष्ठप्रत्ययान्ता निपात्यन्ते । पुषेः कित् ठः पषादेशश्च । पष्ठः प्रस्थः पर्वतश्च । एधतेरिट् च । एधिठं वनम् । एधिठः गिरिसरिद्ध्रदः । आदिशब्दादन्येऽपि ॥ **मृजॄशॄकम्यमिरमिरपिभ्योऽठः** ॥ १६७ ॥ मृंत् प्राणत्यागे । मरठः दध्यतिद्रवीभूतम् कृमिजातिः कण्ठः प्राणश्च । जॄष्न् जरसि । जरठः कठोरः । शॄश् हिंसायाम् । शरठः आयुधं पापं क्रीडनशीलश्च । कमूङ् कान्तौ । कमठः भिक्षाभाजनम् कूर्मास्थि कच्छपः मयूरः वामनश्च । अम गतौ । अमठः प्रकर्षगतिः । रमिं क्रीडायाम् । रमठः देशः कृमिजातिः । क्रीडनशीलः म्लेच्छः देवश्च विलातानाम् । रप व्यक्ते वचने । रपठः विद्वान् मण्डूकश्च ॥ **पञ्चमात् डः** ॥ १६८ ॥ षणू भक्तौ । षण्डः वनं वृषभश्च । बाहुलकात् सत्वाभावः । भण शब्दे । भण्डः प्रहसनकरः बन्दी च । चण शब्दे । चण्डः क्रूरः । पणि व्यवहार-

स्तुत्योः । पण्डः शण्ठः । गणण् संख्याने । गण्डः पौरुषयुक्तः पुरुषः । मण शब्दे । मण्डः रश्मिः । अग्रम् अश्वविकारश्च । वन भक्तौ । वण्डः अल्पशेफः निश्चर्माग्रशिश्नश्च । शमूदमूच् उपशमे । शण्डः उत्सृष्टः पशुः ऋषिश्च । दण्डः वनस्पतिप्रतानः राजशासनं नालं प्रहरणं च । रमि क्रीडायाम् । रण्डः पुरुषः, रण्डा स्त्री, रण्डमन्तःकरणम् । त्रयमपि स्वसंबन्धिशून्यमेवमुच्यते । तमेस्तनेर्वा तण्डः ऋषिः । वितण्डा तृतीयकथा । गमेः गण्डः कपोलः । भामि क्रोधे । भाण्डमुपस्करः ॥ कण्यणिखनिभ्यो णिद्वा ॥ १६९ एभ्यो डः प्रत्ययो भवति स च णिद्वा । कण अण शब्दे । काण्डः शरः फलसंघातः पर्व च । कण्डं भूषणं पर्व च । आण्डः मुष्कः अण्डः स एव योनिविशेषश्च । खनूग् अवदारणे । खाण्डः कालाश्रयो गुडः । खण्डः इक्षुविकारोऽन्यः । खण्डं शकलम् ॥ कुगुहुनीकुणितुणिपुणिमुणिशुन्यादिभ्यः कित् ॥ १७० ॥ एभ्यः कित् डः प्रत्ययो भवति कुङ् शब्दे । कुडः घटः हलं च । गुङ् शब्दे । गुडः गोलः इक्षुविकारश्च । गुडा सन्नाहः । हुंक् दानादनयोः । हुडः मूर्खः मेषश्च । णींग् प्रापणे । नीडं कुलायः । कुणत् शब्दोपकरणयोः । कुण्डं भाजनम् जलाधारविशेषश्च । कुण्डः भर्तरि जीवति जारेण जातः अपट्विन्द्रियश्च । तुणत् कौटिल्ये । तुण्डं मुखम् । पुणत् शुभे । पुण्डः भिन्नवर्णः । मुणत् प्रतिज्ञाने । मुण्डः परिवापितकेशः । शुनत् गतौ । शुण्डा सुरा हस्तिहस्तश्च । आदिग्रहणादन्येभ्योऽपि भवति ॥ ऋसृव्यालिह्यविचमिवमियमिचुरिकुहेरडः ॥ १७१ ॥ ऋंक् गतौ । अरडः तरुः । सृं गतौ सरडः भुजपरिसर्पः तरुश्च । तॄं प्लवनतरणयोः । तरडः वृक्षजातिः । व्येंग् संवरणे । व्याडः दुःशीलः हिंस्रः पशुः भुजगश्च । लिहींक् आस्वादने । लेहडः श्वा चौर्यग्रासी च । अव रक्षणादौ । अवडः क्षेत्रविशेषः । चमू अदने । चमडः पशुजातिः । टु वमू उद्गिरणे । वमडः लूताजातिः । यमू उपरमे । यमडो वनस्पतिः युगलं च । चुरण् स्तेये । चोरडः चोरः । कुहणि विस्मापने । कुहडः उन्मत्तकः ॥ विहडकहोडकुरडकेरडकोडादयः ॥ १७२ ॥

एतेऽडप्रत्ययान्ता निपात्यन्ते । विपूर्वाद्धन्तेरनो लुक्च । विहडः शकुनिः मूढचित्तश्च । कपेर्हः प्रत्ययाकारस्य चौकारः । कहोडः ऋषिः । कुरेर्गुणाभावश्च । कुरडः मार्जारः । किरतेः केर च । केरडः त्रैराज्ये राजा । क्रुगः कित् प्रत्ययाकारस्य चौकारः । क्रोडः किरिः अङ्कश्च । आदिग्रहणाल्लहोडादयो भवन्ति ॥ जॄकॄतॄशॄसॄभॄवृभ्योऽण्डः ॥ १७३ ॥ जॄष् वृ जरसि । जरण्डः अतीतवयस्कः । कॄत् विक्षेपे । करण्डः समुद्रः समुद्रः कृमिजातिश्च । तॄ प्लवनतरणयोः। तरण्डः प्लवः वायुश्च । शॄश् हिंसायाम् । शरण्डः हिंस्रः आयुधं च । सृं गतौ । सरण्डः कृमिजातिः इषीका वायुः भूतसंघातः तृणसमवायश्च । डुडु भृंग्क् पोषणे च । भरण्डः भण्डजातिः पक्षी च । वृग्ट् वरणे । वरण्डः कुड्यम् तृणकाष्ठादिभारश्च ॥ पूगो गादिः ॥ १७४ ॥ पूग्शूपवने इत्यस्मात् । गकारादिरण्डः प्रत्ययो भवति । पोगण्डः विकलाङ्गः युवा च ॥ वनेस्त च ॥ १७५ ॥ वन भक्तावित्यस्मादण्डः प्रत्ययो भवति तकारश्चान्तादेशः । वतण्डः ऋषिः ॥ पिचण्डैरण्डखरण्डादयः ॥ १७६ ॥ एतेऽण्डप्रत्ययान्ता निपात्यन्ते । पिचेरगुणत्वं च पिचण्डः लघुलगुडः । ईरेर्गुणश्च । एरण्डः पञ्चाङ्गुलः । स्वादृ भक्षणे । अन्त्यस्वरादेररादेशश्च । स्वरण्डः सर्वर्तुकम् । आदिग्रहणात् कूष्माण्डशयण्डशयाण्डादयो भवन्ति ॥ लगेरुडः ॥ १७७ ॥ लगे सङ्गे इत्यस्मात् उडः प्रत्ययो भवति । लगुडः यष्टिः । गृगृहृदृभृभ्यस्तु उडो विहित एव ॥ कुशेरुण्डक् ॥ १७८ ॥ कुशच् श्लेषे इत्यस्मात् उण्डक् प्रत्ययो भवति । कुशुण्डः वपुष्मान् ॥ शमिषणिभ्यां ढः ॥ शमूच् उपशमे । शण्ढः नपुंसकम् । षण भक्तौ । षण्ढः स एव । बाहुलकात्सत्वाभावः ॥ कुणेः णित् ॥१८०॥ कुणत् शब्दोपकरणयोरित्यस्मात् कित् ढः प्रत्ययो भवति । कुण्ढः धूर्तः । बाहुलकान्न दीर्घः ॥ नञः सहेः षा च ॥ १८१ ॥ नञ्पूर्वात् षहिमर्षणे इत्यस्मात् ढः प्रत्ययः षा चास्यादेशो भवति । अषाढा नक्षत्रम् ॥ इणुर्विशावेणिपृकृवृतृजृहृसृपिपणिभ्यो णः ॥ १८२ ॥ इंणक् गतौ । एणः कुरङ्गः । उर्वैं हिंसायाम् । उर्णा मेषादिलोम भ्रुवोरन्त-

रावतश्च । शोंच् तक्षणे । शाणः परिमाणम् शस्त्रतेजनं च । वेणृग् गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेण्णा कृष्णवेण्णा च नाम नदी । पृंश् पालनपूरणयोः । पर्णं पत्रं शिरश्च । कॄत् विक्षेपे । कर्णः श्रवणं कौन्तेयश्च । वृश् वरणे । वर्णः शुक्लादिः ब्राह्मणादिः अकारादिः यशः स्तुतिः प्रकारश्च । तॄ प्लवनतरणयोः । तर्णः वत्सः । जॄष् जरसि । जर्णः चन्द्रमाः वृक्षः कर्कः क्षयधर्मा शकुनिश्च । दृङ्त् आदरे । दर्णः पर्णम् । सृप्लृं गतौ । सपूर्णः सरीसृपजातिः । पणि व्यवहारस्तुत्योः । पण्णम् व्यवहारः ॥ घृवीह्वाशुष्युषितृषिकृष्यर्तिभ्यः कित् ॥ १८३ ॥ एभ्यः कित् णः प्रत्ययो भवति । घृं सेचने । घृणा कृपा । वींक् प्रजनादिषु । वीणा वल्लकी । ह्वेंग् स्पर्धाशब्दयोः । हूणः म्लेच्छजातिः । शुषंच् शोषणे । शुष्णः निदाघः । उषू । दाहे उष्णः स्पर्शविशेषः । ञि तृषच् पिपासायाम् । तृष्णा पिपासा । कृषींत् विलेखने । कृष्णः वर्णः विष्णुः मृगश्च । ऋंक् गतौ । ऋणं वृद्धिधनम् । जलं दुर्गभूमिश्च ॥ द्रोर्वा ॥ १८४ ॥ द्रुं गतौ इत्यस्मात् णः प्रत्ययः स च किद्वा भवति । द्रुणा ज्या । द्रोणः चतुराढकं पाण्डवाचार्यश्च । द्रोणी नौः । गौरादित्वाद् ङीः ॥ स्थाक्षुस्तोरूच्च ॥१८५॥ एभ्यो णः प्रत्यय ऊकारश्चान्तादेशो भवति । ष्ठां गतिनिवृत्तौ । स्थूणा तन्तुधारिणी गृहधारिणी शरीरधारिणी लोहप्रतिमाव्याधिविशेषौ च । टुक्षुक् शब्दे । क्षूणमपराधः । तुंक् वृत्त्यादिषु । तूणः इषुधिः ॥ भ्रूणतृणगुणकार्वणतीक्ष्णश्लक्ष्णाभीक्ष्णादयः ॥१८६॥ एते णप्रत्ययान्ता निपात्यन्ते । भृगो भ्रू च भ्रूणः निहीनः अर्भकः स्त्रैणगर्भश्च । तरतेर्ह्रस्वश्च । तृणं शष्पादि । गायतेर्गमेर्गृणातेर्वा गुभावश्च । गुणः उपकारः आश्रितः अप्रधानं ज्या च । कृगो वृद्धिः कान्तश्च । कार्वणः शिल्पी । तिजेर्दीर्घः सश्च परादिः । तीक्ष्णं निशितम् । श्लिषेः सोऽन्तोऽचेतः । श्लक्ष्णमकर्कशं सूक्ष्मं च । अभिपूर्वादिषेः किच्च सोऽन्तः । अभीक्ष्णमजस्रम् । आदिग्रहणादन्येऽपि ॥ तॄकॄशॄपॄभ्रूवृश्रुरुहिलक्षिविचक्षिचुकिबुकितङ्कयङ्किमङ्किकङ्किचरिसमीरेरणः ॥ १८७ ॥ तॄं प्लवनतरणयोः । तरणम् । कॄत् विक्षेपे

। करणम् । शॄ हिंसायाम् । शरणं गृहम् । पॄश् पालनपूरणयोः । परणम् । डुडुभृंग्क् पोषणे च । भरणम् । वृग्ट् वर-
णे । वरणः वृक्षः सेतुबन्धश्च । वरणं कन्याप्रतिपादनम् । श्रुंट् श्रवणे । श्रवणः कर्णः भिक्षुश्च । रुक् शब्दे रुंङ् रेषणे वा ।
रवणः करभः अग्निः द्रुमः वायुः भृङ्गः शकुनिः सूर्यः घण्टा च । रुहं जन्मनि रोहणः गिरिः । लक्षीण् दर्शनाङ्कनयोः ।
लक्षणं व्याकरणम् शुभाशुभसूचकं रेखातिलकादि अङ्कनं च । चक्षिक् व्यक्तायां वाचि । विचक्षणः विद्वान् । चुक्कण्
व्यथने । चुक्कणः व्यायामशीलः । बुक्क भाषणे । बुक्कणः श्वा वावदूकश्च । तिगु गतौ । तङ्गणाः जनपदः । अगु गतौ ।
अङ्गणम् अजिरम् । मकुङ् मण्डने । मङ्कणः ऋषिः । ककुङ् गतौ । कङ्कणः प्रतिसरः । चर भक्षणे च । चरणः पादः ।
इरिक् गतिकम्पनयोः सम्पूर्वः । समीरणः वातः ॥ कॄगॄपॄकृपिवृषिभ्यः कित् ॥ १८८ ॥ एभ्यः किदणः प्रत्ययो
भवति । कॄत् विक्षेपे । किरणः रश्मिः । गॄत् निगरणे । गिरणः मेघः आचार्यः ग्रामश्च । पॄश् पालनपूरणयोः । पुरणः
समग्रयिता समुद्रः पर्वतविशेषश्च । कृपौङ् सामर्थ्ये । कृपणः कीनाशः । वृषू सेचने । वृषणः मुष्कः ॥ धृषिवहेरि-
च्चोपान्त्यस्य ॥ १८९ ॥ आभ्यां किदणः प्रत्यय इच्चोपान्त्यस्य भवति । ञि धृषाट् प्रागल्भ्ये । धिषणः बृहस्पतिः ।
धिषणा बुद्धिः । वहीं प्रापणे । विहणः ऋषिः पाठश्च ॥ चिक्कणकुक्कणकूकणकुङ्कणत्रवणोल्वणोरणलवण-
वङ्क्षणादयः ॥ १९० ॥ एते किदणप्रत्ययान्ता निपात्यन्ते । चिनोतेश्चिक्क् च । चिक्कणः पिच्छिलः । कुकिकुगोः
कोऽन्तश्च । कुक्कणः शकुनिः । कूकणः ऋषिः । कुकेः स्वराभोऽन्तश्च । कुङ्कणाः जनपदः । त्रपेर्वश्च । त्रवणः देशः ।
वलेर्वस्योत् वोऽन्तश्च । उल्वणः स्फारः । अर्तेरुर् च । उरणः मेषः । लीयतेः लिम्पतेः स्वदतेर्वा लवादेशश्च । लवणं गु-
णः द्रव्यं च । वञ्चेः सः परादिर्नलोपाभावश्च । वङ्क्षणः ऊरुमूलसंधिः । आदिशब्दाज्ज्योतिरिङ्गणतुदणभुरणादयो
भवन्ति ॥ कुपिविषिवृषिधृषिमृषियुषिद्रुहिभ्रहेराणक् ॥ १९१ ॥ एभ्य आणक् प्रत्ययो भवति । कुपौङ् सा-

मर्ध्ये । कृपाणः खड्गः । विषू सेचने । विषाणं शृङ्गम् करिदन्तश्च । वृषू सेचने । वृषाणः ञिधृषाद् प्रागल्भ्ये । धृषाणः देवः । मृषू सहने च । मृषाणः । युषि सेवने सौत्रः । युषाणः । द्रुहौच् जिघांसायाम् । द्रुहाणः मुखरः । ग्रहीश् उपादाने । गृहाणः । वृषाणादयः स्वमकृत्यर्थवाचिनः सर्वेऽपि कर्तरि कारके ज्ञेयाः ॥ पषो णित् ॥ १९२ ॥ पषी बाधनस्पर्शनयोरित्यस्मादाणक् प्रत्ययो भवति स च णित् । पाषाणः प्रस्तरः ॥ कल्याणपर्याणादयः ॥ १९३ ॥ कल्याणादयः शब्दा आणक्प्रत्ययान्ता निपात्यन्ते । कलेर्योऽन्तश्च । कल्याणं श्वोवसीयसम् । परिपूर्वादिणो लुक् च । पर्याणम् अश्वादीनां पृष्ठच्छदः । आदिग्रहणात् द्रेक्काणवोक्काणकेक्काणादयो भवन्ति ॥ द्रुहृबृंहिदक्षिभ्य इणः ॥१९४॥ एभ्य इणः प्रत्ययो भवति । द्रुं गतौ । द्रविणं द्रव्यम् । हृंग् हरणे । हरिणः मृगः । बृंह वृद्धौ । बर्हिणः मयूरः । दक्षि शैघ्र्ये च । दक्षिणः कुशलः । अनुकूलश्च । दक्षिणा दिक् ब्रह्मदेयं च ॥ ऋद्रुहेः कित् ॥ १९५ ॥ आभ्यां किदिणः प्रत्ययो भवति । ऋश् गतौ । इरिणम् ऊषरम् कुञ्जः वनदुर्गं च । द्रुहौच् जिघांसायाम् । द्रुहिणः ब्रह्मा क्षुद्रजन्तुश्च ॥ ऋकृवृधृदारिभ्य उणः ॥ १९६ ॥ एभ्य उणः प्रत्ययो भवति । ऋंक् गतौ अरुणः सूर्यसारथिः उषा वर्णश्च । कॄत् विक्षेपे । करुणा दया । करुणः करुणाविषयः । करुणं दैन्यम् । वृंश् भरणे । वरुणः प्रचेताः । धृंग् धारणे । धरुणः धर्ता आयुक्तो लोकश्चः। दॄश् विदारणे । णौ, दारुण उग्रः ॥ क्षः कित् ॥ १९७ ॥ क्षैं क्षये इत्यस्मात् किदणः प्रत्ययो भवति । क्षुणः व्याधिः क्षामः क्रोध उन्मत्तश्च ॥ भिक्षुणी ॥ १९८ ॥ भिक्षेरुणः प्रत्ययो ङीश्च निपात्यते । भिक्षुणी व्रतिनी ॥ गादाभ्यामेष्णक् ॥ १९८ ॥ आभ्यामेष्णक् प्रत्ययो भवति । गैं शब्दे । गेष्णः मेषः उद्गाता रङ्गोपजीवी च । गेष्ण साम सुखं च । रात्रिगेष्णः रङ्गोपजीवी । सुगेष्णा किन्नरी । डु दांग्क् दाने । देष्णः बाहुः दानशीलश्च । चारुदेष्णः सात्यभामेयः । सुदेष्णा विराटपत्नी ॥ दम्यमितमिमावापृधुगृजहसिवस्यसिवितसिमसी-

पभ्यस्तः ॥ २०० ॥ दमूच् उपशमे । दन्तः दशनः हस्तिदंष्ट्रा च । अम गतौ । अन्तः अवसानम् धमः समाप च । तमूच् काङ्क्षायाम् । तन्तः खिन्नः । मांङ्क् माने । मानम् अन्तः प्रविष्टम् । वांक् गतिगन्धनयोः । वातः वायुः । पूगश् पवने । पोतः नौः अग्निः बालश्च । धूग्श् कम्पने । धोतः धूमः शठः वातश्च । गॄत् निगरणे । गर्तः श्वभ्रम् । जॄष्च् जरसि । जर्तः प्रजननं राजा च । हसे हसने । हस्तः करः नक्षत्रं च । वसूच् स्तम्भे । वस्तः छागः । असूच् क्षेपणे । अस्तः गिरिः । तसूच् उपक्षये । वितस्ता नदी । मसैच् परिणामे । मस्तः मूर्धा । इणंक् गतौ । एतः हरिणः वर्णः वायुः पथिकश्च ॥ **शीरीभूदूमूघृपाधाग्चित्यर्त्यञ्जिपसिमुसिबुसिबिसिरमिधुर्विपूर्विभ्यः कित्** ॥२०१॥ एभ्यः कित् तः प्रत्ययो भवति । शीङ्क् स्वप्ने । शीतं स्पर्शविशेषः। रींशू गतिरेषणयोः। रीतं सुवर्णम् । भू सत्तायाम् । भूतः ग्रहः। भूतं पृथिव्यादि । दूङ्च् परितापे । दूतः वचोहरः।मूङ् बन्धने । मूतः दध्यर्थं क्षीरे तक्रसेकः वस्त्रावेष्टनबन्धनम् आचमनी आलानं पाशः बन्धनमात्रं धान्यादिपुटश्च । घृं सेचने। घृतं सर्पिः।पां पाने । पीतं वर्णविशेषः।डुधांग्क् धारणे च ।'धागः' इति हिः। हितम् उपकारि । चितै संज्ञाने । चित्तं मनः। ऋक् गतौ । ऋतं सत्यम् । अञ्जौप् व्यक्तिम्रक्षणादिषु । अक्तः म्रक्षितः व्यक्तीकृतः परिमितः प्रेतश्च । पुसच् विभागे । पुस्तः लेख्यपत्रसंघातः लेप्यादिकम च । मुसच् खण्डने । मुस्ता गन्धद्रव्यम् । बुसच् उत्सर्गे । बुस्तः महसनम् । बिसच् प्रेरणे । बिस्तं सुवर्णमानम् । रमिं क्रीडायाम् । सुरतं मैथुनम् । धुर्वै हिंसायाम् धूर्तः शठः । पूर्वं पूरणे । पूर्तः पुण्यम् ॥ **लूम्रो वा** ॥ २०२ ॥ आभ्यां तः प्रत्ययः स च किद्वा भवति लूग्श्छेदने । लूता क्षुद्रजन्तुः । लोतः बाष्पं लवनं वस्तः कीटजातिश्च । मृंत् प्राणत्यागे । मृतः गतप्राणः । मर्तः ऋषिः प्राणी पुरुषश्च ॥ **सुसितनितुसेर्दीर्घश्च वा** ॥ २०३ ॥ एभ्यः कित् तः प्रत्ययो दीर्घश्च वा भवति । षुंग्ट् अभिषवे । सूतः सारथिः । सुतः पुत्रः । षिंग्ट् बन्धने । सीता जनकात्मजा सस्यं हलमार्गश्च । सितः वर्णः बन्धश्च ।

तनूयि विस्तारे । तातः पिता पुत्रेष्टनाम च । ततं विस्तीर्णं वाद्यविशेषश्च । तुस शब्दे । तूस्तानि वस्त्रदशाः । तुस्ताः जटाः प्रदीपनं च ॥ **पुतपित्तनिमित्तोतशुक्ततिक्तलिप्तसूरतमुहूर्तादयः** ॥ २०४ ॥ एते कित्तप्रत्ययान्ता निपात्यन्ते । पूङो ह्रस्वश्च । पुतः स्फिक् । पीङस्तोऽन्तश्च । पित्तं धातुः । निपूर्वात् मिनोतेर्मित् च । निमित्तं हेतुः दिव्यज्ञानं च । उमेर्लुक् च । उत आशङ्काद्यर्थमव्ययम् । शकेः शुचेर्वा शुवभावश्च । शुक्तं कल्कजातिः । ताडयतेस्तकतेस्तिजेर्वा तिक् च । तिक्तो रसविशेषः । लीयतेः पोऽन्तो ह्रस्वश्च । लिप्तं श्लेषः अंसदेशश्च । सुपूर्वाद्रमेः सोर्दीर्घश्च । सूरतः दमितो हस्ती अन्यो वा दान्तः । हुर्च्छेः मुश्च धात्वादिः ॥ मुहूर्तः कालविशेषः । आदिग्रहणादयुतनियुतादयो भवन्ति ॥ **कृगो यङः** ॥ २०५ ॥ करोतेर्यङन्तात् कित् तः प्रत्ययो भवति । चेक्रीयितः पूर्वाचार्याणां यङ्प्रत्ययसंज्ञा ॥ **इवर्णादिर्लुपि** ॥ २०६ ॥ करोतेर्यङो लुपि इवर्णादिरतः प्रत्ययो भवति । चर्करितं चर्करीतं यङ्लुबन्तस्याख्ये ॥ **दृपृभृमृशीयजिखलिवलिपर्विपच्यमिनमितमिदर्शिहर्यिकर्ककिभ्योऽतः** ॥ २०७ ॥ दृङ्त् आदरे । दरतः आदरः । पृंक् पालनपूरणयोः । परतः कालः । डुडुभृंगक् पोषणे च । भरतः आदिचक्रवर्ती हिमवत्समुद्रमध्यक्षेत्रं च । मृंत् प्राणत्यागे । मरतः मृत्युः अग्निः प्राणी च । शीङ्क् स्वप्ने । शयतः निद्रालुः चन्द्रः स्वप्नः अजगरश्च । यजीं देवपूजासंगतिकरणदानेषु । यजतः यज्वा अग्निश्च । खल संचये च । खलतः शीर्णकेशशिराः । वलि संवरणे । वलतः कुशूलः । पर्व पूरणे । पर्वतः गिरिः । डु पचीष् पाके । पचतः अग्निः आदित्यः पालकः इन्द्रश्च । अम गतौ । अमतः मृत्युः जीवः आतङ्कश्च । णमं प्रह्वत्वे । नमतः नटः देवः ऊर्णास्तरणं ह्रस्वश्च । तमूच् काङ्क्षायाम् । तमतः निर्वेदो आकाङ्क्षी धूमश्च । दृशूं प्रेक्षणे । दर्शतः द्रष्टा अग्निश्च । हर्य कान्तौ । हर्यतः वायुः अश्वः कान्तः रश्मिः यज्ञश्च । ककुङ् गतौ कङ्कतः केशमार्जनम् ॥ **पृषिरञ्जिसिकिकालाट्टभ्यः कित्** ॥ २०८ ॥ एभ्यः कित् अतः प्रत्ययो भवति ।

पृषू सेचने । पृषतः हरिणः । रञ्जीं रागे । रजतं रूप्यम् । सिकिः सौत्रः । सिकताः वालुका । कैं शब्दे । कतः गोत्रकृत् । लांक् आदाने । लता वल्ली । वृगट् वरणे । व्रतं शास्त्रविहितो नियमः ॥ कृवृकल्यलिचिलिविलीलिलानाथिभ्य आतक् ॥ २०९ ॥ एभ्य आतक् प्रत्ययो भवति । कृत् विक्षेपे । किरातः शबरः । वृगट् वरणे । व्रातः समूहः उत्सेधजीविसंघश्च । कलि शब्दसंख्यानयोः । कलातः ब्रह्मा । अली भूषणादौ । अलातम् । उन्मुकम् । चिलत् वसने । चिलाता म्लेच्छः । विलत् वरणे । विलातः शवाच्छादनवस्त्रम् । इलत् गत्यादौ । इलातः नगः । लांक् आदाने । लातः मृत्तिकादानभाजनम् । नाथङ् उपतापैश्वर्याशीःषु । नाथातः आहारः प्रजापतिश्च ॥ हृश्यारुहिशोणिपलिभ्य इतः ॥ २१० ॥ एभ्य इतः प्रत्ययो भवति । हृंग् हरणे । हरितः वर्णः । श्यैङ् गतौ । श्येतः वर्णः मृगः मत्स्यः श्येनश्च । रुहं बीजजन्मनि । रोहितः वर्णः मत्स्यः मृगजातिश्च ॥ लत्वे, लोहितः वर्णः । लोहितम् असृक् । शोण वर्णगत्योः । शोणितं रुधिरम् । पल गतौ । पलितं श्वेतकेशः ॥ नञ आपेः ॥ २११ ॥ नञ्पूर्वादाप्लृंट् व्याप्त्यादित्यस्मादितः प्रत्ययो भवति । नापितः कारुविशेषः ॥ क्रुशिपिशिपृषिकुषिकुस्युचिभ्यः कित् ॥ २१२ ॥ एभ्यः कितः प्रत्ययो भवति । क्रुशं आह्वानरोदनयोः । क्रुशितं पापम् । पिशत् अवयवे । पिशितं मांसम् । पृषू सेचने । पृषितं वारिबिन्दुः । कुषश् निष्कर्षे । कुषितं पापम् । कुसच् श्लेषे । कुसितः ऋषिः । कुसितम् ऋणं श्लिष्टं च । उचच् समवाये । उचितं स्वभावः योग्यं चिरानुयातं श्रेष्ठम् च ॥ हृग ईतण् ॥ २१३ ॥ हारीतः पक्षी ऋषिश्च ॥ अदो भुवो डुतः ॥ २१४ ॥ अद्पूर्वात् भुवो डुतः प्रत्ययो भवति । अद् विस्मितं भवति तेन तस्मिन् वा मनः अद्भुतमाश्चर्यम् ॥ कुलिमयिभ्यामूतक् ॥ २१५ ॥ आभ्यामूतक् प्रत्ययो भवति । कुल बन्धुसंस्त्यानयोः । कुलूताः जनपदः । मयि गतौ । मयूता वसतिः ॥ जीवेर्मश्च ॥ २१६ ॥ जीव प्राणधारणे इत्यस्मादूतक् प्रत्ययो भवति मन्तादेशश्च । जीमूतः

मेघः गिरिश्च ॥ कबेरोतः पृ च ॥ २१७ ॥ कबृङ् वर्णे इत्यस्मादोतः प्रत्ययः पश्चान्तादेशो भवति । कपोतः पक्षी वर्णश्च ॥ आस्फायेर्डित् ॥ २१८ ॥ आङ्पूर्वात् स्फायैङ् वृद्धावित्यस्मात् डिदोतः प्रत्ययो भवति । आस्फोता नाम ओषधिः ॥ जॄविशिभ्यामन्तः ॥ २१९ ॥ जॄष् जरसि । जरन्तः भूतग्रामः वृद्धः महिषश्च । विशंत् प्रवेशने । वेशन्तः पल्वलम् वल्लभः अपापापवर्गः आकाशं च ॥ रुहिनन्दिजीविप्राणिभ्यष्टिदाशिषि ॥ २२० ॥ एभ्य आशिषि टिदन्तः प्रत्ययो भवति । रुहं जन्मनि । रोहतात् रोहन्तः वृक्षः । रोहन्ती औषधिः ॥ टु नदु समृद्धौ । नन्दतात् नन्दन्तः सखा आनन्दश्च । नन्दन्ती सखी । जीव प्राणधारणे । जीवतात् जीवन्तः आयुष्यवान् । जीवन्ती शाकः । अनक् प्राणने । प्राण्यात् प्राणन्तः वायुः रसायनं च । प्राणन्ती स्त्री ॥ तॄजिभूवदिवहिवसिभासिसाधिमदिगडिगण्डिमण्डिनन्दिरेविभ्यः ॥ २२१॥ एभ्यष्टिदन्तः प्रत्ययो भवति । आशिषीत्येके । तॄ प्लवनतरणयोः । तरन्तः आदित्यः भेकश्च । तरन्ती स्त्री । जिं अभिभवे । जयन्तः रथरेणुः ध्वज इन्द्रपुत्रः जम्बूद्वीपपश्चिमद्वारम् पश्चिमानुत्तरविमानं च । जयन्ती उदयनपितृष्वसा । भू सत्तायाम् । भवन्तः कालः । भवन्ती । वद व्यक्तायां वाचि । वदन्तः । वदन्ती । वहीं प्रापणे । वहन्तः रथः अनड्वान् रथरेणुः वायुश्च । वहन्ती । वसं निवासे । वसन्तः ऋतुः । भासि दीप्तौ । भासन्तः सूर्यः । भासन्ती । ण्यन्तोऽपि । भासयन्तः सूर्यः । अदंक् भक्षणे । अदन्तः । अदन्ती । साधंट् संसिद्धौ । साधन्तः भिक्षुः । ण्यन्तोऽपि । साधयन्तः भिक्षुः । साधयन्ती । मदैच् हर्षे । णौ, मदयन्तः । मदयन्ती पुष्पगुल्मजातिः । गड सेचने । गडन्तः जलदः । ण्यन्तोऽपि । गडयन्तः । गडयन्ती । गडु वदनैकदेशे ण्यन्तः । गण्डयन्तः मेघः । मडु भूषायाम् ण्यन्तः । मण्डयन्तः प्रसाधकः अलंकारः आदर्शश्च ॥ टु नदु समृद्धौ ण्यन्तः । नन्दयन्तः सुखकृत् राजा हिरण्यं सुखं च । नन्दयन्ती । रेवृङ् पथि गतौ रेवन्तः सूर्यपुत्रः । अनुक्तार्था धात्वर्थकर्त्रर्थाः ॥ सीमन्तहेमन्तभदन्त-

दुष्यन्तादयः ॥ २२२ ॥ एतेऽन्तप्रत्ययान्ता निपात्यन्ते । सिनोतेः सीम् च । सीमन्तः केशमार्गः ग्रामक्षेत्रान्तश्च । हन्तेर्हिनोतेर्वा हेम् च । हेमन्तः ऋतुः । भन्दतेर्नलुक् च । भदन्तः निर्ग्रन्थेषु शाक्येषु च पूज्यः । दुषेर्यौऽन्तश्च । दुष्यन्तः राजा । आदिग्रहणादन्येऽपि ॥ शकेरुन्तः २२३ ॥ शक्लृंट् शक्तावित्यस्मादुन्तः प्रत्ययो भवति । शकुन्तः पक्षी ॥ कषेर्डित् ॥ २२४ ॥ कष हिंसायामित्येतस्मात् डिदुन्तः प्रत्ययो भवति । कुन्तः आयुधम् ॥ कमिप्रुगार्तिभ्यस्थः ॥ २२५ ॥ कमूङ् कान्तौ । कन्था प्रावरणम् नगरं च । प्रुङ् गतौ । प्रोथः प्रियो युवा शूकरमुखं घोणा च । गैं शब्दे । गाथा श्लोकः आर्या वा । ऋं गतौ । अर्थः जीवाजीवादिपदार्थः प्रयोजनम् अभिधेयं धनं याच्ञा निवृत्तिश्च ॥ अवाद् गोऽच्च वा ॥ २२६ ॥ अवपूर्वाद्गायतेस्थः प्रत्ययोऽच्चान्तादेशो वा भवति । अवगथः अवगाथः अक्षसंघातः प्रातःसवनं रथयानं साम पन्थाश्च ॥ नीनूरमितॄतुदिवचिरिचिसिचिश्विहनिपागोपावोदुगाभ्यः कित् ॥ २२७ ॥ णींग् प्रापणे । नीथं जलम् । सुनीथो नाम राजा नीतिमान् धर्मशीलः ब्राह्मणश्च । णूत् स्तवने । नूथं तीर्थम् । रमिं क्रीडायाम् । रथः स्यन्दनः । तॄ प्लवनतरणयोः । तीर्थं जलाशयावगाहनमार्गः पुण्यक्षेत्रमाचार्यश्च । तुदींत् व्यथने । तुत्थं चक्षुष्यो धातुविशेषः ॥ वचंक् भाषणे । उक्थं शास्त्रं सामवेदश्च । उक्थानि सामानि । रिचृंपी विरेचने । रिक्थं धनम् । षिचींत् क्षरणे । सिक्थं मदनं पुलाकश्च । ट्वोश्वि गतिवृद्ध्योः । शूथः यज्ञप्रदेशः । हनंक् हिंसागत्योः । हथः पन्थाः कालश्च । पां पाने । पीथं बालघृतपानम् अम्भः नवनीतं च । पीथः मकरः रविश्च । गोपूर्वात् गोपीथः तीर्थविशेषः गोनिपान जलद्रोणी कालविशेषश्च । गैं शब्दे । अवगीथम् । यज्ञकर्मणि प्रातः शंसनम् उद्गीथः शुनामूर्ध्वमुखानां विरावः सामगानम् प्रथमोच्चारणं च ॥ न्युद्भ्यां शीङः ॥ २२८ ॥ निउद्पूर्वात् शीङ्क् स्वप्ने इत्यस्मात् कित्थः प्रत्ययो भवति । निशीथः अर्धरात्रः रात्रिः प्रदोषश्च । उच्छीथः स्वप्नः टिट्टिभश्च ॥ अवभृनिऋसमिणभ्यः ॥२२९

अपूर्वाद्विभर्तेः निष्पूर्वादर्तेः समपूर्वादितेश्च कित् थः प्रत्ययो भवति । अवभृथः यज्ञावसानं यज्ञस्नानं च । निर्ऋथः निकायः । निर्ऋथं स्नानम् । समिथः संगमः गोधूमपिष्टं च । समिथं समूहः ॥ सर्त्तेणित् ॥ २०३ ॥ सृं गतावित्यस्मात् णित् थः प्रत्ययो भवति । सार्थः समूहः ॥ २३० ॥ पथयूथगूथकुथनिथनिथसुरथादयः ॥ २३१ ॥ एते थप्रत्ययान्ता निपात्यन्ते । पततेर्लो लुक् च । पथः पन्थाः । यौतेगुवतेश्च दीर्घश्च । यूथं समूहः । गूथममेध्यं विष्ठा च । किरतेः करोतेर्वा कुश्च । कुथः कुथा वा आस्तरणम् । तनोतेस्तिभुनेर्वा तिश्च । तिथः कालः । तिम्यतेस्तिथः प्रावृट्कालः । नयतेर्ह्रस्वश्च । निथः पूर्वक्षत्रियः कालश्च । सुपूर्वाद्रमेः सोर्दीर्घश्च कित् च । सुरथः दान्तः । आदिग्रहणात् निपूर्वाद्रीतेर्दीर्घत्वं च । निरूथः दिक् । निरूथं पुण्यक्रमनियतम् । एवं संगीथप्रगाथादयो भवन्ति ॥ भृशीशपिशमिगमिरमिवन्दिवञ्चिजीविप्राणिभ्योऽथः ॥ २३२ ॥ एभ्योऽथः प्रत्ययो भवति । डुडु भृंग्क् पोषणे च । भरथः कैकेयीसुतः अग्निः लोकपालश्च । शीङ्क् स्वप्ने । शयथः अजगरः प्रदोषः मत्स्यः वराहश्च । शपीं आक्रोशे । शपथः प्रत्ययकरणम् आक्रोशश्च । शमूच् उपशमे । शमथः समाधिः आश्रमपदं च । गम्ल गतौ । गमथः पन्थाः पथिकश्च । रमिं क्रीडायाम् । रमथः प्रहर्षः । वदुङ् स्तुत्यभिवादनयोः । वन्दथः स्तोता स्तुत्यश्च । वञ्चु गतौ । वंचथः अध्वा कोकिलः काकः दम्भश्च । जीव प्राणधारणे । जीवथः अर्थवान् जलम् अन्नं वायुः मयूरः कर्मः धार्मिकश्च । अनक् प्राणने । प्राणथः बलवान् ईश्वरः प्रजापतिश्च ॥ उपसर्गाद्वसः ॥ २३३ ॥ उपसर्गात्परस्मात् वसं निवास इत्यस्मादथः प्रत्ययो भवति । आवसथः गृहम् । उपवसथः उपवासः । संवसथः संवासः । सुवसथः सुवासः । निवसथः निवासः ॥ विदिभिदिरुदिद्रुहिभ्यः कित् ॥ एभ्यः किदथः प्रत्ययो भवति । विदंक् ज्ञाने । विदथः ज्ञानी यज्ञः अध्वर्युः संग्रामश्च ॥ भिदंपी विदारणे । भिदथः शरः । रुदृक् अश्रुविमोचने । रुदथः बालः असत्त्वः श्वा च । द्रुहौच् जिघांसायाम् । द्रुहथः शत्रुः ॥

रोर्वा ॥ २३५ ॥ रुक् शब्दे इत्यस्माद्थः प्रत्ययः स च किद्वा भवति । रुवथः शकुनिः शिशुश्च । रवथः आक्रन्दः शब्दकारश्च ॥ जृवृभ्यामूथः ॥ २३५ ॥ जृषूच् जरसि । जरूथः शरीरम् अग्रमांसम् अग्निः संवत्सरः मार्गः कल्मषं च ॥ वृञ् वरणे । वरूथः वर्म सेनाङ्गं बलसंघातश्च ॥ शाशपिमनिकनिभ्यो दः ॥ २३७ ॥ शोंच् तक्षणे । शादः कर्दमः तरुणतृणं मृदुः बन्धः सुवर्णं च । शपीं आक्रोशे । शब्दः श्रोत्रग्राह्योऽर्थः । मनिंच् ज्ञाने । मन्दः अलसः बुद्धिहीनश्च । कनै दीप्त्यादिषु । कन्दः मूलम् ॥ आपोऽप् च ॥ २३८ ॥ आप्लृंट् व्याप्त्यावित्यस्माद्दः प्रत्ययो भवति अस्य चाप् इत्ययमादेशश्च । अब्दं वर्षम् ॥ गोः कित् ॥ २३९ ॥ गुंत् पुरीषोत्सर्गे इत्यस्मात् कित् दः प्रत्ययो भवति। गुदम् । अपानम् ॥ वृतुकुसुभ्यो नोऽन्तश्च ॥ २४० ॥ एभ्यः कित् दः प्रत्ययो नकारश्चान्तादेशो भवति । वृगूट् वरणे । वृन्दं समूहः । तुक् वृत्त्यादिषु । तुन्दं जठरम् । कुङ् शब्दे । कुन्दः पुष्पजातिः । षुंगृट् अभिषवे । सुन्दः दानवः ॥ कुसेरिदेदौ ॥ २४१ ॥ कुसिदम् । ऋणम् । कुसीदं वृद्धिजीविका ॥ इकण्यर्बिभ्यामुदः ॥ २४२ ॥ इण् गतौ । इङ्गुदः वृक्षजातिः । अब गतौ । अर्बुदः पर्वतः अक्षिव्याधिः संख्याविशेषश्च । निपूर्वात् न्यर्बुदम् संख्याविशेषः ॥ ककेर्णिद्वा ॥ २४३ ॥ काकुदं तालु । ककुदं स्कन्धः कुमुदबुद्बुदादयः ॥ २४४ ॥ एते उदप्रत्ययान्ता निपात्यन्ते । कमेः कुम च । कुमुदं करवम् । बुन्देः कित् बोऽन्तश्च । बुद्बुदः जलस्फोटः । बुद्बुदं नेत्रजो व्याधिः। आदिग्रहणात् दुर्हीक् क्षरणे प्रत्ययादेरत्वे, दोहदः अभिलाषविशेषः । एवमन्येऽपि ॥ ककिमकिभ्यामन्दः ॥ २४५ ॥ आभ्यामन्दः प्रत्ययो भवति । ककि लौल्ये । मकिः सौत्रः । ककन्दः मकन्दश्च राजानौ । यकाभ्यां निर्वृत्ता काकन्दी माकन्दी च नगरी ॥ कल्यलिपुलिकुरिकुणिमणिभ्य इन्दक् ॥ २४६ ॥ कलि शब्दसंख्यानयोः । कलिन्दः पर्वतः । यतो यमुना प्रभवति । अली भूषणादौ । अलिन्दः प्रघाणः भाजनं स्थानं च । पुल महत्त्वे । पुलिन्दः शबरः ।

कुरत् शब्दे । कुरिन्दः धान्यमलहरणोपकरणम् तेजनोपकरणं च । कुणत् शब्दोपकरणयोः । कुणिन्दः म्लेच्छः शब्द उपकरणं च ॥ मण शब्दे । मणिन्दः अश्ववल्लवः ॥ कुपेर्व च वा ॥ २४७ ॥ कुपच् क्रोधे इत्यस्मादिन्दक् प्रत्ययो वश्चान्तादेशो वा भवति । कुपिन्दः कुविन्दः तन्तुवायः ॥ पृपल्लिभ्यां णित् ॥ २४८ ॥ आभ्यां णिदिन्दक् प्रत्ययो भवति । पृश् पालनपूरणयोः । पल गतौ । पारिन्दः । पालिन्दः । द्वावपि वृक्षगाथकौ । पारिन्दो मुख्यः पूज्यश्च । पालिन्दो नृपतिः । रक्षकश्चेत्येके ॥ यमेरुन्दः ॥ २४९ ॥ यमूं उपरमे इत्यस्मादुन्दः प्रत्ययो भवति । यमुन्दः क्षत्रियविशेषः ॥ मुचेर्डुकुन्दकुकुन्दौ ॥ २५० ॥ मुच्लृंती मोक्षणे इत्यस्मात् डित् उकुन्दः किदुकुन्दश्च प्रत्ययौ भवतः । मुकुन्दः विष्णुः । मुचुकुन्दः राजा वृक्षविशेषश्च ॥ स्कन्धमिभ्यां धः ॥ २५१ ॥ आभ्यां धः प्रत्ययो भवति । स्कन्द गतिशोषणयोः । स्कन्धः बाहुमूर्धा ककुदं विभागश्च । बाहुलकात् दस्य लुक् । अम गतौ । अन्धः चक्षुर्विकलः ॥ नेः स्यतेरधक् ॥ २५२ ॥ निपूर्वात् षोंच् अन्तकर्मणि इत्यस्मादधक् प्रत्ययो भवति । निषधः पर्वतः । निषधाः जनपदः मङ्गेर्नलुक् च ॥ २५३ ॥ मगु गताविस्यस्मादधक् प्रत्ययो नकारस्य च लुग् भवति । मगधाः जनपदः ॥ आरगेर्वधः ॥ २५४ ॥ आङ्पूर्वाद्रगे शङ्कायामित्यस्माद्वधः प्रत्ययो भवति । आरग्वधः वृक्षजातिः ॥ पराच्छो डित् ॥ २५५ ॥ २५५ ॥ परपूर्वात् शृश् हिंसायामित्यस्मात् डित् वधः प्रत्ययो भवति । परश्वध आयुधजातिः ॥ इषेरुधक् ॥ २५६ ॥ इषत् इच्छायामित्यस्मादुधक् प्रत्ययो भवति । इषुधः याञ्चा ॥ कोरन्धः ॥ २५७ ॥ कुंङ् शब्दे इत्यस्मादन्धः प्रत्ययो भवति । कबन्धः छिन्नमूर्धा देहः ॥ प्याधपन्यनिस्वदिस्वपिवस्यज्यतिसिविभ्यो नः ॥ २५८ ॥ प्यैङ् वृद्धौ । प्यानः समुद्रः चन्द्रश्च । डु धांगृक् धारणे च । धाना भृष्टो यवः अङ्कुरश्च । पनि स्तुतौ । पन्नं नीचैः करणम् सन्नं जिह्वा च । अनक् प्राणने । अन्नं भक्तम् आचारश्च । ष्वदि आस्वादने । स्वन्नं रुचितम् । ञिष्वपंक् शये । स्वप्नः

मनोविकारः निद्रा च । वसं निवासे । वस्नं वासः मूल्यम् मेढ्म् आगमश्च । अज क्षेपणे च । वेनः प्रजापतिः ध्यानी राजा वायुः यज्ञः प्राज्ञः मूर्खश्च । अत सातत्यगमने । अत्नः आत्मा वायुः मेघः प्रजापतिश्च । शिवूचू उतौ । स्योनं सुखम् तन्तुवायसूत्रसंतानः समुद्रः सूर्यः रश्मिः आस्तरणं च ॥ षसेर्णित् ॥ २५९ ॥ षसक् स्वप्ने इत्यस्मात् णित् नः प्रत्ययो भवति । सास्ना गोकण्ठावलम्बि चर्म निद्रा च ॥ रसेर्वा ॥ २६० ॥ रस शब्दे इत्यस्मान्नः प्रत्ययो णिद्वा भवति । रास्ना धेनुः ओषधिजातिश्च । रस्नं द्रव्यजातिः । रस्ना जिह्वा । रस्नः तुरङ्गः दण्डश्च ॥ जीण्शीदीबुध्यविमीभ्यः कित् ॥ २६१ ॥ जि अभिभवे । जिनः अर्हन् बुद्धश्च । इंण्क् गतौ । इनः स्वामी संनिपातः ईश्वरः राजा सूर्यश्च । शीङ्क् स्वप्ने । शीनः पीलुः । दीङ्च् क्षये । दीनः कृपणः खिन्नश्च । बुधिन् ज्ञाने । बुध्नः मूलं पृष्ठान्तः रुद्रश्च । अव रक्षणादौ । ऊनम् अपरिपूर्णम् । मीङूच् हिंसायाम् । मीनः मत्स्यः राशिश्च ॥ सेर्वा ॥ २६२ ॥ षिग्ट् बन्धने इत्यस्मात् नः प्रत्ययः स च किद्वा भवति । सिनः कायः वस्त्रं बन्धश्च । सेना चमूः ॥ स्योरू च ॥ २६३ ॥ षुग्ट् अभिषवे इत्यस्मान्नः प्रत्ययः ऊकारश्चान्तादेशो भवति । सूना घातस्थानम् दुहितापुत्रः प्रकृतिः आघातस्थानं च ॥ रमेस्त च ॥ २६४ ॥ रमि क्रीडायामित्यस्मात् नः प्रत्ययस्तश्चान्तादेशो भवति । रत्नं वज्रादि ॥ क्रुशेर्वृद्धिश्च ॥ २६५ ॥ क्रुशं आह्वानरोदनयोरित्यस्मात् नः प्रत्ययोऽस्य च वृद्धिर्भवति । क्रौश्नः श्वापदः ॥ द्युसुनिभ्यो माङो डित् ॥ २६६ ॥ द्युसुनिपूर्वात् मांङ्क् मानशब्दयोरित्यस्मात् डित् नः प्रत्ययो भवति । द्युम्नं द्रविणम् । सुम्नं सुखम् । निम्नं नतम् ॥ शीङः सन्वत् ॥ २६७ ॥ शीङ्क् स्वप्ने इत्यस्मात् डित् नः प्रत्ययः स च सन्वद्भवति । शिश्नं शेपः ॥ दिननग्नफेनचिह्नब्रध्नधेनस्तेनकौक्षीनादयः ॥ २६८ ॥ एते नप्रत्ययान्ता निपात्यन्ते । दीव्यतेः क्विल्लुक् च । दिनम् अहः । नञ्पूर्वाद्वसेर्गोऽन्तो धातोर्लुक् च । न वस्ते नग्नः अवसनः । फणेः फलेः स्फायेर्वा फेभावश्च । फेनः

बुद्बुदसंघातः। चहेरिच्चोपान्त्यस्य। चिह्नमभिज्ञानम्। बन्धेर्ब्रधूच। ब्रघ्नः रविः प्रजापतिः ब्रह्मा स्वर्गः पृष्ठान्तश्च। धयतेरेत्वं च। धेना सरस्वती माता च। धेनः समुद्रः। ईत्वं चेत्येके। धीना। स्त्यायेस्ते च। स्तेनः चौरः। च्यवतेर्वृद्धिः कोऽन्तश्च। च्यौकनमक्षस्थानम् अनुजः क्षीणमपुण्यश्च। च्यौकनी कांस्यादिपात्री। आदिशब्दादन्येऽपि स्वसिरसिरुचिजिमस्जिदेविस्यन्दिचन्दिमन्दिमण्डिमदिदहिवह्यादेरनः॥ २६९॥ युञ् मिश्रणे। यवनाः जनपदः यवनं मिश्रणम्। असूच् क्षेपणे। असनः बीजकः। रसण् आस्वादनस्नेहनयोः। रसना जिह्वा। रुचि अभिप्रीत्यां च। रोचना गोपित्तम्। रोचनः चन्द्रः। विपूर्वाद्रोचतेः विरोचनः अग्निः, सूर्यः इन्दुः दानवश्च। जिं अभिभवे। जयनम् ऊर्णापटः। टु मस्जोंत् शुद्धौ। मज्जनं स्नानं तोयं च। देवृङ् देवने। देवनः अक्षः कितवश्च। स्यन्दौङ् स्रवणे। स्यन्दनः रथः। चदु दीप्त्याह्लादनयोः। चन्दनं गन्धद्रव्यम्। मदुङ् स्तुत्यादौ। मन्दनं स्तोत्रम्। मडु भूषायाम्। मण्डनमलङ्कारः। मदैच् हर्षे। मदनः वृक्षः कामः मधूच्छिष्टं च। दहं भस्मीकरणे। दहनः अग्निः। वहीं प्रापणे। वहनं नौः। आदिग्रहणात्। पचेः पचनः अग्निः। पुनातेः पवनः वायुः। बिभर्तेः भरणं साधनम्। नयतेर्नयनं नेत्रम्। द्युतेः द्योतनः आदित्यः। रचेः रचना वैचित्र्यम्। गृञ्जेः गृञ्जनम् अभक्ष्यद्रव्यविशेषः। प्रस्कन्दनः प्रपतनः इत्यादयो भवन्ति॥ अशो रश्चादौ॥ २७०॥ अशौटि व्याप्तावित्यस्मात् अनः प्रत्ययो भवति आदौ रेफश्च। रशना मेखला। रश्मिमेके प्रकृतिमुपदिशन्ति। सा च राशिरशनारश्मि इत्यत्र प्रयुज्यते इत्याहुः॥ उन्देर्नलुक् च॥ २७१॥ उन्दै क्लेदने इत्यस्मात् अनः प्रत्ययो नलोपश्च भवति। ओदनः भक्तम्॥ हनेर्घतजघौ च॥ २७२॥ हनंक् हिंसागत्योरित्यस्मादनः प्रत्ययो घतजघावित्यादेशौ चास्यभावतः। घतनः रङ्गोपजीवी पापकर्मा निर्लज्जश्च। जघनं श्रोणिः॥ तुदादिवृजिरञ्जिनिधाभ्यः कित्॥ २७३॥ एभ्यः किदनः प्रत्ययो भवति। तुदींत् व्यथने। तुदनः।

क्षिपींत् प्रेरणे । क्षिपणः । स्फुरत् ऐश्वर्यदीप्त्योः । स्फुरणः । बुधिंच् बोधने । बुधनः । षिवूच् उतौ । सिवनः । एषां यथासंभवं कारकमुच्यते । लबुङ् अवस्रंसने । लम्बनः शकुनिः । वृजैकि वर्जने । वृजिनमन्तरिक्षम् निवारणं मुण्डनं च । रञ्जीं रागे । रजनं हरिद्रा । महारजनं कुसुम्भम् । रजनः रङ्गविशेषः । डु धांग्क् धारणे च । निधनमवसानम् ॥ सुघुभूभ्रस्जिभ्यो वा ॥ २७४ ॥ एभ्योऽनः प्रत्ययो भवति स च किद्वा । षूत् प्रेरणे । सुवनः अङ्कुरः आदित्यः प्रादुर्भावश्च । सुवनं चन्द्रप्रभा । सवनं यज्ञः पूर्वाह्णापराह्णमध्याह्नकालश्च । त्रिषवणम् । धूत् विधूनने । धुवनः धूमः वायुः अग्निश्च । धुवनम् एधः । भू सत्तायाम् । भुवनं जगत् । भवनं गृहम् । भ्रस्जींत् पाके । भृज्जनम् अन्तरिक्षम् अम्बरीषः पाकश्च । भ्रज्जनः पावकः ॥ विदनगगनगहनादयः ॥ २७५ ॥ एते किदनप्रत्ययान्ता निपात्यन्ते । विदु अवयवे नलोपश्च । विदनः गोत्रकृत् । गमेग च । गगनम् आकाशम् । गाहौङ् विलोडने ह्रस्वश्च । गहनं दुर्गमम् । आदिशब्दात् काञ्चनकाननादयो भवन्ति ॥ संस्तुस्पृशिमन्थेरानः ॥ २७६ ॥ ष्टुंग्क् स्तुतौ । संस्तवानः सोमः होता महर्षिः वाग्मी च । स्पृशंत् स्पर्शे । स्पर्शानः मनः । संस्पर्शानः मनः अग्निश्च । मन्थश् विलोडने । मन्थानः खजकः ॥ युयुजियुधिबुधिमृशिदृशीशिभ्य कित् ॥ २७७ ॥ युङ् मिश्रणे । युवानः तरुणः । युजूंपी योगे । युजानः सारथिः । युधिंच् संप्रहारे । युधानः रिपुः । बुधिंच् ज्ञाने । बुधान आचार्यः पण्डितो वा । मृशत् आमर्शने । मृशानः त्रिमर्शकः । दृशूं प्रेक्षणे । दृशानः लोकपालः । युजादिप्रसिद्धकर्त्रर्थो एते । ईशिक् ऐश्वर्ये । ईशानः ईश्वरः ॥ मुमुचानयुयुधानशिश्विदानजुहुराणाह्वयाणाः ॥ २७८ ॥ एते किदानप्रत्ययान्ता निपात्यन्ते ।। मुचेर्द्वित्वं च । मुमुचानः मेघः । एवं युधिंच् संप्रहार । युयुधानः साहसिकः राजा च कश्चित् । श्विताङ् वर्णे । अस्य दश्च । शिश्विदानः दुराचारो द्विजः । ह्वृर्छा कौटिल्ये अस्यान्तलुक् च । जुहुराणः कठिनहृदयः कुटिलः अग्निः अध्वर्युः अनड्वांश्च । ह्रींक् ल-

ज्जायाम् । जिह्रियाणः नीतिमान् । सर्वं एवैते मुख्यादिप्रसिद्धक्रियाकर्तृवचना इत्येके ॥ अन्ये तु मुमुक्षादिसन्नन्तप्रकृ-
तीनामेतन्निपातनं, तेन सन्नन्तक्रियाकर्तृवचना इत्येके ॥ अन्ये तु मुमुक्षादिसन्नन्तप्रकृतीनामेतन्निपातनं, तेन सन्नन्त-
क्रियाकर्तृवचना इत्याहुः ॥ २७८ ॥ ऋञ्जिरञ्जिमन्दिसह्यर्हिभ्योऽसानः ॥ २७९ ॥ ऋजुङ् भर्जने । ऋञ्जसानः
महेन्द्रः मेघः श्मशानं च । रञ्जीं रागे । रञ्जसानः मेघः धर्मश्च । मदुङ् स्तुत्यादिषु । मन्दसानः हंसः चन्द्रः सूर्यः जी-
वः स्वप्नः अग्निश्च । षहि मर्षणे । सहसानः हठः मयूरः यजमानः क्षमावांश्च अर्ह पूजायाम् । अर्हसानः चन्द्रः तुरं-
गमश्च । रुहियजेः कित् ॥ २८० ॥ रुहं जन्मनि । रुहसानः विटपः । यजीं देवपूजादौ । इजसानः धर्मः ॥ वृधेर्वा
॥ २८१ ॥ वृधूङ् वृद्धौ । वृधसानः गर्भः । वर्धसानः गिरिः मृत्युः गर्भः पुरुषश्च ॥ श्याकठिखलिनलयविकुण्डि-
भ्य इनः ॥ २८२ ॥ श्यैङ् गतौ । श्येनः पक्षी अभिचारयज्ञश्च । कठ कृच्छ्रजीवने । कठिनममृदु । खल संचये च ।
खलिनम् अश्वमुखसंयमनम् । णल गन्धे । नलिनं पद्मम् । अव रक्षणादौ । अविनं जलं मृगः नाशः अग्निः राजा
अध्वर्युः विधानं गुप्तिश्च ॥ कुडुङ् दाहे । कुण्डिनः ऋषिः । कुण्डिनं नगरम् ॥ वृजितुहिपुलिपुटिभ्यः कित् ॥ २८३
वृजैकि वर्जने । वृजिनं पापं कुटिलं च । तुह अर्दने । तुहिनम् हिममन्धकारश्च । पुल महत्वे । पुटत् संश्लेषणे । पुलिनं
पुटिनं च नदीतीरं वालुकासंघातश्च ॥ विपिनाजिनादयः ॥ २८४ ॥ विपिनादयः शब्दाः किदिनप्रत्ययान्ता निपा-
त्यन्ते । टु वपीं बीजसंताने टुवेपृङ् चलने इत्यस्य वा इच्चोपान्त्यस्य । विपिनं गहनम् अजिनं जलदुर्गं च । अज क्षे-
पणे च । अस्य वीभावाभावश्च अजिनं चर्म । आदिग्रहणादन्येऽपि ॥ महेर्णिद्वा ॥ २८५ ॥ मह पूजायामित्यस्मादिनः
प्रत्ययः स च णिद्वा भवति । माहिनं राज्यं बलं च । महिनं राज्यं शयनं च । महिनः माहात्म्यवान् ॥ खलिहिंसि-
भ्यामीनः ॥ २८६ ॥ खल संचये च । खलीनं कवियम् । हिसुप् हिंसायाम् । हिंसीनः श्वापदः ॥ पठेर्गित् ॥ २८७

पाठीनः मत्स्यः ॥ यम्यजिशक्यर्जिशीयजितॄभ्य उनः ॥ २८८ ॥ यमूं उपरमे । यमुना नदी । अज क्षेपणे च । वयुनं विज्ञानम् अङ्गं च । वयुनः विद्वान् चन्द्रः यज्ञश्च । शक्लंट् शक्तौ । शकुनः पक्षी । अर्जे अर्जने । अर्जुनः ककुभः वृक्षविशेषः पार्थः श्वेतवर्णः श्वेताश्वः कार्तवीर्यश्च । अर्जुनी गौः । अर्जुनं तृणं श्वेतसुवर्णं च ॥ शीङ्क् स्वप्ने । शयुनः अजगरः । यर्जी देवपूजादौ । यजुना क्रतुद्रव्यम् । तॄ प्लवनतरणयोः । तरुणः समर्थः युवा वायुश्च । ऋफिडादित्वाल्लत्वे,तलुनः ॥ लषेः श च ॥ २८९ ॥ लषी कान्ताक्त्यिस्मादुनः प्रत्ययः तालव्यः शकारश्चान्तादेशो भवति । लशुनं कन्दजातिः ॥ पिशिमिथिक्षुधिभ्यः कित् ॥ २९० ॥ एभ्यः किदुनः प्रत्ययो भवति । पिशत् अवयवे । पिशुनः खलः । पिशुनं मैत्रीभेदकं वचनम् । मिथृङ् मेधाहिंसयोः । मिथुनं स्त्रीपुंसद्वन्द्वम् राशिश्च । क्षुधंन् बुभुक्षायाम् । क्षुधनः कीटकः ॥ फलेर्गोऽन्तश्च ॥ २९१ ॥ फल्गुनः अर्जुनः । फल्गुनी नक्षत्रम् ॥ वीपतिपट्टियस्तनः ॥ २९२ ॥ एभ्यस्तनः प्रत्ययो भवति । वींक् प्रजनादौ । वेतनं भृतिः । पतॢ गतौ । पत्तनम् । पट गतौ । पट्टनम् । द्वावपि नगरविशेषौ ' पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च । नौभिरेव तु यद्गम्यं पत्तनं तत्प्रचक्षते ॥ पृपूभ्यां कित् ॥ २९३ ॥ पृंङ्त् व्यायामे । पृतना सेना । पूग्श् पवने । राक्षसी ॥ कृत्यशौभ्यां स्नक् ॥ २९४ ॥ कृतैत् छेदने । कृत्स्नं सर्वम् । अशौटि व्याप्तौ । अक्ष्णं नयनं व्याधिः रज्जुः तेजनम् अखण्डं च ॥ २९४ ॥ अर्तें शसानः ॥ २९५ ॥ अर्शसानः पन्थाः इषुः अग्निश्च ॥ भापाचणिचमिविषिसृतॄशीतल्पलिशमिरमिवपिभ्यः पः ॥ २९६ ॥ भांक् दीप्तौ । भ अदित्यः ज्येष्ठश्च भ्राता । पांक् रक्षणे । पापं कल्मषम् । पापः घोरः । चण हिंसादानयोश्च । चण्पा नगरी । चण्पः वृक्षः । चमू अदने । चम्पा नगरी । विषूलृंकी व्याप्तौ । वेष्पः परमात्मा स्वर्ग आकाशश्च । निपूर्वात् निवेष्पः अपां गर्भ कूपः वृक्षजातिः अन्तरिक्षं च । सृं गतौ । सर्पः अहिः । पृश् पालनपूरणयोः । पर्पः प्लवः शंखः

समुद्रः शस्त्रं च । तॄ प्लवनतरणयोः । तर्पः उडुपः नौश्च । शीङ्क् स्वप्ने । शेपः पुच्छम् । तलण् प्रतिष्ठायाम् । तल्पं शयनीयम् अङ्गं दाराः युद्धं च । अली भूषणादौ । अल्पं स्तोकम् । शमूच् उपशमे । शम्पा विद्युत् काञ्ची च । विपूर्वाद्विशम्पः दानवः । रमिं क्रीडायाम् । रम्पा चर्मकारोपकरणम् । डु वपीं बीजसंताने । वप्पः पिता ॥ युसुकुरुतुच्युस्त्वादेरूच्च ॥ २९७ ॥ एभ्यः पः ऊकारश्चान्तादेशो भवति । युक् मिश्रणे । यूपः यज्ञपशुबन्धनकाष्ठम् । षुंग्ट् अभिषवे । सूपः मुद्रादिभिस्तकृतः । कुंक् शब्दे । कूपः प्रहिः । रुक् शब्दे । रूपं श्वेतादि लावण्यं स्वभावश्च । तुंक् वृत्त्यादौ । तूप आयतनविशेषः । च्युंङ् गतौ । च्यूपः आदित्यः वायुः संग्रामश्च । ष्टुंग्क् स्तुतौ । स्तूपः बोधिसत्त्वभवनम् उपायतनं च । आदिशब्दादन्येऽपि ॥ कृशृसृभ्य ऊर् चान्तस्य ॥ २९८ ॥ एभ्यः पः प्रत्ययोऽन्तस्य च ऊर्भवति । कृत् विक्षेपे । कूर्पम् भ्रूमध्यम् । शृश् हिंसायाम् । शूर्पः धान्यादिनिष्पवनभाण्डं संख्या च । सृं गतौ । सूर्पः भुजंगमः-मत्स्यजातिश्च ॥ शदिबाधिखनिहनेः ष च ॥ २९९ ॥ एभ्यः पः प्रत्ययः षश्चान्तादेशो भवति । शद्लृ शातने । शष्पं बालतृणम् । शष हिंसायामित्यस्य वा रूपम् ॥ बाधृङ् रोटने । बाष्पः अश्रु धूमाभासं च मुखपानीयादौ । खनूग् अवदारणे । खष्पः बलात्कारः दुर्मेधाः कूपश्च । खष्पं खलीनं जनपदविशेषः अङ्गारश्च । हनंक् हिंसागत्योः । हष्पः प्रावरणजातिः ॥ पम्पाशिल्पादयः ॥ ३०० ॥ पम्पादयः शब्दाः पप्रत्ययान्ता निपात्यन्ते । पांक् रक्षणे मोऽन्तो ह्रस्वश्च । पम्पा पुष्करिणी । शीलयतेः । शलतेः शेतेर्वा शिलादेशश्च । शिल्पं विज्ञानम् । आदिग्रहणादन्येऽपि ॥ क्षुचुपिपूभ्यः कित् ॥ ३०१ ॥ एभ्यः कित् पः प्रत्ययो भवति । टुक्षुक् शब्दे । क्षुपः गुच्छः । चुप मन्दायां गतौ । चुप्पं मन्दगमनम् । पूग्श् पवने । पूपः पिष्टमयः ॥ नियो वा ॥ ३०२ ॥ णींग् प्रापणे इत्यस्मात् पः प्रत्ययो भवति स च किद्वा । नीपः वृक्षविशेषः ( कदम्बः ) नेपः नयः पुरोहितः वृक्षः भृतकश्च । नेपमुदकं यानं च ॥ उभ्यवेलुंक्

च ॥ ३०३ ॥ आभ्यां कित् पः प्रत्ययो लुक् चान्तस्य भवति । उभत् पूरणे । अव रक्षणादौ । उप अप च अव्यये ॥ दलिवलितलिखजिध्वजिकचिभ्योऽपः ॥ ३०४ ॥ दल विशरणे । दलपः प्रहरणम् रणमुखम् विदलं दलविशेषश्च । दलपं व्रणमुखत्राणम् । वलि संवरणे । वलपः कर्णिका । तलण् प्रतिष्ठायाम् । तलपः हस्तप्रहारः । खज मन्थे । खजपः मन्थः । खजपं दधि घृतम् उदकं च । ध्वज गतौ । ध्वजपः ध्वजः । कचि बन्धने । कचपः शाकपर्णं बन्धश्च ॥ भुजिकुतिकुटिविटिकुणिकुष्युषिभ्यः कित् ॥ ३०५ ॥ एभ्यः किदपः प्रत्ययो भवति । भुजंप् पालनाभ्यवहारयोः । भुजपः राजा यजमानपालनादग्निश्च । कुतिः सौत्रः । कुतपः छागलोम्नां कम्बलः आस्तरणं श्राद्धकालश्च । कुटत् कौटिल्ये । कुटपः प्रस्थचतुर्भागः नीडं च शकुनीनाम् । विट् शब्दे । विटपः शाखा । कुणत् शब्दोपकरणयोः । कुणपः मृतकं कुषितं शब्दार्थसारूप्यं च । कुषश् निष्कर्षे । कुषपः विन्ध्यः मंदंशश्च । उषू दाहे । उषपः दाहः सूर्यः वन्हिश्च ॥ शंसेः श इच्चातः ॥ ३०६ ॥ शंसू स्तुतौ चेत्यस्मादपः प्रत्ययस्तालव्यः शकारोऽन्तादेशोऽकारस्य चेकारो भवति । शिंशपाः वृक्षविशेषः ॥ विष्टपोलपवातपादयः ॥ ३०७॥ विष्टपादयः शब्दा किदपप्रत्ययान्ता निपात्यन्ते । विषेस्तोऽन्तश्च । विष्टपं जगत् सुकृतिनां स्थानं च । वलेरुल् च । उलपं पर्वततृणम् पङ्कजं जलं च । उलपः ऋषिः । वातेस्तोऽन्तश्च । वातपः ऋषिः । आदिग्रहणात् खरपादयो भवन्ति ॥ कलेरापः ॥ ३०८ ॥ कलि शब्दसंख्यानयोरित्यस्मादापः प्रत्ययो भवति । कलापः काञ्ची समूहः शिखण्डश्च ॥ विशेरिपक् ॥ ३०९ ॥ विशंत् प्रवेशने इत्यस्मादिपक् प्रत्ययो भवति । विशिपः राशिः । विशिपं तृणं वेश्म आसनं पद्मं च ॥ दलेरीपो दिल् च ॥ ३१० ॥ दल विशरणे इत्यस्मादीपः प्रत्ययो भवति दिल् चास्यादेशो भवति । दिलीपः राजा ॥ उडेरुपक् ॥ ३११ ॥ उड् संघाते इत्यस्मात् सौत्रादुपक् प्रत्ययो भवति । उडुपः प्लवः । जपादित्वात् वत्वे । उडुवः ॥ अशः ऊपः पश्च ॥

३१२ ॥ अशौटि व्याप्ताविस्यस्मादूपः प्रत्ययः पश्चान्तादेशो भवति । अपूपः पक्वान्नविशेषः ॥ सर्तेः षपः ॥ ३१३ ॥ सर्षपः रक्षोघ्नं द्रव्यम् शाकं च ॥ रोशीभ्यां फः ॥ ३१४ ॥ रींङ्च् श्रवणे । रेफः कुत्सितः । शींङ्क् स्वप्ने । शेफः मेढ्रः ॥ कलिगलेरस्योच्च ॥ ३१५ ॥ आभ्यां फः प्रत्ययोऽस्य चोकारो भवति । कलि शब्दसंख्यानयोः, गल अदने । कुल्फः गुल्फः जङ्घाङ्घ्रिसन्धिः । गुल्फः पदोपरिग्रन्थिः । शफकफशिफाशोफादयः ॥ ३१६ ॥ शफादयः शब्दाः फप्रत्ययान्ता निपात्यन्ते । श्यतेः कायतेश्च ह्रस्वश्च । शफः खुरः प्रियंवदश्च । कफः श्लेष्मा । श्यतेरित्वमोत्वं च । शिफा वृक्षजटा । शोफः श्वयथुः खुरश्च । आदिशब्दात् रिफानफासुनफादयो भवन्ति ॥ वलिनितनिभ्यां बः ॥ ॥ ३१७ ॥ वलि संवरणे निपूर्वाच्च तनूयी विस्तारे इत्यस्माच्च बः प्रत्ययो भवति । वल्बः वृक्षः । नितम्बः श्रोणिः पर्वतैकदेशः नटश्च ॥ शम्यमेर्णिद्वा ॥ ३१८ ॥ आभ्यां बः प्रत्ययः स णिद्वा भवति । शमूच् उपशमे । शम्बः वज्रः कर्षणविशेषः वेणुदण्डः तोत्रम् अरित्रं च । शम्बशाम्बौ जाम्बवतेयौ । अम्बा माता । आम्बः अपक्वः ॥ शल्यलेरुच्चातः ॥ ३१९ ॥ आभ्यां बः प्रत्ययोऽकारस्य चोकारो भवति । पलफलशल गतौ । शुल्बं ताम्रम् । अली भूषणादौ । उल्बं रजतम् गर्भवेष्टनम् । शुल्बं बभ्रुः तरक्षुश्च ॥ तुम्बस्तम्बादयः ॥ ३२० ॥ तुम्बादयः शब्दा बप्रत्ययान्ता निपात्यन्ते । ताम्यतेरत उत्वं च । तुम्बम् अलाबु चक्राङ्गं च । स्तम्भेर्लुक् च । स्तम्बः तृणं विटपः संघातः अङ्कुरसमुदायः स्तबकः पुष्पापीडश्च । आदिग्रहणात् कुशाम्बादयो भवन्ति ॥ कृकडिकटिवटेरम्बः ॥ ३२१ ॥ एभ्योऽम्बः प्रत्ययो भवति । डु कृंग् करणे । करम्बः दध्योदनः दधिसक्तवः पुष्पं च । कडत् मदे । कडम्बः जातिविशेषः जनपदविशेषश्च । कटे वर्षावरणयोः । कटम्बः पक्वान्नविशेषः वादित्रं च । कडम्बकटम्बौ वृक्षौ च । वट वेष्टने । वटम्बः शैलः तृणपुञ्जश्च ॥ कदेर्णिद्वा ॥ ३२२ ॥ कद वैक्लव्ये इत्यस्मात् सौत्रादम्बः प्रत्ययः स च णिद्वा भवति ।

कादम्बः हंसः । कदम्बः वृक्षजातिः ॥ शिलविलादेः कित् ॥ ३२३ ॥ शिलादिभ्यः किदम्बः प्रत्ययो भवति । शिलत् उञ्छे । शिलम्बः ऋषिः तन्तुवायश्च । विलत् वरणे । विलम्बः वेषविशेषः रङ्गावसरश्च । आदिग्रहणादन्येऽपि ॥ हिण्डिविलेः किम्बो न लुक् च ॥ ३२४ ॥ आभ्यां किदिम्बः प्रत्ययो नस्य च लुग् भवति । हिडुङ् गतौ च विलत् वरणे । हिडिम्बः विलिम्बश्च राक्षसौ ॥ डीनीबन्धिशृधिचलिभ्यो डिम्बः ॥ ३२५ ॥ एभ्यो डिदिम्बः प्रत्ययो भवति । डीङ् विहायसा गतौ । डिम्बः राजोपद्रवः । णींग् प्रापणे । निम्बः वृक्षविशेषः । बन्धंश् बन्धने । बिम्बं प्रतिच्छन्दः देहश्च । बिम्बी वल्लिजातिः । शृधूङ् शब्दकुत्सायाम् । शिम्बः मृगजातिः । शिम्बी निष्पाववल्ली च । चल कम्पने । चिम्बा यवागूजातिः ॥ कुटयुन्दिचुरितुरिपुरिमुरिकुरिभ्यः कुम्बः ॥ ३२६ ॥ एभ्यः किदुम्बः प्रत्ययो भवति । कुटत् कौटिल्ये । कुटुम्बं दारादयः । उन्दैप् क्लेदने । उदुम्बः समुद्रः । चुरण् स्तेये । तुरण् त्वरणे सौत्रः । चुरुम्बः तुरुम्बश्च गहनम् । पुरत् अग्रगमने । पुरुम्बः आहारः । मुरत् संवेष्टने । मुरुम्बः मृद्यमानपाषाणचूर्णम् । कुरत् शब्दे । कुरुम्बः अङ्कुरः । निपूर्वात् निकुरुम्बः राशिः ॥ गॄदॄरमिहनिजन्घर्तिदलिभ्यो भः ॥ ३२७ ॥ गॄत् निगरणे । गर्भः जठरस्थः प्राणी । दॄश् विदारणे । दर्भः कुशः । रमिं क्रीडायाम् । रम्भा अप्सराः कदली च । हनंक् हिंसागत्योः । हम्भा गोधेनुनादः । जनैचि प्रादुर्भावे । जम्भः दानवः दन्तश्च । जम्भा मुखविदारणम् । ऋंक् गतौ । अर्भः शिशुः । दल विदारणे । दलभः ऋषिः वल्कलं विदारणं च ॥ इणः कित् ॥ ३२८ ॥ इंणक् गतावित्यस्मात् किद्भः प्रत्ययो भवति । इभः हस्ती ॥ कॄशॄगॄशलिकलिकडिगर्दिरासिरमिवडिवल्लेरभः ॥ ३२९ ॥ कॄत् विक्षेपे । करभः त्रिवर्षं उष्ट्रः । शॄश् हिंसायाम् । शरभः श्वापदविशेषः । गॄत् निगरणे । गरभः उदरस्थो जन्तुः । पलफलशल गतौ । शलभः पतङ्गः । कलि शब्दसंख्यानयोः । कलभः हस्ती यौवनाभिमुखः । कडत् मदे । कडभः हस्तिपोतकः ॥

गर्दं शब्दे । गर्दभः खरः । रासृङ् शब्दे । रासभः स एव । रभिं क्रीडायाम् । रभसः प्रहर्षः । वडः सौत्रः । वडभी वेश्माग्रभूमिका । ऋफिडादित्वाल्लत्वे वलभी । वल्लि संवरणे । वल्लभः स्वामी दयितश्च ॥ सनेर्डित ॥ ३३० ॥ षण भक्तावित्यस्मात् डिदभः प्रत्ययो भवति । सभा परिषत् शाला च ॥ ऋषिवृषिलुसिभ्यः कित् ॥ ३३१ ॥ एभ्यः किदभः प्रत्ययो भवति । ऋषैत् गतौ । वृषू सेचने । ऋषभः वृषभश्च पुङ्गवः भगवांश्चादितीर्थंकरः । ऋषभः वायुः । लुसिः सौत्रः । लुसभः हिंस्रः मत्तहस्ती वनं च ॥ सिटिकिभ्यामिभः सैरटिट्टौ च ॥ ३३२ ॥ आभ्यामिभः प्रत्ययो दन्त्यादिः सैरः टिट्टश्चादेशौ यथासंख्यं भवतः । षिंगृट् बन्धने । सैरिभः महिषः । टिकि गतौ । टिट्टिभः पक्षी ॥ ककेरुभः ॥ ३३३ ॥ ककि लौल्ये इत्यस्मादुभः प्रत्ययो भवति । ककुभः अर्जुनः ॥ कुके कोऽन्तश्च ॥ ३३४ ॥ कुकि आदाने इत्यस्मादुभः प्रत्ययः कश्चान्तादेशो भवति । कुक्कुभः पक्षिविशेषः ॥ दमो दुण्डू च ॥ ३३५॥ दमूच् उपशमे इत्यस्मात् उभः प्रत्ययोऽस्य च दन्त्यादिष्टवर्गतृतीयान्तो दुण्ड इत्यादेशो भवति । दुण्डुभः निर्विषाहिः ॥ कृकलेरम्भः ॥ ३३६ ॥ डु कृंग् करणे । करम्भः दधिसक्तवः । कलि शब्दसंख्यानयोः । कलम्भः ऋषिः ॥ काकुसिभ्यां कुम्भः ॥ ३३७ ॥ आभ्यां किदुम्भः प्रत्ययो भवति । कैं शब्दे । कुम्भः घटः राशिश्च । कुसच् श्लेषणे कुसुम्भं महारजनम् ॥ अर्तीरिस्तुसुहुसृघृधृसृक्षियक्षिभाषाव्याधापायावलिपदिनीभ्यो मः ॥ ३३८ ॥ ऋक् गतौ । अर्मः अक्षिरोगः ग्रामः स्थलं च । ईरिक् गतिकम्पनयोः । ईर्मं व्रणः । ष्टुंग्क् स्तुतौ । स्तोमः समूहः यज्ञः स्तोत्रं च । षुंगट् अभिषवे । सोमः चन्द्रः वल्ली च । हुंक् दानादनयोः । होमः आहुतिः । सृं गतौ । सर्मः नदः कालश्च । सर्म स्थानं सुखं च । घृं सेचने । घर्मः ग्रीष्मः । धृंङ्त् स्थाने । धर्मः उत्तमक्षमादिः न्यायश्च । शृशू हिंसायाम् । शर्मं सुखम् । क्षित् निवासगत्योः । क्षेमं कल्याणम् । यक्षिण् पूजायाम् । यक्ष्मः व्याधिः । भांक् दीप्तौ ।

भामः क्रोधः । भामा स्त्री । वांकृ गतिगन्धनयोः । वामः प्रतिकूलः सव्यश्च । व्येंग् संवरणे । व्यामः वक्षोभुजायतिः । डु धांगूक् धारणे च । धामं निलयः मेघश्च । पां पाने । पामा कच्छूः । यांकृ प्रापणे । यामः प्रहरः । वलि संवरणे । वल्मः ग्रन्थिः । पदिच् गतौ । पद्मं कमलम् । णींग् प्रापणे । नेमः अर्धः समीपश्च ॥ ग्रसिह्वाग्भ्यां ग्राजिह्वौ च ॥ ॥ ३३९ ॥ आभ्यां मः प्रत्ययोऽनयोश्च ग्रा जिह्वावित्यादेशौ यथासंख्यं भवतः । ग्रामः समूहादिः । जिह्मः कुटिलः ॥ षिलिभिलिसिधीन्धिधूसूशाध्यारुसिविशुषिमुषीषिसुहियुधिदसिभ्यः कित् ॥ ३४० ॥ विलत् वरणे । विल्मं प्रकाशः । भिलिः सौत्रः । भिल्मं भास्वरम् । षिधू गत्याम् । सिध्मं त्वग्रोगः । ञि इन्धैपि दीप्तौ । इध्ममिन्धनम् । धूग्श् कम्पने । धूमः अग्निकेतुः । षूङौच् प्राणिप्रसवे । सूमः कालः श्वयथुः रविश्च । सूममन्तरिक्षम् । श्यैङ् गतौ । श्यामः वर्णः । श्यामं नभः । श्यामा रात्रिः औषधिश्च । ध्यैं चिन्तायाम् । ध्यामः अव्यक्तवर्णः । रुकू शब्दे । रुमा लवणभूमिः । षिवूच् ऊतौ । स्यूमः रश्मिः दीर्घः सूत्रतन्तुश्च । स्यूमम् जलम् । शुषंच् शोषणे । शुष्मं बलं जलं संयोगश्च । मुषश् स्तेये । मुष्मः मूषिकः ईष उञ्छे । ईष्म वसन्तः बाणः वातश्च । षुह्च् शक्तौ । सुह्माः जनपदः । सुह्मः राजा । युधिच् संप्रहारे । युध्मः शरत्कालः शूरः शत्रुः संग्रामश्च । दसूच् उपक्षये । दस्मः हीनः वन्हिः यज्ञश्च ॥ क्षुहिभ्यां वा ॥ ३४१ ॥ आभ्यां मः प्रत्ययः स च किद्वा भवति । टु क्षुकू शब्दे । क्षुमा अतसी । क्षोमं वस्त्रम् । हिंट् गतिवृद्ध्योः । हिमं तुषारः । हेमं सुवर्णम् ॥ अवेर्हस्वश्च वा ॥ ३४२ ॥ अव रक्षणादावित्यस्मात् कित् मः प्रत्यय ऊटो ह्रस्वश्च वा भवति । उमा गौरी अतसी कीर्तिश्च । ऊममूनमाकाशं नगरं च ॥ सेरी च वा ॥ ३४३ ॥ षिंगूट् बन्धने इत्यस्मात् कित् मः प्रत्यय ईकारश्चान्तादेशो वा भवति । सीमो ग्रामगोचरभूमिः क्षेत्रमर्यादा इयश्च । सिमः स एव सर्वार्थश्च ॥ भियः षोऽन्तश्च वा ॥ ३४४ ॥ ञिभींकृ भये इत्यस्मात् कित मः प्रत्ययः षकार-

श्चान्तादेशो भवति वा ॥ बिभेत्यस्मादिति भीष्मः भयानकः । भीमः स एव ॥ तिजियुजेर्ग् च ॥ ३४५ ॥ आभ्यां कित् मः प्रत्ययो गकारश्चान्तादेशो भवति ॥ तिजि क्षमानिशानयोः । तिग्मं तीक्ष्णं दीप्तं तेजश्च । युजूँपी योगे । युग्मं युगलम् ॥ रुक्मग्रीष्मकूर्मसूर्मजाल्मगुल्मघ्रोमपरिस्तोमसूक्ष्मादयः ॥ ३४६॥ एते किन्मप्रत्ययान्ता निपात्यन्ते। रोचतेः क च । रुक्मं सुवर्णं रूप्यं च । ग्रसेर्ग्रीष् च । ग्रीष्मः ऋतुः । कुरतेर्दीर्घश्च । कूर्मः कच्छपः । षूत् प्रेरणे इत्यस्माद्रोऽन्तश्च भवति । सूर्मी लोहप्रतिमा चुल्लिश्च जल घात्ये दीर्घश्च । जाल्मः निकृष्टः । गुप्च् व्याकुलत्वे लश्च । गुल्मः व्याधिः तरुसमूहः वनस्पतिः सेनाङ्गं च । गुल्मम् आयस्थानम् । जिघ्रतेरोत्वं च । घ्रोमः यज्ञाङ्गलक्षणः सोमः । परिपूर्वात् स्तौतेः षत्वाभावो गुणश्च । परिस्तोमः यज्ञविशेषः । सूचण् पैशून्ये कत्वं षोऽन्तश्च । सूक्ष्मः निपुणः । सूक्ष्मम् अणु। आदिग्रहणात् क्ष्मादयो भवन्ति ॥ सृपॄप्रथिचरिकडिकर्देरमः ॥ ३४७ ॥ सरमा देवशुनी । परम उत्कृष्टः । प्रथमः आद्यः । चरमः पश्चिमः । कडमः शालिः । कडिकडादित्वाल्लत्वे, कलमः स एव ॥ कर्दमः पङ्कः॥अवेर्धं च वा।३४८॥ अव रक्षणादावित्यस्मादमः प्रत्ययो धश्चान्तादेशो वा भवति । अधमः अवमश्च हीनः ॥ कुट्टिवेष्टिपूरिपिषिसिचिगण्यर्पिशृमहिभ्य इमः॥३४९॥ कुट्टिमः संस्कृतभूतलम्। वेष्टिमं पुष्पबन्धविशेषः भक्ष्यविशेषश्च । पूरिमं मालाबन्धविशेषः भक्ष्यविशेषश्च । पेषिमं भक्ष्यविशेषः । सेचिमं मालाविशेषः । गणिमं गणितम् । ऋंकृ गतौ णौ पौ, अर्पिमं बालवत्साया दुग्धम् । वरिमं तुलोन्मेयम् । महिमं पूजनीयम् ॥ वयिमखचिमादयः ॥ ३५० ॥ वयिमादयः शब्दा इमप्रत्ययान्ता निपात्यन्ते । वेंग् तन्तुसंन्ताने वयादेशश्च । वयिमं माल्यं कन्दुकः तन्तुवायदण्डश्च । खनूग् अवदारणे चश्च । खचिमं मणिलोहविद्धं घृतविहीनं च दधि । आदिशब्दादन्येऽपि ॥ उद्घटिकुल्यलिकुथिकुरिकुटिकुडिकुसिभ्यः कुमः ॥३५१॥ उद्घटुमः परिक्षेपः । कुल्लुमः उत्सवः । अल्लुमः प्रसाधनम् नापितः अग्निश्च । कुथुमः ऋषिः । कुथुमं मृगाजिनम् । कुरुमः

कारुः भाजनं च । कुट्टमः प्रेष्यः । कुड्डमा भूमिः । कुसुमं पुष्पम् ॥ कुन्दुमलिन्दुमकुङ्कुमविद्रुमपट्टुमादयः ॥३५२॥ एते कुमप्रत्ययान्ता निपात्यन्ते । कुकि आदाने स्वरान्नो दश्च । कुन्दुमः निचयः गन्धद्रव्यं च । लीङ्च् श्लेषणे लिन्दभावश्च । लिन्दुमो गन्धद्रव्यम् । कुकेः स्वरान्नोन्तश्च ॥ कुङ्कुमं घुसृणम् । विदूलृंती लाभे रोन्तश्च । विद्रुमः प्रवालः । पटेष्टोऽन्तश्च । पट्टुमं नगरम् । आदिग्रहणादन्येऽपि ॥ कुथिगुधेरूमः ॥ ३५३ ॥ आभ्यामूमः प्रत्ययो भवति । कोथूमः चरणकृद्दषिः । गोधूमः धान्यविशेषः ॥ विहाविशापचिभिद्यादेः केलिमः ॥ ३५४ ॥ विपूर्वाभ्याम् ओ हांक् त्यागे शोंच् तक्षणे इत्येताभ्यां पच्यादिभ्यश्च किदेलिमः प्रत्ययो भवति । विहीयते त्यज्यतेऽशुचि शरीरमस्मिन्निति विहेलिमः स्वर्गः । विशयति तनूभवति मासि मासि कलाभिर्हीयमान इति विशेलिमः चन्द्रः स्वर्गश्च । डु पचींष् पाके । पचति असावन्नमिति पचेलिमोऽग्नि आदित्यः अश्वश्च । भिदृंपी विदारणे । भिदेलिमः तस्करः । आदिशब्दात् दृशृं प्रेक्षणे । दृशेलिमम् । अदंप्सांक् भक्षणे । अदेलिमम् । हनंक् हिंसागत्योः । घ्नेलिमम् । डु याचृग् याच्ञायाम् । याचेलिमम् । पांक् रक्षणे । पेलिमम् । डु कृंग् करणे । क्रेलिमम् । इत्यादयो भवन्ति ॥ दो डिमः ॥ ३५५ ॥ दांम् दाने इत्यस्मात् डिमः प्रत्ययो भवति । दाडिमः दाडिमी वा वृक्षजातिः ॥ डिमेः कित् ॥ ३५६ ॥ डिमेः सौत्रात् कित् डिमः प्रत्ययो भवति । डिण्डिमः वाद्यविशेषः ॥ स्थाछामासासूमन्यनिकनिषसिपलिकलिशलिशाकीर्ष्यिसहिबन्धिभ्यो यः ॥ ३५७ ॥ स्थायः स्थानम् । स्थाया भूमिः । छाया तमः प्रतिरूपम् कान्तिश्च । माया छद्म दिव्यानुभावदर्शनं च । सायं दिनावसानम् । सव्यः वामः दक्षिणश्च । मन्या धमनिः । अन्यः परः । कन्या कुमारी । सस्यं क्षेत्रस्थं गोधूमादि । पल्यः कटकुसूलः । कल्यः नीरोगः । शल्यमन्तर्गतं लोहादि । शक्यमासारम् । ईर्ष्यिरीर्ष्यार्थः । ईर्ष्यति ईर्ष्यणं वा ईर्ष्या मात्सर्यम् । सह्यः पश्चादर्णवपार्श्वशैलः । वन्ध्या अप्रसूतिः ॥ नञो हलिपतेः ॥ ३५८ ॥

अहल्या गोतमपत्नी । अपत्यं पुत्रसंतानः ॥ सञ्जेर्धं च ॥ ३५९ ॥ संध्या दिननिशान्तरम् ॥ मृशीपसिवस्यनि-भ्यस्तादिः ॥ ३६० ॥ एभ्यस्तकारादिर्यः प्रत्ययो भवति । मृंङ् प्राणत्यागे । मर्त्यः मनुष्यः । शीङ्क् स्वप्ने । शेत्यः शकुनिः संवत्सरः अजगरश्च । पसि निवासे सौत्रो दन्त्यान्तः । पस्त्यं गृहम् । वसं निवासे । वस्त्यः गुरुः । अनक् प्राणने । अन्त्यः निरवसितः चण्डालादिश्च ॥ ऋशिजनिपुणिकृतिभ्यः कित् ॥ ३६१ ॥ ऋश् गतौ स्तुतौ वा स्वरादिस्तालव्यान्तः । ऋश्यः मृगजातिः । जनैचि प्रादुर्भावे । जन्यं संग्रामः । जाया पत्नी । 'ये नत्रा' इत्यात्वम् । पुणत् शुभे । पुण्यं सत्कर्म । कृतैत् छेदने । कृन्तति कृत्या दुर्गा ॥ कुलेर्डश्च वा ॥ ३६२ ॥ कुल बन्धुसंस्त्यानयोरि-त्यस्मात् कियः प्रत्ययो डकारश्चान्तादेशो वा भवति । कुड्यं भित्तिः । कुल्या सारणी ॥ अगपुलाभ्यां स्तम्भेर्डित् ॥ ॥ ३६३ ॥ अगपुल इत्येताभ्यां परस्मात् स्तम्भेः सौत्रात् डियः प्रत्ययो भवति । अगस्त्यः पुलस्त्यश्च ऋषिः ॥ शिक्यास्याढ्यमध्यविन्ध्यधिष्ण्याघ्न्यहर्म्यसत्यनित्यादयः ॥ ३६४ ॥ एते यप्रत्ययान्ता निपात्यन्ते । शोंच् तक्षणे इकश्चान्तः । शिक्यं लम्बमानः पिठर्याद्याधारः परिव्राड्भिक्षाभाजनस्थानम् असारं च ॥ असूच् क्षेपणे दीर्घत्वं च । आस्यं मुखम् । आङ्पूर्वाद् ढौकतेर्डिच्च । आढ्यः धनवान् । मव बन्धने ध् च । मध्यं गर्भः । विधत् विधाने स्वरा-न्नोऽन्तश्च । विन्ध्यः पर्वतः । ञिधृषाट् प्रागल्भ्ये णोऽन्तो धिष् च । धिष्ण्यं भवनम् आसनं च । धिष्ण्या उल्का । नञ्पूर्वाद्धन्तेरुपान्त्यलोपश्च । अघ्न्यो धर्मः गोपतिश्च । अघ्न्या गौः । हरतेर्मोऽन्तश्च । हर्म्यं सौधम् । अस्तेः सत् च । सत्यम् अमृषा । निपूर्वाद्यमेस्तोऽन्तो धातुलुक् च । नित्यं ध्रुवम् । आदिग्रहणाल्लह्यद्रुह्यादयो भवन्ति ॥कुगुवलिम-लिकणितन्याभ्यक्षेरयः ॥ ३६५ ॥ कुंङ् शब्दे । कवयः ऋषिः पुरोडाशश्च । गुंङ् शब्दे । गवयः गवाकृतिः पशुवि-शेषः । वलि संवरणे । वलयः कटकः । मलि धारणे । मलयः पर्वतः ।कण शब्दे । कणयः आयुधविशेषः । तनूयी विस्ता-

रे । तनयः पुत्रः । अमण् रागे णिचि च । आमयः व्याधिः । अक्षौ व्याप्तौ च । अक्षयः विष्णुः ॥ चायेः केक् च ॥ २६६ ॥ चायृग् पूजानिशामनयोः इत्यस्मात् अयः प्रत्ययोऽस्य च केक् इत्यादेशो भवति । केकयः क्षत्रियः ॥ लादिभ्यः कित् ॥ २६७ ॥ लादिभ्यः किदयः प्रत्ययो भवति । लांक् आदाने । लयः । पां पाने । पयः । ष्णांक् शौचे । स्नयः । देंङ् पालने । दयः । ट्धें पाने । धयः । मेंङ् प्रतिदाने । मयः । कैं शब्दे । कयः । खैं खदने । खयः । श्रैं पाके । श्रयः । क्षिंजिंसिं क्षये । क्षयः । जयः । सयः । त्रैंङ् पालने । त्रयः । ओंवैं शोषणे । वयः ।इत्यादि ॥ कसेरला दिरिच्चास्य ॥ ३६८ ॥ कस गतावित्यस्मादलादिरयः प्रत्ययोऽकारस्य चेकारो भवति । किसलयं प्रवालम् ॥ धृङः शषौ चान्तौ॥३६९॥दृङश् संभक्तावित्यस्मात् किदयः प्रत्ययः शकारषकारौ चान्तौ भवतः । दृशयं देशनाम आकाशम् आसनं शयनं च । दृषयः आशयः ॥ गयहृदयादयः ॥ ३७० ॥ गयहृदयादयः शब्दाः किदयप्रत्ययान्ता निपात्यन्ते । गमेर्डिच्च । गयः प्राणः । गया तीर्थम् । हरतेर्दोऽन्तश्च । हृदयं मनः स्तनमध्यम् च । आदिशब्दात् गणेरेयः । गणेयं गणनीयमित्यादि ॥ मुचेर्घयघुयौ ॥ ३७१ ॥ मुचलृंती मोक्षणे इत्यस्मात् घितावय उय इति प्रत्ययौ कितौ भवतः । मुकयः, मुकुयश्च अश्वनरादश्वायां जातः । घित्करणं कत्वार्थम् ॥ कुलिलुलिकलिकषिभ्यः कायः ॥ ३७२ ॥ एभ्यः किदायः प्रत्ययो भवति । कुल बन्धुसंस्त्यानयोः । कुलायः नीडम् । लुलिः सौत्रः । लुलायः महिषः । कलि शब्दसंख्यानयोः । कलायः त्रिपुटः । कष हिंसायाम् । कषायः कल्कादिः ॥ श्रुदक्षिगृहिस्पृहिमहेराय्यः ॥ ३७३ ॥ श्रुं द श्रवणे । श्रवाय्यः यज्ञपशुः ग्रहणसमर्थश्च श्रोता । दक्षि हिंसागत्योः । दक्षाय्यः अग्निः गृध्रः वैनतेयः दक्षतमश्च । गृहणि ग्रहणे । गृहयाय्यः वैनतेयः गृहकर्मकुशलश्च । स्पृहण् ईप्सायाम् । स्पृहयाय्यः स्पृहयालुः घृतं च । स्पृहयाय्याणि तृणानि अहानि च । महण् पूजायाम् । महयाय्यः अश्वमेधः ॥ दधिषाय्यदीधीषाय्यौ ॥ ३७४ ॥

एतावाख्यप्रत्ययान्तौ निपात्येते । दधिपूर्वात् स्यतेः षत्वं च । दधिषाय्यं पृषदाज्यम् मृषावादी च । दीव्यतेर्दीधीषू च । दीधीषाय्यं तदेव ॥ कौतेरियः ॥ ३७५ ॥ कुंङ् शब्दे इत्यस्मात् इयः प्रत्ययो भवति । कवियं खलीनम् ॥ कृगः कित् ॥ ३७६ ॥ डु कृंग् करणे इत्यस्मात् किदियः प्रत्ययो भवति । क्रियो मेषः ॥ मृजेर्णालीयः ॥ ३७७ ॥ मृजौक् शुद्धौ इत्यस्माण्णालीयः प्रत्ययो भवति । मार्जालीयम् पापशोधनम् । मार्जालीयः अग्निः । मृजोऽस्य वृद्धिरिति वृद्धिः । णकार उत्तरार्थः । वेतेस्तादिः ॥ ३७८ ॥ वींक् प्रजनादावित्यस्मात्तकारादिर्णिदालीयः प्रत्ययो भवति । वैतालीयं छन्दोजातिः ॥ धाग्राजिशृरमियाज्यर्तेरन्यः ॥३७९ ॥ डु धांगृक् धारणे च । धान्यं सस्यजातिः । राजृग् दीप्तौ । राजन्यः ज्योतिः अग्निः क्षत्रियश्च । शॄश् हिंसायाम् । शरण्यः त्राता । रमिं क्रीडायाम् । रमण्यं शोभनम् । यजीं देवपूजादौ । याजन्यः क्षत्रियः यज्ञश्च । ऋंक् गतौ । अरण्यं वनम् ॥ हिरण्यपर्जन्यादयः ॥ ३८० ॥ हिरण्यादयः शब्दा अन्यप्रत्ययान्ता निपात्यन्ते । हरतेरिच्चातः । हिरण्यं सुवर्णादि द्रव्यम् । परिपूर्वस्य पृषू सेचने इत्यस्योपसर्गान्तलोपो धातोश्च जः समस्तादेशः गर्जेर्वा गकारस्य पकारः । पर्जन्यः इन्द्रः मेघः शब्दः पुण्यं कुशलं च कर्म । आदिग्रहणादन्येऽपि ॥ वदिसहिभ्यामान्यः ॥ ३८१ ॥ आभ्यामान्यः प्रत्ययो भवति । वद व्यक्तायां वाचि । वदान्यः दाता गुणवान् चारुभाषी वा । षहि मर्षणे । सहान्यः शैलः ॥ वृङ एण्यः ॥ ३८२ ॥ वृङ्श् सभक्तावित्यस्मादेण्यः प्रत्ययो भवति । वरेण्यः परं ब्रह्म धाम श्रेष्ठः प्रजापतिः अन्नं च ॥ मदेः स्यः ॥ ३८३ ॥ मदैच् हर्षे इत्यस्मात् स्यः प्रत्ययो भवति । मत्स्यः मीनः धूर्तश्च ॥ रुचिभुजिभ्यां किष्यः ॥ ३८४ ॥ रुचिभुजिभ्यां किदिष्यः प्रत्ययो भवति । रुचि अभिप्रीत्यां च । रुचिष्यः वल्लभः सुवर्णं च । भुजंप् पालनाभ्यवहारयोः । भुजिष्यः आचार्यः भोक्ता अन्नं मृदु ओदनः दासश्च । भुजिष्यं धनम् ॥ वच्यर्थिभ्यामुष्यः ॥ ३८५ ॥ आभ्यामुष्यः प्रत्ययो भवति ।

वचंक् भाषणे । वचुथ्यः वक्ता । अर्थणि उपयाचने । अर्थुथ्यः अर्थी ॥ वचोऽथ्य उत् च ॥ ३८६ ॥ वचंक् भाषणे इत्यस्मादथ्यः प्रत्ययोऽस्य चोत् इत्यादेशो भवति । उतथ्यः ऋषिः ॥ भीवृधिरुधिवज्यगिरमिवमिवपिजपिशाकिस्फायिवन्दीन्दिपदिमदिमन्दिचन्दिदसिघसिनसिहस्यसिवासिदहिसहिभ्यो रः ॥ ३८७ ॥ ञि भींक् भये । भेरः भेदः करभः स्वरः मण्डूकः दुन्दुभिः कातरश्च । ऋफिडादित्वात् लत्वे भेलः चिकित्साग्रन्थकारः स्वरः मण्डूकः प्रहीणः अप्राज्ञश्च । वृधूङ् वृद्धौ । वध्रः चर्मविकारः चन्द्रः मेघश्च । रुधूंपी आवरणे । रोध्रः वृक्षविशेषः । वज गतौ । वज्रं कुलिशम् रत्नविशेषश्च । अग कुटिलायां गतौ । अग्रः प्राग्भागः श्रेष्ठश्च । रगिं क्रीडायाम् । रग्रः कामुकः । टु वमू उद्गिरणे । वम्रः धर्मविशेषः धूमश्च । वम्री उपदेहिका । टु वपीं बीजसंताने । वप्रः केदारः प्राकारः वास्तुभूमिश्च । जप मानसे च । जप्रः ब्राह्मणः मण्डूकश्च । शक्लृंट् शक्तौ । शक्रः इन्द्रः । स्फायैङ् वृद्धौ स्फारम् उल्बणं प्रभूतं च । वदुङ् स्तुत्यभिवादनयोः । वन्द्रः वन्दी केतुः कामश्च । वन्द्रं समूहः । इदु परमैश्वर्ये । इन्द्रः शक्रः । पदिंच् गतौ । पद्रं ग्रामादिनिवेशः शून्यं च । मदैच् हर्षे । मद्रा जनपदः क्षत्रियश्च । मद्रं सुखम् । मदुङ् स्तुत्यभिवादनयोः । मन्द्रं मधुरः स्वरः । मन्द्रं गभीरम् । चदु दीप्त्याह्लादयोः । चन्द्रः शशी सुवर्णं च । दसूच् उपक्षये । दस्रः शिशिरम् चन्द्रमाः अश्विनोर्ज्येष्ठश्च । दस्रौ अश्विनौ । घस्लृं अदने । घस्रः दिवसः । णसि कौटिल्ये । नस्रः नासिकापुटः ऋषिश्च । हसे हसने । हस्रः दिनं घातुकः हर्षुलश्च । हस्रं बलाधानं संनिपातश्च । सहस्रं दश शतानि । असूच् क्षेपणे । अस्रम् अश्रु । वासिच् शब्दे । वास्रः पुरुषः शब्दः संघातः शरभः रासभः पक्षी च । वास्रा धेनुः । दहं भस्मीकरणे । दह्रः अग्निः शिशुः सूर्यश्च । षहि मर्षणे। सह्रः शैलः ॥ ऋज्यजितञ्चिवञ्चिरिपिसृपितृपिदपिचुपिक्षिपिक्षुषिक्षुदिसुदिरुदिछिदिभिदिखिदुन्दिदम्भिशुभ्युम्भिदंशिचिसिवहिविसिवसिशुषिसिधिगृधिधीन्धिश्वितिवृतिनीशीसुसूभ्यः कित् । ३८८॥

॥ १८८ ॥ एभ्यः कित् रः प्रत्ययो भवति । ऋजि गतिस्थानार्जनोपार्जनेषु । ऋज्रः नायक इन्द्रः अर्थश्च । अज क्षेपणे च । वीरः विक्रान्तः । तक्चू वक्चू गतौ । तक्रम उदश्वित् । वक्रः कुटिलः अङ्गारकः विष्णुश्च । उभयत्र न्यङ्क्वादित्वात् कत्वम् । रिपि सौत्रः । रिप्रं कुत्सितम् । सृप्लृं गतौ । सृप्रः चन्द्रः । सृप्रं मधु । सृप्रा नाम नदी । तृपौच् प्रीतौ तृप्रं मेघान्तर्घर्मः आज्यं काष्ठं पापं दुःखं वा । दृपौच् हर्षमोहनयोः । दृप्रं बलं दुःखं च । दृप्रा बुद्धिः । चुप मन्दायां गतौ । चुप्रः वायुः । क्षिपींत् प्रेरणे । क्षिप्रं शीघ्रम् । क्षुपि सादने । सौत्रः । क्षुप्रं तुहिनं कण्टकिगुल्मकश्च । क्षुदृंपी संपेषे । क्षुद्रम् अणु जलगर्तश्च । क्षुद्रा मधुकर्यः । क्षुद्रः हिंस्रः । मुदि हर्षे । मुद्रा चिह्नकरणम् । रुदृक् अश्रुविमोचने । रुद्रः शम्भुः ।छिदृंपी द्वैधीकरणे । छिद्रं विवरम् । भिदृंपी विदारणे । भिद्रम् अहृदम् । भिद्रः शरः । खिदंत् परिघाते । खिद्रम् विघ्नः । खिद्रः विषाणम् विषादः चन्द्रः दीनश्च । उन्दैप् क्लेदने । उद्रः ऋषिः मत्स्यश्च । सम्पूर्वात् समुन्दन्ति आर्द्रीभवन्ति वेलाकाले नद्योऽस्मादिति समुद्रः सागरः । भीमादित्वादपादाने । दम्भूट् दम्भने । दभ्रः अल्पः चन्द्रः कृशः कुशलः सूर्यश्च । शुभि दीप्तौ । शुभ्रोऽवदातः । उम्भत् पूरणे । उभ्रो मेघः पेलवश्च । दंशं दशने । शभ्रो दन्तः सर्पश्च । चिंगट् चयने । चिरम् अशीघ्रम् । षिंगृट् बन्धने । सिरा रुधिरस्रोतोवाहिनी नाडी । वहीं प्रापणे । उह्रः अनड्वान् । विसच् प्रेरणे । विस्रम् आमगन्धि । वसं निवासे । उस्रः रश्मिः । बाहुलकात् षत्वं न भवति । उस्रा गौः । शुच शोके । शुक्रः ग्रहः मासः शुक्लश्च । शुक्रं रेतः लत्वे शुक्लः वर्णः । कत्वं न्यङ्क्वादित्वात् । षिधू गत्याम् । सिध्रः साधुः वृक्षः मांसप्रभेदश्च । गृधूच् अभिकाङ्क्षायाम् । गृध्रः श्येनः लुब्धकः कङ्कश्च । ञि इन्धैपि दीप्तौ । विपूर्वात् । वीध्रः अग्निः वायुः नभः निर्मलः पूर्णचन्द्रमण्डलम् । श्विताङ् वर्णे । श्वित्रं श्वेतकुष्ठम् । वृतूङ् वर्तने । वृत्रः दानवः बलवान् रिपुश्च । वृत्रं पापम् । णींग् प्रापणे नीरं जलम् ।शीङ्क् स्वप्ने । शीरः अजगरः । षुंगृट् अभिषवे । सुरः देवः ।

सुरा मद्यम् । षूङौच् प्राणिप्रसवे । सूरः आदित्यः रश्मिश्च ॥ इण्धागृभ्यां वा ॥ ३८९ ॥ आभ्यां रः प्रत्ययो भवति स च किद्वा । इंण्क गतौ । इरा मदनीयपानविशेषः मेदिनी च । एरा एडका डु धांगृक् धारणे च । धीरः सत्त्ववान् धृतिमांश्च । धारा जलयष्टिः खड्गावयवः अश्वगतिविशेषश्च ॥ चुम्बिकुम्बितुम्बेर्नलुक् च ॥ ३९० ॥ एभ्यः किद्रः प्रत्ययो भवति नकारस्य चैषां लुग् भवति । चुबु वक्त्रसंयोगे । चुब्रम् वक्त्रम् । चुब्रः रश्मिः । कुबु आच्छादने । कुब्रं संकटं भग्नपृष्ठः फल्गु हस्ती चर्म गृहाच्छादनं च । तुबु अर्दने । तुब्रं कुटिलम् ॥ भन्देर्वा ॥३९१॥ भदुङ् सुखकल्याणयोरित्यस्माद्रः प्रत्ययो नकारस्य च लुग् वा भवति । भद्रं भन्द्रं च कल्याणम् सुखं च॥चिजिशुसिमितम्यम्यर्देर्दीर्घश्च ॥ ३९२ ॥ एभ्यो रः प्रत्ययो दीर्घश्चैषां भवति । चिंग्ट् चयने । चीरं जीर्णं वस्त्रं वल्कलं च । जि अभिभवे । जीरः अजाजी अग्निः वायुः अश्वश्च । जीरम् अन्नम् । लत्वे, जीलः चर्मपुटः।शुं गतौ। शूरः विक्रान्तः। षिंग्ट् बन्धने । सीरं हलम् । सीरा हलविलेखिता लेखा । डु मिंग्ट् प्रक्षेपणे । मीरः समुद्रः । मीरं जलम् । मीरा मांस्पचनी देवसीमा च । तमूच् काङ्क्षायाम् । ताम्रः वर्णः शुल्वं च । अम गतौ । आम्रः वृक्षः । अर्दं गतियाचनयोः । आर्द्रं सरसम् ॥ चकिरमिविकसेरुच्चास्य ॥ ३९३ ॥ चकिरमिभ्यां विपूर्वाच्च कसेरः प्रत्ययो भवति अकारस्य चैषामुकारो भवति चकि तृप्तिप्रतिघातयोः । चुक्रः अम्लो रसः बीजपूरकमीजिका असुरः निमन्त्रणं च । रमिं क्रीडायाम् । रुम्रः सुन्दरः आदित्यसारथिः ब्राह्मणः विनाशश्च । कसे गतौ । विकुस्रः चन्द्र समुद्रश्च । विकुस्रं पुष्पितम् । बाहुलकात् विकसेर्विकल्पः । विकस्रः ॥ शदेरुच्च ॥ ३९४ ॥ शद्लृं शातने इत्यस्माद्रः प्रत्ययोऽकारस्य चोकारो भवति । शूद्रः चतुर्थो वर्णः ॥ कृतेः क्रूकृच्छौ च ॥ ३९५ ॥ कृतैत् छेदने इत्यस्माद्रः प्रत्ययोऽस्य च क्रू कृच्छ् इत्यादेशौ भवतः । क्रूरम् अमृदु । क्रूरः पापकर्मा । कृच्छम् दुःखम् ॥ खुरक्षुरदूरगौरविप्रक्रुप्रश्वभ्राभ्रधूम्रान्ध्ररन्ध्र-

**शिलिन्ध्रौड्रपुण्ड्रतीव्रनीव्रशीघ्रोग्रतुग्रभुग्रनिद्रातन्द्रासान्द्रगुन्द्रारिज्रादयः** ॥ ३९६ ॥ एते रात्ययान्ता निपात्यन्ते । खुरत् छेदने । क्षुरत् विलेखने, अनयो रलोपो गुणाभावश्च । खुरः शफः । क्षुरः नापितभाण्डम् । ननु च खुरक्षुरशब्दौ ' नाम्युपान्त्यप्रीकॄगृज्ञः कः ' इति केन सिध्यतः । सत्यम् । तत्र कर्तर्यर्थे इह तु संप्रदानाच्चान्यत्रोणादय इत्यर्थभेदः । असर्वविषयत्वं वाऽनयोर्ज्ञाप्यते । यथा अदेः परोक्षायां वा घस्लादेशवचनेन घसेः । एवमन्यत्रापि स्वयमभ्यूह्यम् । दूर्‌पूर्वादिणो लुक् च । दूरं विप्रकृष्टम् । गवतेर्वृद्धिश्च । गौरः अवदातः । विपूर्वात्पातेर्लुक् च । विप्रः ब्राह्मणः विविधं प्रातीति वा विप्रः । गुपूच् व्याकुलत्वे । आदेः कत्वं च कुप्रं महनम् गृहाच्छादनं च । दृवोश्वि गतिवृद्ध्योः अकारः भोऽन्तश्च । श्वभ्रं विलम् आकाशं च । आप्लृंट् व्याप्तौ अभादेशश्च । अभ्रं मेघः । धुगृश् कम्पने मोऽन्तश्च । धूम्रः वर्णविशेषः अहुङ् गतौ धश्च । अन्ध्रः क्षत्रजातिः । रधेः स्वरान्नोऽन्तश्च । रन्ध्रं छिद्रम् । ञि इन्धैपि दीप्तौ । अस्य च तालव्यादिशिलश्चादिः । शिलिन्ध्रम् उद्भिद्विशेषः । ओणेः डश्च । ओड्रः क्षत्रजातिः पुणेः स्वरान्नोऽन्तो डश्च । पुण्ड्रः क्षत्रजातिः तिलकश्च।पुण्ड्रेर्वा रूपम्।तिजेर्वोश्च दीर्घ ।तीबतेर्वा ।तीव्रः तीक्ष्णः उत्कृष्टश्च । नियो वोऽन्तश्च नीवतेर्वा । नीव्रं गृहच्छदिरुपान्तः । श्यैङ ईत्वं यलोपो घश्चान्तः । शीघ्रः त्वरितः । उचेरुषेर्वा गः कित् च उग्रः रुद्रः रौद्रश्च । तुदीत् व्यथने गः किच्च । तुग्रं शृङ्गम् । भुजंपू पालनाभ्यवहारयोः गः किच्च । भुग्रः रश्मिसमूहः। णिदु कुत्सायाम् किच्चलोपश्च । निद्रा स्वापः । तमूच् काङ्क्षायाम् दोऽन्तश्च । तन्द्रा आलस्यम् । षद्लृं विशरणगत्यवसादनेषु अस्य स्वरान्नोऽन्तो वृद्धिश्च । सान्द्रं घनम् । गुदेः स्वरान्नोऽन्तश्च । गुन्द्रा जलतृणविशेषः । राजेरञ्जेर्वा किच्चेच्चोपान्त्यस्य । रिज्रः नायकः । आदिग्रहणादन्येऽपि॥ **ऋच्छिचटिवटिकुटिकठिवठिमठ्यडिशीकृशीभृकदिवदिकन्दिमन्दिसुन्दिमन्थिमञ्जिपञ्जिपिञ्जिक्रमिसमिचमिवमिभ्रभ्यमिदेविघासिकास्यर्तिजीविवर्विकुशु**

दोररः ॥ ३९७ ॥ एभ्योऽरः प्रत्ययो भवति । ऋच्छत् इन्द्रियप्रलयमूर्तिभावयोः । ऋच्छरः त्वरावान् । ऋच्छरा वेश्या कुलटा त्वरा अङ्गुलिश्च । चटण् भेदे । चटरः तस्करः । वट वेष्टने । वटरः मधुकण्डरा । कुटत् कौटिल्ये । कोटरं छिद्रम् । बाहुलकाद्गुणः । कठ कृच्छ्रजीवने । कठरः दरिद्रः । वठ स्थौल्ये । वठरः मूर्खः बृहद्देहश्च । मठ मदनिवासयोश्च । मठरः ऋषिः अज्ञानी गोत्रम् अलसश्च । अड उद्यमे । अडरः वृक्षः । शीकृङ् सेचने । शीकरः जललवसेकः । शीभृङ् कत्थने । शीभरः हस्तिहस्तमुक्तो जललवसेकः । कदिः सौत्रः । कदरः वृक्षविशेषः । बद स्थैर्ये । बदरी फलवृक्षः । कदुङ् वैक्लव्ये । कन्दरः गिरिगर्तः । मुदुङ् स्तुत्यादौ । मन्दरः शैलः । सुन्दिः सौत्रः शोभायाम् । सुन्दरः मनोज्ञः । मन्थश् विलोडने । मन्थरः मन्दः खर्वश्च । मञ्जिपञ्जी सौत्रौ । मञ्जरी आम्रादिशाखा । गौरादित्वात् ङीः । पञ्जरः शुकाद्यवरोधसद्म । पिञ्जुण् हिंसाबलदाननिकेतनेषु । पिञ्जरः पिशङ्गः । कमूङ् कान्तौ । कमरः मूर्खः कार्मुकं कोमलः चौरः कान्तश्च । षम वैक्लव्ये । समरः संग्रामः । चमू अदने । चमरः आरण्यपशुः । टुवमू उद्गिरणे । वमरः दुर्मेधाः । भ्रमूच् अनवस्थाने । भ्रमरः षट्पदः अम गतौ । अमरः सुरः । देवृङ् देवने । देवरः पत्यनुजः । वसं निवासे णौ, वासरः दिवसः कामः अग्निः प्रावृट् च । अन्ये वाशिच् शब्दे इत्यस्मादपि तालव्यान्तादिच्छन्ति । वाशरः अग्निः मेघः दिवसश्च । कासृङ् शब्दकुत्सायाम् । कासरः महिषः । ऋंक् गतौ अररः कपाटः बुधः भ्रमरः गृहं हरणं शलाका च । जीव प्राणधारणे।जीवरः दीर्घायुः । बर्बं गतौ। बर्बरः म्लेच्छजातिः । बर्बरी कुञ्चिताः केशाः।कुंङ् शब्दे । कवरः वर्णः । कवरी वेणिः । शुं गतौ । शवरः म्लेच्छजातिः । शव गतावित्यस्यान्ये । टुदुंत् उपतापे । दवरः गुणः

अवेर्धृ च वा ॥ ३९८ ॥ अव रक्षणादावित्यस्मादरः प्रत्ययो धकारश्चान्तादेशो वा भवति । अधरः हीनः उपरिभावस्य प्रतियोगी दन्तच्छदश्च । अवरः परप्रतियोगी ॥ स्फुगुन्दिपिटिकुरिकुहिभ्यः कित् ॥ ३९९ ॥ एभ्योऽरः

प्रत्ययः किद् भवति ।मृदश् क्षोदे। मृदरः व्याधिः अग्निकायः क्षोदश्च । उन्दैप् क्लेदने। उदरं जठरं व्याधिश्च । पिठहिंसासंक्लेशयोः । पिठरं भाण्डम् । कुरत् शब्दे । कुररः जलपक्षिजातिः । कुहणि विस्मापने। कुहरं गम्भीरगर्तः ॥ शाखेरिदैतौ चातः ॥ ४०० ॥ शाखृ व्याप्तावित्यस्मादरः प्रत्यय आकारस्य चेकारैकारौ भवतः। शिखरम् अग्रम् । शेखर आपीडः ॥ शपेः फू च ॥ ४०१ ॥ शपीं आक्रोशे इत्यस्मादरः प्रत्ययः फकारश्चान्तादेशो भवति । शफरः क्षुद्रमत्स्यः ॥ दमेर्णिद्वा दश्च डः ॥ ४०२ ॥ दमून् उपशमे इत्यस्मादरः प्रत्ययः स च णिद् वा दकारस्य च डकारो भवति ।डामरः भयानकः। डमरःस एव ॥ जठरक्रकरमकरशंकरकर्परकूर्परतोमरपामरप्रामरप्राभ्ररसगरनगरतगरोर्दरादरशृदरदरकुकरकुकुन्दरगोर्वराम्बरमुखरखरडहरकुञ्जराजगरादयः ॥ ४०३॥ एते किदरप्रत्ययान्ता निपात्यन्ते । जनेष्ठ च । जठरं कोष्ठः । क्रमेः क च । क्रकरः गौरतित्तिरिः । मङ्केर्नलोपश्च । मकरः ग्राहः । शंपूर्वात् किरतेर्डिच्च । शङ्करः रुद्रः । कृपेरुपान्त्यस्य उर् च वा । कर्परं कपालम् कूर्परं कुफणी । ताम्यतेरत औच्च । तोमरः आयुधम् । पातेर्मोन्तश्च । पामरः ग्रामीणः । प्रपूर्वादमतेः प्रामरः ग्राम्यमन्दजातिः । प्रपूर्वादत्तेर्मोऽन्तश्च । प्राभ्ररः नरपशुः । सहिनञ्योर्गे च । सगरः द्वितीयश्चक्रवर्ती । नगरं पुरम् । तङ्केर्नलोपश्च । तगरः वृक्षविशेषः । ऊर्जः पराद् दणातेर्डित् जलुक् च । ऊर्जा बलेन दणाति बिभेति ऊर्दरः दुर्बलः । अदु बन्धने नलुक् च । अदरं वक्षः वृक्षः संग्रामः चञ्चुसमूहः मातृवाहश्च । शृश् हिंसायाम् दृश् विदारणे इत्यनयोर्ह्रस्वत्वं दश्चान्तः शृदरः सर्पः । दरं भयं विषं च । डु कृंग् करणे दोऽन्तश्च । कृदरः वृक्षः सर्वकर्मप्रवृत्तो दस्युजनः कुशूलश्च । कुपूर्वात् स्कुदुङ् आप्रवणे सलोपश्च । कुकुन्दरं श्रोणिकूपकः । गोपूर्वात् वृगो डित् रथ्यादिः । गोर्वरः करीषः । अमेर्बोऽन्तश्च । अम्बरं वस्त्रम् आकाशं च । मुहेः ख च । मुखरः वाचालः । खनेर्डिच्च । खरः रासभः । दहेराद्डश्च । डहरं हृत्कमलम् । कुज अव्यक्ते शब्दे ह्रस्वः

स्वरान्नोऽन्तश्च । कुञ्जरः हस्ती । अजेरगश्चान्तः वीभावाभावश्च । अजगरः शयुः । आदिग्रहणात् कोटराङ्करशाङ्करपाण्डरवानरादयो भवन्ति ॥ मुदिगूरिभ्यां टिद्गजौ चान्तौ ॥ ४०४ ॥ आभ्यां टिदरः प्रत्ययो गकारजकारौ च यथासंख्यमन्तौ भवतः । मुदि हर्षे । मुद्गरः प्रहरणविशेषः । मुद्गरी स्त्री । गूरैचि गतौ । गूर्जरः सौराष्ट्रादिः । गूर्जरी स्त्री ॥ अग्यङ्गिमदिमन्दिकडिकसिकासिमृजिकञ्जिकलिमलिकषिभ्य आरः ॥ ४०५ ॥ अगारं वेश्म । अगु गतौ । अङ्गारः निर्वातज्वालो निर्वाणश्चोल्मूकावयवः भूमिसुतश्च । मदारः पानशोण्डः वराहः हस्ती अलसश्च । मन्दारः वृक्षविशेषः कडारः पिङ्गलः विषमदशनश्च । कसारः हिंस्रः । कासारः पल्वलम् । मार्जारः बिडालः । कञ्जिः सौत्रः । कञ्जारः कुशूलजातिः यूपः व्यञ्जनं च । कलारः विषमरूपः । मलारः अलसः । मलमिवारा तोदोऽस्येति वा मलारः । कचारः अपनेयः तृणबुसपांसुविकारः ॥ त्रः कादिः ॥ ४०६ ॥ तॄ प्लवनतरणयोरित्यस्मात्ककारादिरारः प्रत्ययो भवति । तर्कारः वृक्षः ॥ कृगो मादिश्च ॥ ४०७ ॥ करोतेर्मकारादिः ककारादिश्चारः प्रत्ययो भवति । कर्मारः लोहकारः । कर्कारः वृक्षः ॥ तुषिकुठिभ्यां कित् ॥ ४०८ ॥ आभ्यां किदारः प्रत्ययो भवति । तुषंच् तुष्टौ । तुषारः हिमम् । कुठिः सौत्रः । कुठारः परशुः ॥ कमेरत उच्च ॥ ४०९ ॥ कमूङ् कान्तावित्यस्मादारः प्रत्ययोऽकारस्य चोकारो भवति । कुमारः महासेनः अभ्रष्ट बालश्च ॥ कनेः कोविदकर्बुदकाञ्चनाश्च ॥ ४१० ॥ कनै दीप्तावित्यस्मादारः प्रत्ययोऽस्य च कोविद कर्बुद कञ्चन इत्यादेशा भवन्ति । कोविदारः कर्बुदारः काञ्चनारश्च वृक्षविशेषाः ॥ द्वारशृङ्गारभृङ्गारकह्लारकान्तारकेदारखारडादयः ॥ ४११ एते आरप्रत्ययान्ता निपात्यन्ते । उम्भत् पूरणे द्वादेशश्च । द्वारं द्वाः । श्रयतेस्तालव्यादिः शृङ्गश्च । शृङ्गारः रसविशेषः विदग्धता च । भृगो भृङ्ग् च । भृङ्गारः हस्तिमुखाकारगलन्तिका । कलेर्हश्च स्वरात्परः । कह्लार उत्पलविशेषः । कमेस्तोऽन्तो दीर्घश्च । कान्तारमरण्यम् । कदेः

सौत्रस्यात एच । केदारः वप्रः । खनेर्डिच्च । खारी चतुर्द्रोणम् । खारडिति टकारो ङ्यर्थः । आदिग्रहणात् शिशुमारादयो भवन्ति ॥ **मदिमन्दिचन्दिपदिखदिसहिवहिकृसृभ्य इरः** ॥ ४१२ ॥ मदैच् हर्षे । मदिरा सुरा । मदुङ् स्तुत्यादौ। मन्दिरं वेश्म नगरं च । चदु दीप्त्याह्लादनयोः। चन्दिरः चन्द्रमाः हस्ती च । चन्दिरं चन्द्रिकावत् जलं च । पदिंच् गतौ । पदिरः मार्गः । खद हिंसायाम् । खदिरः वृक्षविशेषः । षहि मर्षणे । सहिरः पर्वतः । वहीं प्रापणे । वहिरः बलीवर्दः । कुंङ् शब्दे । कविरः अक्षिकोणः । सृं गतौ । सरिरं जलम् । लत्वे, सलिलम् ॥ **शवशशोरिचातः** ॥ ४१३ ॥ अभ्यामिरः प्रत्ययोऽकारस्य चेकारो भवति । शव गतौ तालव्यादिः । शिविरम् सैन्यसन्निवेशः । शश प्लुतिगतौ । शिशिरं शीतलम् ऋतुश्च ॥ **श्रन्थेः शिथ् च** ॥ ४१४ ॥ श्रथुङ् शैथिल्ये इत्यस्मादिरः प्रत्ययोऽस्य च शिथ् इत्यादेशो भवति । शिथिरं श्लथम् । लत्वे, शिथिलम् ॥ **अशोर्णित्** ॥ ४१५ ॥ अश्नातेरश्नोतेर्वा णिदिरः प्रत्ययो भवति । आशिरः विष्णुः आदित्यश्च । प्राशिरः बह्वाशी ॥ **शुषीषिबन्धिरुधिरुचिमुचिमुहिमिहितिमिमुदिखिदिच्छिदिभिदिस्थाभ्यः कित्** ॥ ४१६ ॥ एभ्यः किदिरः प्रत्ययो भवति । शुषंच् शोषणे । शुषिरं छिद्रम् । इषत् इच्छायाम् । इषिरं तृणम् । इषिरः अग्निः आहारः क्षिप्रः सेव्यश्च । बन्धंश् बन्धने । बधिरः श्रुतिविकलः । रुधृंपी आवरणे । रुधिरं द्वितीयो धातुः । रुचि अभिप्रीत्यां च । रुचिरं दयितं दीप्तिमच्च । मुच्लृन्ती मोक्षणे । मुचिरः धर्मः सूर्यः मेघश्च । मुहौच् वैचित्त्ये । मुहिरः कन्दर्पः सूर्यश्च । मुहिरं तमः । मिहं सेचने । मिहिरः मेघः सूर्यश्च । मिहिरं तोयम् । तिमच् आर्द्रभावे । तिमिरं तमः तोयं रोगश्च कश्चित् । मुदि हर्षे । मुदिरः मेघः सूर्यश्च । खिदंत् परिघाते । खिदिरः त्रासः तस्करश्च । छिदृंपी द्वैधीकरणे । छिदिरः उन्दुरः अग्निश्च । छिदिरं शस्त्रम् । भिदृंपी विदारणे । भिदिरः अशनिः भेदश्च । ष्ठां गतिनिवृत्तौ । स्थिरः अचलः ॥ **स्थविरपिठिरस्फिराजिरादयः** ॥ ४१७ ॥ एते कि-

दिरप्रत्ययान्ता निपात्यन्ते । तिष्ठतेर्वोऽन्तो ह्रस्वश्च । स्थविरः वृद्धः । पचतेरत इत्वं ठश्च । पिठिरं साधनभाण्डम् । पिठेर्वा रूपम् । स्फायतेर्डिच्च । स्फिरः स्फारः वृद्धिश्च । अजेर्वीभावाभावश्च । अजिरम् अङ्गणम् नगरं देवः वेश्म च । आदिग्रहणादन्येऽपि॥कृशॄपॄपूग्मञ्जिकुटिकटिपटिकण्डिशौण्डिहिंसिभ्यः ईरः॥११८॥कृत् विक्षेपे।करीरः वनस्पतिविशेषः वंशाद्यङ्कुरश्च । शॄश् हिंसायाम् । शरीरं वपुः । पॄश् पालनपूरणयोः । परीरं बलं लाङ्गलमुखं च पूग्श् पवने । पवीरं रङ्गस्थानं फलं पवित्रं बीजावपनं च । मञ्जिः सौत्रः । मञ्जीरं नूपुरः । कुटत् कौटिल्ये । कुटीरम् आलयः कर्कटकः चन्द्राश्रयराशिश्च । कोटीरं मुकुटः । बाहुलकाद्गुणः । कटे वर्षावरणयोः । कटीरं जनपदः जघनं जलं च । पट गतौ । पटीरः कन्दर्पः । पटीरं कार्मुकम् स्फिक् च । कडु मदे । कण्डीरं हरितकम् । शौण्ड गर्वे । शौण्डीरः गर्वितः सत्त्ववान् तीक्ष्णश्च । हिंसुप् हिंसायाम् । हिंसीरः श्वापदः हिंस्रश्च ॥ घसिवशिपुटिकुरिकुलिकाभ्य कित् ॥ ॥ ४१९ ॥ एभ्यः किदीरः प्रत्ययो भवति । घस्लृं अदने । क्षीरं दुग्धं मेघश्च । वशक् कान्तौ । उशीरं वीरणीमूलम् । पुटत् संश्लेषणे । पुटीरः कूर्मः । कुरत् शब्दे । कुरीरं मैथुनं वेश्म च । कुरीरः मालाविशेषः कम्बलश्च । कुल बन्धुसंस्त्यानयोः । कुलीरः कर्कटः । कैं शब्दे । कीरः शुकः काश्मीरकश्च ॥ कशेर्मोऽन्तश्च ॥ ४२० ॥ कश शब्दे इत्यस्मात्ताल्व्यान्तादीरः प्रत्ययो मश्चान्तो भवति । कश्मीरा जनपदः ॥ वनिवपिभ्यां णित् ॥ ४२१ ॥ आभ्यां णिदीरः प्रत्ययो भवति । वन भक्तौ । वानीरः वेतसः । डु वपीं बीजसंताने । वापीरः मेघः अमोघः निष्पत्तिः क्षेत्रं च ॥ जम्बीराभीरगभीरगम्भीरकुम्भीरभडीरभण्डीरडिण्डीरकिर्मीरादयः ॥ ४२२ ॥ एते ईरप्रत्ययान्ता निपात्यन्ते । जनेर्बोऽन्तश्च । जम्बीरः । वृक्षविशेषः आप्नोतेर्भश्च । आभीरः शूद्रजातिः । गमेर्भः स्वरान्नस्तु वा । गभीरः अगाधः अचपलश्च । गम्भीरः स एव । स्कुम्भेः सौत्रात् सलोपश्च । कुम्भीरः जलचरः । भडुङ् । परिभाषणे । अस्य

नलुक् च वा । भडीरः भण्डीरश्च वोढृवचने । डीङो डित् द्वित्वं पूर्वस्य नोऽन्तश्च । डिण्डीरः फेनः । किरतेर्मोऽन्तश्च । किर्मीरः कर्बुरः । आदिग्रहणात् तूणीरनासीरमन्दीरकरवीरादयो भवन्ति ॥ वाश्यसिवासिमसिमथ्युन्दिमन्दिचतिचङ्क्यङ्किकर्बिचकिबन्धिभ्य उरः ॥ ४२३ ॥ वाशुरः शकुनिः गर्दभश्च । वाशुरा रात्रिः । असुरः दानवः । वासुरा रात्रिः मसुरा च । मसुरा पण्यस्त्री । मसुरं चर्मासनम् धान्यविशेषश्च । मथुरा नगरी । उन्दुरः मूषिकः । मन्दुरा वाजिशाला । चतुरः विदग्धः । चङ्किः सौत्रः । चङ्कति चेष्टते चङ्कुरः रथः अनवस्थितश्च । अङ्कुरः प्ररोहः तरुप्रतानभेदश्च । घञ्युपसर्गस्य बहुलमिति बहुलवचनात् दीर्घत्वे, अङ्कूरः । कर्बुरः शबलः । चकुरः दशनः । बन्धुरः मनोज्ञः नम्रश्च ॥ मङ्केर्नलुक् वोच्चास्य ॥ ४२४ ॥ मकुङ् मण्डन इत्यस्मादुरः प्रत्ययो नकारस्य लुक् अकारस्य चोकारो वा भवति । मुकुरः आदर्शः मुकुलं च । मकुरः आदर्शः कल्कः बालपुष्पं च ॥ विधेः कित् ॥ ४२५ ॥ विधत् विधाने इत्यस्मात् किदुरः प्रत्ययो भवति । विधुरं वैशसम् ॥ श्वशुरकुकुन्दुरदर्दुरनिचुरप्रचुरचिकुरकुकुरकुक्कुरकुर्कुरशर्कुरनूपुरनिष्ठुरविथुरमद्गुरवागुरादयः ॥ ४२६ ॥ एते किदुरप्रत्ययान्ता निपात्यन्ते । आशुपूर्वात् शुपूर्वाद्वा अश्नोतेरश्नातेर्वा आकारलोपश्च । श्वशुरः जम्पत्योः पिता । कुपूर्वात् स्कुदुङ् आप्रवणे इत्यस्मात् सलुक् च । कुकुन्दरौ नितम्बकूपौ । दृणातेर्दोऽन्तश्च । दर्दुरः मण्डूकः मेघश्च । निपूर्वात् प्रपूर्वात् चिनोतेः चरतेर्वा डिच्च । निचुरः तरुविशेषः । लत्वे, निचुलः । प्रचुरं प्रायः । चकेरिच्चास्य । चिकुरं युवतीनामीषन्निमीलितमक्षि । चिकुराः केशाः । कुकेः कोऽन्तो वा । कुकुरः यादवः । कुक्कुरः श्वा । किरः कुर् कोऽन्तश्च । कुर्कुरः श्वा । शॄश् हिंसायाम् गुणः कोऽन्तश्च । शर्कुरस्तरुणः । णूत् स्तवने पोऽन्तश्च । नूपुरः तुलाकोटिः । निपूर्वात् तिष्ठतेः निष्ठुरः कर्कशः । निष्ठुरं काहलम् । व्यथेर्विथ् च । व्यथतेऽस्माज्जनः इत्यपादानेऽपि विथुरः राक्षसः । मदिवात्योर्गोऽन्तश्च । मद्गुरः

मत्स्यविशेषः । वागुरा मृगानायः । आदिग्रहणान्मन्यतेर्धश्च । मधुरः रसविशेष इत्यादि ॥ **मीमसिपशिखटिखडिखर्जिकर्जिसर्जिकृपिवल्लिमण्डिभ्य ऊरः ॥ ४२७ ॥** मीङ्च् हिंसायाम् । मयूरः शिखी । महीं रौति मयूर इति पृषोदरादिषु संज्ञाशब्दानामनेकधा व्युत्पत्तिं लक्षयति । मसैच् परिमाणे । मसूरः अवरधान्यजातिः चर्मासनं च । पशिः सौत्रः । पश्यते गम्यते इति पशूरः ग्रामः । खट काङ्क्षे । खटूरः मणिविशेषः । खडण् भेदे । खडूरः खुरलीस्थानम् । खर्ज मार्जने च । खर्जूरः वृक्षविशेषः । कर्ज व्यथने । कर्जूरः स एव मलिनश्च । सर्ज अर्जने । सर्जूरः अहः । कृपौङ् सामर्थ्ये । कर्पूरः गन्धद्रव्यम् । वल्लि संवरणे । वल्लूरः शुष्कं मांसम् । मडु भूषायाम् । मण्डूरः धातुविशेषः ॥ **महिकणिचण्यणिपल्यलितलिमलिशलिभ्यो णित् ॥ ४२८ ॥** एभ्यो णिदूरः प्रत्ययो भवति । मह पूजायाम् । माहूरः शैलः । कण गतौ । काणूरः नागः । चण हिंसादानयोश्च । चाणूरः मल्लो विष्णुहतः । अण शब्दे । आणूरः ग्रामः । पल गतौ । पालूरं नाम नगरमान्ध्रराज्ये । अली भूषणादौ । आलूरः विटः तलण् प्रतिष्ठायाम् । तालूरः जलावर्तः । मलि धारणे । मालूरः दानवः बिल्वश्च । शल गतौ । शालूरः दुर्दुरः ॥ **स्थाविडेः कित् ॥ ४२९ ॥** आभ्यां किदूरः प्रत्ययो भवति । ष्ठां गतिनिवृत्तौ । स्थूरः बठरः उच्चश्च । स्थूरा जङ्घाप्रदेशः । विड आक्रोशे । विडूरः बालवाये ग्रामः ॥ **सिन्दूरकच्चूरपत्तूरधुत्तूरादयः ॥ ४३० ॥** एते ऊरप्रत्ययान्ता निपात्यन्ते । स्यन्देः सिन्द् च । सिन्दूरं चीनपिष्टम् । करोतेश्चोऽन्तश्च । कच्चूरः औषधविशेषः पतेस्तोऽन्तश्च । पत्तूरं गन्धद्रव्यम् । धुवो द्विरुक्तस्तोऽन्तो ह्रस्वश्च । धुत्तूर उन्मत्तकः । दधातेर्धत्तूर इत्यन्ये । आदिग्रहणात् कस्तूरहारहूरादयो भवन्ति ॥ **कुगुपतिकथिकुथिकठिकुठिकुटिगडिगुडिमुदिमूलिदंशिभ्यः केरः ॥ ४३१ ॥** कुबेरः धनदः । गुबेरं युद्धम् । पतेरः पक्षी पवनश्च । कथेरः कथकः कुहकः शकुन्तश्च । कुथेरः खिडाकीसंभारः । कठेरः दरिद्रः । कुठिः सौत्रः । कुठेरः निःसृतसारः अर्जकश्च

कुटेरः शठः । गडेरः मेघः । प्रस्रवणशीलश्च । गुडेरः राजा पण्यं च । बालभक्ष्यम् । मुदेरः मूर्खः । मूलेरः वनस्पतिः । मूलेरं पण्यम् ।दशेरः सर्पः सारमेयः जनपदश्च॥शतेरादयः॥४३२॥शतेर इत्यादयः शब्दाः केरप्रत्ययान्ता निपात्यन्ते । शद्लृ शातने तश्च ।शतेरः वायुः तुषारश्च ।आदिग्रहणात् गृधेरशृङ्गवेरनालिकेरादयो भवन्ति॥कठिचकिसहिभ्यः ओरः ॥४३३॥कठोरः अमृदुः चिरंतनश्च । चकोरः पक्षिविशेषः पर्वतविशेषश्च सहोरः विष्णुः पर्वतश्च॥कोरचोरमोरकिशोर-घोरहोरादोरादयः॥४३४॥ कोर इत्यादयः शब्दा ओरप्रत्ययान्ता निपात्यन्ते ।कायतेश्चरतेम्रियतेश्च डि । कोरः बालपुष्पम् । चोरः तस्करः । मोरः मयूरः । कृशेरिच्चोपान्त्यस्य । किशोरः तरुणः बालाश्वश्च । हन्तेर्डित् घश्च । घोरं कष्टम् हृग् हरणे । होरा निमित्तवादिनां चक्ररेखा । डु दांग्क् दाने, दोंच् छेदने वा दोरः कटिसूत्रं तन्तुगुणश्च । आदिग्रहणादन्येऽपि ॥ किशृशृभ्यः करः ॥ ४३५ ॥ किः सौत्रः । केकरः वक्रदृष्टिः । शर्करा मत्स्यण्डिकादिः कर्कशः क्षुद्र-पाषाणावयवश्च वर्करः छागशिशुः ॥ सूपुषिभ्यां कित् ॥ ४३६ ॥ आभ्यां कित् करः प्रत्ययो भवति । षूत् प्रेरणे । सूकरः वराहः । पुष् पुष्टौ । पुष्करं पद्मं तूर्यमुखं हस्तिहस्ताग्रम् आकाशं मुरजः तीर्थनाम च ॥ अनिकाभ्यां तरः ॥ ॥ ४३७ ॥ अनक् प्राणने । अन्तरं बहिर्योगोपसंव्यानयोः छिद्रमध्यविरहविशेषेषु च । कैं शब्दे । कातरः भीरुः ॥ इण्पूभ्यां कित् ॥ ४३८ ॥ आभ्यां कित् तरः प्रत्ययो भवति । इणक् गतौ । इतरः निर्दिष्टप्रतियोगी । पूग्श् पवने पूतरः जलजन्तुः ॥ मीज्यजिमामद्यशौवसिकिभ्यः सरः ॥ ४३९ ॥ मेसरः वर्णविशेषः । जेसरः शूरः । वेसरः अश्वतरः । वेसृग् गतावित्यस्य वा जठरेत्यादिनिपातनादरे रूपम् । मासरः आयामः।मत्सरः क्रोधविशेषः । अक्षरं वर्णः मोक्षपदम् आकाशं च ।अक्षेर्वा अरे रूपम् ।वत्सरः संवत्सरः परिवत्सरः अनुसंवत्सरः अनुवत्सरः विवत्सरः उद्वत्सरः वर्षाभिधानानि । इडा मानेन वसन्त्यत्र कालावयवा इति इड्संवत्सरः,इडया मानेन वसन्त्यत्रेति इडावत्सरः वर्षविशेषा-

भिधाने, परिवत्सरादीन्यपि वर्षविशेषाभिधानानीत्येके । कि इत्यदादौ स्मरन्ति । केसरः सिंहसटः पुष्पावयवः बकुलश्च । बाहुलकान्न षत्वम् ॥ कृधूतन्यृषिभ्यः कित् ॥ ४४० ॥ एभ्यः कित् सरः प्रत्ययो भवति । डु कृंग् करणे कृसरः कृसरा वा विलेपिकाविशेषः वर्णविशेषश्च । धूत् विधूनने । धूसरः भिन्नवर्णः वायुः धान्यविशेषश्च । तनूयी विस्तारे । तसरः कौशेयसूत्रम् । ऋषैत् गतौ । ऋक्षरः कण्टकः ऋत्विक् च । ऋक्षरा तोयधारा ॥ कृगृशृदृवृग्चतिखटिकटिनिषदिभ्यो वरट् ॥ ४४१ ॥ कृत् विक्षेपे । कर्वरः व्याघ्रः विष्किरः अञ्जलिश्च । कर्वरी भूमिः शिवा च । गृत् निगरणे । गर्वरः अहंकारः महिषश्च । गर्वरी महिषी संध्या च । शृश् हिंसायाम् । शर्वरः सायाह्नः रुद्रः हिंस्रश्च । शर्वरं तमः अन्नं च । शर्वरी रात्रिः । दृश् विदारणे । दर्वरं वज्रम् । दर्वरी सेवा । वृगट् वरटे । वर्वरः कामः चन्दनं केशविशेषः लुब्धकश्च । वर्वरी नदी भार्या च । चतेग् याचने । चत्वरं चतुष्पथमरण्यं च । चत्वरी रथ्या देवता वेदिश्च । खट काङ्क्षे । खट्वरं रससंकीर्णशाकपाकः । कटे वर्षावरणयोः । कट्वरः व्यालाश्वः । कट्वरी दधिविकारः । षद्लृ विशरणादौ निपूर्वः । निषद्वरः कर्दमः वह्निः कर्मकरः कन्दर्पः इन्द्रश्च । निषद्वरमासनम् । निषद्वरी प्रपा रात्रिः प्रमदा इन्द्राणी च ॥ अश्नोतेरीच्चादेः ॥ ४४२ ॥ अशौटि व्याप्तावित्यस्माद्वरट् प्रत्यय ईकारश्चादेर्भवति । ईश्वरः विभुः । ईश्वरी स्त्री नीमीकुतुचेर्दीर्घश्च ॥ ४४३ ॥ एभ्यो वरट् प्रत्ययो दीर्घश्चैषां भवति । णींग् प्रापणे । नीवरः पुरुषकारः । मींग्श् हिंसायाम् । मीवरः हिंस्रः समुद्रश्च । कुंङ् शब्दे । कूवरः रथावयवः । तुंक् वृत्त्यादिषु । तूवरः मन्दश्मश्रुः अजननीकश्च । चिग्ट् चयने । चीवरं मुनिजनवासः निःसारं कन्था च ॥ तीवरधीवरपीवरछित्वरछत्वरगह्वरोपह्वरसंयद्वरोदुम्बरादयः ॥ ४४४ ॥ एते वरट् प्रत्ययान्ता निपात्यन्ते । तिम्यतेस्ती च, तीवतेर्वाऽरे तीवरं जलं व्यञ्जनं च । ध्यायतेर्धी च । धीवरः कैवर्तः । प्यायः प्यैङो वा पी च पीवतेर्वाऽरः । पीवरः मांसलः । छिनत्तेस्तः किच्च । छित्वरः

शठः जर्जरः पिटकश्च । छादेर्णिलुकि ह्रस्वश्च । छत्वरः निर्भत्सकः निकुञ्जश्च । छत्वरं कुड्यहीनं गृहम् शयनप्रच्छदः छदिश्च । गुहेरुच्चोतः । गह्वरं गहनं महाबिलं भयानकं प्रत्यन्तदेशश्च । उपपूर्वात् ह्वो वादेर्लुक् च । उपह्वरं संधिः समीपं रहः स्थानं च । समपूर्वाद्यमेर्दश्च । संयद्वरः रणः संयमी नृपश्च । उन्देः किदुम्चान्तः । उदुम्बरः वृक्षविशेषः । आदिग्रहणात् उम्बरशम्बरादयो भवन्ति ॥ कडेरेवराङ्करौ ॥ ४४५ ॥ कडत् मदे इत्यस्मात् एवर अङ्कर इति प्रत्ययौ भवतः । कडेवरं मृतशरीरम् । लत्वे, कलेवरम् । कडङ्करः वनस्पतिः ॥ त्रट् ॥४४६॥ सर्वधातुभ्यस्त्रट् प्रत्ययो भवति । छादयतीति छत्रम् छत्री वा घर्मवारणम् । पातीति पात्रमूर्जितगुणाधारः साध्वादिः । पात्री भाजनम् । स्नायतेः स्नात्रं स्नानम् । राजते इति राष्ट्रं देशः । शिष्यतेऽनेन शास्त्रं ग्रन्थः । असूच् क्षेपणे । अस्त्रं धनुः ॥ जिभृसृभ्रस्जिगमिनमिनश्यसिहनिविषेर्वृद्धिश्च ॥ ४४७ ॥ एभ्यस्त्रट् प्रत्ययो वृद्धिश्चैषां भवति । जि अभिभवे । जैत्रः जयनशीलः । जैत्रं द्यूतम् । डु डु भृंगृक् पोषणे च । भात्रं पोषः यश्च भृतिं गृहीत्वा वहति । सृं गतौ । सात्रः आलयः । भ्रस्जीत् पाके । भ्राष्ट्रम् अम्बरीषम् । गम्लृं गतौ । गान्त्रं मनः शरीरं लोकश्च । णमं प्रह्वत्वे । नान्त्रं शिरः शाखा वैचित्र्यं च । नशौच् अदर्शने । नशोधुटीति नोऽन्तः । नांष्ट्राः यातुधानाः । अश्नोतेरश्नातेर्वा, आष्ट्रम् आकाशः रश्मिश्च । हनंक् हिंसागत्योः । हान्त्रं रक्षः युद्धं वधश्च । विष्लृंकी व्याप्तौ । वैष्ट्रः विष्णुः वायुश्च । वैष्ट्रं यकृत् त्रिदिवं वेश्म च ॥ दिवेर्द्यौ च ॥ ४४८ ॥ दीव्यतेस्त्रट् प्रत्ययो द्यौ चास्यादेशो भवति । द्यौत्रं त्रिदिवं ज्योतिः विमानं प्रमाणं प्रतोदश्च ॥ सूमूखन्युषिभ्यः कित् ॥ ४४९ ॥ एभ्यः कित् त्रट् प्रत्ययो भवति । षूत् प्रेरणे । सूत्रं तन्तुः शास्त्रं च । मूङ् बन्धने । मूत्रं प्रस्रावः खनूग् अवदारणे । खात्रं कूर्दालः तडाकं ग्रामाधानमृत् चौरकृतं च छिद्रम् । उषू दाहे । उष्ट्रः क्रमेलकः ॥ स्त्री ॥ ४५० ॥ स्यतेः सूतेः स्त्यायतेस्तृणातेर्वा त्रट् स्या-

त डिच्च । स्त्री योषित् ॥ हुयामाश्रुवसिभसिगुधीपचिवचिधृयम्यमिमनितनिसदिछादिक्षिक्षदिलुपिपतिधूभ्यस्त्रः ॥ ४५१ ॥ होत्रं हवनं, होत्रा ऋचः । यात्रा प्रस्थानं यापनम् उत्सवश्च । मात्रा प्रमाणं कालविशेषः स्तोकः गणना च । श्रोत्रं कर्णः । वस्त्रं वासः । भसिं जुहोत्यादौ स्मरन्ति । भस्त्रा चर्ममयमावपनम् उदरं च । गोत्रः पर्वतः । गोत्रा पृथ्वी । गोत्रम् अन्ववायः वेत्रं वीरुद्विशेषः । पक्त्रं पिठरं गार्हपत्यं च । वक्त्रम् आस्यम् छन्दोजातिश्च । धर्त्रः धर्मः वृक्षः रविश्च । धर्त्रं नभः गृहसूत्रम् च । धर्त्री द्यौः । यन्त्रं शरीरसंधानम् अरघट्टादि च । अन्त्रं पुरीतत् । मन्त्रः छन्दः तन्त्रं प्रसारितास्तन्तवः शास्त्रं समूहः कुटुम्बं च । सत्रं यज्ञः सदः दानं छद्म यागविशेषश्च । छादयतीति छात्रः शिक्षकः ॥ क्षेत्रं कर्षणभूमिः भार्या शरीरमाकाशं च । क्षद संवरणे सौत्रः । क्षत्रं राजबीजम् । लोप्त्रम् अपहृतं द्रव्यम् । पत्रं पर्णं यानं च । धोत्रं रज्जुः ॥ श्वितेर्वश्च मो वा ॥ ४५२ ॥ श्विताङ् वर्णे इत्यस्मात्त्रः प्रत्ययो वकारस्य च मकारो वा भवति श्मेत्रं श्वेत्रं च रोगौ ॥ गमेरा च ॥ ४५३ ॥ गम्लृ गतावित्यस्मात्त्रः प्रत्यय आकारश्चान्तादेशो भवति । गात्रं शरीरम् । गात्रा खट्वावयवः ॥ चिमिदिशंसिभ्यः कित् ॥ ४५४ ॥ एभ्यः कित्त्रः प्रत्ययो भवति । चिंगट् चयने । चित्रम् आश्चर्यम् आलेख्यं वर्णश्च ॥ ञि मिदांच् स्नेहने । मित्रं सुहृत् । अमित्रः शत्रुः । मित्रः सूर्यः । शंसू स्तुतौ च । शस्त्रं स्तोत्रमायुधं च ॥ पुत्रादयः ॥ ४५५ ॥ पुत्र इत्यादयः शब्दास्त्रप्रत्ययान्ता निपात्यन्ते । पुनाति पवते व पितृपूतिमिति पुत्रः सुतः । यदाहुः ‘ पूतीति नरकस्याख्या दुःखं च नरकं विदुः ’ । पुन्नाम्नो नरकात् त्रायत इति व्युत्पत्तिस्तु संज्ञाशब्दानामनेकधा व्याख्यानं लक्षयति । आदिग्रहणादन्येऽपि ॥ वृग्नक्षिपचिवच्यमिनमिवमिवपिबधियजिपतिकडिभ्योऽत्रः ॥ ४५६ ॥ एभ्योऽत्रः प्रत्ययो भवति । वृग्ट् वरणे । वरत्रा चर्मरज्जुः । णक्ष गतौ । नक्षत्रम् अश्विन्यादि । डु पचींष् पाके । पचत्रं रन्धनस्थाली । वचंक् भाषणे । वचत्रं वचनम् । अम गतौ अमत्रं भाज-

नम । णमं प्रह्वत्वे । नमत्रं कर्मारोपकरणम् । टु वमू उद्गिरणे । वमत्रं प्रक्षेपः । डु वपीं बीजसंताने । वपत्रं क्षेत्रम् । वधि बन्धने । वधत्रम् आयुधः वस्त्रं विषं शूरश्च । यजीं देवपूजादौ । यजत्रः यज्वा । यजत्रमग्निहोत्रम् । पत्लृ गतौ । पतत्रं बर्हं वाहनं व्योम च । कडत् मदे । कडत्रं दाराः । कलवे, कलत्रं दारा जघनं च ॥ सोर्विदः कित् ॥ ४५७ ॥ सुपूर्वाद् विदः किदत्रः प्रत्ययो भवति । सुष्ठु वेत्ति विन्दति विद्यते वा सुविदत्रं कुटुम्बं धनं मङ्गलं च ॥ कृतेः कृन्त् च ॥ ४५८ ॥ कृतैच् छेदने इत्यस्मादत्रः प्रत्ययो भवति अस्य च कृन्तादेशः । कृन्तत्रः मशकः । कृन्तत्रं छेदनं लाङ्गलाग्रं च ॥ बन्धिवहिकटयश्यादिभ्य इत्रः ॥ ४५९ ॥ बन्धंश् बन्धने । बन्धित्रं मन्थः । वहीं प्रापणे । वहित्रं वाहनं वहनं च । कटे वर्षावरणयोः । कटित्रं लेख्यचर्म । अशौटि व्याप्तौअशश् भोजने वा । अशित्रं रश्मिः हविः अग्निः अन्नपानं च । आदिग्रहणात् लुनातेः, लवित्रम् कर्मद्रव्यम् । पुनातेः, पवित्रं मङ्गल्यम् । भटतेः, भटित्रं शूले पक्वमांसम् । कडतेः, कडित्रं कटित्रमेव । अमतेः, अमित्रः रिपुः इत्यादि ॥ भूगॄवदिचरिभ्यो णित् ॥ ४६० ॥ एभ्यो णिदित्रः प्रत्ययो भवति । भू सत्तायाम् । भावित्रं त्रैलोक्यं निधानं भद्रं च । गॄत् निगरणे । गारित्रं नभः अन्नपानम् आश्चर्यं च । वद व्यक्तायां वाचि । वादित्रम् आतोद्यम् । चर भक्षणे । च । चारित्रं वृत्तं स्थित्यभेदश्च ॥ तनितॄलापात्रादिभ्य उत्रः ॥ ४६१ ॥ तनुत्रं कवचम् । तरुत्रं प्लवः घासहारी च । लोत्रम् अपहृतद्रव्यम् । पोत्रं हलसूकरयोर्मुखम् त्रोत्रमभयक्रिया । आदिग्रहणात् वृणोतेः, वरुत्रम् अभिप्रेतमित्यादयः ॥ शामाश्याशाक्यश्व्यमिभ्यो लः ॥४६२॥ शाला सभा माला स्रक् श्यालः पत्नीभ्राता । शक्लः मनोज्ञदर्शनः मधुरवाक् शक्तश्च । अम्लः अम्लश्च रसः ॥ शुकशीमूभ्यः कित् ॥ ४६३ ॥ लः प्रत्ययो भवति शुक्लः सितो वर्णः । शीलं स्वभावः व्रतं धर्मः समाधिश्च मूलम् वृक्षपादावयवः आदिः हेतुश्च ॥ भिल्लाच्छभल्लसौविदल्लादयः ॥ भिल्लादयः शब्दाः किल्लप्रत्ययान्ता

निपात्यन्ते । भिदेर्लश्च । भिल्लः अन्त्यजातिः । अच्छपूर्वात् भलेः । अच्छभल्लः ऋक्षः । सुपूर्वाद्विदेरलोऽन्तः सोश्च वृद्धिः । सौविदल्लः कञ्चुकी । आदिग्रहणादल्लपल्लीरल्लादयोऽपि भवन्ति ॥ **मृदिकन्दिकुण्डिमण्डिमङ्गिपटिपाटिशकिकेवृदेवृकमियमिशलिकलिपलिगुध्वञ्चिचञ्चितपिबहिदिहिकुहितूसपिशितुसिकुस्यनिद्रमेरलः ॥** ॥ ४६५ ॥ मर्दलः मुरजः । कन्दलः प्ररोहः कुण्डलं कर्णाभरणम् । मण्डलं देशः परिवारश्च । मङ्गलं शुभम् पटलं छदिः समूहः आवपनं नेत्ररोगश्च । ण्यन्तात्, पाटलः वर्णः । शकलं भित्तमसारं च । केवलं परिपूर्णं ज्ञानम् असहायं च । देवलः ऋषिः देवज्ञातः क्रीडनश्च । कमलं पद्मम् । णिङि कामलो नेत्ररोगः यमलं युग्मम् । शललं शेधाङ्गरुहशङ्कुः । कललं गर्भप्रथमावस्था पललम् भृष्टतिलातसीचूर्णम् । गवलः महिषः धवलः श्वेतः । अञ्चलः वस्त्रान्तः । चञ्चलः अस्थिरः चपलः स एव बहलं सान्द्रम् । देहली द्वाराधः पट्टः । कोहलः भरतपुत्रः । बाहुलकाद्गुणः । तरलः अधीरः हारमध्यमणिश्च, सरलः अकुटिलः वृक्षविशेषश्च । पेशलः मनोज्ञः तोसलाः जनपदः । कोसलाः जनपदः । अनलः अग्निः । द्रमलं जलम् ॥ **नहिलङ्केर्दीर्घश्च** ॥४६६॥ आभ्यामलः प्रत्ययोऽनयोश्च दीर्घो भवति । नाहलः म्लेच्छः । लाङ्गलं हलम् ॥ **ऋजनेर्गोऽन्तश्च** ॥ ४६७ ॥ आभ्यामलः प्रत्ययो गकारश्चान्तो भवति । ऋंङ् गतौ । अर्गला परिघः । जनैचि प्रादुर्भावे । जङ्गलं निर्जलो देशः ॥ **तृपिवपिकुपिकुशिकुटिवृषिमुसिभ्यः-कित्** ॥ ४६८ ॥ एभ्यः किदलः प्रत्ययो भवति । तृपला लता । तृपलं शुष्कपर्णम् शुष्कतृणं च । उपलः पाषाणः । कुपलः प्रवालः । कुशलः मेधावी । कुशलम् आरोग्यम् । कुटलः ऋषिः । वृषलः दासजातिः । मुसलम् अवहननम् ॥ **कोर्वा** ॥ ४६९ ॥ कुंङ् शब्द इत्यस्मादलः प्रत्ययः स च किद्वा भवति । कुवलं बदरम् । कुवली क्षुद्रबदरी । कवलः ग्रासः ॥ **शमेर्ब च वा** ॥ ४७० शमूच् उपशम इत्यस्मात् अलः प्रत्ययो मकारस्य च बकारो वा भवति । शबलः

कल्माषः । शमलं पुरीषम् दुरितं च ॥ छो डग्गादिर्वा ॥४७१॥ छोंच् छेदने इत्यस्मात्किदलः प्रत्ययः स च डगा-दिर्गादिश्च वा भवति । छगल छागः । छागलः ऋषिः । छलं वचनविघातोऽर्थविकल्पोपपत्त्या ॥ मृजिखन्धाहनि-भ्यो डित् ॥ ४७२ ॥ एभ्यो डिदलः प्रत्ययो भवति । मलं बाह्यं रजः अन्तर्दोषश्च । खलः दुर्जनः निष्पीडितरसं पिण्याकादि । खलं सस्यग्रहणभूमिः । आहलः विषाणं नखरश्च ॥ स्थो वा ॥ ४७३ ॥ तिष्ठतेरलः प्रत्ययः स च डिद्वा भवति । स्थलं प्रदेशविशेषः । स्थालं भाजनम् ॥ मुरलोरलविरलकेरलकपिञ्जलकज्जलेज्जलकोमलभृ-मलसिंहलकाहलशूकलपाकलयुगलभगलविदलकुन्तलोत्पलादयः ॥ ४७४ ॥ एतेऽलप्रत्ययान्ता निपात्यन्ते । मुर्व्युर्व्योर्वलोपः किच्च । मुरलाः जनपदः । उरलः उत्कटः । विपूर्वाद्रमेर्डिच्च । विरलः असंहतः । किरः केर् च । केरलाः जनपदः । कम्पेरिञोऽन्तो नलोपश्च । कपिञ्जलः गौरतित्तिरिः । कषीषोर्जोऽन्तो जश्च । कज्जलं मषी । इज्ज-लः वृक्षविशेषः । कमेरत ओच्च । कोमलं मृदु । भ्रमेर्भृम च । भृमलः वायुः कृमिजातिश्च । भृमलं चक्रम् । हिंसेराद्य-न्तविपर्ययश्च । सिंहलाः जनपदः । कणेर्हो दीर्घश्च । काहलः अव्यक्तवाक् । काहला वाद्यविशेषः । शकेरूच्चास्य । शू-कलः अश्वाधमः । पचेः पाक् च । पाकलः हस्तिज्वरः । युजेः कित् ग च । युगलं युग्मम् । भातेर्गोऽन्तो ह्रस्वश्च । भ-गलः मुनिः । विन्देर्नलोपश्च । विदलं वेणुदलम् । कनेरत उत् तोऽन्तश्च । कुन्तलाः जनपदः केशाश्च। उत्पूर्वात् पिबतेर्ह्र-स्वश्च उत्पलं पद्मम् । आदिग्रहणात् सुवर्चलामुद्गलपुद्गलादयो भवन्ति॥ऋकृमृवृतनितमिचषिचपिकपिकोलिपलि वलिपञ्चिमङ्गिगण्डिमण्डिचण्डितण्डिपिण्डिनन्दिनदिशाकिभ्य आलः ॥४७५॥ अरालं वक्रम् । करालम् उच्चम् । मरालः हंसः महांश्च । वरालः वदान्यः तनालं जलाशयः। तमालः वृक्षः व्यालश्च । चषालं यूपशिरसि द्रव्यम् । चपालं यज्ञद्रव्यम् । कपिः सौत्रः । कपालं घटाद्यवयवः शिरोऽस्थि च । कीलालं मद्यं जलमसृक् च । पलालम् अकणो ब्रीह्या-

दिः । बलालः वायुः । पञ्चालः ऋषिः राजा च । पञ्चाला जनपदः । मङ्गालः देशः । गण्डालः मत्तहस्ती मण्डाकः ऋषिः राजा च ॥ चण्डालः श्वपचः अकृतज्ञमकार्यज्ञं दीर्घरोषमनार्जवम् । चतुरो विद्धि चडालान् जन्मना चेति पञ्चमम् ॥ १ ॥ तण्डालः क्षुपः पिण्डालः कन्दजातिः । नन्दालः राजा नदालः नादवान् । शकालाः जनपदः मूर्खध्वनी च ॥ कूलिपिलिविशिबिडिमृडिकुणिपीप्रीभ्यः कित् ॥ ४७६ ॥ कुलालः कुम्भकारः । पिलालं श्लिष्टम् । विशालं विस्तीर्णम् । विडालः मार्जारः । लत्वे, बिलालः स एव । मृणालं बिसम् । कुणालः कृतमालः कटविशेषश्च । कुणालं नगरं कठिनं च । पियालः वृक्षः, पियालं शाकं वीरुच्च । प्रियालः पियालः ॥ भजेः कगौ च ॥ ४७७ ॥ भर्जी सेवायामित्यस्मात् किदालः प्रत्ययः कगौ चान्तादेशौ भवतः । भकालं भगालम् उभयं कपालम् ॥ सर्तेर्गोऽन्तश्च ॥ ४७८ ॥ सृं गतावित्यस्मात् किदालः प्रत्ययो भवति गश्चान्तः । सृगालः क्रोष्टा ॥ पतिकृलूभ्यो णित् ॥ ४७९ एभ्यो णिदालः प्रत्ययो भवति । पातालं रसातलम् । कारालं लेपद्रव्यम् लावालः उद्दन्तः ॥ चात्वालकङ्कालहिन्तालवेतालजम्बालशब्दालममाप्तालादयः ॥ ४८० ॥ एते आलप्रत्ययान्ता निपात्यन्ते । चतेर्वोऽन्तो दीर्घश्च । चात्वालः यज्ञगर्तः । कचेः स्वरान्नोऽन्तः कश्च । कङ्कालः कलेवरम् । हिंसेस्त च । हिन्तालः वृक्षविशेषः । वियस्तोऽन्तो गुणश्च । वेतालः रजनीचरविशेषः । जनेर्बोऽन्तश्च । जम्बालः कर्दमः शैवलं च । शमेर्ऋषेर्वा शब्दभावश्च । शब्दालः शब्दनशीलः । ममेर्वलोपो माप्तश्चान्तः । ममाप्तालः मतिः स्नेहः पुत्रादिषु स्नेहबन्धनं च । आदिशब्दाच्चक्रवालकरवालाळवालादयो भवन्ति ॥ कल्यनिमहिद्रमिजटिभटिकुटिचण्डिशण्डितुण्डिपिण्डिभूकुकिभ्य इलः ॥ ४८१ ॥ कलिलं गहनं पापम् आत्माधिष्ठितं च शुक्रार्तवम् । अनिलः वायुः महिला स्त्री । द्रमिलाः त्रैराज्यवासिनः । जटिलः जटावान् भटिलः श्वा सेवकश्च । कुटिलं वक्रम् । चण्डिलः श्वा क्रोधनः नापितश्च । शण्डिलः ऋषिः । तुण्डि-

लः वाग्जाली । पिण्डिलः मेघः हिंस्रः हिमः गणकश्च । भविलः मुनिः समर्थः गृहं बहुनेता च । कोकिलः परभृतः ॥ भण्डेर्नलुक् च वा ॥ ४८२ ॥ भडुङ् परिभाषणे इत्यस्मात् । इलः प्रत्ययो नकारस्य च लुग्वा भवति । भडिलः ऋषिः पिशाचः शत्रुश्च । भण्डिलः श्वा दूतः ऋषिश्च ॥ गुपिमिथिधुभ्यः कित् ॥ ४८३ ॥ एभ्यः किदिलः प्रत्ययो भवति । गुपिलं गहनम् । मिथिला नगरी । धुविलः ऋषिः ॥ स्थण्डिलकपिलविचकिलादयः ॥ ४८४ ॥ स्थण्डिलादयः शब्दा इलप्रत्ययान्ता निपात्यन्ते । स्थलेः स्थण्ड् च । स्थण्डिलं व्रतिशयनवेदिका । कवेः प च । कपिलः वर्णः ऋषिश्च । विचेरकोऽन्तश्च । विचकिलः मल्लिकाविशेषः आदिग्रहणाद्गोभिलनिकुम्भिलादयो भवन्ति ॥ हृषिवृतिचटिपटिशकिशङ्कितण्डिमङ्ग्युत्कण्ठिभ्य उलः ॥ ४८५ ॥ हृषुलः हर्षवान् कामी मृगश्च । वर्तुलः वृत्तः । चटुलः चञ्चलः । पटुलः वाग्मी । शकुलः मत्स्यः शङ्कुला क्रीडनशङ्कुः बन्धनभाण्डम् आयुधं च । तण्डुलो निस्तुषो व्रीह्यादिः । मङ्गुलं न्यायापेतम् । उत्कण्ठुलः उत्कण्ठावान् । स्थावङ्किबंहिबिन्दिभ्यः किन्नलुक् च ॥ ४८६ ॥ एभ्यः किदुलः प्रत्ययो नकारस्य च लुग् भवति । ष्ठां गतिनिवृत्तौ स्थुलं पटकुटीविशेषः । वकुलः केसरः ऋषिश्च । बहुलं प्रचुरम् । बहुलः मासकः कृष्णपक्षश्च । बहुलाः कृत्तिकाः । बहुला गौः बिदुलः वेतसः ॥ कुमुलतुमुलनिचुलवञ्जुलमञ्जुलपृथुलविशंस्थुलाङ्गुलमुकुलशष्कुलादयः ॥ ४८७ ॥ एते उलप्रत्ययान्ता निपात्यन्ते । कमितम्योरत उच्च । कुमुलं कुसुमम् हिरण्यं च । कुमुलः शिशुः कान्तश्च । तुमुलं व्यामिश्रयुद्धम् संकुलं च । निजेः किच्चश्च । निचुलः वञ्जुलः । वजेः स्वरान्नोऽन्तश्च । वञ्जुलः निचुलः । मजिः सौत्रः । मञ्जुलं मनोज्ञम् । पथेः पृथ् च । पृथुलः विस्तीर्णः । निपूर्वात् शंसेस्थोऽन्तश्च । विशंस्थुलः व्यग्रः । अजेर्ग च । अङ्गुलम् अष्टयवप्रमाणम् । मुचेः कित् कश्च । मुकुलः अविकसितपुष्पम् । शकेः स्वरात् षोऽन्तश्च । शष्कुली भक्ष्यविशेषः कर्णावयवश्च । आदिग्रहणाल्लकुलवलगुला-

दयो भवन्ति ॥ **पिञ्जिमञ्जिकण्डिगण्डिबलिबधिवञ्चिभ्य ऊलः ॥ ४८८ ॥** पिञ्जूलः हस्तिबन्धनपाशः राशिः कुलपतिश्च । मञ्जिः सौत्रः । मंजूला मृदुभाषिणी । कुण्डूलः अशिष्टो जनः । गण्डूलः कृमिजातिः । बल्लूलः ऋषिः मेघः मासश्च । बधूलः हस्ती घातकः रसायनं तन्त्रकारश्च । वंचूलः हस्ती मत्स्यमारपक्षी च ॥ **तमेर्वोऽन्तो दीर्घस्तु वा ॥ ४८९ ॥** तमूच् काङ्क्षायामित्यस्मादूलः प्रत्ययो वोऽन्तश्च भवन्ति दीर्घस्तु वा ।ताम्बूलं तम्बूलम् उभयं पूगपत्रचूर्णसंयोगः ॥ **कुलिपुलिकुशिभ्यः कित् ॥ ४९० ॥** एभ्यः ऊलः प्रत्ययः स च किद् भवति । कुलूलः कृमिजातिः । पुलूलः वृक्षविशेषः कुशूलः कोष्ठः ॥ **दुकूलकुकूलबब्बूललाङ्गूलशार्दूलादयः ॥ ४९१ ॥** दुकूलादयः शब्दा ऊलप्रत्ययान्ता निपात्यन्ते । दुक्वोः कोऽन्तश्च । दुकूलं क्षौमं वासः । कुकूलं कारीषोऽग्निः । बभेबोऽन्तो बश्च । बब्बूलः वृक्षविशेषः । लङ्गेर्दीर्घश्च । लाङ्गूलं बालधिः । भृणातेर्दोऽन्तो वृद्धिश्च । शार्दूलः व्याघ्रः । आदिग्रहणात् मार्जूलकंचूलादयो भवन्ति ॥ **महेरेलः ॥ ४९२ ॥** मह पूजायामित्यस्मादेलः प्रत्ययो भवति । महेला स्त्री ॥ **कटिपटिकण्डिगण्डिशकिकपिचहिभ्य ओलः ॥ ४९३ ॥** कटोलः कटविशेषः वादित्रविशेषश्च । कटोला ओषधिः । पटोला वल्लीविशेषः ।कण्डोलः विदलभाजनविशेषः । गण्डोलः कृमिविशेषः । शकोलः शवरः । कपिः सौत्रः । कपोलः गण्डः । चहोलः उपद्रवः ॥ **ग्रह्यादभ्यः कित् ॥ ४९४ ॥** ग्रहेराकारान्तेभ्यश्च धातुभ्यः किदोलः प्रत्ययो भवति । ग्रहीश् उपादाने । गृहोलः बालिशः । कायतेः, कोलः बदरी वराहश्च । गायतेः, गोलः वृत्ताकृतिः । गोला गोदावरी बालरमणकाष्ठं च । पातेः, पोला तालाख्यं कपटबन्धनं परिखा च । लातेः, लोलः चपलः । ददातेर्दयतेर्द्यतेर्वा दोला प्रेङ्खणम् ॥ **पिञ्छोलकल्लोलकक्कोलमक्कोलादयः ॥४९५॥** पिञ्छोलादयःशब्दा ओलप्रत्ययान्ता निपात्यन्ते । पीडेः पिञ्छश्च । पिञ्छोलः वादित्रविशेषः । कलेर्लोऽन्तश्च । कल्लोलः ऊर्मिः । कचिमच्योः कादिः । कक्कोली लता-

विशेषः । मक्कोलः सुधाविशेषः । आदिग्रहणादन्येऽपि ॥ वलिपुषेः कलक् ॥ ४९६ ॥ आभ्यां कित् कलः प्रत्ययो भवति । वलि संवरणे । वल्कलं तरुत्वक् । पुषु पुष्टौ । पुष्कलं समग्रं युद्धं शोभनं हिरण्यं धान्यं च ॥ मिगः खलश्चैच्च ॥ ४९७ ॥ डु मिगृट् प्रक्षेपणे इत्यस्मात् खलश्चकारात् कलश्च प्रत्यय एकारश्चान्तादेशो भवति । मेखला गिरिनितम्बः रशना च । मेकलः नर्मदाप्रभवोऽद्रिः । मिग एत्ववचनमात्वबाधनार्थम् ॥ शृ नोऽन्तो ह्रस्वश्च ॥ ४९८ ॥ शॄश् हिंसायामित्यस्मात् खलः प्रत्ययो नकारोऽन्तो ह्रस्वश्च भवति शृङ्खला लोहरज्जुः । शृङ्खलः शृङ्खलं वा ॥ शमिकमिपलिभ्यो बलः ॥ ४९९ ॥ एभ्यो बलः प्रत्ययो भवति । शमूच् उपशमे । शम्बलं पाथेयम् । कमूङ् कान्तौ । कम्बलः ऊर्णापटः । पल गतौ । पल्वलम् अकृत्रिमोदकस्थानविशेषः ॥ तुल्वलेल्वलादयः ॥ ५०० ॥ तुल्वलादयः शब्दा वलप्रत्ययान्ता निपात्यन्ते । तुलील्योर्णिलुग्गुणाभावश्च । तुल्वलः ऋषिः, यस्य तौल्वलिः पुत्रः । इल्वलः असुरो योऽगस्त्येन जग्धः मत्स्यः यूपश्च । इल्वलाः तिस्रो मृगशिरः शिरस्ताराः । आदिग्रहणात् शाल्वलादयो भवति ॥ शीङस्तलक्पालबालण्बलण्वलाः ॥ शीङ् स्वप्ने इत्यस्मात्तलक्पालबालण्वलण्वल इत्येते प्रत्यया भवन्ति । शीतलमनुष्णम् । शेपालम् । जपादित्वात् पस्य वत्वे, शेवालम् । शैवालम् शैवलम् शेवलम् पञ्चकमपि जलमलवाचि ॥ रुचिकुटिकुषिकशिशालिद्रुभ्यो मलक् ॥ ५०२ ॥ रुक्मलं सुवर्णम् । न्यङ्क्वादित्वात् कत्वम् । कुड्मलं मुकुलम् । कुष्मलं तदेव बिलं च । कश्मलं मलिनम् । लत्वे, शाल्मलः वृक्षविशेषः । द्रुमलं जलं वनं च ॥ कुशिकमिभ्यां कुल्कुमौ च ॥ ५०३ ॥ आभ्याममलक् प्रत्ययो भवति अनयोश्च यथासंख्यं कुल कुम इत्यादेशौ च कुल्मलं छेदनम् । कुम्मलं पद्मम् ॥ पतेः सलः ॥ ॥ ५०४ ॥ पत्ल गतावित्यस्मात् सलः प्रत्ययो भवति । पत्सलः प्रहारः गोमान् आहारश्च ॥ लटिखटिखलिनलि-

कण्वशौस्थ्यृकृगृदृपृशपिङ्याशालापदिसीन्हणृभ्यो वः ॥ ५०५ ॥ लट्वा क्षुद्रचटका कुसुम्भं च । खट्वा शयनयन्त्रम् । खल्वं निम्नं खलीनं च । खल्वा दृतिः । नल्वः भूमानविशेषः । कण्वः ऋषिः । कण्वं पापम् । अश्वः तुरगः सर्वः शम्भुः । सर्वादिश्च कृत्स्नार्थे । शर्वः शम्भुः । कर्वः आखुः समुद्रः निष्पत्तिक्षेत्रं च । गर्वः अहंकारः । दर्वाः जनपदः । पर्वः रुद्रः काण्डं च । शप्वः आक्रोशः । श्यावः वर्णः । शावः तिर्यग्बालः । लावः पक्षिजातिः । पह्वः रथः वायुः भूर्लोकश्च । ह्रस्वः लघुः । एवः केवलः । एवेत्यवधारणे निपातश्च ॥ शीङापो ह्रस्वश्च वा ॥५०६॥ आभ्यां वः प्रत्ययो ह्रस्वश्च वा भवति । शीङ्क् स्वप्ने । शिवं क्षेमम् सुखं मोक्षपदं च । शिवा हरीतकी । शेवं धनम् । शेवः अजगरः सुखकृच्च । शेवा प्रचला निद्राविशेषः मेढ्रश्च । आप्लृंट् व्याप्तौ । अप्वा देवयुधम् । आप्वा वायुः॥ उर्देर्ध च ॥५०७॥ उर्दि मानक्रीडयोश्चेत्यस्माद्वः प्रत्ययो धकारश्चान्तादेशो भवति । ऊर्ध्वः उद्धर्मा । ऊर्ध्वमुपरि । ऊर्ध्वं परस्तात् ॥ गन्धेर्वान्तः ॥ ५०८ ॥ गन्धिण् अर्दने इत्यस्माद्वः प्रत्ययोऽर् चान्तो भवति । गन्धर्वः गाथकः देवविशेषश्च ॥ लषेलिंष् च वा॥५०९॥ लषी कान्तौ इत्यस्माद्वः प्रत्ययोऽस्य च लिष् इत्यादेशो वा भवति । लिष्वः लम्पटः कान्तः दयितश्च । लष्वः अपत्यम् ऋषिस्थानं च ॥सलेर्णिद्वा ॥५१०॥ सल गतावित्यस्माद्वः प्रत्ययः स च णिद्वा भवति । साल्वाः सल्वाश्च जनपदः क्षत्रियाश्च ॥ निघृषीष्यृषिश्रुप्रुषिकिणिविशिविल्यविपृभ्यः कित् ॥ ५११ ॥ एभ्यः किद्वः प्रत्ययो भवति । निघृष्वः अनुकूलः सुवर्णनिकषोपलः वायुः क्षुरश्च । इष्वः अभिलषितः आचार्यश्च । इष्वा अपत्यसंततिः । ऋषैत् गतौ । ऋष्वः रिपुःहिंस्रश्च । रिषेर्व्यञ्जनादेः केचिदिच्छन्ति । रिष्वः। स्रुवः हवनभाण्डम् । प्रुष्वा निवृत्तिः जललवश्च । किणः सौत्रः । किण्वं सुराबीजम् । विश्वं जगत् सर्वादि च । बिल्वः मालूरः । अवेत्यव्ययम् । पूर्वः दिक्कालनिमित्तः ॥ नञो भुवो डित् ॥ ५१२ ॥ नञ्पूर्वाद्भवतेर्डिद्वः प्रत्ययो भवति । अभ्वम् अद्भुतम् ॥ लिहेर्जिह च ॥

॥ ५१३ ॥ लिहींक् आस्वादने इत्यस्मात् वः प्रत्ययोऽस्य च जिह इत्यादेशो भवति । जिह्वा रसना ॥ **प्रह्वाह्वाय-ह्वास्वच्छेवाग्रीवामीवाम्वादयः** ॥ ५१४ ॥ प्रह्वादयः शब्दा वप्रत्ययान्ता निपात्यन्ते । प्रपूर्वस्य ह्वयतेर्वादेर्लोपो यततेर्वा ह्वादेशश्च । प्रह्वः प्रणतः । आह्वयतेराह च । आह्वा कण्ठः । यमेर्यंसेर्वा हश्च । यह्वा बुद्धिः । अस्यतेरलोपश्च । स्वः आत्मा आत्मीयं ज्ञातिः धनं च । छ्यतेश्छिदेर्वा छेभावश्च । छेवा उच्छित्तिः । ग्रन्थतेर्गिरतेर्वा ग्रीभावश्च । ग्रीवा । अमेरीच्चान्तो दीर्घश्च वा । अमीवाबुभुक्षा आमीवा व्याधिः ।मिनोतेर्दीर्घश्च ।मीवा मनः उदकं च। तदेतत्रयमपि तन्त्रेणावृत्त्या वा निर्दिष्टम् ।अवतेर्वलोपाभावश्च । अम्वा माता । आदिशब्दात् प्वादयो भवन्ति ॥ **वडिवटिपेलृचणिपणिपल्लिवल्ले-रवः** ॥ ५१५ ॥ वड आग्रहणे सौत्रः । वडवा अश्वा । वटवा सैव । पेलवं निःसारम् । चणवः अवरधान्यविशेषः । पणवः वाद्यजातिः । पल्लवः किसलयम् । वल्लवः गोपः ॥ **मणिवसेर्णित्** ॥ ५१६ ॥ आभ्यां णिदवः प्रत्ययो भवति । मण शब्दे । माणवः शिष्यः । वसं निवासे । वासवः शक्रः ॥ **मलेर्वा** ॥ ५१७ मलि धारणे इत्यस्मादवः प्रत्ययः स च णिद्वा भवति । मालवाः जनपदः । मलवः दानवः ॥ **कितिकुडिकुरिमुरिस्थाभ्यः कित्** ॥ ५१८ ॥ एभ्यः किदवः प्रत्ययो भवति । कित् निवासे । कितवः द्यूतकारः । कुडत् बाल्ये च । कुडवः मानम् । लत्वे, कुलवः स एव नालीद्वयं च । कुरत् शब्दे । कुरवः पुष्पवृक्षजातिः । मुरत् संवेष्टने । मुरवः मानविशेषः वाद्यजातिश्च । ष्ठां गतिनिवृत्तौ । स्थवः अजावृषः ॥ **कैरवभैरवमुतवकारण्डवादीनवादयः** ॥ ५१९ ॥ कैरवादयः शब्दा अवप्रत्ययान्ता निपात्यन्ते । कृभृगोः कैरभैरावादेशौ । कैरवं कुमुदम् । भैरवः भर्गः भयानकश्च । मिनोतेर्मुत् च । मुतवः मानविशेषः । कृगोऽण्डोऽन्तो वृद्धिश्च । कारण्डवः जलपक्षी । आङ्पूर्वाद्दीङो नोऽन्तश्च । आदीनवः दोषः । आदिग्रहणात् कोद्रवकोटवादयोऽपि भवन्ति ॥ **शृणातेराव**ः ॥ ५२० ॥ शृृ हिंसायामित्यस्मादावः प्रत्ययो भवति । शरावः

मल्लकः ॥ प्रथेरिवट् पृथ् च ॥ ५२१ ॥ प्रथिष् प्रख्याने इत्यस्मादिवट् प्रत्ययोऽस्य च पृथ् इत्यादेशो भवति । पृथिवी भूः ॥ पलिसचेरिवः ॥ ५२२ ॥ पलण् रक्षणे षचि सेवने इत्याभ्यामिवः प्रत्ययो भवति । पलिवः गोप्ता । सचिवः सहायः ॥ स्पृशेः श्वः पार् च ॥ ५२३ ॥ स्पृशंत् संस्पर्शे इत्यस्मात् श्वः प्रत्ययोऽस्य च पारित्यादेशो भवति । पार्श्वं स्वाङ्गम् समीपं च । पार्श्वः भगवांस्तीर्थंकरः ॥ कुडितुड्यडेरुवः ॥ ५२४ ॥ एभ्य उवः प्रत्ययो भवति । कुडत् बाल्ये च । कुडुवं प्रसृतहस्तमानम् । तुडत् तोडने । तुडुवम् अपनेयद्रव्यम् । अड उद्यमे । अडुवः प्लवः ॥ नीह्विण्ध्यैप्यापादामाभ्यस्त्वः ॥५२५॥नेत्वं द्यावापृथिव्यौ चन्द्रश्च ।होत्वं यजमानः समुद्रश्च ।एत्वम् गमनपरम् ।ध्यात्वं ब्राह्मणः प्यात्वं ब्राह्मणः समुद्रः नेत्रं च । पात्वम् पात्रम् । दात्वः आयुक्तः यज्वा यज्ञश्च ।मात्वम् प्रमेयद्रव्यम् ॥ कृजन्येधिपाभ्य इत्वः ॥५२६॥ एभ्य इत्वः प्रत्ययो भवति ।डु कृंग् करणे । करित्वः करणशीलः । जनैचि प्रादुर्भावे । जनित्वः लोकः मातापितरौ द्यावापृथिव्यौ च । जनित्वं कुलम् । एधि वृद्धौ एधित्वः अग्निः समुद्रः शैलश्च । पां पाने । पेत्वम् तप्तभूमिप्रदेशः अमृतं नेत्रं सुखं मानं च ॥पादावम्यमिभ्यः शः ॥५२७॥ एभ्यः शः प्रत्ययो भवति ।पांक् रक्षणे । पाशः बन्धनम् । डु दांग्क् दाने । दाशः कैवर्तः । टु वमू उद्गिरणे । वंशः वेणुः । अम गतौ । अंशः भागः ॥ कृशॄभृवनिभ्यः कित् ॥ ५२८ ॥ एभ्यः कित् शः प्रत्ययो भवति । डु कृंग् करणे । कृशः तनुः । वृगूट् वरणे । वृशं शृंगवेरम् मूलकं लशुनं च । टुडु भृंग्क् पोषणे च । भृशम् अत्यर्थम् । वन भक्तौ । वशः आयत्तः ॥ कोर्वा ॥ ५२९ ॥ कुंङ् शब्दे इत्यस्मात् शः प्रत्ययः स च किद्वा भवति । कुशः दर्भः । कोशः सारम् कुड्मलं च ॥ क्लिशः के च ॥ ॥ ५३० ॥ क्लिशौश् विबाधने इत्यस्मात् शः प्रत्ययोऽस्य च के इत्यादेशो भवति केशाः मूर्धजाः ॥ उरेरशक् ॥ ॥ ५३१ ॥ उर गतावित्यस्मात् सौत्रादशक् प्रत्ययो भवति । उरशः ऋषिः ॥ कलेष्टित् ॥५३२॥ कलि शब्दसंख्या-

नयोरित्यस्मात् टिदशक् प्रत्ययो भवति । कलशः कुम्भः । कलशी दधिमन्थनभाजनम् ॥ पलेराशः ॥ ५३३ ॥ पल गतावित्यस्मादाशः प्रत्ययो भवति । पलाशः ब्रह्मवृक्षः ॥ कनेरीश्चातः ॥ ५३४ ॥ कनै दीप्त्यादावित्यस्मादाशः प्रत्यय ईकारश्चाकारस्य भवति । कीनाशः कर्षकः वर्णशंकरः कदर्यश्च ॥ तथा—लुब्धः कीनाशः स्यात् कीनाशोऽप्युच्यते कृतघ्नश्च । योऽश्नाति वाऽममांसं स च कीनाशो यमश्चैव ॥ कुलिकनिकणिपलिवडिभ्यः किशः ॥५३५॥ एभ्यः कित् इशः प्रत्ययो भवति । कुल बन्धुसंस्त्यानयोः । कुलिशं वज्रम् । कनै दीप्त्यादौ, कण शब्दे । कनिशं कणिशं च सस्यमञ्जरी । पल गतौ । पलिशं यत्र स्थित्वा मृगा व्यापाद्यन्ते । वड आग्रहणे सौत्रः । बडिशं मत्स्यग्रहणम् ॥ बलेर्णिद्वा ॥ ५३६ ॥ बल प्राणनधान्यावरोधयोरित्यस्मात् किशः प्रत्ययः स च णिद्वा भवति । बालिशः मूर्खः । बलिशः मूर्खः । बलिशं बडिशम् ॥ तिनिशेतिशादयः ॥ ५३७ ॥ तिनिशादयः शब्दाः किशप्रत्ययान्ता निपात्यन्ते । तनेरिश्चातः । तिनिशः वृक्षः । इणस्तोऽन्तश्च । इतिशः गोत्रकृदृषिः । आदिग्रहणादन्येऽपि ॥ मस्ज्यङ्किभ्यामुशः ॥ ५३८ ॥ आभ्यामुशः प्रत्ययो भवति । टु मस्जोंत् शुद्धौ । ' न्यङ्क्वादुद्गमेघादयः ' इति गः । मद्गुशः नकुलः । अकुङ् लक्षणे । अङ्कुशः सृणिः अर्तीण्भ्यां पिशतशौ ॥ ५३९ ॥ आभ्यां यथासंख्यं पिश तश इत्येतौ प्रत्ययौ भवतः । ऋंक् गतौ । अर्पिशम् आर्द्रमांसम् बालवत्सायाः दुग्धं च । इंण्क् गतौ । एतशः अश्वः ऋषिः वायुः अग्निः अर्कश्च ॥ वृकृतॄमीङ्माभ्यः षः ॥ ५४० ॥ एभ्यः षः प्रत्ययो भवति । वृग्ट् वरणे । वर्षः भर्ता । वर्षं संवत्सरः । वर्षाः ऋतुः । कृत विक्षेपे । कर्षः उन्मानविशेषः । तॄ प्लवनतरणयोः । तर्षः प्लवः हर्षश्च । मींङ्च् हिंसायाम् । मेषः उरभ्रः । मांक् माने । माषः धान्यविशेषः हेमपरिमाणं च ॥ योरूच्च वा ॥ ५४१ ॥ युक् मिश्रण इत्यस्मात् षः प्रत्यय ऊकारश्चान्तादेशो वा भवति । यूषः पेयविशेषः । यूषा छाया । योषा स्त्री ॥ स्नुप्रसृन्वर्कल्ह्भ्यः कित् ॥ ५४२

स्वादिभ्योऽर्कपूर्वाच्च लुनातेः कित् षः प्रत्ययो भवति । स्नुक् प्रस्रवणे । स्नुषा पुत्रवधूः । पूग्श् पवने । पूषः पवनभाण्डम् शूर्पादि । षूत् प्रेरणे । सूषः बलम् । मूङ् बन्धने । मूषा लोहक्षरणभाजनम् । लूगश् छेदने अर्कपूर्वः । अर्कलूषः ऋषिः ॥ श्लिषेः शे च ॥ ५४३ ॥ श्लिषंच् आलिङ्गने इत्यस्माद् षः प्रत्ययोऽस्य च शे इत्यादेशो भवति । । शेषः नागराजः ॥ कोरषः ॥ ५४४ ॥ कुंङ् शब्दे इत्यस्मादषः प्रत्ययो भवति । कवषः क्रोधी शब्दकारश्च ॥ युजलेराषः ॥ ५४५ ॥ आभ्यामाषः प्रत्ययो भवति । युक् मिश्रणे । यवाषः दुरालभा । जल घात्ये । जलाषं जलम् । अर्पेरिषः ॥ ५४६ ॥ ऋंक् गतावित्यस्माण्ण्यन्तादिषः प्रत्ययो भवति । अर्पिषम् आर्द्रमांसम् ॥ महाविभ्यां टित् ॥ ५४७ ॥ आभ्यां टिदिषः प्रत्ययो भवति । मह पूजायाम् । महिषः सैरिभः राजा च । महिषी राजपत्नी सैरिभी च । अव रक्षणादौ । अविषः समुद्रः राजा पर्वतश्च । अविषी द्यौः भूमिः गङ्गा च ॥ रुहेर्वृद्धिश्च ॥ ५४८ ॥ रुहं जन्मनीत्यस्मात् टिदिषः प्रत्ययो वृद्धिश्चास्य भवति । रौहिषं तृणविशेषः अन्तरिक्षं च । रौहिषः मृगः । रौहिषी वात्या मृगी दूर्वा च ॥ अमिमृभ्यां णित् ॥ ५४९ ॥ आभ्यामिषः प्रत्ययो भवति स च णित् । अम गतौ । आमिषं भक्ष्यम् । मृश् हिंसायाम् । मारिषः हिंस्रः ॥ तवेर्वा ॥ ५५० ॥ तव गतावित्यस्मात्सौत्रात् टिदिषः प्रत्ययो भवति स च णिद्वा भवति । ताविषः ताविषश्च स्वर्गः । ताविषं तविषं च बलं तेजश्च । ताविषी तविषी च वात्या देवकन्या च ॥ कलेः किल्ब च ॥ ५५१ ॥ कलि शब्दसंख्यानयोरित्यस्मात् टिदिषः प्रत्ययोऽस्य च किल्ब इत्यादेशो भवति । किल्बिषं पापम् । किल्बिषी वेश्या रात्रिः पिशाची च ॥ नञो व्यथेः ॥ ५५२ ॥ नञ्पूर्वात् व्यथिष् भयचलनयोरित्यस्मात् टिदिषः प्रत्ययो भवति । अव्यथिषः क्षेत्रज्ञः सूर्यः अग्निश्च । अव्यथिषी पृथिवी ॥ कॄतॄभ्यामीषः ॥ ५६३ ॥ आभ्यामीषः प्रत्ययो भवति । कॄत् विक्षेपे । करीषः शुष्कगोमयरजः । तॄ प्लवनतरणयोः । तरीषः समर्थः स्तम्भः

प्लवश्च ॥ ऋजिशॄपॄभ्यः कित् ॥ ५५४ ॥ एभ्यः किदीषः प्रत्ययो भवति । ऋजि गत्यादौ । ऋजीषः अवस्करः । ऋजीषं धनम् ( उपहतम् ) शॄ हिंसायाम् । शिरीषः वृक्षः । पॄ पालनपूरणयोः । पुरीषं शकृत् ॥ अमेर्वरादिः ॥ ॥ ५५५ ॥ अम गतावित्यस्मात् वरादिरीषः प्रत्ययो भवति । अम्बरीषं भ्राष्ट्रं व्योम च । अम्बरीषः आदिनृपः ॥ उषेर्णोऽन्तश्च ॥ ५५६ ॥ उषू दाहे इत्यस्मादीषः प्रत्ययो णकारश्चान्तो भवति । उष्णीषः मुकुटं शिरोवेष्टनं च ॥ ऋपॄनहिहनिकलिचलिचपिवपिकूपिहयिभ्य उषः ॥ ५५७ ॥ एभ्यः उषः प्रत्ययो भवति। ऋशॄ गतौ । अरुषः व्रणः हयः आदित्यः वर्णः रोषश्च । पॄशॄ पालनपूरणयोः । परुषः कर्कशः । णहींच् बन्धने । नहुषः पूर्वो राजा । हनक् हिंसागत्योः । हनुषः क्रोधः राक्षसश्च । कलि शब्दसंख्यानयोः । कलुषम् अप्रसन्नं पापं च । चल कम्पने । चलुषः वायुः । चप सान्त्वने । चपुषः शकुनिः । डु वपीं बीजसंताने । वपुषः वर्णः । कृपौङ् सामर्थ्ये । कल्पुषः क्रियानुगुणः । हय क्लान्तौ च । हयुषा ओषधिः ॥ विदिपॄभ्यां कित् ॥ ५५८ ॥ आभ्यां किदुषः प्रत्ययो भवति । विदक् ज्ञाने । विदुषः विद्वान् । पॄशॄ पालनपूरणयोः । पुरुषः पुमान् आत्मा च ॥ अपुषधनुषादयः ॥ ५५९ ॥ अपुषादयः शब्दा उषप्रत्ययान्ता निपात्यन्ते । आप्नोतेर्ह्रस्वश्च । अपुषः अग्निः सरोगश्च । दधातेर्धन् च । धनुषः शैलः । आदिग्रहणाल्लमुषादयो भवन्ति खलिफलिवॄपॄकृजॄलम्बिमञ्जिपीविहन्यङ्गिमङ्गिगण्डयर्तिभ्य ऊषः ॥ ५६० ॥ खलूषः म्लेच्छजातिः । फलूषः वीरुत् । वरूषः भाजनम् । परूषः वृक्षविशेषः । करूषाः जनपदः । जरूषः आदित्यः । लम्बूषः नीरकदम्बः निचुलश्च । मञ्जिः पीयिश्च सौत्रौ । मञ्जूषा काष्ठकोष्ठः । पीयूषं प्रत्यग्रप्रसवक्षीरविकारः अमृतं घृतं च । हनूषः राक्षसः । अङ्गूषः शकुनिजातिः हस्ती बाणः वेगश्च । मङ्गूषः जलचरशकुनिः । गण्डूषः द्रवकवलः अरूषः रविः ॥ कोरदूषाटरूषकारूषशैलूषपिञ्जूषादयः ॥ ५६१॥ एते ऊषप्रत्ययान्ता निपात्यन्ते । कुरेरदोऽन्तश्च

कोरदूषः कोद्रवः । अटेराङ्पूर्वस्य चारोन्तश्च । आटरूषः वासः । अटनं रूषतीति तु अटरूषः पृषोदरादित्वात् । कृगो वृद्धिश्च ।कारूषाः जनपदः ।शलेरैं चातः ।शैलूषः नटः ।पिजुण् हिंसादौ ।पिञ्जूषः कर्णशष्कुल्याभोगः ।आदिशब्दात् मत्यूषाभ्यूषादयो भवन्ति ॥कलेर्मषः॥५६२॥कलि शब्दसंख्यानयोरित्यस्मान्मषः प्रत्ययो भवति।कल्मषं पापम्॥कुलेश्च माषक् ॥५६३॥ कुल बन्धुसंस्त्यानयोरित्यस्मात्कलेश्च किन्माषः मत्ययो भवति । कुल्माषः अर्धस्विन्नमाषादि । कल्माषः शबलः ॥ मावावद्यमिकमिहनिमानिकष्यशिपचिमुचियजिवृतृभ्यः सः ॥ ५६४ ॥ मासः त्रिंशद्रात्रः । वासः आटरूषकः । वत्सः तर्णकः ऋषिः प्रियस्य च पुत्रस्याख्यानम् । अंसः भुजशिखरम् । कंसः लोहजातिः विष्णोरातिः हिरण्यमानं च । हंसः श्वेतच्छदः । मांसं तृतीयो धातुः । कक्षः तृणम् गहनारण्यं शरीरावयवश्च । अक्षाः प्रासकाः । अक्षाणि इन्द्रियाणि रथचक्राणि च । पक्षः अर्धमासः वर्गः शकुन्यवयवः सहायः साध्यं च । मोक्षः मुक्तिः । यक्षः गुह्यकः । वर्सः देशः समुद्रश्च । तर्सः वीतंसः सूर्यश्च । वर्सतर्सयोर्बाहुलकान्न षत्वम् ॥ व्यवाभ्यां तनेरीच्च वेः ॥ ५६५ ॥ वि अव इत्येताभ्यां परात्तनोतेः सः प्रत्ययो वेरीकारश्चान्तादेशो भवति । वीतंसः शकुन्यवरोधः । अवतंसः कर्णपूरः ॥ प्लुषेः प्लष् च ॥ ५६६ ॥ प्लुषू दाह इत्यस्मात्सः मत्ययोऽस्य च प्लष् इत्यादेशो भवति । प्लक्षं नक्षत्रं वृक्षश्च ॥ ऋजिरिषिकुषिकृतिव्रश्च्युन्दिशृभ्यः कित् ॥ ५६७ ॥ एभ्यः कित् सः मत्ययो भवति । ऋजि गत्यादौ । ऋक्षं नक्षत्रम् । ऋक्षः अच्छभल्लः । रिष हिंसायाम् । रिक्षा यूकाण्डम् । लत्वे, लिक्षा सैव । कुष्श् निष्कर्षे । कुक्षः गर्भः । कुक्षं गर्तः । कृतैत् छेदने । कृत्सः गोत्रकृत् ओदनं वक्त्रं दुःखजातं च । ओ व्रश्चौत् छेदने । वृक्षः पादपः । उन्दैप् क्लेदने । उत्सः समुद्रः आकाशं जलं जलाशयश्च । उत्सं स्रोतः । शॄश् हिंसायाम् । शीर्षं शिरः ॥ गुधिगृधेस्त च ॥ ५६८ ॥ आभ्यां कित् सः मत्ययस्तकारश्चान्तादेशो भवति । गुधच् परिवेष्टने । गुत्सः रोषः तृणजातिश्च

गृधूच् अभिकाङ्क्षायाम् । गृत्सः विप्रः श्वा गृध्रः अभिलाषश्च । तकारविधानमादिचतुर्थबाधनार्थम् ॥ तप्यणिपन्यल्य-विरभिनभिनम्यमिचमितमिचट्यतिपतेरसः ॥ ५६९ ॥ तपसः आदित्यः पशुः धर्मः धर्मश्च । अणसः शकुनिः। पनसः फलवृक्षः । अलसः निरुत्साहः । अवसः भानुः राजा च । अवसं चापं पाथेयं च । ' रध इटि तु परोक्षायामेव' इति नागमे रन्धसः अन्धकजातिः । नभसः ऋतुः आकाशः समुद्रश्च । नमसः वेत्रः प्रणामश्च । अमसः कालः आहारः संसारः रोगश्च । चमसः सोमपात्रम् मन्त्रपूतं पिष्टं च । चमसी मुद्गादिभित्तकृता । तमसः अन्धकारः । तमसा नाम नदी । चटसः चर्मपुटः । अतसः वायुः आत्मा वनस्पतिश्च । अतसी ओषधिः । पतसः पतङ्गः ॥ सृवयिभ्यां णित् ॥ ॥ ५७० ॥ आभ्यां णिदसः प्रत्ययो भवति । सारसः पक्षिविशेषः । वायसः काकः ॥ वहियुभ्यां वा ॥ ५७१ ॥ आभ्यामसः प्रत्ययः स च णिद्वा भवति । वाहसः अनड्वान् शकटम् अजगरः वहनजीवश्च । वहसः अनड्वान् शकट-श्च । यावसं भक्तम् तृणम् मित्रं च । यवसम् अश्वादिघासः अन्नं च ॥ दिवादिरभिलभ्युरिभ्यः कित् ॥ ५७२ ॥ दिवादिभ्यो रभिलभ्युरिभ्यश्च किदसः प्रत्ययो भवति । दीव्यतेः, दिवसः वासरः । व्रीडयतेः, डलत्वे, व्रीलसः लज्जा-वान् । नृत्यतेः, नृतसः नर्तकः । क्षिप्यतेः, क्षिपसः योद्धा । सीव्यतेः, सिवसः श्लोकः वस्त्रं च । श्रीव्यतेः, श्रिवसः गतिमान् । इष्यतेः, इषसः इष्याचार्यः । रभि राभस्ये । रभसः संरम्भः उद्धर्षः अगम्भीरश्च । डु लभिष् प्राप्तौ । लभ-सः याचकः प्राप्तिश्च । उरिः सौत्रः । उरसः ऋषिः ॥ फनसतामरसादयः ॥ ५७३ ॥ फनसादयः शब्दा असप्र-त्ययान्ता निपात्यन्ते । फण गतौ नश्च । फनसः पनसः । तमेररोऽन्तो वृद्धिश्च । तामरसं पद्मम् । आदिग्रहणात् कीक-सकुक्कसादयो भवन्ति ॥ युबलिभ्यामासः ॥ ५७४ ॥ आभ्यामासः प्रत्ययो भवति । युक् मिश्रणे । यवासः दु-रालभा । बल प्राणनधान्यावरोधयोः । बलासः श्लेष्मा ॥ किलेः कित् । ५७५ ॥ किलत् श्वैत्यक्रीडनयोरित्यस्मात्

किदासः प्रत्ययो भवति । किलासं सिध्मम् । किलासी पाककर्परम् ॥ तलिकसिभ्यामीसण् ॥ ५७६ ॥ आभ्यामीसण् प्रत्ययो भवति । तलण् प्रतिष्ठायाम् । तालीसं गन्धद्रव्यम् । कस गतौ । कासीसं धातुजमौषधम् ॥ सेर्डित् ॥ ५७७ ॥ षिंगट् बन्धने इत्यस्मात् डिदीसण प्रत्ययो भवति । सीसं लोहजातिः ॥ त्रपेरुसः ॥ ५७८ ॥ त्रपौषि लज्जायामित्यस्मादुसः प्रत्ययो भवति । त्रपुसं कर्कटिका । विधानसामर्थ्यात् षत्वाभावः ॥ पटिवीभ्यां टिसडिसौ ॥ ५७९ ॥ आभ्यां यथासंख्यं टिसो डित् इसश्च प्रत्ययो भवति । पट गतौ । पट्टिसः आयुधविशेषः । वींक् प्रजनादौ । बिसं मृणालम् ॥ तसः ॥ ५८० ॥ पटिवीभ्यां तसः प्रत्ययो भवति । पट्टसः त्रिशूलम् । वेतसः वानीरः ॥ इणः ॥ ५८१ ॥ एतेस्तसः प्रत्ययो भवति । एतसः अध्वर्युः ॥ पीङो नसक् ॥ ५८२ ॥ पींङ् च् पाने इत्यस्मात् किन्नसः प्रत्ययो भवति । पीनसः श्लेष्मा ॥ कृकुरिभ्यां पासः ॥ ५८३ ॥ आभ्यां पासः प्रत्ययो भवति । डु कृंग् करणे । कर्पासः पिचुप्रकृतिः वीरुच्च । कुरत् शब्दे । कूर्पासः कञ्चुकः ॥ कलिकुलिभ्यां मासक् ॥ ५८४ ॥ आभ्यां कित् मासः प्रत्ययो भवति । कलि शब्दसंख्यानयोः । कल्मासं शबलम् । कुल बन्धुसंस्त्यानयोः । कुल्मासः अर्धस्विन्नं माषादि ॥ अलेरम्बुसः ॥ ५८५ ॥ अली भूषणादावित्यस्मादम्बुसः प्रत्ययो भवति । अलम्बुसः यातुधानः । अलम्बुसा नाम ओषधिः ॥ लूगो हः ॥ ५८६ ॥ लुनातेर्हः प्रत्ययो भवति । लोहं सुवर्णादि ॥ कितो गे च ॥ ५८७ ॥ कित् निवासे इत्यस्मात् हः प्रत्ययोऽस्य च गे इत्यादेशो भवति । गेहं गृहम् ॥ हिंसेः सिम् च ॥ ५८८ ॥ हिंसुप् हिंसायामित्यस्माद्धः प्रत्ययोऽस्य च सिमित्यादेशो भवति । सिंहः मृगराजः ॥ कॄपृकटिपटिमटिलटिललिपलिकल्यनिरगिलगेरहः ॥ ५८९ ॥ एभ्योऽहः प्रत्ययो भवति । कॄत् विक्षेपे । करहः धान्यावपनम् । पॄश् पालनपूरणयोः । परहः शंकरः । कटे वर्षावरणयोः । कटहः पर्जन्यः कर्णवरुच कालायसभाजनम् । पट गतौ । पटहः

वाद्यविशेषः ।मट सादे सौत्रः ।मटहः ह्रस्वः । लट बाल्ये ।लटति विलसति लटहः विलासवान् ।ललिण् ईप्सायाम् ।ललहः लीलावान् । पल गतौ । पलहः आवापः । कलि शब्दसंख्यानयोः । कलहः युद्धम् । अनक् प्राणने । अनहः नीरोगः । रगे शङ्कायाम । रगहः नटः । लगे सङ्गे । लगहः मन्दः पुलेः कित् ॥ ५९० ॥ पुल महत्त्वे इत्यस्मात् किदहः प्रत्ययो भवति । पुलहः प्रजापतिः ॥ वृकटिशमिभ्य आहः ॥ ५९१ ॥ एभ्य आहः प्रत्ययो भवति । वृगट् वरणे । वराहः सूकरः । कटे वर्षावरणयोः । कटाहः कर्णवत् कालायसभाजनम् । शमूच् उपशमे । शमाहः आश्रमः ॥ विलेः कित् ॥५९२ ॥ विलत् वरणे इत्यस्मात् किदाहः प्रत्ययो भवति । विलाहः रहः ॥ निर इण ऊहक् ॥ ५९३ ॥ निरपूर्वात् इंणक् गतावित्यस्माच्छिदूहः प्रत्ययो भवति । निर्यूहः सौधादिकाष्ठनिर्गमः ॥ दस्त्यूहः ॥ ॥ ५९४ ॥ ददातेस्त्यूहः प्रत्ययो भवति । दात्यूहः पक्षिविशेषः ॥ अनेरोकहः ॥ ५९५ ॥ अनक् प्राणने इत्यस्मादोकहः प्रत्ययो भवति । अनोकहः वृक्षः ॥ वलेरक्षः ॥ ५९६ ॥ वलि संवरणे इत्यस्मादक्षः प्रत्ययो भवति । वलक्षः शुक्लः ॥ लाक्षाद्राक्षामिक्षादयः ॥ ५९७ ॥ लाक्षादयः शब्दा अक्षप्रत्ययान्ता निपात्यन्ते । लसेरा च । लाक्षा जतु । रसेर्द्रा च । द्राक्षा मृद्वीका । आङ्पूर्वान्मृदेरन्त्यस्वरादेर्लुक् प्रत्ययादेरित्वं च । आमिक्षा हविर्विशेषः ॥ आदिग्रहणात् चुप मन्दायां गतावित्यस्य चोक्षः ग्रामरागः शुद्धं च । एवं पीयूक्षादयोऽपि ॥ समिण्निकषिभ्यामाः ॥ ५९८ ॥ सम्पूर्वादिण्क् गतावित्यस्मात् निपूर्वात् कष हिंसायामित्यस्माच्च आः प्रत्ययो भवति । समया पर्वतम् । निकषा पर्वतम् । समीपास्तूयावाचिनावेतौ ॥ दिविपुरिवृषिमृषिभ्यः कित् ॥ ५९९ ॥ एभ्यः किदाः प्रत्ययो भवति । दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु । दिवा अहः । पुरत् अग्रगमने । पुरा भूतकालवाची । वृषू सेचने । वृषा प्रबलमित्यर्थः । मृषीच् तितिक्षायाम मृषा अभूतमित्यर्थः ॥ वेः साहाभ्याम् ॥ ६०० ॥ विपू-

वभ्यां षोंच् अन्तकर्मणि, ओहांक् त्यागे इत्येताभ्याम् आः प्रत्ययो भवति । विसाः चन्द्रमाः बुद्धिश्च । तालव्यान्तोऽयमित्येके । विहाः विहगः स्वर्गश्च ॥ वृमिथिदिशिभ्यस्थयष्टयाश्चान्ताः ॥ ६०१ ॥ एभ्यः किदाः प्रत्ययो भवति यथासंख्यं थकारयकारष्टयकाराश्चान्ता भवन्ति । वृग्ट् वरणे । वृथा अनर्थकम् । मिथृग् मेधाहिंसयोः । मिथ्या मृषा निष्फलं च । दिशींत् अतिसर्जने । दिष्टया प्रीतिवचनम् ॥ मुचिस्वदेर्धं च ॥ ६०२ ॥ आभ्यां किदाः प्रत्ययो धकारश्चान्तस्य भवति । मुच्लृंती मोक्षणे । मुधा अनिमित्तम् । ष्वदि आस्वादने । स्वधा पितृबलिः ॥ सोर्वूग आह च ॥ ६०३ ॥ सुपूर्वात् ब्रूगेराः प्रत्ययोऽस्य चाहादेशो भवति । स्वाहा देवतातर्पणम् ॥ सनिक्षमिदुषेः ॥ ६०४ ॥ एभ्यो धातुभ्य आः प्रत्ययो भवति । षणूयी दाने । सना नित्यम् । क्षमौषि सहने । क्षमा भूः क्षान्तिश्च । दुषंच् वैकृत्ये दोषा रात्रिः ॥ डित् ॥ ६०५ ॥ धातोर्बहुलमाः प्रत्ययः स च डिद्भवति । मनिंच् ज्ञाने । मा निषेधे । षोंच् अन्तकर्मणि । सा अवसानम् । अनक् प्राणने । आ स्मरणादौ । प्रीङ्च् प्रीतौ । प्रा स्मयने । हनंक् हिंसागत्योः । हा विषादे । वन भक्तौ । वा विकल्पे । रांक दाने । रा दीप्तिः । भांक् दीप्तौ । भा कान्तिः । सहपूर्वः सभा परिषत् । नाम्नीति सहस्य सः ॥ स्वरेभ्य इः ॥ ६०६ ॥ स्वरान्तेभ्यो धातुभ्य इः प्रत्ययो भवति । जि अभिभवे । जयिः राजा । हिंट् गतिवृद्ध्योः । हयिः कामः रुक् शब्दे । रविः सूर्यः । कुंक् शब्दे । कविः काव्यकर्ता । ष्टुंग्क् स्तुतौ । स्तविः उद्गाता लूग्श् छेदने । लविः दात्रम् । पूग्श् पवने । पविः वायुः वज्रं पवित्रं च । भू सत्तायाम् । भविः सत्ता । चन्द्रः विधिश्च । ऋंक् गतौ । अरिः शत्रुः । हृंग् हरणे । हरिः इन्द्रः विष्णुः चन्दनम् मर्कटादिश्च । हरयः शक्राश्वाः । डुभृंग्क् पोषणे च । भरिः वसुधा । सृं गतौ । सरिः मेघः । पृंश् पालनपूरणयोः । परिः भूमिः । तॄ प्लवनतरणयोः । तरिः



नौः दृश् विदारणे । दरिः महाभिदा । मृश् हिंसायाम् ण्यन्तः । मारिः अशिवम् । वृग्श् वरणे । वरिः विष्णुः ।

ण्यन्ताद्वारिः हस्तिबन्धनम् । वारि जलम् ॥ पदिपठिपचिस्थलिहलिकलिबलिवलिवल्लिपल्लिकटिचटिवटिवधिगाध्यर्चिवन्दिनन्दिअविवशिवाशिकाशिछर्दितन्त्रिमन्त्रिखण्डिमण्डिचण्डियत्यञ्जिमस्यसिवनिध्वनिसनिगमितमिग्रन्थिश्रन्थिजनिमण्यादिभ्यः ॥ ६०७ ॥ पदिः राशिः मोक्षमार्गश्च । पठिः विद्वान् । पचिः अग्निः स्थलिः दानशाला । हलिः हलः । कलिः कलहः युगं च । बलिः देवतोपहारः दानवश्च । वलिः त्वक्तरङ्गः । वल्लिः हिरण्यशलाका लता च । पल्लिः मुनीनामाश्रमः व्याधसंस्त्यायश्च । कटिः स्वाङ्गम् । चटिः वर्णः । वटिः गुलिका तन्तुः क्षूना च नाभिः वर्णश्च । वधिः क्रियाशब्दः । गाधिः विश्वामित्रपिता । अर्चिः अग्निशिखा । वन्दिः ग्रहणिः । नन्दिः ईश्वरप्रतीहारः भेरिश्च । अविः ऊर्णायुः । वशक् कान्तौ । वशिः वशिता । वाशिच् शब्दे । वाशिः प्रकान्तिः रश्मिः गोमायुः अग्निः शब्दः प्रजनप्राप्ता चतुष्पात् जलदश्च । काशृङ् दीप्तौ । काशयः जनपदः । छर्दण् वमने । छर्दिः वमनम् । तन्त्रिः वीणासूत्रम् । मन्त्रिः सचिवः । खण्डिः प्रकारम् । मण्डिः मृद्भाजनपिधानम् । चण्डिः भामिनी । यतिः भिक्षुः । अञ्जिः सज्जः पेषणी पेजः गतिश्च । समञ्जिः शिश्नः । मसिः शस्त्री । असिः खड्गः । वनिः साधुः याच्या शकुनिः अग्निश्च । ध्वनिः नादः । सनिः संभक्ता पन्था दानं म्लेच्छः नदीतटं च । गमिः आचार्यः । तमिः अलसः । ग्रन्थिः श्रन्थिश्च पर्व मंध्यादि । जनिः वधूः कुलाङ्गना भगिनी प्रादुर्भावश्च । मणिः रत्नम् । आदिग्रहणात् वर्हौ प्रापणे । वर्हिः अश्वः । खादृ भक्षणे । खादिः श्वा । दधि धारणे । दधि क्षीरविकारः । खल संचये च । खलिः पिण्याकः । शचि व्यक्तायां वाचि । शची इन्द्राणी । ‘ इतोऽक्त्यर्थात् ’ इति गौरादित्वाद्वा ङीः इत्यादयोऽपि भवन्ति ॥ किलिपिलिपिशिचिटित्रुटिशुण्ठितुण्डिकुण्डिभण्डिहुण्डिहिण्डिपिण्डिचुल्लिबुधिमिथिरुहिदिविकीर्त्यादिभ्यः ६०८॥ केलिः क्रीडा । पेलिः क्षुद्रपेला । पेशिः मांसखण्डम् । चेटिः दारिका प्रेष्या च । त्रोटिः चञ्चुः ।

शुण्ठिः विश्वभेषजम् । शुण्डिः आस्यम् प्रवृद्धा च नाभिः । कुण्डिः जलभाजनम् ।भण्डिः शकटम् । हुण्डिः पिण्डित ओदनः । हिण्डिः रात्री रक्षाचारः । पिण्डिः निष्पीडितस्नेहः पिण्डः । चुल्लिः रन्धनस्थानम् । बोधिः सम्यग् ज्ञानम् । मेथिः खलमध्यस्थूणा । रोहिः सस्यं जन्म च । देविः । भूमिः कृतण् संशब्दने णिजन्तः । कीर्तिः यशः । आदिग्रहणादन्येऽपि॥नाम्युपान्त्यकॄगॄशॄपॄपूङ्भ्यः कित्॥६०९॥ नाम्युपान्त्येभ्यः कादिभ्यश्च किदिः प्रत्ययो भवति । लिखत् अक्षरविन्यासे ।लिखिः शिल्पम् ।शुच् शोके ।शुचिः पूतः विद्वान् धर्मः आषाढश्च ।रुचि अभिप्रीत्यां च । रुचिः दीप्तिः अभिलाषश्च ।भुजंप् पालनाभ्यवहारयोः । भुजिः अग्निः राजा कुटिलं च । कुणत् शब्दोपकरणयोः । कुणिः विकलो हस्तः हस्तविकलश्च । सृजंत् विसर्गे । सृजिः पन्थाः । द्युति दीप्तौ । द्युतिः दीप्तिः । ऋत् घृणागतिस्पर्धेषु ।ऋतिः यतिः । छिदृंपी द्वैधीकरणे । छिदिः छेत्ता पर्शुश्च । मुदि हर्षे । मुदिः बालः । भिदृंपी विदारणे । भिदिः वज्रं सूचकः भेत्ता च । ऊछृदृंपी दीप्तिदेवनयोः ।छृदिः रथकारः ।लिपींत् उपदेहे ।लिपिः अक्षरजातिः ।तुर त्वरणे सौत्रः।तुरिः तन्तुवायोपकरणम् ।डुलण् उत्क्षेपे ।डुलिः कच्छपः ।त्विषीं दीप्तौ ।त्विषिः दीप्तिः त्विषिमान् राजवर्चस्वी च । कृषींत् विलेखने- कृषिः कर्षणम् कर्षणभूमिश्च । ऋषैत् गतौ । ऋषिः मुनिः वेदश्च । कुषश् निष्कर्षे । कुषिः शुषिरम् । शुषंच् शोषणे । शुषिः छिद्रम् शोषणम् च । हृषू अलीके । हृषिः अलीकवादी दीप्तिः तुष्टिश्च । ष्णुहींच् उद्गिरणे । स्नुहिः वृक्षः । कृत् विक्षेपे । किरिः सूकरः मूषिकः गन्धर्वः गर्तश्च । गृत् निगरणे । गिरिः नगः कन्दुकश्च । शॄश् हिंसायाम् । शिरिः हिंस्रः खड्गः शोकः पाषाणश्च । पॄश् पालनपूरणयोः पुरिः नगरी राजा पूरयिता च । पूङ् पवने । पुविः वातः ॥ विदिवृतेर्वा ॥ ६१० ॥ आभ्यामिः प्रत्ययो भवति स च किद्वा । विदक् ज्ञाने । विदिः शिल्पी । वेदिः इज्यादिस्थानम् । वृतूङ् वर्तने । वृतिः कण्टकशाखावरणम् । निर्वृतिः सुखम् । वर्तिः द्रव्यं दीपाङ्गं च ॥ तृभ्रम्यद्यापिदम्भिभ्य-

**स्तित्तिरभृमाधापदेभाश्च** ॥ ६११ ॥ एभ्यः किदिः प्रत्यय एषां च यथासंख्यं तित्तिरभृम अधापदेभ इत्यादेशा भवन्ति । तॄ प्लवनतरणयोः । तित्तिरिः पक्षिजातिः प्रवक्ता च वेदशाखायाः । भ्रमू चलने । भृमिः वायुः हस्ती जलं चाबाहुलकात् भृमादेशाभावे भ्रमिः भ्रमः । अदंक् भक्षणे । अधि उपरिभावे । अध्यागच्छति । आप्लृंट् व्याप्तौ । अपि समुच्चयादौ । प्लक्षोऽपि । न्यग्रोधोऽपि । दम्भूट् दम्भे । देभिः शरासनम् ॥ **मनेरुदेतौ चास्य वा** ॥ ६१२ ॥ मनिच् ज्ञाने इत्यस्मादिः प्रत्ययोऽकारस्य च उकारैकारौ वा भवतः । मुनिः ज्ञानवान् । मेनिः संकल्पः । मनिः धूमवर्तिः ॥ **क्रमितमिस्तम्भेरिच्च नमेस्तु वा** ॥ ६१३ ॥ एभ्यः किदिः प्रत्ययोऽकारस्य चेकारो भवति, नमेः पुनरकारस्येकारो विकल्पेन । क्रमू पादविक्षेपे । क्रिमिः क्षुद्रजन्तुः । तमूच् काङ्क्षायाम् । तिमिः महामत्स्यः । स्तम्भिः सौत्रः । स्तिभिः केतकादिसूची हृदयं समुद्रश्च । णमं प्रह्वत्वे । निमिः राजा । नमिः विद्याधराणामाद्यः तीर्थकरश्च ॥ **अम्भिकुण्ठिकम्प्यंहिभ्यो नलुक् च** ॥ ६१४ ॥ एभ्य इः प्रत्ययो नकारस्य च लुग् भवति । अभुङ् शब्दे । अभि आभिमुख्येऽव्ययम् । अभ्यग्नि शलभाः पतन्ति । कुठु आलस्ये च । कुठिः वृक्षः पापं वृषलः देहः गेहम् कुठारश्च । कपुङ् चलने कपिः अग्निः वानरश्च । अहुङ् गतौ । अहिः सर्पः वृत्रः वप्रश्च ॥ **उभेर्द्वत्रौ च** ॥ ६१५ ॥ उभत् पूरणे इत्यस्मादिः प्रत्ययोऽस्य च द्वत्र इत्यादेशौ भवतः । द्वौ । द्वितीयः । द्विमुनि व्याकरणस्य । त्रयः । तृतीयः । त्रिमुनि व्याकरणस्य ॥ **नीवीप्रहृभ्यो डित्** ॥ ६१६ ॥ एभ्यो डिदिः प्रत्ययो भवति । णींग् प्रापणे । निवसति । वींक् प्रजनादौ । विः तन्तुवायः पक्षी उपसर्गश्च । यथा विभवति । हृंग् हरणे प्रपूर्वः । प्रहिः कूपः उदपानं च ॥ **वौ रिचेः स्वरान्नोऽन्तश्च** ॥ ११७ ॥ वावुपसर्गे सति रिचूंपी विरेचने इत्यस्मादिः प्रत्ययः स्वरात्परो नोऽन्तश्च भवति । विरिञ्चिः ब्रह्मा ॥ **कषिषमिजमिघसिशलिफलितलितडिवजिव्रजिध्वजिराजिपणिवणिवदिसदिहदिहनिसहिवहि-**

तपिवपिभटिकञ्चिसेपतिभ्यो णित् ॥ ६१८ ॥ एभ्यो णिदिः प्रत्ययो भवति । कामिः वसुकः कामी च । यामिः स्त्री । जमू अदने । जामिः भगिनी तृणं जनपदश्चैकः । घासिः संग्रामः गर्त्तः अग्निः बहुभुक् च । शालिः व्रीहिराजः । फालिः द्रव्यम् । तालिः वृक्षजातिः । ताडिः स एव । वाजिः अश्वः पुंखावसानं च । व्राजिः पद्धतिः पिटकजातिश्च । ध्वाजिः पताका अश्वश्च । राजिः पङ्क्तिः लेखा च । पाणिः करः । वाणिः वाक् । व्यूम् वाणी । वादिः वाग्मी वीणा च । सादिः अश्वारोहः सारथिश्च । हादिः लूता । घातिः प्रहरणम् । केचित्तु हानिः अर्थनाशः उच्छित्तिश्चेति उदाहरन्ति तत्र बाहुलकात् ञ्णिति घात् इति घात् न भवति । बाहुलकादेव णित्त्वविकल्पे, हनिः आयुधम् । साहिः शैलः । वाहिः अनड्वान् । तापिः दानवः । वापिः पुष्करिणी । भाटिः सुरतमूल्यम् । काञ्चिः मेखला पुरी च । णित्करणादनुपान्त्यस्यापि वृद्धिः । संपातिः पक्षिराजः ॥ कृशॄकुटिग्रहिखन्यणिकष्यलिपलिचरिवसिगण्डिभ्यो वा ॥ ६१९ ॥ एभ्य इः प्रत्ययः स च णिद्वा भवति । कारिः शिल्पी । करिः हस्ती विष्णुश्च । शॄ हिंसायाम् । शारिः द्यूतोपकरणम् हस्तिपर्याणम् शारिका च । शरिः हिंसा शूलश्च । कोटिः अस्त्रिः अग्रभाग अग्रं वाऽङ्कस्थानं च ।कुटिः गृहं शरीराङ्गं च ग्राहिः पातः ।ग्रहिः वेणुः ।खानिः खनिश्च निधिः आकरः तडागं च । अण शब्दे । आणिः अणिश्च द्वारकीलिका । कष हिंसायाम् । काषिः कर्षकः ।कषिः निकषोपलः काष्ठम् अश्वकर्णः खनित्रं च ।अली भूषणादौ । अलिः पङ्क्तिः सखी च । अलिः भ्रमरः । पल गतौ । पालिः जलसेतुः कर्णपर्यन्तश्च । पलिः संस्त्यायः । चर भक्षणे च ।चारिः पशूनां भक्ष्यम् ।चरिः प्राकारशिखरम् विषयः वायुः पशुः केशोर्णा च ।वसं निवासे ।वासिः तक्षोपकरणम् ।वसिः शय्या अग्निः गृहं रात्रिश्च ।गडु वदनैकदेशे ।गण्डिः गण्डिका ।णित्त्वपक्षे तु अनुपान्त्यस्यापि वृद्धौ,गाण्डिःधनुष्पत्रं ॥ पादाच्चात्यजिभ्याम्॥६२०॥पादशब्दपूर्वाभ्यां केवलाभ्यां चाऽत्यजिभ्यां णिदिः प्रत्ययो भवति ।

अत सातत्यगमने, अज क्षेपणे च । पादाभ्यामतत्यजति वा पदातिः पदाजिः । ' पदः पादस्याऽयातिगोपहते ' इति पद्भावः । उभावपि पत्तिवाचिनौ । आतिः पक्षी । सुपूर्वात् स्वातिः वायव्यनक्षत्रम् । आजिः संग्रामः स्पर्धाऽवधिश्च ॥ नहेर्भ् च ॥ ६२१ ॥ णहींच् बन्धने इत्यस्माण्णिदिः प्रत्ययो भकारश्चान्तादेशो भवति । नाभिः अन्त्यकुलकरः चक्रमध्यं शरीरावयवश्च ॥ अशो रश्चादिः ॥ ६२२ ॥ अशौटि व्याप्तावित्यस्माण्णिदिः प्रत्ययो रेफश्च धातोरादिर्भवति । राशिः समूहः नक्षत्रपादनवकरूपश्च मेषादिः ॥ कायः किरिच्च वा ॥ ६२३ ॥ कैं शब्दे इत्यस्मात्किः प्रत्यय इकारश्चान्तादेशो वा भवति । किकिः पक्षी विद्वांश्च । काकिः स्वरदोषः ॥ वर्द्धरकिः ॥ ६२४ ॥ वर्धण् छेदनपूरणयोरित्यस्मादकिः प्रत्ययो भवति । वर्धकिः तक्षा ॥ सनेर्डखिः ॥ ६२५ ॥ षणूयी दाने इत्यस्मात् डिदखिः प्रत्ययो भवति । सखा मित्रम् । । सखायौ । सखायः ॥ कोर्डिखिः ॥ ६२६ ॥ कुंङ् शब्दे इत्यस्मात् डिदिखिः प्रत्ययो भवति । किखिः लोमसिका ॥ मृश्विकण्यणिदध्यविभ्य ईचिः ॥ ६२७ ॥ एभ्य ईचिः प्रत्ययो भवति । मृंत् प्राणत्यागे । मरीचिः मुनिः मयूखश्च । टूवो श्वि गतिवृद्धयोः । श्वयीचिः चन्द्रः श्वयथुश्च । कण अण शब्दे । कणीचिः प्राणी लता चक्षुः शकटं शङ्खश्च । अणीचिः वेणुः शाकटिकश्च । दधि धारणे । दधीचिः राजर्षिः । अव रक्षणादौ । अवीचिः नरकविशेषः ॥ वेगो डित् ॥ ६२८ ॥ वेंग् तन्तुसंन्ताने इत्यस्मात् डिदीचिः प्रत्ययो भवति । वीचिः ऊर्मिः ॥ वणेर्णित् ॥ ६२९ ॥ वण शब्दे इत्यस्मात् णिदीचिः प्रत्ययो भवति । वाणीचिः छाया व्याधिश्च ॥ कृपिशकिभ्यामटिः ॥ ६३० ॥ आभ्यामटिः प्रत्ययो भवति । कृपौङ् सामर्थ्ये । कर्पटिः निस्वः । शक्लृट् शक्तौ । शकटिः शकटः ॥ श्रेर्डिः ॥ ६३१ ॥ श्रिग् सेवायामित्यस्मात् डिः प्रत्ययो भवति । श्रेढिः गणितव्यवहारः ॥ चमेरुच्चातः ॥ ६३२ ॥ चमू अदने इत्यस्मात् डिः प्रत्ययोऽस्योकारश्च । चुण्डिः क्षुद्रवापी ॥ मुषेरुण् चान्तः ॥ ६३३ ॥

मुषुण् स्तेये इत्यस्मात् ढिः प्रत्यय उण् चान्तो भवति. । मुषुण्ढिः प्रहरणम् । उणो न गुणो विधानसामर्थ्यात् ॥ का-वावोक्रीश्रिश्रुक्षुज्वरित्रुरिचूरिपूरिभ्यो णिः ॥ ६३४ ॥ एभ्यो णिः प्रत्ययो भवति । कैं शब्दे । काणिः वैलक्ष्यानुसर्पणम । वेंग् तन्तुसंताने । वाणिः स्यूतिः । वींक् प्रजनादौ । वेणि: कबरी । क्रेणिः क्रयविशेषः । श्रिग् सेवायाम् । श्रेणिः पङ्क्तिः विशेषश्च । श्रेणयः अष्टादश गणविशेषाः । निपूर्वात् निश्रेणिः संक्रमः । श्रोणिः जघनम् । टुक्षुक् शब्दे । क्षोणिः पृथ्वी । जूर्णिः ज्वरः वायुः आदित्यः अग्निः शरीरम् ब्रह्मा पुराणश्च । तूरैचि त्वरायाम् । तूर्णिः त्वरा मनः शीघ्रश्च । चूरैचि दाहे । चूर्णिः वृत्तिः । पूरैचि आप्यायने । पूर्णिः पूरः ॥ ऋद्घृसृकुषृषिभ्यः कित् ॥ ६३५ ॥ ऋकारान्तेभ्यो घृ इत्यादिभ्यश्च कित् णिः प्रत्ययो भवति । शॄश् हिंसायाम् । शीर्णिः रोगः अवयवश्च । स्तॄग्श् आच्छादने । स्तीर्णिः संस्तरः । घृं सेचने । घृणिः रश्मिः ज्वाला निदाघश्च । सृं गतौ । सृणिः आदित्यः वज्रम् अनिलः अङ्कुशः अग्निश्च । कुङ्क् शब्दे । कुणिः विकलो हस्तः हस्तविकलश्च । वृषू सेचने । वृष्णिः वस्तः मेषः यदुविशेषश्च । पर्षतेरपीच्छन्त्येके । पृष्णिः रश्मिः ॥ पृषिहृषिभ्यां वृद्धिश्च ॥ ६३६ ॥ आभ्यां णिः प्रत्ययोऽनयोश्च वृद्धिर्भवति । पृषू सेचने । पार्ष्णिः पादपश्चाद्भागः पृष्ठप्रदेशश्च । हृषंच् तुष्टौ । हार्ष्णिः हरणम् ॥ हूर्णिधूर्णिभूर्णिघूर्ण्यादयः ॥ ६३७ ॥ एते णिप्रत्ययान्ता निपात्यन्ते । हृंग् हरणे, धृंग् धारणे, भू सत्तायाम, घृं सेचने ऊत्वं रश्चान्तो निपात्यते । हूर्णिः कुल्या । धूर्णिः धृतिः । भूर्णिः चे(चे)तनं भूमिः कालश्च । घूर्णिः भ्रमः । आदिग्रहणादन्येऽपि ॥ ऋहृसृमृधृभृकृतॄग्रहेरणिः ॥ ६३८ ॥ एभ्योऽणिः प्रत्ययो भवति । ऋंक् गतौ । अरणिः अग्निमन्थनकाष्ठम् । हृंग् हरणे । हरणिः कुल्या मृत्युश्च । सृं गतौ । सरणिः ईषद्गतिः पन्थाः आदित्यः शिरा संघातश्च । मृंत् प्राणत्यागे । मरणिः रात्रिः । धृंग् धारणे । धरणिः क्षितिः । डुडु भृंग्क् पोषणे च । भरणिः नक्षत्रम् । डुकृंग् क-

रणे । करणिः सादृश्यम् । तॄ प्लवनतरणयोः । तरणिः संक्रमः आदित्यः यवागूः पतितगोरूपोत्थापनी च यष्टिः । वैतरणी दुःखार्थः, दुःखेन तीर्यत इति वैतरणी नदी । ग्रहीश् उपादाने । ग्रहणिः जठराग्निः तदाधारो व्याधिः देहं मृत्युश्च ॥ कङ्केरिच्चास्य वा ॥ ६३९ ॥ ककुङ् गतावित्यस्मादणिः प्रत्ययो धातोरस्य चेकारो वा भवति । कङ्कणिः कङ्कणम् । किङ्कणिः घण्टा ॥ ककेर्णित् ॥ ६४० ॥ कक्कि लौल्य इत्यस्मात् णिदणिः प्रत्ययो भवति । काकणिः मानविशेषः ॥ कृषेश्च चादेः ॥ ६४१ ॥ कृषींत् विलेखने इत्यस्मादणिः प्रत्यय आदेश्च चकारो भवति । चर्षणिः चमूः अग्निः बुद्धिः व्यवसायः वेश्या वृषश्च ॥ क्षिपेः कित् ॥ ६४२ ॥ क्षिपींत् प्रेरणे इत्यस्मात् किदणिः प्रत्ययो भवति क्षिपणिः आयुधम् बडिशबन्धकः चर्मकृता पाषाणसर्जनी च ॥आङः कृहृशुषेः सनः ॥६४३॥ आङः परेभ्यो डुकृंग् करणे हृंग् हरणे शुषंच् शोषणे इत्येतेभ्यः सन्नन्तेभ्योऽणिः प्रत्ययो भवति ।आचिकीर्षणिः व्यवसायः ।आजिहीर्षणिः श्रीः । आशुशुक्षणिः अग्नि वायुश्च ॥ वारिसर्त्यादेरिणक् ॥ ६४४ ॥एभ्यः किदिणिः प्रत्ययो भवति । वृगट् वरणे ण्यन्तः । वारिणिः पशुः पशुवृत्तिश्च । सृं गतौ । सिरिणिः अग्निः वज्रं च । आदिग्रहणादन्येऽपि ॥ अदेस्त्रीणिः ॥ ६४५ ॥ अदंक् भक्षणे इत्यस्मात् त्रीणिः प्रत्ययो भवति । अत्त्रीणिः कृमिजातिः ॥ प्लुज्ञायजिषपिपदिवसिवितसिभ्यस्तिः ॥ ६४६ ॥ प्लोतिः चीरम । ज्ञायते त्रैलोक्यस्य त्रातेति ज्ञातिः इक्ष्वाकुवृषभः स्वजनश्च । यष्टिः दण्डः लता च । षप समवाये । सप्तिः अश्वः । पत्तिः पदातिः वस्तिः मूत्राधारः चर्मपुटः स्नेहोपकरणं । तसूच् उपक्षये विपूर्वः । वितस्तिः अधहस्तः ॥ प्रथेर्लुक् च वा ॥ ६४७ ॥ प्रथिष् प्रख्याने इत्यस्मात् तिः प्रत्ययोऽन्तस्य च लुग्वा भवति । वृक्षं प्रति विद्योतते । प्रतिष्ठितः । पक्षे, प्रत्तिः प्रथनं भागश्च ॥ कोर्यषादिः ॥ ६४८ ॥ कुंङ् शब्दे इत्यस्मात् यषादिस्तिः प्रत्ययो भवति । कोयष्टिः पक्षिविशेषः ॥ ग्रो गृष् च ॥ ६४९ ॥ गॄत् निगरणे इत्यस्मात् तिः

प्रत्ययोऽस्य च गृष् इत्यादेशो भवति । गृष्टिः सकृत् प्रसूता गौः ॥ सोरस्तेः शित् ॥ ६५० ॥ सुपूर्वात् असक् भुवीत्यस्मात् शित् तिः प्रत्ययो भवति । स्वस्ति कल्याणम् । शित्वाद्भूभावाल्लुगभावः ॥ दृमुषिकृषिरिषिविषिशोशुच्यसिपूयीण्प्रभृतिभ्यः कित् ॥ ६५१ ॥ एभ्यः कित् तिः प्रत्ययो भवति । दृङ्त् आदरे । दृतिः छागादित्वङ्मयो जलाधारः । मुषश् स्तेये । मुष्टिः अङ्गुलिसंनिवेशविशेषः ॥ कृषींत् विलेखने । कृष्टिः पण्डितः । रिष् हिंसायाम् । रिष्टिः प्रहरणम् । विष्लृंकी व्याप्तौ । विष्टिः अवेतनकर्मकरः । शोंच् तक्षणे । शितिः कृष्णः कृशश्च । शुच् शोके । शुक्तिः मुक्तादिः । अशौटि व्याप्तौ । अष्टिः छन्दोविशेषः । पूयैङ् दुर्गन्धविशरणयोः । पूतिः दुर्गन्धः दुष्टम् तृणजातिश्च । इंण्क् गतौ । इति हेत्वादौ । डुडुभृंग्क् पोषणे च प्रपूर्वः । प्रभृतिः आदिः ॥ कुच्योर्नोऽन्तश्च ॥ ६५२ ॥ आभ्यां कित् तिः प्रत्ययो नकारश्चान्तो भवति कुङ् शब्दे । कुन्तिः राजा ।कुन्तयः जनपदः । चिग्ट् चयने । चिन्तिः राजा ॥ खल्यमिरमिवहिवस्यर्तेरतिः ॥ ६५३ ॥ एभ्योऽतिः प्रत्ययो भवति । खल संचये च । खलतिः खल्वाटः । अमू गतौ । अमतिः चातकः छागः प्रावृट् मार्गः व्याधिः गतिश्च । रमिं क्रीडायाम् । रमतिः क्रीडा कामः स्वर्गः स्वभावश्च । वहीं प्रापणे । वहतिः गौः वायुः अमात्यः अपत्यं कुटुम्बं च । वसं निवासे । वसतिः निवासः ग्रामसंनिवेशश्च । ऋंक् गतौ । अरतिः वायुः सरणम् असुखं क्रोधः वर्म च ॥ हन्तेरंह् च ॥ ६५४ ॥ हनंक् हिंसागत्योरित्यस्मादतिः प्रत्ययोऽस्य च अंह् इत्यादेशो भवति । अंहतिः व्याधिः पन्थाः रथश्च ॥ वृगो व्रत् च ॥ ६५५ ॥ वृग्ट् वरण इत्यस्मादतिः प्रत्ययोऽस्य च व्रत् इत्यादेशो भवति । व्रततिः वल्ली ॥ अञ्चेः क च वा ॥ ६५६ ॥ अञ्चू गतौ चेत्यस्मादतिः प्रत्ययोऽस्य च कू इत्यन्तादेशो वा भवति । अङ्कतिः वायुः अग्निः प्रजापतिश्च । अञ्चतिः अग्निः ॥ वातेर्णिद्वा ॥ ६५७ ॥ वांक् गतिगन्धनयोरित्यस्मादतिः प्रत्ययः सच णित् वा भवति । वायतिः वातः ।

वातिः गन्धमिश्रपवनः ॥यो: कित् ६५८॥ युक् मिश्रणे इत्यस्मादतिः प्रत्ययः किद्भवति युवतिः तरुणी ॥ पातेर्वा ॥६५९॥पांक् रक्षणे इत्यस्मादतिः प्रत्ययः स च किद्वा भवति ।पतिः भर्ता ।पातिः भर्ता रक्षिता प्रभुश्च॥अगिविलिपुलिक्षिपेरस्तिक् ॥६६०॥एभ्यः किदस्तिः प्रत्ययो भवति ।अग कुटिलायां गतौ ।अगस्तिः । विलत् वरणे । विलस्तिः पुलमहत्त्वे ।पुलस्तिः ।क्षिपींत् प्रेरणे । क्षिपस्तिः ।एते लौकिका ऋषयः । अगस्तिः वृक्षजातिश्च ॥गृधेर्गभ् च ॥६६१॥ गृधूच् अभिकाङ्क्षायामित्यस्मादस्तिक् प्रत्ययो गभ् चास्यादेशो भवति ।गभस्तिः रश्मिः ॥वस्यर्तियामातिः॥६६२॥ आभ्यामातिः प्रत्ययो भवति । वसं निवासे । वसातयः जनपदः । ऋंक् गतौ । अरातिः रिपुः ॥ अभेर्यामाभ्याम् ॥ ६६३ ॥ अभिपूर्वाभ्यामाभ्यामातिः प्रत्ययो भवति । यांक् प्रापणे । मांक् माने । अभियातिः अभिमातिश्च शत्रुः ॥ यजो य च ॥ ६६५ यजीं देवपूजादावित्यस्मादातिः प्रत्ययोऽस्य च यकारोऽन्तादेशो भवति । ययातिः राजा ॥ वद्यविच्छदिभूभ्योऽन्तिः ॥ ६६५ ॥ एभ्योऽन्तिः प्रत्ययो भवति । वद व्यक्तायां वाचि । वदन्तिः कथा । अव रक्षणादिषु । अवन्तिः राजा । अवन्तयः जनपदः । छदण् अपवारणे । युजादिर्विकल्पितणिजन्तत्वादण्यन्तः । छदन्तिः गृहच्छादनद्रव्यम ॥ भू सत्तायाम । भवन्तिः कालः लोकस्थितिश्च ॥ शकेरुन्तिः ॥ शक्लृंट् शक्तावित्यस्मादुन्तिः प्रत्ययो भवति । शकुन्तिः पक्षी ॥ नञो दागो डितिः ॥ ६६७ नञ्पूर्वात् डुदांग्क् दाने इत्यस्मात् डिदितिः प्रत्ययो भवति । अदितिः देवमाता ॥ देङः ॥ ६६८ ॥ देङ् रक्षणे इत्यस्मात् डिदितिः प्रत्ययो भवति । दितिः असुरमाता ॥ वीसञ्ज्यसिभ्यस्थिक् ॥६६९॥ एभ्यस्थिक् प्रत्ययो भवति । वींक् प्रजनादिषु । वीथिः मार्गः अंष। सञ्ज ।सक्थि ऊरुः शकटाङ्गं च । असूच् क्षेपणे ।अस्थि पञ्चमो धातुः॥सारेरथिः॥६७०॥ सृं गतावित्यस्मात् ण्यन्तादथिः प्रत्ययो भवति ।सारथिः यन्ता॥निषञ्जेर्थित्॥६७१॥ निपूर्वात् षञ्जं सङ्गे इत्यस्मात् थिदथिः प्रत्ययो भवति ।निषङ्गथिः

रूढः धनुर्धरश्च । घित्करणं गत्वार्थम् ॥उदर्त्तेर्णिद्वा ॥६७२॥ उत्पूर्वात् ऋंक् गतावित्यस्मात् अथिः प्रत्यय स च णिद्वा भवति ।उदारथिः विष्णुः ।उदारथिः विप्रः काष्ठं समुद्रः अनड्वांश्च ॥अतेरिथिः॥६७३॥अत् सातत्यगमने इत्यस्मादिथिः प्रत्ययो भवति । अतिथिः पात्रतमो भिक्षावृत्तिः ॥तेनेर्डित्॥६७४॥तनूयी विस्तारे इत्यस्मात् डिदिथिः प्रत्ययो भवति । तिथिः प्रतिपदादिः ॥ उषेरधिः । ६७५ ॥ उषू दाहे इत्यस्मादधिः प्रत्ययो भवति ॥ ओषधिः उद्भिद्विशेषः विदो रधिक् ॥ ६७६ ॥ विदक् ज्ञाने इत्यस्मात् किद्रधिः प्रत्ययो भवति । विद्रधिः व्याधिविशेषः ॥ वीयुसुवह्यगिभ्यो निः ॥ ६७७ ॥ वींक् प्रजनादौ । वेनिः व्याधिः नदी च । योनिः प्रजननमङ्गम् उत्पत्तिस्थानं च । सोनिः सवनम् । वह्निः पावकः बलीवर्दश्च । अग कुटिलायां गतौ । अग्निः पावकः ॥ घूशाशीङो ह्रस्वश्च ॥ ६७८ ॥ एभ्यो निः प्रत्ययो ह्रस्वश्चैषां भवति । धूगृश् कम्पने । धुनिः नदी । शोंच् तक्षणे । शनिः सौरिः । शीङ्क् स्वप्ने । शिनिः यादवः वर्णश्च ॥ लूधूपृच्छिभ्यः कित् ॥ ६७९ ॥ एभ्यः किन्निः प्रत्ययो भवति । लूग्श् छेदने । लूनिः लवनः । धूगृश् कम्पने । धूनिः वायुः । प्रच्छंत् ज्ञीप्सायाम् । पृश्निः वर्णः अल्पतनुः किरणः स्त्रगंश्च ॥ सद्विवृत्यमिधम्यश्यटिकटयवेरनिः ॥ ६८० ॥ सदनिः जलम् । वर्तनिः पन्थाः देशनाम च । अमनिः अग्निः । धमः सौत्रः । धमनिः मन्या रसवहा च शिरा ॥ अशौटि व्याप्तौ । अशनिः इन्द्रायुधम् । अट गतौ । अटनिः चापकोटिः । कटै वर्षावरणयोः । कटनिः शैलमेखला । अवनिः भूः ॥ रञ्जेः कित् ॥ ६८१ ॥ रञ्जीं रागे इत्यस्मात् किदनिः प्रत्ययो भवति । रजनिः रात्रिः ॥ अर्तेरत्निः ॥ ६८२ ॥ ऋंक् गतावित्यस्मादत्निः प्रत्ययो भवति । अरत्निः बाहुमध्यम् शमः उत्कनिष्ठश्च हस्तः ॥ एधेरिनिः ॥ ६८३ ॥ एधि वृद्धावित्यस्मादिनिः प्रत्ययो भवति । एधिनिः मेदिनी ॥ शकेरुनिः ॥ ६८४ ॥ शकूलंट् शक्तावित्यस्मादुनिः प्रत्ययो भवति । शकुनिः पक्षी ॥ अदेर्मनिः ॥ ६८५ ॥

अदंक् भक्षणे इत्यस्मान्मनिः प्रत्ययो भवति । अद्मनिः पशूनां भक्षणद्रोणी अग्निः जयः हस्ती अश्वः ताळु च ॥ दमेर्दुभिर्दुम् च ॥ ६८६ ॥ दमूच् उपशमे इत्यस्मात् दुभिः प्रत्ययोऽस्य च दुमित्यादेशो भवति ।दुन्दुभिः देवतूर्यम् । ॥ नीसाधृयुयृवलिदलिभ्यो मिः ॥ ६९७ ॥ एभ्यो मिः प्रत्ययो भवति । णींग् प्रापणे । नेमिः चक्रधारा । षोंच् अन्तकर्मणि । सामि अर्धवाच्यव्ययम् । वृगूट् वरणे । वर्मिः वल्मीककृमिः । युक् मिश्रणे । योमिः शकुनिः । शृश् हिंसायाम् । शर्मिः मृगः । वलि संवरणे । वलिमः इन्द्रः समुद्रश्च । दल विशरणे । दलिमः आयुधम् इन्द्रः समुद्रः चक्रः विषं च ॥ अशो रश्चादिः ॥ ६८८ ॥ अशौटि व्याप्तावित्यस्मान्मिः प्रत्ययो रेफश्च धातोरादिर्भवति । रश्मिः प्रग्रहः मयूखश्च ॥ स्रतेरूच्चातः ॥ ६८९ ॥ आभ्यामिः प्रत्ययो गुणे च कृतेऽकारस्योकारो भवति । स्रृं गतौ । स्रूर्मिः स्थूणा । ऋक् गतौ । ऊर्मिः तरङ्गः ॥कृभूभ्यां कित्॥६९०॥आभ्यां किन्मिः प्रत्ययो भवति । डु कृंग् करणे । कृमिः क्षुद्रजन्तुजातिः । भू सत्तायाम् । भूमिः वसुधा ॥ ॥ क्वणेर्डयिः ॥ ६९१ ॥ क्वण शब्दे इत्यस्मात् डिद्यिः प्रत्ययो भवति । क्वयिः पक्षिविशेषः ॥ तङ्किवङ्क्यङ्कमङ्क्यंहिशदसघशौवपिवशिभ्यो रिः ॥ ६९२ ॥ तकु कृच्छ्रजीवने । तङ्क्रिः युवा । वकुङ् कौटिल्ये । वङ्क्रिः शल्यं परशुका रथः अहः कुटिलश्च । अकुङ् लक्षणे । अङ्क्रिः चिह्नम् वंशकठिनिकश्च । मकुङ् मण्डने । मङ्क्रिः मण्डनम् शठः प्रवकश्च । अहुङ् गतौ । अंह्रिः पादः । अङ्घ्रिरित्येके । अघुङ् गत्याक्षेपे । अङ्घ्रिः । अद्रिः वज्रः भस्म हस्ती गिरिः ऋषिः शोभनश्च । अदंक् भक्षणे । अद्रिः पर्वतः । सद्रिः हस्ती गिरिः मेघश्च । अशौटि: व्याप्तौ । अश्रिः कोटिः । वश्रिः केदारः । वश्रिः समूहः ॥ भूसूकुशिविशिशुभिभ्यः कित् ॥ ६९३ ॥ एभ्यः किद्रिः प्रत्ययो भवति । भूरि प्रभूतम् । काञ्चनं च । सूरिः आचार्यः पण्डितश्च । कुशच् श्लेषणे । कुश्रिः ऋषिः । विश्रिः मृत्युः ऋषिश्च । शुभ्रिः यतिः विप्रः दर्शनीयं शुभं सत्यं च ॥ जॄशो रश्च वः

जृषूच् जरसीत्यस्मात् किद्रिः प्रत्यय ईरि सति रेफस्य वकारश्च भवति । जीव्रिः । शरीरम् ॥ कुण्ड्रिकुम्ब्यादयः ॥ ॥ ६९५ ॥ कुन्द्र्यादयः शब्दाः किद्रिप्रत्ययान्ता निपात्यन्ते । कुपेः कौतेश्च दश्चान्तः कुण्ड्रिः ऋषिः । कुद्रिः पर्वतः ऋषिः समुद्रश्च ॥ आदिग्रहणात् क्षौतेर्दोऽन्तः । क्षुद्रिः समुद्रः । अर्तेर्गोऽन्तः । ऋग्रिः लोकनाथः । शकेः शक्रिः बलवा-नित्यादयोऽपि भवन्ति ॥ राशदिशकिकद्यदिभ्यस्त्रिः ॥ ६९६ ॥ रांक् दाने । रात्रिः निशा । शद्लृं शातने । शत्रिः कुञ्जरः क्रौञ्चश्च ।शक्लृंट् शक्तौ ।शक्त्रिः क्रौञ्चः ऋषिश्च । कद वैक्लव्ये सौत्रः ।कत्रिः ऋषिः ।अदंक् भक्षणे । अत्रिः ऋषिः।।पतेरत्रिः।।६९७।।पत्लृ गतावित्यस्माद्त्रिः प्रत्ययो भवति । पतत्रिः पक्षी ॥ नदिवल्लथर्तिकृतेररिः ॥६९८॥णद अव्यक्ते शब्दे ।नदरिः पटहः ।वल्लि संवरणे ।वल्लरिः लता वीणा सस्यमञ्जरी च ।ऋंक् गतौ ।अररिः क-पाटम् । कृतैत् छेदने । कर्तरिः केशादिकर्तनयन्त्रम् ॥ मस्यसिघसिजस्यङ्किसहिभ्य उरिः ॥ ६९९ ॥ मसैच् परि-णामे । मसुरिः मरीचिः । असूच् क्षेपणे । असुरिः संग्रामः । घस्लृं अदने । घसुरिः अग्निः जसूच् मोक्षणे । जसुरिः समाप्तिः अशनिः भरणिः क्रोधश्च । अङ्कु गतौ । अङ्कुरिः करशाखा । लत्वे, अङ्गुलिः । षहि मर्षणे । सहुरिः पृथ्वी अक्रोधनः अनड्वान् संग्रामः अन्धकारः सूर्यश्च ॥ मुहेः कित् ॥ ७०० ॥ मुहौच् वैचित्त्ये इत्यस्मात् किदुरिः प्रत्ययो भवति । मुहुरिः सूर्यः अनड्वांश्च ॥ धूमूभ्यां लिक्लिणौ ॥ ७०१ ॥ आभ्यां यथासंख्यं लिक् लिण् एतौ प्रत्ययौ भवतः । धूग्श् कम्पने । धूलिः पांसुः । मुङ् बन्धने । मौलिः मुकुटः ॥ पाटयञ्जिभ्यामलिः ॥ ७०२ ॥ आभ्याम-लिः प्रत्ययो भवति । पट गतौ ण्यन्तः । पाटलिः वृक्षविशेषः । अञ्जौप् व्यक्त्यादौ । अञ्जलिः पाणिपुटः प्रणामहस्त-युग्मं च ॥ मासालिभ्यामोकुलिमली ॥ ७०३ ॥ आभ्यां यथासंख्यमोकुलिमलीत्येतौ प्रत्ययौ भवतः । मांक् माने मोकुलिः काकः । शल गतौ ण्यन्तः । शाल्मलिः वृक्षविशेषः ॥ दृपृवभ्यो विः ॥ ७०४ ॥ एभ्यो विः प्रत्ययो भ-

वति । दॄ विदारणे । दर्विः तद्दूः । पॄ पालनपूरणयोः । पर्विः कङ्कः हिंस्रश्च । वृङ् वरणे । वर्विः शकटं धात्री काकः श्येनश्च । जॄशॄस्तॄजागृकृनीघृषिभ्यो क्वित् ॥ ७०५ ॥ एभ्यो क्विन्‌ प्रत्ययो भवति । जॄष् जरसि । जीर्विः वायुः पशुः कण्टकः शकटः मद्गुः कायम् गुल्मं शङ्का वृद्धः वृद्धभावश्च । शॄ हिंसायाम् । शीर्विः हिंस्रः कृमिः न्यङ्कुश्च । स्तॄञ् आच्छादने । स्तीर्विः गर्विष्ठः अध्वर्युः भगः तनुः रुधिरं भयम् तृणजातिः नभः अजश्च । जागृक् निद्राक्षये ।जागृविः राजा अग्निः प्रबुद्धश्च ।क्वित्वान्न गुणः ।डु कृंग् करणे। कृविः रुद्रः तन्तुवायः तन्तुवायद्रव्यम् राजा च । यदुपज्ञं कृवय इति पुरा पञ्चालानाचक्षते । णींग् प्रापणे । नीविः परिधानग्रन्थिः मूलधनं च । घृषू संघर्षे । घृष्विः वराहः वायुः अग्निश्च ॥ ७०५ ॥ छविछिविस्फविस्फिविस्थविस्थिविदविदीविकिकिविदिदिविदीदिविकिकोदिविकिकिदीविशिव्यटव्यादयः ॥७०६ ॥ एते क्विन्प्रत्ययान्ता निपात्यन्ते । छ्यतेर्ह्रस्वश्च । छविः त्वक् छाया आवरणं च । छिदेर्लुक् च । छिविः फल्गुद्रव्यम् । स्फायतेः स्फस्फिभावौ च । स्फविः वृक्षजातिः । स्फिविः वृक्षः उदश्विच्च । तिष्ठतेः स्थस्थिभावौ च । स्थविः प्रसेवकः तन्तुवायः सीमा अग्निः अजङ्गमः स्वर्गः कुष्ठी कुष्ठिमांसं फलं च स्थिविः सीमा । दमेर्लुक् च । दविः धर्मशीलः दाता स्थानं कालश्च । दीव्यतेर्दीर्घश्च । दीविः कितवः द्युतिमान् कालः व्याघ्रजातिश्च । कितेर्द्वित्वं पूर्वस्य चत्वाभावो लुक् च । किकिविः पक्षिविशेषः । दिवेर्द्वित्वं पूर्वस्य दीर्घश्च वा दिदिविः स्वर्गश्च । ददिविः अन्नं स्वर्गश्च । कितेः किकीदिभावश्च । किकोदिविः वर्णः पक्षी च । किकिपूर्वात् दीव्यतेर्दीर्घश्च । किकीति कुर्वन् दीव्यतीति किकिदीविः चाषः । शीङो ह्रस्वश्च । शिविः राजा अटेरत् चान्तः । अटविः अरण्यम् । आदिग्रहणादन्येऽपि ॥ पुषिप्लुषिशुषिकुष्यसिभ्यः सिक् ॥ ७०७ ॥ एभ्यः कित् सिः प्रत्ययोभवति । पुषूप्लुषू दाहे । पुक्षिः अग्निः उदपानश्च । प्लुक्षिः अग्निः जठरं कुशूलश्च । शुषंच् शोषणे । शुक्षिः वायुः

निदाघः यवासकः तेजश्च । कुषश् निष्कर्षे । कुक्षिः जठरम् । अशौटि व्याप्तौ । अक्षि नेत्रम् ॥ गोपादेरनेरसिः ॥ ७०८ ॥ गोप इत्यादिभ्यः परादनक् प्राणने इत्यस्मात् असिः प्रत्ययो भवति । गोपानसिः सौधाग्रभागच्छदिः । चित्रानसिः जलचरः । एकानसिः उज्जयनी । वाराणसिः काशी नगरी ॥ वृधृपॄस्साभ्यो नसिः ॥७०९॥ एभ्यो नसिः प्रत्ययो भवति । वृगृट् वरणे । वर्णसिः तरुः । धृंग् धारणे । धर्णसिः शैलः लोकपालः अलं माता च । पॄश् पालनपूरणयोः । पर्णसिः जलचरः उलूखलं शाकादिश्च । वॄश् वरणे वर्णसिः भूमिः षोंच् अन्तकर्मणि । सानसिः स्नेहः नखः हिरण्यम् ऋणं सखा सनातनश्च ॥ व्रियो हिक् ॥ ७१० ॥ व्रीश् वरणे इत्यस्मात् कित् हिः प्रत्ययो भवति । व्रीहिः धान्यविशेषः ॥ तृस्तृतन्द्रितन्त्र्यविभ्य ईः ॥ ७११ ॥ एभ्य ईः प्रत्ययो भवति । तॄप्लवनतरणयोः । तरीः नौः अग्निः वायुः प्लवनश्च ॥ स्तॄग्श् आच्छादने । स्तरीः तृणं धूमः मेघः नदी शय्या च । तन्द्रिः सादमोहनयोः सौत्रः । तन्द्रीः मोहनिद्रा । तन्त्रिण् कुटुम्बधारणे । तन्त्रीः शुष्कस्नायुः वादित्रं वीणा आलस्यं च । अव रक्षणादौ । अवीः प्रकाशः आदित्यः भूमिः पशुः राजा स्त्री च ॥ नडेर्णित् ॥ ७१२ ॥ नडेः सौत्रादीः प्रत्ययः स च णिद्भवति । नाडी आयतशुषिरं द्रव्यम् अर्धमुहूर्तश्च ॥ वातात् प्रमः कित् ॥ ७१३ ॥ वातपूर्वपदात् प्रेणोपसृष्टात् मांक् माने इत्यस्मात् किदीः प्रत्ययो भवति । वातप्रमीः वात्या अश्वः वातमृगः पक्षी शमीवृक्षश्च ॥ यापाभ्यां द्वे च ॥ ७१४ ॥ आभ्यां किदीः प्रत्ययोऽनयोश्च द्वे रूपे भवतः । यांक् प्रापणे । ययीः मोक्षमार्गः दिव्यदृष्टिः आदित्यः अश्वश्च । पां पाने । पपीः रश्मिः सूर्यः हस्ती च ॥ ७१४ ॥ लक्षेर्मोऽन्तश्च ॥ ७१५ ॥ लक्षीण् दर्शनाङ्कनयोरित्यस्मादीः प्रत्ययो मकारश्चान्तो भवति । लक्ष्मीः श्रीः ॥ भृमृतॄत्सरितनिधन्यनिमनिमस्जिशीवटिकटिपटिगडिचठच्यसिवसिव्रपिघृस्तृस्निहिक्लिदिकन्दीन्दिविन्ध्यन्धिवन्ध्यणिलोष्टिकुन्थिभ्य

उः ॥७१६॥ डुडु भृंगृक् पोषणे च भृंग् भरणे वा । भरुः समुद्रः वर्णिः भर्ता च । मृंत् प्राणत्यागे । मरुः निर्जलो देशः गिरिश्च । तरुः वृक्षः । त्सर छद्मगतौ । त्सरुः आदर्शखड्गादिग्रहणप्रदेशः वञ्चकः क्षुरिका च । तनूयी विस्तारे । तनुः देहः सूक्ष्मश्च । धन धान्ये सौत्रः । धनुः अस्त्रं दानपात्रं च । अनक् प्राणने । अनुः प्राणः । अनु पश्चादाद्यर्थेऽव्ययम् । मनिच् ज्ञाने । मनूयी बोधने वा । मनुः प्रजापतिः । मद्गुः जलवायसः । शीङ्क् स्वप्ने । शयुः अजगरः स्वप्नः आदित्यश्च । वट वेष्टने । वटुः माणवकः । कटे वर्षावरणयोः । कटुः रसविशेषः । पट गतौ । पटुः दक्षः । गड सेचने । गडुः घाटामस्तकयोर्मध्ये मांसपिण्डः स्फोटश्च । चंचू गतौ । चंचुः पक्षिमुखम् । असवः प्राणाः । वसं निवासे । वसु द्रव्यं तेजो देवता च । वसुः कश्चिद्राजा । त्रपु लोहविशेषः । शॄश् हिंसायाम् । शरुः क्रोधः आयुधः हिंस्रश्च । स्वरुः प्रतापः वज्रः वज्रास्फालनं च । स्नेहः चन्द्रमाः सन्निपातजो व्याधिविशेषः पित्तं वनस्पतिश्च । क्लिदौच् आर्द्रभावे । क्लेदुः क्षेत्रं चन्द्रः । भगम् शरीरभङ्गश्च । क्लेदयतीति क्लेदुः चन्द्रमा इत्यन्ये । कदु रोदनाह्वानयोः । कन्दुः पाकस्थानम् सूत्रोतं च क्रीडनम् । इदु परमैश्वर्ये । इन्दुः चन्द्रः । विदु अवयवे । बिन्दुः विप्रुट् । अन्धण् दृष्ट्युपसंहारे । अन्धः कूपः व्रणश्च । बन्धंश् बन्धने । बन्धुः स्वजनः । बन्धु द्रव्यं । अण शब्दे । अणुः पुद्गलः सूक्ष्मः रालकादिश्च धान्यविशेषः । लोष्टि संघाते । लोष्टुः मृत्पिण्डः । कुन्थश् संक्लेशे । कुन्थुः सूक्ष्मजन्तुः ॥ स्यन्दिसृजिभ्यां सिन्धरज्जौ च ॥ ७१७ ॥ आभ्यामुः प्रत्ययोऽनयोश्च यथासंख्यं सिन्धू रज्ज इत्यादेशौ भवतः । स्यन्दौङ् स्रवणे । सिन्धुः नदः नदी समुद्रश्च । सृजंत् विसर्गे, सृजिच् विसर्गे वा । रज्जुः दवरकः ॥ पंसेर्दीर्घश्च ॥ ७१८ ॥ पसुण् नाशने इत्यस्मादुः प्रत्ययो दीर्घश्चास्य भवति । पाशुः पार्थिवं राजः ॥ अशोरान्नोऽन्तश्च ॥ ७१९ ॥ अशौटि व्याप्ताविस्यस्मादुः प्रत्ययोऽकाराच्च परो नोऽन्तो भवति । अंशुः रश्मिः सूर्यश्च । प्रांशुः दीर्घः ॥ नमेर्नाक् च ॥ ७२० ॥

णमं प्रह्वत्वे इत्यस्मादुः प्रत्ययोऽस्य च नाकू इत्यादेशो भवति । नाकुः व्यलीकम् वनस्पतिः ऋषिः वल्मीकश्च ॥मनिजनिभ्यां धतौ च ॥ ७२१ ॥ आभ्यामुः प्रत्ययोऽनयोश्च यथासंख्यं धकारतकारौ भवतः । मनिंच् ज्ञाने । मधु क्षौद्रम् शीधु च । मधुः असुरः मासश्च चैत्रः । जनैचि प्रादुर्भावे । जतु लाक्षा ॥ अर्जेऋजू च ॥ ७२२ ॥ अर्जे अर्जने इत्यस्मादुः प्रत्ययोऽस्य च ऋजू इत्यादेशो भवति । ऋजु अकुटिलम् ॥ ७२२ ॥ कृतेस्तर्कू च ॥ ७२३ ॥ कृतैत् छेदने कृतैप् वेष्टने इत्यस्माद्वा उः प्रत्ययो भवति अस्य च तर्कू इत्यादेशः । तर्कुः चुन्दः सूत्रवेष्टनशलाका च ॥ ७२३ ॥ नेरश्चेः ॥ ७२४ ॥ निपूर्वादश्चतेरुः प्रत्ययो भवति । न्यङ्कुः मृगः ऋषिश्च ॥ किमः श्रो णित् ॥ ७२५ ॥ किम्पूर्वात् शॄश् हिंसायामित्यस्मात् णिदुः प्रत्ययो भवति । किंशारुः शूकः धान्यशिखा । उष्ट्रः हिंस्रः इषुश्च ॥ मिवहिचरिचटिभ्यो वा ॥ ७२६ ॥ एभ्यः उः प्रत्ययः स च णिद्वा भवति । डु मिंग्ट् प्रक्षेपणे । मायुः पित्तं मानं शब्दश्च । गोमायुः शृगालः । मयुः किन्नरः उष्टः प्रक्षेपः आकूतं । बाहुलकादात्वाभावः । वहीं प्रापणे । बाहुः भुजः । बहु प्रभूतम् चर भक्षणे च । चारु शोभनम् । चरन्त्यस्माद्देवपितृभूतानि इत्यपादानेऽपि भीमादित्वात्, चरुः देवतोद्देशेन पाकः स्थाली च । चटण् भेदे । चाटु प्रियाचरणम् पटुजनः प्रियवादी स्फुटवादी दर्ध्यग्रम शिष्यश्च । चटु प्रियाचरणम् ॥ ऋतॄसृभ्रादिभ्यो रो लश्च ॥ ७२७ ॥ एभ्यो णिदुः प्रत्ययो रेफस्य च लकारो भवति । ऋंक् गतो, ऋंत् प्रापणे च वा । आलुः श्लेष्मा श्लेष्मातकः कन्दविशेषश्च । तालु काकुदम् । शालुः हिंस्रः कषायश्च मालुः पत्र लता यस्या मालुधानीति प्रसिद्धिः । भालुः इन्द्रः । आदिग्रहणादन्येऽपि ॥ कृकस्थूराद्वचः कू च ॥ ७२८ ॥ आभ्यां परात् वचो णिदुः प्रत्ययो भवति ककारश्चान्तादेशः । वचंक् भाषणे, ब्रूग्क् व्यक्तायां वाचि । कृकमव्यक्तं ब्रूते वक्ति वा कृकवाकुः कुक्कुटः कृकलासः खञ्जरीटश्च । एवं स्थूरवाकुः उच्चैर्ध्वनिः ॥ पृकाहृषिधृषीषिकुहिभिदिविदिमृदिव्य-

धिगृध्यादिभ्यः कित् ॥ ७२९ ॥ एभ्यः किदुः प्रत्ययो भवति । पुरुः महान् लोकः समुद्रः यजमानः राजा च कश्चित् । कुः पृथ्वी हृषच् तुष्टौ, हृषू अलीके वा । हृषुः तुष्टः अलीकः सूर्याग्निशशिनश्च । ञिधृषाट् प्रागल्भ्ये । धृषुः प्रगल्भः संतापः उत्साहः पर्वतश्च । इषत् इच्छायाम् । इषुः शरः । कुहणि विस्मापने । कुहुः नष्टचन्द्रामावास्या । भिदूंपी विदारणे । भिदुः वज्रः कन्दर्पश्च । विदक् ज्ञाने । विदुः हस्तिमस्तकैकदेशः । मृदश् क्षोदे । मृदुः अकठिनः । विधुः चन्द्रः वायुः अग्निश्च । गृधूच् अभिकाङ्क्षायाम् । गृधुः कामः । आदिग्रहणात् पूरीच आप्यायने, पूरण् आप्यायने वा । पूरितमनेन यशसा सर्वमिति पूरुः राजर्षिः । एवमन्येऽपि ॥ रभिप्रथिभ्यामृच्च रस्य ॥ ७३० ॥ आभ्यां किदुः प्रत्ययो रेफस्य च ऋकारो भवति । रभि राभस्ये । ऋभवः देवाः प्रथिष् प्रख्याने । पृथुः राजा विस्तीर्णश्च ॥ स्पशिभ्रस्जेः स्लुक् च ॥ ७३१ ॥ आभ्यां किदुः प्रत्ययः सकारस्य लुक् च भवति । स्पशिः सौत्रः तालव्यान्तः । पशुः तिर्यङ् मन्त्रवध्यश्च जनः । भ्रस्जीत् पाके । भृगुः प्रपातः ब्राह्मणश्च सुतः । कित्त्वात् ग्रहव्रश्चभ्रस्जप्रच्छ इति य्वृत् । न्यङ्क्वुद्गमेघादय इति गत्वम् ॥दुःस्वपवनिभ्यः स्थः॥ ७३२॥ दुस् सु अप वनि इत्येतेभ्यः परात् ष्ठां गतिनिवृत्तावित्यस्मात् किदुः प्रत्ययो भवति । दुःष्ठु अशोभनम् । सुष्ठु सातिशयम् । अपष्ठु वामम् । वनिष्ठुः वपासंनिहितोऽवयवः अश्वः संभक्तः अपानं च ॥ हनियाकृभृपॄतॄभ्यो द्वे च ॥ ७३३ ॥ एभ्यः किदुः प्रत्ययो द्वे रूपे चैषां भवतः हनंक् हिंसागत्योः । जघ्नुः इन्द्रः वेगवांश्च । यांक् प्रापणे । ययुः अश्वः यायावरः स्वर्गमार्गश्च । डु कृंग् करणे । चक्रुः कमठः वैकुठश्च । डुडु भृंगक् पोषणे च, भृंगृक् भरणे वा । बभ्रुः ऋषिः नकुलः राजा वर्णश्च ॥ पॄश् पालनपूरणयोः । पुपुरुः समुद्रः चन्द्रः लोकश्च । तॄ प्लवनतरणयोः । तितिरुः पतङ्गः । त्रैङ् पालने । तत्रुः नौका ॥ कृग्र ऋत उर च ॥ ७३४ ॥ आभ्यां किदुः प्रत्यय ऋकारस्य चोर भवति । कृत् विक्षेपे । कुरुः

राजर्षिः । कुरवः जनपदः । गॄशू शब्दे । गुरुः आचार्यः लघुप्रतिपक्षः पूज्यश्च जनः ॥ पचेरिच्चातः ॥ ७३५ ॥ डुपचींष् पाके इत्यस्मादुः प्रत्ययोऽकारस्य चेकारो भवति । पिचुः निरस्थीकृतः कर्पासः ॥ अर्तेरूच्चः ॥ ७३६ ॥ ऋक् गतावित्यस्मादुः प्रत्ययोऽस्य च ऊरित्यादेशो भवति ऊरुः शरीराङ्गम् ॥ महत्युर्च ॥ ७३७ ॥ अर्तेर्महत्यभिधेये उः प्रत्ययोऽस्य चोरित्यादिशो भवति । उरु विस्तीर्णम् ॥ उड् च भे॥ ७३८ ॥ अर्तेर्भे नक्षत्रेऽभिधेये उः प्रत्ययो धातोश्च उडादेशो भवति । उडु नक्षत्रम् ॥ श्लिषेः क च ॥ ७३९ ॥॥ श्लिषंच् आलिङ्गने इत्यस्मात् किदुः प्रत्ययः ककारश्चान्तादेशो भवति । श्लिकुः मृगास्थि सव्यवसायः राज्यं ज्योतिषं सेवकश्च ॥ रङ्घिलङ्घिलिङ्गेर्नलुक् च ॥ ७४० एभ्य उः प्रत्ययो नकारस्य च लुग् भवति । रघुलघुङ् गतौ । रघुः राजा । लघु तुच्छं शीघ्रं च । लिगुण् चित्रीकरणे। लिगुः ऋषिः सेवकः मूर्खः भूमिविशेषश्च ॥ पीमृगमित्रदेवकुमारलोकधर्मविश्वसुम्नाश्माबेभ्यो युः ॥७४१॥ पीमृगमित्रदेवकुपारलोकधर्मविश्वसुम्नाश्मन् अव इत्येतेभ्यः परात् यांक् प्रापणे इत्यस्मात् किदुः प्रत्ययो भवति । पीयुः उलूकः आदित्यः सुवर्णं कालश्च । मृगयुः व्याधः मृगश्च । मित्रयुः ऋषिः मित्रवत्सलश्च । देवयुः धार्मिकः । कुमारयुः राजपुत्रः । लोकयुः वाक्यकुशलः जनः । धर्मयुः धार्मिकः । विश्वयुः वायुः । सुम्नयुः यजमानः अश्मयुः मूर्खः । अवयुः काव्यम् ॥ पराङ्भ्यां शॄखनिभ्यां डित् ॥ पराङ्पूर्वाभ्यां यथासंख्यं शॄखनिभ्यां डिदुः प्रत्ययो भवति । शॄश् हिंसायाम् । परान् शृणाति परशुः कुठारः । खनूग् अवदारणे । आखुः मूषिकः ॥ शुभेः स च वा ॥ ७४३ ॥ शुभिर्दीप्तावित्यस्मात् डिदुः प्रत्ययो भवति अस्य च दन्त्यः सो वा सुः शुश्च पूजायाम् । सुपुरुषः शुनासीरः द्युद्रुभ्याम् ॥ ७४४ ॥ आभ्यां डिदुः प्रत्ययो भवति । द्युक् अभिगमे । द्युः स्वर्गक्रीडा स्वर्गश्च । द्रुं गतौ । द्रुः वृक्षशाखा वृक्षश्च ॥ हरिपीतमितशतविकुकद्रयो द्रुवः ॥ ७४५ ॥ हरिपीतमितशतविकुकद्रु इत्येतेभ्यः परात् द्रुं

गताावित्यस्मात् डिदुः प्रत्ययो भवति । हरिद्रुः वृक्षः ऋषिः पर्वतश्च । पीतद्रुः देवदारुः । मितद्रुः समुद्रः तुरगः मितंगमश्च । शतद्रुर्नाम नदः नदी च । विद्रुः दारुप्रकारः वृक्षश्च । कुद्रुः विकलपादः । कद्रुर्नागमाता वन्हिजातिः गृहगोधा वर्णश्च ॥ केवयुभुरण्यध्वर्य्वादयः ॥ ७४६ ॥ केवय्वादयः शब्दा डिदुप्रत्ययान्ता निपात्यन्ते । केवलपूर्वाद्यातेर्लंलोपश्च । केवलो याति केवयुः ऋषिः । भूपूर्वाद्यातेर्भुरण् चादौ । भुवं याति भुरण्युः अग्निः । अध्वरं याति, पूर्वपदान्तलोपे, अध्वर्युः ऋत्विक् । आदिग्रहणात् चरन् याति चरण्युः वायुः । अभिपूर्वस्य चाश्नातेरभीशुः रश्मिः ॥ शः सन्वच्च ॥ ७४७ ॥ शोंच् तक्षणे इत्यस्मात् डिदुः प्रत्ययः स च सन्वद् भवति । सनि इवास्मिन् द्वित्वं पूर्वस्य चेत्वं भवतीत्यर्थः । शिशुः बालः ॥ तनेर्डउः ॥ ७४८ ॥ तनूयी विस्तारे इत्यस्मात् डिदउः प्रत्ययो भवति स च सन्वत् । तितउः परिपवनम् ॥ कैशीशमिरमिभ्यः कुः ॥७४९॥ काकुः स्वरविशेषः । शेकुः उद्भिद्विशेषः । शङ्कुः कीलकः बाणः शूलम् आयुधं चिन्हं छलकश्च । रङ्कुः मृगः ॥ ह्रियः किद्रो लश्च वा ॥ ७५० ॥ ह्रींक् लज्जायामित्यस्मात् कित् कुः प्रत्ययो रेफस्य च लकारो वा भवति । ह्लीकुः ह्रीकुश्च त्रपुजतुनी लज्जावांश्च । ह्रीकुः वनमार्जारः ॥ किरः ष च ॥७५१॥ कृत् विक्षेपे इत्यस्मात् कित् कुः प्रत्ययः षकारश्चान्तादेशो भवति । किष्कुः छायामानद्रव्यम् ॥ चटिकठिकपर्दिभ्य आकुः ॥ ७५२ ॥ एभ्य आकुः प्रत्ययो भवति । चटण् भेदे । चटाकुः ऋषिः शकुनिश्च । कठ कृच्छ्रजीवने । कठाकुः कुटुम्बपोषकः । पर्दि कुत्सिते शब्दे । पर्दाकुः भेकः वृश्चिकः अजगरश्च ॥ सिविकुटिकुठिकुकुषिकृषिभ्यः कित् ॥ ७५३ ॥ एभ्यः किदाकुः प्रत्ययो भवति । सिवाकुः ऋषिः । कुटाकुः विटपः । कुठिः सौत्रः । कुठाकुः श्वभ्रः ॥ कुवाकुः पक्षी । कुषश् निष्कर्षे । कुषाकुः मूषिकः अग्निः परोपतापी च । कृषीत् विलेखने । कृषाकुः कृषीवलः ॥ उपसर्गाच्चेर्डित् ॥ ७५४ ॥ उपसर्गपूर्वात् चिग्ट् चयने इत्यस्मात् डिदाकुः प्रत्ययो भवति ।

उपचाकुः संचाकुश्च ऋषिः निचाकुः निपुणः ऋषिश्च ॥ शलेरङ्कुः ॥ ७५५ ॥ शल गतावित्यस्मात् अङ्कुः प्रत्ययो भवति । शलङ्कुः ऋषिः ॥ सृपृभ्यां दाकुक् ॥ ७५६ ॥ आभ्यां कित् दाकुः प्रत्ययो भवति । सृं गतौ । सृदाकुः दवाग्निः वायुः आदित्यः व्याघ्रः शकुनिः अस्तः भर्ता गोत्रकृच्च । पृंक् पालनपूरणयोः । पृदाकुः सर्पः गोत्रकृच्च ॥ इषेः स्वाकुक् च ॥७५७॥ इषत् इच्छायामित्यस्मात् कित् स्वाकुः प्रत्ययो भवति । इक्ष्वाकुः आदिक्षत्रियः ॥ फलि-वल्यमेर्गुः॥७५८॥एभ्यो गुः प्रत्ययो भवति ।फल निष्पत्तौ ।फल्गु असारम् ।वलि संवरणे ।वल्गु मधुरम् शोभनम् च। वल्गुः पक्षी । अम गतौ । अङ्गुः शरीरावयवः ॥ दमेर्लुक् च ॥ ७५९ ॥ दमूच् उपशमे इत्यस्माद्गुः प्रत्ययोऽन्त्यस्य च लुग् भवति । दगुः ऋषिः ॥ हेर्हिन् च ॥७६०॥ हिंट् गतिवृद्ध्योरित्यस्माद्गुः प्रत्ययो हिन् चास्यादेशो भवति । हिङ्गुः रामठः ॥ प्रीकपैनीलेरङ्गुक् ॥ ७६१ ॥ एभ्यः किदङ्गुः प्रत्ययो भवति । प्रींग्श् तृप्तिकान्त्योः । प्रियङ्गुः फलिनी रालकश्च । क शब्दे । कङ्गुः अणुः । पैं शोषणे । पङ्गुः खञ्जः । णील वर्णे । नीलङ्गुः कृमिजातिः शृगालश्च ॥ अवर्तिगृभ्योऽड्डुः ॥ ७६२ ॥ एभ्योऽड्डुः प्रत्ययो भवति । अव रक्षणादौ । अवड्डुः कृकाटिका । ऋंक् गतौ । अरड्डुः वृक्षः । गृत् निगरणे । गरड्डुः देशविशेषः पक्षी अजगरश्च ॥शलेराड्डुः॥७६३॥ शल गतावित्यस्मादाड्डुः प्रत्ययो भवति। शलाड्डुः कोमलं फलम् ॥ अञ्ज्यवेरिष्ठुः ॥ ७६४ ॥ आभ्यामिष्ठुः प्रत्ययो भवति अञ्जौप् व्यक्त्यादौ । अञ्जिष्ठुः भानुः अग्निश्च । अव रक्षणादौ । अविष्ठुः अश्वः होता च ॥ तमिमनिकणिभ्यो डुः ॥ ७६५ ॥ एभ्यो डुः प्रत्ययो भवति । तनूयी विस्तारे । तण्डुः प्रथमः । मनिच् ज्ञाने । मण्डुः ऋषिः । कण शब्दे । कण्डुः वेदनाविशेषः ॥ पनेर्दीर्घश्च ॥ ७६६ ॥ पनि स्तुतावित्यस्मात् डुः प्रत्ययो दीर्घश्च भवति । पाण्डुः वर्णः क्षत्रियश्च ॥ पलिमृभ्यामाण्डुकण्डुकौ ॥ ७६७ ॥ आभ्यां यथासंख्यमाण्डुः कण्डुक् च प्रत्ययौ भवतः पल गतौ । पलाण्डुः लशुनभेदः । मृत्

प्राणत्यागे । मृकण्डुः ऋषिः ॥ **अजिस्थावृरीभ्यो णुः** ॥ ७६८ ॥ एभ्यो णुः प्रत्ययो भवति । अज क्षेपणे च । वेणुः वंशः । ष्ठां गतिनिवृत्तौ । स्थाणुः शिवः ऊर्ध्वं च दारु । वृग्ट् वरणे । वर्णुः नदः जनपदश्च । रींश् गतिरेषणयोः । रेणुः धूलिः ॥ **विषेः कित्** ॥ ७६९ ॥ विष्लृंकी व्याप्तावित्यस्मात् कित् णुः प्रत्ययो भवति । विष्णुः हरिः ॥ **क्षिपेरणुक्** ॥ ७७० ॥ क्षिपींत् प्रेरणे इत्यस्मात् किदणुः प्रत्ययो भवति । क्षिपणुः समीरणः विद्युच्च ॥ **अञ्जेरिष्णुः** ॥ ७७१ ॥ अञ्जौप् व्यक्त्यादावित्यस्मादिष्णुः प्रत्ययो भवति । अञ्जिष्णुः घृतम् ॥ **कृहृभूजीविगम्यादिभ्य एणुः** ॥ ७७२ कृंग्ट्ट् हिंसायाम् डु कृंग् करणे वा । करेणुः हस्ती । हरेणुः गन्धद्रव्यम् । भवेणः भव्यः । जीवेणुः औषधम् । गमेणुः गन्ता । आदिग्रहणात् शमून् उपशमे, शमेणुः उपशमनम् । यजीं देवपूजादौ । यजेणुः यज्ञादिः । डु पचींष् पाके । पचेणुः पाकस्थानम् । पदेणुः वहेणुरित्यादि ॥ **कृसिकम्यमिगमितनिमनिजन्यसिमसिसच्यविभाध्मागाग्लाम्लाहनिहायाहिक्रुशिपूभ्यस्तुन्** । ७७३ ॥ कर्तुः कर्मकरः । सेतुः नदीसंक्रमः । कन्तुः कदर्पः कामी मनः कुसूलश्च । अन्तुः रक्षिता लक्षणं च । गन्तुः पथिकः । आगन्तुः अवास्तव्यो जनः । तन्तुः सूत्रम् । मन्तुः वैमनस्यम् प्रियंवदः मानश्च । जन्तुः प्राणी । असूक् भुवि । अस्तुः अस्तिभावः । बाहुलकात् भूभावाभावः । मस्तु दधिमूलवारि । पचि सेचने । सक्तुः यवविकारः । ओतुः बिडालः । भातुः दीप्तिमान् शरीरावयवः अग्निः विद्वांश्च । डु धांग्क् धारणे च । धातुः लोहादिः रसादिः शब्दप्रकृतिश्च । गैं शब्दे । गातुः गायनः उद्गाता च । ग्लातुः सरुजः । म्लैं गात्रविनामे । म्लातुः दीनः । हन्तुः आयुधं हिमश्च । हातुः मृत्युः मार्गश्च । यातुः पाप्मा जनः राक्षसश्च । हेतुः कारणम् । क्रोष्टा शृगालः । पूग्श् पवने । पोतुः पविता । नित्करणं ' क्रुशस्तुनस्तृच् पुंसि ' इत्यत्र विशेषणार्थम् ॥ **वसेर्णिद्वा** ॥ ७७४ ॥ वसं निवासे इत्यस्मात् तुन् प्रत्ययः स च णिद्वा भवति । वास्तु गृहं गृहभूमिश्च । वस्तु सत्

निवेशभूमिश्च ॥ पः पीप्यौ च वा ॥ ७७५ ॥ पां पान इत्यस्मात् तुन् प्रत्ययो भवति अस्य च पीपि इत्यादेशौ वा भवतः । पीतः आदित्यः चन्द्रः हस्ती कालः चक्षुः बालघृतपानभाजनं च । पितुः प्रजापतिः आहारश्च । पातुः रक्षिता ब्रह्मा च ॥ आपोऽप् च ॥ ७७६ ॥ आप्लृंट् व्याप्तावित्यस्मात्तुन् प्रत्ययोऽस्य चाप् इत्यादेशो भवति । अप्तुः देवताविशेषः कालः याजकः यज्ञयानिश्च ॥ अञ्ज्यर्तेः कित् ॥ ७७७ ॥ आभ्यां कित्तुन् प्रत्ययो भवति । अञ्जौप् व्यक्त्यादिषु । अक्तुः इन्द्रः । विष्णुः रात्रिश्च । ऋंक् गतौ । ऋतुः हेमन्तादिः स्त्रीरजः तत्कालश्च ॥ चायः केच ॥ ७७८ ॥ चायृग्पूजानिशामनयोः इत्यस्मात्तुन् प्रत्ययोऽस्य च के इत्यादेशो भवति । केतुः ध्वजः ग्रहश्च ॥ वहिमहिगुहेधिभ्योऽतुः ॥ ७७९ ॥ एभ्योऽतुः प्रत्ययो भवति । वहीं प्रापणे । वहतुः विवाहः अनड्वान् अग्निः कालश्च । मह पूजायाम् । महतुः अग्निः । गुहौग् संवरणे । गूहतुः भूमिः । एधि वृद्धौ । एधतुः लक्ष्मीः पुरुषः अग्निश्च ॥ कृलाभ्यां कित् ॥ ७८० ॥ आभ्यां किदतुः प्रत्ययो भवति । डु कृंग् करणे । क्रतुः यज्ञः लांक् आदाने । लतुः पाशः ॥ तनेर्यतुः ॥ ७८१ ॥ तनूयी विस्तारे इत्यस्माद्यतुः प्रत्ययो भवति । तन्यतुः विस्तारः वायुः पर्वतः सूर्यश्च ॥ जीवेरातुः ॥ ७८२ ॥ जीव प्राणधारणे इत्यस्मादातुः प्रत्ययो भवति । जीवातुः जीवनम् औषधम् अन्नम् उदकं द्रव्यं च ॥ यमेर्दुक् ॥ ७८३ ॥ यमूं उपरमे इत्यस्मात् कित् दुः प्रत्ययो भवति । यदुः क्षत्रियः ॥ शीङो धुक् ॥ ७८४ ॥ शीङ्क् स्वप्ने इत्यस्मात् कित् धुः प्रत्ययो भवति । शीधु मद्यविशेषः ॥ धूगो धुन् च ॥ ७८५ ॥ धूग्श् कम्पने इत्यस्मात् धुक् प्रत्ययोऽस्य च धुन् इत्यादेशो भवति । धुन्धुः दानवः ॥ दाभाभ्यां नुः ॥ ॥ ७८६ ॥ आभ्यां नुः प्रत्ययो भवति । डु दांगृक् दाने । दानुः गन्ता यजमानः वायुः आदित्यः दक्षिणार्थं च धनम् भांक् दीप्तौ । भानुः सूर्यः रश्मिश्च । चित्रभानुः अग्निः । स्वर्भानुः राहुः । विश्वभानुः आदित्यः ॥ घेः शित् ॥

॥ ७८७ ॥ धेंट् पाने इत्यस्मान्नुः प्रत्ययो भवति स च शित् । शित्त्वादात्संध्यक्षरस्येति आकारो न भवति । धेनुः अभिनवप्रसवा गवादिः ॥ सूङः कित् ॥ ७८८॥ षूङौक् प्राणिगर्भविमोचन इत्यस्मात् कित् नुः प्रत्ययो भवति । सूनुः पुत्रः ॥ हो जह्नु च ॥ ७८९ ॥ ओ हांक् त्यागे इत्यस्मात्किन्नुः प्रत्ययोऽस्य च जह्न इत्यादेशो भवति । जह्नुः गङ्गापिता ॥ वचेः कगौ च ॥ ७९० ॥ वचंक् भाषणे इत्यस्मान्नुः प्रत्ययः ककारगकारौ चान्तादेशौ भवतः । वक्नुः वग्नुश्च वाग्मी ॥ कृहनेस्तुक्नुकौ ॥ ७९१ ॥ आभ्यां कितौ तुनु इति प्रत्ययौ भवतः । डु कृंग् करणे । कृतुः कर्मकारः । कृणुः कोशकारः कारुश्च । हनंक् हिंसागत्योः । हतुः हिमः । हनुः वक्त्रैकदेशः । बाहुलकान्नलोपः ॥ गमेः सन्वच्च ॥ ७९२ ॥ गम्लृं गतावित्यस्मात् तुक्नुकौ सन्वत् च भवतः । जिगन्तुः ब्राह्मणः दिवसः मार्गः प्राणः अग्निश्च । जिगन्नुः प्राणः बाणः मगः मीनः वायुश्च ॥ दाभूक्षण्युन्दिनदिवदिपत्यादेरनुङ् ॥ ७९३ ॥ एभ्यो ङिदनुः प्रत्ययो भवति । डु दांग्क् दाने । दनुः दानवमाता । भू सत्तायाम् । भुवनुः मेघः चन्द्रः भविनव्यता हंसश्च । क्षणूयी हिंसायाम् । क्षणनुः यायावरः । उन्दैप् क्लेदने । उदनुः शुकः । णद अव्यक्ते शब्दे । नदनुः मेघः सिंहश्च । वद व्यक्तायां वाचि । वदनुः वक्ता । पत्लृ गतौ । पतनुः श्येनः आदिग्रहणादन्येऽपि । कित्त्वमकृत्वा ङित्करणं वदेर्वृद्भावार्थम् ॥ कृशेरानुक् ॥ ७९४ ॥ कृशच् तनुत्वे इत्यस्मात्किदानुः प्रत्ययो भवति । कृशानुः वह्निः ॥ जीवेरदानुक् ॥ ७९५ ॥ जीव प्राणधारणे इत्यस्मात् कित् रदानुः प्रत्ययो भवति । जीरदानुः । कित्करणं गुणप्रतिषेधार्थम् । वलोपे हि नाम्यन्तत्वात् गुणः स्यात् ॥ वचेरक्नुः ॥ ७९६ ॥ वचंक् भाषणे इत्यस्मादक्नुः प्रत्ययो भवति । वचक्नुः वाग्मी आचार्यः ब्राह्मणः ऋषिश्च ॥ हृषिपुषिशुषिगदिमदिनन्दिगडिमण्डिजनितनिभ्यो णेरित्नुः ॥ ७९७ ॥ एभ्यो ण्यन्तेभ्य इत्नुः प्रत्ययो भवति । हृषंच् तुष्टौ हृषू अलीके वा । हर्षयित्नुः आनन्दः स्वजनः रङ्गोपजीवो प्रियं-

वदश्च । पुषंच् पुष्टौ । पोषयित्नुः भर्ता मेघः कोकिलश्च । घुषृण् विशब्दने । घोषयित्नुः कोकिलः शब्दश्च । गदण् गर्जे । गदयित्नुः पर्जन्यः वावदूकः भ्रमरः कामश्च । मदेच् हर्षे । मदयित्नुः मदिरा सुवर्णम् अलंकारश्च । टु नदु समृद्धौ । नन्दयित्नुः पुत्रः आनन्दः प्रमुदितश्च । गड सेचने । गडयित्नुः बलाहकः । मडु भूषायाम् । मण्डयित्नुः मण्डयिता कामुकश्च । जनैचि प्रादुर्भावे । जनयित्नुः पिता । स्तनण् गर्जे । स्तनयित्नुः मेघः मेघगर्जितं च ॥ कस्यर्तिस्यामिपुक् ॥ ७९८ ॥ आभ्यां किदिपुः प्रत्ययो भवति । कस गतौ । कसिपुः असनम् ऋंक् गतौ । रिपुः शत्रुः ॥ कम्यमिभ्यां बुः ॥ ७९९ ॥ आभ्यां बुः प्रत्ययो भवति । कमूङ् कान्तौ । कम्बुः शङ्खः । अम गतौ । अम्बु पानीयम् ॥ अभ्रेरमुः ॥ ८०० ॥ अभ्र गताविस्यस्मादमुः प्रत्ययो भवति । अभ्रमुः देवहस्तिनी ॥ यजिशुन्धिदहिदसिजनिमनिभ्यो युः ॥ ८०१ ॥ एभ्यो युः प्रत्ययो भवति । यजीं देवपूजादौ । यज्युः अग्निः अध्वर्युः यज्वा शिष्यश्च । शुन्ध् शुद्धौ । शुन्ध्युः अग्निः आदित्यः पवित्रं च । दहं भस्मीकरणे । दह्युः अग्निः । दसूच् उपक्षये । दस्युः चौरः । जनैचि प्रादुर्भावे । जन्युः अपत्यं पिता वायुः प्रादुर्भावः प्रजापतिः प्राणो च । मनिच् ज्ञाने । मन्युः कृपा क्रोधः शोकः क्रतुश्च ॥ भुजेः कित् ॥ ८०२ भुजंप् पालनाभ्यवहारयोः इत्यस्मात् कित् युः प्रत्ययो भवति । भुज्युः अग्निः आदित्यः गरुडः भोगः ऋषिश्च ॥ सर्तेरय्वन्यू ॥ ८०३ ॥ सृं गताविस्यस्मात् अयु अन्यु इति प्रत्ययौ भवतः । सरयुः नदी वायुश्च । दीर्घान्तमिममिच्छत्येके । सरयूः । श्लिष्टनिर्देशात्तदपि संगृहीतम् । सरण्युः मेघः अश्विनोर्माता समेघो वायुश्च ॥ भूक्षिपिचरेरन्युक् ॥ ८०४ ॥ एभ्यः किदन्युः प्रत्ययो भवति । भू सत्तायाम् । भुवन्युः ईश्वरः अग्निश्च । क्षिपींत् प्रेरणे । क्षिपण्युः वायुः वसन्तः विद्युत् अर्थः कालश्च । चर भक्षणे च । चरण्युः वायुः ॥ मुस्त्युक् ॥ ८०५ ॥ मृंत् प्राणत्यागे इत्यस्मात् कित् त्युः प्रत्ययोः भवति । मारयतीति मृत्युः कालः मरणं च ॥

चिनीपीभ्यशिभ्यो रुः ॥ ८०६ ॥ एभ्यो रुः प्रत्ययो भवति । चिञ्ट् चयने । चेरुः मुनिः । णींग् प्रापणे । नेरुः जनपदः । पींङ्च् पाने । पेरुः सूर्यः गिरिः कलविङ्कश्च । मींङ्च् हिंसायाम् । मेरुः देवाद्रिः । अशौटि व्याप्तौ । अश्रु नेत्रजलम् ॥ रुपूभ्यां कित् ॥ ८०७ ॥ आभ्यां किद्रुः प्रत्ययो भवति । रुक् शब्दे । रुरुः मृगजातिः । पूग्श् पवने । पूरुः राजा ॥ खनो लुक् च ॥ ८०८ ॥ खनूग् अवदारणे इत्यस्मात् रुः प्रत्ययो भवत्यन्तस्य च लुग् भवति खरुः दर्पः क्रूरः मूर्खः हयः गीतविशेषश्च ॥ जनिहनिशद्यर्तेस्त च ॥ ८०९ ॥ एभ्यो रुः प्रत्ययस्तकारश्चान्तादेशो भवति । जनैचि प्रादुर्भावे । जत्रुः शरीरावयवः मेघः घर्मावसानं च । हनंक् हिंसागत्योः ॥ हत्रुः हिंस्रः शद्लृं शातने शत्रुः रिपुः । बाहुलकात् तादेशविकल्पे शद्रुः पुरुषः । ऋंक् गतौ । अत्रुः क्षुद्रजन्तुः ॥ श्मनः शीङो डित् ॥ ८१० श्मनपूर्वात् शीङ्क् स्वप्ने इत्यस्मात् डिद्रुः प्रत्ययो भवति । श्मश्रु मुखलोमानि ॥ शिग्रुगेरुनमेर्वादयः ॥ ८११ ॥ शिग्र्वादयः शब्दा रुप्रत्ययान्ता निपात्यन्ते । शिंञ्ट् निशाने । कित् गोऽन्तश्च । शिग्रुः सौभाञ्जनकः । हरितकविशेषश्च । गिरतेरेच्च । गेरुः धातुः । नमेर्नञ्पूर्वस्य मयतेर्वा एत्वान्तः ॥ नमेरुः देववृक्षः । आदिग्रहणादन्येऽपि ॥ कटिकुटयर्तेररुः ॥ ८१२ ॥ एभ्योऽरुः प्रत्ययो भवति । कटै वर्षावरणयोः । कटरुः शकटम् । कुटत् कौटिल्ये । कुटरुः पक्षिविशेषः मर्कटः वृक्षः वर्धकिश्च । कुटादित्वान्न गुणः ऋंक् गतौ । अररुः असुरः आयुधं मण्डलं च ॥ कर्केराकः ॥ ॥ ८१३ ॥ कर्कः सौत्रादारुः प्रत्ययो भवति । कर्कारुः क्षुद्रचिर्भटी ॥ उर्वेरादेरूदेतौ च ॥ ८१४ उर्वै हिंसायामित्यस्मादारुः प्रत्ययो भवति आदेश्चोकारैकारौ भवतः । ऊर्वत्यार्तिमिति ऊर्वारुः कटुचिर्भटी एर्वारुः चारु चिर्भटी ॥ कृपिक्षुधिपीकुणिभ्यः कित् ॥ ८१५ ॥ एभ्यः किदारुः प्रत्ययो भवति । कृपौङ् सामर्थ्ये । कृपारुः दयाशीलः । क्षुधंच् बुभुक्षायाम् । क्षुधारुः क्षुधमसहमानः । लत्वे, कृपालुः क्षुधालुः । पींङ्च् पाने । पियारुः वृक्षः । कुणत् शब्दो-

प्रकरणयोः । कृणारुः वनस्पतिः ॥ श्यः शीत च ॥ ८१६ ॥ श्यैङ् गताविस्यस्मादारुः प्रत्ययोऽस्य च शीत इत्यादेशो भवति । शीतारुः शीतासहः लत्वे, शीतालुः ॥ तुम्बेरुरुः ॥ ८१७ ॥ तुबु अर्दने इत्यस्मादुरुः प्रत्ययो भवति । तुम्बुरुः गन्धर्वः गन्धद्रव्यं च ॥ कन्देः कुन्दु च ॥ ८१८ ॥ कदु रोदनाह्वानयोरित्यस्मादुरुः प्रत्ययोऽस्य च कुन्दित्यादेशो भवति । कुन्दुरुः सल्लकीनिर्यासः ॥ चमेरूरुः ॥ ८१९ ॥ चमू अदने इत्यस्मादूरुः प्रत्ययो भवति । चमूरुः चित्रकः ॥ शीङो लुः ॥ ८२० ॥ शीङ्क् स्वप्ने इत्यस्माल्लुः प्रत्ययो भवति । शेलुः श्लेष्मातकः ॥ पीङः कित् ॥ ८२१ पीङ्च् पाने इत्यस्मात् कित् लुः प्रत्ययो भवति । पीलुः हस्ती वृक्षश्च ॥ लस्जीर्ष्यिशलेरालुः ॥ ८२२ ॥ एभ्य आलुः प्रत्ययो भवति । ओ लस्जैति व्रीडे । लज्जालुः लज्जनशीलः । ईर्ष्यं ईर्ष्यार्थः । ईर्ष्यालुः ईर्ष्याशीलः । शल गतौ । शलालुः वृक्षावयवः ॥ आपोऽप् च ॥ ८२३ ॥ आप्लृंट् व्याप्ताविस्यस्मादालुः प्रत्ययोऽस्य चाप् इत्यादेशो भवति । अपालुः वायुः ॥ गृहलुगुग्गुलुकमण्डलवः ॥ एते आलुप्रत्ययान्ता निपात्यन्ते । गृहतेर्ह्रस्वश्च प्रत्ययादेः । गृहलुः ऋषिः गुंङ् शब्दे । अस्यादिर्गुग् लोपश्च प्रत्ययादेः । गुग्गुलुः वृक्षविशेषः अश्वश्च । कम् पूर्वादनितेर्डोऽन्तः ह्रस्वश्च प्रत्ययादेः । कमण्डलुः अमत्रम् ॥ प्रः शुः ॥ ८२५ ॥ पृश् पालनपूरणयोरित्यस्मात् शुः प्रत्ययो भवति । पर्शुः वङ्क्रिः अंशं वक्रास्थि ॥ मस्जोष्यशिभ्यः सुक् ॥ ८२६ ॥ एभ्यः कित् सुः प्रत्ययो भवति । टु मस्जोंत् शुद्धौ । 'मस्जेः सः' इति नोऽन्तः । मङ्क्षुः मुनिः । इषश् आभीक्ष्ण्ये । इक्षुः गुडादिप्रकृतिः । अशौटि व्याप्तौ । अक्षुः समुद्रः यमश्च ॥ तॄपलिमलेरक्षुः ॥ ८२७ ॥ एभ्योऽक्षुः प्रत्ययो भवति । तॄ प्लवनतरणयोः । तरक्षुः श्वापदविशेषः । पल गतौ, मलि धारणे । पलक्षुः मलक्षुश्च वृक्षः ॥ उलेः कित् ॥ ८२८ ॥ 
उल दाहे इत्यस्मात् सौत्रात् किदक्षुः प्रत्ययो भवति । उलक्षुः तृणजातिः ॥ कृषिचमितनिधन्यन्दिसर्जिखर्जिभ-

जिलस्जीर्ष्यिभ्य ऊः ॥ ८२९ ॥ कर्षूः कुल्या अङ्गारः परिखा गर्तश्च । चमूः सेना । तनूः शरीरम् । धन शब्दे, धन धान्ये सौत्रो वा । धनूः धान्यराशिः ज्या वरारोहा च स्त्री । अदु बन्धने । अन्दूः पादकटकः । सज अर्जने । सजूः अर्थः क्षारः वनस्पतिः वणिक् च । खर्ज मार्जने च । खर्जूः कण्डूः विशुच । भृजैङ् भर्जने, भ्रस्जीत् पाके वा, भर्जूः यवविकारः । ओ लस्जैति व्रीडे । लज्जूः लज्जालुः । ईर्ष्य ईर्ष्यार्थः । ईर्ष्यूः ईर्ष्यालुः ॥ फलेः फेलू च ॥ ८३० ॥ फल निष्पत्तावित्यस्मादूः प्रत्ययोऽस्य च फेलित्यादेशो भवति । फेलूः होमविशेषः ॥ कषेर्ण्डच्छौ च षः ॥ ८३१ ॥ कष हिंसायामित्यस्मादूः प्रत्ययो भवति षकारस्य च ण्ड च्छश्चादेशो भवति । कण्डूः कच्छूश्च पामा ॥ वहेर्धू च ॥ वहीं प्रापणे इत्यस्मादूः प्रत्ययो धश्चान्तादेशो भवति। वधूः पतिमुपपन्ना कन्या जाया च ॥ मृजेर्गुणश्च ॥ ८३३ ॥ मृजौक् शुद्धावित्यस्मादूः प्रत्ययो गुणश्चास्य भवति । मर्जूः शुद्धिः रजकः नद्यास्तीरं शिला च । गुणे सिद्धे गुणवचनमकारस्य वृद्धिबाधनार्थम् ॥ अजेर्जोऽन्तश्च ॥ ८३४ ॥ अज क्षेपणे चेत्यस्मादूः प्रत्ययो जकाराश्चान्तो भवति । अज्जूः जननी ॥ कसिपद्यर्त्यादिभ्यो णित् ॥ ८३५ ॥ एभ्यो णिदूः प्रत्ययो भवति । कस गतौ । कासूः शक्तिर्नामायुधम् वाग्विकला बुद्धिः व्याधिः विकला च वाक् । पदिच् गतौ ।'पादूः पादुका । ऋक् गतौ आरूः वृक्षविशेषः कच्छूः गतिः पिङ्गलश्च । आदिग्रहणात् कचतेः काचूः, शलतेः शालूः इत्यादयोऽपि ॥ अणेर्डोऽन्तश्च ॥ ८३६ ॥ अणेर्धातोर्णिदूः प्रत्ययो भवति डश्चान्तः । अण शब्दे ॥ आण्डूः जलभृङ्गारः ॥ अडो लृ च वा ॥ ८३७ ॥ अड उद्यमे इत्यस्माण्णिदूः प्रत्ययो भवति लश्चान्तादेशो वा । आलूः भृङ्गारः करकश्च । आडूः दर्वी टिट्टिभः वनस्पतिः जलाधारभूमिः पादभेदनं च ॥ नञो लम्बेर्नलुक् च ॥ ८३८ ॥ नञ्पूर्वात् लुबुङ् अवस्रंसने चेत्यस्मात् णिदूः प्रत्ययो नकारस्य च लुग् भवति । अलाबूः तुम्बी ॥ कफादीरेलं च ॥ ८३९ ॥ कफपूर्वादीरिक् गतिकम्पन-

योरित्यस्मादूः प्रत्ययो लकारश्चान्तादेशो भवति । कफेलूः श्लेष्मातकः यवलाजाः मधुपर्कः छादिषेयं च तृणम् ॥ ऋतो रत् च ॥ ८४० ॥ ऋत् घृणागतिस्पर्धेषु इत्यस्मादूः प्रत्ययो रत् चास्यादेशो भवति । रतूः नदीविशेषः सत्यवाक् दूतः कृमिविशेषश्च ॥ दृभिचपेः स्वरान्नोऽन्तश्च ॥ ८४१ ॥ आभ्यां पर ऊः प्रत्ययः स्वरात् परो नोऽन्तश्च भवति । दृभैत् ग्रन्थे । दृन्भूः सर्पजातिः वनस्पतिः वज्रः ग्रन्थकारः दर्भेगं च बाहुलकात् ' म्नां धुड्वर्गेऽन्त्योऽपदान्ते ' इति नकारस्य लुक् न भवति । चप सान्त्वने । चम्पूः कथाविशेषः ॥ धृषेर्दिधिषदिधीषौ च ॥ ८४२ ॥ ञिधृषाट् प्रागल्भ्ये इत्यस्मात् ऊः प्रत्ययो दिधिष् दिधीष् इत्यादेशौ चास्य भवतः । दिधिषूः ज्यायस्याः पूर्वपरिणीता पुंश्चली च । दिधीषूः ऊढायाः कनिष्ठाया अनूढा ज्येष्ठा पुनर्भूः आहुतिश्च ॥ भ्रमिगमितनिभ्यो डित् ॥ ८४३ ॥ एभ्यो डिदूः प्रत्ययो भवति । भ्रमूच् अनवस्थाने । भ्रूः अक्ष्णोरुपरि रोमराजिः । गम्लृं गतौ । अग्रे गच्छत्यग्रेगूः पुरस्सरः । तनूयी विस्तारे । कुत्सितं तन्यते कुतूः चर्ममयमावपनम् ॥ नृनिशृधिरुषिकुहिभ्यः कित् ॥ ८४४ ॥ एभ्यः किदूः प्रत्ययो भवति । नृतैच् नर्तने । नृतूः नर्तकः कृमिजातिः प्लवः प्रतिकृतिश्च । मृधूङ् शब्दकुत्सायाम् । मृधूः शर्धनः कृमिजातिः अपानं बलिश्च दानवः । रुषंच् रोषे । रुषूः भर्त्सकः । कुहणि विस्मापने । कुहूः अमावास्या ॥ तॄखडिभ्यां डूः ॥ ८४५ ॥ आभ्यां डूः प्रत्ययो भवति । तॄ प्लवनतरणयोः । तर्डूः द्रोणी प्लवः परिवेषणभाण्डं च । खडण् भेदे । खड्डूः बालानामुपकरणं स्त्रीणां पादाङ्गुष्ठाभरणं च ॥ तॄदृभ्यां दूः ॥ ८४६ ॥ आभ्यां दूः प्रत्ययो भवति । तॄ प्लवनतरणयोः । तर्दूः दर्वी । दृश् विदारणे । दर्दूः कुष्ठभेदः ॥ कमिजनिभ्यां बूः ॥ ८४७ ॥ आभ्यां बूः प्रत्ययो भवति । कमूङ् कान्तौ । कम्बूः भूषणम् आदर्शत्सरुः कुरुविन्दश्च । जनैचि प्रादुर्भावे । जम्बूः वृक्षविशेषः ॥ शकेरन्धूः ॥ ८४८ ॥ शक्लृट् शक्तावित्यस्मा-

दन्धूः प्रत्ययो भवति । शकन्धूः वनस्पतिः देवताविशेषश्च ॥ कृगः कादिः ॥ ८४९ ॥ डु कृंग् करणे इत्यस्मात्कका-रादिरन्धूः प्रत्ययो भवति । कर्कन्धूः बदरी व्रणं यवलाजाः मधुपर्कः विष्टम्भश्च ॥ योरागूः ॥ ८५० ॥ युक् मिश्रणे इत्यस्मादागूः प्रत्ययो भवति । यवागूः द्रवौदनः ॥ काच्छोङो डेरुः ॥ ८५१ । कपूर्वात् शीङ्क् स्वप्ने इत्यस्मात् डिदेरुः प्रत्ययो भवति । कशेरुः कन्दविशेषः वीरुच्च ॥ दिव ऋः ॥ ८५२ ॥ दिवूच् क्रीडादावित्यस्मादृः प्रत्ययो भवति । देवा देवरः पितृव्यपत्नी अग्निश्च ॥ सोरसेः ॥ ८५३ ॥ सुपूर्वादसूच् क्षेपणे इत्यस्मादृः प्रत्ययो भवति । स्वसा भगिनी ॥ नियो डित् ॥८५४॥ णींग् प्रापणे इत्यस्मात् डिदृः प्रत्ययो भवति । ना पुरुषः ॥ सव्यात्स्थः ॥८५५॥ सव्यपूर्वात् ष्ठां गतिनिवृत्तावित्यस्मात् डिदृः प्रत्ययो भवति । सव्येष्ठा सारथिः ॥ यतिननन्दिभ्यां दीर्घश्च ॥ ८५६ ॥ यतेर्नञ्पूर्वात् नन्देश्च ऋः प्रत्ययो भवति । दीर्घश्चानयोर्भवति । यतैङ् प्रयत्ने । याता पतिभ्रातृभगिनी देवरभार्या ज्येष्ठभार्या च । टु नदु समृद्धौ । ननान्दा भर्तृभगिनी । नखादित्वान्नञोऽन्न भवति ॥ शासिशंसिनीरुक्षुहृभृधृमन्यादिभ्यस्तृः ॥ ८५७ ॥ एभ्यस्तृः प्रत्ययो भवति । शासूक् अनुशिष्टौ । शास्ता गुरुः राजा च । प्रशास्ता राजा ऋत्विक् च । शंसू स्तुतौ च । शंस्ता स्तोता । णींग् प्रापणे । नेता सारथिः । रुक् शब्दे । रोता मेघः । टुक्षुक् शब्दे । क्षोता मुसलम् । हृंग् हरणे । हर्ता चौरः । डुभृंग्क् पोषणे च । भर्ता पतिः । धृंङ्त् अवध्वंसने । धर्ता धर्मः । मनिच् ज्ञाने । मन्ता विद्वान् प्रजापतिश्च । आदिग्रहणादुपद्रष्टा ऋत्विक् विशस्ता घातकः इत्यादयोपि ॥ पातेरिच्च ॥ ८५८ ॥ पांक् रक्षण इत्यस्मात् तृः प्रत्ययो धातोश्चेकारोन्तादेशो भवति । पिता जनकः ॥ मानिभ्राजेर्लुक् च ॥ ८५९ ॥ आभ्यां तृः प्रत्ययो लुक् चान्तस्य भवति । मानि पूजायाम् । माता जननी । भ्राजि दीप्तौ । भ्राता सोदर्यः ॥ जाया

मिगः ॥ ८६० ॥ जाशब्दपूर्वात् मिंगट् प्रक्षेपणे इत्यस्मात् तृः प्रत्ययो भवति । जायां प्रजायां मिन्वन्ति त-मिति जामाता दुहितृपतिः ॥ आपोऽप् च ॥ ८६१ ॥ आप्लृंट् व्याप्तावित्यस्मात्तृः प्रत्ययो भवति अप् चास्यादेशः । अप्ता यज्ञः अग्निश्च ॥ नमेः प च ॥ ८६२ ॥ नमं प्रह्वत्वे इत्यस्मात् तृः प्रत्ययो पश्चास्यान्तादेशो भवति । नप्ता दुहितुः पुत्रस्य वा पुत्रः ॥ हुपूगृगोन्नीप्रस्तुप्रतिहृप्रतिप्रस्थाभ्य ऋत्विजि ॥ ८६३ ॥ एभ्य ऋत्विज्यभिधेये तृः प्रत्ययो भवति । हुंक् दानादनयोः होता । पूग्श् पवने । पोताः गैं शब्दे, णींग् प्रापणे उत्पूर्वः । उद्गाता । उन्नेता । ष्टुंग्क् स्तुतौ, प्रपूर्वः । प्रस्तोता । हृंग् हरणे प्रतिपूर्वः । प्रतिहर्ता । ष्ठां गतिनिवृत्तौ प्रतिप्रपूर्वः । प्रतिप्रस्थाता । एते ऋत्विजः ॥ ॥ नियः षादिः ॥ ८६४ ॥ णींग् प्रापणे इत्यस्मात् षकारादिस्तृः प्रत्ययो भवति ऋत्विज्यभिधेये । नेष्टा ऋत्विक् ॥ त्वष्टृक्षत्तृदुहित्रादयः ॥ ८६५ ॥ एते तृप्रत्ययान्ता निपात्यन्ते । त्विषेरितोऽच्च । त्वष्टा देववर्धकिः प्रजापतिः आदित्यश्च । क्षद खदने सौत्रः । क्षत्ता नियुक्तः अविनीतः दौवारिकः मुसलः पारशवः रुद्रः सारथिश्च । दुहंरिट् किच्च । दुहिता तनया । आदिग्रहणादन्येऽपि ॥ रातेर्डैः ॥ ८६६ ॥ रांक् दाने इत्यस्मात् डिदैः प्रत्ययो भवति । राः द्रव्यम् । रायौ । रायः ॥ द्युगमिभ्यां डोः ॥ ८६७ ॥ आभ्यां डिदोः प्रत्ययो भवति । द्युंक् अभिगमे । द्यौः स्वर्गः अन्तरिक्षं च । गम्लृं गतौ । गौः पृथिव्यादिः ॥ ग्लानुदिभ्यां डौः ॥ ८६८ ॥ आभ्यां डिदौः प्रत्ययो भवति । ग्लैं हर्षक्षये । ग्लौः चन्द्रमाः व्याधितः शरीरग्लानिश्च । णुदंत् प्रेरणे । नौः जलतरणम् ॥ तोः किक् ॥ ८६९ ॥ तुंक् वृत्त्यादावित्यस्मात् किक् प्रत्ययो भवति । ककार कित्कार्यार्थः । इकार उच्चारणार्थः । तुक् अपत्यम् ॥ द्रागादयः ॥ ८७० ॥ द्राक् इत्यादयः शब्दाः किक् प्रत्ययान्ता निपात्यन्ते । द्रवतेरा च । द्राक् शीघ्रम् । एवं सरतेः, स्राक् । स एवार्थः ॥

इयर्तेरर्वादेशश्च । अर्वाक् अचिरन्तनम् । आदिग्रहणादन्येऽपि ॥ स्रोश्चिक् ॥ ८७१ ॥ स्रु गतौ इत्यस्मात् चिक् प्रत्ययो भवति । स्रुक् जुहूप्रभृति अग्निहोत्रभाण्डम् ॥ स्रुचौ । स्रुचः । इकार उच्चारणार्थः । ककारः कित्कार्यार्थः ॥ तनेड्वंच् ॥ ८७२ ॥ तनूंयी विस्तारे इत्यस्मात् डिद्वच् प्रत्ययो भवति । त्वक् शरीरादिवेष्टनम् ॥ पारेरज् ॥ ८७३ ॥ पारण् कर्मसमाप्तावित्यस्मादज् प्रत्ययो भवति । पारक् शाकविशेषः प्राकारः सुवर्णं रत्नं च । पारजौ । पारजः ॥ ऋधिपृथिभिषिभ्यः कित् ॥ ८७४ ॥ एभ्यः किदज् प्रत्ययो भवति । ऋधूंच् वृद्धौ । ऋधक् समीपवाची अव्ययम् । प्रथिष् प्रख्याने । निर्देशादेव ऋत । पृथक् नानार्थेऽव्ययम् । भिष् सौत्रः । भिषक् वैद्यः । भिषजौ । भिषजः ॥ भृपणिभ्यामिज् भुरवणौ च ॥ ८७५ ॥ भृपणिभ्यामिज् प्रत्ययो यथासंख्यं भुर वण इत्यादेशौ च भवतः । भृंग् भरणे । भुरिक् बाहुः शब्दः भूमिः वायुः एकाक्षराधिकपादं च ऋक् छन्दः । पणि व्यवहारस्तुत्योः । वणिक् वैदेहिकः ॥ ८७५ ॥ वशेः कित् ॥ ८७६ ॥ वशक् कान्तावित्यस्मात् किदिज् प्रत्ययो भवति । उशिक् कान्तः उशीरम् अग्निः गौतमश्च ऋषिः ॥ लङ्घेरट् नलुक् च ॥ ८७७ ॥ लघुङ् गतावित्यस्मात् अट् प्रत्ययो नलोपश्चास्य भवति । लघट् वायुः लघु च शकटम् ॥ सर्त्तेरट् ॥ ८७७ ॥ सृं गतावित्यस्मादट् प्रत्ययो भवति । सरट् वृक्षविशेषः मेघः उष्ट्रजातिश्च ॥ ईडेरविट् ह्रस्वश्च ॥ ८७९ ॥ ईडिक् स्तुतावित्यस्मादविट् प्रत्ययो ह्रस्वश्चास्य भवति । इडविट् विश्रवाः ॥ क्विपि म्लेच्छश्च वा ॥ ८८९ ॥ म्लेच्छेरीडेश्च क्विपि प्रत्यये वा ह्रस्वो भवति । अत एव वचनात् क्विप् च ॥ म्लेच्छ अव्यक्ते शब्दे । म्लेट् म्लिट् उभयं म्लेच्छजातिः । ईट् इट् स्वामी मेदिनी च ॥ तृपेः कत् ॥ ८८१ ॥ तृपौंच् प्रीतावित्यस्मात् किदत् प्रत्ययो भवति । तृपत् चन्द्रः समुद्रः तृणभूमिश्च ॥ संश्चद्वेहत्साक्षादादयः ॥ ८८२ ॥ एते कत्प्र-

त्ययान्ता निपात्यन्ते । संपूर्वाच्चिनोतेर्डित् समो मकारस्यानुस्वारपूर्वः शकारश्च । संश्चत् अध्वर्युः कुहकश्च । अनुस्वारं नेच्छन्त्येके । सश्चत् कुहकः । विपूर्वाद्धन्तेर्डिद्हश्च गुणः । विहन्ति । गर्भमिति वेहत् गर्भघातिनी अप्रजाः स्त्री अनड्वांश्च । संपूर्वादीक्षतेः साक्षाभावश्च । साक्षात् समक्षमित्यर्थः । आदिग्रहणाद्देहद्बियत्पुरीतदादयोऽपि ॥ पटच्छपदादयोऽनुकरणाः ॥ ८८३ ॥ पटदित्यादयोऽनुकरणशब्दाः कत्प्रत्ययान्ता निपात्यन्ते । पट गतौ । पटत् । छुपत् संस्पर्शे, उकारस्याकारश्च । छपत् । पत्लृ गतौ । पतत् । शॄश् हिंसायाम् । शरत् । शल गतौ ॥ शलत् । खट काङ्क्षे । खटत् । दहेः प च । दपत् । डिपेः डिपत् । खनतेरश्च । खरत् । खादतेः खादत् । सर्वे एते कस्यचिद्विशेषस्य श्रुतिप्रत्यासत्त्याऽनुकरणशब्दाः । अनुकरणमपि हि साध्वेव कर्तव्यम् न यत्किंचित् यथानक्षरमिति शिष्टाः स्मरन्ति ॥ द्रुहिबृहिमहिपृषिभ्यः कतृः ॥ ८८४ ॥ एभ्यः किदतृः प्रत्ययो भवति । द्रुहौच् जिघांसायाम् । द्रुहन् ग्रीष्मः । वृह वृद्धौ । बृहन् पद्रुकः बृहति छन्दः । मह पूजायाम् । महान् पूजितः विस्तीर्णश्च । महान्तौ । महान्तः । महती । पृष् सेचने । पृषत् तन्त्रं जलबिन्दुः चित्रवर्णजातिः दध्युपसिक्तमाज्यं च । पृषती मृगी । स्थूलपृषतीमालभेत । ऋकारो ङ्यार्थः ॥ गमेर्डिद्द्वे च ॥ ८८५ ॥ गम्लृं गतावित्यस्मात् कतृः प्रत्ययो डिद्भवति द्वे चास्य रूपे भवतः । जगत् स्थावरजङ्गमो लोकः । जगती पृथ्वी ॥ भातेर्डवतुः ॥ ८८६ ॥ भांक् दीप्तावित्यस्मात् डिद्वतुः प्रत्ययो भवति । भवान् । भवन्तौ । भवन्तः । उकारो दीर्घत्वादिकार्यार्थः ॥ हृसृरुहियुषितडिभ्य इत् ॥ ८८७ ॥ एभ्य इत् प्रत्ययो भवति । हृग् हरणे । हरित् हरितो वर्णः ककुब् वायुः मृगजातिः अश्वः सूर्यश्च । सृं गतौ । सरित् नदी । रुहं जन्मनि । रोहित् वीरुत्प्रकारः मत्स्यः सूर्यः अग्निः मृगः वर्णश्च । युषः सौत्रः । योषति गच्छति पुरुषमिति योषित् स्त्री । तडण् आघाते । तडित् विद्युत् ॥ उदका-

ञ्छ्वेर्डित् ॥ ८८८ ॥ उदकपूर्वात् ट्वोश्वि गतिवृद्ध्योरित्यस्मात् डिदित् प्रत्ययो भवति । उदकेन श्वयति उदश्वित् तक्रम् । ' नाम्न्युत्तरपदस्य च ' इति उदकस्य उदभावः ॥ म्र उत् ॥ ८८९ ॥ मृंत् प्राणत्याग इत्यस्मादुत् प्रत्ययो भवति । मरुत् वायुः देवः गिरिशिखरं च ॥ ग्रो मादिर्वा ॥ ८९० ॥ गॄत् निगरणे इत्यस्मादुत् प्रत्ययो भवति स च मकारादिर्वा भवति । गर्मुत् गरुडः आदित्यः मधुमक्षिका तक्षा तृणं सुवर्णं च । गरुत् बर्हः अजगरः मरकतमणिः वेगः तेजसां वर्त्तिश्च ॥ शकेर्ऋत् ॥ ८९१ ॥ शक्लृंट् शक्तावित्यस्मादृत् प्रत्ययो भवति । शकृत् पुरीषम् ॥ यजेः क च ॥ ८९२ ॥ यजीं देवपूजादिष्वित्यस्मात् ऋत् प्रत्ययो कश्चान्तादेशो भवति । यकृत् अन्त्रम् ॥ पातेः ऋथु ॥ ८९३ ॥ पांक् रक्षणे इत्यस्मात् ऋथु प्रत्ययः किद्भवति । पृथो नाम क्षत्रियाः ॥ शदृभसेरद् ॥ ८९४ । एभ्योऽद् प्रत्ययो भवति । शॄश् हिंसायाम् । शरद् ऋतुः । दॄ भये । दरत् जनपदसमानशब्दः क्षत्रियः ।' दरदो जनपदः ॥ भस भर्त्संनदीप्त्योः सौत्रः । भसत् जघनम् आस्यम् आमाशयस्थानं च । भषेरपीच्छन्त्येके । भषत् ॥ तनित्यजियजिभ्यो डद् ॥ ८९५ ॥ एभ्यो डिदद् प्रत्ययो भवति । तनूयि विस्तारे । तद्, सः । त्यजं हानौ । त्यद्, स्यः । एतौ निर्देशवाचिनौ । यजीं देवपूजादौ । यद्, यः । अयमुद्देशवाची ॥ इणस्तद् ॥ ८९६ ॥ इणंक् गतावित्यस्मात्तद् प्रत्ययो भवति । एतद्, एषः । समीपवाची शब्दः ॥ प्रः सद् ॥ ८९७ ॥ पॄश् पालनपूरणयोरित्यस्मात् सदित्येवं प्रत्ययो भवति । पर्षत् सभा ॥ द्रोर्ह्रस्वश्च ॥ ८९८ ॥ दॄश् विदारणे इत्यस्मात्सद् प्रत्ययो भवति । ह्रस्वश्चास्य भवति । दृषत्पाषाणः ॥ युष्यसिभ्यां क्मद् ॥ ८९९ ॥ आभ्यां कित् मदित्ययं प्रत्ययो भवति । युषः सौत्रः । सेवायाम् । युष्मद्, यूयम् । असूच् क्षेपणे अस्मद्, वयम् ॥ उक्षितक्ष्यक्षीशिराजिधन्विपश्चिपूषिक्लिदिस्निह्नुमस्जेरन् ॥ ९०० ॥ एभ्योऽन् प्रत्ययो भवति । उक्ष

सेचने । उक्षा वृषः । तक्षौ तनूकरणे । तक्षा । वर्द्धकिः अक्षौ व्याप्तौ च । अक्षा दृष्टिनिपातः । ईशिकृ ऐश्वर्ये । ईशा परमात्मा । राजग् दीप्तौ । राजा ईश्वरः ।धन्विः स्रौश्रो गतौ, धवु गतौ वा । धन्वा मरुः धनुश्च। पचुङ् व्यक्तीकरणे। पञ्च संख्या । पूष वृद्धौ । पूषा आदित्यः । क्लिदौच् आर्द्रभावे । क्लेदा मुखप्रसेकः चन्द्रः इन्द्रश्च । ष्णिहौच् प्रीतौ । स्नेहा स्वाङ्गम् सुहृत् वशा च गौः । णुक् स्तुतौ । नव संख्या । टु मस्जोंत् शुद्धौ । मज्जा षष्ठो धातुः ॥ लूपूयुवृषिदंशिद्युदिविप्रतिदिविभ्यः कित् ॥ ९०१ ॥ एभ्यः किदन् प्रत्ययो भवति । लूग्श् छेदने । लुवा दात्रं स्थावरश्च । पूग्श् पवने । पुवा वायुः । युक् मिश्रणे । युवा तरुणः । वृषू सेचने । वृषा इन्द्रः वृषभश्च । दंशं दशने । दश संख्या । द्युंक् अभिगमे । द्युवा अभिगमनीयः राजा सूर्यश्च । दिवूच् क्रीडादौ । दिवा दिनम् । प्रतिपूर्वात् प्रतिदिवा अहः अपराह्णश्च ॥ श्वन्मातरिश्वन्मूर्धन्प्लीहन्नर्यमन्विश्वप्सन्परिज्वन्महन्नहन्मघवन्नथर्वन्निति ॥ ॥ ९०२ ॥ एतेऽन्प्रत्ययान्ता निपात्यन्ते । श्वयतेर्लुक् च । श्वा कुक्कुरः । मातरि अन्तरिक्षे श्वयति मातरिश्वा वायुः । अत्र ' तत्पुरुषे कृति ' इति सप्तम्या अलुप् इकारलोपश्च पूर्ववत् । मूर्छेर्धं च । मूर्छन्त्यस्मिन्नाहताः प्राणिन इति मूर्धा शिरः । प्लिहेर्दीर्घश्च । प्लीहा जठरान्तरावयवः । अरिपूर्वादमेर्णन्तात् अरीन् आमयतीति अर्यमा सूर्यः । विश्वपूर्वात् प्सातेः कित् च । विश्वप्सा कालः वायुः अग्निः इन्द्रश्च । परिपूर्वात् ज्वलतेर्डिच्च । परिज्वा सूर्यः चन्द्रः अग्निः वायुश्च । महीयतेरीयलोपश्च । महा महत्त्वम् । अंहेर्नलोपश्च । अहते अहः दिवसः । मङ्घेर्नलोपोऽवू चान्तः । मङ्घ्यते इति मघवा इन्द्रः । नञ्पूर्वात् खर्वेः खस्थश्च । न खर्वति, अथर्वा वेदः ऋषिश्च । इतिकरणादन्येपि भवन्ति ॥ षप्यशौभ्यां तन् ॥ ९०३ आभ्यां तन् प्रत्ययो भवति । षप समवाये । अशौटि व्याप्तौ । सप्त अष्ट उभे संख्ये ॥ स्नामदिपद्यर्तिपॄशकिभ्यो वन् ॥९०४॥ एभ्यो वन् प्रत्ययो भवति । ष्णांक् शौचे । स्नावा शिरा नदी च । मदैच् हर्षे ।

मद्वा हस्तः पानं कान्तिः क्रीडा मुनिः शिरश्च । मद्वरी मदिरा । बाहुलकात् ङी वनोरश्च । पदिंच् गतौ । पद्वा पत्तिः वत्सः रथः पादः गतिश्च । ऋंक् गतौ । अर्वा अश्वः अशनिः आसनं मुनिश्च । पॄश् पालनपूरणयोः । पर्व सन्धिः पूरणं पुण्यतिथिश्च । शक्लृंट् शक्तौ । शक्वा वर्धकिः समर्थः । शक्वरी नदी विद्युत् छन्दोजातिः युवतिः सुरभिश्च । शाक्वरो वृषः ॥ ग्रहेरा च ॥९०५॥ ग्रहीश् उपादाने इत्यस्माद् वन् प्रत्ययो भवति आकारश्चान्तादेशः ग्रावा पाषाणः पर्वतश्च ऋशीकुशिरुहिजिक्षिहसृधृहभ्यः क्वनिप् ॥ ९०६ ॥ ऋत्वा ऋषिः । शीवा अजगरः । कुश्वा सृगालः । रुह्वा वृक्षः । जित्वा धर्मः इन्द्रः योद्धा च । जित्वरी नदी वणिजश्च । वाराणसीं जित्वरीमाहुः । क्षित्वा वायुः विष्णुः मृत्युश्च । क्षित्वरी रात्रिः । हृत्वा रुद्रः मत्स्यः वायुश्च । सृत्वा कालः अग्निः वायुः सर्पः प्रजापतिः नीचजातिश्च । सृत्वरी वेश्यामाता । धृत्वा विष्णुः शैलः समुद्रश्च । धृत्वरी भूमिः । हत्वा हस्तः । पकारस्तागमार्थः सृजेः स्रज्सृकौ च ॥ ॥ ९०७ ॥ सृजंत् विसर्गे इत्यस्मात् क्वनिप् प्रत्ययो भवति स्रज् सृक् इत्यादेशौ चास्य भवतः । स्रज्वा मालाकारः रज्जुश्च । सृक्कणी आस्योपान्तौ ॥ ध्याप्योर्धी पी च ॥ ९०८ ॥ ध्यैं चिन्तायाम् प्यैंङ् वृद्धौ इत्याभ्यां क्वनिप् प्रत्ययो यथासंख्यं च धी पी इत्येतावादेशौ भवतः । ध्यायतीति धीवा मनिषी निषादः व्याधिः मत्स्यश्च । प्यायतेः, पीवा पीनः ॥ अतेर्ध च ॥ ९०९ ॥ अत सातत्यगमने इत्यस्मात् क्वनिप् प्रत्ययो धश्चान्तादेशो भवति । अध्वा मार्गः ॥ प्रात्सदिरीरिणस्तोऽन्तश्च ॥ ९१० ॥ प्रपूर्वेभ्यः सद्यादिभ्यः क्वनिप् प्रत्ययस्तोऽन्तश्च भवति । षद्लृं विशरणगत्यवसादनेषु । प्रसत्वा मूढः वायुश्च । प्रसत्वरी माता प्रतिपत्तिश्च । रीश् गतिरेषणयोः । प्ररीत्वा वायुः । प्ररीत्वरी स्त्रीविशेषः । ईरिक् गतिकम्पनयोः । प्रेर्त्वा सागरः वायुश्च । प्रेर्त्वरी नगरी । इणंक् गतौ । प्रेत्वरी नगरीत्याहुः ॥ मन् ॥ ९११ ॥ सर्वधातुभ्यो

बहुलं मन् प्रत्ययो भवति । डुकृंग् करणे । कर्म व्यापारः । वृग्ट् वरणे । वर्म कवचम् । वृतूङ् वर्तने । वर्त्म प-
न्थाः । चर भक्षणे च । चर्म अजिनम् । भस भर्त्सनदीप्त्योः सौत्रः । भसितं तदिति भस्म भूतिः ॥ जनैचि
प्रादुर्भावे । जन्म उत्पत्तिः । शृश् हिंसायाम् । शर्म सुखम् । बसवोऽस्य दुरितं शीर्यासुरिति वसुशर्मा ।
एवं हरिशर्मा । मृत् प्राणत्यागे । मर्म जीवप्रदेशप्रचयस्थानम् । यत्र जायमाना वेदना महती जायते । नृश् नये ।
नर्म परिहासकथा । श्लिषंच् आलिङ्गने । श्लेष्मा कफः । उष रुजायाम् । उष्मा तापः । डु डु भृंगक् पोषणे
च । भर्म सुवर्णम् । यांक् प्रापणे । यामा रश्मः । वांक् गतिगन्धयोः । वामा करचरणह्रस्वः । पांक् रक्षणे । पामा
कच्छुः । वृषू सेचने । वर्ष्म शरीरम् । षदलृं विशरणगत्यवसादनेषु । सद्म गृहम् । विशंत् प्रवेशने । वेश्म गृहम्
। हिट् गतिवृद्ध्योः । हेम सुवर्णम् । छदण् अपवारणे । छद्म माया । दीङ्च् क्षये, देङ् पालने वा । दाम रज्जुः
माता च । डु धांग्क् धारणे च । धाम स्थानं तेजश्च । ष्ठां गतिनिवृत्तौ । स्थाम बलम् । षुंग्ट् अभिषवे । सोमा
यज्ञः पयो रसः चन्द्रमाश्च । अशौटि व्याप्तौ । अश्मा पाषाणः । लक्षीण् दर्शनाङ्कनयोः । लक्ष्म चिह्नम् । अयि
गतौ । अय्मसंग्रामः । तक् हसने । तक्मा रतिः आतपः द्वीपश्च । हुंक् दानादनयोः । होम हव्यद्रव्यम् अग्निहोत्र-
शाला च । धृंग् धारणे । धर्म पुण्यम् । विपूर्वात् विधर्मा अहितः वायुः व्यभिचारश्च । ध्यैं चिन्तायाम्
। ध्याम ध्यानम् ॥ कुष्युषिसृपिभ्यः कित् ॥९१२॥ एभ्यः कित् मन् प्रत्ययो भवति । कुषश् निष्कर्षे । कुष्म
शल्यम् । उषू दाहे । उष्मा दाहः सृप्लृं गतौ । सृप्मा सर्पः शिशुः यतिश्च ॥ बृंहेनोऽच्च ॥ ९१३ ॥
बृंहु शब्दे इत्यस्मात् मन् प्रत्ययो भवति नकारस्य चाकारः । ब्रह्म परं तेजः अध्ययनं मोक्षः । बृहत्त्वादात्मा ।१४४।
। ब्रह्मा भगवान् ॥ व्येग एदोतौ च वा ॥ ९१४ ॥ व्येंग् संवरणे इत्यस्मात् मन प्रत्यय एदोतौ चान्तादेशौ वा

भवतः । व्येम वस्त्रम् । व्येमा संसारः कुविन्दभाण्डं च । व्योम नभः । पक्षे, व्याम न्यग्रोधाख्यं प्रमाणम् ॥ स्यतेरी च वा ॥ ९१५ ॥ षोंच् अन्तकर्मणि इत्यस्मात् मन् प्रत्यय ईकारश्चान्तादेशो वा भवति । सीमा आघाटः । पक्षे, साम प्रियवचनं सामवेदश्चादि च ॥ सात्मन्नात्मन्वेमन्व्योमन्क्लोमन्ललामन्नामन्पाप्मन्पक्ष्मन्यक्ष्मन्निति ॥ ॥ ९१६ ॥ एते मन्प्रत्ययान्ता निपात्यन्ते । स्यतेस्तोऽन्तश्च । सात्म अत्यन्ताभ्यस्तं प्रकृतिभूतम् अन्तकर्म च । अतेः दीर्घश्च । आत्मा जीवः । वेग आत्वाभावश्च । वेम तन्तुवायोपकरणम् । रुहेर्लुक् च । रोम तनूरुहम् । लत्वे, लोम तदेव। क्लमेरोच्च । क्लोम शरीरान्तरवयवः । लातेर्द्वित्वं च । ललाम भूषणादि । नमेरा च । नाम संज्ञा कीर्तिश्च । पातयस्तेस्तः पू च । पाप्मा पापं रक्षश्च । पक्षेः कः षोऽन्तो न लोपश्च । पक्ष्म अक्ष्यादिलोम । यक्ष्यतेः यक्षिणो वा यक्ष्मा रोगः । इति करणात् तोक्मरुक्मादयो भवन्ति ॥ हृजनिभ्यामिमन् ॥ ९१७ ॥ आभ्यामिमन् प्रत्ययो भवति । हृंग् हरणे । हरिमा पापविशेषः मृत्युः वायुश्च । जनैचि प्रादुर्भावे । जनिमा धर्मविशेषः संसारश्च ॥ सृहृभृधृस्तृसूभ्य ईमन् ॥ ९१८ ॥ एभ्य ईमन् प्रत्ययो भवति । सृं गतौ । सरीमा कालः । हृंग् हरणे । हरीमा मातरिश्वा । डुड् भृंग्क् पोषणे च । भरीमा क्षमी राजा कुटुम्बं च । धृंग् धारणे । धरीमा धर्मः । स्तृंग्श् आच्छादने । स्तरीमा प्रावारः ॥ षूत् प्रेरणे । सवीमा गर्भः प्रसूतिश्च ॥गमेरिन्॥९१९॥ गम्लृं गतावित्यस्मादिन् प्रत्ययो भवति । गमिष्यतीति गमी जिगमिषुः ॥ आङश्च णित्॥९२०॥आङ्पूर्वात्केवलाच्च गमेर्णिदिन् प्रत्ययो भवति । आगमिष्यतीति आगामी प्रोषितादिः ॥ गमिष्यतीति गामी प्रस्थितादिः ॥ सुवः ॥ ९२१॥ षूङौच् प्राणिप्रसवे इत्यस्मात् णिदिन् प्रत्ययो भवति । आसावी आसविष्यमाणः जनिष्यमाण इत्यर्थः ॥भुवो वा॥९२२॥भू सत्तायामित्यस्मात् इन् प्रत्ययः स च णिद्वा भवति।भविष्यतीति भावी कर्मविपाकादिः । भवी भविष्यन् ॥ प्रप्रतेर्यांबुधिभ्याम् ॥९२३॥ प्रपूर्वात् प्रतिपूर्वाच्च यांक् प्रापणे, बुधि

प्रनिंच् ज्ञाने इत्यस्मात् च णिदिन् प्रत्ययो भवति । प्रयास्यतीति प्रयायी,प्रतियास्यतीति प्रतियायी । प्रभोत्स्यत इति प्रबोधी प्रतिबोधी बालादिः ॥ प्रात् स्थः ॥ ९२४ ॥ प्रपूर्वात् ष्ठां गतिनिवृत्तावित्यस्माण्णिदिन् प्रत्ययो भवति । प्रस्थास्यते इति प्रस्थायी गन्तुमनाः ॥ ९२४ ॥ परमात् कित् ॥ ९२५ ॥ परमपूर्वात् तिष्ठतेः किदिन् प्रत्ययो भवति । परमे पदे तिष्ठतीति परमेष्ठी अर्हदादिः । भीरुष्ठानादित्वात् षत्वम्, सप्तम्या अलुप् च ॥ पथिमन्थिभ्याम् ॥ ९२६ ॥ आभ्यां किदिन् प्रत्ययो भवति । पथे गतौ । पन्थाः मार्गः । पन्थानौ । पन्थानः । पथिप्रियः । मन्थश् विलोडने । मन्थाः क्षुब्धः वायुः वज्रश्च । मन्थानौ । मन्थानः । मथिप्रियः ॥ होर्मिन् ॥९२७॥ हुंक् दानादनयोरित्यस्मात् मिन् प्रत्ययो भवति । होमी ऋत्विक् घृतं च ॥अर्तेर्भुक्षिनक् ॥ ९२८ ॥ ऋंक् गतावित्यस्मात् भुक्षिनक् प्रत्ययो भवति ॥ ऋभुक्षा इन्द्रः । ऋभुक्षाणौ ऋभुक्षाणः ॥ अदेस्त्रिन् ॥९२७॥ अदंक् भक्षणे इत्यस्मात् त्रिन् प्रत्ययो भवति । अत्री ऋषिः ॥ पतेरत्रिन् ॥९३०॥ पत्लृ गतावित्यस्मादत्रिन् प्रत्ययो भवति । पतत्री पक्षी ॥आपः क्विप् ह्रस्वश्च आप्लृंट् व्याप्तावित्यस्मात् क्विप् प्रत्ययो ह्रस्वश्चास्य भवति । आपः अम्भः । स्वभावाद्बहुत्वम् ॥ ककुप्त्रिष्टुबनुष्टुभः ॥ ९३२ ॥ एते क्विप्प्रत्ययान्ता निपात्यन्ते । कपूर्वात् स्कुभ्नातेः सलोपश्च । कं वायुं ब्रह्म च स्कुभ्नन्तीति ककुभो दिशः । कुकुप् उष्णिक् छन्दः । त्र्यनुपूर्वात् स्कुभ्नातेः सः षश्च । त्रिष्टुप् छन्दः । अनुष्टुप् छन्दः । बहुवचनान्निजिविजिविषां क्विप् शित् । नेनिक् प्रजापतिः । वेविक् शुचिः । वेविट् चन्द्रमाः ॥ अवेर्मः ॥ ९३३ ॥ अव रक्षणादावित्यस्मान्मः प्रत्ययो भवति । अवतीति ओम् ब्रह्म प्रणवश्च सेरितेरम् ॥ ९३४ ॥ सुपूर्वादिणंक् गतावित्यस्मात् अम् प्रत्ययो भवति । स्वयम् आत्मना ॥ नशिनूभ्यां नक्तनूनौ च ॥ ९३५ ॥ नशौच् अदर्शने णूत् स्तवने आभ्यामम् प्रत्ययो नक्त नून इत्यादेशौ चानयोर्भवतः । नक्तं रात्रौ । नूनं वितर्के ॥ स्यतेर्णित् ॥ ९३६ ॥

षोँच् अन्तकर्मणीत्यस्मात् णिदम् प्रत्ययो भवति । सायम् दिवसावसानम् ॥ गमिजमिक्षमिकमिशमिसमिभ्यो डित् ॥९३७॥ एभ्यो डिदम् प्रत्ययो भवति । गम्लृ गतौ । गम् । जमू अदने । जम् । क्षमौषि सहने । क्षम् । एतानि भार्यानामानि । कमूङ् कान्तौ । कम् पानीयम् । शमूच् उपशमे । शम् सुखम् । षम वैक्लव्ये । सम् । संभवति ॥ इणो दमक् ॥ ९३८ ॥ इणंक् गताविस्यस्मात् कित् दम् प्रत्ययो भवति । इदम् प्रत्यक्षनिर्देशे ॥ कोर्डिम् ॥ ९३९ ॥ कुङ् शब्दे इत्यस्मात् डिदिम् प्रत्ययो भवति । किम् अनेनाविज्ञातं वस्तु पर्यनुयुज्यते ॥ तूषेरीम् णोऽन्तश्च ॥ ९४० ॥ तूष तुष्टावित्यस्मादीम् प्रत्ययो णकारश्चास्यान्तो भवति । तूष्णीं वाङ्नियमे ॥ ईङ्कमिशमिसमिभ्यो डित् ॥ ९४१ ॥ एभ्यो डिदीम् प्रत्ययो भवति । ईङ् च् गतौ । ईम् । कमूङ्कान्तौ । कीम् । शमूच् उपशमे । शीम् । षम वैक्लव्ये । सीम् । अभिनयव्याहरणान्येतानि । ईम् शीम् अव्यक्ते । कीम् संशयप्रश्नादिषु । सीम् अमर्षपादपूरणयोः ॥ क्रमिगमिक्षमेस्तुमाच्चातः ॥ ९४२ ॥ एभ्यस्तुम् प्रत्ययोऽकारस्य चाकारो भवति । क्रमू पादविक्षेपे । क्रान्तुं गमनम् । गम्लृं गतौ । गान्तुम् पान्थः । क्षमौषि सहने । क्षान्तुम् भूमिः तुमर्थश्च सर्वत्र ॥ ॥ गॄपॄदुर्विधुर्विभ्यः क्विप् ॥ ९४३ ॥ एभ्यः क्विप् प्रत्ययो भवति । गॄश् शब्दे ॥ गीः वाक् । पॄश् पालनपूरणयोः । पूः नगरी । दुर्वै धुर्वै हिंसायाम् । दूः देहान्तरवयवः । धूः शकटाङ्गम् आदिश्च ॥ वाद्वारौ ॥ ९४४ ॥ एतौ क्विप्प्रत्ययान्तौ निपात्येते । वृणोतेर्द्वेद्विश्च । वाः पानीयम् । कर्मणि दश्च धात्वादिः वृण्वन्ति तामिति द्वाः द्वारम् । वृञ् वरणे इत्यस्य च णिगन्तस्य रूपम् ॥ प्रादतेरट् ॥ ९४५ ॥ प्रपूर्वादत सातत्यगमने इत्यस्मादट् प्रत्ययो भवति । प्रातः प्रभातम् ॥ सोरतेर्लुक् च ॥ ९४६ ॥ सुपूर्वादिंक् गतावित्यस्मादट् प्रत्ययो धातोश्च लुग् भवति । स्वः स्वर्गः ॥ पूसन्यमिभ्यः पुनसनुतान्ताश्च ॥ ९४७ ॥ पूगृश् पवने, षण्

भक्तौ, अम गतावित्येतेभ्योऽर् प्रत्ययो भवति यथासंख्यं च । पुन् सनुत् अन्त् इत्यादेशा एषां भवन्ति । पुनः भूयः । सनुतः कालवाची । अन्तः मध्ये ॥ चतेरुर् ॥ ९४८ ॥ चतेग् याचने इत्यस्मादुर् प्रत्ययो भवति । चत्वारः संख्या । चत्वारि । चतस्रः ॥ दिवेर्डिव् ॥ ९४९ ॥ दिवूच् क्रीडादावित्यस्मात् डिदिव् प्रत्ययो भवति । द्यौः स्वर्गः अन्तरिक्षं च । दिवौ । दिवः ॥ विशिविपाशिभ्यां क्विप् ॥ ९५० ॥ आभ्यां क्विप् प्रत्ययो भवति । विशंत् प्रवेशने । विशः प्रजाः । विट् वैश्यः पुरीषं अपत्यं च । पशण् बन्धने, विपूर्वः । विपाशयति स्म वसिष्ठमिति विपाट् नदी ॥ सहेः षष् च ॥ ९५१ ॥ षहि मर्षणे इत्यस्मात् क्विप् प्रत्ययः षष् चास्यादेशो भवति । षट् संख्या ॥ अस् ॥ ९५२ ॥ सर्वधातुभ्यो बहुलमस् प्रत्ययो भवति । तपं संतापे । तपः संतापः माघमासः निर्जराफलं चानशनादि । सुष्ठु तपतीति सुतपाः । एवं महातपाः । णमं प्रह्वत्वे । नमः पूजायाम् । तमूच् काङ्क्षायाम् । तमः अन्धकारः तृतीयगुणः अज्ञानं च । इणंक् गतौ । अयः काललोहम् । वींक् प्रजनादौ । वयः पक्षी प्राणिनां कालकृता शरीरावस्था च यौवनादिः । वर्चि दीप्तौ । वर्चः लावण्यम् अन्नमलं तेजश्च । सुष्ठु वर्चते इति सुवर्चाः । रक्ष पालने । रक्षः निशाचरः । ञिमिदाच् स्नेहने । मेदः चतुर्थो धातुः । रह त्यागे । रहः प्रच्छन्नम् । षहि मर्षणे । सहाः मार्गशीर्षमासः । णभच् हिंसायाम् । नभः अकाशं श्रावणमासश्च । चितै संज्ञाने । चेतः चित्तम् । प्रचेता वरुणः । मनिच् ज्ञाने । मनः नोन्द्रियम् ब्रूग्क् व्यक्तायां वाचि । वचः वचनम् । रुदृक् अश्रुविमोचने । रोदः नभः । रोदसी द्यावापृथिव्यौ । रुधूंपी आवरणे । रोधः तीरम् । अनक् प्राणने । अनः शकटम् अन्नं भोजनं च । सृं गतौ । सरः जलाशयविशेषः । तॄ प्लवनतरणयोः । तरः वेगः बलं च । रहु गतौ । रंहः जवः । तिजि क्षमानिशानयोः । तेजः दीप्तिः । मयि दीप्तौ । मयः सुखम् । मह पूजायाम् । महः तेजः । अर्चिण् पूजायाम् । अर्चः पूजा । षद्लृ

विशरणादौ । सदः सभा भवनं च । अञ्जौप् व्यक्त्यादौ । अञ्जः स्नेहः ॥ पाहाक्भ्यां पयशौ च ॥ ९५३ ॥ पां पाने ओहांङ् त्यागे इत्याभ्यामस् प्रत्ययो भवति यथासंख्यं च पय् श इत्यादेशावनयोर्भवतः । पयः क्षीरं जलं च । श्वः अनन्तरातीते दिने ॥ छदिवहिभ्यां छन्दोधौ च ॥ ९५४ ॥ छदण् संवरणे वहीं प्रापण इत्याभ्यामस् प्रत्ययो यथासंख्यं चानयोः छन्द् ऊध् इत्यादेशौ भवतः । छन्दः वेदः इच्छा वाग्बन्धविशेषश्च । ऊधः धेनोः क्षीराधारः ॥ श्वेः शव् च वा ॥ ९५५ ॥ ट्वो श्वि गतिवृद्ध्योरित्यस्मात् अस् प्रत्ययो भवति अस्य च शव् इत्यादेशो वा । शवः रोगाभिधानं मृतदेहश्च । शवसी । शवांसि । श्वयः शोफः बलं च । श्वयसी । श्वयांसि ॥ विश्वाद्विदिभुजिभ्याम् ॥ ॥ ९५६ ॥ विश्वपूर्वाभ्यामाभ्यामस् प्रत्ययो भवति । विदक् ज्ञाने । विश्ववेदाः अग्निः । भुजंप् पालनाभ्यवहारयोः । । विश्वभोजाः अग्निः लोकपालश्च ॥ चायेर्नो ह्रस्वश्च वा ॥ ९५७ ॥ चायृग् पूजानिशामनयोः इत्यस्मात् अस् प्रत्ययो नकारोऽन्तादेशो ह्रस्वश्चास्य वा भवति । चनः चाणश्चान्नम् । बाहुलकाण्णत्वम् । णत्वं नेच्छन्त्येके ॥ अशो-र्यश्चादिः ॥ ९५८ ॥ अशश् भोजने अशौटि व्याप्तावित्यस्मादस् प्रत्ययो यकारश्च धात्वादिर्भवति । यशः महात्म्यम् सत्त्वं श्रीः ज्ञानं प्रतापः कीर्तिश्च । एवं शोभनमश्नाति अश्नुते वा सुयशाः । नागमेवाश्नाति नागयशाः । बृहदेनोऽश्नाति बृहद्यशाः । श्रुत एनोऽश्नाति श्रुतयशाः । एवमन्येऽपि द्रष्टव्याः ॥ उषेर्ज च ॥ ९५९ ॥ उष् दाहे इत्यस्मादस् प्रत्ययो जकारश्चान्तादेशो भवति । ओजः बलं प्रभावः दीप्तिः शुक्रं च ॥ स्कन्देर्ध् च ॥ ९६० ॥ स्कंदृं गति-शोषणयोः इत्यस्मात् अस् प्रत्ययो भवति धकारश्चान्तादेशः । स्कन्धः स्वाङ्गम् ॥ अवेर्वा ॥ ९६१ ॥ अव रक्षणादावि-त्यस्मादस् प्रत्ययो धकारश्चान्तादेशो वा भवति । अधः अवरम् । अवः रक्षा ॥ अमेर्भहौ चान्तौ ॥ ९६२ ॥ अम गतावित्यस्मादस् प्रत्ययो भकारहकारौ चान्तौ भवतः । अम्भः पानीयम् । अंहः पापम् अपराधः दिनश्च ॥ अदेरन्ध

च वा ॥ ९६३ ॥ अदंक् भक्षणे इत्यस्मादस् प्रत्ययोऽन्धादेशश्चास्य वा भवति । अद्यते तदिति अन्धः अन्नम् । अद्यते दृशा मनसा च तत् इति अदः, अनेन प्रत्यक्षविप्रकृष्टम् अप्रत्यक्षं च बुद्धिस्थमपदिश्यते ॥ आपोऽपाप्ताप्सराब्जाश्च ॥ ९६४ ॥ आप्लृंट् व्याप्तावित्यस्मात् अस् प्रत्ययोऽप् अप्त् अप्सर् अब्ज् इत्यादेशाश्चास्य भवन्ति । अपः सत्कर्म । अप्तः तदेव । अप्सरसः देवगणिकाः । अब्जः जलजम् अजर्यं च रूपम् ॥ उच्यञ्चेः क च ॥ ९६५ ॥ उचच् समवाये अञ्चू गतौ चेत्याभ्यामस् प्रत्ययोऽनयोश्च कोऽन्तादेशो भवति । ओकः आलयः जलौकसश्च । अङ्कः स्वाङ्कम् रणश्च ॥ अञ्ज्यजियुजिभृजेर्ग च ॥ ९६६ ॥ एभ्योऽस् प्रत्ययो गकारश्चान्तादेशो भवति । अञ्जौप् व्यक्त्यादौ अङ्गः क्षत्रियनाम गिरिपक्षी व्यक्तिश्च । अज क्षेपणे च । अगः क्षेमम् । युजूंपी योगे । योगः मनः युगं च । भृजैङ् भर्जने । भर्गः रुद्रः हविः तेजश्च ॥ अर्तेरुरार्शौ च ॥ ९६७ ॥ ऋंक् गतावित्यस्मादस् प्रत्ययोऽस्य चोरिति अर्श् इति च तालव्यशकारान्त आदेशो भवति । उरः वक्षः । अर्शांसि गुदादिकीलाः ॥ येन्धिभ्यां यादेधौ च ॥ ९६८ ॥ यांक् प्रापणे, ञि इन्धैपि दीप्तौ इत्याभ्यामस् प्रत्ययो यथासंख्यं च याद् एध इत्यादेशौ भवतः । यादः जलदुष्टसत्त्वम् । एधः इन्धनम् ॥ चक्षः शिद्वा ॥ ९६८ ॥ चक्षिङ्क् व्यक्तायां वाचीत्यस्मात् अस् प्रत्ययो भवति स च शिद्वा । चक्षः ख्याः उभे अपि रक्षोनाम्नी । आचक्षाः वाग्मी । आख्याः प्रख्याश्च बृहस्पतिः । संचक्षाः ऋत्विक् । नृचक्षाः राक्षसः ॥ ९६९ ॥ वस्त्यगिभ्यां णित् ॥ ९७० ॥ वस्त्यगिभ्यां णिदस् प्रत्ययो भवति । वसिक् आच्छादने । वासः वस्त्रम् । अग कुटिलायां गतौ । आगः अपराधः ॥ मिथिरञ्ज्युषितॄपॄभूवष्टिभ्यः कित् ॥ ९७१ ॥ एभ्यः किदस् प्रत्ययो भवति । मिथृग् मेधाहिंसयोः । मिथः परस्परम् रहसि चेत्यर्थः । रञ्जीं रागे । रजः गुणः अशुभम् पांसुश्च । उषू दाहे । उषाः संध्या अरुणः रात्रिश्च ।

तॄ प्लवनतरणयोः । तिरस्करोति, तिरः कृत्वा काण्डं गतः । तिर इति अन्तर्द्धावनृजुत्वे च । पॄश् पालनपूरणयोः । पुरः पूजायाम् । तथा च पठन्ति नमः पूजायां पुरश्चेति । शॄश् हिंसायाम् । शृणाति तद्वियुक्तमिति शिरः उत्तमाङ्गम् । भू सत्तायाम् । भुवः लोकः अन्तरिक्षम् सूर्यश्च । वशक् कान्तौ । उशा रात्रिः ॥ विधेर्वा ॥ ९७२ ॥ विधत् विधाने इत्यस्मादस् प्रत्ययो भवति स च किद्वा । वेधाः विद्वान् सर्ववित् प्रजापतिश्च । विधाः स एव ॥ नुवो धथादिः ॥९७३॥ णूत् स्तवने इत्यस्माद्धकारादिस्थकारादिश्च किदस् प्रत्ययो भवति । नूधा नूथाश्च सूतमागधौ । धादौ गुणमिच्छन्त्येके । नोधाः ऋषिः ऋत्विक् ॥ वयःपयःपुरोरेतोभ्यो धागः ॥९७४॥ एभ्यः परात् डुधांग्क् धारणे चेत्यस्मात् किदस् प्रत्ययो भवति । वयोधाः युवा चन्द्रः प्राणी च । पयोधाः पर्जन्यः । पुरोधाः पुरोहितः उपाध्यायश्च । रेतोधा जनकः ॥ नञ ईहेरेहेधौ च ॥ ९७५ ॥ नञ्पूर्वादीहि चेष्टायामित्यस्मात् अस् प्रत्ययोऽस्य च एह् एध् इत्यादेशौ भवतः । अनेहाः कालः इन्द्रः चन्द्रश्च । अनेधाः अग्निः वायुश्च ॥ विहायस्सुमनस्पुरुदंशस्पुरूरवोऽङ्गिरसः ९७६ ॥ एतेऽस्प्रत्ययान्ता निपात्यन्ते । विपूर्वाज्जहातेर्जिहीतेर्वा योऽन्तश्च । विजहातीति विहायः आकाशम् । विजिहीत इति विहायाः पक्षी । सुपूर्वान्मानेर्ह्रस्वश्च । सुष्ठु मानयन्ति मान्यन्ते वा सुमनसः पुष्पाणि । पुरुं दशतीति पुरुदंशाः इन्द्रः पुरुपूर्वाद्रौतेर्दीर्घश्च । पुरु रौति पुरूरवाः राजा यमुर्वशी चकमे । अङ्गेरिरोऽन्तश्च । अङ्गतीत्यङ्गिरा ऋषिः ॥ पातेर्जस्थसौ ॥ ९७७ ॥ पांक् रक्षण इत्यस्मात् जस थस इत्येतौ प्रत्ययौ भवतः । पाजः बलम् । पाथ उदकम् अन्नं च ॥ स्रुरीभ्यां तस् ॥ ९७८ ॥ आभ्यां तस् प्रत्ययो भवति । स्रु गतौ । स्रोतः निर्झरणम् । सुष्ठु स्रवतीति सुस्रोताः । रींशू गतिरेषणयोः । रेतः शुक्रम् ॥ अर्तीणभ्यां नस् ॥ ९७९ ॥ आभ्यां नस् प्रत्ययो भवति । ऋंक् गतौ । अर्णः जलम् । इणंक् गतौ । एनः पापम् अपराधश्च ॥ रिचेः क च ॥ ९८० ॥ रिचॄंपी विरेचन इत्यस्मात् नस् प्रत्ययोऽस्य

च ककारोऽन्तादेशो भवति । रेक्णः पापं धनं च ॥ **रीवृभ्यां पस्** ॥ ९८१ ॥ आभ्यां पस् प्रत्ययो भवति । रींश् गतिरेषणयोः । रेपः पापम् । वृग्ट् वरणे । वर्पः रूपम् ॥ **शीङः फस् च** ॥ ९८२ ॥ शीङ्क् स्वप्ने इत्यस्मात् फस् चकारात् पस् प्रत्ययो भवति । शेफः शेपश्च मेढ्रम् ॥ **पचिवचिभ्यां सस्** ॥ ९८३ ॥ आभ्यां सस् प्रत्ययो भवति । डु पचींष् पाके । पक्षः चक्रम् इन्धनं च । वचंक् भाषणे । वक्षः उरः शरीरं च ॥ **इणस्तशस्** ॥ ९८४ ॥ इणंक् गतावित्यस्मात् तशस् प्रत्ययो भवति । एतशाः सोमः अध्वर्युः वायुः अग्निः अर्कः इन्द्रश्च ॥ **वष्टेः कनस्** ॥ ९८५ ॥ वशक् कान्तावित्यस्मात् कित् अनस् प्रत्ययो भवति । उशनाः शुक्रः ॥ **चन्दो रमस्** ॥ ९८६ ॥ चदु दीप्त्याह्लादयोरित्यस्माद्रमस् प्रत्ययो भवति । चन्द्रमाः शशी ॥ **दमेरुनसूनसौ** ॥ ९८७ ॥ दमूच् उपशम इत्यस्मात् उनस् ऊनस् इत्येतौ प्रत्ययौ भवतः । दमुनाः अग्निः । दमूना सूर्यः देवः उपशान्तश्च ॥ **इण आस्** ॥ ९८८ ॥ इणंक् गतावित्यस्मादास् प्रत्ययो भवति । अयाः कालः आदित्यश्च ॥ **रुच्यर्चिशुचिहुसृपिछादिछृदिभ्य इस्** ॥ ९८९ ॥ रोचिः किरणः वसुपूर्वाद्वसुरोचिः वासवः किरणः ऋतुश्च । अर्चिः ज्वाला । शोचिः रश्मिः शोकः पि[illegible]लभावः विविक्तं च । हविः पुरोडाशादि । सर्पिः घृतम् । छदण् संवरणे । छादयतीति छदिः । ' छदेरिस्मन्त्रट्क्वौ ' इति ह्रस्वः । बाहुलकाद्दीर्घत्वे छादिः । उभयं गृहच्छादनम् । ऊ छृदृपी दीप्तिदेवनयोः । छर्दिः वमनम् ॥ **बंहिबृंहेर्नलुक् च** ॥ आभ्यामिस् प्रत्ययो नकारस्य च लुक् भवति । बहुङ् वृद्धौ । बहिः अनभ्यन्तरे बृहु शब्दे च । बर्हिः शिखी दर्भश्च ॥ **द्युतेरादेश्च जः** ॥ ९९१ ॥ द्युति दीप्तावित्यस्मादिस् प्रत्ययो धात्वादेश्च वर्णस्य जकारो भवति । ज्योतिः तेजः सूर्यः अग्निः तारका च ॥ **सहेर्धं च** ॥ ९९२ ॥ षहि मर्षण इत्यस्मात् इस् प्रत्ययो धकारश्चान्तादेशो भवति । सधिः सत्त्वम् भूमिः संयोगः सहिष्णुः अग्निः अनड्वांश्च ॥ **पस्थोऽन्तश्च** ॥ ९९३ ॥ पां पाने इत्यस्मादिस् प्रत्ययः थकार-

श्रान्तो भवति । पाथिः पानं नदी आदित्यः ज्योतिः स्वर्गलोकश्च ॥ नियो डित् ॥ ९९४ ॥ णींग् प्रापणे इत्यस्मात् डिदिस् प्रत्ययो भवति । निश्चिनोति । निरुपसर्गोऽयं पृथग्भावे ॥ अवेर्णित् ॥ ९९५ ॥ अव रक्षणादावित्यस्माण्णिदिस् प्रत्ययो भवति । आविः प्राकाश्ये । आविरभूत् आविष्करोति ॥ तुभूस्तुभ्यः कित् ॥ ९९६ ॥ एभ्यः किदिस् प्रत्ययो भवति । तुंक् वृत्त्यादौ । तुविः समुद्रः सरित् विवस्वान् प्रभुर्मयोगश्च । भू सत्तायाम् । भुविः क्रतुः समुद्रः सरित् विवस्वांश्च । ष्टुंग्क् स्तुतौ । स्तुतिः स्तोता यज्ञश्च ॥ रुद्यर्तिजनितनिधनिमनिग्रन्थिपृतपित्रपिवपियजिप्रादिवेपिभ्य उस् ॥ ९९७ ॥ रोदुः अश्रुनिपातः । अरुः व्रणः आदित्यः प्राणः समुद्रश्च । जनुः अपत्यं पिता माता जन्म प्राणी च । तनुः शरीरम् । धन धान्ये, सौत्रः । धनुः चापम् । मनिच् ज्ञाने । मनुः प्रजापतिः । ग्रन्थुः ग्रन्थः । परुः पर्व समुद्रः धर्मश्च । तपं संतापे । तपुः त्रपु शत्रुः भास्करः अग्निः कृच्छ्रादि च । त्रपुः त्रपु । वपुः शरीरं लावण्यं तेजश्च । यजुः अच्छन्दा श्रुतिः यज्ञोत्सवश्च । प्रादुः प्राकाश्ये उत्पत्तौ च । प्रादुर्बभूव । प्रादुरासीत् । वेपुः वेपथुः ॥ इणो णित् ॥ ९९८ ॥ इणंक् गतावित्यस्मात् णिदुस् प्रत्ययो भवति । आयुः जीवितम् । जटापूर्वादपि । जटायुः अरुणात्मजः ॥ ' तं नीलजीमूतनिकाशवर्णं, सपाण्डुरोरस्कमुदारधैर्यम् ॥ ददर्श लङ्काधिपतिः पृथिव्यां, जटायुषं शान्तमिवाग्निदाहम्' ॥१॥ दुषेर्डित् ॥९९९॥ दुषंच् वैकृत्ये इत्यस्मात् डिदुस् प्रत्ययो भवति । दुः निन्दायाम् । दुष्पुरुषः ॥ मुहिमिथ्यादेः कित् ॥ १००० ॥ आभ्यां किदुस् प्रत्ययो भवति । मुहौच् वैचित्त्ये । मुहुः कालावृत्तिः । मिथृग् मेधाहिंसयोः । मिथुः संगमः । आदिग्रहणादन्येभ्योऽपि भवति ॥ चक्षेः शिद्वा ॥ १००१ ॥ चक्षिक् व्यक्तायां वाचि इत्यस्मात् कित् उस् प्रत्ययो भवति स च शिद्वा । चक्षुः परिचक्षुः अवचक्षुः अवसंचक्षुः अचक्षुः अवख्युः । बाहुलकात् द्विर्वचने, संचचक्षुः विचख्युः ॥ पातेर्डुम्सुः ॥ १००२ ॥

पांङ् रक्षणे इत्यस्मात् डिदुम्सुः प्रत्ययो भवति । पुमान् पुरुषः । पुमांसौ । पुमांसः । उकार उदित्कार्यार्थः ॥ न्युद्भ्यामञ्चेः ककाकैसष्टावच ॥ १००३ ॥ न्युद्भ्यां परादञ्चू गतौ चेत्यस्मात् कितः अ आ ऐस् इत्येते प्रत्यया भवन्ति ते च टावत् । टायामिव एषु कार्यं भवतीत्यर्थः । तेन 'अच्च प्राग्दीर्घश्च' इति भवति । नीचम् उच्चम् । नीचा उच्चा । नीचैः उच्चैः । प्रसिद्धार्था एते । लाघवार्थं सन्ताधिकारेऽपि अकाराकारप्रत्ययविधानम् ॥ शमो नियो डैस् मलुक् च ॥ १००४ ॥ शम्पूर्वात् णींग् प्रापणे इत्यस्मात् डिदस् प्रत्ययो भवति शमो मकारस्य च लुग् भवति । शनैः मन्दम् ॥ यमिदमिभ्यां डोस् ॥ १००५ ॥ आभ्यां डिदोस् प्रत्ययो भवति । यमूं उपरमे ॥ योर्विषयसुखम् । दमूच् उपशमे । दोर्बाहुः ॥ अनसो वहेः क्विप् सश्च डः ॥ १००६ ॥ अनस्शब्दपूर्वात् वहीं प्रापणे इत्यस्मात् क्विप् प्रत्ययः सकारस्य च डो भवति । अनो वहति अनड्वान् वृषभः ॥ १००६ ॥

॥ इति श्रीतपागच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां पूर्वकृदन्ताः समाप्ताः ॥

## ॥ अथोत्तरकृदन्तप्रकरणम् ॥

वर्त्स्यति गम्यादिः ॥ ५ । ३ । १ ॥ इन्नाद्यन्तः साधुः । अनेन सामान्यतः सिद्धानां प्रत्ययानां भविष्यत्कालार्थता विधीयते । गमिष्यतीति गमी ग्रामम् । इन्नौणादिकः सति प्राप्तो वर्त्स्यति भवति । आगामी । भावी । प्रस्थायी । एभ्य औणादिको णिन् ॥ वा हेतुसिद्धौ क्तः ॥ ५ । ३ । २ ॥ वर्त्स्यति वर्त्तमानाद्धातोः । किं ब्रवीषि वृष्टो देवः सम्पन्नास्तर्हि शालयः । सम्पत्स्यन्त इति वा ॥ कषोऽनिटः ॥ ५ । ३ । ३ ॥ कषेः कृच्छ्रगहनयोरनिट्त्वमुक्तम् । तस्माद्वर्त्स्यति क्तः । कषिष्यतीति कष्टम् । कष्टा दिशस्तमसा । अनिट् इति किम् ? । कषिताः शत्रवः शूरेण । क्रियायां क्रियार्थायां तुम्णकच् भविष्यन्ती ॥ ५ । ३ । १३ ॥ क्त्वातुमम् भावे ॥ ५ । १ । १३ ॥ कर्तुं व्रजति कारको व्रजति । कालवेलासमये तुम्वाऽवसरे ॥ ५ । ४ । ३३ ॥ गम्यमाने धातोः । कालः समयो वेला वा भोक्तुम् । वावचनाद्यथाप्राप्तम् । कालो भोक्तव्यस्य । अवसर इति किम् ? । कालः पचति भूतानि ॥ शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम् ॥ ५ । ४ । ९० ॥ शक्याद्यर्थेषु धातुषु समर्थार्थेषु नामसु इच्छार्थेषु धातुषु चोपपदेषु कर्मभूताद्धातोस्तुम् । शक्नोति पारयति वा भोक्तुम् । एवं धृष्णोत्यध्यवस्यति जानाति आरभते लभते सहते अर्हति ग्लायति घटते अस्ति समर्थ इच्छति वा भोक्तुम् ॥ अक्रियार्थं अक्रियार्थेऽपि पदार्थे चेदं प्रस्तूयते ॥ कर्मणोऽण् ॥ ५ । ३ । १४ ॥ क्रियार्थायां क्रियायामुपपदे परात्वर्त्स्यदर्थाद्धा-

तोः । कुम्भकारो याति ॥ भाववचनाः ॥ ५ । ३ । १५ ॥ क्रियायां क्रियार्थायामुपपदे वर्त्स्यदर्थाद्धातोर्घञादयः । पाकाय पक्तये पचनाय वा व्रजति ॥ पदरुजविशस्पृशो घञ् ॥ ५ । ३ । १६ ॥ कृत्वात्कर्त्तरि । वर्त्स्यतीत्यादि निवृत्तम् । पद्यते पत्स्यते अपादि पेदे वा पादः । रोगः । वेशः । स्पर्शो व्याधिविशेषः । सर्त्तेः स्थिरव्याधिबलमत्स्ये ॥ ५ । ३ । १७ ॥ कर्त्तरि घञ् । सरति कालान्तरमिति सारः स्थिरः । अतीसारो व्याधिः । सारो बलम् । विसारो मत्स्यः ॥ भावाकर्त्रोः ॥ ५ । ३ । १८ ॥ भावे कर्तृवर्जिते कारके च धातुभ्यो घञ् । पचनं पाकः । प्रकुर्वन्ति तमिति प्राकारः । एवं ग्रासः । प्रसेवः । दायो दत्तः । भावो भवत्यर्थः साध्यरूपः क्रियासामान्यं धात्वर्थः स च धातुनैवोच्यते । तत्र त्यादयः क्त्वातुमम्तव्यानीयादयश्च भवन्ति । यस्तु धात्वर्थधर्मः सिद्धता नाम लिङ्गसङ्ख्यान्वययोगी द्रव्यवद्धात्वर्थादन्यस्तत्र घञादिविधिः । तद्योगे च लिङ्गवचनभेदः । पाकः । पाकौ । पाकाः ॥ स्फुरस्फुलोर्घञि ॥४।२।४॥ सन्ध्यक्षरस्यात् । विस्फारः । विस्फालः । विष्फारः । विष्फालः । घञि भावकरणे ॥ ४ । २ । ५२ ॥ रञ्जेरुपान्त्यनो लुक् । रागः । भावकरण इति किम् ? । आधारे रङ्गः ॥ स्यदो जवे ॥ ४ । २ । ५३ ॥ स्यन्देर्घञि नलुग्वृद्ध्यभावौ निपात्येते वेगेऽर्थे । गोस्यदः । जव इत्येव, घृतस्यन्दः ॥ दशनावोदैधौद्मप्रश्रथहिमश्रथम् ॥ ४ । २ । ५४ ॥ दंशेरनटि अवपूर्वस्योन्देः इन्धेश्च घञि उन्देर्मनि नलोपः प्रहिमपूर्वस्य श्रन्थेर्घञि वृद्ध्यभावश्च निपात्यते । दशनम् । अवोदः । एधः । ओद्मः । प्रश्रथः । हिमश्रथः । मोऽकमियमोति न वृद्धिः । शमः । दमः । विश्रमेर्वा । विश्रामः विश्रमः ॥ उद्यमोपरमौ ॥ ४ । ३ । ५७ ॥ उदुपाभ्यां यमिरम्योर्घञि वृद्ध्यभावो निपात्यते । उद्यमः । उपरमः । इङोऽपादाने तु टिद्वा ॥ ५ । ३ । १९ ॥ भावाकर्त्रोर्घञ् । अध्ययनमधीयत इति वा अध्यायः । उपेत्य अस्मादधीयत इत्युपाध्यायः । उपाध्यायी । उपाध्याया ॥ श्रोवायुवर्णनिवृते ॥ ५ । ३ । २० ॥

भावाकर्त्रोर्घञ् । शीर्यते औषधादिभिरिति शारो वायुः । मालिन्येन शीर्यते इति शारो वर्णः । निशीर्यते शीताद्युपद्रवो येन तत् नीशारो निवृतम् । प्रावरणमित्यर्थः । गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः । निवृता द्यूतोपकरणमिति कश्चित् । नियमेन वृता इत्यन्वर्थात् ॥ निरभेः पूल्वः ॥ ५ । ३ । २१ ॥ यथासंख्यं भावाकर्त्रोर्घञ् । निष्पावः । अभिलावः ॥ रोरुपसर्गात् ॥५ । ३ । २२॥ भावाकर्त्रोर्घञ् । संरावः । उपरावः । उपसर्गादिति किम् ? । रवः । कथं रावः? । बहुलाधिकारात् ॥ भूश्रयदोऽल् ॥ ५ । ३ । २३॥ उपसर्गाद् भावाकर्त्रोरल् । प्रभवः । प्रश्रयः । प्रघसः । उपसर्गादित्येव । भावः भूश्रयोरुपसर्गादेवेति नियमार्थं वचनम् । बहुलाधिकारात् प्रादिसमासे वा प्रभाव इत्याद्यपि । उपसर्गादित्येव? । भावः । श्रायः । घासः । न्यादो न वा ॥५ । ३ । २४॥ निपूर्वाददेरलि घस्लभावोऽकारस्य दीर्घत्वं च वा निपात्यते । न्यादः । निघसः ॥ संनिव्युपाद्यमः ॥ ५ ।३ । २५ ॥ उपसर्गाद् भावाकर्त्रोरल् वा । संयमः । संयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः ॥ नेर्नदगदपठस्वनक्वणः ॥ ५ । ३ । २६ ॥ उपसर्गाद् भावाकर्त्रोरल् वा । निनदः । निनादः । निगदः । निगादः । निपठः । निपाठः । निस्वनः । निस्वानः । निक्वणः । निक्वाणः ॥ वैणे क्वणः ॥ ५ । ३ । २७ ॥ उपसर्गाद् भावाकर्त्रोरल् वा । वीणायां भवो वैणः । प्रक्वणः । प्रक्वाणो वा वीणायाः । वैण इति किम् ? प्रक्वाणः शृङ्खलस्य ॥ युवर्णवृदृवशरणगमृद्ग्रहः ॥ ५ । ३ । २८ ॥ भावाकर्त्रोरल् । उपसर्गाद्वेति निवृत्तम् । चयः । निश्चयः । जयः । यवः । रवः । लवः । पवः । वरः । दरः । वशः । रणः । गमः । करः । गरः । ग्रहः । बहुलाधिकारात् वारः समूह इत्याद्यपि सिद्धम् ॥ वर्षादयः क्लीबे ॥ ५ । ३ । २९ ॥ यथादर्शनं भावाकर्त्रोर्निपात्यन्ते । नपुंसके क्तानड्निवृत्त्यर्थं वचनम् । वर्षम् । भयम् । धनम् । वनम् । खलम् । पदम् । युगम् । अत्र रथाङ्गकालविशेषयुग्मेष्वल् गत्वगुणाभावौ

च निपातनात् ॥ समुदोऽजः पशौ ॥ ५ । ३ । ३० ॥ भावाकर्त्रोरल् । समजः पशूनाम् । समूह इत्यर्थः । उदजः पशूनाम् । प्रेरणमित्यर्थः । समुद इति किम् ? । व्याजः पशूनाम् । पशाविति किम् ? । समाजो नृणाम् ॥ सृग्लहः प्रजनाक्षे ॥ ५ । ३ । ३१ ॥ यथासङ्ख्यं भावाकर्त्रोरल् । प्रजनो गर्भग्रहणम् । गवामुपसरः । तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसर उच्यते । अक्षाणां ग्लहः । ग्रहणमित्यर्थः । निपातनाल्लत्वम् । प्रजनाक्ष इति किम् ? । उपसारो भृत्यै राज्ञाम् ॥ पणेर्माने ॥ ५ । ३ । ३२ ॥ भावाकर्त्रोरल् ॥ मूलकपणः । मान इति किम् ? पाणः । सम्मदप्रमदौ हर्षे ॥ ५ । ३ । ३३ ॥ भावाकर्त्रोरलन्तौ निपात्येते । सम्मदः प्रमदो वा कोकिलानाम् । हर्ष इति किम् ? । सम्मादः । संप्रान्मद इत्यनुक्त्वा निपातनं रूपनिग्रहार्थम् । तेनेह न । प्रसम्मादः ॥ हनोऽन्तर्घनाऽन्तर्घणौ देशे ॥ ५ । ३ । ३४ ॥ भावाकर्त्रोः । अन्तर्हण्यतेऽस्मिन्नित्यन्तर्घनः अन्तर्घणो वा वाहीकेषु देशविशेषः । अन्तर्घातोऽन्यः । एकेत्वन्तः संहतो देशोऽन्तर्घनः । अभ्यन्तरो देश इति केचित् ॥ प्रघणप्रघाणौ गृहांशे ॥ ५ । ३ । ३५ ॥ प्राङ्न्तेर्गृहांशेऽर्थेऽल् घणघाणादेशौ च निपात्येते । प्रघणः प्रघाणो वा द्वारालिन्दकः । प्रघातोऽन्यः । निघोद्घसङ्घोद्घनापघनोपघ्नं निमितप्रशस्तगणात्याधानाङ्गासन्नम् ॥५।३।३६॥ हन्तेर्निघादयो यथासंख्यं निमिताद्यर्थेषु कृतघत्वादयोऽलन्ता निपात्यन्ते । समन्ततो मितं तुल्यमविशेषेण वा मितं परिच्छिन्नं निमितम् । तुल्यारोहपरिणाहमित्यर्थः । निर्विशेषं निश्चयेन वा हन्यन्ते ज्ञायन्ते इति निघा वृक्षाः । निघाः शालयः । निघातोऽन्यः । उत्कर्षेण हन्यते ज्ञायते इत्युद्घः प्रशस्तः । उद्घातोऽन्यः । गणः प्राणिसमूहः । संहतिः सङ्घः । संघातोऽन्यः । अत्याधीयन्ते छेदनार्थं कुट्टनार्थं वा काष्ठादीनि यत्र तदत्याधानम् । उद्घन्यतेऽस्मिन्निति उद्घनः । काष्ठोद्घनः । ताम्रोद्घनः । उद्घातोऽन्यः । अङ्गं शरीरावयवः । अपहन्यतेऽनेनेत्यपघनोऽङ्गम् । अपघातोऽ-

न्यः । उपहन्यते समीप इति ज्ञायते इत्युपघ्न आसन्नः । उपघातोऽन्यः ॥ मूर्त्तिनिचिताभ्रे घनः ॥ ५ । ३ । ३७ ॥ हन्तेर्मूर्त्यादावर्थेऽल् प्रत्ययो घनादेशश्च निपात्यते । मूर्त्तिः काठिन्यम् । अभ्रस्य घनः । काठिन्यमित्यर्थः । निचितं निरन्तरम् । घनाः केशाः । अभ्रं मेघः, तत्र, घनः । कथं घनं दधि?, गुणशब्दोऽयम् । तद्योगाद् गुणिनि वर्त्तते ॥ व्ययोद्रोः करणे ॥ ५ । ३ । ३८ ॥ हन्तेरल् घनादेशश्च निपात्यते । विहन्यते तिमिरमनेन विघनः । अयोघनः । द्रुघनः कुठारः ॥ स्तम्बाद्घ्नश्च ॥ ५ । ३ । ३९ ॥ हन्तेरल् घनादेशश्च निपात्यते करणे । स्तम्बघ्नो दण्डः । स्तम्बघनो यष्टिः । स्त्रियां परत्वादनडेव । स्तम्बहननी यष्टिः । करण इत्येव । स्तम्बहननं स्तम्बघातः ॥ परेर्घः ॥ ५ । ३ । ४० ॥ परिपूर्वाद्धन्तेरल् घादेशश्च करणे निपात्यते ॥ परेर्घाङ्कयोगे ॥ २ । ३ । १०३ ॥ रस्य लो वा । पलिघः । परिघः । पल्यङ्कः । पर्य्यङ्कः । पलियोगः । परियोगः ॥ ऋफिडादीनां डश्च लः ॥ २ । ३ । १०४ ॥ एषामृर लृलं वा । ऋफिडः । लृफिलः । ऋतकः । लृतकः । कपरिका । कपलिका । आकृतिगणोऽयम् । संयुक्तस्यादेश न दृश्यते । पाण्डुः । डीनः ॥ जपादीनां पो वः ॥ २ । ३ । १०५ ॥ वा । जवा । जपा । पारावतः । पारापतः । त्रिविष्टपम् । त्रिविष्टपम् । जपादयः प्रयोगतोऽनुसर्त्तव्याः ॥ ह्वः समाह्वयाह्वयौ द्यूतनाम्नोः ॥ ५ । ३ । ४१ ॥ करण इति निवृत्तम् । द्यूतनाम्नोर्यथासंख्यं समाङ्पूर्वो दाङ्पूर्वाच्च ह्वोऽल् ह्वयादेशश्च निपात्यते । समाह्वयः प्राणिद्यूतम् । आह्वयो नाम ॥ न्यभ्युपवेर्वाश्चोत् ॥ ५ । ३ । ४२ ॥ ह्वयतेर्भावाकर्त्रोरल् तत्सन्नियोगे । निहवः । अभिहवः । उपहवः । विहवः ॥ आङो युद्धे ॥ ५ । ३ । ४३ ॥ ह्वो भावाकर्त्रोरल् वा । आहवो युद्धम् । अन्यत्र आह्वायः । आहावो निपानम् ॥ ५ । ३ । ४४ ॥ पशुशकुनीनां पानार्थं कृतो जलाधारो निपानम् । तदर्थादाङ्पूर्वाद् ह्वो भावाकर्त्रोरल् आहावादेशश्च निपात्यते । आहावो

निपानम् । भावेऽनुपसर्गात् ॥ ५ । ३ । ४५ ॥ ह्वोऽल् वाश्वोत् । भाव इति किम् ? । व्याप्ये ह्वायः । अनुपसर्गादिति किम् ? । आह्वायः । हनो वा वध् च ॥ ५ । ३ । ४६ ॥ अनुपसर्गाद् भावेऽल् वा । वधः । घातः । अनुपसर्गादित्येव । सङ्घातः ॥ व्यधजपमद्भ्यः ॥ ५ । ३ । ४७ ॥ अनुपसर्गाद् भावकर्त्रोरल् । बहुवचनाद्भाव इति निवृत्तम् । व्यधः । जपः । मदः । अनुपसर्गादित्येव । आव्याधः । उपजापः । उन्मादः ॥नवा क्वणयमहसस्वनः॥ ५ । ३ । ४८ ॥ अनुपसर्गाद्भावाकर्त्रोरल् । क्वणः । क्वाणः । यमः । यामः । हसः । हासः । स्वनः । स्वानः ॥ आङो रुप्लोः ॥ ५ । ३ । ४९ ॥ भावाकर्त्रोरल् वा । आरवः । आरावः । आप्लवः । आप्लावः । आङ इति किम् ? । विरावः । विप्लवः । वर्षविघ्नेऽवाद्ग्रहः ॥ ५ । ३ । ५० ॥ भावाकर्त्रोरल् वा । अवग्रहः । अवग्राहः। वृष्टेः प्रतिबन्ध इत्यर्थः । वर्षविघ्न इति किम् ? । अवग्रहः पदस्य । प्राद्रश्मितुलासूत्रे ॥ ५ । ३ । ५१ ॥ ग्रहेरल् वा । प्रगृह्यत इति प्रग्रहः । प्रग्राहः । अश्वादेः संयमनरज्जुस्तुलासूत्रं च । प्रग्रहोऽन्यः । वृगो वस्त्रे ॥ ५ । ३।५२॥ प्राद्भावाकर्त्रोरल् वा । प्रवृण्वन्ति तमिति प्रवरः । प्रावारः । घञ्युपसर्गस्य बहुलमिति दीर्घः । अन्ये तु प्राक्पूर्व एव वृणोतिः स्वभावाद्वस्त्रविशेषे वर्त्तते । तेन प्रावारः प्रावर इति भवति । वस्त्र इति किम्? । प्रवरो यतिः ॥ उदः श्रेः ॥५।३।५३॥ भावाकर्त्रोरल् वा । उच्छ्रयः । उच्छ्रायः ॥ युपूद्रोर्घञ् ॥५।३।५४॥ उदो भावाकर्त्रोः । अलोऽपवादः । वेति निवृत्तं पृथग्योगात् । उद्यावः । उत्पावः उद्द्रावः ॥ ग्रहः ॥ ५ । ३ । ५५ ॥ उत्पूर्वाद्भावाकर्त्रोर्घञ् । उद्ग्राहः । उद इत्येव । ग्रहः । विग्रहः ॥ न्यवाच्छापे ॥ ५ । ३ । ५६ ॥ ग्रहेर्गम्ये भावाकर्त्रोर्घञ् । निग्राहो ह ते वृषल भूयात् । अवग्राहो ह ते जाल्म भूयात् । शाप इति किम् ? । निग्रहश्चौरस्य ॥ प्राल्लिप्सायाम् ॥ ५ । ३ । ५७ ॥ ग्रहेर्गम्यायां भावाकर्त्रोर्घञ् । पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षुः । लिप्सायामिति किम् ? ।

प्रग्रहः स्रुवस्य ॥ समो मुष्टौ ॥ ५ । ३ । ५८ ॥ सम्पूर्वाद्ग्रहेर्मुष्टिविषये धात्वर्थे भावाकर्त्रोर्घञ् ॥ मुष्टिरङ्गुलिसन्निवेशो न परिमाणम् । संग्राहो मल्लस्य । मुष्टाविति किम् ? । संग्रहः शिष्यस्य ॥ युदुद्रोः ॥ ५ । ३ । ५९॥ सम्पूर्वाद्भावाकर्त्रोर्घञ् ॥ संयावः । संदावः । संद्रावः ॥ नियश्चानुपसर्गाद्वा ॥ ५ । ३ । ६० ॥ युदुद्रोर्भावाकर्त्रोर्घञ् ॥ नयः । नायः । यवः । यावः । दवः । दावः । द्रवः । द्रावः । अनुपसर्गादिति किम् ? । प्रणयः ॥ वोदः ॥ ५ । ३ । ६१ ॥ नयतेर्भावाकर्त्रोर्घञ् ॥ उन्नायः । उन्नयः ॥ अवात् ॥ ५ । ३ । ६२ ॥ नयतेर्भावाकर्त्रोर्घञ् ॥ अवनायः ॥ परेर्द्यूते ॥ ५ । ३ । ६३ ॥ नयतेर्द्यूतविषये धात्वर्थे भावाकर्त्रोर्घञ् । परिणायेन शारीन् हन्ति । समन्तान्नयनेनेत्यर्थः । द्यूत इति किम् ? । परिणयः कन्यायाः । भुवोऽज्ञाने वा ॥ ५ । ३ । ६४ ॥ परिपूर्वाद्भावाकर्त्रोर्घञ्॥ परिभावः । परिभवः । अवज्ञान इति किम् ? । समन्ताद्भवनं परिभवः ॥ यज्ञे ग्रहः ॥ ५ । ३ । ६५ ॥ परिपूर्वाद् ग्रहेर्यज्ञविषये प्रयोगे भावाकर्त्रोर्घञ् । पूर्वपरिग्राहः । उत्तरपरिग्राहः । वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते । यज्ञ इति किम् ? । परिग्रहः कुटुम्बिनः ॥ संस्तोः ॥ ५ । ३ । ६६ ॥ यज्ञविषये भावाकर्त्रोर्घञ् ॥ संस्तावश्छन्दोगानाम् । समेत्य स्तुवन्ति छन्दोगा यत्र देशे स देशः संस्ताव उच्यते । यज्ञे इत्येव । संस्तवोऽन्यदृष्टे ॥ प्रात्स्रुद्रुस्तोः ॥ ५ । ३ । ६७ ॥ भावाकर्त्रोर्घञ् । प्रस्रावः । प्रद्रावः । प्रस्तावः ॥ अयज्ञे स्त्रः ॥ ५ । ३ । ६८ ॥ प्राद्भावाकर्त्रोर्घञ् ॥ प्रस्तारः । मणिप्रस्तारः । अयज्ञ इति किम् ? । बर्हिःप्रस्तरः ॥ वेरशब्दे प्रथने ॥ ५ । ३ । ६९ ॥ स्तृणातेर्घञ् । विस्तारः पटस्य । प्रथन इति किम् ? । तृणस्य विस्तरः । अशब्द इति किम् ? । वाक्यविस्तरः ॥ छन्दोनाम्नि ॥ ५ । ३ । ७० ॥ वेः स्तृणातेर्भावाकर्त्रोर्घञ् । विष्टारपङ्क्तिश्छन्दः ॥ क्षुश्रोः ॥ ५ । ३ । ७१ ॥ विपूर्वाद्भावाकर्त्रोर्घञ् । विक्षावः । विश्रावः ॥ न्युदोग्रः ॥ ५ । ३ । ७२ ॥ भावाकर्त्रोर्घञ् । निगारः । उद्गारः ॥

किरो धान्ये ॥ ५ । ३ । ७३ ॥ न्युदोर्भावाकर्त्रोर्घञ् । निकार उत्कारो वा धान्यस्य । राशिरित्यर्थः । धान्य इति किम् ? । फलनिकरः ॥ नेर्वुः ॥ ५ । ३ । ७४ ॥ निपूर्वाद्वृणोतेर्वा धान्यविशेषेऽर्थे भावाकर्त्रोर्घञ् ॥ नीवारा व्रीहयः ॥ इणोऽभ्रेषे ॥ ५ । ३ । ७५ ॥ नेर्भावाकर्त्रोर्घञ् ॥ स्थितेरचलनमभ्रेषः । न्यायः । अभ्रेष इति किम्? । न्ययं गतश्चौरः ॥ परेः क्रमे ॥ ५ । ३ । ७६ ॥ क्रमः परिपाटी । तद्विषयार्थात्परिपूर्वादिणो घञ् । तव पर्यायो भोक्तुम् । क्रम इति किम् ? । पर्ययो गुरोः ॥ व्युपाच्छीङः ॥ ५ । ३ । ७७ ॥ क्रमे भावाकर्त्रोर्घञ् । तव राजविशायः । मम राजोपशायः । क्रम इति किम् ? । विशयः ॥ हस्तप्राप्ये चेरस्तेये ॥ ५ । ३ । ७८ ॥ भावाकर्त्रोर्घञ् । पुष्पप्रचायः । हस्तप्राप्य इति किम् ? । पुष्पप्रचयं करोति वृक्षाग्रे । अस्तेय इति किम् ? । स्तेयेन पुष्पप्रचयं करोति ॥ चितिदेहावासोपसमाधाने कश्चादेः ॥ ५ । ३ । ७९ ॥ चेर्भावाकर्त्रोर्घञ् । चितिर्यज्ञेऽग्निविशेषस्तदाधारो वा । आकायमग्निं चिन्वीत । कायो देहः । ऋषिनिकायः । उपसमाधानमुपर्युपरि राशीकरणम् । गोमयनिकायः ॥ सङ्घेऽनूर्ध्वे ॥ ५ । ३ । ८० ॥ नास्ति कुतश्चिदूर्ध्वमुपरि किञ्चिद्यस्मिन् सोऽनूर्ध्वः, तस्मिन् समुदायेऽर्थे चिनोतेर्भावाकर्त्रोर्घञ् । तद्योगे चादेः कः । तार्किकनिकायः । सङ्घ इति किम् ? । सारसमुच्चयः । । अनूर्ध्वे इति किम् ? । शूकरनिचयः ॥ माने ॥ ५ । ३ । ८१ ॥ गम्ये धातोर्भावाकर्त्रोर्घञ् । एको निष्पावः । समित्सङ्ग्राहः । मान इति किम् ? । निश्चयः ॥ स्थादिभ्यः कः ॥ ५ । ३ । ८२ ॥ भावाकर्त्रोः । आखूत्थः । प्रस्थः प्रपा ॥ ट्वितोऽथुः ॥ ५ । ३ । ८३ । धातोर्भावाकर्त्रोः ॥ वेपथुः ॥ ड्वितस्त्रिमक्तत्कृतम् ॥ ५ । ३ । ८४ ॥ ड्वितो धातोर्भावाकर्त्रोस्त्रिमक् तेन कृतमित्यर्थे । पक्त्रिमम् ॥ यजिस्वपिरक्षियतिप्रच्छो नः ॥५।३।८५॥ भावाकर्त्रोः ॥ यज्ञः । स्वप्नः । रक्ष्णः । यत्नः । प्रश्नः । विच्छोनङ् ॥ ५ । ३ । ८६ ॥ भावाकर्त्रोः । विश्नः ॥ उपसर्गाद्दः किः ॥ ५ । ३ । ८७ ॥ भावाकर्त्रोः । आदिः

निधिः ॥ व्याप्यादाधारे ॥ ५ । ३ । ८८ ॥ दः किः जलधिः ॥अन्तर्द्धिः ॥ ५ । ३ । ८९ ॥ अन्तःपूर्वाद्धागो भावाकर्त्रोः किः । अन्तर्द्धिः । अभिव्याप्तौ भावेऽनञिन् ॥ ५ । ३ । ९० ॥ गम्यायां धातोः ॥ संरवणम् । सांराविणम् । अभिव्याप्तौ किम् ? । संरावः ॥ स्त्रियां क्तिः ॥ ५ । ३ । ९१ ॥ धातोर्भावाकर्त्रोः ॥ घञोऽपवादः । कृतिः । स्तुतिः । स्त्रियामिति किम्? कारः ॥ तेर्ग्रहादिभ्यः ॥४ । ४ । ३३॥ एभ्य एव परस्य स्ताद्यशित आदिरिट् ॥ निगृहीतिः । अपस्निहितिः । ग्रहादिभ्य एवेति नियमादन्यत्र न । शान्तिः विपरीतनियमस्तु न, परोक्षायामिटो दीर्घनिषेधात् । अपाच्चायश्चिः क्तौ ॥ ४ । २ । ६६ ॥ अपचितिः । ह्लादो ह्रदिति ह्रदादेशः । ह्रतिः । ॠल्वादेरिति नत्वम् । तीर्णिः । लूनिः धूनिः ॥ श्वादिभ्यः ॥ ५ । ३ । ९२ ॥ भावाकर्त्रोः स्त्रियां क्तिः । वक्ष्यमाणैः क्विवादिभिः सह समावेशार्थं वचनम् । श्रुतिः । प्रतिश्रुत् । संपत्तिः । सम्पत् । स्तूयते इज्यते इष्यतेऽनयेति स्तुतिः इष्टिः । इष्टिरिति संज्ञाशब्दत्वात्करणेऽपि क्तिरेव नानट् । अन्यत्र तु स्पर्द्धे परत्वात्स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ' इति न्यायः ॥ समिणासुगः ॥ ५ । ३ । ९३ ॥ भावाकर्त्रोः स्त्रियां क्तिः । समितिः । आसुतिः ॥ सातिहेतियूतिजूतिज्ञप्तिकीर्त्ति ॥ ५ । ३ । ९४ ॥ भावाकर्त्रोर्निपात्यते ॥ सिनोतेः सुनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते । सातिः । हिनोतेर्गुणे हन्तेरन्त्यस्वरादेरेत्वे वा हेतिः । यौतेर्यवतेश्च दीर्घत्वे यूतिः । जूतिः। ज्ञप्तेर्ज्ञप्तिः । कीर्त्तयतेः कीर्त्तिः । आभ्यां ण्यन्तलक्षणेऽनो न । कीर्त्तनेत्यपि कश्चित् ॥ गापापचो भावे ॥५ । ३ ।९५॥ स्त्रियां क्तिः॥ प्रगीतिः । संगीतिः । प्रपीतिः । पक्तिः । उपसर्गादात इत्यस्यापवादः ॥ स्थो वा ॥ ५ । ३ । ९६ ॥ भावे स्त्रियां क्तिः । प्रस्थितिः । आस्था ॥ आस्यटिव्रज्यजः क्यप् ॥ ५ । ३ । ९७ ॥ भावे स्त्रियाम् । आस्या । अट्या । व्रज्या। इज्या ॥ भृगो नाम्नि ॥ ५ । ३ । ९८ ॥ भावे स्त्रियां क्यप् । भृत्या । नाम्नीति किम् ? । भृतिः ॥ समजनिप-

**न्मिषदूशीङ् सुग्विदिचरिमनीणः** ॥५।३।९९ भावाकर्त्रोः स्त्रियां नाम्नि क्यप् । समज्या । निपत्या । निपथ्या । शय्या । सुत्या । विद्या । चर्या । मन्या । इत्या । नाम्नीत्येव । संवीतिः ॥ **कृगः श च वा** ॥५।३।१००॥ भावाकर्त्रोः क्यप् । क्रिया । कृत्या । कृतिः ॥ **मृगयेच्छायाश्चातृष्णाकृपाभाश्रद्धाऽन्तर्द्धा** ॥५।३।१०१॥ एते स्त्रियां निपात्यन्ते ॥ तत्रेच्छा भाव एव । शेषास्तु भावाकर्त्रोः । अन्ये तु सर्वान् भाव एवानुमन्यन्ते । मृगयतेः शः शत् च क्यपादो निपात्यते ।मृगया। इच्छतेः शः क्याभावश्च । इच्छा । याचितृष्येर्नेनङौ । याच्ञा । तृष्णा । कृपेरङ् रेफस्य च ऋकारः । कृपा । भातेरङ् । भा । अत्पूर्वादन्तः पूर्वाच्च दधातेरङ् । श्रद्धा । अन्तर्द्धा ॥ **परेः सृचरेर्यः** ॥ ५।३।१०२॥ भावाकर्त्रोः स्त्रियाम् । परिसर्या । परिचर्या । परेरिति किम् ? । संसृतिः ॥ **वाऽटाट्यात्** ॥ ५ ।३। १०३ ॥ स्त्रियां भावाकर्त्रोर्यः ॥ आटाट्या । अटाटा ॥ **जागुरश्च** ॥ ५ ।३। १०४ ॥ भावाकर्त्रोः स्त्रियां यः । जागरा । जागर्या ॥ **शंसिप्रत्ययात्** ॥ ५ । ३ । १०५ ॥ भावाकर्त्रोः स्त्रियामः ॥ प्रशंसा । गोपाया ॥ **क्तेटो गुरोर्व्यञ्जनात्** ॥ ५ । ३। १०६ ॥ धातोर्भावाकर्त्रोः स्त्रियामः ॥ ईहा । क्तेट इति किम् ? । स्रस्तिः ॥ **षितोऽङ्** ॥ ५ । ३ । १०७ ॥ धातोर्भावाकर्त्रोः स्त्रियाम् ॥ पचा । जरा ॥ **भिदादयः** ॥ ५ । ३ । १०८ ॥ भावाकर्त्रोः स्त्रियामङन्ता यथालक्ष्यं निपात्यन्ते । भिदा । छिदा ॥ **भषीभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः** ॥ ५ । ३ । १०९ ॥ एभ्यो ण्यन्तेभ्यः स्त्रियां भावाकर्त्रोरङ् ॥ भीषा । भूषा । चिन्ता । पूजा । कथा । कुम्बा । चर्चा । स्पृहा । तोला । दोला । बहुवचनाद्यथादर्शनमन्येभ्योपि भवति । पीडा । जना ॥ **उपसर्गादातः** ॥ ५ । ३ । ११० ॥ स्त्रियां भावाकर्त्रोरङ् । उपदा । उपसर्गादिति किम् ? । दत्तिः ॥ **णिवेत्त्यासश्रन्थघट्टवन्देरनः** ॥ ५ । ३ । १११ ॥ स्त्रियां भावाकर्त्रोः ॥ कारणा । वेदना । आसना । श्रन्थना । घट्टना । वन्दना ॥ **इषोऽनिच्छायाम्** ॥ ५ । ३ । ११२ ॥

स्त्रियां भावाकर्त्रोरिनः ॥ अन्वेषणा । अनिच्छायामिति किम् ? । इष्टिः ॥ पर्यधेर्वा ॥ ५ । ३ । ११३ ॥ अनिच्छार्थादिषेर्भावाकर्त्रोः स्त्रियामनः ॥ पर्य्येषणा । परीष्टिः ॥ क्रुत्सम्पदादिभ्यः क्विप् ॥ ५ । ३ । ११४ ॥ स्त्रियां भावाकर्त्रोः ॥ क्रुत् । युत् । सम्पत् । विपत् ॥ भ्यादिभ्यो वा ॥ ५ । ३ । ११५ ॥ स्त्रियां भावाकर्त्रोः क्विप् ॥ भीः । भीतिः । ह्रीः । ह्रीतिः ॥ व्यतिहारेऽनिहादिभ्यो ञः ॥ ५ । ३ । ११६ ॥ धातुभ्यः स्त्रियाम् ॥ बाहुलकाद्भावे । नित्यं ञिनोऽण् ॥ व्यावक्रोशी । अनीहादिभ्य इति किम् ? । व्यतीहा । व्यतीक्षा । नञोऽनिः शापे ॥ ५ । ३ । ११७ ॥ पराद्धातोर्गम्ये भावाकर्त्रोः स्त्रियाम् ॥ अजननिस्ते वृषल भूयात् । एवमजीवनिः । शाप इति किम् ? । अकृतिस्तस्य पटस्य ॥ ग्लाहाज्यः ॥ ५ । ३ । ११८ ॥ स्त्रियां भावाकर्त्रोरनिः । ग्लानिः । हानिः । ज्यानिः ॥ प्रश्नाख्याने वेञ् ॥ ५ । ३ । ११९ ॥ गम्ये स्त्रियां भावाकर्त्रोर्धातोः । वावचनाद्यथाप्राप्तं च । कान्त्वं कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षीः । सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षम् । एवं गणिं गणिकामित्यादि ॥ पर्यायार्हर्णोत्पत्तौ च णकः ॥ ५ । ३ । १२० ॥ एष्वर्थेषु प्रश्नाख्यानयोश्च गम्ययोः स्त्रियां भावाकर्त्रोर्धातोर्णकः ॥ पर्यायः क्रमः । भवत आसिका शायिका । अर्हणमर्हः योग्यता । अर्हति भवान् इक्षुभक्षिकाम् । ऋणम् । इक्षुभक्षिकां मे धारयसि । इक्षुभक्षिका मे उदपादि । कां त्वं कारिकामकार्षीः ? । सर्वां कारिकामकार्षम् । बाहुलकात्क्वचिन्न । चिकीर्षा । बुभुक्षा मे उदपादि । प्रश्नाख्यानयोगेऽपि पर्यायादिषु परत्वात् णक एव ॥ नाम्नि पुंसि च ॥ ५ । ३ । १२१ ॥ धातोः स्त्रियां भावाकर्त्रोर्नाम्नि णकः ॥ यथालक्ष्यं पुंसि च । प्रच्छर्दिका । अरोचकः । विचर्चिका । सालभञ्जिका । बहुलाधिकारान्नेह । शिरोर्त्तिः ॥ भावे ॥ ५ । ३ । १२२ ॥ धात्वर्थनिर्देशे स्त्रियां धातोर्णकः । आसिका । शायिका ॥ क्लीबे क्तः ॥ ५ । ३ । १२३ ॥ भावे धातोः ॥ घञाद्यपवादः । स्त्रियां

भावाकर्त्रोरिति च निवृत्तम् ॥ हसितं छात्रस्य । क्लीब इति किम् ? । हसः । हासः ॥ अनट् ॥ ५ । ३ । १२४ ॥ क्लीबभावे धातोः ॥ गमनं छात्रस्य ॥ ष्ठिवसिवोऽनटि वा ॥ ४ । २ । ११२ ॥ दीर्घः । निष्ठीवनम् । निष्ठेवनम् । सीवनम् । सेवनम् । यत्कर्मस्पर्शात्कर्त्रङ्गसुखं ततः ॥५।३।१२५॥ येन कर्मणा संस्पृश्यमानस्य कर्त्तुरङ्गस्य सुखमुत्पद्यते ततः कर्मणः पराद्धातोः क्लीबेऽनट् ॥ पयःपानं सुखम् । कर्मेति किम् ? । तूलिकाया उत्थानं सुखम् । स्पर्शादिति किम् ? । अग्निकुण्डस्योपासनं सुखम् । कर्त्रिति किम् ? । शिष्येण गुरोः स्नपनं सुखम् । न गुरुः कर्त्ता किन्तु कर्म । अङ्गेति किम् ? । पुत्रस्य परिष्वञ्जनं सुखम् । नात्र शरीरसुखम् । किन्तु मानसी प्रीतिः । अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यात् । सुखमिति किम् ? कण्टकानां मर्दनम् । सर्वत्रासमासः प्रत्युदाहार्यः । अथवा तत इति सप्तम्यन्तात्तसुः । तस्मिन् कर्मण्यभिधेये सामर्थ्यात्कर्त्तुः पराद्धातोरनट् । राज्ञा भुज्यन्ते राजभोजनाः शालयः ॥ रम्यादिभ्यः कर्त्तरि ॥ ५ । ३ । १२६ ॥ अनट् । रमणी । कमनी । इध्मव्रश्चनः ॥ कारणम् ॥ ५ । ३ । १२७ ॥ कृगः कर्त्तर्यनट् वृद्धिश्च स्यात् । कारणम् ॥ भुजिपत्यादिभ्यः कर्मापादाने ॥ ५ । ३ । १२८ ॥ यथासंख्यमनट् । भुज्यते इति भोजनम् । एवं निरदनम् । प्रपतत्यस्मादिति प्रपतनः । अपादानम् । बहुवचनं प्रयोगानुसरणार्थम् ॥ करणाधारे ॥ ५ । ३ । १२९ ॥ धातोरनट् । एषणी । लेखनी । गोदोहनी । सक्तुधानी ॥ पुंनाम्नि घः ॥ ५ । ३ । १३० ॥ गम्ये धातोः करणाधारयोः ॥ एकोपसर्गस्य च घे ॥ ४ । २ । ३४ ॥ अनुपसर्गस्य छदेर्णौ ह्रस्वः । प्रच्छदः । छदः । एकोपसर्गस्य चेति किम् ? । समुपच्छादः । पुमिति किम् ? । विचयनी । नाम्नीति किम् ? प्रहरणो दण्डः ॥ गोचरसंचरवहव्रजव्यजखलापणनिगमबकभगकषाकषनिकषम् ॥ ५ । ३ । १३१ ॥ एते करणाधारयोः पुंनाम्नि घप्रत्ययान्ता निपात्यन्ते । गावश्चरन्त्यस्मिन् गोचरः । संचरः । वहः । व्रजः । व्यजः ।

निपातनाद्गीभावो न, खलः । आपणः । निगमः । वकः । बाहुलकात्कर्तरि । निवक इत्यपि कश्चित् । भगः । बाहुलकात्क्लीबेऽपि । भगम् । कषः । आकषः । निकषः ॥ व्यञ्जनाद् घञ् ॥ ५ । ३ । १३२ ॥ धातोः पुंनाम्नि करणाधारे । वेदः । आरामः ॥ अवात्तॄस्तॄभ्याम् ॥ ५ । ३ । १३३ ॥ पुंनाम्नि करणाधारयोर्घञ् । अवतारः । अवस्तारः । बहुलाधिकारादसंज्ञायामपि । अवतारो नद्याः । केचित्तु भावेऽकर्त्तरि कारके स्त्रो नित्यं तरतेस्तु विकल्पेन घञमिच्छन्ति ॥ न्यायावायाध्यायोद्यावसंहारावहाराधारदारजारम् ॥ ५ । ३ । १३४ ॥ पुंनाम्नि करणाधारयोर्घञन्तं निपात्यते । न्यायः । अवायः । अध्यायः । उद्यावः । संहारः । अवहारः । आधारः । दाराः । जारः । उदङ्कोऽतोये ॥ ५ । ३ । १३५ ॥ उत्पूर्वादञ्चेः पुन्नाम्नि करणाधारयोर्घञ् न चेत्तोयविषयो धात्वर्थः ॥ तैलोदङ्कः । घृतोदङ्कः । व्यञ्जनादिति सिद्धे तोये प्रतिषेधार्थं वचनम् ॥ अतोय इति किम् ? उदकोदञ्चनः ॥ आनायो जालम् ॥ ५ । ३ । १३६ ॥ आङ्पूर्वान्नियः करणाधारे पुन्नाम्नि जालेऽर्थे घञ् । आनायो मत्स्यानाम् ॥ खनोउडरेकेकवकघं च ॥ ५ । ३ । १३७ ॥ पुंनाम्नि करणाधारयोर्घञ् । आखः । आखरः । आखनिकः । आखनिकवकः । आखनः । आखानः ॥ इकिस्तिव् स्वरूपार्थे ॥ ५ । ३ । १३८ ॥ धातोः । भञ्जिः । क्रुधिः । वेत्तिः । यजेरङ्गानि । भुजिः क्रियते । पचतिः परिवर्त्तते ॥ दुः स्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् ॥ ५ । ३ । १३९ ॥ धातोर्भावकर्मणोः ॥ दुःशयम् । दुष्करः कटो भवता । सुशयम् । सुकरः । ईषच्छयम् । ईषत्करः । इह स्त्रीप्रत्ययादारभ्यासरूपविधेरभावात्स्पर्धेऽलः स्त्रीखलनाः स्त्रियास्तु खलनौ परत्वाद्भवतः । कृच्छ्राकृच्छ्रार्थादिति किम् ? ईषल्लभ्यं धनम् । उपसर्गात् खलघञोश्च । दुष्प्रलम्भम् । सुप्रलम्भम् । ईषत्प्रलम्भम् ॥ सुदुर्भ्यः ॥ ४ । ४ । १०८ ॥ आभ्यां व्यस्ताभ्यां समस्ताभ्यां चोपसर्गात् पराभ्यां परस्य लभतेः स्वरात्परः खलघञोर्नोऽन्तः । अतिसुलम्भम् ।

अतिदुर्लम्भम् । अतिसुलम्भः । अतिदुर्लम्भः । अतिसुदुर्लम्भम् । अतिसुदुर्लम्भः । उपसर्गादेव सुदुर्भ्यो इति नियमार्थं वचनम् । तेनेह न, सुलभम् । दुर्लभम् ॥ च्व्यर्थे कर्त्राप्याद्भूकृगः ॥ ५ । ३ । १४० ॥ कृच्छ्राकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यो यथासंख्यं खल् । दुराढ्यंभवम् । स्वाढ्यंभवम् । ईषदाढ्यं भवं भवता । दुराढ्यंकरः । स्वाढ्यंकरः । ईषदाढ्यंकरश्चैत्रस्त्वया ॥ शासूयुधिदृशिधृषिमृषातोऽनः ॥ ५ । ३ । १४१ ॥ कृच्छ्राकृच्छ्रार्थदुःस्वीषत्पूर्वात् । दुःशासनः । सुशासनः । ईषच्छासनः । दुर्योधनः । सुयोधनः ॥ ईषद्योधनः । दुर्दर्शनः । दुर्धर्षणः । दुर्मर्षणः । कथमीषद्दरिद्र इति । अनप्रत्ययविषयेऽकारस्य लोपेनादन्तत्वाभावात् खलेव । णिन् चावश्यकाधमर्ण्ये ॥ ५ । ४ । ३६ ॥ गम्ये कर्तरि वाच्ये कृत्याः अवश्यंकारी अवश्यंहारी । अवश्यं गेयो गीतस्य । शतंदायी । गेयो गाथानाम् ॥ निषेधेऽलंखल्वोः क्त्वा ॥ ५ । ४ । ४४ ॥ उपपदयोर्धातोर्वा । अलंकृत्वा । खलुकृत्वा । पक्षे अलं रुदितेन । निषेध इति किम् ? । अलङ्कारः स्त्रियाः । अलंखल्वोरिति किम् ? । मा कारि भवता ॥ परावरे ॥ ५ । ४ । ४५ ॥ गम्ये धातोः क्त्वा वा ॥ अनञः क्त्वो यप् ॥ ३ । ३ । १५४ ॥ अव्ययात्पूर्वपदात्परस्योत्तरपदस्य । अतिक्रम्य नदीं पर्वतः । नद्याः परः पर्वत इत्यर्थः । अप्राप्य नदीं पर्वतः । नद्या अर्वाक् पर्वत इत्यर्थः । अनञ इति किम् ? अकृत्वा परमकृत्वा । उत्तरपदस्येत्येव । अलंकृत्वा ॥ निमील्यादिमेङस्तुल्यकर्तृके ॥ ५ । ४ । ४६ ॥ धातोः सम्बन्धे क्त्वा वा । अक्षिणी निमील्य हसति । मुखं व्यादाय स्वपिति ॥ मेङो वा मित् ॥ ४ । ३ । ८८ ॥ यपि मेङ् स्वभावाद् व्यतिहार एव वर्तते इति नान्यैरिव व्यतिहारग्रहणं कर्तव्यम् । अपमित्य याचते । अपमाय । पूर्वं याचते पश्चादपमयते इत्यर्थः । याचेस्तु पूर्वकालेऽपि क्त्वा न । मेङः परकालभाविन्या क्त्वया याचि प्राक्कालस्योक्तत्वात् । पक्षे तु याचित्वा अपमयते । अपमातुं याचते तुल्यकर्तृक इति किम् ? । चैत्रस्याक्षिनिमीलने मैत्रो हसति ॥ प्राक्काले ॥ ५ । ४ । ४७ ॥

परकालेन धात्वर्थेन तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः सम्बन्धे क्त्वा वा । आसित्वा भुङ्क्ते । पक्षे आस्यते भोक्तुम् । तुल्यकर्तृक इत्येव ?। भुक्तवति गुरौ व्रजति शिष्यः । प्राकाल इति किम ?। अथ यदनेन भुज्यते ततोऽयं व्रजति इत्यत्र कथं क्त्वा न भवति ?। उच्यते, यत्र यच्छब्देन सह ततःशब्दः प्रयुज्यते तत्र ततःशब्देनैव प्राकालताया अभिधानेनोक्तार्थत्वात् । प्राक्काल इत्युत्तरत्र यथासम्भवमभिधानतोऽनुवर्त्तनीयम् ॥ जनशो न्युपान्त्ये तादिः क्त्वा ॥ ४। ३। २३ ॥ किद्वा ॥ रक्त्वा । रङ्क्त्वा । नष्ट्वा । नंष्ट्वा । नीति किम ?। भुक्त्वा । उपान्त्य इति किम ?। नित्त्वा । तादिरिति किम ?। विभज्य ॥ ऋतृमृषकृषकृशवश्चलुञ्चथफः सेट् ॥ ४। ३। २४ ॥ न्युपान्त्ये सति विहितः क्त्वा किद्वत् ॥ ऋतित्वा । अर्त्तित्वा । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृषित्वा । कर्षित्वा । कृशित्वा । कर्शित्वा । वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । श्रथित्वा । श्रन्थित्वा । गुफित्वा । गुम्फित्वा । ऋफित्वा । ऋम्फित्वा । विहितविशेषणान्नलोपेऽपि किद्वत्त्वाद् गुणो न । न्युपान्त्य इति विशेषणं थफान्तानामेव नान्येषाम, सम्भवव्यभिचाराभावात् । न्युपान्त्य इति किम ?। कोथित्वा । रेफित्वा । सेडिति किम ?। वक्त्वा । वौ व्यञ्जनादेरिति किद्वत्वम् । द्युतित्वा । द्योतित्वा । लिखित्वा । लेखित्वा ॥ क्त्वा ॥ ४। २। २९ ॥ धातोः सेट् किद्वन्न ॥ देवित्वा । सेडित्येव । कृत्वा ॥ स्कन्दस्यन्दः ॥ ४। ३। ३० ॥ क्त्वा किद्वन्न ॥ स्कन्त्वा । स्यन्त्वा । प्रस्कन्द्य । प्रस्यन्द्य ॥ क्षुधक्लिशकुषगुधमृडमृदवदवसः ॥ ४। ३। ३१ ॥ सेट् क्त्वा किद्वत् ॥ क्षुधित्वा । क्लिशित्वा । कुषित्वा । गुधित्वा । मृडित्वा । मृदित्वा । उदित्वा । उषित्वा ॥ रुदविदेति किद्वत्वम् । रुदित्वा । विदित्वा । आत्वम् । खात्वा । पक्षे, खनित्वा । इत्वम् । दित्वा । सित्वा । मित्वा । स्थित्वा । दधातेर्हिः । हित्वा । यपि चाद इति जग्धादेशे । प्रजग्ध्य ॥ हाको हिः क्त्वि ॥ ४। ४। १४ ॥ तादौ किति ॥ हित्वा ।

क्त्वीति किम् ? हीनः । तीति किम् ? प्रहाय ॥ जॄव्रश्चः क्त्वः ॥ ४ । ४ । ४१ ॥ आदिरिट् । जरीत्वा २ । व्रश्चित्वा ॥ ऊदितो वा ॥ ४ । ४ । ४२ ॥ क्त्व आदिरिट् ॥ दान्त्वा । दमित्वा ॥ क्रमः क्त्वि वा ॥ ४ । १ । १०६ ॥ धुडादौ दीर्घः ॥ क्रान्त्वा । क्रन्त्वा । धुटीत्येव । क्रमित्वा । क्षुधवस इतीट् । क्षुधित्वा । उषित्वा । लुभ्यञ्चेरितीट् । लुभित्वा । अञ्चित्वा । पूङ्क्लिशिभ्यो न वा । पूत्वा । पवित्वा । क्लिष्ट्वा । क्लिशित्वा ॥ ज्यश्च यपि ॥ ४ । १ । ७६ ॥ वेगे य्वृत् । प्रज्याय । प्रवाय ॥ व्यः ॥ ४ । १ । ७७ ॥ यपि य्वृत् ॥ प्रव्याय ॥ संपरेर्वा ॥ ४ । ४ । ७८ ॥ व्यो यपि य्वृत् । संव्याय । संवीय । परिव्याय । परिवीय ॥ यपि ॥ ४ । २ । ५६ ॥ यमिरमिनमिगमिहनिमनिवनतितनादेर्लुक् ॥ प्रहत्य । प्रमत्य । प्रवत्य । प्रतत्य । प्रसत्य ॥ वा मः ॥ ४ । २ । ५७ ॥ मान्तानां यमादीनां यपि वा लुक् ॥ प्रयत्य । प्रयम्य । विरत्य । विरम्य । प्रणत्य । प्रणम्य । आगत्य । आगम्य ॥ लघोर्यपि ॥ ४ । ३ । ८६ ॥ परस्य णेरय् ॥ प्रशमय्य । लघोरिति किम् ? । प्रतिपाद्य ॥ वाप्नोः ॥ ४ । ३ । ८७ ॥ णेर्यप्यय् ॥ प्रापय्य । प्राप्य । आप्नोरिति किम् ? । अध्याप्य ॥ क्षेः क्षीः ॥ ४ । ३ । ८८ ॥ यपि ॥ प्रक्षीय ॥ अन्तरङ्गानपि विधीन् बहिरङ्गो यबादेशो बाधते ॥ यपि चाद इति सूत्रे यपिग्रहणात् । तेन प्रशम्य प्रपृच्छ्येत्यादौ दीर्घत्वशत्वादयो न । प्रशम्य । प्रपृच्छ्य । प्रदीव्य । प्रखन्य । प्रस्थाय । प्रपाय । प्रदाय । प्रधाय । प्रपठ्य ॥ ख्णम् चाभीक्ष्ण्ये ॥ ५ । ४ । ४८ ॥ परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद् धातोः सम्बन्धे क्त्वा । भोजं भोजं व्रजति । भुक्त्वा भुक्त्वा । पुनः पुनर्भुक्त्वा व्रजतीत्यत्र तु न ख्णम् । आभीक्ष्ण्यस्य स्वशब्देनैवोक्तत्वात् । क्त्वा-

तु पूर्वसूत्रेण भविष्यति । ननु पक्त्वौदनं भुङ्क्ते देवदत्त इत्यादिषु भावे क्त्वादिप्रत्यये कृते कर्त्तुरनभिहितत्वात् तृतीया स्यादिति चेत्, न; प्रधानभुजिप्रत्ययेन कर्तुरभिहितत्वात् । प्रधानशक्त्यभिधाने हि गुणशक्तिरभिहि-

तवत्प्रकाशत इति ॥ वापगुरोर्णमि ॥ ४ । २ । ५ ॥ सन्ध्यक्षरस्यात् । अपगारमपगारम् । अपगोरमपगोरम् ॥ पूर्वाग्रेप्रथमे ॥ ५ । ४ । ४९ ॥ उपपदे परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानाद् धातोः सम्बन्धे खणम् वा ॥ अनाभीक्ष्ण्यार्थं वचनम् । पूर्वं भोजं व्रजति । पूर्वं भुक्त्वा । अग्रे भोजम् । अग्रे भुक्त्वा । प्रथमं भोजम् । प्रथमं भुक्त्वा । वर्त्तमानादयोऽपि । पूर्वं भुज्यते ततो व्रजति । पूर्वादयश्चात्र व्यापारान्तरापेक्षे प्राक्काल्ये, व्रज्यपेक्षे तु क्त्वाखणमाविति नोक्तार्थता । अन्यभोक्तृभुजिक्रियाभ्यः स्वक्रियान्तरेभ्यो वा पूर्वं भोजनं कृत्वा व्रजतीत्यर्थः । पूर्वप्रथमसाहचर्यादग्रेशब्दः कालवाची ॥ अन्यथैवं कथमित्थमः कृगोऽनर्थकात् ॥ ५ । ४ । ५० ॥ तुल्यकर्तृकेऽर्थे वर्त्तमानाद्धातोः खणम् वा । अन्यथाकारं भुङ्क्ते । एवंकारम् । कथंकारम् । इत्थंकारम् । पक्षे क्त्वैव । अनर्थकादिति किम् ? । अन्यथा कृत्वा शिरो भुङ्क्ते ॥ यथातथादीर्ष्योत्तरे ॥ ५ । ४ । ५१ ॥ तुल्यकर्तृकेऽर्थे वर्त्तमानादनर्थकात् करोतेर्धातोः सम्बन्धे खणम् वा । कथं त्वं भोक्ष्यस इति पृष्टोऽसूयया तं प्रत्याह—यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन । ईर्ष्योत्तर इति किम् ? । यथाकृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि ॥ शापे व्याप्यात् ॥ गम्ये तुल्यकर्तृकार्थात् करोतेः खणम् वा ॥ चौरंकारमाक्रोशति । करोतिरिहोच्चारणे । चौरशब्दमुच्चार्येत्यर्थः ॥ शाप इति किम् ?। चौरं कृत्वा हेतुभिः कथयति ॥ स्वाद्वर्थाददीर्घात् ॥ ५ । ४ । ५३ ॥ व्याप्यात् परात्तुल्यकर्तृकार्थात् करोतेर्धातोः सम्बन्धे खणम् वा ॥ स्वादुंकारं भुङ्क्ते । सम्पन्नंकारम् । लवणंकारम् । सम्पन्नलवणशब्दौ स्वादुपर्यायौ । मिष्टङ्कारम् । पक्षे स्वादु कृत्वा भुङ्क्ते ।अदीर्घादिति किम् ? । स्वाद्वीं कृत्वा यवागूं भुङ्क्ते ॥ विदृग्भ्यः कार्त्स्न्ये णम् ॥ ५ । ४ । ५४ ॥ कार्त्स्न्यविशिष्टाद्व्याप्यात् परेभ्यस्तुल्यकर्तृके प्राक्कालेऽर्थे वर्त्तमानेभ्यो धातोः सम्बन्धे वा । अतिथिवेदं भोजयति । यं यमतिथिं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः । अत्र त्रयाणामपि

विदीनां ग्रहणम् । बहुवचननिर्देशान्निरनुबन्धग्रहणेन सानुबन्धस्येत्यस्यानुपस्थितिः । कन्यादर्शं वरयति । सर्वाः कन्या इत्यर्थः । कात्स्न्र्ये इति किम् ? अतिथिं विदित्वा भोजयति ॥ यावतो विन्दजीवः ५ । ४ । ५५ ॥ कात्स्न्र्यवृत्तो व्याप्यात्परात्तुल्यकर्तृकाद्धातोः सम्बन्धे णम् वा । विन्देति शनिर्देशाल्लाभार्थस्य ग्रहणम् । यावद्वेदं भुङ्क्ते । यावल्लभते तावदित्यर्थः । यावज्जीवमधीते ॥ चर्मोदरात्पूरेः ॥ ५ । ४ । ५६ ॥ व्याप्यात्परात्तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम् वा ॥ चर्मपूरमास्ते । उदरपूरं शेते ॥ वृष्टिमाने ऊलुक् चास्य वा ॥ ५ । ४ । ५७ ॥ व्याप्यात् पूरयतेर्धातोः सम्बन्धे णम् वा समुदायेन गम्ये । गोष्पदं वृष्टो मेघः । गोष्पदपूरम् । अस्येति ग्रहणादुपपदस्य न । मूषकबिलपूरम् ॥ चेलार्थात् क्नोपेः ॥ ५ । ४ । ५८ ॥ व्याप्यात् परात्तुल्यकर्तृकार्थाद् वृष्टिमाने गम्ये धातोः सम्बन्धे णम् वा । चेलक्नोपम् । वस्त्रक्नोपं वृष्टो मेघः ॥ गात्रपुरुषात्स्नः ॥ ५ । ४ । ५९ ॥ व्याप्यात्परात्तुल्यकर्तृकार्थाद्दन्तभूतण्यर्थाद्वृष्टिमाने गम्ये धातोः सम्बन्धे णम् वा । गात्रस्नायं वृष्टो मेघः । पुरुषस्नायं वृष्टः । इदं केचिदेवेच्छन्ति ॥ शुष्कचूर्णरूक्षात् पिषस्तस्यैव ॥ ५ । ४ । ६० ॥ व्याप्याण्णम्वा धातोः सम्बन्धे । शुष्कपेषं विनष्टि । शुष्कं पिनष्टीत्यर्थः । एवं चूर्णपेषम् । रूक्षपेषम् । अत्र प्रकरणे पक्षे न क्त्वा । प्रयोगानुप्रयोगक्रिययोरैकधातुत्वकर्तृकत्वप्राक्कालत्वाभावात् । सामान्यविशेषभावविवक्षया च धातुसम्बन्धः ॥ यदाहुः—सामान्यपुषेरवयवपुषिः कर्म भवतीति । कश्चित्तु सामान्यविशेषभावविवक्षया क्रियाभेदात् तुल्यकर्तृकत्व प्राक्कालत्वसत्त्वात् क्त्वापि भवतीति मन्यते॥कृग्ग्रहोऽकृतजीवात्॥ ५ । ४ । ६१ ॥ व्याप्याद् यथासंख्यं तस्यैव धातोः सम्बन्धे णम् वा । अकृतकारं करोति । जीवग्राहं गृह्णाति ॥ निमूलात्कषः ॥ ५ । ४ । ६२ ॥ व्याप्यात्तस्यैव सम्बन्धे णम्वा । निमूलकाषं कषति । निमूलस्य काषं कषति ॥ हनश्च समूलात् ॥ ५ । ४ । ६३ ॥ व्याप्यात् कषेस्तस्यैव सम्बन्धे णम्वा ॥ समूलघातं हन्ति । समूलकाषं कषति ।

करणेभ्यः ॥ ५ । ४ । ६४ ॥ हनस्तस्यैव सम्बन्धे णमुल् ॥ पाणिघातं कुड्यमाहन्ति । बहुवचनं व्याप्त्यर्थम् । तेन करणपूर्वाद्धि सार्थादपि हन्तेः अनेनैव णम् ॥ तथा च नित्यसमासस्तस्यैवानुप्रयोगश्च सिद्ध्यति । अस्युपघातमरीन् हन्ति ॥ स्वस्नेहनार्थात्पुषपिषः ॥ ५ । ४ । ६५ ॥ करणवाचिनो यथासंख्यं तस्यैव सम्बन्धे णमुल् ॥ स्वपोषं पुष्णाति । एवमात्मपोषम् । धनपोषम् । उदपेषं पिनष्टि । एवं घृतपेषम् । क्षीरपेषम् ॥ हस्तार्थाद् ग्रहवर्त्तिवृतः ॥ ५ । ४ । ६६ ॥ करणवाचिनस्तस्यैव सम्बन्धे णमुल् ॥ हस्तग्राहं गृह्णाति । करग्राहम् । हस्तवर्त्तं वर्त्तयति करवर्त्तम् । हस्तवर्त्तं वर्त्तते । अण्यन्तान्नेच्छन्त्येके ॥ बन्धेर्नाम्नि ॥ ५ । ४ । ६७ ॥ बन्धिः प्रकृतिर्नामविशेषणं च । बन्धेर्बन्धनस्य यन्नाम तद्विषयात्करणवाचिनः पराद् बन्धेस्तस्यैव सम्बन्धे णमुल् ॥ क्रौञ्चबन्धं बद्धः । चण्डालिकाबन्धं बद्धः । क्रौञ्चादीनि बन्धनामधेयानि । केचित्तूपपदप्रकृतिप्रत्ययसमुदायस्य सञ्ज्ञात्वं मन्यन्ते । तन्मतसंग्रहार्थं नाम्नीति प्रत्ययान्तोपाधित्वेन व्याख्येयम् ॥ आधारात् ॥ ५ । ४ । ६८ ॥ बन्धेस्तस्यैव सम्बन्धे णमुल् ॥ चक्रबन्धं बद्धः । चारकबन्धं बद्धः । बहुलाधिकारादिह न । ग्रामे बद्धः । हस्ते बद्धः ॥ कर्त्तुर्जीवपुरुषान्नश्वहः ॥ ५ । ४ । ६९ ॥ यथासंख्यं तस्यैव सम्बन्धे णमुल् ॥ जीवनाशं नश्यति । जीवन्नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः । कर्त्तुरिति किम् ? । जीवेन नश्यति ॥ ऊर्ध्वात्पूःशुषः ॥ ५ । ४ । ७० ॥ कर्तृवाचिनस्तस्यैव सम्बन्धे णमुल् ॥ पूरितिनिर्देशाद् दैवादिको न चौरादिकः ॥ ऊर्ध्वपूरं पूर्यते । ऊर्ध्वशोषं शुष्यति ॥ व्याप्याच्चेवात् ॥ ५ । ४ । ७१ ॥ व्याप्यात् कर्त्तुश्चोपमानात् परादवातोस्तस्यैव सम्बन्धे णमुल् ॥ सुवर्णनिधायं निहितः । सुवर्णमिव निहित इत्यर्थः । काकनाशं नष्टः ॥ उपात्किरो लवने ॥ ५ । ४ । ७२ ॥ अन्यस्य धातोः सम्बन्धे ॥ लवन इति वचनाचस्यैवेति निवृत्तम् । उपस्कारं मद्रका लुनन्ति । विक्षिपन्तो लुनन्तीत्यर्थः । लवन इति किम् ? । उपकीर्य याति ॥

दंशेस्तृतीयया ॥ ५ । ४ । ७३ ॥ योगे उपपूर्वात्तुल्यकर्तृकेऽर्थे वर्त्तमानादन्तस्य धातोः सम्बन्धे णम्वा ॥ मूलकेनोपदंशं भुङ्क्ते । मूलकाद्युपदंशेः कर्मापि प्रधानभुजिक्रियाकरणमिति तृतीया । प्रधानक्रियोपयुक्ते हि कारके गुणक्रिया न स्वानुरूपां विभक्तिमुत्पादयितुमलमप्रधानत्वादेव, यथेष्यते ग्रामो गन्तुमिति । यदा तु अवयवक्रियापेक्षका पूर्वकालविवक्षायां क्त्वा क्रियते तदा क्रियाभेदात् सम्बन्धभेदे द्वितीयापि भवति, मूलकमुपदश्य भुङ्क्ते इति ॥ हिंसार्थादेकाप्यात् ॥ ५ । ४ । ७४ ॥ सम्बध्यमानेन धातुना सह तुल्यकर्तृकार्थात् तृतीयान्तेन योगे णम्वा ॥ दण्डेनोपघातं गाः सादयति । दण्डोपघातम् । पक्षे दण्डेनोपहत्य । हिंसार्थादिति किम् ? । चन्दनेनानुलिप्य जिनं पूजयति । एकाप्यादिति किम् ? । दण्डेनोपहत्य चौरं गोपालको गाः खेदयति ॥ उपपीडरुधकर्षस्तत्सप्तम्या ॥ ५ । ४ । ७५ ॥ तया तृतीयया युक्ता सप्तमी तदन्तेन योगे उपपूर्वेभ्य एभ्यस्तुल्यकर्तृकार्थेभ्यो धातोः सम्बन्धे णम् ॥ पार्श्वाभ्यामुपपीडं शेते । पार्श्वोपपीडम् । पार्श्वयोरुपपीडं । पार्श्वोपपीडं शेते । व्रजोपरोधं गाः स्थापयति । व्रजे व्रजेन वा । पाण्युपकर्षं धानाः पिनष्टि । पाणिना पाणौ वा ॥ कर्ष इति शब्निर्देशाद्भौवादिकस्य कर्षन्ति शाखां ग्राममिति द्विकर्मकस्य कर्षणार्थस्य ग्रहणम् न तु तौदादिकस्य पञ्चभिर्हलैः कृषतीति विलेखनार्थस्य । तेन भूमावुपकृष्य तिलान् वपतीत्यत्र न । अन्ये त्वनयोरर्थभेदमप्रतिपद्यमानास्तौदादिकादपीच्छन्ति । उपेति किम् ? । पार्श्वेन निपीड्य तिष्ठति । अन्ये तूपपूर्वादेव पीडेरिच्छन्ति । रुधकर्षाभ्यां तु कामचारेण ॥ प्रमाणसमासत्त्योः ॥ ५ । ४ । ७६ ॥ आयामप्रमाणं प्रमाणम्, समासत्तिः संरम्भपूर्वकः सन्निकर्षस्तयोर्गम्यमानयोस्तृतीयान्तेन सप्तम्यन्तेन च योगे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा ॥ द्व्यङ्गुलोत्कर्षं गण्डिकाच्छिनत्ति । द्व्यङ्गुलेन द्व्यङ्गुले वा । केशग्राहं युध्यन्ते । केशैः केशेषु वा । पक्षे द्व्यङ्गुलेनोत्कृष्य गण्डिकाच्छिनत्ति ॥ पञ्चम्या त्वरायाम् ॥ ५ । ४ । ७७ ॥ योगे गम्यायां तुल्यकर्तृकार्थाद्धातोः

सम्बन्धे णम्वा ॥ शय्याया उत्थाय शय्योत्थायं धावति । पक्षे शय्याया उत्थाय धावति ॥ द्वितीयया ॥ ५ । ४ । ७८ ॥ योगे त्वरायां गम्यायां तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा । लोष्ठान् ग्राहं लोष्ठग्राहं युध्यन्ते । यष्टिग्राहम् २ । पक्षे क्त्वापि ॥ स्वाङ्गेनाध्रुवेण ॥ ५ । ४ । ७९ ॥ द्वितीयान्तेन योगे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा ॥ अविकारोऽद्रवमित्यादि लक्षणं स्वाङ्गम्, यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तदध्रुवम् । भ्रुवौ विक्षेपं भ्रूविक्षेपं भ्रुवौ विक्षिप्य वा जल्पति ।स्वाङ्गेनेति किम्?। कफमुन्मूल्य जल्पति ।अध्रुवेणेति किम्? ।शिर उत्क्षिप्य कथयत ॥परिक्लेश्येन॥५।४।८०॥स्वाङ्गेन द्वितीयान्तेन योगे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा ॥ उरांसि प्रतिपेषमुरः प्रतिपेषमुरः प्रतिपिष्य वा युध्यन्ते ॥ विशपतपदस्कन्दो वीप्साभीक्ष्ण्ये ॥५।४।८१॥ द्वितीया तेन योगे तुल्यकर्तृकार्थाद्गम्ये धातोः सम्बन्धे णम्वा ।श्रुतत्वाद्द्विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा वीप्सा । प्रकृत्यर्थस्य पौनः पुन्येनासेवनमाभीक्ष्ण्यम् ।यदाहुः–सुप्सुवीप्सा तिङव्ययकृत्सु चाभीक्ष्ण्यमिति ।गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते । गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते ।गेहं गेहमनुप्रपातं गेहानुप्रपातमास्ते । गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते ।गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते । गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते । गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते । पक्षे,गेहं गेहमनुप्रविश्यास्ते । गेहमनुप्रविश्यानुप्रविश्यास्ते इत्यादि । वीप्सायामुपपदस्याभीक्ष्ण्ये तु धातोर्द्विर्वचनम् । गेहानुप्रवेशमास्त इत्यादौ तु न द्वित्वम् ॥ शब्दशक्तिस्वाभाव्यात्समासेनैव वीप्साभीक्ष्ण्ययोरुक्तत्वात् । आभीक्ष्ण्ये णम् सिद्धौ विकल्पेन समासविधानार्थं वचनम् ॥ कालेन तृष्यस्वः क्रियान्तरे ॥ ५ । ४ । ८२ ॥ वर्त्तमानात् द्वितीयान्तेन योगे धातोः सम्बन्धे णम्वा ॥ द्व्यहंतर्षं द्व्यहतर्षं गावः पिबन्ति । द्व्यहमत्यासं द्व्यहात्यासं गावः पिबन्ति । तर्षणात्यासेन च गवां पानक्रिया व्यवधीयते ॥ अद्य पीत्वा द्व्यहमतिक्रम्य पिब-

न्तीत्यर्थः ॥ क्रियान्तर इति किम् ? । अहरत्यस्येषून् गतः ॥ नाम्ना ग्रहादिशः ॥ ५ । ४ । ८३ ॥ द्वितीयान्तेन योगे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे णम्वा ॥ नामानि ग्राहं नामग्राहमाह्वयति । नामान्यादेशं नामादेशं ददाति ॥ नाम गृहीत्वा ददाति ॥कृगोऽव्ययेनानिष्टोक्तौ क्त्वाणमौ ॥५।४।८४॥तुल्यकर्तृकार्थयोगे गम्यायां धातोः सम्बन्धे॥ ब्राह्मण ! पुत्रस्ते जातः वृषल? किं तर्हि नीचैः कृत्वा नीचैः कृत्य नीचैः कारं कथयसि । उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण ! कन्या ते गर्भिणी किं तर्हि वृषल? उच्चैः कृत्वा उच्चैः कृत्य उच्चैः कारं कथयसि ।नीचैर्नामाप्रियमाख्येयम् । अव्ययेनेति किम्?। ब्राह्मण? पुत्रस्ते जातः किं तर्हि वृषल? मन्दं कृत्वा कथयसि । वाधिकारेणैव वक्ष्ये क्त्वायाः सिद्धौ समासार्थं तद्विधानम् । क्त्वा चेत्यकृत्वा णम्विधानमुत्तरत्रोभयानुवृत्त्यर्थम् ॥ तिर्यचापवर्गे ॥ ५ । ४ । ८५ ॥ अव्ययेन योगे गम्ये तुल्यकर्तृकार्थात् क्त्वाणमौ ॥ अपवर्गः क्रियासमाप्तिः समाप्तिपूर्वको वा विरामः । तिर्यक्कृत्वा तिर्यक्कृत्य तिर्यक्कारमास्ते । अपवर्ग इति किम् ? । तिर्यक्कृत्वा काष्ठं गतः ॥ स्वाङ्गतश्च्व्यर्थे नानाविनाधार्थेन भुवश्च ॥ ५ । ४ । ८६ ॥ योगे तुल्यकर्तृकार्थात् कृगो धातोः सम्बन्धे क्त्वाणमौ ॥ मुखतोभूत्वा मुखतोभूय मुखतोभावमास्ते । मुखतः कृत्वा मुखतः कृत्य मुखतःकारमास्ते । पार्श्वतोभूत्वा पार्श्वतोभूय पार्श्वतोभावं शेते । पार्श्वतःकृत्वा पार्श्वतःकृत्य पार्श्वतःकारं शेते । नानाभूत्वा नानाभूय नानाभावं गतः ।नानाकृत्वा नानाकृत्य नानाकारं गतः । विनाभूत्वा विना भूय विना भावं गतः । विना कृत्वा विना कृत्य विनाकारं गतः । द्विधा भूत्वा द्विधाभूय द्विधाभावमास्ते इत्यादि । धार्था धाधमञेधाध्यमञः । धणस्तु मकारविचालवदर्थत्वेनाधार्थत्वादव्ययाधिकाराच्च निरासः । अस्यापि ग्रहणमित्यन्ये । च्व्यर्थेति किम् ? । नाना कृत्वा भक्ष्याणि भुङ्क्ते । एवं द्वैधं भूत्वेत्याद्यपि ॥ तूष्णीमा ॥ ५ । ४ । ८७ ॥ योगे तुल्यकर्तृकार्थाद् भवतेर्धातोः सम्बन्धे क्त्वाणमौ । तूष्णींभूत्वा तूष्णींभूय तूष्णीं भावमास्ते ॥ आनुलो-

म्येऽन्वक्चा ॥ ५ । ४ । ८८ ॥ अन्ययेन योगे तुल्यकर्तृकार्थाद्भुवो गम्ये धातोः सम्बन्धे क्त्वाणमौ । अन्वग्भूत्वा अन्वग्भूय अन्वग्भावमास्ते । आनुलोम्य इति किम् ? । अन्वग्भूत्वा विजयते पश्चाद्भूत्वेत्यर्थः॥ ॥

॥ इतिश्रीतपागच्छाचार्यश्रीविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थंस्वादिगुणोपेतश्रीवृद्धिचन्द्रापरनामश्रीवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीय तपोगच्छाचार्यश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां उत्तरकृदन्तप्रकरणम् ॥

—: अथ प्रशस्तिः :—

सद्वर्णोल्लसिताऽभितोऽप्यनुगता सन्धि सलिङ्गाव्ययाऽऽ-
ख्याता तद्धितप्रत्ययैरनुसृता धातौ समासे परा ।
या कृत्प्रत्ययबुद्धिरर्थनिकरे योग्यप्रथा कारके,
सा स्पष्टाकृतिलक्षितास्त्विह मुदे हेमप्रभैषा सताम् ॥ १ ॥

प्राचीनोक्त्यनुशीलिते परिचितन्यायप्रयोगास्पदे,
मान्यामान्यदलप्रकारभजनोद्बोधांकुरोल्लासके ।
ग्रन्थे शाब्दिकसम्प्रदायघटिते शुद्धिं कृतप्रश्रयाः,
कुर्वन्त्वत्र बुधाः प्रमादपतितान् दोषान् प्रणुद्य स्फुटम् ॥ २ ॥
दुर्भेद्यान्तरगाढप्रष्ठतिमिरध्वंसप्रगल्भोद्यमं, ज्ञानं यस्य समस्तवस्तुविषयं निर्बाधमुद्योतते ।
तस्यापश्चिमतीर्थकर्तुरमराधीशादिलब्धस्तुतेः, पट्टं धर्मधुरन्धरं विजयते नित्यप्रबन्धोदयम् ॥३॥
निर्ग्रन्थाभिधगच्छतामुपनयन् यस्मिन् सुधर्माप्रभुः,
कीर्तिस्तम्भ इवोल्ललास जगति स्याद्वादमानोन्नतेः ॥
यत्राभूदनु कोटिगच्छघटनादक्षोऽग्रणीर्धीमता,
सूरिः सुस्थितसंज्ञकः श्रुतनिधिः कीर्तिप्रतापोज्ज्वलः ॥४॥
यस्मिन्नागमविस्तृताम्बुधिमहोल्लासोदयस्सूरिराट् ,
चन्द्रश्चन्द्रमिवोज्ज्वलं नयनिधिश्चन्द्राख्यगच्छं व्यधात् ॥
यत्रानु प्रथितं प्रभावधिषणः सामन्तभद्राभिधः,

सूरीशो वनवासिगच्छमतनोच्चारित्रचूडामणिः ॥ ५ ॥

यत्रानेकनयप्रचारमहितागाधागमाभ्युल्लस--द्बुद्धिस्स्वच्छवटाख्यगच्छमलघुं श्रीसर्वदेवाभिधः ।
सूरिः सर्वगुणाकरोऽमितयशा लब्धप्रतापोदयो, व्यातेने चरणप्रचारविमलच्छायं शमोल्लासकम् ६

यत्रोद्योतमनर्गलं सुविदधत् सद्धर्मदीक्षागुरुः, श्रीवीरागममार्गचारिचरणोऽनेकान्ततत्त्वप्रधीः ।
सूरिर्भव्यसरोजभानुरमलं गच्छं तपाख्यं जग--च्चन्द्राख्यश्चरणप्रचारमहिमावाप्तप्रतिष्ठं व्यधात् ७

गच्छे तत्र परम्परागतसदाचारैकबद्धादरे, श्रीहीरेण गते प्रसिद्धिमतुलां लोकेऽनघां सूरिणा ।
सेनेनाप्तगुणाकरेण गमिते देवेन चाधिश्रियं, सिंहाचार्यविधिप्रचारमहिते सद्बोधरत्नाकरे ॥८॥

सद्धर्म्माम्बुधिवृद्धिमत्र परमां भव्येषु सन्तन्वतः,कीर्तिं दिक्षु वितन्वतोऽमितगुणावासस्य विद्याम्बुधेः
श्रीयुक्तस्य बुधस्य वृद्धिविजयस्यैकान्तभक्त्या गुरो-र्नेम्याख्येन कृतेयमस्तु सुधियामानन्ददा सूरिणा

वर्षे मिते मुनिरसाङ्कनिशाधिनाथैः, मासे शुचौ सितदले भुजगेन्द्रतिथ्याम् ।
पूर्णाऽस्तु राजनगरे प्रथिताऽधिकल्पं, हेमप्रभाकृतिरियं भुवि नेमिसूरेः ॥ १० ॥

॥ वृहद्धेमप्रभाव्याकरणम् ॥

॥ उत्तरार्द्धं सम्पूर्णम् ॥

॥ ॐ अर्हँ नमः ॥

॥ संस्मारितातीतयुगप्रधानगीतार्थत्वादिगुणोपेतजगद्गुरुश्रीवृद्धिविजयसद्गुरुभ्यो नमः ॥

## ॥ अथोत्तरार्धम् ॥

अर्हन्तं पूज्यवर्यं निरुपमधिषणाकान्तमाप्तप्रकाण्डं,
सर्वार्थव्याप्यबाध्याखिलनयघटनोल्लासिराद्धान्तनाथम् ॥
नत्वा श्रीनेमिसूरिं गुरुपदकमलाराधनाबालबुद्धिः ।
स्मृत्वा प्राचां सदुक्तिं विरचयति सदानन्दनाथोत्तरार्धम् ॥ १ ॥

### ॥ अथाख्यातप्रक्रिया ॥

क्रियार्थो धातुरिति क्रियामेव प्राधान्येन योऽभिधत्ते स क्रियार्थो धातुस्तेनाऽऽयादिप्रत्ययान्तानामपि धातुत्वम्, शिश्ये इत्यादीनां च न ॥ शिष्टप्रयोगानुसारित्वादस्य धातुलक्षणस्याणप्रत्ययादिनिवृत्तिः । शिक्षापनाय चेदं लक्षणम्, एतदविसंवादेन शिष्टा प्रयुञ्जन्त इति ॥ अन्वयव्यतिरेकाभ्यां धातोः क्रियार्थत्वावगमः । क्रियाशब्दस्य करोत्यर्थस्तु व्युत्पत्तिनिमित्तमेव । प्रवृत्तिनिमित्तं तु कारकव्यापारविशेषः । व्यापारस्य व्यापारान्तराक्षिप्यमाणत्वादस्त्याद्यर्थोऽपि क्रियैव । एवं सति

क्रियासामान्यवचनाः कृभ्वस्तयः । क्रियाविशेषवचनास्तु पचादय इति सिद्धम् ॥ तथा भावे घञ् इत्युक्त्वा कारः पाक इ-
हैम० त्यादयोऽप्युदाह्रियन्ते । क्रियोपपदाद्धातोस्तुमित्युक्त्वा योद्धुं धनुर्भवतीत्याद्यप्युदाहरणं युक्तम् । सिद्धसाध्यत्वभेदात् क्रिया भ्वा-
॥१॥ द्वेधा । तत्र सिद्धस्वभावोपसंहृतक्रमा परितःपरिच्छिन्ना सत्त्वभावमापन्ना घञादिभिरभिधीयते । यदाह "कृदभिहितो भावो
द्रव्यवत्प्रकाशत इति॥"हरिणाऽप्युक्तम् । "आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता । प्रकल्पिता यथा शास्त्रे स घञादिष्वपि
क्रमः ॥१॥ साध्यत्वेन क्रिया तत्र, धातुरूपनिबन्धना । सत्त्वभागस्तु यस्तस्याः, स घञादिनिबन्धनः॥२॥" साध्यमानावस्था
पूर्वापरीभूतावयवाऽऽख्यातपदैरुच्यते । यदाह पूर्वापरीभूतं भावमाख्यातेनाचष्टे । साध्यत्वाभिधानेन क्रमरूपाश्रयणात्क्रिया-
व्यपदेशः सिद्धः । तदुक्तम्, "यावत्सिद्धमसिद्धं वा, साध्यत्वेनाभिधीयते।आश्रितक्रमरूपत्वात्, सा क्रियेत्यभिधीयते ॥१॥"
धातुस्त्रिधा, गणजो नामजः सौत्रः।आद्यो नवधा।तथाहुः। "अदादयः कानुबन्धा–श्चानुबन्धा दिवादयः । स्वादयष्टानुबन्धा-
श्च, तानुबन्धास्तुदादयः॥१॥रुधादयः पानुबन्धा, यानुबन्धास्तनादयः । क्र्यादयः शानुबन्धाश्च, णानुबन्धाश्चुरादयः॥२॥"
उक्तानुबन्धरहिता भ्वादयः ।यत्र नाम्नैव प्रत्ययसम्बन्धाद्धातुत्वं याति स नामधातुः । सौत्राश्च कण्ड्वादयोऽन्दोलप्रमुखा-
श्च ।प्रत्येकमेते त्रिविधाः, परस्मैपदिन आत्मनेपदिन उभयपदिनश्चेति।"ङानुबन्ध इदनुबन्धः, कर्तर्यप्यात्मनेपदी धातुः।ईग-
नुबन्धस्तूभय-पदी परस्मैपदी शेषः॥१॥"धातोराख्यातप्रत्ययाः प्रयोक्तव्यास्ते चेमे ॥ वर्तमाना तिव्-तस् अन्ति, सि-
व् थस् थ, मिव् वस् मस्, ते आते अन्ते, से आथे ध्वे, ए वहे महे ॥३ । ३ । ६ ॥ वकारो वित्कार्यार्थः । ए-
वमन्यत्रापि ॥ सप्तमी-यात् याताम् युस्, यास् यातम् यात, याम् याव याम, ईत ईयाताम् ईरन्,
ईथास् ईयाथाम् ईध्वम्, ईय ईवहि ईमहि ॥ ३ । ३ । ७॥ पञ्चमी-तुव् ताम् अन्तु, हि तम् त, आनि-
व् आवव् आमव्, ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐव् आवहैव् आमहैव् ॥ ३ । ३ । ८ ॥ ह्य- ॥१॥
स्तनी–दिव् ताम् अन्, सिव् तम् त, अम्व् व म, त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि,

॥ ३ । ३ । ९ ॥ दिस्योरिकार उच्चारणार्थः । एताः शितः ॥ ३ । ३ । १० ॥ अद्यतनी,-दि ताम् अन्, सि तम् त, अम् व म, त आताम् अन्त, थास् आथाम् ध्वम्, इ वहि महि ॥ ३ । ३ । ११ । परोक्षा-णव् अतुस् उस्, थव् अथुस् अ, णव् व म, ए आते इरे, से आथे ध्वे, ए वहे महे ॥ ३ । ३ । १२॥ आशीः-क्यात् क्यास्ताम् क्यासुस्, क्यास् क्यास्तम् क्यास्त, क्यासम् क्यास्व क्यास्म, सीष्ट सीयास्ताम् सीरन्, सीष्ठास् सीयास्थाम् सीध्वम्, सीय सीवहि सीमहि ॥ ३ । ३ । १३ ॥ ककारः कित्कार्यार्थः । श्वस्तनी-ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्, ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे ॥ ३ । ३ । १४ ॥ भविष्यन्ती-स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ, स्यामि स्यावस् स्यामस्, स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे स्यामहे ॥ ३ । ३ । १५ ॥ क्रियातिपत्तिः-स्यत् स्यताम् स्यन्, स्यस् स्यतम् स्यत, स्यम् स्याव स्याम, स्यत स्येताम् स्यन्त, स्यथास् स्येथाम् स्यध्वम्, स्ये स्यावहि स्यामहि ॥ ३ । ३ । १६ ॥ नवाद्यानि शतृक्वसू च परस्मैपदम् ॥ ३ । ३ । १९ ॥ सर्वासां विभक्तीनाम् ॥ पराणि कानानशौ चात्मनेपदम् ॥ ३ । ३ । २० ॥ तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च ॥ ३ । ३ । २१ ॥ आत्मनेपदं कृत्यक्तखलर्थाश्च प्रत्ययाः सकर्मकाद्धातोः कर्मणि अकर्मकादविवक्षितकर्मकाच्च भावे स्युः । सकर्मका अप्यविवक्षितकर्माणः कर्तृकनिष्ठव्यापारा अकर्मकाः । तेनैषां भावेपि प्रयोगः ।सकर्मकादपि क्लीबे क्तमिच्छन्त्येके । भावे च युष्मदस्मत्सम्बन्धनिमित्तयोःकर्तृकर्मणोरभावात्प्रथममेव त्रयं भवति । साध्यरूपत्वात्संख्यायोगो नास्तीत्यौत्सर्गिकमेकवचनमेव । पाकः पाकौ पाकाः । पाको वर्तते पाकं करोतीत्यादौ च अनव्ययकृदभिहितो भावो द्रव्यवत्प्रकाशते इति संख्यया लिङ्गेन कारकैश्च युज्यते । त्यादिनेवाव्ययेनाभिहितस्त्वसत्त्वरूपत्वान्न युज्यते । उष्ट्रासिका आस्यन्ते इति तु बहुवचनं कृदभिहितेनाभेदोपचाराद्भवति । इङितः कर्तरि

॥ ३ । ३ । २२॥ धातोरात्मनेपदम् । नियमार्थं वचनम् ॥ ईगितः ॥ ३ । ३ । ९५ ॥ धातोः फलवति कर्तर्यात्मने-
पदम् । फलवतीत्येव । यजन्ति याजकाः । नात्र स्वर्गः प्रधानं फलं कर्त्रा सम्बध्यते यच्च दक्षिणावेतनं सम्बध्यते न
तत् क्रियायाः प्रधानं फलम् । तच्चैतत्स्वार्थलक्षणं फलं विवक्षानिबन्धनमेव ग्राह्यम्, तथैव लोके व्यवहारात् ॥ तदाहुः ।
"क्रियाप्रवृत्तावाख्याता, कैश्चित्स्वार्थपरार्थता । असती वा सती वापि, विवक्षितनिबन्धना ॥१॥" शेषात्परस्मै ॥३।३।
१०० ॥ कर्तरि । आत्मनेपदविधानादन्यः सर्वो धातुः शेषः । अनुबन्धोपसर्गार्थोपपदप्रत्ययभेदाच्चानेकधा शेषः । आ-
त्मनेपदनियमस्तु कृतः । परस्मैपदन्त्वनियतमिति नियमार्थमिदम् ॥ त्रीणि त्रीण्यन्ययुष्मदस्मदि ॥ ३ । ३ ।१७॥
सर्वासां विभक्तीनां यथाक्रमं स्युः । युष्मच्छब्दोपसृष्टार्थो युष्मदर्थः । तेन भवच्छब्देनोच्यमानो न युष्मदर्थः ॥ युष्म-
दस्मदोर्गौणत्वात्स्वद्भवति मद्भवति ॥ एकद्विबहुषु ॥ ३ । ३ । १८ ॥ अन्यादिषु यानि त्रीणि त्रीणि वचनान्युक्ता-
नि तानि यथासंख्यं स्युः वचनभेदाश्चान्यादिभिरेकादीनां यथासंख्यम् ॥ सति ॥ ५ । २ । १९ ॥ प्रारब्धापरिस-
माप्तः क्रियाप्रबन्धः सन् वर्तमानः, तदर्थाद्धातोर्वर्तमाना । तस्थुः स्थास्यन्ति गिरय इत्यत्र तु भूतभाविनां राज्ञां या
क्रिया तदवच्छेदेन पर्वतादिक्रियाणामतीतत्वानागतत्वोपपत्तेर्न भूतभाविप्रत्ययानुपपत्तिदोषः । एवं च विद्यमानकर्तृकेभ्यो-
ऽस्त्यर्थेभ्यो धातुभ्यः सर्वविभक्तयः ॥ भू सत्तायाम् ॥१॥ अस्मात् कर्तरि विवक्षिते भू तिव् इति स्थिते ॥ कर्तर्यनद्भ्यः शव्
॥३ ।४।७१॥ कर्तरि विहिते शिति । शवकारावितौ ॥ नामिनो गुणोऽक्ङिति ॥४।३।१॥ धातोः प्रत्यये । स भवति ॥
शिदवित् ॥ ४ । ३ ।२०॥ धातोः परो ङिद्वत् । इति तसि गुणाप्राप्तावपि शवूनिमित्तो गुणः । तौ भवतः । 'लुगस्यादे-
त्यपदे इत्यकारलुकि । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ ॥ मव्यस्याः ॥ ४।२।११३ ॥ धातोर्विहिते प्र-
त्यये दीर्घः । अहं भवामि । आवां भवावः । वयं भवामः ॥ अन्यदर्थादिद्वयत्रययोगे शब्दस्पर्धात्पराश्रयमेव वचनम् । स
च त्वं च भवथः । स च अहं च भवावः । स च त्वं च अहं च भवामः ॥ विधिनिमन्त्रणामन्त्रणाऽधीष्टसंप्रश्नप्रा-

र्थने ॥ ४ । २ । १२१ ॥ एतन्निशिष्टकर्तृकर्मभावे धातोः सप्तमीपञ्चम्यौ । सर्वप्रत्ययापवादः । विधिः क्रियायां प्रेरणा, यस्यां प्रेरणायामेव प्रत्याख्याने प्रत्यवायः तन्निमन्त्रणम् । यत्र प्रेरणायामेव प्रत्याख्याने कामचारः तदामन्त्रणम् । सत्कारपूर्विका प्रेरणैव अधीष्टम् । संप्रधारणं संप्रश्नः । याच्ञा प्रार्थनम् । संभावनादिषु च । यः सप्तम्याः ॥ ४ । २ । १२२ ॥ अतः परस्यैः । शिष्यो गुरुसेवी भवेत् । भवेदसौ भव्यस्तत्त्वश्रद्धानात् । भवेताम् ॥ याम्युसोरियमियुसौ ॥ ४ । २ । १२३ ॥ अतः परयोः । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ॥ प्रैषानुज्ञावसरे कृत्यपञ्चम्यौ ॥ ५ । ४ । २९ । कर्त्रादावर्थे । न्यत्कारपूर्विका प्रेरणा प्रैषः । कामचारानुमतिरनुज्ञा । प्राप्तकालताऽवसरः । यद्यपि कृत्याः सामान्येन भावकर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते । अनुज्ञायां सप्तम्येवेति केचिदाहुः । आशिष्यपि पञ्चमी, अध्ययनायोद्यतो भवतु जिनदत्तः । आशिषि तुह्योस्तातङ् ॥ ४ । २ । ११९ ॥ वा । आयुष्मान् भवतु भवताद् भवान् । भवताम् । भवन्तु ॥ अतः प्रत्ययाल्लुक् ॥ ४ । २ । ८५ ॥ धातोर्हेः । भव । प्रत्ययादिति किम् ? । पयि वयि गतौ । पायहि । वायहि । आशिषि, श्रेयस्वी भवतात् सौम्य ! । भवतम् । भवत । भवानि । भवाव । भवाम ॥ अनद्यतने ह्यस्तनी ॥ ५ । २ । ७ ॥ भूते वर्त्तमानाद्धातोः । आ न्याय्यादुत्थानादा न्याय्याच्च संवेशनादहरुभयतः सार्धरात्रं वाऽद्यतनकालः ॥ अड्धातोरादिर्ह्यस्तन्यां चामाङा ॥ ४ । ४ । २९ ॥ अद्यतनीक्रियातिपत्त्योः । ह्योऽभवज्जिनार्चा । अभवताम् । अभवन् । विषयविज्ञानात्प्रत्ययव्यवधानेऽपि भवति । परविज्ञाने हि अहन्नित्यादावेव स्यात् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम । अमाङेति किम्? । मा भवान् कार्षीत् । धातोरादिरिति किम् ? । प्राकरोत् अद्यतनी ॥५।२।४॥ भूतार्थाद्धातोः ॥ सिजद्यतन्याम् ॥३।४।५३॥ धातोः । वेति निवृत्तम् । इकारचकारौ विशेषणार्थौ ॥ पिबैतिदाभूस्थः सिचो लुप्परस्मै न चेट् ॥ ४ । ३ । ६६ ॥ लुप्सन्नियोगे । लुकमकृत्वा लुब्विधानं

स्थानिवद्भावाभावार्थम् । तेनाबोभोदित्यत्र न वृद्धिः ॥ अवौ दाधौ दा ॥ ३ । ३ । ५ ॥ अवाविस्यवितौ । दांं देंङ् डुदांग् दोंच् इति चत्वारो दारूपाः । द्धें डुधांग् इति द्वौ धारूपौ । दाधारूपोपलक्षितस्य दासंज्ञावचनात् दोंच् देंङ् द्धें इत्येतेषां शिति दाधारूपाभावेऽपि दासंज्ञा सिद्धा। दीङो दारूपस्य बहिरङ्गत्वान्न।तेनोपादास्त इत्यत्रेत्वं न । अवाविति किम्? । दांव्. दातं बर्हिः । दैंव् अवदातं मुखम् ॥ भवतेः सिज्लुपि ॥ ४ । ३ । १२ ॥ न गुणः । तिव्निर्देशाद्यङ्लुपि न प्रतिषेधः । श्तिवा शवानुबन्धेन निर्दिष्टं यद्गणेन च । एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपीति न्यायात् । अबोभोत् । अड्धातोरित्यडागमे । अभूदत्र वृद्धिः । अभूताम् । अभू अन् इति स्थिते धातोरिवर्णोवर्णस्येत्युवादेशे ॥ भुवो वः परोक्षाद्यतन्योः ॥ ४ । २ । ४३ ॥ उपान्त्यस्योत् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥ परोक्षे ॥ ५ । २ । १२ ॥ भूतानद्यतने वर्त्तमानाद्धातोः परोक्षा । अक्षाणां परः परोक्षः । अत एव निर्देशात्साधुः । यद्यपि साध्यत्वेनानिष्पन्नत्वात्सर्वोऽपि धात्वर्थः परोक्षस्तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षत्वाभिमानः । यत्र स नास्ति स परोक्षः । भू णव् इति स्थते । ॥ द्विर्धातुः परोक्षाङे प्राक्तु स्वरे स्वरविधेः ॥४।१। १। परोक्षायां ङे च परे धातुर्द्विः स्वरादौ तु द्वित्वनिमित्ते स्वरस्य कार्यात्प्रागेव । वेत्तेः किदिति किस्ववचनादामि परोक्षा कार्यं न । धातुरिति किम् ? । प्राशिश्रियत् । प्रागिति किम्? । निनाय । स्वर इति किम्? । जेघ्रीयते । स्वरविधेरिति किम्? । शुशाव । जग्ले मम्ले इत्यनिमित्तकमात्वम्। अधिजगे इति विषये आदेशः। प्राक् तु स्वरे स्वरविधेरित्याद्विर्वचनमधिकारः । अन्यथा आटिटदित्यादि न सिध्यति ॥ भूस्वपोरदुतौ ॥ ४।१।७० ॥ परोक्षायां द्वित्वे पूर्वस्य क्रमात्स्याताम् । केचितु कर्त्तर्येव भुवोऽकारमिच्छन्ति ॥ द्वितीयतुर्ययोः पूर्वौ ॥ ४ । १ । ४२ ॥ द्वित्वे पूर्वयोर्यथासङ्ख्यम् ॥ नामिनोऽकलिहलेः ॥ ४ । ३ । ५१ ॥ धातोर्नाम्नो वा ञ्णिति वृद्धिः । कलिहलिवर्जनान्नाम्नोऽपि । तेनापीपटत् । अलीलघत् । कलिहलिवर्जनं किम्? । अचकलत् । अजहलत् । अन्ये तु नाम्नो

वृद्धिमनिच्छन्तोऽन्त्यस्वरस्योकारस्यैव णिचि लोपमिच्छन्तः समानलोपित्वासन्वद्भावप्रतिषेधे, अपपटत् । अललघत् इत्येवाहुः । तत आवादेशे, भुवो व इत्यूत्वे, बभूव श्रीवीरः । बभूवतुः । बभूवुः ॥ स्कसृवृभृस्तुद्रुश्रुस्त्रोर्व्यञ्जनादेः परोक्षायाः॥४।४।८२॥ आदिरिट् । स्क इति ससटा निर्देशात् केवलस्य न । स्तुद्रुश्रुस्रूणां सृजिदृशीत्यादिनापि थवि विकल्पो न । अनेन प्राप्ते हि स विकल्पः । उत्सर्गसमानदेशा अपवादाः । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ॥ आशिष्याशीःपञ्चम्यौ ॥ ५ । ४ । ३८ ॥ आशासनमाशीः । कश्चित्तु समर्थनायां पञ्चमीमिच्छति । शक्यस्य वस्तुनोऽध्यवसायः समर्थना । आशिषि, भूयाद् भद्रं श्रमणेभ्यः । भूयास्ताम् । भूयासुः॥भूयाः। भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ॥ अनद्यतने श्वस्तनी ॥ ५ । ३ । ५ ॥ भविष्यति वर्त्तमानाद्धातोः । अनद्यतन इति बहुव्रीहिः, । तेन व्यामिश्रे न भवति । अद्य श्वो वा भविष्यति । श्वो भविष्यतीत्यादौ तु पदार्थे भविष्यन्तो पश्चाच्छ्वःशब्देन योगः । भू ता इति स्थिते ॥ स्ताद्यशितोऽत्रोणादेरिट् ॥ ४ । ४ । ३२ ॥ धातोः परस्यादिः स्यात् । भविता श्वः । अत्रोणादेरिति किम् । शस्त्रम् । वत्सः । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥ भविष्यन्ती ॥ ५ । ३ । ४ ॥ सामान्यतो भविष्यदर्थाद्धातोः । इडागमे । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ॥ सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ५ । ४ । ९ ॥ सप्तम्या अर्थो निमित्तं हेतुफलकथनादिका सामग्री, कुतश्चिद्वैगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिः क्रियातिपत्तिः, तस्यां सत्यामेष्यदर्थाद्धातोः सप्तम्यर्थे क्रियातिपत्तिः । सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ॥ माङ्यद्यतनी ॥ ५ । ४ । ३९ ॥ धातोः । सर्वविभक्त्यपवादः । मा भवान् भूत् । कथं मा भवतु तस्य पाप-

मिति । असाधुरेवायम् । अङितो माशब्दस्यायं प्रयोग इति केचित् ॥ सस्मे ह्यस्तनी च ॥ ५ । ४ । ४०॥ माङ्यद्यतनी । मा स्म भवत् । मा स्म भूत् । माशब्दवाच्यनिषेधद्योतकः स्मशब्दः ॥ अदुरुपसर्गान्तरो णहिनुमीनानेः ॥ २ । ३ । ७७ ॥ नो णः । णेति णोपदेशा धातवः । णोपदेशास्त्वनृतिनर्दिनशिनन्दिनाटिनविकनाथृनाधृनॄधातवः । नाटीति चौरादिकस्य ग्रहणम् । प्रभवाणि। आनेरर्थवतो ग्रहणात्, प्रलोमानि । एकदेशविकृतस्यानन्यत्वात् ,प्रहिणोति।अदुरिति किम्?। दुर्भवानि । प्रणायको देश इत्यत्र तु येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा इति न । अलचटतवर्गशषान्तर इत्येव । प्रतिनमति । परिनदनमित्यत्र तु क्षुभ्नादित्वान्न ॥ अकखाद्यषान्ते पाठे वा ॥२।३ ।८० ॥ धातौ परे अदुरुपसर्गान्तःस्थाद्रादेः परस्य नेर्नो णू स्यात् । प्रणिभवति । प्रनिभवति । स्तम्भेः सौत्रेषु पाठात्पाठविषयत्वम् । प्रणिमयते इत्यादौ तु नेर्ङ्मादेति सूत्रारम्भसामर्थ्यान् नित्यमेव णत्वम् । अकखादीति किम ?। प्रनिकरोति । प्रनिखनति । अषान्त इति किम? । प्रनिद्वेष्टि। पाठ इति किम? । इह च प्रतिषेधः । प्रनिचकार । इह च मा भून् । प्रणिवेष्टा । यङ्लुपि नेच्छन्त्येके । उपसर्गास्त्वर्थविशेषद्योतकाः । प्रभवति पराभवति सम्भवति अनुभवति अभिभवतीत्यादौ विविधार्थावगतेः । उक्तं च–" उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । विहाराहारसंहारप्रहारप्रतिहारवत् ॥ १ ॥ किञ्च–धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते । तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते ॥ १ ॥ बीजकालेषु सम्बद्धा यथा लाक्षारसादयः । वर्णादिपरिणामेन फलानामुपकुर्वते ॥ १ ॥ बुद्धिस्थादभिसम्बन्धात् तथा धातूपसर्गयोः । अभ्यन्तरीकृतो भेदः पदकाले प्रकाश्यते।पां पाने।अनुस्वार एकस्वरादितीण्निषेधार्थः । अत्रेमे धातुप्रत्ययानुबन्धफलप्रतिपादकाः श्लोकाः ॥ " उच्चारणेऽस्त्यवर्णाद्य आक्तयोरिण्निषेधने । इकारादात्मनेपद-मीकाराच्चोभयं भवेत् ॥ १ ॥ उदितः स्वरान्नोन्तश्चोः क्त्वादाविटो विकल्पनम् । रुपान्त्ये ङे परेऽह्रस्व ऋकारदाङ्विकल्पकः ॥ २ ॥ लृकारादङ् समायात्ये सिचि वृद्धिनिषेधकः । एः क्तयोरिण्निषेधः स्यादोः क्तयोस्तस्य नो भवेत् ॥ ३ ॥ ओकार इड्विकल्पार्थेऽनुस्वारोऽ-

निङ्विशेषणे । ऌकारश्च विसर्गश्चानुबन्धौ भवतो नहि ॥ ४ ॥ कोदादिर्न गुणी प्रोक्तः खे पूर्वस्य मुमागमः । गेनो-भयपदी प्रोक्तो घश्चजोः कगौ कृतौ ॥ ५ ॥ आत्मने गुणरोधे ङ—श्नो दिवादिगणो भवेत् । ञो वृद्धौ वर्त्तमाने क्तः टः स्वादिष्ठथुकारकः ॥ ६॥ त्रिमगर्थौ डकारः स्याण् णश्चुरादिश्च वृद्धिकृत् । तस्तुदादौ नकारश्चेश्वापुंमीति विशेषणे॥ ७॥ रुधादौ नागमे पो हि मो दामः सम्प्रदानके । यस्तनादौ रकारः स्यात् पुंवद्भावार्थसूचकः ॥ ८ ॥ स्त्रीलिङ्गार्थे लकारो हि उत औंविति वो भवेत् । शः क्र्यादिः वयः शिति प्रोक्तः षः षितोऽङ्ऽविशेषणे ॥९॥ पदत्वार्थे सकारो हि नोक्ता अत्र न सन्ति च । धातूनां प्रत्ययानां चानुबन्धः कथितो मया ॥ १० ॥ सकर्मकोऽयम् । सकर्मकाकर्मकस्वरूपं चेदम् । फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ १ ॥ धातोरर्थान्तरे वृत्तेर्धात्वर्थे-नोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥२॥श्रौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्यर्त्तिशदसदः शृकृधिपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छशीयसीदम् ॥ ४।२।१०८ ॥ ञित्यत्यादौ यथासंख्यम् । अदन्तत्वान्न गुणः । न चेकारोपान्त्यविधानसामर्थ्याद्गुणो न स्यादिति वाच्यम् । तस्य यङ्लुक्यागच्छतरि चारिथ्यर्ति । घ्रादिभिः साहचर्यात् पात्यौभौवादिकयोरेव ग्रहणम् । पैं इत्येतस्य लाक्षणिकत्वाच्च । निवृन्निर्देशोऽनुबन्धश्च यङ्लुक्यपि आदेशनि-वृत्त्यर्थः । केचित्तु श्रौतेर्यङ्लुग्यप्यादेशं श्नुप्रत्ययं चेच्छन्ति । शृणोति । कृवुधिवोस्तु चरीकृणोति देधिनोतीति रूपं म-न्यन्ते । पिबति । पिबेत् । पिबतु । अपिबत् । पिबैतिदेति सिजूलोपे, अपात् । अपाताम् ॥ सिज्विदोभुवः ॥ ४। २।९३॥धातोः परस्यानः पुस् । पकार इत् ॥ अभुव इति किम् ? । अभूवन् ॥ इडेत्पुसि चातो लुक् ॥ ४।३।८४ ॥ क्ङित्यशिति स्वरे धातोः । अपुः । अङ्किदर्थं शिदर्थं चेडादिग्रहणम् ॥ ह्रस्वः ॥४।१।३९॥ द्वित्वे सति पूर्वस्य ॥ आतो णव औः ॥ ४ । २ । १२० ॥ पपौ ॥ इन्ध्यसंयोगात्परोक्षा किद्वत् ॥ ४ । ३ । २१ ॥ अवित् । इन्ध्यसंयो-गादिति किम् ? । सस्रंसे । ङिद्वदिति प्रकृते किद्वचनं यजादिवचिस्वपीनां स्वृदर्थम् । जागर्तेश्च गुणार्थम् । पपतुः । पपुः ।

सृजिदृशिस्कृस्वराऽत्वतस्तृज्नित्यानिटस्थवः ॥४।४।७९॥ धातोर्विहितस्यादिरिड् वा। तृजिति किम्?। क्रिति नित्यानिटो मा भूत्। लुलविथ नित्येति किम्?। तृचि विकल्पेटो मा भूत्। रराधिथ। विहितविशेषणं किम्?। चकर्षिथ। अद्यादेशस्य घसेर्वेगादेशस्य च वयेस्तृच्यभावान्नित्यमेवेट्। जघसिथ। उवयिथ। प्रकृत्यन्तरस्य तु घसेः परोक्षायामपि प्रायिक एव प्रयोगः। स्क्रादिसूत्रेण प्राप्ते विभाषा। स्वरान्तत्वेनैव सिद्धे स्कृग्रहणं स्क्रन इति प्रतिषेधबाधनार्थम्। तृज्नित्यानिट इत्येव। सस्वरिथ। अत्रापीड्निषेधमिच्छन्त्येके। स्वरान्तोऽकारवान्वा यस्तृच्यनिट् थवि वेडयम्। ऋदन्त ईदृग् नित्यानिट्क्राद्यन्यः सेट् परोक्षके। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम॥ गापास्थासादामाहाकः ॥४।३।९६॥ क्ङित्याशिष्येः। गास्थोर्मध्ये पाठात् भौवादिकयोः पैपा इत्येतयोरेव पाशब्देन ग्रहणम् ॥ पैं इत्यस्य नेच्छन्त्यन्ये। पेयात्॥ एकस्वरादनुस्वारेतः ॥४।४।५६॥ धातोर्विहितस्य स्ताद्यशित इड् न। पाता। पास्यति। अपास्यत्। इमाश्चात्रानिट्कारिकाः॥ "श्विश्रिडीशीयुणुरुक्ष्णुस्नुभ्यश्च वृगो वृङः। उदृदन्तयुजादिभ्यः, स्वरान्ता धातवः परे ॥ १ ॥ पाठ एकस्वराः स्युर्येऽनुस्वारेत इमे स्मृताः। द्विविधोऽपि शकिश्चैवं वचिर्विचिरिचिपच्चिः ॥२॥ सिञ्चतिर्मुचिरतोऽपि पृच्छति—भ्रस्जिमस्जिभुजयो युजिर्यजिः। त्वञ्जिरञ्जिरुजयो णिजि विजषञ्जिभञ्जिभजयः ॥३॥ स्कन्दिविद्यविद्लृविन्तयो नुदिः, स्विद्यतिः शदिसदी भिदिच्छिदी। तुदवदी पदिहदी खिदिक्षुदी,राधिसाधिशुधयो युधिव्यधी ॥ ४ ॥ बन्धबुध्यरुधयः क्रुधिक्षुधी, सिध्यतिस्तदनु हन्तिमन्यती। आपिना तपिशपिक्षिपिच्छुपो, लुम्पतिः सृपिलिपी वपिस्वपी ॥ ५ । यभिरभिलभियमिरमिनमिगमयः, क्रुशिलिशिरुशिरिशिदिशनिदशयः। स्पृशिमृशतिविशनिदृशिशिष्लृशुषय—स्त्विषिपिषिविष्लृकर्षितुषिदुषिपुषयः ॥ ६ ॥ श्लिष्यतिर्द्विषिरतो घसिवसती रोहतिर्दुहिरिही अनिडगदितौ। देग्धिदोग्धिलिहयो मिहिवहती, नह्यतिर्दहिरिति स्फुटमनिटः ॥ ७ ॥ घ्रां गन्धोपादाने। ३। जिघ्रति॥ धूधेघ्राशाच्छासो वा ॥ ४। ३। ६७॥ सिचः परस्मैपदे लुप्, लुप्संनियोगे च नेट्। अघ्रात्। पक्षे। सः

**सिजस्तेर्दिस्योः** ॥ ४ । ३ । ६५ ॥ आदिरीट् । स इति किम् ? । अदात् ॥ **यमिरमिनम्यातः सोऽन्तश्च** ॥ ४ । ४ । ८७ ॥ परस्मैपदे सिच आदिरिट् ॥ **इट ईति** ॥४।३।७१॥ सिचो लुक् । अघ्रासीत् । अघ्राताम् । अघ्रासिष्टाम् । अघ्रुः । अघ्रासिषुः । परोक्षायां घ्राघ्रा इति द्वित्वे ॥ **व्यञ्जनस्यानादेर्लुक्** ॥४ ।१।४४ ॥ पूर्वस्य । द्वितीयतुर्ययोः पूर्वाविति घस्य गत्वे ॥ **गहोर्जः** ॥४।१ ।४७॥ द्वित्वे सति पूर्वयोः । जघ्रौ । जघ्रतुः । जघ्रुः ॥ **संयोगादेर्वाऽऽशिष्येः** ॥ ४ । ३ । ९५ ॥ आदन्तस्य क्ङिति । घ्रेयात् । घ्रायात् । ध्मां शब्दाग्निसंयोगयोः ॥ ४ ॥ अध्मासीत् । दध्मौ । ध्मेयात् । ध्मायात् । ष्ठां गतिनिवृत्तौ ॥ ५ ॥ **षः सोष्ट्यैष्ठिवष्वष्कः** ॥ २ । ३ । ९८ ॥ पाठे धात्वादेः । स्वरदन्त्यपरसकारादयः स्मिस्विदिस्वदिस्वञ्जिस्वपयश्च षोपदेशाः सृपि सृजि स्त्यास्तृम्सृसेकृवर्जम् । पाठ इत्येव । षण्डीयति । निमित्ताभावे नैमित्तिकस्याप्यभाव इति ठस्य थत्वे स्थेति सम्पद्यते । ठस्य हि थस्थानिकत्वम् । तथा षाड्-नकारजावनुस्वारपञ्चमौ धुटि धातुषु । सकारजः शकारः श्चेर्षाट्टवर्गस्तवर्गजः । तिष्ठति ॥ **अघोषे शिटः** ॥ ४।१।४५॥ द्वित्वे पूर्वस्य तत्सम्बन्धिन्येव लुक् । अनादिलुगपवादोऽयम् । अघोषे किम् ? । सस्नौ । तस्थौ । तस्थिथ । तस्थाथ ॥ **स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि** ॥ २ ।३।४०॥ उपसर्गस्थान्नाम्यादेः परेषामड्व्यवधाने सस्य षः । द्विर्वचनेनाटा द्वाभ्यां च व्यवधानेऽपीत्यर्थः । अधितष्ठौ । अध्यष्ठात् । शिड्नान्तरेऽपीत्यधिकारात् । निःष्ठाता । उपसर्गादित्येव । अधिस्थास्यति । गतार्थत्वान्नेहाधिरुपसर्गः । वृक्षं वृक्षं परि सिञ्चति । इह परेर्धातुना सम्बन्धाभावान्नोपसर्गत्वम् । निःसेचको देशः, अत्र येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा इति न भवति । सेधेति कृतगुणस्य निर्देशः सिध्यतिनिवृत्त्यर्थः । अकारस्तूच्चारणार्थः न तु शब्निर्देशः । तेन षष्ठ्लुप्यपि । सेनेरषोपदेशार्थं स्थासञ्जोरवर्णान्तव्यवधानेऽपि विध्यर्थं सिचूसञ्जसेधां षणि नियमबाधनार्थं सर्वेषामड्व्यवधानेऽपि पदादौ च षत्वार्थं वचनम् । अधितष्ठौ । अध्यष्ठात् । स्थेयात् । म्नां अभ्यासे ॥६॥ मनति । अम्नासीत् । म्नेयात् । म्नायात् । दां दाने ॥७॥ यच्छति । दासंज्ञत्वात्सि-

घो लुपि अदात् । ददौ, देयात्। नेर्ङ्मादापतपदनदगदवपीवहीशमू चिग्याति वाति द्राति प्सातिस्यतिहन्ति देग्धौ ॥ २ । ३ । ७९॥ अदुरुपसर्गान्तःशब्दस्थाद्रषुवर्णात्परस्य णः स्यात् । ङकारोपलक्षितो मा ङ्मा । ङकारो नानुबन्धार्थः। किन्तु मात्यादिनिवृत्त्यर्थः।तेन यङ्लुप्यपि प्रणियच्छति प्रण्ययच्छत्।अडागमस्य धात्ववयवत्वेन न व्यवधायकत्वम् । प्रण्यास्यतीत्यादौ त्वाङा व्यवधाने प्रतिषेधाभावाद् भवति। वप्यादीनामनुबन्धेन तिवा च निर्देशो यङ्लुब्निवृत्त्यर्थः । इत्यादन्ताः । जि ज्रि अभिभवे ॥८॥ जयति॥सिचि परस्मै समानस्याङिति ॥ ४ । ३ । ४४ ॥ धातोर्वृद्धिः । अजैषीत् । अङितीति किम् ! । न्यनुवीत् ॥ जेर्गिः सन्परोक्षयोः ॥४।१।३५॥ द्विर्त्वे पूर्वात् परस्य । ५८॥ जिगाय । जिग्यतुः । जिगयिथ । जिगेथ। जिनातेर्जिरूपस्य लाक्षणिकत्वाज्जिज्यतुः ॥ णिद्वान्त्यो णव् ॥४ ।३।५८॥ जिगाय । जिगय । दीर्घश्च्वीति दीर्घे । जीयात् । जेता । जेष्यति । अजेष्यत् । क्षि क्षये ।८।अन्तर्भावितण्यर्थत्वे सकर्मकः क्षयति अक्षैषीत् ॥ कङश्चञ् ॥ ४ । १ । ४६ ॥ द्विर्त्वे पूर्वस्य यथासङ्ख्यम् । चिक्षाय । चिक्षियतुः । क्षेता । इं दुं द्रुं शुं स्रुं गतौ १० । अयति ॥ स्वरादेस्तासु ॥ ४ । ४ । ३१ ॥ धातोरादेः स्वरस्याद्यतनीक्रियातिपत्तिह्यस्तनीषु वृद्धिरमाङा ॥ आयत् । ऐषीत् । अमाङेत्येव । मा भवानयीत् । मा स्म भवानयत ॥ पूर्वस्यास्वे स्वरे य्वोरियुव् ॥ ४ । १ । ३७ ॥ धातोर्द्विर्त्वे । इयाय । अर्तेर्यङ्लुपि, अरियर्ति । ३ । अरियरीति तत्र अर्यर्त्ति । अर्यरीतीति एके मन्यन्ते तन्मतसंग्रहार्थं पूर्वस्येति य्वोः समानाधिकरणं विशेषणम् । तेनेकारोकारमात्रस्यैव पूर्वस्येयुवौ । द्विर्त्वे, योऽनेकस्वरस्येति यत्वे, इयतुः । इतीदन्ताः । दवति । अदौषीत् । दुदाव । दुदुवतुः । दुदविथ । दुदोथ । द्रवति ॥ णिश्रिद्रुस्रुकमः कर्त्तरि ङः ॥३ । ४। ५८॥ अद्यतन्याम् । कमिग्रहणं णिङभावे चरितार्थम् । द्विर्धातुरिति द्विर्त्वे । अदुद्रुवत् । ङित्वाद् गुणो न । अदुद्रुवताम् । दुद्राव । थवि द्रुर्जनादेट् । दुद्रोथ । शवति । अशौषीत् । शुशाव । शुशुवतुः । शुशविथ शुशोथ । शूयात् । स्रवति । असुस्रुवत् । ध्रुं स्थैर्ये च । ११ गत्यर्थः कुटादिरयमित्यन्ये । ध्रवति । संप्रसवेश्व-

र्थयोः । १२ । प्रसवोऽभ्यनुज्ञानम् । सवति ॥धूञ्सुस्तोः परस्मै ॥ ४ । ४ । ८६ ॥ सिच आदिरिट् । असावीत् ॥ अषोपदेशत्वान्न षत्वम् ॥ सुसाव । षोपदेशोऽयमित्यन्ये । इत्युदन्ताः । स्मृ चिन्तायाम् । १३ । स्मरति । अस्मार्षीत् ५ । अस्मार्ष्टाम् ॥ ऋतोऽत् ॥ ४ । १ । ३८ ॥ द्वित्वे पूर्वस्य । सस्मार ॥ संयोगादृदर्त्तेः ॥ ४ । ३ । ९ ॥ संयोगात्परो य ऋत्तदन्तस्यार्त्तेश्च परोक्षायामकि गुणः । सस्मरतुः । सस्मरुः ॥ ऋतः ॥ ४ । ४ । ८० ॥ वृचि नित्यानिटो विहितस्य थव आदिरिड् न । पृथग्योगाद्वेति निवृत्तम् । सस्मर्थ । तृज्नित्यानिट इत्येव । सस्वरिथ । अत्रापीड्निषेधमिच्छन्त्येके ॥ क्ययङाशीर्ये ॥ ४ । ३ । १० ॥ संयोगात्परो य ऋत्तदन्तस्य धातोरर्त्तेश्च गुणः । स्मर्यात् ७ । औपदेशिकसंयोगग्रहणादिह न । संस्क्रियात् अर्त्तेरिति तिब्निर्देशाद्यङ्लुपि न । स्मर्त्ता ॥ हनृतः स्यस्य ॥ ४ । ४ । ४९ ॥ आदिरिट् । स्वरतेः परत्वाद्विकल्पं बाधित्वा नित्यमिट् । तकारनिर्देशादर्त्तेरेव ग्रहणं न । स्मरिष्यति । अस्मरिष्यत् । शृ घृ सेचने ॥ १४ ॥ रिः शक्याशीर्ये ॥ ४ । ३ । ११० ॥ ऋकारान्तस्य धातोर्क्ङितः । घ्रियात् । ह्रस्वविधानान्न दीर्घः । औस्वृ शब्दोपतापतयोः । १५ । स्वरति ॥ धूगौदितः ॥ ४ । ४ । ३८ ॥ स्तादयशित आदिरिड् वा ॥ अस्वारीत् । अस्वार्षीत् । अस्वारिष्टाम् । अस्वार्ष्टाम् । सस्वरिथ । वृचि नित्यानिट्त्वाभावान्न विकल्पः॥ सस्वर्थ इत्यपि केचित्। स्वर्त्ता स्वरिता । एके तु चायीस्फायीप्यायीनामपि विकल्पमिच्छन्ति । निचाता । निचायिता । अपरः पठति । नातिक्रंस्यति । नातिक्रमिष्यति । अन्यस्त्वद्यतन्यामास्कन्दिषमास्कान्त्समितीच्छति । बहुलमेकेषां विकल्पः । पट्टा । पटिता । तदेवं व्यवस्थितविभाषाविज्ञानादागमशासनमनित्यमिति न्यायाच्च विचित्रमतयो वैयाकरणाः । स्वरिष्यति । हनृतः स्यस्येति परत्वान्नित्यमिट् । दृवृं वरणे । १६ । ध्वृं हृवृं कौटिल्ये । । १७ । सृं गतौ । १८ । सरति ॥ सर्त्यर्त्तेर्वा ॥ ३ । ४ । ६१ ॥ कर्त्तर्यद्यतन्यामङ् । ऋ अदादिर्भ्वादिर्वा । सर्त्तेः कर्त्तर्यात्मनेपदं न दृश्यते । अर्त्तेस्तूभयत्रोदाहार्यम् । आत्मनेपदे न भवति परस्मैपदे नित्य-

मित्येके । परस्मैपदे नित्यमात्मनेपदेऽर्त्तेर्वा सर्त्तेर्नेत्यन्ये । उभयत्र नित्यमित्यपरे ॥ ऋवर्णदृशोऽङि ॥ ४ । ३ । ३७ ॥ गुणः । असरत् । पक्षे, असार्षीत् । ससार । ससर्थ । सस्रुव । स्रादित्वान्नेट् । स्रियात् । सृर्ता । सर्त्येर्त्ती जौहोत्यादिकाविति केचित् ॥ वेगे सर्त्तेर्धाव् ॥ ४ । २ । १०७॥ शित्यत्यादौ । धावति । धाविना सिद्धे सर्त्तेर्वेगे सरतीति प्रयोगनिवृत्त्यर्थं वचनम् । ऋं प्रापणे च १९ । ऋच्छति । आर्च्छत् । आर्षीत् । आरत् । द्वित्वे वृद्धौ । अस्यादेराः परोक्षायाम् ॥ ४ । १ । ६८ ॥ धातोर्द्वित्वे । आर । आरतुः । आरुः ॥ ऋवृव्येऽद इट् ॥ ४ । ४ । ८१ ॥ थव आदिः । आरिथ । अर्यात् । अर्त्ता । अरिष्यति । आरिष्यत् । इत्यृदन्ताः । तॄ प्लवनतरणयोः ॥२०॥ तरति । अतारीत् । ततार ॥ स्कृच्छ्रतोऽकि परोक्षायाम् ॥ ४ । ३ । ८ ॥ नामिनो गुणः । उत्तरेणात्र सिद्धे स्कृग्रहणमुत्तरत्रौपदेशिकसंयोगपरिग्रहार्थम् । निचकारेत्यादौ परत्वाद्वृद्धिरेव । अकीति किम् ? । संचस्कृवान् । तर इति जाते ॥ तॄत्रपफलभजाम् ॥ ४ । १ । २५ ॥ अवित्परोक्षासेट्थवोः स्वरस्यैः द्विरुक्ताभावश्च स्यात् । तेरतुः । तेरिथ ॥ ऋतां क्ङितीर् ॥ ४ । ४ । ११६॥ निर्देशादृकारस्यैव स्थाने । बहुवचनं लाक्षणिकस्यापि परिग्रहार्थम् । तीर्यात् ॥ वृतो नवानाशीःसिच्परस्मै च ॥ ४ । ४ । ३५ ॥ इटो दीर्घोऽपरोक्षायाम् । तरीता । तरिता । तरिष्यति । तरीष्यति । तकारो वर्णनिर्देशार्थः । अन्यथा ऋणातेरेव स्यात् । सिचः परस्मैपदविशेषणत्वादिह भवत्येव । अवरीष्ट । अवरिष्ट । इत्यॄदन्ताः । धेट् पाने ॥ २१ ॥ आत्सन्ध्यक्षरस्य ॥ ४ । २ । १ ॥ धातोः । इति प्राप्ते ॥ न शिति ॥ ४ ॥ २ । २ ॥ विषयभूते सन्ध्यक्षरान्तस्य ॥ ट्धेश्वेर्वा ॥ ३ । ४ । ५९ ॥ कर्त्तर्यद्यतन्यां ङः । द्वित्वे पूर्वस्य ह्रस्वत्वे दत्वे च । अदधत् । ट्धेघ्राति सिज्लोपविकल्पे । अधात् । पक्षे । यमिरमिनम्यातः सोऽन्तश्च । अधासीत् । दधौ । धेयात् । धाता । इत्येदन्तः । दैंव् शोधने २२ ॥ दायति । अदासीत् । विरुद्धाद्दासंज्ञाया अभावः । दायात् । ध्यैं चिन्तायाम् २३। ध्यायति । अध्यासीत्। दध्यौ । ध्येयात्। ध्याता। ग्लैं हर्षक्षये २४। धातुक्षय इत्यर्थः । म्लैं गात्रवि-

नामे । २५ । कान्तिक्षय इत्यर्थः । ष्ठ्यैं न्यक्करणे । २६ । द्रैं स्वप्ने । २७ । ध्रैं तृप्तौ । २८ । कैं गैं रैं शब्दे । २९ । अगासीत् । गेयात् । ष्ट्यैं स्त्यैं सङ्घाते च । ३० । खैं खदने । ३१ । क्षैं जैं षैं क्षये । ३२ । सायति । सेयात् । सायादित्यन्ये । स्रैं श्रैं पाके । ३३ । पैं शोषणे । ३४ । अपासीत् । पेयात् । पायादिति केचित् । ष्णैं वेष्टने । ३५ । स्नायति । इत्यैदन्ताः । फक्क नीचैर्गतौ । ३६ । नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च । फक्कति । अफक्कीत् । तक हसने । ३७ । व्यञ्जनादेर्वोपान्त्यस्यातः ॥ ४ । ३ । ४७ ॥ धातोः परस्मैपदपरे सेटि सिचि वृद्धिः । अताकीत् । अतकीत् । उपान्त्यस्येति किम ? । अरक्षीत् । व्यञ्जनादेः किम ? । मा भवानटीत् ॥ ञ्णिति ॥ ४ । ३ । ५० ॥ धातोरुपान्त्यस्यातो वृद्धिः । तताक ॥ अनादेशादेरेकव्यञ्जनमध्येऽतः ॥ ४ । १ । २४ ॥ अवित्परोक्षासेट्थवो र्धातोरेत्वं न च द्वित्वम् । तेकतुः । एकव्यञ्जनेति किम ? । ततक्षतुः । अनादेशादेरिति किम ? । बभणतुः । अवित्परोक्षासेट्थवभ्यामादेशादित्वस्य विशेषणात् । नेभतुः । सेहिथ । तकु कृच्छ्रजीवने । ३८ । उदितः स्वरान्नोऽन्तः ॥ ४ । ४ । ९९ ॥ धातोः । अयञ्चोपदेशावस्थायामेवानैमित्तिकत्वात् । तेन कुण्डाहुण्डेति सिद्धम् । तङ्कति । शुक गतौ ३९ । लघोरुपान्त्यस्य ॥ ४ । ३ । ४ ॥ धातोर्नामिनोऽक्ङिति गुणः । शोकति । अशोकीत् । बुक्क भाषणे ४० । भषण इत्यन्ये । ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः । ४१ । ओखति ॥ गुरुनाम्यादेरनृच्छूर्णोः ॥ ३ । ४ ।४८॥ परोक्षाया आमादेशः । आमन्ताच्च कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । ऋच्छेः प्रतिषेधात्संयोगे परे पूर्वो गुरुरिति विज्ञायते ॥ आमः कृगः ॥ ३ । ३ । ८५ ॥ प्राग्वत्कर्त्तर्यात्मनेपदम् । भवति न भवति चेति विधिनिषेधावतिदिश्येते । तेनैधाञ्चक्रे इत्यादावकर्तृगेऽपि फले आत्मनेपदमेव । इह तु कर्तृगेऽपि फले परस्मैपदमेव । ओखाञ्चकार । ओखाञ्चक्रतुः । ओखाञ्चकर्थ । ओखाम्बभूव । ओखामास । अस्तेर्भूर्न, विधानबलात् । शाखृ श्लाखृ व्याप्तौ । ४२ । कक्ख हसने । ४३ । उख नख णख वख मख रख लख मखु रखु लखु रिखु इख इखु ईखु वल्ग

रगु लगु तगु श्रगु श्लगु अगु वगु मगु स्वगु इगु उगु रिगु लिगु गतौ । ४४ । ओखति । उवोख । सन्निपातपरि-
भाषया नाम । ऊखतुः । इह समानानां तेनेति दीर्घे प्राप्ते ह्रस्वो न, ह्रस्वस्य पर्जन्यवल्लक्षणन्यायेन सकृत्प्रवृत्तत्वात् ।
न शसददवादिगुणिनः ॥ ४ । १ । ३० ॥ धातोः स्वरस्यैत्वं । ववखतुः । ववखिथ ॥ अनातो नश्चान्त
ऋदाद्यशौसंयोगस्य ॥४।१।६९॥ अकारादेरश्नोतेः संयोगान्तस्य च धातोः परोक्षायां द्वित्वे पूर्वस्यादेरकारस्यानात
आकारस्थानेऽनिष्पन्नस्याकारः कृताकारात्त्वस्मान्नोऽन्तश्च । आनङ्ग ।आनङ्गतुः । अनात इति किम्? । आङ्छ ॥ मङ्गति ।
त्वगु कम्पने च । ४५ । युगु जुगु वुगु वर्जने । ४६ । गग्घ हसने । ४७ । दघु पालने । ४८ । वर्जनीपीत्यन्ये ।
शिघु आघ्राणे । ४९ । मघु मण्डने । ५० । लघु शोषणे । ५१ । इति कवर्गान्ताः । शुच शोके । ५२ । शोचति ।
कुच शब्दे तारे । ५३ । क्रुञ्च गतौ । ५४ । कुञ्च च कौटिल्याल्पीभावयोः । ५५ । लुञ्च अपनयने । ५६ ।
नो व्यञ्जनस्यानुदितः ॥ ४ । २ । ४५ ॥ उपान्त्यस्य विङति लुक् । क्रुच्यात् । कुच्यात् । लुच्यात् । अर्च
पूजायाम् । ५७ । अर्चति । आनर्च । अञ्चू गतौ च । ५८ । अञ्चोऽनर्चायाम् । अच्यात् । पूजायां तु, अञ्च्यात् ।
वञ्चू चञ्चू तञ्चू त्वञ्चू मञ्चू मुञ्चू म्रुञ्चू म्रुचू म्लुचू ग्लुञ्चू षस्च गतौ । ५९ । ग्रुचू ग्लुचू स्तेये । ६० । गता-
वपि केचित् ॥ ऋदिच्छ्विस्तम्भूम्रुचूम्लुचूग्रुचूग्लुञ्चूञ्जो वा ॥ ३ । ४ । ६५ ॥ कर्त्तर्यद्यतन्यां परस्मैपदेऽङ् ।
अम्रुचत् । अम्रोचीत् । अम्लुचत् । अम्लोचीत् ॥ अग्रुचत् । अग्रोचीत् । ग्रुचो नेच्छन्त्यन्ये । अग्लुचत् । अग्लोचीत्
। अग्लुचत् । अग्लुञ्चीत् । ग्लुचूग्लुञ्चोरेकतरोपादानेऽपि रूपत्रयं सिध्यति । अर्थभेदात्तु द्वयोरुपादानम् । अन्ये
त्वङ्विधानसामर्थ्याद् ग्लुञ्चेर्नलोपं नेच्छन्ति । तेन अग्लुञ्चत् । म्लेछ अव्यक्तायां वाचि । ६१ । लछ लाछु लक्षणे ।
। ६२ । वाछु इच्छायाम् । ६३ । आछु आयामे । ६४ । अनात इत्युक्तेः, आञ्छ । आनाञ्छेति कश्चित् । ह्रीच्छ
लज्जायाम् ६५ । हुर्च्छा कौटिल्ये ६६ । भ्वादेर्नामिन इति दीर्घे, हूर्छति । मुर्छा मोहसमुच्छ्राययोः । ६७ । स्फुर्छा

स्मुर्छा विस्मृतौ ६८ । युच्छ प्रमादे ।६९। धृज धृजु ध्वज ध्वजु ध्रज ध्रजु वज व्रज षस्ज गतौ ।७०। धर्जति । धृञ्जति । व्रजति ॥ वदव्रजलः ॥४ । ३ । ४८॥ उपान्त्यस्याकारस्य परस्मैपदे सेटि सिचि वृद्धिः । व्यञ्जनादेर्न्त्यस्यापवादः । अव्राजीत् । सज्जति । क्वचिदात्मनेपदमपि । अज क्षेपणे च । ७१ । अजति ॥ अघञ्क्यबलच्यजेर्वी ॥ ४ । ४ । २ ॥ अशिति विषये । विषयसप्तम्याश्रयणात् प्रवेयमित्यत्र यत् प्रत्ययः सिध्यति । स्वरान्ताद्धि तस्य विधानम् , अवैषीत् । आजीदित्यपि केचित् । विवाय । विव्यतुः । विव्युः । बहिरङ्गलक्षणयत्वस्यासिद्धत्वेन न दीर्घः । विवयिथ । विवेथ । कुजू खुजू स्तेये । ७२ । अर्ज षर्ज अर्जने । ७३ । अर्जति । आनर्ज । सर्जति । कर्ज व्यथने । ७४ । खर्ज मार्जने च । ७५ । खज मन्थे । ७६ । खजु गतिवैकल्ये ॥ ७७ । एजृ कम्पने । ७८ । एजाञ्चकार । ट्वोस्फूर्जा वज्रनिर्घोषे । ७९ । स्फूर्जति । क्षीज कूज गुज गुजु अव्यक्ते शब्दे ।८०। लज लजु तर्ज भर्त्सने ।८१। लेजतुः । लाज लाजु भर्जने च । ८२ । जज जजु युद्धे । ८३ । तुज हिंसायाम् । ८४ । तुजु बलने च । ८५ । गर्ज गजु गृज गृजु मुज मुजु मृज मृजु मज शब्दे । ८६ । गज मदने च । ८७ । अगाजीत् । अगजीत् । त्यजं हानौ । ८८ ॥ व्यञ्जनानामनिटि ॥ ४ । ३ । ४५ ॥ धातूनां परस्मैपदविषये सिचि समानस्य वृद्धिः । अत्याक्षीत् । बहुवचनं जात्यर्थम् । तेनानेकव्यञ्जनव्यवधानेऽपि भवति । अराङ्क्षीत् । समानस्येत्येव । उद्वोढाम् । अनिटीति किम् । अतक्षीत् ॥ धुड्ह्रस्वाल्लुगनिटस्तथोः ॥ ४ । ३ । ७० ॥ धातोः सिचः । अत्याक्ताम् । धुड्ह्रस्वादिति किम् ? । अच्योष्ट । लुकः परत्वेऽपि नित्यत्वात्प्रागेव गुणः । अनिट इति किम् ? । व्यद्योतिष्ट । लुबधिकारे लुग्ग्रहणं सिज्लुक्यपि स्थानिवत्त्वेन तत्कार्यप्रतिपत्त्यर्थम् । तेन सिचि विधीयमाना वृद्धिस्तदभावेऽपि सिद्धा । तथासीत्यनुवर्तमाने तथग्रहणं व्याप्तिप्रतिपत्त्यर्थम् । तेन साहचर्यं नास्ति । तथोरिति द्विवचनं यथासङ्ख्यपरिहारार्थम् । अत्याक्षुः । तत्याज । त्यक्ता । षञ्ज सङ्गे । ८९ ॥ दंशसञ्जः शवि ॥ ४ । २ । ४९ ॥ उपान्त्यनस्य लुक् । सजति । तुदादावपठित्वाऽनयोर्भ्वा-

दिशाठात् । दशन्ती । सजन्ती । इति चवर्गीयान्ताः । कटे वर्षावरणयोः । ९० ॥ न श्विजागृशसक्षणह्मयेदितः ॥ ४ । ३ । ४९ ॥ धातोः परस्मैपदपरे सेटि सिचि वृद्धिः । अकटीत् । शसः स्थाने श्वसं पठन्त्यन्ये । श्व्यादीनां यङ्लुगन्तानामपि प्रतिषेधः । जागर्तेऽपि यङमिच्छन्ति केचित् । एदितान्तु यङ्लुपि न प्रतिषेधः । अत एव श्व्यादयो नदितः क्रियन्ते । वकारान्तस्यापि प्रतिषेधमिच्छन्त्यन्यः । शट रुजा विशरणगत्यवसादनेषु ।९१। वट वेष्टने । ९२ । ववटतुः । ववटुः । किट खिट उत्रासे ।९३। शिट षिट अनादरे ।९४। जट झट सङ्घाते ।९५। पिट शब्दे च ।९६। भट भृतौ ।९७। तट उच्छ्राये ।९८। खट काङ्क्षे ।९९। णट नृत्तौ ।१००॥ पाठे धात्वादेर्णो नः ॥२।३।९७॥ नटति । अदुरुपसर्गेति णत्वे । प्रणटति । नोपदेशोऽयमिति केचित् । हट दीप्तौ ।१०१। षट अवयवे । १०२ । लुट विलोटने ।१०३। चिट प्रैष्ये । १०४ । विट शब्दे । १०५ । हेट विबाधायाम् । १०६ । डान्तोऽयमित्येके । अट पट इट किट कट कटु कटै गतौ । १०७ । अस्यादेरिति आत्वे । आट । आटतुः । पपाट । पेटतुः । कुटु वैकल्ये । १०८ । मुट प्रमर्दने । १०९ । चुट चुटु अल्पीभावे । ११० । वटु विभाजने । १११ । रुटु लुटु स्तेये । ११२ । स्फुट स्फुटु विशरणे ११३ ॥ लट बाल्ये । ११४ । रट रठ च परिभाषणे । ११५ । पठ व्यक्तायां वाचि । ११६ । वठ स्थौल्ये । ११७ । मठ मदनिवासयोश्च । ११८ । कठ कृच्छ्रजीवने । ११९ । हठ बलात्कारे । १२० । उठ रुठ लुठ उपघाते । १२१ । उवोठ । ऊठतुः । पिठ हिंसासंक्लेशनयोः । १२२ । शठ कैतवे च । १२३ । शुठ गतिप्रतिघाते । १२४ । कुठु लुठु आलस्ये च । १२५ । शुठु शोषणे । १२६ । अठ रुठु गतौ । १२७ । पुडु प्रमर्दने । १२८ । मुडु खण्डने च । १२९ । मडु भूषायाम् । १३० । गडु वदनैकदेशे । १३१ । शौडृ गर्वे । १३२ । यौडृ सम्बन्धे । १३३ । मेडृ म्रेडृ म्लेडृ लोडृ लौडृ उन्मादे । १३४ । शौडादयो लोडृवर्जाष्टान्ता इत्यन्ये । रोडृ रौडृ तौडृ अनादरे । १३५ । प्रथमो युक्तडान्त इत्येके । क्रीडृ विहारे । १३६ । तुडृ-तूडृ जौडृ तोडने । १३७ । हुडृ हूडृ हूडृ होडृ गतौ । १३८ । खोडृ प्रतिघाते । १३९ ।

विड आक्रोशे । १४० । अड उद्यमे । १४१ । लड विलासे ।१४२। लडति । लळे, ललति । कड्ड मदे । १४३ । अयमात्मनेऽपि । कड्ड कार्कश्ये । १४४ । अड्ड अभियोगे । १४५ । चुड्ड हावकरणे । १४६ । हावकरणमभिप्रायसूचनम् । त्रयोऽप्येते दोपान्त्याः । एषां क्विपि, कत् अत् चुदिति । अण रण वण व्रण बण भण भ्रण मण धण ध्वण ध्रण कण क्वण चण शब्दे । १४७ । ओणृ अपनयने । १४८ । ओणाञ्चकार । शोण वर्णगत्योः । १४९ । श्रोण श्लोण संघाते । १५० । पैण गतिप्रेरणश्लेषणेषु । १५१ । इति टवर्गीयान्ताः । चितै संज्ञाने । १५२ । चेतति । अचेतीत् । अत सातत्यगमने । १५३ । च्युतृ आसेचने । १५४ । ऋदित्वादङ् । अच्युतत् । अच्योतीत् । चुतृ श्चुतृ श्च्युतृ क्षरणे । १५५ । जुतृ भासने । १५६ । अतु बन्धने । १५७ । कित निवासे रोगापनयने संशये च । १५८ । कितः संशयप्रतीकारे ॥ ३ । ४ । ६ ॥ सन् ॥ सन्यङश्च । ४ । १ । ३ ॥ धातोराद्य एकस्वरांशो द्विः ॥ स्वार्थे ॥ ४ । ४ । ६० ॥ सन आदेरिट् न ॥ उपान्त्ये ॥ ४ । ३ । ३४ ॥ नामिनि धातोरनिट् सन् किद्वत् विचिकित्सति । संशेते इत्यर्थः । चिकित्सति रोगम् । प्रतिकरोतीत्यर्थः । निग्रहविनाशौ प्रतीकारस्यैव भेदौ । तेनेहापि भवति । क्षेत्रे चिकित्स्यः पारदारिकः निग्राह्य इत्यर्थः ॥ अतः ॥ ४ । ३ । ८२ ॥ अदन्ताद्धातोर्विहिते शिति प्रत्यये तस्यैव धातोरतो लुक् । अचिकित्सीत् । विहितविशेषणं किम् । गतः ॥ चिकित्स्यानि क्षेत्रे तृणानि । विनाशयितव्यानीत्यर्थः । धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्तिचानु तदन्तरम् ।३।४।४४॥ कश्चित्तु प्रत्ययान्तादेकस्वरादपीच्छति । गवाञ्चकार । अनुग्रहणं व्यवहितविपर्यासनिवृत्त्यर्थम् । उपसर्गस्य तु क्रियाऽव्यवधायकत्वं नास्ति । चिकित्सांचकार । चिकित्सांबभूव । चिकित्सामास ॥ ऋत घृणागतिस्पर्द्धेषु ॥ १५९ ॥ ऋतेर्डीयः ॥ ३ । ४ । ३ ॥ स्वार्थे । ऋतीयते । अशवि ते वा ॥ ३ । ४ । ४ ॥ गुपादिभ्य आयादयः । आर्तीयिष्ट । आर्तीत् ॥ कुथु पुथु लुथु मथु मन्थ मान्थ हिंसासंक्लेशनयोः ॥ १६० ॥ खाद भक्षणे । १६१ । खद स्थैर्ये । १६२ । खद-

हिंसायां च । १६३ । गद व्यक्तायां वाचि । १६४ । गदति । प्रणिगदति । रद विलेखने । १६५ । णद अव्यक्ते शब्दे ।१६६। नदति । प्रणिनदति। प्रणदति ।अर्द गतियाचनयोः।१६७। अनार्द । नर्द णर्द गर्द शब्दे ।१६८। प्रणर्दति । द्वितीयस्य तु प्रनर्दति । तर्द हिंसायाम् । १६९ । कर्द कुत्सिते शब्दे । १७० । कौक्षे इत्यर्थः । खर्द दशने । १७१ । अदु बन्धने । १७२ । इदु परमैश्वर्ये । १७३ । इन्द्राश्च कार । विदु अवयवे । १७४ । विन्दति । अवयवं करोतीत्यर्थः । णिदु कुत्सायाम् ।१७५। प्रणिन्दति । टुनदु समृद्धौ । १७६। प्रनन्दति । तवर्गश्चतुर्थान्तनाधतेर्नन्द्योश्च कश्चिणूणोपदेशतामाह–तन्मते प्रणन्दति । चदु दीप्त्याह्लादनयोः । १७७ । छदु ऊर्जने । १७८ । त्रदु चेष्टायाम् ।१७९। कदु क्रदु क्लदु रोदनाह्वानयोः ।१८०। क्लिदु परिदेवने ।१८१। स्कन्दृ गतिशोषणयोः ।१८२ । अस्कदत् । अस्कान्त्सीत् । अस्कान्ताम् । स्कन्ता । षिधू गत्याम् ।१८३। असेधीत् । सिषेध । सेधिता । प्रतिषेधति । प्रत्यषेधत् । प्रतिषिषेध । गतौ सेधः ॥ २ । ३ । ६१ ॥ सः षो न । अभिसेधति गाः । षिधौ शास्त्रमाङ्गल्ययोः । १८४ । शास्त्रं शासनम् । असेधीत् । पक्षे असैत्सीत् ॥ अधश्चतुर्थात्तथोर्धः ॥ २ । १ । ७९ ॥ धातोर्विहितयोः । असैद्धाम् । अध इति किम् ? । दधातेर्यङ्लुबन्तधयतेश्च मा भूत् । धत्तः । दात्तः । केचित्तु यङ्लुबन्तधयतेरपीच्छन्ति । दाद्धः । विहितविशेषणं किम् ? ज्ञानभुत्त्वम् । शुन्ध शुद्धौ । १८५ । नलुकि, शुध्यात् । स्तन धन ध्वन चन स्वन वन शब्दे । १८६ । स्वनति ॥ व्यवात्स्वनोऽशने ॥२।३।४३॥ उपसर्गात्सस्य द्वित्वेऽप्यट्यपि षः । विष्वणति । अवष्वणति । विषष्वाण । अवषष्वाण । व्यष्वणत् । अवाष्वणत् । व्यषिष्वणत् । अवाषिष्वणत् । अशन इति किम् ? । विस्वनति मृदङ्गः ॥ जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा ॥४।१।२६॥ स्वरस्यावित्वरोक्षासेट्थवोरेः स्याच्च द्विः । स्वेनतुः । सस्वनुः । अविदित्येव । अहं जमर । वमेर्नेच्छन्त्यन्ये । ववान । ववनतुः ।वन षन सम्भक्तौ ।१८७। ये नवा ॥ २ । ६ । ६२ ॥ खनसनजनां विकृत्यन्त्यस्याः । यीतिकरणेनैव सिद्धे य इत्यकारान्तनिर्देशादिह न ।

सन्यात् । केचिदत्रापीच्छन्ति । कनै दीप्तिकान्तिगतिषु । १८८ । इति ट्वर्गीयान्ताः । गुपौ रक्षणे । १८९ ॥ गुपौधूपविच्छिपणिपनेरायः ॥ ३ । ४ । १ ॥ स्वार्थे । गुपावित्यौकारो गुपि गोपने इत्यस्य निवृत्त्यर्थो यङ्लुङ्निवृत्त्यर्थश्च । गोपायति ॥ गोपायाञ्चकार । गोपायांबभूव । गोपायामास । पक्षे, जुगोप । जुगुपतुः । जुगुपुः । जुगोपिथ । गोपाय्यात् । गुप्यात् । गोपायिता । गोपिता । गोप्ता । तपं धूप सन्तापे । १९० । अताप्सीत् ॥ निसस्तपेऽनासेवायाम् ॥ २ । ३ । ३६ ॥ सस्य तादौ षः । निष्टपति स्वर्णम् । सकृदग्निं स्पर्शयतीत्यर्थः । अनासेवायामिति किम् ? । निस्तपति सुवर्णं सुवर्णकारः । तीत्येव । निरतपत् ॥ धूपायति । अधूपायीत् । अधूपीत् । रप--लप--जल्प व्यक्ते वचने । १९१ । जप मानसे च । १९२ । चप सान्त्वने । १९३ । षप समवाये । १९४ । सृप्लृं गतौ । १९५ ॥ लृदिद्द्युतादिपुष्यादेः परस्मै ॥ ३ । ४ । ६४ ॥ कर्त्तर्यद्यतन्यां परस्मैपदेऽङ् । असृपत् ॥ स्पृशादिसृपो वा ॥ ४ । ४ । ११२ ॥ स्पृशमृशकृषतृपदृपां सृपश्च स्वरात्परो धुडादौ प्रत्यये अदन्तो वा स्यादकिति । स्रप्ता । सर्प्ता । चुप मन्दायां गतौ । १९६ । तुप--तुम्प--त्रुप--त्रुम्प--तुफ--तुम्फ--त्रुफ--त्रुम्फ हिंसायाम् । १९७ । नलुकि, तुप्यात् ॥ प्रात्तुम्पतेर्गवि ॥ ४ । ४ । ९८ ॥ कर्त्तरि स्सडादिः । प्रस्तुम्पति गौः । गवीति किम् ? । प्रतुम्पति तरुः । अन्ये तु प्रात्परस्य तुम्पतिशब्दस्य गव्यभिधेये स्सडादिर्भवति । तुम्पतिधातोस्तु स्सट् न भवतीति मन्यन्ते । एके तु प्रात्तुम्पतेः कपीत्यारभन्ते । कपि हिंसायां कच्प्रत्यये वा कपि समासान्त इति च व्याचक्षते । वर्फ रफ रफु अर्ब कर्ब खर्ब गर्ब चर्ब तर्ब नर्ब पर्ब बर्ब शर्ब षर्ब सर्ब रिबु रबु गतौ । १९८ । कुबु आच्छादने । १९९ । लुबु तुबु अर्दने । २०० । चुबु वक्त्रसंयोगे । २०१ । सृभू-सृम्भू-स्रिभू-षिभू-भर्भ हिंसायाम् । २०२ । शुम्भ भाषणे च । २०३ । यभं जभ मैथुने । २०४ । यब्धा ॥ जभः स्वरे ॥ ४ । ४ । १०० ॥ स्वरात्परो नोऽन्तः । जम्भति । चमू छमू जमू झमू जिमू अदने । २०५ ॥ ष्ठिवूक्लम्वाचमः ॥ ४ । २ । ११० ॥ शितीत्यादौ दीर्घः । आचामति । चमति । अचमीत् । ष्ठिवूक्लम्वो-

ऌकारनिर्देशाद्यङ्लुपि न। क्रमू पादविक्षेपे ।२०६ ॥ भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा ॥ ३ । ४ । ७३ ॥ कर्त्तरि विहिते शिति श्यः । संयसेर्ग्रहणमुपसर्गान्तरनिवृत्त्यर्थम् । तेनायस्यतीत्यत्र नित्यं श्यः ॥ क्रमो दीर्घः परस्मै ॥ ४ । २ । १०९ ॥ क्रमः परस्मैपदनिमित्तेऽत्यादौ शिति दीर्घः । क्राम्यति । पक्षे क्रामति । परस्मै इति किम् ? । आक्रमते सूर्यः ॥ क्रमः ॥ ४ । ४ । ५४ ॥ स्ताद्यशितोऽनात्मनेपद आदिरिट् । अक्रमीत् । चक्राम । यमूं उपरमे ।२०७ ॥ गमिषद्यमश्छः ॥ ४ । २ । १०६ ॥ शिति । यच्छति । अयंसीत् । स्यमू शब्दे । २०८ । स्येमतुः । सस्यमतुः । णमं प्रह्वत्वे । २०९ । प्रणमति । अनंसीत् । षम-ष्टम वैक्लव्ये । २१० । अम शब्दभक्त्योः । २११ । अम-द्रम-हम्म-मिमृ-गम्लृं गतौ । २१२ । गच्छति । लृदित्वादङि । अगमत् । जगाम ॥ गमहनजनखनघसः स्वरेऽनङि क्ङिति लुक् ॥ ४ । २ । ४४ ॥ उपान्त्यस्य प्रत्यये । जग्मतुः । जगमिथ । जगन्थ । गम्यात् । गन्ता ॥ गमो नात्मने ॥ ४ । ४ । ५१ ॥ स्ताद्यशितः सादेरादिरिट् । गमीत्यादेशस्यानादेशस्य च ग्रहणमविशेषात् । आदेशस्य नेच्छन्त्येके । गमिष्यति । अगमिष्यत् । अनात्मने इति किम् ? । गंस्यते । इति पवर्गीयान्ताः । हय हर्यं क्लान्तौ च । २१३ । यान्तत्वान्न वृद्धिः । अहयीत् । मव्य बन्धने । २१४ । सूर्क्ष्यं ईर्क्ष्यं ईर्ष्यं ईर्ष्यायाम् । २१५ । शुच्यै चुच्यै अभिषवे । २१६ । द्रवेणाद्रव्राणां परिवासनमभिषवः । स्नानमित्यन्ये । शुशुच्य । त्सर छद्मगतौ । २१७ । क्मर हूर्छने । २१८ । अभ्र वभ्र मभ्र गतौ । २१९ । चर भक्षणे च । २२० । धोर्ऋृ गतिचातुर्ये । २२१ । धोरति । खोर्ऋृ प्रतिघाते । २२२ । दल-ञिफला विशरणे । २२३ । अफालीत् । फेलतुः । मील श्मील स्मील क्ष्मील निमेषणे । २२४ । निमेषणं सङ्कोचः । पील प्रतिष्टम्भे । २२५ । प्रतिष्टम्भो रोधनम् । णील वर्णे । २२६ । वर्णेपिलक्षितायां क्रियायामित्यर्थः । शील समाधौ । २२७ । कील बन्धे । २२८ । कूल आवरणे । २२९ । शूल रुजायाम् । २३० । तूल निष्कर्षे । २३१ । निष्कर्षोऽन्तर्गतस्य बहिर्निस्सारणम् । पूल सङ्घाते । २३२ । मूल प्रतिष्ठायाम् । २३३ ।

फल निष्पत्तौ । २३४ । फुल्ल विकसने । २३५ । चुल्ल हावकरणे । २३६ । चिल्ल शैथिल्ये च । २३७ । पेलृ फेलृ शेलृ षेलृ सेलृ षेह्लृ सल तिल तिल्ल पल्ल वेल्ल गतौ । २३८ । वेलृ चेलृ केल क्वेलृ खेलृ स्खल चलने । २३९ । खल सञ्चये च । २४० । श्वल श्वल्ल आशुगतौ । २४१ । गल चर्व अदने । २४२ । पुर्व पर्व मर्व पूरणे। २४३ । गर्व थिवु शव गतौ । २४४ । कर्व खर्व गर्व दर्पे । २४५ । ष्ठिवू क्षिवू निरसने ।२४६। ष्ठीवति ॥ तिर्वां ष्ठिवः ॥ ४ । १ ।४३॥ द्वित्वे पूर्वस्य । तिष्ठेव । टिष्ठेव । चिक्षेव जीव प्राणधारणे ।२४७। पीव मीव तीव नीव स्थौल्ये ।२४८। उर्वै तुर्वै थुर्वै दुर्वै धुर्वै जुर्वै अर्व भर्व शर्व हिंसायाम् ।२४९। मुर्वै मव बन्धने । २५० । गुर्वै उद्यमे । २५१ । पिवु मिवु निवु सेचने । २५२ । हिवु दिवु जिवु प्रीणने । २५३ । इवु व्याप्तौ च । २५४ । इन्त्वाश्वकार । अव रक्षण-गतिकान्तिप्रीतितृप्त्यवगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादहनभाववृद्धिषु । २५५ । इत्यन्तस्थान्ताः । कश शब्दे । २५६ । सौत्रोऽयमित्येके । मिश मश रोषे च । २५७ । शश प्लुतिगतौ । २५८ । णिश समाधौ । २५९ । दृशृँ प्रेक्षणे । २६० । पश्यति । ऋदिच्छ्वीत्यङि ऋवर्णदृशोऽङीति गुणे, अदर्शत् । पक्षे ॥ अः सृजिदृशोऽकिति ॥ ४ । ४ । १११ । स्वरात्परो धुडादौ प्रत्ययेऽन्तः । प्रसज्याश्रयणात्प्रतिषेधे धुटीति नाश्रीयते, तेन सिज्लुचो धुडादित्वं प्रति वर्णाश्रयत्वेन स्थानिवद्भावाभावेऽपि किच्त्वं प्रति स्थानिवद्भावात्किदाश्रयः प्रतिषेधः स्यात् । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानाच्चेह न । रज्जुसृड्भ्यां देवदृग्भ्याम् । द्रश इति जाते व्यञ्ज-नानामनिटीति वृद्धौ यजसृजेति शस्य षत्वे ॥ षढोःकस्सि ॥ २ । १ । ६२ ॥ असत्परे इत्यधिकारान्निर्योक्ष्यतीत्यत्र ढस्थानस्य कस्यासत्त्वादादेशतुर्थः । नाम्यन्तस्थेति सस्य षत्वे । अद्राक्षीत् । अद्राष्टाम् । ददर्श । सृजिदृ-शीति वेटि । ददर्शिथ । दद्रष्ठ । द्रष्टा । दंशं दशने । २६१ । दशति । ददंशिथ । ददंष्ठ । घुषृ शब्दे । २६२ । अघुषत् । अघोषीत् । चूष पाने । २६३ । तूष तुष्टौ । २६४ । पूष वृद्धौ । २६५ । लूष मूष स्तेये । २६६ । यूष

प्रसवे । २६७ । सूषति । उष रुजायाम् । २६८ । ईष उञ्छे । २६९ । कृषं विलेखने । २७० । विलेखनमाकर्षणम् कर्षति ॥ स्पृशमृशकृषतृपदृपो वा ॥ ३ । ४ । ५४ ॥ अद्यतन्यां सिच् । अक्राक्षीत् । अकार्क्षीत् । पक्षे ॥ हशिटोनाम्युपान्त्याददृशोऽनिटः सक् ॥ ३ । ४ । ५५ ॥ धातोरद्यतन्याम् । अकृक्षत् । अकृक्षताम् । कष शिष जष झष वष मष मुष रुष रिष यूष जूष शष चष हिंसायाम् ॥ २७१ ॥ सहलुभेच्छरुषरिषस्तादेः ॥ ४ । ४ । ४६ ॥ स्ताद्यशित आदिरिड्वा । इच्छेति निर्देशादिषचूइषशोर्न । केचिदिषशोऽपि विकल्पमाहुः । कश्चित्तु पठति सूत्रम्, अशिभृगस्तुशुचिवस्तिभ्यस्तकारादौ वेट् । तथा रुनुसुदुभ्योऽपि अपरोक्षायामेवेट् । तथा विषेर्मूलफलकर्मण्यपरोक्षायामिड् वा । रोष्टा । रोषिता । रेष्टा । रेषिता । वृष सङ्घाते च । २७२ । भष भर्त्सने । २७३ । जिषू विषू मिषू निषू पृषू वृषू सेचने । २७४ । चतुर्थः कैश्चिन्न पठ्यते । मृषू सहने च । २७५ । उषू श्रिषू श्लिषू पुषू प्लुषू दाहे । २७६ । औषीत् ॥ जागुषसमिन्धेर्नवा ॥ ३ । ४ । ४९ ॥ परोक्षाया आम् । आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । सोपसर्गादिन्धेराम् न स्यादेवेति कश्चित् । परोक्षायामिन्धेराम्विकल्प इत्यन्यः । ओषाञ्चकार । ओषाञ्चक्रतुः । पक्षे । उवोष । ऊषतुः । उवोषिथ । घृषू सङ्घर्षे । २७७ । हृषू अलीके । २७८ । पुष पुष्टौ । २७९ । अपोषीत् । अङ्विधायके सनिर्देशादस्य पुषादेर्न ग्रहणम् । भूष तसु अलङ्कारे । २८० । तुस ह्रस ह्लस रस शब्दे । २८१ । लस श्लेषणक्रीडनयोः । २८२ । घस्लृं अदने । २८३ । अयं न सार्वत्रिक इति केचित् । परक्षप्रत्ययविषय एवेत्येके । अघसत् । जघास ॥ घस्वसः ॥ २ । ३ । ३६ ॥ नाम्यादेः परस्य सः षू स्यात् । घसिरिह प्रकृत्यन्तरम् । आदेशस्य कृतत्वेनैव सिद्धत्वात् । अकृतसकारार्थं वचनम् । जक्षतुः । जक्षुः । जघसिथ । जघास । जघस ॥ सस्तः सि ॥ ४ । ३ । ९२ ॥ धातोरशिति प्रत्यये विषयभूते । घत्स्यति । विषयसप्तमीविज्ञानात् अवात्तामत्रात्तेत्यत्र प्रागेव सस्य तकारः । लिङ्गाद्यभावादाशिष्यस्याप्रयोग इति केचित् । हसे हसने । २८४ । पिसृ पेसृ वेसृ गतौ । २८५ । शसु-

हिंसायाम् । २८६ । शशसतुः । शंसु स्तुतौ च । २८७ । शस्यात् । मिहं सेचने । २८८ । मेढा । मेक्ष्यति । दहं भस्मीकरणे । २८९ । अधाक्षीत् । अदाग्धाम् । देहतुः । चह कल्कने । २९० । कल्कनं दम्भः शाठ्यञ्च । रह त्यागे । २९१ । रहु गतौ । २९२ । दह दहु बृह वृहु वृद्धौ । २९३ । बृहू बृहु शब्दे च । २९४ । अबृहत् । अवर्हीत् । उहृ तुहृ दुहृ अर्दने । २९५ । औहत् । औहीत् । उवोह । अर्हं मह पूजायाम् । २९६ । आनर्हं । उक्ष सेचने । २९७ । उक्षाञ्चकार रक्ष पालने । २९८ । मक्ष-मुक्ष सङ्घाते । २९९ । अक्षौ व्याप्तौ च । ३०० ॥ वाक्षः ॥ ३ । ४ । ७६ ॥ कर्त्तरि विहिते शिति श्नुः ॥ उश्नोः ॥ ४ । ३ । २ ॥ धातोः परयोरङ्किति प्रत्यये गुणः । अक्ष्णोति । अक्षति । आक्षीत् । आष्टाम् । आक्षिष्टाम् । आनक्ष । अक्षिता । अष्टा । तक्षौ त्वक्षौ तनूकरणे । ३०१ । तनूकरणं कृशीकरणम् ॥ तक्षस्स्वार्थे वा ॥ ३ । ४ । ७७ ॥ श्नुः । तक्ष्णोति तक्षति काष्ठम् । स्वार्थे इति किम् ? । सन्तक्षति वाग्भिः शिष्यम् । निर्भर्त्सयतीत्यर्थः । इदमेव स्वार्थग्रहणं ज्ञापयति, अनेकार्था धातव इति । त्वक्षिता । त्वष्टा । णिक्ष चुम्बने । ३०२ । प्रणिक्षति । स्तृक्ष णक्ष गतौ । ३०३ । वक्ष रोषे । ३०४ । सङ्घाते इत्येके । त्वक्ष त्वचने । ३०५ । त्वचनं त्वग्ग्रहणं सम्वरणं वा । सूर्क्षं अनादरे । ३०६ । काक्षु वाक्षु माक्षु काङ्क्षायाम् । ३०७ । द्राक्षु ध्राक्षु ध्वाक्षु घोरवासिते च । ३०८ । द्राङ्क्षति । इति भ्वादयः परस्मैपदिनः ॥

## अथात्मनेपदिनः

गाङ् गतौ १ । गाते । अन्तरङ्गत्वाच्छवा सह धातोराकारस्य दीर्घे, आतामाते इत्यादिनेत्वं न । गाते ॥ अनतोऽन्तोऽदात्मने ॥ ४ । २ । ११४ ॥ गाते । गासे । गाथे । गाध्वे । गे । गावहे । गामहे । गेत । गेयाताम् । गेरन् । गेथाः । गेयाथाम् । गेध्वम् । गेय । गेवहि । गेमहि । गाताम् । गाताम् । गाताम् । गास्व । गाथाम् । गाध्वम् ।

गे । गावहे । गामहे । अगात । अगाताम् । अगात । अगाथाः । अगाथाम् । अगाध्वम् । अगे । अगावहि । अगामहि । अगास्त । अगासाताम् । अगासत । अगास्थाः । अगासाथाम् ॥ सो धि वा ॥ ४ । ३ । ७२ ॥ धातोर्धादौ प्रत्यये सो वा लुक् । अगाध्वम् । अगाद्ध्वम् । विकल्पं नेच्छन्त्येके । अन्ये तु सिच एव नित्यं लोपमिच्छन्ति । अगासि । अगास्वहि । अगास्महि । जगे । जगाते । जगिरे । जगिषे । जगाथे । जगिध्वे । जगे । जगिवहे । जगिमहे । गासीष्ट । गासीयास्ताम् । गासीरन् । गासीष्ठाः । गासीयास्थाम् । गासीध्वम् । गासीय । गासीवहि । गासीमहि । गाता । गातारौ । गातारः । गातासे । गातासाथे । गाताध्वे । गाताहे । गातास्वहे । गातास्महे । गास्यते । गास्येते । गास्यन्ते । गास्यसे । गास्येथे । गास्यध्वे । गास्ये । गास्यावहे । गास्यामहे । अगास्यत । अगास्येताम् । अगास्यन्त । अगास्यथाः । अगास्येथाम् । अगास्यध्वम् । अगास्ये । अगास्यावहि । अगास्यामहि । स्मिङ् ईषद्धसने ।२। स्मयते ॥ आताम्‌आते-आथामाथे आदिः ॥ ४ । २ । १२१ ॥ आत्परेषामेषामात इः स्यात् । स्मयेते । स्मयेथे । स्मयेताम् । स्मयेताम् । स्मयेथाम् । अस्मयत । अस्मयेताम् । अस्मयेथाम् । अस्मेष्ट । अस्मेषाताम् । अस्मेषत । अस्मेष्ठाः । अस्मेषाथाम् ॥ नाम्यन्तात्परोक्षाद्यतन्याशिषो धो ढः ॥ २ । १ । ८० ॥ अस्मेढ्वम् । सिष्मिये । सिष्मियाते ॥ ह्रान्तस्थाञ्ञीड्भ्यां वा ॥ २ । १ । ८१ ॥ परासां परोक्षाद्यतन्याशिषां धो ढः स्यात् । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः । सिष्मियिढ्वे । सिष्मियिध्वे । स्मेषीष्ट । स्मेता । स्मेष्यते । अस्मेष्यत । डीङ् विहायसा गतौ । ३ । डयते । अडयिष्ट । डिड्ये । डेषीष्ट । उंङ् कुंङ् गुंङ् घुंङ् ङुंङ् शब्दे । ४ । अवते । आवत । औष्ट । 'वर्णात्प्राकृतं वलीय' इत्युवं ततः समानदीर्घे । ऊवे । ओषीष्ट । कवते । अकोष्ट । चुकुवे । च्युंङ् ज्युंङ् जुंङ् प्रुंङ् प्लुंङ् गतौ । ५ । रुंङ् रेषणे च ।६। चकाराद् गतौ । रेषणं हिंसाशब्दः । पूङ् पवने । ७ । पवनं नीरजीकरणम् । पवते । पविता । मूङ् बन्धने ।८। मविता धृंङ् अवध्वंसने । ९ । धरते ॥ ऋवर्णात् ॥ ४ । ३ । ३६ ॥ धातोरनिटावात्मनेपदविषयौ सिजाशिषौ किद्वत् ॥

न वृद्धिश्चाविति क्ङिल्लोपे ॥ ४ । ३ । ११ ॥ अविति प्रत्यये यः क्ङिल्लोपस्तस्मिन् सति गुणवृद्धी न भवतः । लोपोऽदर्शनमात्रमिह गृह्यते । केचित्तु दधीवाचरतीति क्विब्लोपे अप्रत्यये णिगि च दध्या दध्ययतीत्यत्रापि गुणवृद्धिप्रतिषेधमिच्छन्ति । तन्मतसङ्ग्रहार्थं क्ङिल्लोपे सति अविति प्रत्यये परे गुणवृद्धी न भवत इति व्याख्येयम् । केचित्तु दीधीवेव्योरिवर्णे यकारे चान्तस्य लुकमन्यत्र तु गुणवृद्धिप्रतिषेधमारभन्ते । तदसत् । छान्दसत्वादनयोः । अधृत । अधृषाताम् । धृषीष्ट । धर्त्ता । धरिष्यते । मेङ् प्रतिदाने । १० । प्रतिदानं प्रत्यर्पणम् । प्रणिमयते । देङ् त्रैङ् पालने । ११ । दयते ॥ इश्च स्थादः ॥ ४ । ३ । ४१ ॥ स्थो दासंज्ञकाच्चात्मनेपदविषयः सिच् किद्वत्स्यात् तद्योगे च स्थादोरिश्च । अदित । अदिषाताम् ॥ देर्दिगिः परोक्षायाम् ॥ ४ । १ । ३२ ॥ न चायं द्विः । दिग्ये । दिग्याते । त्रायते । अत्रास्त । तत्रे । श्यैङ् गतौ । १२ । प्यैङ् वृद्धौ । १३ । वकुङ् कौटिल्ये । १४ । गतावित्येके । मकुङ् मण्डने । १५ । अकुङ् लक्षणे । १६ । आनङ्के । शीकृङ् सेचने । १७ । गतावप्यन्ये । शीकते । लोकृङ् दर्शने । १८ । श्लोकृङ् सङ्घाते । १९ । ग्रन्थे इत्यर्थः । स च ग्रन्थो ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा, आद्येऽकर्मको द्वितीये सकर्मकः । श्लोकते । द्रेकृङ् ध्रेकृङ् शब्दोत्साहे । २० । शब्दस्योत्साह औद्धत्यं वृद्धिश्च । द्रेकते । रेकृङ् शकुङ् शङ्कायाम् । २१ । शङ्का सन्देहः पूर्वस्यार्थः, द्वितीयस्य तु त्रासश्च । ककि लौल्ये । २२ । लौल्यं गर्वश्चापल्यश्च । चकके । कुकि वृकि आदाने । २३ । चुकुके । ववृके । चकि तृप्तिप्रतीघातयोः । २४ । चेके । ककुङ् श्वकुङ् त्रकुङ् श्रकुङ् श्लकुङ् ढौकृङ् त्रौकृङ् ष्वष्कि वस्कि मस्कि तिकि टिकि टीकृङ् सेकृङ् स्रेकृङ् रघुङ् लघुङ् गतौ ।२५। कङ्कते । डुढौके । तुत्रौके । ष्वष्कते । नात्र सत्वम् । लघुङ् भोजननिवृत्तावपि । अघुङ् वघुङ् गत्याक्षेपे । २६ । आक्षेपो वेगारम्भ उपालम्भो वा । मघुङ् कैतवे च । २७ । राघृङ् लाघृङ् सामर्थ्ये । २८ । द्राघृङ् आयासे च । २९ । आयामे इत्यन्ये । श्लाघृङ् कत्थने । ३० । लोचृङ् दर्शने । ३१ । षचि सेचने । ३२ । सचते । शचि व्यक्तायां वाचि । ३३ । कचि बन्धने । ३४ ।

कचुङ् दीप्तौ च । ३५ । श्वचि श्वचुङ् गतौ । ३६ । वर्चि दीप्तौ । ३७ । मचि मुचुङ् कल्कने । ३८ । मचुङ् धारणोच्छ्रायपूजनेषु च । ३९ । पचुङ् व्यक्तीकरणे । ४० । ष्टुचि प्रसादे । ४१ । तुष्टुचे । एजृङ् भ्रेजृङ् भ्राजि दीप्तौ ।४२। एजाञ्चक्रे । बिभ्रेजे बभ्राजे । भ्रेजे । इजुङ् गतौ । ४३ । इञ्जाञ्चक्रे । ईजि कुत्सने च ।४४। ऋजि गतिस्थानार्जनोपार्जनेषु । ४५ । आनृजे । ऋजुङ् भृजैङ् भर्जने । ४६ । भर्जनं पाकप्रकारः । तिजि क्षमानिशानयोः । ४७ । निशानं तीक्ष्णीकरणम् ॥ गुप्तिजोर्गर्हाक्षान्तौ सन् ॥ ३ । ४ । ५ ॥ स्वार्थे । तितिक्षते । सहते इत्यर्थः । गर्हाक्षान्ताविति किम् ? । गोपनम् । गोपायति । सन्यकारः सामान्यग्रहणार्थः । नकारः सन्यङश्चेत्यत्र विशेषणार्थः । घट्टि चलने । ४८ । स्फुटि विकसने । ४९ । चेष्टि चेष्टायाम् । ५० । गोष्टि लोष्टि सङ्घाते । ५१ । वेष्टि वेष्टने । ५२ । अट्टि हिंसातिक्रमयोः ।५३। दोपान्त्यस्तोपान्त्यो वा । आनट्टे। एठि हेठि विबाधायाम् ।५४। एठाञ्चक्रे । जिहेठे। मठुङ् कठुङ् शोके ।५५। शोकोऽत्राध्यानम् । मुठुङ् पलायने ।५६। वठुङ् एकचर्यायाम् ।५७। असहायस्य गत्यामित्यर्थः । ववण्ठे। अठुङ् पठुङ् गतौ।५८। आनण्ठे । हुडुङ् पिडुङ् सङ्घाते ।५९।शडुङ् रुजायां च।६०। तडुङ् ताडने ।६१। कडुङ् मदे ।६२। खडुङ् मन्थे । ६३ । खुडुङ् गतिवैकल्ये । ६४ । कुडुङ् दाहे । ६५ । वडुङ् मडुङ् वेष्टने । ६६ । विभाजने इत्येके । विभाजनं विभागकरणं चर्माभावश्च । भडुङ् परिभाषणे । ६७ । मडुङ् मार्जने । ६८ । तुडुङ् तोडने । ६९ । भुडुङ् वरणे । ७० । चडुङ् कोपे । ७१ । द्राडृङ् ध्राडृङ् विशरणे । ७२ । शाडृङ् श्लाघायाम् । ७३ ॥ ऋफिडादीनां डश्च लः ॥ २ । ३ । १०४ ॥ ऋरोर्लृलौ वा । लफिडः । लृफिलः । ऋफिलः । ऋफिडः । लतकः । ऋतकः । इति डस्य लत्वे । शालते । वाडृङ् आप्लाव्ये । ७४ । हेडृङ् होडृङ् अनादरे । ७५ । हिडुङ् गतौ च । ७६ । घिणुङ् घुणुङ् घृणुङ् ग्रहणे । ७७ । घुणि घूर्णि भ्रमणे । ७८ । पणि व्यवहारस्तुत्योः । ७९ । पणायति । व्यवहरति स्तौति वेत्यर्थः । व्यवहारार्थात्पणेरायं नेच्छन्त्यन्ये । शतस्य पणते । अनुबन्धस्याशवि केवले चारिताध्यर्थादायप्रत्ययान्ताच्चात्मनेपदम् । कि-

न्त्वायान्तस्येङित्त्वाभावाच्छेषादिति परस्मैपदम् । पणायाञ्चकार । पेणे॥ इति टवर्गीयान्ताः॥ यतीङ् प्रयत्ने ।८०। युतृङ् जुतृङ् भासने ।८१। विथृङ् वेथृङ् याचने ।८२। नाथृङ् उपतापैश्वर्याशीःषु च ।८३ ॥ आशिषि नाथः ॥३।३।३६॥ एतदर्थे कर्त्तर्य्यात्मने पदम् । सर्पिषो नाथते । सर्पिर्मे स्यादित्याशास्ते । आशिष्येवेति नियमः किम् ?। मधु नाथति । याचत इत्यर्थः । श्रथुङ् शैथिल्ये ।८४। ग्रथुङ् कौटिल्ये ।८५। कत्थि श्लाघायाम् । ८६। चकत्थे । श्विदुङ् श्वैत्ये । ८७ । सकर्मकोऽकर्मकश्च । वदुङ् स्तुत्यभिवादनयोः ।८८। भदुङ् सुखकल्याणयोः ।८९। मदुङ् स्तुतिमोदमदस्वप्नगतिषु ।९०। स्पदुङ् किञ्चिच्चलने ।९१। क्लिदुङ् परिदेवने ।९२। मुदि हर्षे । ९३। अकर्मकोऽयम् । ददि दाने । ९४ । ददे । हर्दि पुरीषोत्सर्गे । ९५ । अहत्त । अहत्साताम् । ष्वदि स्वर्दि स्वादि आस्वादने । ९६ । आद्यः षोपदेशो नेतरौ । ष्वदि-रनुभवे सकर्मको रुच्यावकर्मकः । उर्दि मानक्रीडयोश्च । ९७ । ऊर्दते । ऊर्दाञ्चक्रे । कुर्दि गुर्दि गुदि क्रीडायाम् । ९८ । खुर्दिमप्यन्ये इच्छन्ति । षूदि क्षरणे । ९९ । सूदते । ह्रादि शब्दे । १०० । अव्यक्ते शब्दे इत्यन्ये । ह्लादैङ् सुखे च । १०१ । पर्दि कुत्सिते शब्दे । १०२ । पायुध्वनावित्यर्थः । अन्ये त्वशब्देऽधोवाते । स्कुदुङ् आप्रवणे ।१०३। आप्रवणमुत्प्लव उद्धरणं च । एधि वृद्धौ । १०४ । एधाञ्चक्रे । एधाञ्चकृढ्वे । स्पर्द्धि सङ्घर्षे । १०५ । सङ्घर्षः परा-भिभवेच्छा । धात्वर्थेनोपसङ्ग्रहादकर्मकः । पस्पर्द्धे । गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु । १०६ । प्रतिष्ठायामकर्मकः । बाधृङ् रोटने । १०७ । रोटनं प्रतिघातः । दधि धारणे । १०८ । देधे । बधि बन्धने । १०९ ॥ शान्दान्मान्बधान्निशा-नार्जवविचारवैरूप्ये दीर्घश्चेतः ॥ ३ । ४ । ७ ॥ स्वार्थे सन् द्वित्वे पूर्वस्य ॥ सन्यस्य ॥ ४ । १ । ५९ ॥ द्वित्वे पूर्वस्येः । बीभत्सते चित्तम् विकुरुते इत्यर्थः । नाधृङ् नाथृङ्वत् । ११० । पनि स्तुतौ । १११। पणिवत् । मानि पूजा-याम् । ११२ । विचारे,मीमांसते । तिपृङ् ष्टिपृङ् ष्टेपृङ् क्षरणे । ११३ । तेपृङ् कम्पने च । ११४ । टुवे पृङ् केपृङ् गेपृङ् कपुङ् चलने । ११५ । ग्लेपृङ् दैन्ये च । ११६ । जिग्लेपे । मेपृङ् रेपृङ् लेपृङ् गतौ । ११७ । देशान्तरप्राप्ति-

हेतुर्गतिः, त्र स्थितस्य स्यन्दनम् । त्रपौषि लज्जायाम् । ११८ । अत्रपिष्ट । अत्रप्त । त्रेपे । त्रपिता । त्रप्ता । गुपि गोपनकुत्सनयोः । ११९ । गुप्तिजोरिति सनि । जुगुप्सते । अबुङ् रबुङ् शब्दे । १२० । लबुङ् अवस्रंसने च । १२१ । कबृङ् वर्णे । १२२ । वर्णो वर्णनं शुक्लादिश्च । रेपृङ् चेति कौशिकः । चकबे । क्लीबृङ् अधाष्टर्ये । १२३ । क्षीबृङ् मदे । १२४ । शीभृङ् चीभृङ् शल्भि कत्थने । १२५ । वल्भि भोजने । १२६ । गल्भि धाष्टर्ये । १२७ । रेभृङ् अम्भुङ् रम्भुङ् लम्भुङ् शब्दे । १२८ । ष्टम्भुङ् स्कम्भुङ् ष्टुम्भुङ् स्तम्भे । १२९ । स्तम्भः क्रियानिरोधः । स्तम्भते जम्भुङ् जभैङ् जृम्भुङ् गात्रविनामे । १३० । जम्भते । रभिं राभस्ये । १३१ । आरभते । डुलभिष् प्राप्तौ । १३२ । अलब्ध । लेभे । लप्सीष्ट । लब्धा । लप्स्यते । भामि क्रोधे । १३३ । क्षमौषि सहने । १३४ । अक्षमिष्ट । अक्षंस्त । चक्षमिषे । चक्षंसे । चक्षमिवहे । चक्षमिमहे । कमूङ् कान्तौ ।१३५। कान्तिरिच्छा ॥कमेर्णिङ् ॥३।४।२॥ स्वार्थे । कामयते । णिश्रीति ङे । काम् इ अ त इति स्थिते ॥ णेरनिटि ॥ ४ । ३ । ८३ ॥ अशिति प्रत्यये लुक् । अनेन चेयुप्त्वगुणवृद्धिदीर्घतागमा बाध्यन्ते । इय्, अततक्षत् । यत्वम्, आटिटत् । गुणः, कारणा । वृद्धिः, कारकः । कार्यते । तागमः, प्रकार्य । अनिटीति विषयसप्तम्यपि । तेन चेतन इत्यत्र प्रागेव णेर्लोपे इङितो व्यञ्जनाद्यन्तादिति, अनः सिद्धः । अनिटीति किम् ? । कारयिता ॥ उपान्त्यस्यासमानलोपिशास्वृदितो ङे ॥ ४ । २ । ३५ । धातोर्णौ ह्रस्वः । ङपरे णाविति न धातोर्विशेषणं किन्तूपान्त्यस्यैव । तेन णेः पूर्वस्याधातुत्वेऽपि ह्रस्वः । तेन गोनावमारव्यत् अजूगुनत् । केचित्तु ओतः स्थानिवत्त्वादुपान्त्यत्वाभावाद् ह्रस्वं नेच्छन्ति । तेन अजुगोनत् । णावित्येव । ङे उपान्त्यस्येत्युच्यमानेऽलीलवदित्यादावन्तरङ्गावपि वृद्ध्यावादेशावदीदपदित्यादौ प्वागमञ्च बाधित्वा वचनसामर्थ्यात् णुपान्त्यस्य ह्रस्वः स्यात्।अपीपचदित्यादौ ण्युपान्त्यस्वराभावाच्च स्यात्।णिग्रहणानुवृत्तौ तु सर्वत्र ह्रस्वः सिद्ध्यति।उपान्त्यस्येति किम्?। अचकाङ्क्षत् । येन नाव्यवधानमिति न्यायेनैव सिद्धे उपान्त्यग्रहणमुत्तरार्थम् । असमानलोपिशास्वृदित इति किम्? ।

अत्यरराजत् । यत्रान्त्यस्वरादिलोपः तत्र स्थानिवद्भावेन न सिद्ध्यतीति वचनम् ।यत्र तु स्वरस्यैव लोपः तत्र स्थानिवद्भावेनैव सिद्ध्यति । अममालत् । यत्र स्वरव्यञ्जनलोपस्तत्राप्यवयवावयविनोरभेदन्यायेन स्वरादेशत्वात्स्थानिवद्भावे सिद्धे स्थानिवद्भावस्यानित्यत्वख्यापनार्थमसमानलोपीति वचनम् । तेन पर्यवीवसत् । असिस्वददित्यादि सिद्धम् । कलिहलिवर्जनात्परमपि लोपं वृद्धिर्बाधते । अत एव तत्र कलिहलिवर्जनमर्थवत् । अशशासत् । आशासोऽपीतीच्छत्यन्यः । अययाचत् । शासेरुदित्करणं य ्लुब्निवृत्त्यर्थम् । अशाशसत् । अन्ये तु अशाशासत् इत्यपीच्छन्ति । मा भवानोणिणत् णित्वजात्याश्रयणात् अविवदद्वीणां परिवादकेनेति सिद्धम् ॥ आद्योऽंश एकस्वरः ॥ ४ । १ । २ ॥ अनेकस्वरस्य धातोः परोक्षाङे परे द्विः । इति द्वित्वे ॥ असमानलोपे सन्वल्लघुनि ङे ॥ ४ । १ । ६३ ॥ णौ द्वित्वे सति पूर्वस्य धात्वक्षरे कार्यम् । अचिक्षणदित्यादावनेकव्यञ्जनव्यवधानेऽपि स्म्रादीनामित्वबाधकस्यात्वस्य शासनात्सन्वद्भावः । न तु स्वरव्यञ्जनव्यवायेऽपि । तेन । अजजागरत् ॥ लघोर्दीर्घोऽस्वरादेः ॥ ४ । १ । ६४ ॥ धातोरसमानलोपे ङपरे णौ द्वित्वे पूर्वस्य लघुनि धात्वक्षरे स्यात् । लघोरिति किम् ? । अचिक्षणत् । अचीकमत । णिङभावपक्षे, अचकमत ॥ आमन्ताल्वाय्येत्नावय् ॥ ४ । ३ । ८५ ॥ णेः ॥ कामयाञ्चक्रे । अयि वयि पयि मयि नयि चयि रयि गतौ । १३६ । आयिष्ट ॥ दयायास्कासः ॥ ३ । ४ । ४७ ॥ परोक्षाया आम् । आमन्ताच्च कृभ्वस्तयः पराक्षान्ता अनुप्रयुज्यन्ते । अयाञ्चके । अयिषीढ्वम् । अयषीध्वम् ॥ उपसर्गस्यायौ ॥ २ । ३ । १०० ॥ रस्य लः । प्लायते । पलायते । प्लत्ययते । अत्रानेकवर्णव्यवधानान्नेच्छन्त्येके । प्रतिपूर्वस्य प्रयोग एव नास्तीत्यन्ये । निरयते दुरयते इत्यत्र रुत्वस्यासिद्धत्वान्न लत्वम् । निर्दुरोस्तु निलयते दुलयते । उपसर्गस्येति किम् ? । परस्यायनं परायणम् । उदयतीत्यत्र इधातुः स्वमते । परयते चक्षिङो ङित्करणज्ञापनेनात्मनेपदस्यानित्यत्वादस्यापि प्रयोगोऽयम् । तयि णयि रक्षणे च । १३७ । दयि दानगतिहिंसादहनेषु च । १३८ । ऊयैङ् तन्तुसन्ताने । १३९ । ऊयाञ्चक्रे । पूयैङ् दुर्गन्ध-

विशरणयोः । १४० । पुपूये । क्नूयैङ् शब्दोन्दनयोः । १४१ । उन्दनं क्लेदनम् । दुर्गन्धेऽपीत्येके । क्ष्मायैङ् विधूनने । १४२ । स्फायैङ् ओप्यायैङ् वृद्धौ । १४३ । प्यायते ॥ दीपजनबुधिपूरितायिप्यायो वा ॥ ३ । ४ । ६७ ॥ कर्त्तर्यद्यतन्यास्ते परे ञिज्वा तलुक् च । अप्यायि । पक्षे अप्यायिष्ट । बुधीति इकारो दैवादिकस्यात्मनेपदिनःपरिग्रहार्थम् । तेन बुधृगित्यस्य अबोधिष्टेत्येव ॥ प्यायः पीः ॥ ४ । १ । ९१ ॥ परोक्षायां यङि च । पिप्ये । दीर्घनिर्देशो यङ्लुबर्थः । तायृङ् सन्तानपालनयोः । १४४ । अतायि । अतायिष्ट । वलि वल्लि संवरणे । १४५ । शलि चलने च । १४६ । मलि मल्लि धारणे । १४७ । भलि भल्लि परिभाषणहिंसादानेषु । १४८ । कलि शब्दसङ्ख्यानयोः । १४९ । चकले । कल्लि अशब्दे । १५० । अशब्दस्तूष्णीम्भावः । शब्दार्थ इत्येके । अव्यक्तशब्दार्थ इत्यपरे । तेवृङ् देवृङ् देवने । १५१ । षेवृङ् सेवृङ् केवृङ् खेवृङ् गेवृङ् ग्लेवृङ् पेवृङ् प्लेवृङ् मेवृङ् म्लेवृङ् सेवने । १५२ ॥ परिनिवेः सेवः ॥ २ । ३ । ४६ । सस्य षत्वं द्विरुक्तेऽड्व्यवाये चापि । परिषिषेवे । पर्यषेवत । द्वितीयस्य तु परिसिषेवे । परिनिवेरिति किम् ? । प्रतिसिषेवे । अत्रोपसर्गाश्रितं षत्वं न भवति । धातोस्तु द्वित्वाश्रितं भवत्येव । उभयत्र नेच्छन्त्येके । रेवृङ् प्लवि गतौ । १५३ । पेवे । काशृङ् दीप्तौ । १५४ । क्लेशि विबाधने । १५५ । भाषि च व्यक्तायां वाचि । १५६ । ईषि गतिहिंसादर्शनेषु । १५७ । ईषाञ्चक्रे । गेषृङ् अन्विच्छायाम् । १५८ । अन्विच्छा अन्वेषणम् ॥ येषृङ् प्रयत्ने । १५९ । जेषृङ् णेषृङ् हेषृङ् गतौ । १६० । एषाञ्चक्रे । रेषृङ् हेषृङ् अव्यक्ते शब्दे । १६१ । पर्षि स्नेहने । १६२ । घुषुङ् कान्तीकरणे । १६३ । घुंषते । स्रंसुङ् प्रमादे । १६४ । प्रमादोऽनवधानता । स्रंसते । भ्रान्तोऽयमित्येके । विस्रम्भते । कासृङ् शब्दकुत्सायाम् । १६५ । शब्दस्य कुत्सा रोगः । भासि टुभ्रासि टुभ्लासृङ् दीप्तौ । १६६ । बभासे । भ्रास्यते । भ्रासते । भ्रेसे । बभ्रासे । भ्लास्यते । भ्लासते । भ्लेसे । बभ्लासे । रासृङ् णासृङ् शब्दे । १६७ । णसि कौटिल्ये । १६८ । प्रणसते । भ्यसि भये । १६९ । अभ्यसिष्ट । भेपीत्येके । आङः शसुङ् इच्छायाम्

। १७० । आशंसते । ग्रसूङ् ग्लसूङ् अदने । १७१ । घसुङ् करणे । १७२ । मूर्द्धन्यान्तोऽयमित्येके । ईहि चेष्टायाम् । १७३ । अहुङ् प्लिहि गतौ । १७४ । आनंहे । गर्हि गल्हि कुत्सने । १७५ । वर्हि वल्हि प्राधान्ये ।१७६। वर्हि वल्हि परिभाषणहिंसाच्छादनेषु । १ ७ । दानेऽप्यन्ये । अवल्हिढ्वम् । अवल्हिढ्वम् । वेहृङ् जेहृङ् वाहृङ् प्रयत्ने । १७८। द्राहृङ् निक्षेपे । १७९ । निद्राक्षेप इत्येके । ऊहि तर्के । १८० । ऊहाञ्चक्रे । तर्क उत्प्रेक्षा । गाहौङ् विलोडने । १८१। विलोडने परिमेलन इत्यर्थः । अगाहिष्ट । अगाढ । गाहिषीष्ट । घाक्षीष्ट । गाहिता । गाढा । गाहिष्यते । घाक्ष्यते । ग्लाहौङ् ग्रहणे । १८२ । ग्लाहिता । ग्लाढा । गृहौङ् इत्येके । गर्हते । अगर्हिष्ट । अघृक्षत ॥ स्वरेऽतः ॥ ४ । ३ । ७९ । सकः प्रत्यये लुक् । अघृक्षाताम् । अघृक्षन्त । प्राग्वित्यविति पञ्चमीसमासाश्रयणेनाल्लोपस्य स्थानिवत्त्वान्नान्तोऽदादेशः । गर्हिषीष्ट ॥ सिजाशिषावात्मने ॥ ४ । ३ । ३९ ॥ नामिन्युपान्त्ये धातोरनिटौ किद्वत् । घृक्षीष्ट । बहुङ् महुङ् वृद्धौ । १८३ । दक्षि शैघ्र्ये च । १८४ । धुक्षि धिक्षि सन्दीपनक्लेशनजीवनेषु । १८५ । वृक्षि वरणे । १८६ । शिक्षि विद्योपादाने । १८७ । भिक्षि याच्ञायाम् । १८८ । दीक्षि मौण्ड्येज्योपनयननियमव्रतादेशेषु । १८९ । अदीक्षिष्ट । ईक्षि दर्शने ॥ १९० । ऐक्षत । ऐक्षिष्ट । ईक्षाञ्चक्रे । इत्यात्मनेपदिनः ॥ अथोभयपदिनः ॥ श्रिग् सेवायाम् । १ । श्रयति । श्रयते । णिश्रीति ङे । अशिश्रियत् । अशिश्रियत । शिश्राय । शिश्रिये । श्रीयात् । श्रयिषीष्ट । श्रयिता । २ । श्रयिष्यति । श्रयिष्यते । अश्रयिष्यत् । अश्रयिष्यत । णींग् प्रापणे ।२। निनयिथ । निनेथ । निन्यिषे । हृंग् हरणे । ३ । हरति । हरते । अहार्षीत् । अहार्ष्टाम् । अहृत । जहर्थ । जह्रिव । जह्रे । जह्रिषे । ह्रियात् । हृषीष्ट । हर्ता । हरिष्यति । हरिष्यते । भृंग् भरणे । ४ । अभार्षीत् । अभृत । अभृषाताम् । बभृव । बभृम । बभृषे । धृंग् धारणे । ५ । अधार्षीत् । अधृत । डुकृंग् करणे । ६ ॥ कृग्तनादेरुः ॥ ३ । ४ । ८३ ॥ कर्त्तरि विहिते शिति । अयं तनादिमध्ये पावार्होऽप्यत्रपठितः सिचो धुड्ह्रस्वादिति नित्यलुगर्थः शवर्थश्च । तेन करति करते इत्याद्यपि भवति । अन्यैः

कृग् तनादौ पठितः तत्साहचर्यात्कृग् गृह्यते न तु कृगट् । इति लघुन्यासकारः । करोति ॥ अतः शित्युत् ॥ ४ । २ । ८९ ॥ शित्यविति प्रत्यये य उकारस्तन्निमित्तो यः कृगोऽकारस्तस्योत् । कुरुतः । उकारविधानसामर्थ्याद् गुणो न । कुर्वन्ति । करोषि । कुरुथः । कुरुथ । करोमि ॥ कृगोयि च ॥ ४ । २ । ८८॥ वमि चाविति प्रत्यये उतः रस्य लुक्॥ कुरुच्छुरः ॥ २ । १ । ६६ ॥ नामिनो रे परे दीर्घो न । कुर्वः । कुर्मः । कुर्वित्युकारः किम ?। कुरत् शब्दे, कूर्याद् । केचिदस्यापि प्रतिषेधमिच्छन्ति । बहिरङ्गलक्षणस्य यत्वस्यासिद्धत्वेन रियंतुरित्यादौ व्यञ्जनस्याभावात्पूर्वस्य दीर्घो न । सम्विव्याधेत्यादौ तु नामिनोऽसिद्धत्वात् । कुर्यात् । करोतु । कुरुतात् । कुरुताम । कुर्वन्तु ॥ असंयोगादोः ॥ ४ । २ । ८६ ॥ प्रत्ययात्परस्य हेर्लुक् । कुरु । कुरुतात् । कुरुतम । कुरुत । करवाणि । करवाव । करवाम । अकरोत् । अकार्षीत् । अकार्ष्म । चकर्थ । क्रियात् । कर्ता । करिष्यति । अकरिष्यत् । कुरुते । कुर्वीत । कुरुताम । अकुरुत । अकृत । अकृषाताम । चक्रे । कृषीष्ट । कर्त्ता । करिष्यते । अकरिष्यत ॥ संपरेः कृगः स्सट् ॥ ४ । ४ । ९१ ॥ आदिः । संस्करोति ॥ असोङसिवूसहस्सटाम् ॥ २ । ३ । ४८ ॥ परिनिविभ्यः परेषां सः षः स्यात् । परिष्करोति । असोङिति किम ? । परिसोढः । मा परिसीषिवत् । मा परिसीषहत् । बहुवचनं यथासङ्ख्यनिवृत्त्यर्थम् । भूषासमवाययोरेवेच्छन्त्येके । पूर्वं धातुरुपसर्गेण सम्बध्यते पश्चात्साधनेनेति द्विर्वचनादडागमाच्च पूर्वः स्सडेव । संचस्कार । संचस्करिथ । समस्करोत् । गर्गादिपाठात्संस्कृतिः । कीर्तेरला संकरः परिकरः । संकार इत्यत्रापि कीर्तिरेव । स्सडिति द्विसकारनिर्देशात् समचिस्करदित्यादौ षो न । परिष्करोतीत्यादौ तु असोङसिवूसहस्सटामिति वचनाद्भवति ॥ उपाद्भूषासमवायप्रतियत्नविकारवाक्याध्याहारे ॥ ४ । ४ । ९२ ॥ कृग आदिः स्सट् । भूषाऽलङ्कारः । उपस्करोति कन्याम । समवायः समुदायः । तत्र न उपस्कृतम । समुदितमित्यर्थः । पुनर्यत्नः प्रतियत्नः । सतोऽर्थस्य सम्बन्धाय वृद्धये तादवस्थ्याय वा समीहा प्रतियत्नः । एधोदकस्योपस्कुरुते । प्रतियतते इ-

त्यर्थः । प्रकृतेरन्यथाभावो विकारः । उपस्कृतं भुङ्क्ते । विकृतमित्यर्थः । गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः । सोपस्काराणि सूत्राणि सवाक्याध्याहाराणीत्यर्थः । एष्विति किम् । उपकरोति । हिक्की अव्यक्ते शब्दे । ७ । पूर्वपाठस्तु गतौ फलवति कर्तरि परस्मैपदार्थः । अञ्चूग् गतौ च । ८ । डुयाचृग् याच्ञायाम् । ९ । द्विवदयमित्यके । डुपचींष् पाके । १० । अपाक्षीत् । अपक्त । राजृग् टुभ्राजी दीप्तौ । ११ । रेजतुः । रराजतुः । भेजतुः । बभ्राजतुः । भ्राजेरिह पाठः षत्वविधौ राजृसाहचर्यादस्यैव ग्रहणार्थः । तेन पूर्वस्य विभ्राक् विभ्राग् इत्येव । नन्वेवं षत्वं विकल्प्यतां किं पुनः पाठेन ? सत्यम्, अस्यात्मनेपदाव्यभिचारोपदर्शनद्वाराऽन्येषां यथादर्शनमात्मनेपदानित्यत्वज्ञापनार्थः पुनः पाठः । तेन लभते । लभति । सेवते । सेवति । श्रोतारमुपलभन्ति न प्रशंसितारम् । स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः । इत्यादिप्रयोगा अपि साधवः । भजीं सेवायाम् । १२ । अभाक्षीत् । अभक्त । बभाज । भेजे । रञ्जीं रागे । १३॥ अकद्विनोश्च रञ्जेः ॥४।२।५०॥ शप्युपान्त्यनो लुक् । रजति । रजते । व्यञ्जनानामनिटीत्यत्र बहुवचनस्य जात्यर्थत्वादत्रापि वृद्धौ । अराङ्क्षीत् । अरङ्क्त । अरङ्क्षाताम् । रेटृग् परिभाषणयाचनयोः । १४ । वेणृग् गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । १५। वादित्रग्रहणं वाद्यभाण्डस्य वादनाय ग्रहणम् । नान्तोऽप्ययमिति केचित् । चतेग् याचने । १६ । अचतीत् । अचतिष्ट । प्रोथृग् पर्याप्तौ । १७ । पर्याप्तिः पूर्णता । मिथृग् मेधाहिंसयोः । १८ । मेथृग् सङ्गमे च । १९ । चदेग् याचने । २० । उबुन्दृग् निशामने । २१ । अबुदत् । अबुन्दीत् । अबुन्दिष्ट । धान्तोऽयमिति नन्दी । णिदृग् णेदृग् कुत्सासंनिकर्षयोः । २२ । मिदृग् मेदृग् मेधाहिंसयोः । २३ । मेधृग् सङ्गमे च । २४ । शृधूग् मृधूग् उन्दे । २५। उन्दः क्लेदनम् । बुधग् बोधने । २६ । अबुधत् । अबोधीत् । अबोधिष्ट । खनूग् अवदारणे । २७ । गमहनेत्यल्लुकि । चख्नतुः । चख्ने । खन्यात् । दानी अवखण्डने । २८ । आर्जवे, दीदांसति । दीदांसते । शानी तेजने । २९ । निशाने, शीशांसते । अर्थान्तरे सनोऽभावे प्रत्ययान्तराण्यपि

शपीं आक्रोशे । ३० । आशाप्सीत् । अशप्त । चायृग् पूजानिशामनयोः । ३१ । व्ययी गतौ । ३२ । अव्ययीत् । अव्ययिष्ट । अली भूषणपर्याप्तिवारणेषु । ३३ । धावूग् गतिशुद्ध्योः । ३४ । चीवृग् जुगीवत् । ३५ । अनुदिदयमित्येके । दाशृग् दाने । ३६ । ऋषी आदानसंवरणयोः । ३७ । भेषृग् भये । ३८ । भ्रेषृग् चलने च । ३९ । पषी बाधनस्पर्शनयोः । ४० । शान्तोऽयमित्येके । लषी कान्तौ । ४१ । कान्तिरिच्छा । अभिलष्यति । अभिलषति । अभिलष्यते । अभिलषते । चषी भक्षणे ।४२। छषीं हिंसायाम् । ४३ । चच्छाष । चच्छषे । त्विषीं दीप्तौ । ४४ । अत्विक्षत् । अत्विक्षत । अषी असी गत्यादानयोश्च । ४५ । दासृग् दाने । ४६ । माहृग् माने । ४७ । मानं वर्त्तनम् । गुहौग् संवरणे । ४८ ॥ गोहः स्वरे ॥ ४ । २ । ४२ ॥ कृतगुणस्य गुहेः स्वरादावुपान्त्यस्योत् । निगूहति । निगूहते । न्यगूहीत् । इडभावे सकि । न्यघुक्षत् । न्यगूहिष्ट । पक्षे ॥ दुहदिहलिहगुहो दन्त्यात्मने वा सकः ॥ ४ । ३ । ७४ ॥ एभ्यः सको दन्त्यादावात्मनेपदे लुक् वा स्यात् । न्यगूढ । न्यघुक्षत । जुगूह । जुगुहे । गुह्यात् । गूहिषीष्ट । घुक्षीष्ट । गूहिता । गोढा । २ । गूहिष्यति । घोक्ष्यति । गूहिष्यते । घोक्ष्यते । अगूहिष्यत् । अघोक्ष्यत् । अगूहिष्यत । अघोक्ष्यत । भलक्षी भक्षणे । ४९ । भक्षात्यन्ये ॥

## ॥ अथ द्युतादय आत्मनेपदिनः ॥

द्युति दीप्तौ । १ । द्योतते ॥ द्युद्भ्योऽद्यतन्याम् ॥ ३ । ३ । ४४ ॥ कर्त्तर्यात्मनेपदं वा । बहुवचनं गणार्थम् । व्यद्युतत् । व्यद्योतिष्ट ॥ द्युतेरिः ॥ ४ । १ । ४१ ॥ द्वित्वे सति पूर्वस्य । दिद्युते । रुचि अभिप्रीत्यां च । २ । अरुचत् । अरोचिष्ट । घुटि परिवर्त्तने । ३ । रुटि लुटि लुठि प्रतीघाते । ४ । श्विताङ् वर्णे । ५ । ञिमिदाङ् स्नेहने ।६। ञिक्ष्विदाङ् ञिष्विदाङ् मोचने च ।७। शुभि दीप्तौ ।८। क्षुभि सञ्चलने ।९। सञ्चलनं रूपान्यथात्वम् । णभि तुभि हिंसायाम् ।१०। स्रम्भूङ् विश्वासे ।११। असभत् । अस्रम्भिष्ट । भ्रंशूङ् स्रंसूङ् अवस्रंसने । १२ । ध्वंसूङ् गतौ च ।१३

द्युताद्यन्तर्गणो वृतादिपञ्चकः । वृतु वर्तने । १४ । अवृतत् । अवर्तिष्ट ॥ वृद्भ्यः स्यसनोः ॥ १ । ३ । ९२ ॥ वृतादेः पञ्चतः कर्त्तर्यात्मनेपदं वा । बहुवचनं गणार्थम् । वर्त्तिष्यते ॥ न वृद्भ्यः ॥ ७ । २ । ५९ ॥ वृतादिपञ्चकात्परस्य स्तादेरार्धधातुकस्येण्न, न चेदसावात्मनेपदनिमित्तम् । वर्त्स्यति । एके तु वृद्भ्यः स्यसनोः कृपः श्वस्तन्यां चात्मनेपदाभावे इट्प्रतिषेधमिच्छन्ति । स्यन्दूङ् स्रवणे । १५ । अस्यदत् । अस्यन्दिष्ट । अस्यन्त । स्यन्दिष्यते । स्यन्त्स्यते । स्यन्त्स्यति । ऊदिल्लक्षण इड्विकल्पः परत्वादनेन बाध्यते । अस्यन्त्स्यत । अस्यन्दिष्यत । अस्यन्त्स्यत् ॥ निरभ्यनोश्च स्यन्दस्याप्राणिनि । २ । ३ । ५० । एभ्यः परिनिवेश्च परस्याप्राणिकर्तृकार्थवृत्तेः स्यन्दः सः ष् वा स्यात् । निःष्यन्दते । निःस्यन्दते वा तैलम् । अप्राणिनीति किम् । परिस्यन्दते मत्स्यः । पर्युदासोऽयं न प्रसज्यप्रतिषेधः । तेन च यत्र प्राण्यप्राणी च कर्त्ता स्यात्तत्राप्राण्याश्रयो विकल्पः स्यान्नतु प्राण्याश्रयः प्रतिषेधः । निर्निभ्यां नेच्छन्त्येके । वृधूङ् वृद्धौ । १६ । शृधूङ् शब्दकुत्सायाम् । १७ । कृपौङ् सामर्थ्ये । १८ ॥ कृपो रो लः ॥ ८ । २ । १८ ॥ यथासङ्ख्यम् । कल्पते । अक्लृपत् । अकल्पिष्ट । अक्लृप्त । चक्लृपे । चक्लृपिषे । चक्लृप्से ॥ कृपश्च श्वस्तन्याम् ॥ १ । ३ । ९३ ॥ कर्त्तर्यात्मनेपदं वा । कल्पितासे । कल्प्तासे । कल्प्तासि ॥ इति द्युताद्यन्तर्गणो वृतादिः ॥ इति द्युतादयः ॥

## ॥ अथ ज्वलादयः ॥

---

ज्वल दीप्तौ । १ । ज्वलति । कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । २ । सम्पर्चनं मिश्रता । प्रतिष्टम्भो रोधनम् । विलेखनं कर्षणम् । पत्लृ पथे गतौ । ३ ॥ श्वयत्यसूवचपतः श्वास्थवोचपप्तम् ॥ ४ । ३ । १०३ ॥ अङि यथासङ्ख्यम् । लृदित्वादङ् । अपप्तत् । अपथीत् । कथे निष्पाके । ४ । मथे विलोडने । ५ । पद्लृं विशरणगत्यव-

सादनेषु । ६ । श्रौतीत्यादिना सीदादेशे । सीदति । असदत् । सेदिथ । ससत्थ । सत्ता । सत्स्यति ॥ सदोऽप्रतेः परोक्षायां त्वादेः ॥ २ । ३ । ४४ ॥ उपसर्गस्थान्नाम्यादेः सः षू द्वित्वेऽप्यटयपि । निषीदति । न्यषीदत् । निषिषत्सति । निषसाद । अप्रतेरिति किम् । प्रतिसीदति । प्रत्यसीषदत् । अत्र प्रकृतिसकारस्य तु नाम्यन्तस्थादिसूत्रेण भवत्येव । अस्यापि नेच्छन्त्येके । तुर्विशेषार्थः । परोक्षायामेव विशेषोऽन्यत्र तूभयत्रापि । शद्लृं शातने । ७ । शातनं तनूकरणम् ॥ शदेःशिति ॥ ३ । ३ । ४१ ॥ शिद्विषयाच्छदेः कर्त्तर्यात्मनेपदम् । शीयते । अशदत् । शत्ता । शत्स्यति । बुध अवगमने । ८ । अवगमनं ज्ञानम् । बोधति । अबोधीत् । अनुस्वारेदयमित्येके । तन्मते अभौत्सीत् । टुवमू उद्गिरणे । ९ । वेमतुः । ववमतुः । भ्रमू चलने । १० । भ्रम्यति । भ्रमति । भ्रेमतुः । बभ्रमतुः । क्षर सञ्चलने । ११ । सकर्माकर्मा चायम् । अक्षारीत् । चल कम्पने । १२ । जल घात्ये । १३ । घात्यं जाड्यम् । टल ट्वल वैक्लव्ये । १४ । ष्ठल स्थाने । १५ । अषोपदेशोऽयमित्यन्ये । हल विलेखने । १६ । णल गन्धे । १७ । गन्धोऽर्दनम् । बल प्राणनधान्यावरोधयोः । १८ । बेलतुः बेलुः । पुल महत्त्वे । १९ । कुल बन्धुसंस्त्यानयोः । २० । पल फल शल गतौ । २१ । फेलतुः । फलिशल्योः पुनः पाठो ज्वलादिकार्यार्थः शलेः परस्मैपदार्थश्च । हुल हिंसासंवरणयोश्च । २२ । क्रुशं आह्वानरोदनयोः । २३ । अक्रुक्षत् । क्रोष्टा । कस गतौ । २४ । अकासीत् । अकसीत् । रुहं जन्मनि । २५ । बीजजन्मनीत्यन्ये । अरुक्षत् । रोढा । रमिं क्रीडायाम् । २६ षहि मर्षणे । २७ ॥ स्तुस्वञ्जश्चाटि नवा ॥ २ । ३ । ४९ ॥ परिनिविभ्यःोऽसोढसिवूसहस्सटां स.ष् स्यात् । पर्यषहत । पर्यसहत । स्तुस्वञ्जोर्नित्यं प्राप्ते सिवूसहस्सटां चाप्राप्ते विभाषा । असहिष्ट । सहिषीष्ट । सहिता ॥ सहिवहेरोच्चावर्णस्य ॥ १ । ३ । ४३ ॥ ढस्य ढद्धे परेऽनु लुक् । सोढा । 
इति ज्वलादयः ॥

## ॥ अथ यजादयो नव श्विवदवर्जा अनिटश्च ॥

यजीं देवपूजासङ्गतिकरणदानेषु ।१। यजति । यजते अयाक्षीत् । अयष्ट ॥ यजादिवश्ववचः सस्वरान्तस्था य्वृत् ॥ ४ । १।७२॥ परोक्षायां द्वित्वे पूर्वस्य प्रत्यासत्त्या । इयाज । वच् इति वश्साहचर्याद् वचंग्ब्रूगादेशो गृह्यते न यौजादिकः॥ यजादिवचेः किति ॥४।१।७९ ॥ सस्वरान्तस्था य्वृत् । ईजतुः । ईजुः । इयजिथ । इयष्ठ । ईजे । इज्यात् । यक्षीष्ट । यष्टा ।२। यक्ष्यति । यक्ष्यते । वेंग् तन्तुसन्ताने ।२। वयति । वयते । अवासीत् । अवास्त ॥ वेर्वय् ॥४।४।१९॥ परोक्षायां वा । उवाय । किति य्वृति ॥ न वयो य ॥ ४ । १ ।७३॥ वेमः परोक्षायां य्वृन्न । ऊयतुः । उवयिथ । वयादेशाभावे वेरयः ॥ ४ । १ । १७४ पूर्वस्य परस्य च परोक्षायां य्वृन्न । आत्सन्ध्यक्षरस्येत्यात्वे । ववौ ॥ अविति वा ॥ ४ । १ । ७५ ॥ वेगोऽयन्तस्य परोक्षायां य्वृन्न । ववतुः । पक्षे द्वित्वे कृते वर्णात्प्राकृतं बलीय इति परत्वाद्वोवि समानदीर्घे। ऊवतुः ॥ य्वृत्सकृत ॥ ६ । १ । १०२ ॥ अन्तस्यास्थानम् । इति पश्चाद्वकारस्य न य्वृत् । वविथ । ववाथ । ऊया-त् । वासीष्ट । व्येंग् संवरणे । ३ ॥ व्यस्थव्णवि ॥ ४ । २ । ३ ॥ आत्त्व ॥ ज्याव्येव्यधिव्यचिव्यथेरिः ॥ ४ । १ । ७१ ॥ परोक्षायां द्वित्वे पूर्वस्य । वृद्धौ । विव्याय । य्वृद्बाधनार्थमिकारस्यापीकारः । नामिनोऽसिद्धत्वाद्भ्वादेर्ना-मिन इति न दीर्घः । विव्यतुः । रिद्व्येद इति नित्यमिटि । विव्ययिथ । वीयात् । व्याता । व्ययते । अव्यास्त । विव्ये । ह्वेंग् स्पर्धाशब्दयोः । ४ । आह्वयति । आह्वयते ॥ ह्वालिप्सिचः ॥ ३ । ४ । ६२ ॥ कर्त्तर्यद्यतन्यामङ् । आह्वत । आह्वास्त ॥ द्वित्वे ह्वः ॥ ४ । १ । ८७ ॥ सस्वरान्तस्था य्वृत् । आजुहाव । आजुहुवतुः । आजुहविथ । आजुहोथ । अनेनैव सिद्धे उत्तरसूत्रकरणं णेरन्यस्मिन्द्वित्वनिमित्तप्रत्ययव्यवधायके य्वृन्माभूदित्येवमर्थम् । तेनेह न । जिह्वायकीयिषति । आजुहुवे । आहूयात् । आह्वासीष्ट । आह्वाता । २ । टुवपीं बीजसन्ताने । ५ । बीजानां क्षेत्रे विस्तारणे इत्यर्थः । गर्भाधाने च्छेदने च । वपति । वपते । अवाप्सीत् । अवप्त । उवाप । ऊपे । उप्यात् । वप्सीष्ट ।

वहीं प्रापणे । ६ । अवाक्षीत् । अवोढाम् । अवोढ । अवक्षाताम् । उवाह । ऊहतुः । उवहिथ । उवोढ । ऊहे । उह्यात् । वक्षीष्ट । वोढा । २ । वक्ष्यति । वक्ष्यते ॥ अथ त्रयः परस्मैपदिनः ॥ टुओश्वि गतिवृद्ध्योः । ७ । श्वयति । द्धेश्वेर्न्रेति वा रुः । श्विर्धातुरिति द्वित्वे । संयोगादितीयादेशे । अशिश्वियत् । पक्षे ऋदीच्छ्वीत्यादिनाऽङि श्वादेशे । अश्वत् । पक्षे । अश्वयीत् ॥ वा परोक्षायङि ॥ ४ । १ । ९० ॥ श्वेःसस्वरान्तस्था य्वृत् । शुशाव । शुशुवतुः । शुशविथ । पक्षे । शिश्वाय । शिश्वियतुः । शिश्वयिथ । शूयात् । श्वयिता । वद व्यक्तायां वाचि । ८ । वदति । वदव्रजेति वृद्धौ । अवादीत् । उवाद । ऊदतुः । उद्यात् । वदिता । वसं निवासे । ९ । वसति । अवात्सीत् । अवात्ताम् । सस्तःसीति सूत्रे विषयसप्तमीविज्ञानादत्र सलोपात्प्रागेव तकारः । अवर्णविधाविति तन्निषेधात्कृतेऽपि लोपे स्थानिवद्भावान्न सिद्धिः । उवास । ऊषतुः । उष्यात् । वत्स्यति इति यजादिः ॥

## ॥ अथ घटादिः ॥

घटिष् चेष्टायाम् । १ । घटते । घटादित्वफलन्तु घटयतीत्यादौ ह्रस्वादिकम् । घटादीनामनेकार्थत्वेऽपि पठितार्थेष्वेव घटादिकार्यविज्ञानम् । तेन समुद्घाटयति कमलवनम्, प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवेत्यादि सिद्धम् । विघट्टयतीनि तु ॥ णिज्बहुलं नाम्न इति करोत्यर्थे णिचि रूपम् । क्षजुङ् गतिदानयोः । २ । क्षजते । अक्षजिष्ट । क्षञ्ज्यादेः स्वरस्यानुपान्त्यत्वेऽपि पाठसामर्थ्याद्विभाषा दीर्घो भवत्येव । अक्षजि । अक्षाजि । व्यथिष् भयचलनयोः । ३ । विव्यथे । मथिष् प्रख्याने ॥ ४ ॥ प्रदिष् मर्दने । ५ । स्खदिष् स्खदने । ६ । स्खदनं विद्रावणम् । कदुङ् क्रदुङ् क्लदुङ् वैक्लव्ये । ७ । वैकल्ये इति केचित् । क्रपि कृपायाम् । ८ । ञित्वरिष् सम्भ्रमे । ९ । सम्भ्रमोऽत्राशुकारिता । त्वरते । प्रसिष् विस्तारे । १० । प्रसवे इत्यन्ये । दक्षि हिंसागत्योः । ११ । श्रां पाके । १२ । श्रै पाके

श्रांक् पाके इत्यस्यापि पाठो घटादिकार्यार्थः । श्रपयति । अन्यत्र श्रापयति । स्मृ आध्याने । १३ । स्मरति । स्मरयति । अन्यत्र स्मारयति । दॄ भये । १४ । दरति । दरयति । भयादन्यत्र दारयति । नॄ नये । १५ । क्र्यादिरयम् । नरयति । अन्यत्र नारयति । ष्टक स्तक प्रतीघाते । १६ । स्तकति । आद्यः षोपदेशः । तस्य तिष्टकयिषति । द्वितीयस्य तु तिस्तकयिषति । चक तृप्तौ च । १७ । अयमात्मनेपद्यपि । अक कुटिलायां गतौ । १८ । कखे हसने । १९ । अकखीत् । अग अकवत् । २० । रगे शङ्कायाम् । २१ । लगे सङ्गे । २२ । ह्रगे ह्लगे षगे सगे ष्टगे स्थगे संवरणे । २३ । संवरणमाच्छादनम् । वट भट परिभाषणे । २४ । वेष्टने वाटयति । भृतौ भाटयति । णट नृत्तौ । २५ । नटयति शास्त्राम् । अन्यत्र नाटयति । गड सेचने । २६ । गडति । लत्वे गलति । हेड वेष्टने । २७ । हिडयति । ह्रस्वविधानात्र गुणः । अहिडि । अहीडि । हिडं हिडं हीडं हीडम् । लड जिह्वोन्मथने । २८ । लडयति जिह्वाम् । अन्यत्र लाडयति । लत्वे ललयति । पूर्वं पठितस्य लड विलासे इत्यस्येह पाठो घटादिकार्यार्थः । फण कण रण गतौ । २९ । फेणतुः । गतेरन्यत्र । फाणयति घटम् । निःस्नेहयतीत्यर्थः । काणयति । राणयति । शब्दयतीत्यर्थः । चण हिंसादानयोश्च । ३० । शब्दे तु चाणयति । शण श्रण दाने । ३१ । श्रणयति । चौरादिकस्य तु विश्राणयति । स्नथ क्नथ क्रथ क्लथ हिंसार्थाः । ३२ । क्रथयति । छद ऊर्जने । ३३ । ऊर्जनं प्राणनं बलञ्च । छदण् ऊर्जने इति पठिष्यमाणोऽप्यूर्जने स्वार्थे णिचोऽभावे, घटादिकार्यार्थमिह पठितः । छदयत्यग्निः । अन्यत्र छादयति तृणैर्गृहम् । मदी हर्षग्लपनयोः । ३४ । मदीच् हर्षे इत्ययमनयोरर्थयोर्घटादिकार्यार्थमिह पठितः । मदयति । अन्यत्र मादयति । ष्टन स्तन ध्वन शब्दे । ३५ । स्वन अवतंसने । ३६ । शब्दे तु स्वानयति । चन हिंसायाम् । ३७ । शब्दे तु चानयति । ज्वर रोगे । ३८ । चल कम्पने । ३९ । अन्यत्र चालयति । ह्वल ह्मल चलने । ४० । ज्वल दीप्तौ च । ४१ । पठित एव घटादिकार्यार्थमनूद्यते । ज्वलयति । अन्यत्र ज्वालयति । केचित्तु दलिवलिस्खलिक्षपित्रपीणामपि घटादित्वमिच्छन्ति ॥ इति घटादिः ॥ इति भ्वादयो निर-

नुबन्धा धातवः । भ्वादिराकृतिगणः । तेन चुलुम्पतीत्यादिसङ्ग्रहः ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंह-सूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्न-शाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां हेमप्रभायामुत्तरार्धे भ्वादिगणः ॥

## ॥ अथ अदादयः ॥

अदं प्सांक् भक्षणे । १ । अनद्भ्य इति पर्युदासान्न शव् । अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः । अद्यात् । अत्तु । अत्तात् ॥ हुधुटो हेर्धिः ॥ ४ । २ । ८३ ॥ अद्धि । जुहुतात्त्वमित्यत्र तु नित्यत्वादन्तरङ्गत्वाच्च तातङ् तस्य च हेरिति शब्दाश्रयणान्न पुनर्धिभावः। हुधुड्भ्यां परत्वेन हेर्विशेषणादिह न। रुदिहि॥ अदश्चाट् ॥ ४ । ४ । ९० रुत्पञ्चकाद्दिस्योः शितोरादिः स्यात् । आदत् । आत्ताम् । आदन् । आदः ॥ घस्लृ-सनद्यतनीघञचलि ॥ ४ । ४ । १७॥ अदेः । घस्लृ अदन इत्यनेनैव सिद्धे अदेस्सन्नादिषु रूपान्तरनिवृत्त्यर्थं वचनम्। लृदित्त्वादङि अघसत्॥ परोक्षायां नवा ॥ ४ । ४ । १८॥ अदेर्घस्लृ । जघास । जक्षतुः । जघसिथ । पक्षे । आद । आदतुः । आदिथ । घस्यदिभ्यामेव सिद्धे विकल्पवचनं घसेरसर्वविषयत्वज्ञापनार्थम् । तेन घस्ता घस्मर इत्यादावेव घसेः प्रयोगः । प्साति । प्सायात् । प्सातु । अप्सात् ॥ वा द्विषातोऽनः पुस् ॥ ४ । २ । ९१ ॥ शितोऽवितः । अप्सुः । अप्सान् । अप्सासीत् । पप्सौ । पप्सतुः । भांक् दीप्तौ । २। भाति । अभासीत् । बभौ । बभिथ । बभाथ । यांक् प्रापणे । ३ । गतावित्यर्थः । वांक् गतिगन्धनयोः । ४ । ष्णांक् शौचे । ५ । स्नाति । सस्नौ । श्रांक् पाके । ६ । द्रांक् कुत्सितगतौ । ७ । पांक् रक्षणे । ८ । लांक् आदाने । ९ । रांक् दाने । १० । दांवक् लवने । ११। विश्वं दासंज्ञानिवृत्त्यर्थम् । तेन, अदासीत् । दायात् । ख्यांक् प्रकथने ।१२। प्रकटन इत्यन्ये । आख्याति ॥ शास्त्यसूवक्तिख्यातेरङ्

॥ ३ । ४ । ६० ॥ कर्तर्यद्यतन्याम् । अस्यतेः पुष्यादित्वादङि सिद्धेऽपि वचनमात्मनेपदार्थम् । शास्तेरात्मनेपदे नेच्छन्त्येके । आख्यत् । आख्यताम् । आचख्यौ । प्रांक् पूरणे । १४ । मेयात् । इंक् स्मरणे । १५ । इङिकावधिनैव प्रयुज्येते । अध्येति । अधीतः ॥ इको वा ॥ ४ । ३ । १६ । स्वरादाववििति शिति यः । अधियन्ति । पक्षे इयादेशे । अधीयन्ति । अधीयात् । अध्येतु । अधीहि । अध्ययानि ॥ एत्यस्तेर्वृद्धिः ॥ ४ । ४ । ३० ॥ इणिकोरस्तेश्चादेस्स्वरस्य ह्यस्तन्यां विषये वृद्धिरागमः । अध्यैत्। अध्यैताम् । अध्यायन् । अमाङ्त्येव । मा स्म ते यन् । अनि यत्वे लुपि च स्वरादित्वाभावाद् वृद्धिर्न प्राप्नोतीति वचनम् । विषयविज्ञानात्परत्वाद्वा प्रागेव वृद्धौ कुतो यत्वाल्लुकोः प्राप्तिरिति चेत्। सत्यम् । इदमेव ज्ञापकं कृतेऽन्यस्मिन्धातुप्रत्ययकार्ये पश्चाद्वृद्धिस्तद्बाध्योऽट् च भवति । तेन ऐयरुःअध्यैयतेत्यादावियादेशे वृद्धिः सिद्धा । अचीकरदित्यादौ च दीर्घत्वम्। यत्वाल्लुगपवादश्चायम् । तेनेकः पक्षे यत्वाभावे । अध्यैयन्नित्यत्रेयि स्वरादेस्तास्वित्यनेनैव वृद्धिः । पिबैतिदेति सिज्लुपि ॥ इणिकोर्गाः ॥ ४ । ४ । २३ ॥ अद्यतन्याम् । अध्यगात् । अध्यगाताम् । अध्यगुः । अधीयाय । अधीयतुः । अधीययिथ । अधीयेथ । अधीयात् । अध्येता । इंणक् गतौ । १६ । एति । इतः ॥ ह्रिणोरप्विति व्यौ ॥ ४ । ३ । १५ ॥ नामिनः स्वरादौ शिति यथासङ्ख्यम् । यन्ति । अप्वितीति किम् ? । अजुहवुः । अयानि । इयात् । ऐत् । अगात् । इयाय ॥ इणः ॥ २ । १ । ५१ ॥ स्वरादौ प्रत्यये इय् । यापवादः । वार्णात्प्राकृतं बलीय इति न्यायात्पूर्वमियादेशस्ततो दीर्घः ईयतुः । पूर्वेऽपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानित्यनेन योऽनेकस्वरस्येत्येव बाध्यते न तु गुणवृद्ध्यादयः । तेन अयनम् आयकः इत्यादि सिद्धम् । ईयात् ॥ आशिषीणः ॥ ४ । ३ । १०७॥ उपसर्गात्परस्येतः विङति यादौ ह्रस्वः । उदियात् । इकोऽप्यधियादित्यन्ये । प्रतीयादित्यत्र तु दीर्घे सत्युपसर्गात्परस्येणोऽभावान्न ह्रस्वः। केचिदत्रापीच्छन्ति॥ ई इण इति प्रश्लेषः किम्।समेयात्।समीयादिति तु भौवादिकस्य । वींक् प्रजनकान्त्यसनखादने च । १७ । वेति वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् ।

अवीताम् । अवियन् । अवैषीत् । विवाय । वीयात् । वेता । इह ईंक इति धात्वन्तरमश्लेषः । एति । ईतः । इयन्ति । ईयात् । ऐषीत् । थुंक् अभिगमने ॥ १८ ॥ उत औविति व्यञ्जनेऽद्वेः ॥ ४ । ३ । ५९ ॥ धातोः प्रत्यये । थौति । अद्वेरिति किम् ? जुहोति । योयोति तोःस्थाने तावङ्गो क्विवात्स्थानिवर्त्त्वं बाध्यते । तेन घुतादित्यादौ नौकारः ।केचि-त्तु यङ्लुबन्तस्यापीच्छन्ति । थुतः । थुवन्ति । षुंक् प्रसवैश्वर्ययोः । १९ । प्रसवोऽभ्यनुज्ञानम् । सौति । सौतु । सुतात् । असौत् । असावीत् । असौषीदित्यन्ये । सुषाव । तुंक् वृत्तिहिंसापूरणेषु । २० । सौत्रोऽयमिति केचित् ॥ यङ्तुरु-स्तोर्बहुलम् ॥ ४ । ३ । ६४ ॥ यङ्लुबन्तात् तु रु स्तुभ्यश्च परो व्यञ्जनादौ विति ईत् बहुलं परादिः । क्वचिद्वा । बोभवीति । बोभोति क्वचिन्न । वर्वर्ति । तवीति । तौति । तुतः । तुवन्ति । युंक् मिश्रणे । २१ । यौति । युतः । अ-यावीत् । णुक् स्तुतौ । २२ । नौति । अन्ये तु युग् णुग्भ्यां व्यञ्जनादौ विति शिति ईतमपीच्छन्ति । यवीति । नवीति । केचित्तु । नुवीतः । नुयात् । नुवीयादिति सर्वत्र ईत इत्याहुः । अनावीत् । क्ष्णूक् तेजने । २३ । स्नुक् प्र-स्रवणे । २४ । टु क्षु रु कुंक् शब्दे । २५ । क्षौति । अक्षावीत् । रौति । रवीति । अरावीत् । कौति । अकौषीत् । रुद्-क् अश्रुविमोचने । २६ ॥ रुत्पञ्चकाच्छिदयः ॥ ४ । ४ । ८९ ॥ व्यञ्जनादेरादिरिट् । रोदिति । रुदितः । रुदन्ति । रुद्यात् । रोदितु ॥ दिस्योरीट् ॥ ४ । ४ । ९० ॥ रुत्पञ्चकाच्छितोरादिः । अरोदीत् । पक्षे । अद्श्चाडित्यडागमे । अरोदत् । अरुदिताम् । अरुदन् । अरोदीत् । अरुदत् । रुरोद । रोदिता । ञिष्वपंक् शये ॥ २६ ॥ स्वपिति । स्वप्यात् । अस्वाप्सीत् । भूस्वपोरिन्युत्वे । सुष्वाप ॥ स्वपेर्यङ् ङे च ॥ ४ । १ । ८० ॥ किति सस्वरान्तस्था य्वृत् । सुषुपतुः । यङ्लुपि नेच्छन्त्यन्ये । घञन्तादपि केचिदिच्छन्ति । सुष्वपिथ । सुष्वप्थ ॥ अत्रः स्वपः ॥ २ । ३ । ५७ ॥ निर्दुःसुविपूर्वस्य सः षः । सुषुषुपतुः । अत्र इति किम् । दुः स्वप्नः । अनश्वसक् प्राणने । २८ ॥ द्वित्वेऽप्य-न्तेऽप्यनितेः परेस्तु वा ॥ २ । ३ । ८१॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य नो णः । प्राणिति । हे प्राण । परेस्तु,

पर्यणिति । पर्यनिति । परिपूर्वकस्य द्वित्वेऽन्ते च नित्यं णत्वमिच्छन्त्येके । अन्ये तु अन्तेऽनन्ते च नेच्छन्त्येव । ये तु द्वित्वे कृतेऽपि पुनर्द्वित्वमिच्छन्ति तन्मतेऽपि द्वित्वे इति वचनाद् द्वयोरेवाद्ययोर्णत्वं न तृतीयस्य । अनितीति तिवा निर्देशो दैवादिकस्य निवृत्त्यर्थो न यङ्लुब्निवृत्त्यर्थः । श्वसिति । अश्वासीत् । अश्वसीत् । जक्षक् भक्षहसनयोः । २९ । जक्षिति । जक्षितः ॥"अन्तो नो लुक् ॥ ४ । २ । ९४॥" जक्षति । अजक्षत् । अजक्षीत् । अजक्षिताम् ।। द्व्युक्त-जक्षपञ्चतः ॥ ४ । २ । ९३ ॥ श्वितोऽवितोऽनःपुस् । अजक्षुः । अजक्षीत् । जजक्ष । दरिद्रा दुर्गतौ । ३० । दरिद्राति ॥ इर्दरिद्रः ॥ ४ । २ । ९८ ॥ व्यञ्जनादौ शित्यवित्यातः । दरिद्रितः ॥ श्नश्चातः ॥ ४ । २ । ९६ ॥ द्व्युक्तजक्षपञ्चतः शित्यविति लुक् । दरिद्रति । दरिद्रियात् । अदरिद्रुः ॥ दरिद्रोऽद्यतन्यां वा ॥ ४ । ३ । ७६ ॥ लुक् । अदरिद्रीत् । अदरिद्रिष्टाम् । पक्षे अदरिद्रासीत् । दरिद्राञ्चकार ॥ अशित्यस्सन्णकजणकानटि ॥ ४ । ३ । ॥७७॥प्रत्यये विषयभूते दरिद्रातेरन्तस्य लुक्।ददरिद्रौ । आतो णव औरित्यत्र ओ इत्येव सिद्धे औकारविधानसामर्थ्याद्वाम् विकल्प्यते । विषयसप्तमीविज्ञानात्पूर्वमेवाकारलोपे दरिद्रातीति दरिद्रः,अजेव भवति नत्वाकारान्तलक्षणो णः। अक-इत्येव सिद्धे णकज्णकयोरुपादानं किम् । आशिष्यकनि मा भूत् । दरिद्रकः । केचिद् दरिद्रातेरनिटि वसावालोपं नेच्छन्ति तन्मते इट् आम् चानभिधानान्न भवतः । ददरिद्रावान् । ददरिद्रुः । दरिद्र्यात् । दरिद्रिता । जागृक् निद्रा-क्षये । ३१ । जागर्ति । जागृयात् । जागर्तु । नामिनो गुण इति गुणे ॥ व्यञ्जनाद्देः सश्च दः ॥ ४ । ३ । ७८ ॥ धातोः परस्य लुग् यथासम्भवं धातोः । अजागः । न्यायानां स्थविरयष्टिप्रायत्वात् सन्निपातन्यायोऽत्र न प्रवृत्तस्तेन गुणे कृते देर्लुक् सिद्धः । अजागृताम् ॥ पुस्पौ ॥ ४ । ३ । ३ ॥ नाम्यन्तस्य धातोर्गुणः । अजागरुः ॥ सेः स्द्धां च रुर्वा ॥४।३।७९॥ व्यञ्जनान्ताद्धातोः परस्य लुक् । अजागः । सकारस्य रुत्वे सिद्धे पक्षे रुत्वबाधनार्थं वचनम् । रोरुदित्करणं किम् । उत्वादिकार्यं यथा स्यात् । अरुणोऽत्र । द्विमत्यासत्तेः सिरपि ह्यस्तन्या एव गृह्यते न स्त्रीति वृद्धिनिषेधे ।

अजागरीत् । जागराञ्चकार । पक्षे ॥ जागुर्ञ्णिणवि ॥४।३।५२॥ एष ञ्णिति वृद्धिः । पूर्वेण सिद्धे नियमार्थो योगः । जजागार ॥जागुः किति॥४।३।६॥ गुणः । जजागरतुः । इह कस्मान्न भवति जजागृवानिति। अस्य क्वसुर्नास्तीत्येके । गुण एवेत्यन्ये । क्वसुकानयोर्न गुण इत्यपरे । क्डिति प्रतिषेधे प्राप्ते वचनम् । अक्डिति तु पूर्वेणैव गुणः । जागर्यात् । जागरिता । चकासृक् दीप्तौ । ३२ । चकास्ति । चकाधि । चकाद्धि । चकाधीत्येवेत्यन्ये । शासूक् अनुशिष्टौ । ३३ । नियोग इत्यर्थः । शास्ति ॥इसासःशासोऽङ्व्यञ्जने ॥४।४।११८॥ क्ङिति । शिष्टः । अङ्व्यञ्जन इति किम् ? । शासति । शिष्यात् । शास्तु । शिष्टात् ॥ शासस्हनःशाध्येधिजहि ॥ ४ । २ । ८४ ॥ ह्यन्तस्य यथासङ्ख्यम् । शाधि । शास्हनोर्यङ्लुप्यपि । शाधि । जहि । हनेस्तु यङ्लुपि नेच्छन्त्यन्ये । अशात् । अशिष्टाम् । अशासुः । अशाः अशात् । अशिषत् । शशास । शिष्यात् । शासिता । वचंक् भाषणे । ३४ । वक्ति । वक्तः । वचन्ति । अयमन्तिपरो न प्रयुज्यत इत्यन्ये । वक्तु । वक्तात् । वग्धि । वक्तात् । अवक् । अवोचत् । उवाच । ऊचतुः । उवचिथ । उवक्थ । उच्यात् । वक्ता । मृजौक् शुद्धौ । ३५ । मृजोऽस्य वृद्धिः ॥ ४ । ३ । ४२ ॥ गुणे सति । मार्ष्टि । कथं म्रष्टा म्रष्टुम् ? द्रमिला जानन्ति ये मृजेरपि रत्वमिच्छन्ति । मृष्टः ॥ ऋतः स्वरे वा ॥ ४ । ३ । ४३॥ मृजेः प्रत्यये वृद्धिः । मृज्यात् । मार्ष्टु । मृष्टात् । मार्जन्तु । मृजन्तु । मृड्ढि । मृष्टात् । अमार्ट् । अमार्ड् । अमृजन् । अमार्जन् । अमार्ट् । अमार्ड् । अमार्जीत् । अमार्क्षीत् । ममार्ज । ममार्जतुः । ममृजतुः । ममार्जिथ । मार्जिता । मार्ष्टा । सस्तुक् स्वप्ने । ३६ । सँस्ति । असन् । असंस्तीत् । विदक् ज्ञाने । ३७ । वेत्ति । वित्तः ॥ तिवां णवःपरस्मै ॥ ४ । २ । ११७ ॥ वेत्तेर्वा । वेद । विदतुः । वेत्थ ॥ पञ्चम्याः कृग् ॥ ३ । ३ । ५२ ॥ वेत्तेः परस्याः पञ्चम्याः किदाम्वा स्यात आमन्ताच्च पञ्चम्यन्तः कृगनुप्रयुज्यते । विदाङ्करोतु । वेत्तु । कृग्ग्रहणं भ्वस्तिव्युदासार्थम् । अवेत् । अवेद् । अवित्ताम् । अविदुः । अवेः । अवेत् । अवेद् । अवेदीत् ॥वेत्तेःकित् ॥३।४।५१॥ परोक्षाया आम् वा । कृभ्वस्ति चानु तदन्तम् । विदाञ्चकार

१ । विवेद । वेत्तेरविदिति कृते इन्ध्यसंयोगात्परोक्षाकिद्वदित्यामः स्थानिवद्भावेन कित्वे सिद्धेऽपि कित्वविधानमामःपरोक्षावद्भावनिवृत्तिज्ञापनार्थम् । तेन परोक्षावद्भावेन कित्त्वद्विर्वचनादिकम् । तिव्निर्देश आदादिकपरिग्रहार्थः । वेदिता । हनंक् हिंसागत्योः । ३८ । हन्ति । प्रणिहन्ति ॥ **यमिरमिनमिगमिहनिमनिवनतितनादेर्धुटि क्ङिति** ॥ ४ । २ । १५ ॥ लुक् । हतः । घ्नन्ति ॥ **वमि वा** ॥ २ । ३ । ८३ ॥ अदुरुपसर्गान्तःस्थाद्धादेः परस्य नो णः । प्रहन्मि । प्रहण्मि । हन्यात् ॥ **हनः** ॥ २ । ३ । ८२ ॥ अदुरुपसर्गान्तःस्थाद्धादेर्नो णः । प्रहण्यात् । हन्तु । हतात् जहि । अहन् । अहताम् । अघ्नन् ॥ **अद्यतन्यां वा त्वात्मने** ॥ ४ । ४ । २२ ॥ विषये हनो वधः । इट ईतीति सिज्लोपे । अवधीत् । अल्लुकः स्थानिवद्भावान्न वृद्धिः ॥ **ञ्णिति घन्** ॥ ४ । ३ । १०१ ॥ हन्तेः । घातोऽपवादः जघान ॥ **अङे हिहनो हो घः पूर्वात्** ॥ ४ । १ । ३४ ॥ द्वित्वे सति । जघ्नतुः । जघनिथ । जघन्थ ॥ **हनो वध आशिष्यञौ** ॥ ४ । ४ । २१॥ विषये । वध्यात् । हन्ता । हनिष्यति । वशक् कान्तौ ३९ । वष्टि ॥ **वशेरयङि** ॥ ४ । १ । ८३ ॥ सस्वरान्तःस्थाः क्ङिति य्वृत् । उष्टः । उशन्ति । अवट् । अवड् । औष्टाम् । अवाशीत् । अवशीत् । उवाश । ऊशतुः । असक् भुवि ॥ ४० ॥ **श्नास्त्योर्लुक्** ॥ ४ । २ । ९०॥ अतः शित्यविति । स्तः । सन्ति ॥ **अस्तेः सि हस्त्वेति** ॥ ४ । ३।७३॥ सः प्रत्यये लुक् । असि । परोक्षाया एकारे नेच्छन्त्यन्ये । स्थः । स्थ । स्यात् प्रादुरुपसर्गाद्यस्वरेऽस्तेः २।३।५८॥ नाम्यादेः सः षः प्रत्यये । प्रादुःष्यात् । प्रादुःषन्ति । निष्यात् । एधि । आसीत् । आस्ताम् ॥ **अतिरस्त्रुवोर्भूवचावशिति** ॥ ४ । ४ । १॥ विषये यथासङ्ख्यम् । अभूत् । बभूव । धात्वन्तरेणैव सिद्धेऽस्तिब्रुवोरशिति प्रयोगनिवृत्त्यर्थं वचनम् । ब्रूगादेशस्य फलवत्यात्मनेपदार्थं च । षसक् स्वप्ने ॥४१ । सस्ति । सस्तः । यङ्लुप् च । ४२ । यङ्लुबन्ता अपि धातवोऽदादौ बोध्याः ॥

॥ इति परस्मैपदिनः ॥

## ॥ अथात्मनेपदिनः ॥

ईङ्क् अध्ययने । १ । नित्यमधिपूर्वोऽयम् । अधीते । अधीयाते । अधीयीत । अधीयीयाताम् । अधीताम् । अधीयाताम् । अध्ययै । अध्ययावहै । गुणायादेशयोः करणादनूपसर्गस्य यत्वम् । पूर्वं धातुरुपसर्गेण युज्यते, ततः प्रत्ययकारेणेति, नात्र प्रवर्त्तते, इङ्क् अध्ययन इति निर्देशात् । अध्यैत । अध्यैयाताम् । अध्यैयत । अध्यैयि । अध्यैवहि ॥ वाऽद्यतनीक्रियातिपत्त्योर्गीङ् ॥ ४ । ४ । २८ ॥ इङः । अध्यगीष्ट । अध्यैष्ट ॥ गाः परोक्षायाम् ॥ ४ । ४ । २६ ॥ विषये इङः । अधिजगे विषयविज्ञानादादेशे सत्येव द्विर्वचनम् । तेन प्राक्तु स्वरे स्वरविधेरिति नोपतिष्ठते । अध्येषीष्ट । अध्येता । अध्येष्यते । अध्यगीष्यत । अध्यैष्यत ॥ शीङ्क् स्वप्ने ॥ २ । ॥ शीङ एः शिति ॥ ४ । ३ । १०४ ॥ शेते । शयाते ॥ शीङो रत् ॥ ४ । २ । ११५ ॥ आत्मनेपदस्थस्यान्तः । शेरते । अशयिष्ट । हनुंङ्क् अपनयने । ३ । ह्नुते । षूङौक् प्राणिगर्भविमोचने ४ । सूते । ॥ सूतेः पञ्चम्याम् ॥ ४ । ३ । १३ ॥ गुणो न । सुवै । असविष्ट । असोष्ट । औदित्त्वादिड्विकल्पं बाधित्वा ॥ ॥ उवर्णात् ॥ ४ । ४ । ५८ ॥ एकस्वराद्धातोर्विहितस्य कित आदिरिड् न । इति निषेधे प्राप्ते, परत्वात् । स्कस्तृ इति नित्यमिटि । सुषुविषे । सुषुविढ्वे । सुषुविध्वे । पृचैङ् पृजुङ् पिजुकि सम्पर्चने । ५ । मिश्रण इत्यर्थः । पृक्ते । पृङ्क्ते । पिङ्क्ते । वृजैकि वर्जने ६ । णिजुकि शुद्धौ ७ । निङ्क्ते । निङ्क्षे । शिजुकि अव्यक्ते शब्दे । ८ । ईडिक् स्तुतौ । ९ । ईट्टे ॥ ईशीडः सेध्वेस्वध्वमोः ॥ ४ । ४ । ८७ ॥ आदिरिट् । स्वसाहचर्यात्पञ्चमीध्वम एव ग्रहणम् । वचनभेदाद्यथासङ्ख्यनिवृत्तिः । ईडिषे । ईडिध्वे । ईडिष्व । ईडिध्वम् । ईरिक् गतिकम्पनयोः । १० । ईर्त्ते । ईराञ्चक्रे । ईशिक् ऐश्वर्ये । ११ । ईष्टे । ईशिषे । ईशिध्वे । ईशिष्व । ईशिध्वम् । वसिक् आच्छादने । १२ । वस्ते

वस्ते । वध्वे २ । आङः शासुकि इच्छायाम् । १३ ॥ आङः ॥ ४ । ४ । १२० ॥ शास आसः क्वावेव इस् इति नियमार्थत्वादिह न । आशास्ते । प्रशास्महे इत्यस्यापि दर्शनादाङ्पूर्वकत्वं प्रायिकमित्यन्यत्र । आसिक् उपवेशने । १४। आस्ते । आध्वम् । आवुध्वम् । आसिष्ट । आसाञ्चक्रे । कसुकि गतिशातनयोः । १५ । कंस्ते । अनुदिदपि । कस्ते । तालव्यान्तोऽपि । कष्टे । कक्षे । कड्ढ्वे । णिसुकि चुम्बने । १६ । निंस्ते । चक्षिङ् व्यक्तायां वाचि । १७ । दर्शनेऽप्यन्ये । आचष्टे । आचक्षे । आचड्ढ्वे ॥ चक्षो वाचि क्शांग् ख्यांग् ॥ ४ । ४ । ४ ॥ अशिति । अक्शासीत् । शिटयाद्यस्य द्वितीयो वा । अख्शासीत् । अक्शास्त । अख्शास्त । आख्यत् । आख्यत । विषयसप्तमीविज्ञानात् प्रागादेशे ततो ये, आक्शेयम् । आख्येयम् । वाचीति किम् ? । बोधे, विचक्षणः । सञ्चक्ष्या दुर्जनाः । वर्जनीया इत्यर्थः । गकारः फलवत्कर्तृविवक्षायामात्मनेपदार्थः । तेन स्थानिवद्भावेन नित्यमात्मनेपदत्वम् ॥ नवा परोक्षायाम् ॥ ॥ ४ । ४ । ५ ॥ चक्षो वाचि क्शांग्ख्यांगौ । आचक्शौ । आचख्शौ । आचख्यौ । आचक्शे । आचख्शे । आचख्ये । आचचक्षे । आक्शायात् । आक्शेयात् । आख्शायात् । आख्शेयात् । आख्येयात् । आख्यायात् । आक्शासीष्ट २ ॥ ॥ इत्यात्मनेपदिनः ॥

## ॥ अथोभयपदिनः ॥

ऊर्णुगक् आच्छादने १ । वोर्णोः ॥ ४ । ३ । ६० ॥ अद्व्युक्तस्य व्यञ्जनादौ वित्यौः । ऊर्णौति । ऊर्णोति । अद्वेरित्येव । प्रोर्णोनोति । नित्यं प्राप्ते विकल्पः । यङ्लुबन्तस्यापीच्छन्त्यन्ये । वितीत्येव । ऊर्णुतः। ऊर्णुयात् ऊर्णौतु । ऊर्णोतु ॥ न दिस्योः ॥ ४ । ३ । ६१ ॥ ऊर्णोतिरौः । पृथग्योगात्पूर्वेणापि प्राप्तः प्रतिषिध्यते । और्णोत् । और्णोः । दिसाहचर्यात् ह्यस्तन्या एव सिर्गृह्यते ॥ वोर्णुगः सेटि ॥ ४ । ३ । ४६॥ सिचि परस्मैपदविषये परे वृद्धिः

॥ वोर्णोः ॥ ४ । ३ । १९ ॥ इड् ङिद्वत् । और्णावीत् । और्णवीत् । और्णुवीत् ॥ स्वरादेर्द्वितीयः ॥ ४ । १ । १४ ॥ द्व्युक्तिभाज एकस्वरो द्विर्नत्वाद्यः । प्राक् तु स्वरे स्वरविधेरित्येव । आटिटत् । आरिरिषतीत्यत्र त्विटः कार्यित्वं न निमित्तत्वम् ॥ अयि रः ॥ ४ । १ । ६ ॥ स्वरादेर्धातोर्द्वितीयैकस्वरांशस्य संयोगादिर्द्विर्न स्यात् । णत्वस्यासिद्धत्वान्नुशब्दस्य द्वित्वम् । ऊर्णुनाव । अयीति किम् ? । अरार्यते । ऊर्णुनुवतुः । ऊर्णुनुविथ । ऊर्णुनविथ । ऊर्णुयात् । ऊर्णुविता । ऊर्णविता । ऊर्णुते । और्णुविष्ट । और्णविष्ट । ष्टुंगृक् स्तुतौ २ । स्तौति ॥ उपसर्गात् सुग्सुवसोस्तुस्तुभोऽट्यप्यद्वित्वे ॥ २ । ३ । ३९ ॥ नाम्यादेः सः ष् स्यात् । अभिष्टौति । गिन्निर्देशात्सौतिसवत्योर्न भवति । शनिर्देशात्सुतिसूयत्योर्न । उपसर्गादिति किम् ? । दधि सुनोति । येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञेति धात्वन्तरयोगे न । अभिसावयति । निस्सावको देशः । अभिसावकीयति । अपिशब्दोऽभावार्थोऽन्यथाऽट्येव स्यात् । अद्वित्वे इति किम् ? । अभिसुसूषतीत्यादि । अत्र पूर्वसकारस्य षत्वं न । मूलधातोस्तु यथाप्राप्तं षत्वं भवत्येव । केचित्तूपसर्गपूर्वाणां सुनोत्यादीनां पञ्चानामपि सन्नन्तस्तौतिवर्जितानां द्वित्वे सति मूलप्रकृतेरपि षत्वं नेच्छन्ति । अट्यप्राप्ते पदादौ च प्रतिषेधे प्राप्ते वचनम् । स्तवीति । स्तुते । स्तुवाते । अस्तौत् । अस्तवीत् । पर्यष्टौत् । पर्यस्तौत् । न्यष्टौत् । न्यस्तौत् । व्यष्टौत् । व्यस्तौत् । अस्तुत । धूग्सुस्तोरितीटि ॥ अस्तावीत् । अस्तोष्ट । तुष्टाव । तुष्टोथ । तुष्टुवे । ब्रूंगक् व्यक्तायां वाचि ३ ॥ ब्रूगः पञ्चानां पञ्चाहश्च ॥ ४ । २ । ११८ ॥ ब्रूगः परेषां तिवादीनां पञ्चानां यथासङ्ख्यं पञ्च णवादयो वा स्युः, तद्योगे ब्रूग आहश्च । आह । आहतुः । आहुः । नहाहोर्धतावितिहस्य ते । आत्थ । आहथुः । पक्षे ॥ ब्रूतः परादिः ॥ ४ । ३ । ६३ ॥ ब्रुव ऊतः परो व्यञ्जनादौ विति परादिरीत् स्यात् । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । अस्तिब्रुवोरिति वचि, अवोचत् । अवोचत । उवाच । ऊचे । द्विषींक् अप्रीतौ ४ । द्वेष्टि । द्विष्टे । अद्वेट् । अद्वेड् । अद्विषुः । अद्विषन् । अद्विक्षत् । अद्विक्षत । दुहींक् क्षरणे ५ । दोग्धि । दुग्धे । धो-

क्षि । धुक्षे । अधोक् । अधोग् । अदुग्ध । अधुक्षत् । दुहदिहलिहगुह इति सको लुकि अदुग्ध । पक्षे । अधुक्षत । दुदोह । दुदुहे । दोग्धा । दिहींक् लेपे ६ । देग्धि । दिग्धे । लिहींक् आस्वादने ७ । लेढि । लीढे । लीढः । लीढि । अलेट् । अलेड् । अलीढ । अलिक्षत् । अलीढ । अलिक्षत । ॥ इत्युभयपदिनः ॥

---

## ॥ अथादाद्यन्तर्गणो ह्वादिः ॥

हुंक् दानादानयोः । १ । दानं चेह प्रक्षेपः । स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते ॥ हवः शिति ॥ ४ । १ । १२ ॥ द्विः स्युः । जुहोति । जुहुतः । अन्तो नो लुक् । ह्विणोरप्विति व्यौ । जुह्वति हुधुटोर्हेर्धिः । जुहुधि । प्राक्तु स्वरे स्वरविधेरित्येव । जुहवानि । अजुहोत् । दुव्युक्तेति पुसि, गुणे, अजुहवुः । अहौषीत् ॥ भीह्री-भृहोस्तिवत् ॥ ३ । ४ ।५०॥ परोक्षाया आम् वा, आमन्ताच्च परे कृभ्वस्तयः परोक्षान्ता अनुप्रयुज्यन्ते । जुहवाञ्च-कार । जुहाव । जुहविथ । जुहोथ । जुहुवे । ओहांक् त्यागे । २ । जहाति ॥ हाकः ॥ ४ । २ । १० ॥ व्यञ्जनादौ शित्यविति आत ईर्वा । जहितः । जहीतः ॥ एषामीर्व्यञ्जनेऽदः ॥ ४ । २ । ९७ ॥ दुव्युक्तजक्षपञ्चतः श्नश्चातः शित्यविति व्यञ्जनादावीः स्यान्न तु दासंज्ञस्य ॥ जहीतः । श्नश्चात इत्याल्लुकि, जहति ॥ यि लुक् ॥ ४ । २ ।१०२॥ शिति हाक आः । जह्यात् ॥ आ च हौ ॥ ४ । २ । १०१ ॥ हाक इः । जहाहि । जहिहि । जहीहि । जहितात् । जहीतात् । अजहात् । अहासीत् । जहौ । हेयात् । ञिभींक् भये । ३ । बिभेति ॥ भियो नवा ॥ ४ । २ । ९९ ॥ व्यञ्जनादौ शित्यविति इः । बिभितः । बिभीतः । बिभ्यति । बिभियात् । बिभीयात् । अभैषीत् । भीह्रीत्यामि । बिभयाञ्चकार । बिभाय । ह्रींक् लज्जायाम् ४ । जिह्रेति । जिह्रीतः । जिह्रियति । अह्रैषीत् । जिह्रयाञ्चकार । जिह्राय । पृंक् पालनपूरणयोः ५ ॥ पृभृमाहाङामिः ॥ ४ । १ । ५८ ॥ शिति द्विस्वे पूर्वस्य । पिपर्त्ति । पिपृतः । पिप्रति ।

केचित्तु दीर्घान्तमिमं पठन्ति । तन्मतसङ्ग्रहार्थन्तु पॄश्च ऋश्चेति विग्रहः । अत एव च बहुवचनम्। अत्र पक्षे ॥ ओष्ठ्यादुर ॥ ४ । ४ । ११७ ॥ धातोः परस्य ऋतः क्ङिति । र्भ्वादेर्नामिन इति दीर्घे, पिपूर्त्तः । पिपुरति । धातोरिति विशेषणादिह न । समीर्णम् । केचित्तु उपान्त्यस्यापि ऋत उरमिच्छन्ति । पृणमृणोर्यङ्लुप् तस् अहन्पञ्चमेत्यादिना दीर्घत्वम् । परिपूर्णः । मरिमूर्णः । अविशेषनिर्देशात्तदपि संगृहीतम् । पिपृयात् । पिपर्त्तु । पिपृतात् । अपार्षीत् । मतान्तरे पिपूर्यात् । पिपर्त्तु । पिपूर्त्तात् । अपारीत् ॥ ऋः शावृग्रः ॥ ४ । ४ । २० ॥ परोक्षायां वा । पप्रतुः । पक्षे स्कृच्छ्रृत इति गुणे, पपरतुः । प्रियात् । पक्षे पूर्यात् । पर्त्ता । पक्षे परीता २। परिष्यति । पक्षे परिष्यति । परीष्यति । ऋंक् गतौ ६। द्वित्वे पूर्वस्येत्वे द्वितीयस्य गुणे पूर्वस्येयादेशे । इयर्त्ति । इयृतः। इयृति । इयृयात् । इयर्त्तु । इयृतात्। इयृहि इयराणि । ऐयः । ऐयताम् । ऐयरुः । सर्त्यर्त्तेति वाऽङ् । आरत्। आर्षीत् । आर । आरतुः । ऋवृव्येऽद इतीट् । आरिथ । अर्यात् । अर्त्ता । अरिष्यति ॥ ॥ इतिपरस्मैपदिनः ॥

ओहांक् गतौ १ । जिहीते । श्नश्चेत्यालुकि । जिहाते । जिहते । जिहीत । जिहीताम् । अजिहीत । अहास्त । जहे । हासीष्ट । मांक् मानशब्दयोः २ । मिमीते ॥ इत्यात्मनेपदिनौ ॥

डुदांग्क् दाने १ । ददाति । प्रणिददाति । दत्तः । ददति । दत्ते ॥ हौ दः ॥ ४ । १ । ३१ ॥ दासंज्ञकस्य हौ ए ने च द्विः । देहि । न च द्विरिति वचनात् कृतमपि द्वित्वं निवर्त्तते, तेन यङ्लुप्यपि देहि । हाविति व्यक्तिनिर्देशादिह न । दत्तात् । अददात् । अदत्ताम् । अददुः । अदत्त । अदात् । अदित । ददौ । देयात् । दासीष्ट । डुधांग्क् धारणे च । २ । प्रणिदधाति ॥ धागस्तथोश्च ॥ २ । १ । ७८ ॥ चतुर्थान्तस्य दादेरादेर्दस्य स्ध्वोः प्रत्ययोश्चतुर्थः । धत्तः । अत्रासद्विधित्वाद्वचनसामर्थ्याद्वाऽऽतो लोपस्य न स्थानिवद्भावः । गकारः किम्? दधेर्यङ्लुपि दात्तः । दात्थः। दधातेरपि यङ्लुबन्तस्य भूमात् । केचित्तु यङ्लुबन्तस्यापीच्छन्ति । चतुर्थान्तस्येत्येव । दधाति । दधति । धेहि ।

अदधात् । अधत्ताम् । धत्ते । अधात् । अधित ॥ डुडुभृंग्क् पोषणे च । ३ । बिभर्त्ति । बिभृते । अबिभः । अबिभृताम् । अबिभरुः । अबिभृत । अभार्षीत् । अभृत । बिभराञ्चकार । बभार । बभर्थ । बभृव । बिभराञ्चक्रे । बभ्रे । भ्रियात् । भृषीष्ट । णिजृंकी शौचे च ४ ॥ निजां शित्येत् ॥ ४ । १ । ५७॥ निजिविजिविषां शिति द्विषे पूर्वस्यैत् । नेनेक्ति । नेनिक्ते ॥ लघ्व्युक्तोपान्त्यस्य शिति स्वरे ॥ ४ । ३ । १४ नामिनो गुणो न । नेनिजानि । नेनिजे । अनेनेक् । अनेनेग् । अनेनिक्त । अनिजत् । अनैक्षीत् । अनिक्त । अनिक्षाताम् । विजृंकी पृथग्भावे । ५ । वेवेक्ति । वेविक्ते । विष्लृंकी व्याप्तौ ६ । वेवेष्टि । वेविष्टे । अवेवेट् । अवेवेड् । अवेविष्ट । अविषत् । हशिट इति सक् अविक्षत ॥

॥ इत्युभयपदिनः ॥ भृत् ह्वादयः समाप्ताः ॥

अन्यत्रेमे धातवोऽपि सन्ति । घृंक् क्षरणदीप्त्योः ॥ हृंक् प्रसह्यकरणे ॥ सृंक् गतौ । ससर्त्ति । भसंक् भर्त्सन-दीप्त्योः ॥ बभस्ति । किंक् कितक् ज्ञाने ॥ चिकेति । चिकेत्ति । तुरक् त्वरणे ॥ तुतोर्त्ति । धिषक् शब्दे । दिधेष्टि । धनक् धान्ये । दधन्ति । जनक् जनने ॥ जजन्ति । गांक् स्तुतौ ॥ जिगाति ॥

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनाम-वृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीय-तपोगच्छाचार्यभट्टारकश्री-विजयनेमिसूरिविरचितायां हैमप्रभायामुत्तरार्द्धे अदादयः ॥

---

## ॥ अथ दिवादयः ॥

दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु १ ॥ दिवादेः श्यः ॥ ३ । ४ । ७२ ॥ कर्त्तरि विहिते शिति । भ्वादेरिति दीर्घे । दीव्यति । दीव्येत् । अदेवीत् । जॄष् झॄष् च जरसि २ । ऋतां क्ङितीर् । जीर्यति । अजरत् ।

अजारीत् । जजार । स्कृच्छ्रृत इति गुणे । जॄभ्रमेति एत्वे, जेरतुः । जजरतुः । जीर्यति । जरिता । जरीता । शोंच् तक्षणे ३ ॥ ओतः श्ये ॥ ४ । २ । १०३ ॥ धातोर्लुक् । श्यति । श्येत् । अशात् । अशासीत् । शाता । दों छोंच् छेदने । ४ । षोंच् अन्तकर्मणि ५ । स्यति । व्रीडच् लज्जायाम् ६ । नृतैच् नर्तने । ७ । नृत्यति ॥ कृतचृतनृतच्छृदतृदोऽसिचः सादेर्वा ॥ ४ । ४ । ५० ॥ स्ताद्यशित आदिरिट् । नर्तिष्यति । नर्त्स्यति । कुथच् पूतीभावे ८ । पुथच् हिंसायाम् ९ । गुधच् परिवेष्टने ।१० । राधच् वृद्धौ । ११ । व्यधंच् ताडने । १२ ॥ ज्याव्यधः क्ङिति ॥४ । १ । ८१॥ सस्वरान्तस्थ य्वृत् । विध्यति । अव्यात्सीत् । विव्याध । विविधतुः । क्षिपंच् प्रेरणे १३ । पुष्यच् विकसने । १४ । तिम तीम ष्टिम ष्टीमच् आर्द्रभावे । १५ । षिवूच् उतौ १६। परिषीव्यति । पर्यषीव्यत् २। परिषिषेव । स्रिवूच् ( श्रिवूच् ) गतिशोषणयोः १७ । ष्ठिवू क्षिवूच् निरसने १८ । तिष्ठेव । टिष्ठेव । इषच् गतौ । १९ । इयेष । एषिता । इच्छेति निर्देशान्नेह सहलुभेच्छेतीड्विकल्पः । ऊदिदयमित्यन्ये, तन्मते इष्ट्वा एषित्वा । इष्टः इष्टवान् । ष्णसूच् निरसने २० । निमित्ताभावे नैमित्तिकस्याप्यभाव इति । स्नस्यति । घटादिरयमित्यन्ये । ष्णसु अदने इति द्रुमिलाः । क्नसूच् ह्वृतिदीप्त्योः २१ । अक्नासीत् । अक्नसीत् । त्रसैच् भये २२ । भ्रासभ्लासेति वा श्ये, त्रस्यति । त्रसति । तत्रास जॄभ्रमेति वैत्वे, त्रेसतुः । तत्रसतुः । व्युसच् दाहे २३ । षान्तोऽयमित्यन्ये अव्योसीत् । षह षुहच् शक्तौ । ससाह । सेहतुः । पुषंच् पुष्टौ । २५ । लृदित्यङि । अपुषत् । उचच् समवाये २६ । औचत् । लुटच् विलोटने । २७ । ष्विदांच् गात्रप्रक्षरणे । २८ । अस्विदत् । क्लिदौच् आर्द्रभावे २९ । ञिमिदाच् स्नेहने । ३० ॥ मिदः श्ये ॥ ४ । ३ । ५ । उपान्त्यस्य गुणः । मेद्यति । अमिदत् । ञिक्ष्विदाच् मोचने च । ३१ । क्षुधं च बुभुक्षायाम् । ३२ । शुधंच् शौचे । ३३ । क्रुधंच् कोपे ३४ । षिधूंच् संराद्धौ । ३५ । संराद्धिर्निष्पत्तिः । असिधत् । ऋधूच् वृद्धौ ३६ । आर्धत् । आनर्ध । गृधूच् अभिकाङ्क्षायाम् । ३७ । अगृधत् । रधौच् हिंसासंराद्ध्योः । ३८ । संराद्धिः पाकः । अरधत् ॥

॥ रध इटि तु परोक्षायामेव ॥ ४ । ४ । १०१ ॥ स्वरात्परः स्वरादौ प्रत्यये नोऽन्तः । एवकारो विपरीतनियमनिरासार्थः । तेनेह नियमो न । ररन्ध । ररन्धतुः । ररन्धिथ । ररन्धिव । रधिता । रद्धा । षिधूचोऽनन्तरं रधौच् हिंसायां चेत्यकरणं संराद्धिभेदं गमयति । तृपौच् प्रीतौ ३९ । तृप्यति । अत्राप्सीत् । अताप्सीत् । अतर्पीत् । अतृपत् । अन्तर्भूतणिगर्थोऽत्र तृपिः सकर्मकः । दृपौच् हर्षमोहनयोः ४० । कुपच् क्रोधे ४१ । गुपच् व्याकुलत्वे ४२ । युप रुप लुपच् विमोहने ४३ । डिपच् क्षेपे । ४४ । ष्टुपच् समुच्छ्राये ४५ । लुभच् गार्ध्ये ४६ । लोभिता । लोब्धा । क्षुभच् सञ्चलने । ४७ । णभ तुभच् हिंसायाम् । ४८ । णशौच् अदर्शने ४९ । नश्यति नशः शः ॥ २ । ३ । ३८ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य नो णः । प्रणश्यति । श इति किम् ? । प्रनष्टः । नशेरणोपदेशत्वात् पूर्वेणासिद्धे विध्यर्थमिदम् ॥ नशेर्नेश् वाऽङि ॥ ४ । २ । १०२ ॥ अनेशत् । अनशत् ॥ नशो धुटि ॥ ४ । ४ । १०८ ॥ स्वरात्परः प्रत्यये नोऽन्तः । नंष्टा । नशिता । नङ्क्ष्यति । नशिष्यति । कुशच् श्लेषणे । ५० । भृशू भ्रंशूच् अधः पतने । ५१ । भृश्यति । भ्रश्यति । वृशच् वरणे ५२ । कृशच् तनुत्वे । ५३ । शुषंच् शोषणे । ५४ । दुषंच् वैकृत्ये । ५५ । श्लिषंच् आलिङ्गने ५६ ॥ श्लिषः ॥ ३ । ४ । ५६ ॥ अनिटोऽद्यतन्यां सक् । अश्लिक्षत् । पुष्यादित्वादङि प्राप्ते वचनम् । पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान् इत्यङ एवबाधा न ञिचः । आश्लेषि कन्या देवदत्तेन । अनिट इत्येव । श्लिषू दाहे इत्यस्य अश्लेषीत् । अधाक्षीदित्यर्थः ॥ नासत्त्वाश्लेषे ॥ ३ । ४ । ५७ ॥ वर्त्तमानात् श्लिषः सक् । समश्लिषद् गुरुकुलम् । उपाश्लिषज्जतु च काष्ठं च । पृथग्योगात् पूर्वेणापि प्राप्तः प्रतिषिध्यते । व्यत्यश्लिक्षत काष्ठानि । असत्त्वाश्लेषे इति किम् ? । व्यत्यश्लिक्षन्त मिथुनानि । प्लुषूच् दाहे । ५७ । अनुदिदयमित्येके । ञितृषच् पिपासायाम् । ५८ । तुषं हृषच् तुष्टौ ५९ । रुषंच् रोषे ६० । व्युष प्युस पुसच् विभागे ६१ । विसच् प्रेरणे । ६२ । कुसच् श्लेषे । ६३ । असूच् क्षेपणे । ६४ । अस्यति आस्थत् । यसूच् प्रयत्ने । ६५ । यस्यति । यसति । संयस्यति । संयसति ।

मोक्षणे । ६६ । हिंसार्थोऽप्ययमित्येके । तसू दसूच् उपक्षये । ६७ । वसूच् स्तम्भे । ६८ । वुसच् उत्सर्गे । ६९ । मुसच् खण्डने । ७० । मसैच् परिणामे । ७१ । शमू दमूच् उपशमे । ७२ ॥ शमसप्तकस्य श्ये ॥ ४ । २ । १११ ॥ दीर्घः । शाम्यति । प्रणिशाम्यति । अशमत् । तमूच् काङ्क्षायाम् । ७३ । श्रमूच् खेदतपसोः । ७४ । भ्रमूच् अनवस्थाने । ७५ । भ्राम्यति । भ्रमति । अभ्रमत् । भ्रेमतुः । बभ्रमतुः । क्षमौच् सहने । ७६ । क्षाम्यति । क्षमिता । क्षन्ता । मदैच् हर्षे । ७७ । क्लमूच् ग्लानौ ७८ । भ्रासभ्लासेति वा श्ये ष्ठिवु क्लम्विति दीर्घे । क्लाम्यति । क्लामति । अक्लमत् । मुहौच् वैचित्त्ये ७९ । मुह्यति । मोहिता । मोग्धा । मोढा । द्रुहौच् जिघांसायाम् ८० । द्रुह्यति । द्रोहिता । द्रोग्धा । द्रोढा । ष्णुहौच् उद्गिरणे ८१ । ष्णिहौच् प्रीतौ ८२ । वृत् पुषादिः ॥ इति परस्मैपदिनः ॥

षूङौच् प्राणिप्रसवे १ । सूयते । असविष्ट । असोष्ट । सुषुविषे । सुषुविढ्वे । सविता । सोता । दूङ्च् परितापे । २ । दीङ्च् क्षये । ३ । दीयते ॥ यबक्ङिति ॥ ४ । २ । ७ ॥ दीङ आत् । अदास्त । विषयसप्तमीनिर्देशात्पूर्वमेवात्वे सतीषदुपादान उपादायो वर्त्तत इत्यत्राकारान्तलक्षणोऽनो घञ् च भवति । यबक्ङितीति किम् ? । दीनः । सानुबन्धनिर्देशाद्यङ्लुपि न । उपदेदेति ॥ दीय् दीङः क्ङिति स्वरे ॥ ४ । ३ । ८३ ॥ अशिति । दिदीये । दिदीयिढ्वे । दिदीयिध्वे । दाता । धीङ्च् अनादरे ४ । धीयते । अधेष्ट । दिध्ये । मीङ्च् हिंसायाम् ५ । रीङ्च् स्रवणे ६ । लीङ्च् श्लेषणे ७ । लिङ्लिनोर्वा ॥ ४ । २ । ८ ॥ यपि खलघलवर्जितेऽक्ङिति च आत् । अलास्त । अलेष्ट । अखलचलीत्येव । विलयः । ईषद्विलयः। विलयोऽस्ति । ङित्लुप्ततिवोनिर्देशात् लीङ् द्रवीकरण इति यौजादिकस्य न । विलयति । लिल्ये । लेता । लाता । डीङ्च् गतौ ८ । विहायसागमावित्यन्ये । व्रीङ्च् वरणे ९ । अव्रेष्ट । वृत् स्वादिः । तत्फलं तु क्तयोस्तस्य नत्वम् । पीङ्च् पाने । १० । ईङ्च् गतौ । ११ । ईयते । अयाञ्चक्रे । प्रीङ्च् प्रीतौ १२ । युजिच् समाधौ १३ । अयुक्त । सृजिच् विसर्गे १४ । असृष्ट । असृक्षाताम् । सृक्षीष्ट । स्रष्टा । वृतूचि

वरणे । १५ । अवर्त्तिष्ट । वावृतु इत्यन्ये । पदिंच् गतौ १६ । प्रणिपद्यते ॥ चिण् ते पदस्तल्लुक् च ॥ ३ । ४ । ६६॥ कर्त्तर्येवतन्याः । अपादि । अपत्साताम् । पेदे । पत्सीष्ट । विदिंच् सत्तायाम् । १७ । अवित्त । खिदिंच् दैन्ये १८ । युधिंच् सम्प्रहारे १८ । सिजाशिषोरत्र कित्वात् । अयुद्ध । युत्सीष्ट । अनो रुधिंच् कामे २० । बुधिं मनिंच् ज्ञाने २१ । अबुद्ध । अबोधि । अभुत्साताम् । अमंस्त । मेने । अनिच् प्राणने । २२ । आनिष्ट । आने । णान्तोऽप्ययमित्येके । जनैचि प्रादुर्भावे । २३ ॥ जा ज्ञाजनोऽत्यादौ ॥ ४ । २ । १०४ ॥ शित्यनन्तरे । जायते । अत्यादाविति किम ? । यङ्लुपि जंजन्ति । दीपजनेति ञिचि ॥ न जनवधः ॥ ४ । ३ । ५४ ॥ ञौ कृति ञ्णिति च वृद्धिः । अजनि । अजनिष्ट । बधिरत्र बध बन्धन इत्ययं गृह्यते । यस्य बीभत्सत इति वैरूप्य एव सन्निष्यतेऽन्यत्र बधते इत्येव । भक्षकश्रे-ष्ठास्ति यवकोऽपि न विद्यते । अन्ये त्वगणपठितं बधिं हिंसार्थं मन्यन्ते, प्रत्युदाहरन्ति च बबाध । जज्ञे । जनिता । दीपैचि दीप्तौ । २४ । अदीपि । अदीपिष्ट । तपिंच् ऐश्वर्ये वा २५ । तपं धूप सन्ताप इत्यस्यैवैश्वर्ये दिवादित्वमात्मनेप दत्वं च वा विधियते । तप्यते । अतप्त । पक्षे ऐश्वर्येऽपि भ्वादित्वं परस्मैपदित्वं च ॥ पूरैचि आप्यायने २६ । अपू-रि । अपूरिष्ट । घूरै जूरैचि जरायाम् २७ । धूरैङ्गूरैचि गतौ २८ । शूरैचि स्तम्भे । २९ । तूरैचि त्वरायाम् ३० । घूरादयो हिंसायां च ३१ । रैचि दाहे ३२ । क्लिशिच् उपतापे ३३ । अक्लेशिष्ट । लिशिंच् अल्पत्वे ३४ । काशिच् दीप्तौ ३५ । वाशिच् शब्दे । ३६ । ॥ इत्यात्मनेपदिनः ॥

शकींच् मर्षणे १ । अशाक्षीत् । अशक्त । शशाक । शेके । शुचैंच् पूतीभावे २ । अशोचीत् । अशुचत् । अशो-चिष्ट । रञ्जींच् रागे ३ । शपींच् आक्रोशे ४ । मृषींच् तितिक्षायाम् ५ । अमर्षीत् । अमर्षिष्ट । णहींच् बन्धने ६ । प्र-णह्यति प्रणह्यते । अनात्सीत् । अनद्ध । ननाह । नेहे । ॥ इत्युभयपदिनः ॥

दिवादिर्भ्वादिवदाकृतिगणः, तेन क्षीयते मृग्यति इत्यादि ।

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनाम-वृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीय-तपोगच्छाचार्यभट्टारकश्री-विजयनेमिसूरिविरचितायां बृहद्धेमप्रभायामुत्तरार्द्धे दिवादयः ॥

## ॥ अथ स्वादयः ॥

षुंग्ट् अभिषवे १। अभिषवः क्लेदनं सन्धानाख्यं पीडनं मन्थनम् । स्नानमिति चान्द्राः । स्नानेऽकर्मकः॥ स्वादेः श्नुः ॥ ३ । ४ । ७५ ॥ कर्तृविहिते शिति । 'उश्नोः' इति गुणे । सुनोति । सुनुते ॥ वम्यविति वा ॥ ४ । २ । ८७ ॥ असंयोगात्परो य उस्तस्य प्रत्ययसम्बन्धिनो लुक् । सुन्वः । सुनुवः । सुन्मः । सुनुमः । अवितीति किम् ? । सुनोमि । असंयोगादोरिति हेर्लुकि । सुनु । सुनुतात् । धूग्सुस्तोरितीट् । असावीत् । अभिषुणोति । अभ्यषुणोत् । अभिषुषाव ॥ सुगः स्यसनि ॥ २ । ३ । ६२ ॥ सः ष् न । अभिसोष्यति । षिंग्ट् बन्धने । २ । शिंग्ट् निशाने । ३ । निशानं तीक्ष्णीकरणम् । डुमिंग्ट् प्रक्षेपणे ४ ॥ मिग्मीनोऽखलचलि ॥ ४ । २ । ८ ॥ यप्यक्ङिति च प्रत्यये विषये आत् । अमासीत् । अमास्त । विषयविज्ञानात्प्रागात्वे पश्चाद् द्वित्वे । ममौ । मिम्ये । दैवादिकस्य मीङ्च आत्वमिच्छन्त्यन्ये । ममिथ । ममाथ । मिम्ये । चिंग्ट् चयने । अचैषीत् । अचेष्ट ॥ चेः किर्वा ॥ ४ । १ । ३६ ॥ सन् परोक्षयोर्द्वित्वे सति पूर्वात्परस्य । चिकाय । चिचाय । चिक्ये । चिच्ये । धूग्ट् कम्पने । ६ । धूनोति । धूनुते । अधावीत् । अधविष्ट । अधोष्ट । उदन्तोऽनिट् चायमित्येके । स्तृंग्ट् आच्छादने ७ । अस्तार्षीत् ॥ संयोगादृतः ॥ ॥ ४ । ४ । ३७ ॥ धातोः परयोरात्मनेपदविषयसिजाशिषोरादिरिड्वा । अस्तरिष्ट । अस्तृत । स्कृच्छ्रृतोऽकीत्यत्र स्कृगो ग्रहणात्ससट् संयोगो न गृह्यते । तेनेह न । समस्कृत । धातोरिति विशेषणादिह न । मा निष्कृत । तस्तार । तस्तरे

स्तर्यात् । स्तरिषीष्ट । स्तृषीष्ट । कृंगृट् हिंसायाम । ८। कृणोति । कृणुते । अकार्षीत् । अकृत । वृगृट् वरणे ९। अवारीत् ॥ **इट् सिजाशिषोरात्मने** ॥ ४ । ४ । ३६ ॥ वृत आदिर्वा । अवरिष्ट । अवरीष्ट । अवृत । ऋवृव्येऽद इट् । ववरिथ । वरिषीष्ट । वृषीष्ट । वरिता । वरीता ॥ इत्युभयपदिनः ॥

हिंट् गतिवृद्ध्योः । १ । हिनोति । प्रहिणोति । अहैषीत् । जिघाय । श्रुंट् श्रवणे २ । गतावित्यन्ये । श्रौतीत्यादिना शृः । शृणोति । अश्रौषीत् । शुश्राव । शुश्रुवतुः । शुश्रोथ । दुदुंट् उपतापे । ३ । पुंट् प्रीतौ । ४ । स्मृंट् पालने च ५ । स्पृंट् इत्येके । स्पृणोति । शक्लृंट् शक्तौ । ६ । भ्रूश्नोरित्युव् । शक्नुवन्ति । शक्नुहि । अशकत् । तिक् तिग् षघट् हिंसायाम । ७। आघ्राघास्कन्दनेऽपीत्येके । सेघतुः । राधं साधंट् संसिद्धौ ८ । राध्नोति । अरात्सीत् **अवित्परोक्षासेट्थवोरेः**॥४।१।२३॥ हिंसार्थस्य राधेः स्वरस्य न च द्विः। अपरेधतुः । रेधतुः। रेधिथ । वध इत्येव । आरराधतुः। राद्धा । असात्सीत्। अषोपदेशोयम षोपदेशोऽयमित्यन्ये । ऋधूट् वृद्धौ९।आर्ध्नोत्।अर्धिता । आप्लृंट् व्याप्तौ १०। आपत् । तृपट् प्रीणने ११ । क्षुभ्नादित्वान्न णः । तृप्नोति । अतर्पीत् । दम्भूट् दम्भे १२। दभ्नोति ॥ **दम्भः**॥ ॥ ४ । १ । २९ ॥ अवित्परोक्षायां स्वरस्यैकारो न च द्विः तद्योगे च नलुक् । देभतुः । देभुः ॥ **थे वा** ॥ ४ । १ । २८ । देभिथ । ददम्भिथ । अन्यस्त्ववित्परोक्षासेट्थवोर्नित्यमेत्वमिच्छति नलोपं त्ववितिपरोक्षायामेव । तेन देम्भिथेत्येवेच्छति । दम्भिता । कृवुट् हिंसाकरणयोः । कृणोति । अकृण्वीत् चकृण्व । धिवूट् गतौ १४ । ध्यादेशे, धिनोति । अधिन्वीत् । दिधिन्व । ञिधृषाट् प्रागल्भ्ये १५ ॥ इति परस्मैपदिनः ॥

ष्टिघिट् आस्कन्दने १ । स्तिघ्नुते । अशौटि व्याप्तौ २ । सङ्घातेऽप्यन्ये । अश्नुते । आशिष्ट । आष्ट । आनशे अक्षीष्ट । अशिषीष्ट ॥ इत्यात्मनेपदिनौ ॥ इति स्वादयष्टितो धातवः ॥

## ॥ अथ तुदादयः ॥

तुदींत् व्यथने १। तुदादेः शः॥३।४।८१॥ कर्तरि विहिते शिति। तुदति। तुदते। अतौत्सीत्। अतुत्त। भ्रस्जींत् पाके २॥ ग्रहव्रश्चभ्रस्जप्रच्छः॥४।१।८४॥ सस्वरान्तस्था ङ्किति य्वृत्। भृज्जति। भृज्जते। ग्रथिभ्रस्जिप्रच्छीनां यङ्लुबन्तानां नेच्छन्त्यन्ये। परे तु प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणमिति यङ्लुप्यपि मन्यन्ते ॥भृज्जो भर्ज्॥४।४।६॥अशिति प्रत्यये वा अभार्क्षीत्। पक्षे संयोगादि लुकि। अभ्राक्षीत्। अभर्ष्ट। अभ्रष्ट। बभर्ज। बभ्रज्ज। बभर्जे। बभ्रज्जे। भृज्ज्यात् परत्वादभर्जादेशेऽपि स्थानिवद्भावेन पूर्वेण स्वरेण सह य्वृत्। भृज्ज्यात्। लुप्ततिव्निर्देशो यङ्लुब्निवृत्त्यर्थः। क्षिपींत् प्रेरणे ३। अक्षैप्सीत्। अक्षिप्त। दिशींत् अतिसर्जने ४। दिशति। अदिक्षत्। अदिक्षत। कृषींत् विलेखने ५। कृषति। अकार्क्षीत्। अक्राक्षीत्। अकृक्षत। अकृष्ट। अकृक्षत। मुच्लृंती मोक्षणे। ६॥ मुचादितृफदृफगुफशुभोभः शे ॥४।४।९९॥ स्वरान्तोऽन्तः। तृम्फादीनां सनकाराणां सत्त्वेऽपि नस्यलुकापहारात् तृफादीनां नाविधानम्। अस्य तु विधानसामर्थ्याल्लोपो नेति तृफति तृम्फतीति द्वैरूप्यं सिद्धम्। मुञ्चति। मुञ्चते अमुचत्। अमुक्त। षिचींत् क्षरणे ७। सिञ्चति। अभिषिञ्चति। सिञ्चते। ह्वालिपिचत्यङि। असिचत्। असिचत। असिक्त। अभ्यषिचत्। अभिषिषेच। विदॢंती लाभे ८। विन्दति। अविदत्। अवित्त। लुप्लृंती छेदने ९। लुम्पति। अलुपत्। अलुप्त। लिपींत् उपदेहे १०। लिम्पति। अलिपत्। अलिपत। अलिप्त॥ इत्युभयपदिनः॥

कृतैत् छेदने १। कृन्तति। अकर्तीत्। कर्त्स्यति। कर्तिष्यति। खिदंत परिघाते २। खिन्दति। अखैत्सीत्। पिश अवयवे ३ पिंशति। अपेशीत्। इत् मुचादिः। रिं पिंत् गतौ ४। उपान्त्यगुणं बाधित्वाऽन्तरङ्गत्वादिय् रियति। पियति॥ धिंत् धारणे ५। धियति। क्षित् निवासगत्योः। ६। षूत् प्रेरणे ७। अभिषुवति। अभ्यषुवत्। अभिषुषाव। सविता। मृंत् प्राणत्यागे। ८॥ मृयतेरद्यतन्याशिषि च॥ ३। ३। ४॥ शिति कर्त्तर्यात्मनेपदम्। रिः शक्या-

शीर्यें । म्रियते । अमृत । ममार । मृषीष्ट । मर्ता । मरिष्यति । कॄत् विक्षेपे ९ । किरति ॥ किरौ लवने ॥ ४ । ४ । ९३ ॥ उपात्परस्य विषये स्सडादिः । उपस्कीर्य मद्रका लुनन्ति । लवने किम् ? । उपकिरति पुष्पम् ॥ प्रतेश्च वधे ॥ ४ । ४ । ९४ ॥ उपाच्च किरतेर्विषयेऽर्थे वा स्सडादिः । विषये, उपस्किरणं प्रतिस्किरणं, हते वृषल भूयात् । अर्थे, प्रतिचस्करे नखैः । वध इति किम् ? प्रतिकीर्णं बीजम् ॥ गॄत् निगरणे १०॥ नवा स्वरे ॥ २ । ३ । १०२॥ ग्रः प्रत्यये विहितस्य रो ल् स्यात् । गिलति । गिरति । अगालीत् । अगारीत् । विहितविशेषणं किम् । निगाल्यते २ । गीर्यात् । गलिता २। गरिता २। लिखत् अक्षरविन्यासे ११ लेखिता । कुटादिरयमित्येके तन्मते । लिखिता लिखनीयमिति । जर्चं झर्चत् परिभाषणे १२ । तर्जनेऽपीत्येके । जर्चति । झर्चति । चादिरयमित्यन्ये । चर्चति । चर्चत् संवरणे १३ । ऋचत् स्तुतौ १४ ।ऋचति । आनर्च । ओव्रश्चौत् छेदने १५ । वृश्चति । अव्रश्चीत् । अव्राक्षीत् । वव्रश्च । वव्रश्चिथ । वव्रष्ठ । वृश्च्यात् । ऋच्छत् इन्द्रियप्रलयमूर्तिभावयोः १६ । इन्द्रियप्रलय इन्द्रियमोहः । गतावपीत्यन्यः । ऋच्छति । आर्च्छीत् । आनर्च्छ । आनर्च्छतुः । ऋच्छिता । विच्छत् गतौ १७ । विच्छायति । विच्छतीत्यप्यन्ये । अशवि ते वा । विच्छायाञ्चकार । विविच्छ । उच्छैत् विवासे १८ । विवासः समाप्तिः । उच्छति । उच्छाञ्चकार । मिच्छत् उत्क्लेशे १९ । मिच्छति । उछुत् उञ्छे २० । उञ्छति । प्रच्छत् ज्ञीप्सायाम् २१ । पृच्छति ॥ अनुनासिके च च्छ्वः शूट् ॥ ४ । १ ।१०८॥ क्वौ धुडादौ च प्रत्यये धातोः । अप्राक्षीत् । छस्य द्विः पाठाद् द्वयोरपि शः । स्योमा स्योन इत्यत्र नित्यत्वाद् गुणात्पागूट् । तत्र कृतेऽन्तरङ्गत्वाद्यत्वं न तु गुणः । अक्षद्यूरित्यत्र स्वरानन्तर्ये बहिरङ्गपरिभाषाया अप्रवृत्तेर्यत्वम् । वस्य विकल्पेनानुनासिकत्वाद् वन्क्वनिपोः, सुस्योवा । सुस्यूवा । सुसेवा । सुसोवा । धातोरित्येव । शुभ्याम् । दिवेः क्विपि तु द्युभ्याम । यङ्लुपि तु देद्योतीत्यादि । अन्ये तु देदेवीत्येवेच्छन्ति । तन्मतपरिग्रहार्थं क्ङितीत्यनुवर्तनीयम् । यजादिसूत्रे च्छग्रहणं विधेयम् । पृच्छ्यात् । उब्जत् आर्जवे २२ । उब्जति । उब्जाञ्चकार । सृजंत् विसर्गे २३ । अस्राक्षीत् ।

ससर्जिथ । ससृष्ठ । सृज्यात् । रुजोंत् भङ्गे २४ । रुजति । अरौक्षीत् । भुजोंत् कौटिल्ये २५ । टुमस्जोंत् शुद्धौ २६ । मज्जति ॥ मस्जेः सः ॥ ४ । ४ । ११० ॥ स्वरात्परस्य धुटि प्रत्यये नोऽन्तः । अमाङ्क्षीत् । आदेशकरणं नलोपार्थम् । मग्नः । ममज्जिथ । ममङ्क्थ । जर्जं झर्झत् परिभाषणे २७ । उज्झत् उत्सर्गे २८ । दोपान्त्योऽयम् । उज्झाञ्चकार । जुडत् गतौ २९ । जुडति । अजोडीत् । पृड मृडत् सुखने ३० । पृडति । मृडति । कडत् मदे ३१ । अकाडीत् । अकडीत् । भक्षणेऽयमित्यन्ये । कुटादिरयमित्येके । पृणत् प्रीणने ३२ । तुणत् कौटिल्ये ३३ । मृणत् हिंसायाम् ३४ । द्रुणत् गतिकौटिल्ययोश्च ३५ । पुणत् शुभे ३६ । मुणत् प्रतिज्ञाने ३७ । कुणत् शब्दोपकरणयोः ३८ । घुण घूर्णत् भ्रमणे ३९ । घुणति । घूर्णति । चृतैत् हिंसाग्रन्थयोः ४० । चर्त्स्यति । चर्तिष्यति । णुदंत् प्रेरणे ४१ । नुदति । अयमुभयपदीति पाणिनीयाः । षद्लृंत् अवसादने ४२ । सीदति । असदत् । ज्वलादिपठितस्यास्येह पाठोऽवर्णादश्न इति वाऽन्तादेशार्थः । सीदती । सीदन्ती । तत्र पाठो णविकल्पार्थः । सादः । सदः । विधत् विधाने ४३ । अवेधीत् । जुन शुनत् गतौ ४४ । छुपंत् स्पर्शे ४५ । छुपति । रिफत् कत्थनयुद्धहिंसादानेषु ४६ । ऋफदित्यन्ये । तृफ तृम्फत् तृप्तौ ४७ । तृम्फति । मुचादितृफेति नः । विधानसामर्थ्यात्तस्य लुग्न । द्वितीयस्य तु लुकि । तृफति । ततृम्फ । तृफ्यात् । पान्तावेतावित्यन्ये । शे नलुकं च नेच्छन्ति । ऋफ ऋम्फत् हिंसायाम् ४८ । ऋफति । नलुकं नेच्छन्त्येके । ऋम्फति । इकारोपान्त्यो रादिश्चायमित्यन्ये । दृफ दृम्फत् उत्क्लेशे ४९ । शे मुचादीति ने । दृम्फति । ददर्फ । दृफति । ददृम्फ । गुफ गुम्फत् ग्रन्थने ५० । गुम्फति । गुफति । उभ उम्भत् पूरणे ५१ । उम्भति । उभति । उवोभ । उम्भाञ्चकार । उभ्यात् । शुभ शुम्भत् शोभार्थे ५२ । शुम्भति । अशोभीत् । शुभति । शुशुम्भ ॥ दृभैत् ग्रन्थे ५३ । दृभति । लुभत् विमोहने ५४ । लुभति । लोभिता । लोब्धा । कुरत् शब्दे ५५ । कुरति । क्षुरत् विलेखने ५६ । चुक्षोर । खुरत् छेदने च ५७ । चाद्विलेखने । घुरत् भीमार्थशब्दयोः ५८ । पुरत् अग्रगमने ५९ । मुरत् संवेष्टने ६० । सुरत् ऐश्वर्यदीप्त्योः ६१ । सुरति ।

अषोपदेशत्वात् । सुसोर । षोपदेशमिममिच्छन्त्येके । स्फर स्फलत् स्फुरणे ६२ । स्फरति । पस्फार । किलत् श्वैत्यक्रीडनयोः ६३ । किलति । इलत् गतिस्वप्नक्षेपणेषु ६४ । हिलत् हावकरणे ६५ । हिलति । शिल सिलत् उञ्छे ६६ । सिसेल । षोपदेशोऽयमित्येके । तिलत् स्नेहने ६७ । चलत् विलसने ६८ । चलति । चिलत् वसने ६९ । विलत् वरणे ७० । विलत् भेदने ७१ । णिलत् गहने ७२ । निलति । प्रणिलति । मिलत् श्लेषणे ७३ । मिलति । अमेलीत् । स्पृशंत् संस्पर्शे ७४ । अस्प्राक्षीत् । अस्पार्क्षीत् । अस्पृक्षत् । स्प्रष्टा । स्पर्ष्टा । रुशं रिशंत् हिंसायाम् ७५ । अरुक्षत् । विशंत् प्रवेशने ७६ । विशति । मृशंत् आमर्शने ७७ । आमर्शनं स्पर्शः । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् । लिशं ऋषैत् गतौ ७८ । आनर्ष । इषत् इच्छायाम् ७९ । इच्छति । एषिता । एष्टा । मिषत् स्पर्द्धायाम् ८० । वृहौत् उद्यमे ८१। उद्यम उत्करणम् । वर्हिता । वर्ढा । तृहौ स्तृहौत् हिंसायाम ८२ । अवर्हीत् । अतृक्षत् । अतृंहीत् । अनार्क्षीत् ॥

## ॥ अथ कुटादिः ॥

कुटत् कौटिल्ये ८३॥ कुटादेर्ङिद्वदञ्णित् ॥४।३।१७॥ अकुटीत् । कुटिता । अञ्णिदिति किम् ? चुकोट । न्यधुवीदित्यत्र ङित्वात्सिचि वृद्धिरिति वृद्धिरपि न । कुटादेरिति किम् ? लेखनीयम् । केचिल्लिखिमपि कुटादौ पठन्ति । अपरे तु फडस्फर स्फलान् पठित्वा पाठसामर्थ्याद् वृद्धिनिषेधमिच्छन्ति । प्रत्यासत्त्या यत्कार्यं कुटादेर्ङिद्द्वारा प्राप्नोति तस्मिन्नेव कार्ये ङित्त्वं नात्मनेपदादौ । तेन चुकुटिषतीत्यत्र नात्मनेपदम् । गुंत् पुरीषोत्सर्गे ८४ । गुवति । अगुषीत् । ध्रुंत् गतिस्थैर्ययोः ८५ । ध्रुवति । अध्रुषीत् । णूत् स्तवने ८६ । नुवति । धूत् विधूनने ८७। धुवति । कुचत् सङ्कोचने ८८। व्यचत् व्याजीकरणे ८९॥ व्यचोऽनसि ॥४।१।८२॥ सस्वरान्तःस्था ङ्किति य्वृत् । विचति । विव्याच । विविचतुः । विचिता । अनसीति किम् ? । उरुव्यचाः । कुटप्रत्ययाविषये नायं कुटादिरित्यन्ये । गुजत् शब्दे ९०। गुजति । अगुजीत् । घुटत् प्रतीघाते ९१ । अघुटीत् । गादिर्डान्तश्चायमिति केचित् । गुडति । चुट छुट त्रुटत् छेदने ९२ । त्रुटयति ।

त्रुटति । त्रुटिता । तुटत् कलहकर्मणि ९३ । मुटत् आक्षेपप्रमर्दनयोः ९४ । स्फुटत् विकसने ९५ । स्फुटति । पुट लुटत् संश्लेषणे ९६ । पुटति । लुडित्यन्ये । कृडत् घसने ९७ । घसनं भक्षणम् । घनत्वे इति केचित् । घनत्वं सान्द्रता । कुडत् बाल्ये च ९८ । कुडति । गुडत् रक्षायाम् ९९ । गुडति । जुडत् बन्धने १०० । तुडत् तोडने १०१ । तुडति । तुड घुड स्थुडत् संवरणे १०२ । बुडत् उत्सर्गे च १०३ । व्रुड भ्रुडत् संघाते १०४ । व्रुडति । दुड हुड त्रुडत् निमज्जने १०५ । चुणत् छेदने १०६ । चुणति । डिपत् क्षेपे १०७ । छुरत् छेदने १०८ । कुरुच्छुर इति दीर्घनिषेधः । छुर्यात् । स्फुरत् स्फुरणे १०९ । स्फुरति । चलन इत्यन्ये ॥ निर्नेः स्फुरस्फुलोः ॥ २ । ३ । ५३॥ सस्य षो वा । निःष्फुरति निःस्फुरति । निष्फुरति । निस्फुरति । स्फुलत् संचये च ११० । निःष्फुलति । निःस्फुलति । निष्फुलति । निस्फुलति ॥ वेः ॥ २ । ३ । ५४ ॥ स्फुरस्फुलोः सस्य षो वा । विष्फुरति । विस्फुरति । विष्फुलति । विस्फुलति योगविभाग उत्तरार्थः ॥ इतिपरस्मैपदिनः ॥

कुंङ् कूङत् शब्दे १ । कुवते । अकुत । अकुविष्ट । गुरैति उद्यमे २ । गुरते । अगुरिष्ट । वृत कुटादिः । पृंङत् व्यायामे ३ । प्रायेणायं व्याङ्पूर्वः । व्याप्रियते । व्यापप्रे । दृंङत् आदरे ४ । आद्रियते । आदद्रे । धृंङत् स्थाने ५ । ध्रियते । ओविजैति भयचलनयोः ६ । प्रायेणायमुत्पूर्वः । उद्विजते ॥ विजेरिट् ॥ ४ । ३ । १८ ॥ ङिद्वत् । उद्विजिता । ओलजैङ् ओलस्जैति व्रीडायाम् ७ । लजते । लज्जते । ललज्जे । भ्वादावपठितस्येह पाठःप्रसिद्ध्यनुरोधात् । ष्वजित् सङ्गे ८ । स्वजते ॥ स्वञ्जश्च ॥ २ । ३ । ४५ ॥ उपसर्गस्थान्नाम्यादेः सस्य द्वित्वेऽप्यटयपि षः परोक्षायां त्वादेरेव । परिष्वजते । योगविभागादप्रतेरिति नानुवर्तते । चकारः परोक्षायां त्वादेरित्यस्यानुकर्षणार्थः । तेनोत्तरत्र नानुवृत्तिः । पर्यष्वङ्क्त । पर्यस्वङ्क्त । नञानिर्दिष्टस्यानित्यत्वादिडनिषेधाभावे अस्वञ्जिष्ट ॥ स्वञ्जेर्नवा ॥ ४ । ३ । ९२ ॥ परोक्षा किद्वत् । परिषस्वजे । परिष वञ्जे । जुषैति प्रीतिसेवनयोः ९ । जुषते ॥ इत्यात्मनेपदिनः ॥

॥ इति तुदादयस्तितो धातवः ॥

## ॥ अथ रुधादयः ॥

रुधृंपी आवरणे १ ॥ रुधां स्वराच्छ्नो नलुक् च ॥ ३ । ४ । ८२ ॥ कर्त्तरि विहिते शिति प्रकृतेः । प्रत्ययनकारस्य तु विधानसामर्थ्यान्न लुक् । रुणद्धि । रुन्द्धः । रुन्धन्ति । अरुधत् । अरौत्सीत् । रुन्धे । अरुद्ध । रोद्धा । रिचृंपी विरेचने २ । निःसारणे इत्यर्थः । रिणक्ति । अरिचत् । अरैक्षीत् । रिङ्क्ते । अरिक्त । विचृंपी पृथग्भावे ३ । विनक्ति । विङ्क्ते । युजृंपी योगे ४ । युनक्ति युङ्क्ते । क्षुदृंपी संपेषे ५ । क्षुणत्ति । क्षुन्ते । भिदृंपी विदारणे ६ । भिनत्ति । भिन्ते । छिदृंपी द्वैधीकरणे ७ । छिनत्ति। छिन्ते । उछृदृंपी दीप्तिदेवनयोः ८ । वमनेपीत्यन्ये। छृणत्ति। छृन्ते । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट । छर्दिष्यति । छर्त्स्यति । उतृदृंपी हिंसानादरयोः ९ । तर्त्स्यति ।तर्दिष्यति। इत्युभयतोभाषाः ॥ पृचैप् सम्पर्के १ । पृणक्ति । अपर्चीत् । वृचैप् वरणे । वृणक्ति । जान्तोऽप्ययमित्यन्ये । जान्तोऽपि वर्जनार्थ इत्येके । तञ्चू तञ्जौप् संकोचने ३ । श्ने तत्सन्नियोगेन नलुकि च । तनक्ति । तङ्क्ते । तञ्जन्ति । अतनक् । अतञ्चीत् । अतञ्जीत्। अताङ्क्षीत् । ततञ्ज । तञ्जिता । तङ्क्ता । भञ्जौप् आमर्दने ४। भनक्ति । अभनक् । अभाङ्क्षीत् । भङ्क्ता । भुजंप् पालनाभ्यवहारयोः ५ । भुनक्ति । अभौक्षीत् । बुभोज ॥ भुनजोऽत्राणे ॥३।३। ३७॥ कर्त्तर्यात्मनेपदम् । ओदनं भुङ्क्ते । अभुक्त । बुभुजे । अत्राणे इति किम् ?। महीं भुनक्ति । बुभुजाते चिरं महीमित्यत्र तु धातूनामनेकार्थत्वात्पालननिमित्तक उपकारोऽर्थः । पालनेन महीमुपकृतवन्तौ पालनेन महाश्रयं फलं स्वीकृतवन्ताविति वाऽर्थः । उभयपदिनमेनमन्ये मन्यन्ते । भुनजइति किम् ?। ओष्ठौ निर्भुजति । अञ्जौप् व्यक्तिम्रक्षणकान्तिगतिषु ६ । अनक्ति । अङ्धि । आनक् । आनग् ॥ सिचोऽञ्जेः ॥ ४ । ४ । ८४ ॥ आदिरिट् । आञ्जीत् । आनञ्ज । अञ्जि-

वा । अङ्क्ता । ओविजैप् भयचलनयोः ७ । विनक्ति । अविजीत् । कृतैप् वेष्टने ८ । कृणत्ति । कर्तिष्यति । कर्त्स्यति । उन्दैप् क्लेदने ९ । उन्दाञ्चकार । शिष्लृंप् विशेषणे १० । शिनष्टि । शिष्यात् । धुटो धुटि स्वे वा । शिण्डि । शिण्ड्ढि । शिनषाणि । अशिनट् । अशिषत् । पिष्लृंप् संचूर्णने ११ । पिनष्टि । अपिषत् । हिंसु तृहप् हिंसायाम् १२ । हिनस्ति । हिंस्यात् । हिनस्तु । व्यञ्जनाद्देः सश्च दः । अहिनत् । अहिनद् । अहिंस्ताम् । अहिनः । अहिनत् । अहिनद् । अहिंसीत् ॥ तृहः श्नादीत् ॥ ४ । ३ । ६२ ॥ व्यञ्जनादौ विति । तृणेढि । तृण्ढः । तृणेढु । अतृणेट् । अत्र प्रत्ययलक्षणेनेत् । व्यञ्जनादिप्रत्ययनिमित्तकत्वादस्य न वर्णाश्रयत्वम् । आद्यन्तवद्भावाच्च प्रत्ययस्यात्र व्यञ्जनादित्वम् । अतर्हीत् । इति परस्मैपदिनः ॥ खिदिंप् दैन्ये १ । खिन्ते । अखित्त । विदिंप् विचारणे २ । विन्ते । विविदे । वेत्ता । ञिइन्धैपि दीप्तौ ३ । इन्धे । इन्त्से । ऐन्ध । इन्धाञ्चक्रे । सम्पूर्वकस्य तु समिन्धाञ्चक्रे । समीधे । इत्यात्मनेपदिनः ॥ **इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां रुधादयः पितो धातवः ।**

## ॥ अथ तनादयः ॥

तनूयी विस्तारे १ । कृतनादेरुः । तनोति । तनुते । तन्वः । तनुवः । तन्वहे । तनुवहे । अतानीत् । अतनीत् । **तन्भ्यो वा तथासि ण्णोश्च** ॥ ४ । ३ । ६८ ॥ सिचो लुप् तद्योगे ण्णोश्च लुप् न चेट् । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः । थासूसाहचर्यात्तप्रत्ययोऽप्यात्मनेपदसम्बन्ध्येव गृह्यते । ततान । तेने । तनिता । षणूयी दाने २ । सनोति ॥ **सनस्तत्रा वा** ॥ ४ । ३ । ६९ ॥ तत्र लुपि सत्याम् । असात । तत्रेति किम् ? । असनिष्ट । सन्यात् । क्षणू क्षिणूयी हिंसायाम् ३ । क्षणोति । क्षणुते । न श्विजागृेति वृद्धिनिषेधः । अक्षणीत् । चक्षाण । चक्षणे । क्षण्यात् ।

क्षणिषीष्ट । क्षेणोति । संज्ञापूर्वको विधिरनित्य इति न प्रत्ययनिमित्तोपान्त्यगुणः इति केचित् । अक्षित । अक्षेणिष्ट । अमुं न पठन्त्येके । ऋणूयी गतौ ४ । अर्णोति । तृणूयी अदने ५ । तर्णोति । घृणूयी दीप्तौ ६ । घर्णोति । इत्युभयपदिनः ॥ वनूयि याचने १ । वनुते । वनने । मनूयि बोधने २ । मनुते । मेने । इत्यात्मनेपदिनः ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां तनादयो यितो धातवः ॥

## ॥ अथ क्र्यादयः ॥

डुक्रींग्श् द्रव्यविनिमये १ ॥ क्र्यादेः ॥ ३ । ४ । ७९ ॥ कर्तरिविहिते शिति श्नाः । क्रीणाति । एषामीर्व्यञ्जनेऽदः । क्रीणीतः । श्नश्चातः । क्रीणन्ति । क्रीणीते । क्रीणीयात् । क्रीणीत । अक्रैषीत् । अक्रेष्ट । क्रेता । षिंग्श् बन्धने २ । सिनाति । असेष्ट । सिषाय । प्रींग्श् तृप्तिकान्त्योः ३ । प्रीणाति । प्रीणीते । श्रींग्श् पाके ४ । श्रीणाति । मींग्श् हिंसायाम् ५ । मीनाति । प्रमीणाति । अमासीत् । ममौ । मिम्ये । मीयात् । प्रमीणीते । युंग्श् बन्धने ६ । युनाति । स्कुंग्श् आप्रवणे ७ ॥ स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः श्ना च ॥ ३ । ४ । ७८ ॥ चात् श्नुः । स्तम्भ्वादयश्चत्वारः सौत्राःसर्वे रोधनार्थाः । सर्वे परस्मैपदिनः । प्रथमतृतीयौ स्तम्भार्थौ । द्वितीयो निष्कोषणार्थः । तुर्यो धारणार्थ इत्येके । स्कुनाति । स्कुनीते । स्कुनोति । स्कुनुते । अस्कौषीत् । अस्कोष्ट ॥ अङ्प्रतिस्तब्धनिस्तब्धे स्तम्भः ॥ २ । ३ । ४१ ॥ उपसर्गस्थान्नाम्यादेः परस्य सस्य द्वित्वेऽप्यटचपि षः । विष्टभ्नाति । व्यष्टभत् । व्यष्टम्भीत् । वितष्टम्भ । प्रत्यष्टभ्नात् । ङादिवर्जनं किम् ? व्यतस्तभत् । प्रतिस्तब्धः । निस्तब्धः ॥ अवाच्चाश्रयोर्जाविदूरे ॥ २ । ३ । ४२ ॥ गम्यमाने स्तम्भः सस्य द्वित्वेऽप्यटचपिषः स्तम्भिर्नचेन्ङविषयः । आश्रय

आलम्बनम् । दुर्गमवष्टभ्नाति । अवतष्टम्भ । अवाष्टभ्नात् । ऊर्जे और्जित्यम् । अहो वृषभस्यावष्टम्भः । अविदूरमासन्नमदूरासन्नं च । अवष्टब्धा शरत् । अवष्टब्धा सेना । अङ इत्यस्यानुवृत्त्यर्थोऽनुक्तसमुच्चयार्थश्च चकारः । तेन उपष्टब्धः । चकारेण सूचनमनित्यत्वार्थम् । तेनोपस्तब्ध इत्यपि । अङ इत्येव । अवातस्तम्भत् । स्कभ्नाति ॥ स्कभ्नः ॥ २ । ३ । ५५ ॥ वेः सस्य षः । वेति नानुवर्त्तते, वेः स्कभ्नश्चेत्येव कर्त्तव्ये पृथग्योगारम्भात् । विष्कभ्नाति । क्षुभ्नादित्वाण्णत्वं न । निस्कभ्नोति । श्नाप्रत्ययेन निर्देशादिह न षः ॥ व्यञ्जनाच्छ्नाहेरानः ॥ ३ । ४ । ८० ॥ धातोः ॥ स्तभान । स्तुभान । विष्कभाण । स्कुभान । उत्तभान । व्यञ्जनादिति किम् ? । लुनीहि । श्नाहेरिति किम् ?। अश्नाति । उत्तभ्नुहि । क्नूगृश् शब्दे ८ । द्रूग्श् हिंसायाम् ९ । गतावित्यन्ये । द्रूणाति । ग्रहीश् उपादाने १० । ग्रहव्रश्चेति य्वृत् । गृण्हाति । गृण्हीते । गृहाण ॥ गृण्होऽपरोक्षायां दीर्घः ॥ ४ । ४ । ३४ ॥ विहितस्येटः । अग्रहीत् । दीर्घस्य स्थानिवद्भावात् सिज्लुक् । इट इति रूपाश्रयत्वादस्य वर्णविधित्वाभावात् । अग्रहीष्टाम् । विहितविशेषणं किम् ?। जरीगृहिता । लुब्वतिब्निर्देशाद्यङ्लुपि न । जरीगर्हिता । जग्राह । जगृहतुः । जग्रहिथ । जगृहे । गृह्यात् । पूग्श् पवने ११ ॥ प्वादेर्ह्रस्वः ॥ ४ । २ । १०५ ॥ अस्यादौ शिति । पुनाति । पुनीते । इत आरभ्य वृत्करणपर्यन्ताः प्वादयः । प्वादेरिति किम् ? । व्रीणाति । भ्रीणाति । आ गणान्तात्प्वादय इत्यन्ये । वृत्करणं ल्वादिपरिसमाप्त्यर्थं मन्यन्ते । तन्मते व्रिणाति भ्रिणातीत्येव । जानातीत्यत्र तु विधानसामर्थ्यान्न ह्रस्वः ॥ अपावीत् । अपविष्ट । पूयात् । पविषीष्ट । लूग्श् छेदने । १२ । लुनाति । लुनीते । धूग्श् कम्पने १३ । धुनाति । धुनीते । धूग्सुस्तोः परस्मै । अधावीत् । अधविष्ट । अधोष्ट । स्तॄग्श् आच्छादने १४ । स्तृणाति । स्तृणीते । अस्तारीत् । अस्तरीष्ट । अस्तरिष्ट । अस्तीर्ष्ट । स्तीर्यात् । स्तरिषीष्ट । स्तीर्षीष्ट । कॄग्श् हिंसायाम् १५ । कृणाति । कृणीते । वॄग्श् वरणे १६ । अवारीत् । अवारिष्टाम् । अवरीष्ट । अवरिष्ट । अवूर्ष्ट । वूर्यात् । वरिषीष्ट । वूर्षीष्ट । वरिता ।

वरीता ॥ इत्युभयपदिनः ॥ ज्यांश् हानौ १ । वयोहानावित्यन्ये ॥ ज्याऽयध इति स्तुति ॥ दीर्घमवोऽन्त्यम् ॥ ४ । १ । १०३ ॥ धातोर्ह्रस्वः । प्वादेरिति ह्रस्वः । जिनाति । अज्यासीत् । जिज्यौ । जिज्यतुः । जीयात् । ज्याता । रीँश् गतिरेषणयोः २ । रिणाति । अरैषीत् । लीँश् श्लेषणे ३ । लिनाति । ललौ । लिलाय । लेता । लाता । व्लीँश् वरणे ४ । गतावित्यन्ये । व्लिनाति । प्लीँश् गतौ ५ । प्लिनाति । कॄ मॄ शॄँश् हिंसायाम् ६ । शृणाति । अशारीत् । शश्रतुः । शशरतुः । शरिता । शरीता ॥ पॄँश् पालनपूरणयोः ७ । पृणाति । पपार । पप्रतुः । पपरतुः । वॄँश् वरणे ८ । भरणेऽपि । वृणाति । भॄँश् भर्जने च ९। चकाराद्भरणे । भर्त्सन इत्यन्ये । भृणाति । दॄँश् विदारणे १०। भय इत्यन्ये । दृणाति । ददार । दद्रतुः । ददरतुः । जॄँश् वयोहानौ ११ । जृणाति । जरिता । जरीता । झॄँश् इत्यन्ये । झृणाति । नॄँश् नये १२ । गॄँश् शब्दे १३ । गृणाति । जगार । ऋँश् गतौ १४ । ऋणाति । आरीत् । आरिषाम् । अराञ्चकार । ईर्यात् । अरीता । अरिता । ल्वत् प्वादिल्वादिश्च । ज्ञाँश अवबोधने १५ । जा ज्ञाजनोऽत्यादाविति आदेशे । जानाति । जानीतः । अज्ञासीत् । जज्ञौ । ज्ञायात् । ज्ञेयात् । क्षिष्ँश् हिंसायाम् १६ । क्षिणाति । क्षेता । व्रीँश् वरणे १७ । भ्रीँश् भरणे १८ । भ्रीणाति । हेठश् भूतप्रादुर्भावे १९ । भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । तवर्गस्य टवर्गादेशे हेठ्णाति । हेठान । हिठश् इत्यन्ये । मृडश् सुखने २० । मृड्णाति । ममर्ड । श्रन्थश् विमोचनप्रतिहर्षयोः २१ । श्रथ्नाति ॥ वा श्रन्थग्रन्थो नलुक् च ॥ ४ । १ । २७ ॥ स्वरस्याबित्परोक्षासेट्थवोरेर्न च द्विः । श्रेथतुः । शश्रन्थतुः । श्रथ्यात् । मन्थश् विलोडने २२ । मथ्नाति । ममन्थ । ग्रन्थश् संदर्भे २३ । ग्रथ्नाति । जग्रन्थ । ग्रेथतुः । जग्रन्थतुः । कुन्थश् संक्लेशे २४ । कुथ्नाति । मृदश् क्षोदे २५ । मृद्नाति । गुधश् रोषे २६ । बन्धंश बन्धने २७ । बध्नाति । अभान्त्सीत् । बबन्धिथ । बबन्ध । क्षुभश संचलने २८ । क्षुभ्नाति । क्षुभाण । णभ् तुभश् हिंसायाम् २९ । नभ्नाति । प्रणभ्नाति । तुभ्नाति । खवश् भूतप्रादुर्भावे ३० । खौनाति । खौनीहि । अखावीत् । अखवीत् । ऊटं नेच्छ-

न्त्येके । तन्मते खवूनाति । चान्तोऽयमित्यन्ये । खच्नाति । क्लिशौश् विबाधने ३१ । क्लिश्नाति । अक्लेशीत् । इड-भावे सक् । अक्लिक्षत् । क्लेशिता । क्लेष्टा । अशश् भोजने ३२ । अश्नाति । आशीत् । इषश् आभीक्ष्ण्ये ३३ । एषिता । विषश् विप्रयोगे ३४ । प्रुष प्लुषश् स्नेहसेचनपूरणेषु ३५। प्रुष्णाति । प्लुष्णाति । मुषश् स्तेये ३६ । मुष्णाति । अमोषीत् । पुषश् पुष्टौ ३७ । पुष्णाति । कुशश् निष्कर्षे ३८ । कुष्णाति ॥ निष्कुषः ॥४ । ४ । ३९॥ स्ताद्य-शित आदिरिड् वा । निष्कोष्टा । निष्कोषिता । निरकोषीत् । निरकुक्षत् । निर्निःसंबद्धात्कुष इति किम् ? । निर्गताः कोषितारोऽस्मान्निष्कोषितृको देश इति नित्यमिट् । ध्रसूश् उञ्छे३९। ध्रस्नाति । ध्रसान । अध्रसीत् । अध्रासीत् । उ-ध्रसश् इत्येके ॥ इति परस्मैपदिनः ॥ वृङ्श् सम्भक्तौ १ । वृणीते । अवरीष्ट । अवरिष्ट । अवृत ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापर-नामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयने-मिसूरिविरचितायां बृहद्धेमप्रभायां क्र्यादयः शितो धातवः ॥

## ॥ अथ चुरादयः ॥

चुरण् स्तेये १ ॥ चुरादिभ्यो णिच् ॥ ३ । ४ । १७ ॥ स्वार्थे । चोरयति । णिश्रीति ङः । अचूचुरत् । चोरयाञ्चकार । चार्य्यात् । चोरयिता । अत्र णिचो गित्वाभावात्फलवति कर्त्तर्य्यात्मनेपदं नास्ति । केचित्तु णिचश्चेति सूत्रयन्नुभयपदमाहुः । केचित्तु णिज्विकल्पमिच्छन्ति । इह चितुण्चुण्प्रभृतीनां सनकासनदेशमकृत्वा इदित्क-रणं णिचोऽनित्यत्वज्ञापकम् । तेन चोरति चिन्तति इत्यादि सिद्धम् । घुषेरविशब्दे इत्यत्र विशब्दप्रतिषेधोऽप्यत्र ज्ञापकः ॥ उपान्त्यस्येति ॥ ४ । २ ३५ ॥ सूत्रे लघोर्दीर्घ इति ॥ । ४ । १ । ६४ ॥ सूत्रे च णित्वजात्याश्र-यणात् णिजन्तात् णिग्यपि अचूचुरत् ॥ पृण् पूरणे २ । पारयति । अपीपरत् । घृण् स्रवणे ३ । अजीघरत् । श्लक्ष

बल्कण् भाषणे ४ । अबुबुल्कत् । नक्क धक्कण् नाशने ५ । चक्क चुक्कण् व्यथने ६ । टकुण् बन्धने ७ । टङ्कयति । अटटङ्कत् । अर्कण् स्तवने ८ । आर्चिकत् । पिच्चण् कुट्टने ९ । पचुण् विस्तारे १० । प्रपञ्चयति । म्लेच्छण् म्लेच्छने ११ । म्लेच्छनमव्यक्ता वाक् । अमिम्लेच्छत् । ऊर्जण् बलप्राणनयोः १२ । ऊर्जयति । और्जिजत् । तुजु पिजुण् हिंसाबलादाननिकेतनेषु १३ । क्षजुण् कृच्छ्रजीवने । १४ । क्षजयति । पूजण् पूजायाम् । १५ । पूजयति । अपूपुजत् । गज मार्जण् शब्दे । १६ । मर्चमर्जावपि पठन्त्येके । तिजण् निशाने । १७ । तेजयति । वज व्रजण् मार्गणसंस्कारगत्योः ।१८। गाजयति । रुजण् हिंसायाम ।१९। नटण् अवस्यन्दने ।२०। चौरस्योन्नाटयति । तुट चुट चुटु छुटुण् छेदने । २१ । चुण्टयति । कुटण् कुत्सने च । २२ । पुट चुट पुटण् अल्पीभावे । २२ पुट मुटण् संचूर्णने । २४ । अट स्मिटण् अनादरे । २५ । न बदनं संयोगादिः ॥ ४ । १ । ५ ॥ स्वरादेर्धातोर्द्वितीयैकस्वरस्य द्विः ॥ आटिटत् ॥ अट अल्पीभाव इति केचित् । लुण्टण् स्तेये च । २६ । अलुलुण्टत् । स्निटण् स्नेहने । २७ । घटण् चलने । २८ । खटण् संवरणे । २९ । षट स्फिटण् हिंसायाम् । ३० । प्रथमो बलादाननिकेतनेष्वपीति केचित् । द्वितीयोऽनादर इत्यन्ये । स्फुटण् परिहासे । ३१ । कीटण् वर्णने । ३२ । बन्ध इत्यपरे । वटुण् विभाजने । ३३ । वण्टयति । डान्तोऽयमिति केचित् । रुटण् रोषे । ३४ । रोटयति । शठ श्वठ श्वठुण् संस्कारगत्योः । ३५ । शाठयति । श्वण्ठयति । शुठण् आलस्ये । ३६ । शोठयति । शुठुण् शोषणे । ३७ । गुठुण् वेष्टने । ३८ । गुण्ठयति । अवगुण्ठति । लडण् उपसेवायाम् । ३९ । लाडयति । लत्वे, लालयतीत्यपि । स्फुडुण् परिहासे । ४० । ओलडुण् उत्क्षेपे । ४१ । ओलण्डयति । ओदिदयमित्यपरे । लण्डयति । पीडण् गहने ।४२। पीडयति । भ्राजभासभाषदीपपीडजीवमीलकणरणवणभणश्रणहृहेठलुटलुपलपां न वा ॥ ४ । २ । ३६ ॥ ङपरे णावुपान्त्यस्य ह्रस्वः । अपीपिडत् । अपिपीडत् । बहुवचनं शिष्टप्रयोगानुसारेणान्येषामपि परिग्रहार्थम् । तेन अबिभ्रसत् । अबभ्रासत् । इत्यादि

सिक्थम् । तडण् आघाते । ४३ । ताडयति । खड खडुण् भेदे । ४४ । खाडयति । कडुण् खण्डने च । ४५ । खुडुण् इ-
त्येके । कुडुण् रक्षणे । ४६ । गुडुण् वेष्टने च । ४७ । चुडुण् छेदने । ४८ । मडुण् भूषायाम् । ४९ भडुण् कल्याणे ।
५० । दान्तो ऽयमित्यपरे । पिडुण् संघाते । ५१ । पडुण् इत्येके । ईडण् स्तुतौ । ५२ । ईडयति । चडुण् कोपे ।
। ५३ । जुड चूर्ण वर्णण् प्रेरणे । ५४ । प्रेरणं दलनम् । चूण् तूणण् संकोचने । ५५ । श्रणण् दाने । ५६ । श्राणय-
ति । अशिश्रणत् । अशश्राणत् । पूणण् संघाते । ५७ । अपूपुणत् । चितुण् स्मृत्याम् । ५८ । चिन्तयति । चिन्तति ।
चिन्त्यात् । पुस्त बुस्तण् आदरानादरयोः । ५९ । मुस्तण् संघाते । ६० । कृतण् संशब्दने । ६१ । कृतः कीर्त्तिः
॥ ४ । ४ । १२२ ॥ स्पष्टम् । कीर्त्तयति ॥ ऋद्वर्णस्य ॥ ४ । २ । १७ ॥ उपान्त्यस्य ङपरे णौ वा । अचीकृत-
त् । अचिकीर्त्तत् । स्वर्त्त पथुण्गतौ । ६२। आद्यः कृच्छ्रजीवनेऽपीत्येके । श्रथण् प्रतिहर्षे । प्रतियत्न इत्यन्ये । अशिश्र-
थत् । श्रथण् बन्धने इति युजादौ पठिष्यमाणोऽर्थभेदतः पुनरिह पठितः । परस्मैपदेन रूपान्यत्वार्थमिति केचित् ।
पृथण् प्रक्षेपणे ६३ । अपीपृथत् । अपपर्थत् । पर्थण इति केचित् । पार्थण् इत्यपरे । प्रथण् प्रख्याने ६४ । प्राथयति ।
स्मृदृत्वरप्रथम्रदस्तॄस्पशेरः ॥ ४ । १ । ६५ ॥ असमानलोपे ङपरे णौ द्वित्वे पूर्वस्य । इत्वापवादः । अपप्रथत् ।
छदण् संवरणे ६६ । छादयति । चुदण संचोदने ६७ । संचोदनं प्रेरणम् । चोदयति । मिदुण स्नेहने ६८ । कौ-
शिकस्त्वनुदितमिममधीते । गुर्दण् निकेतने ६९ । पूर्वनिकेतनइति केचित् । भ्वादेरिति दीर्घः । गूर्दयति । छर्दण् व-
मने ७० । अचच्छर्दत् । गर्दण् शब्द इति केचित्पठन्ति । गर्दयति । बुधुण् हिंसायाम् ७१ । ढान्तोऽयमित्येके । वर्धण्
छेदनपूरणयोः ७२ । गर्धण् अभिकांक्षायाम् ७३ । गर्धयति । बन्ध बधण् संयमने ७४ । छपुण् गतौ ७५ । क्षपु-
ण् क्षान्तौ ७६ । ष्टूपण् समुच्छ्राये ७७ । स्तूपयति । अषोपदेशोऽयमिति केचित् । ह्रस्वोपान्त्य इत्यन्ये । डिपण् क्षेपे
७८ । डूलपण् व्यक्तायां वाचि ७९ । डपु डिपुण् संघाते ८० । अभिमर्दन इति केचित् । भान्तावेतावितन्ये । शूर्पण्

माने ८१ । शूर्पयति । शुल्वण् सर्जने च ८२ । चान्माने । डबु डिबुण् क्षेपे ८३ । विडम्बयति । केचित्तु दभदिबुद भूनपीडाधीयते । सम्बण् सम्बन्धे ८४ । षोपदेशोऽयमित्यन्ये । द्रमिलास्तु तालव्यादिमिममिच्छन्ति । साम्बेत्यपरे । कुबुण् आच्छादने ८५ । कुम्बयति । लबु तुबुण् अर्दने ८६ । तुपुणइत्यपरे । पुर्बण् निकेतने ८७ । पूर्बयति । यमण् परिवेषणे ८८ । यामयत्यतिथीन् चन्द्रमसं वा । परिवेषणादन्यत्र तु ॥ यमोऽपरिवेषणे णिचि च ॥ ४ । २ । २९॥ अणिचि च णौ ह्रस्वो ञिणम्परे तु वा दीर्घः । यमयति । यमः परिवेषण इत्यन्ये । णाविति सिद्धे णिचि चेति वचनादन्येषां णिचि न । स्यामयते । निशामयति । व्ययण् क्षये ८९ । व्याययति । यत्रुण् संकोचने ९० । कुद्रुण् अनृतभाषणे ९१ । कुन्द्रयति । गादिरयमित्यन्ये । श्वभ्रण् गतौ ९२ । तिलण् स्नेहने ९३ । तेलयति । जलण् अपवारणे ९४ । क्षलण् शौचे ९५ । क्षालयति । पुलण् समुच्छ्राये ९६ । बिलण् भेदे ९७ । भिलेति कौशिकः । तलण् प्रतिष्ठायाम् ९८ । तुलण् उन्माने ९९ । तोलयति । तुलयति तुलना इत्यादि तु तुलाशब्दाद् णिज् बहुलमिति णिचि । दुलण् उत्क्षेपे १०० । चुलण् निमज्जने १०१ । मूलण् रोहणे १०२ । कल किल पिलण् क्षेपे १०३ । पलण् रक्षणे १०४ । पालयति । इलण् प्रेरणे १०५ । चलण् भृतौ १०६ । सान्त्वण् सामप्रयोगे १०७ । केचित्तु षोपदेशमिममाहुः । साम सान्त्वप्रयोगे इति चन्द्रः । धूशण् कान्तीकरणे १०८ । अदूधुशन् । धूषणइत्यन्ये । धूसण् इत्येके । श्लिषण् श्लेषणे १०९ । लूषण् हिंसायाम् ११० । रुषण रोषे १११ । प्युषण् उत्सर्गे ११२ । पसुण् नाशने ११३ । पंसयति । जसुण् रक्षणे ११४ । पुंसण् अभिमर्दने ११५ । ब्रुस पिस जस बर्हण् हिंसायाम् ११६ । स्निहण् स्नेहने ११७ । म्रक्षण् म्लेच्छने ११८ । भक्षण् अदने ११९ पक्षण् परिग्रहे १२० । लक्षीण् दर्शनाङ्कयोः १२१ । ईदित्वात्फलवति कर्त्तर्यात्मनेपदम् । अन्यत्र परस्मैपदम् । लक्षयते । लक्षयति । इतोऽर्थविशेषे आलक्षिणः । अतः परं प्रागुक्ता अलक्षिणपर्यन्ता अर्थविशेषे ये चुरादयस्ते प्रस्तूयन्ते । ज्ञाण् मारणादिनियोजनेषु १२२ ॥ मारणतोषणनिशाने

ज्ञश्च ॥ ४ । २ । ३० ॥ णिचि अणिचि च णौ ह्रस्वो ञिणम्परे तु णौ वा दीर्घः । चकारो णिचि चेत्यस्यानुकर्षणार्थः । केचित्तु निशामन इच्छन्ति । निशामनमालोचनं प्रणिधानम् ॥ अर्त्तिरीब्लीह्रीक्नूयिक्ष्माय्यातां पुः ॥ ४ । २ । २१ ॥ णावन्तः । मारणे, संज्ञपयति पशून् । तोषणे, ज्ञपयति गुरून् । निशाने, ज्ञपयति शरान् । अन्यत्र आज्ञापयति भृत्यम् । बहुवचनं व्याप्त्यर्थम् । तेन नाम्नोऽपि सत्यापयति । पुस्पावित्यत्र विशेषणार्थ उकारः । अर्थान्तरे तु क्र्यादिः । जानाति । णिचि णिगि च रूपसाम्येऽप्यर्थभेदः । एकत्र स्वार्थोऽन्यत्र प्रयोक्तृव्यापारः । च्युण् सहने १२३ । च्यावयति शरान् । सहत इत्यर्थः । भूण् अवकल्कने १२४ । अवकल्कनं मिश्रीकरणम् । भावयति दध्नौदनम् । विकल्कन इति नन्दी । अवकल्पन इत्यन्ये ॥ ओर्जान्तस्थापवर्गेऽवर्णे ॥ ४ । १ । ६० ॥ धातोर्द्वित्वे पूर्वस्य सनि इकारोऽन्तादेशः ॥ अबीभवत् । जान्तस्थापवर्ग इति किम् । जुहावयिषति । अवर्ण इति किम् । बुभूषति ॥ बुकण् भाषणे । १२५ । भषण इत्यन्ये । भषणं श्वरवः । रक लक रग लगण् आस्वादने १२६ । आप्यावासादन इति केचित् । रागयति । लागयति । णिगि घटादित्वाद्ध्रस्वः । लिगुण् चित्रीकरणे १२७ । लिङ्गयति । चर्चण् अध्ययने १२८ । अन्यत्र चर्चं परिभाषण इति केचित् । अञ्चण् विशेषणे १२९ । अञ्चयति । मुचण् प्रमोचने १३० । प्रयोजनायामिति केचित् । मोचयति कुण्डले । प्रयोजयतीत्यर्थः । अर्जण् प्रतियत्ने १३१ । अर्जयति हिरण्यम् । भजण् विश्राणने १३२ । विश्राणनं विपचनम् । चट स्फुटण् भेदे १३३ । चाटयति । णिचोऽनित्यत्वाच्चटति । घटण् संघाते १३४ । घाटयति । अन्यत्र तु णिगि घटयति । हन्त्यर्थाश्च । येऽन्यत्र हिंसार्था अधीयन्ते तेऽपि चुरादौ विज्ञेयाः ॥ ञ्णिति घात् ॥ ४ । ३ । १०० ॥ हन्तेः । घातयति । अनेनैव सिद्धेऽन्येषां हिंसार्थानां पाठोऽत्रात्मनेपदादिगतरूपभेदार्थः । कणण् निमीलने १३५ । काणयति । अचीकणत् । अचकाणत् । यतण् निकारोपस्कारयोः १३६ । निकारः खेदनम् । यातयत्यरिम् । निरश्च प्रतिदाने १३७ । निर्यातयति ऋणम् । शोधयतीत्यर्थः । शब्दण् उपसर्गाद् भाषा

विष्कारयोः १३८ । विशब्दयति । नन्दी तु योगविभागमिच्छति । शब्दण् उपसर्गादित्येके । भाषाविष्कारयोरिति द्वितीयः । अयमनुपसृष्टार्थः । प्रशब्दयति । शब्दयति । सूदण् आश्रवणे १३९ । क्षरण इति केचित् । सूदयति । आङः क्रन्दण् सातत्ये १४० । आक्रन्दयति । ष्वदण् आस्वादने १४१ । संवरण इत्यन्ये । स्वादयति । आस्वदः सकर्मकादेव स्वदेर्णिच् न त्वकर्मकात् । आस्वादयति यवागूम् । मुदण् संसर्गे १४२ । मोदयति सक्तून् सर्पिषा । शृधण् प्रसहने । १४३ । प्रसहनमभिभवः । अशीशृधत् । अशशर्धत् । कृपण् अवकल्कने १४४ । अवकल्कनं मिश्रीकरणं सामर्थ्यञ्च । कल्पयति । अवकल्पनमित्यन्ये । जभुण् नाशने १४५ । जम्भयति । अमण् रोगे १४६ । आमयति । चरण् असंशये १४७ । विचारयति । निश्चिनोतीत्यर्थः । संशये इत्यन्ये । पूरण् आप्यायने १४८ । पूरयति । दलण् विदारणे १४९ । णिगि दलयतीत्येके । दिवण् अर्दने १५० । पशू पषण् बन्धने १५१ । पाशयति पशुम् । पाषयति । दन्त्यान्त्यमिमच्छन्त्येके । पुषण् धारणे १५२ । घुषिंण् विशब्दने १५३ । विशिष्टशब्दकरणे नानाशब्दकरणे इति वा । अविशब्दन इत्येके । अपघोषयति पापम् । अपन्हुत इत्यर्थः । ऋदित्करणाण्णिचोऽनित्यत्वम् । अघुषत् । अघोषीत् । कौशिकस्त्वनृदितमिममिच्छति । आङः क्रन्दे १५४ । सातत्य इत्यपरे । आघोषयति । भूष तसुण् अलङ्कारे १५५ । भूषयति । अवतंसयति । जसण् ताडने १५६ । त्रसण् वारणे १५७ । धारण इति नन्दी । त्रासयति मृगान् । निराकरोतीत्यर्थः । वसण् स्नेहच्छेदावहरणेषु १५८ । अवहरणं मारणम् । वासयति रिपून् । ध्रसण् उत्क्षेपे १५९ । उञ्छ इति केचित् । ध्रासयति । ग्रसण् ग्रहणे १६० । लसण् शिल्पयोगे १६१ । लष इत्यन्ये । लश इत्यपरे । अर्हण् पूजायाम् १६२ । आर्जिहत् । मोक्षण् असने १६३ । मोक्षयति बाणान् । अस्यतीत्यर्थः । लोकृ तर्क रघु लघु लोचृ विच्छ अजु तुजु पिजु लजु लुजु भजु पट पुट लुट घट घट्ट वृत पुथ नद बुध गुप धूप कुप चिव दशु कुशु त्रसु पिसु कुसु दसु बर्ह बृह वल्ह अहु वहु महुण् भासार्थाः १६४ । भासार्थाश्चेति पारायणम् । भासयति इन्धयति प्रकाशयति दीपयति दिशः । भाषार्था इत्यन्ये

॥ इति परस्मैपदिनः ॥

॥ अथात्मनेपदिनः ॥

युणि जुगुप्सायाम् १ । यावयते पापम् । अन्यत्र यौति । युनाति । युनीते । युजिरयमित्येके । गॄणि विज्ञाने २ । गारयते । विज्ञापन इति केचित् । कॄणित्यन्ये । वञ्चिण् प्रलम्भने ३ । वञ्चयते । कुटिण् प्रतापने ४ । मादण् तृप्तियोगे ५ । तृप्तिशोधन इत्यन्ये । मादयते । विदिण चेतनाख्याननिवासेषु ६ । वेदयते । विवादेऽप्यन्ये । मनिण् स्तम्भे ७ । स्तम्भो गर्वः । बलि भलिण् आभण्डने ८ । आभण्डनं निरूपणम् । दिविण् परिकूजने ९ । वृषिण् शक्तिबन्धे १० । आवर्षयते ग्रामः । शक्तिं बध्नातीत्यर्थः । शक्तिबन्धः प्रजनसामर्थ्यमित्यन्ये । कुत्सिण् अवक्षेपे ११ । लक्षिण आलोचने १२ । लक्षयते । अतः परमर्थान्तरेऽप्यात्मनेपदिनश्चुरादयः । हिष्कि किष्किण् हिंसायाम १३ । निष्किण् परिमाणे १४ । तर्जिण् संतर्जने १५ । कूटिण् अप्रमादे १६ । आप्रदान इत्यपरे । त्रुटिण् छेदने १७ । डान्तोऽयमित्येके । शठिण् श्लाघायाम् १८ । शाठयते । शटीति नन्दी । शळीति कौशिकः । कूणिण संकोचने १९ । तूणिण् पूरणे २० । तूलेति केचित् । भ्रूणिण् आशंसायाम् २१ । आशङ्कायामित्यन्ये । चितिण् संवेदने २२ । चेतयते । वस्ति गन्धिण् अर्दने २३ । डपि डिपि डम्पि डिम्पि डम्भि डिम्भिण् संघाते २४ । स्यमिण् वितर्के २५ । शमिण् आलोचने २६ । शामयते । कुस्मिण् कुस्मयने २७ । कुस्मेति नाम्नो णिजित्यन्ये । गूरिण् उद्यमे २८ । गूरयते । तन्त्रिण् कुटुम्बधारणे २९ । तन्त्रयते । कुटुम्बेत्यपि धातुरिति चान्द्राः । कुटुम्बयते । मन्त्रिण् गुप्तभाषणे ३० । ललिण् ईप्सायाम् ३१ । लालयते । गळिण् स्रावण इति केचित् । स्पशिण् ग्रहणश्लेषणयोः ३२ । दंशिण् दशने ३३ । दशनं दंष्ट्राव्यापारः । दंशयते ।

दक्षिण् दान इति केचित् । दंसिण् दर्शने च । ३४ । चाक्शने । भर्त्सिण् संतर्जने । ३५ । यक्षिण् पूजायाम् । ३६ । यक्षयते । अययक्षत । इत्यात्मनेभाषाः । इतोऽदन्ताः । अदन्तत्वे हि सुखयति रचयतीत्यादावल्लुकः स्थानिवद्भावाद्गुणवृद्ध्यभावः । अररचत् । असुसुखत् । असमानलोपित्वात्सन्वद्भावदीर्घयोरभावः । असुसूचत् । अत्रोपान्त्यह्रस्वाभावः । श्लेषकादीनां तूक्तफलाभावेऽपि पूर्वाचार्यानुरोधेनादन्तेषु पाठः । णिजभावे यङ्निवृत्त्यर्थं इत्येके । द्रुमिलास्त्वेवंप्रकाराणामदन्तत्वसामर्थ्यादल्लोपाभावं मन्यन्ते । वृद्धौ दुःखापयतीत्यादि, ते हि ञ्णिति इति वृद्धिं स्वरमात्रस्येच्छन्ति । अङ्कण् लक्षणे । १ । अङ्कयति । ओजांन्तेति सूत्रे पयेऽवर्णे इति सिद्धे जान्तःस्थावर्गग्रहणं ज्ञापयति । णौ यत् कृतं कार्यं तत्सर्वं स्थानिवद् भवतीति । तेनान्तरङ्गत्वात्कृतेऽप्यल्लुकि तस्य स्थानिवद्भावात्कशब्दस्य द्वित्वम्, रूपातिदेशात् । आञ्चकत् । नन्वत इति सूत्रेऽशितीति विषयसप्तमीविज्ञानपक्षेऽल्लोपस्य णिनिमित्तकत्वाभावेन कथमिहैतन्न्यायप्रवृत्तिरिति चेत्।येन विना यन्न भवति तत्तस्य निमित्तमिति अल्लोपस्य णिनिमित्तकत्वात्।वस्तुतस्तु तत्र परसप्तमीपक्ष एव सूत्रकृतोऽभिमतः । अत एव कर्तुः क्विप् गल्भेति सूत्रे बृहद्वृत्तौ गल्भांचक्रे इत्युदाहरणं संगच्छते । अन्यथा प्रत्ययोत्पत्तेः पूर्वमेवाल्लोपेऽनेकस्वरात्परत्वाभावेन परोक्षाया आम्न स्यात् ॥ एतच्च ज्ञापकमवर्ण एव द्रष्टव्यम्। तेनाचिकीर्त्तदिति सिद्धम् । श्लेष्कण् दर्शने । २ । सुख दुःखण् तत्क्रियायाम् । ३ । सुखयति । दुःखयति । अङ्गण् पदलक्षणयोः ४ । अघण् पापकरणे ५ । रचण् प्रतियत्ने ६ । अररचत् । सूचण् पैशुन्ये ७ । सूचयति । असुसूचत् । अषोपदेशत्वान्न षः । भाजण् पृथक्कर्मणि । ८ । सभाजण् प्रीतिसेवनयोः । ९ । प्रीतिदर्शनयोरित्यपरे । लज लजुण् प्रकाशने । १० । कूटण् दाहे । ११ । पटव टुण् ग्रन्थे । १२ । खेटण् भक्षणे १३ । आमन्त्रणे इत्येके । खेडिति देवनन्दी । खोटण् क्षेपे । १४ । डान्तोऽयमिति देवनन्दी । दान्तोऽयमित्यपरे । पुटण् संसर्गे । १५ । वटुण् विभाजने । १६ । वण्टयति । वण्टापयतीति केचित् । षठ श्वठण् सम्यग्भाषणे । १७ । दण्डण् दण्डनिपातने । १८ । व्रणण् गात्रविचूर्णने । १९ । वर्णण्

वर्णक्रियाविस्तारगुणवचनेषु । २० । वर्णक्रिया वर्णनं वर्णकरणं वा । गुणवचनं स्तुतिः शुक्लाद्युक्तिर्वा । पर्णण् हरितभावे । २१ । कर्णण् भेदे । २२ । तूणण् सङ्कोचने । २३ । वितूणयति वदनम् । गणण् सङ्ख्याने । २४ ॥ ईं च गणः ॥ ४ । १ । ६७ ॥ ङपरे णौ द्वित्वे पूर्वस्याः । अजीगणत् । अजगणत् । भूरिदाक्षिण्यसम्पन्नं यस्त्वं सान्त्वमचीकथः इति प्रयोगदर्शनादन्येषामपीत्वं यथादर्शनमिच्छन्त्येके । कुण गुण केतण् आमन्त्रणे । २५ । आमन्त्रणं गूढोक्तिः । केतयति । अयं निश्रावणनिमन्त्रणयोरपीत्येके । पतण् गतौ वा । २६ । पतयति । वा शब्दाद्युगपदनदन्तत्वणिजभावौ । पतति । अपातीत् । अपतीत् । णिच्संनियोगेऽप्यनदन्तत्वमित्येके । णिजभावेऽप्यदन्तत्वमित्यपरे । वातण् गतिसुखसेवनयोः । २७ । सुखसेवनयोरित्येके । वा इति पृथग्धातुरित्येके । वापयति । कथण् वाक्यप्रबन्धे । २८ । वाक्यप्रतिबन्ध इत्यन्ये । वदन इत्यपरे । कथयति । अचकथत् । श्रथण् दौर्बल्ये । २९ । श्रथयति । लत्वे श्लथयतीत्यपि । छेदण् द्वैधीकरणे । ३० । छेदयति । गदण् गर्जे । ३१ । अजगदत् । अन्धण् दृष्ट्युपसंहारे । ३२ । आन्दधत् । “न बदनं संयोगादिः” इति द्वित्वनिषेधः । स्तनण् गर्जे । ३३ । स्तनयति । ध्वनण् शब्दे । ३४ । ध्वनयति । स्तेनण् चौर्ये । ३५ । स्तेनयति । अतिस्तेनत् । अनेकस्वरत्वेनाषोपदेशत्वात्षत्वाभावः । ऊनण् परिहाणे । ३६ । ऊनयति । औननत् । मा भवान् ऊननत् । कृपण् दौर्बल्ये । ३७ । कृपयति । रूपण् रूपक्रियायाम् । ३८ । राजमुद्रादिरूपस्य करणे रूपदर्शने इति वाऽर्थः । क्षप लाभण् प्रेरणे । ३९ । भामण् क्रोधे । ४० । अबभामत् । गोमण् उपलेपने ४१ । गोमयति । अजुगोमत् । सामण् सान्त्वने । ४२ । सामयति । प्रीणयतीत्यर्थः । श्रामण् आमन्त्रणे । ४३ । स्तोमण् श्लाघायाम् । ४४ । व्ययण् वित्तसमुत्सर्गे । ४५ । व्ययति । गतावित्येके । त्रितेति धात्वन्तरमिति केचित् । त्रितयति । सूत्रण् विमोचने । ४६ । विमोचनं ग्रन्थनम् । सूत्रयति । असुसूत्रत् । मूत्रण् प्रस्रवणे । ४७ । पार तीरण् कर्मसमाप्तौ । ४८ । कत्र गात्रण् शैथिल्ये । ४९ । चित्रण् चित्रक्रियाकदाचिद्दृष्ट्योः । ५० । चित्रयति । आलेख्यं करोति कदाचित्पश्यति

वेत्यर्थः । वैचित्र्यकरणार्थोऽयं न चित्रक्रियार्थं इत्यपरे । छिद्रण् भेदे ५१ । मिश्रण् संपर्चने ५२ । वरण् ईप्सायाम् ५३ । वरयति । स्वरण् आक्षेपे ५४ । शारण् दौर्बल्ये ५५ । शारयति । शरैति मन्दी । कुमारण् क्रीडायाम् ५६ । कुमारयति । अचुकुमारत् । लान्तोऽयमित्यन्ये । कलण् संख्यानगत्योः ५७ । कलयति । क्षेपे तु कालयति गाः । शीलण् उपधारणे ५८ । उपधारणमभ्यासः परिचयो वा । शीलयति । वेल कालग उपदेशे ५९ । वेलयति । वेलण् कालोपदेश इत्यन्ये । पल्यूलण् लवनपवनयोः ६० । अपपल्यूलत् । वल्यूलेत्यन्ये । अंशण् समाघाते ६१ । विभजन इत्यर्थः । अंशयति । दन्त्यान्तोऽयमिति चन्द्रः । पषण् अनुपसर्गः ६२ । पषयति । उपसर्गे तु प्रपषति । गवेषण् मार्गणे ६३ । मृषण् क्षान्तौ ६४ । अममृषत् । णिचोऽनित्यत्वे । मृषति । रसण् आस्वादनस्नेहनयोः ६५ । वासण् उपसेवायाम् ६६ । निवासण आच्छादने ६७ । अनिनिवासत् । चहण् कल्कने ६८ । चहणः शाठ्ये ॥ ४ । २ । ३१ ॥ णिचि णौ च परे ह्रस्वो ञिणम्परे तु वा दीर्घः । अत्रादन्तत्वात्सिद्धावपि दीर्घार्थं वचनम् । चहयति । महण् पूजायाम् ६९ । रहण् त्यागे ७० । अररहत् । रहुण् गतौ ७१ । रंहयति । रंहापयतीत्यपि मतान्तरे । स्पृहण् ईप्सायाम् ७२ । स्पृहयति । रूक्षण् पारुष्ये ७३ । अरुरूक्षत् । ॥ इत्यदन्ताः परस्मैपदिनः ॥

---

मृगणि अन्वेषणे १ । मृगयते । अर्थणि उपयाचने २ । अर्थयते । पूर्वाचार्यानुरोधेनास्यादन्तेषु पाठः । अर्थापयते इत्यपि केचित् । अन्ये तु णिजभावेऽप्यदन्तत्वार्थोऽस्य पाठः । तेनानेकस्वरत्वाद्यङ् न । एवं गर्विप्रभृतीनामपि । पदणि गतौ ३ । पदयते । संग्रामणि युद्धे ४ । संग्रामयते । अयं परस्मैपदीत्येके । शूर वीरणि विक्रान्तौ ५ । सत्रणि संदानक्रियायाम् ६ । संतानक्रियायामित्येके । अससत्रत । स्थूलणि परिबृंहणे ७ । गर्वणि माने ८ । गृहणि ग्रहणे ९ । अजगृहत । कुहणि विस्मापने १० । कुहयते । सुखादीनामदन्तत्वं च णिच्सन्नियोग एव । तेन णिजभावे जगण जग-

णतुः जगणिथेत्यादौ अनेकस्वरत्वाभावादाम् न । न च ञिश्वे सत्यनेकस्वरत्वादाम् दुर्वार इति वाच्यम् । सन्निपातपरिभाषया तन्निराकरणात् ।

॥ इत्यात्मनेपदिनोऽदन्ताश्च ॥

युजण् सम्पर्चने १ । युजादेर्न वा ॥३।४।१८॥ स्वार्थे णिच् । योजयति । योजति । अयूयुजत् । लीण् द्रवीकरणे २ । लियो नोऽन्तः स्नेहद्रवे ॥ ४ । २ । १५ ॥ गम्ये णौ नोऽन्तो वा । घृतं विलीनयति । विलाययति । लीङ् इतीकारमश्लेषादीकारान्तस्यैव भवति।कृतात्वस्य तु लकारपकारौ । स्नेहद्रव इति किम् ?। लोहं विलापयति । लीङ्लिनोर्वेति वात्वमस्यापीत्येके । तन्मते । लोलः ॥ ४ । २ । १६ ॥ णौ स्नेहद्रवे गम्ये वा । घृतं विलालयति विलापयति वा । स्नेहद्रव इत्येव । जटाभिरालापयते । लीङ्लिन इति वक्ष्यमाणेनात्मनेपदमात्वं चास्यापि, णिच्यपीत्येके । कस्त्वामुल्लापयते । णिजभावे विलयति । मीण् मतौ ३ । गतावित्यन्ये । प्रीगण् तर्पणे ४ ॥ धूग्प्रीगोर्नः ॥ ४ । २।१८॥ णौ । प्रीणयति । यौजादिकयोर्नेच्छन्त्येके । तन्मते प्राययति । गित्वात् णिगभावे फलवति कर्त्तर्यात्मनेपदम् । प्रयति । प्रयते । अनुबन्धनिर्देशो यङ्लुब्निवृत्त्यर्थः धुवतिप्रीयतिनिवृत्त्यर्थश्च । धूग्ण् कम्पने ५ । धूनयति । धवति । धवते । आधावीत् । अधविष्ट । अधोष्ट । वृग्ण् आवरणे ६ । वारयति । वरति । वरते । जॄण् वयोहानौ ७ । जारयति । जरति । चीक शीकण् आमर्षणे ८ । अचीचिकत् । अचीकीत् । मार्गण अन्वेषणे ९ । मार्गयति । मार्गति । पृचण् संपर्चने १० । रिचण् वियोजने ११ । रेचयति । रेचति । वचण् भाषणे १२ । सन्देशन इत्येके । वच्यात् । यजादिवचेरिति तु नात्र, तत्र यौजादिकस्य वचोऽग्रहणात् । अर्चिण् पूजायाम् १३ वृजैण् वर्जने १४ । मृजौण् शौचालङ्कारयोः १५ । मृजोऽस्येति वृद्धौ । मार्जयति । मार्जति । मार्जयिता । मार्जिता । मार्ष्टा । कठुण् शोके १६ । कण्ठयति । उत्कण्ठयति । श्रन्थ ग्रन्थण् सन्दर्भे १७ । क्रथ अर्दिण् हिंसायाम् १८ । क्राथयति । अर्दयति । अर्दते ।

श्रथण् बन्धने च १९। वदिण् भाषणे २०। वादयति। संवदते। छदण् अपवारणे २१। छादयति। छदति। आङः सदण् गतौ २२। आसादयति। आसीदति। आसदतीति केचित्। अनुस्वारेदयमित्येके। छृदण् संदीपने २३। छर्दयति। छर्दति। छर्दिष्यति। कृतचृतेति तु न, तृदसाहचर्यात् रुधादेरेवच्छृदेस्तत्र ग्रहणात्। एदिदयमित्येके। शुन्धिण् शुद्धौ २४। शुन्धयति। शुन्धते। अनिदिदयमित्येके। तनूण् श्रद्धाघाते २५। श्रद्धोपकरणयोरित्यन्ये। तानयति। तनति। उपसर्गाद्दैर्घ्ये २६। आतानयति। मानण् पूजायाम् २७। मनणित्येके। तपिण् दाहे २८। तापयति। तपते। तृपण् प्रीणने २९। सन्दीपन इत्येके। आप्लृण् लम्भने ३०। लम्भनं प्राप्तिः। आपयति। आपति। आपिपत्। आपत्। दभैण् भये ३१। ईरण् क्षेपे ३२। गतावित्येके। मृषिण् तितिक्षायाम् ३३। मर्षयति। मर्षते। अर्चिअर्दितपिवदिमृषयः परस्मैपदिन इति भीमसेनीयाः। शिषण् असर्वोपयोगे ३४। अनुपयुक्तत्व इत्यर्थः। विपूर्वोऽतिशये ३५। अतिशय उत्कर्षः। विशेषयति। विशेषति। जुषण् परितर्कणे ३६। परितर्पण इति केचित्। धृषण् प्रसहने ३७। प्रसहनमभिभवः। आदिदयमित्येके। हिंसुण् हिंसायाम् ३८। हिंसयति। हिंसति। गर्हण् विनिन्दने ३९। षह मर्षणे ४०। साहयति। सहति। बहुलमेतन्निदर्शनम्। नवगणीपठितभवत्यादिधातुनिदर्शनमित्यर्थः। तेनात्रापठिता अपि वक्कविप्रभृतयो लौकिकाः स्तम्भ्वादयः सौत्राश्चुलुम्पादयो वाक्यकरणीया धातव उदाहार्याः। विक्लवन्ते दिवि ग्रहाः। विच्छायीभवन्तीत्यर्थः। उपक्षपयति प्रावृट्। असन्नीभवतीत्यर्थः। उत्तभ्नाति। "निपानं दोलयन्नेष प्रेङ्खोलयति मे मनः। पवनो वीजयन्नाशा ममाशामुच्चुलुम्पति ॥ तावत्खरः प्रखरमुल्ललयांचकार। यद्वा भ्वादिगणाष्टकोक्ताः स्वार्थणिजन्ता अपि बहुलं भवन्ति। चुरादिपाठस्तु निदर्शनार्थः, यदाहुः--निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते।" रामो राज्यमचीकरत्। अकार्षीदित्यर्थः। प्रयोज्यव्यापारेऽपि प्रयोक्तृव्यापारानुप्रवेशो णिगं विनापि बुद्ध्यारोपाद्बहुलं भवति। जजान गर्भं मघवा, इन्द्रोऽजीजनदित्यर्थः। वान्ति पर्णशुषो वाता

वान्ति पर्णमुचोऽपरे । वान्ति पर्णरुहोऽप्यन्ये ततो देवः प्रवर्षति । १ । अथवा णिज्बहुलमित्येव सिद्धे सूत्रमूत्रच्छिद्रान्धादय उदाहरणार्थाः । तेनादन्तेष्वनुक्ता अपि बहुलं द्रष्टव्याः, तेन स्कन्ध समाहारे स्कन्धयति । स्फुट प्रकटभावे स्फुटयति । वस निवासे वसयतीत्यादयोऽपि भवन्ति ॥ युजादयः परस्मैपदिनः ॥

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां चुरादयो णितो धातवः ॥

---

॥ भूङः प्राप्तौ णिङ् ॥ ३ । ४ । १९ ॥ धातोर्वा । भावयते । भवते । प्राप्नोतीत्यर्थः । भवतीत्येवान्यत्र । णिङिति ङकार आत्मनेपदार्थः । भूङ इति ङकारनिर्देशो णिङभावेऽप्यात्मनेपदार्थः । अर्थान्तरेऽपि क्वचिदात्मनेपदमिष्यते । यथा, याचितारश्च नः सन्तु दातारश्च भवामहे । आक्रोष्टारश्च नः सन्तु क्षन्तारश्च भवामहे इति । प्राप्तावपि परस्मैपदमित्यन्ये । सर्वं भवति प्राप्नोतीत्यर्थः ॥

---

## ॥ अथ णिगन्तप्रक्रिया ॥

॥ प्रयोक्तृव्यापारे णिग् ॥ ३ । ४ । २० ॥ कर्त्तारं यः प्रयुङ्क्ते स प्रयोक्ता तद्व्यापारेऽभिधेये धातोर्णिग् वा । व्यापारश्च प्रेषणाध्येषणनिमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा । तत्र तिरस्कारपूर्वको व्यापारः प्रेषणम् । सत्कारपूर्वकस्त्वध्येषणम् । भवन्तं प्रयुङ्क्ते भावयति । भावयते । कुर्वन्तं प्रयुङ्क्ते कारयति । अत्र प्रेषणेनाध्येषणेन वा यथासम्भवं प्रयोक्तृत्वम् । वासयति भिक्षा । अत्र निमित्तभावेन । राजानमागच्छन्तं प्रयुङ्क्ते राजानमाग-

मयति । अत्राख्यानेन । आख्यानेन हि बुध्यारूढा राजादयः प्रयुक्ताः प्रतीयन्ते । कंसं घ्नन्तं प्रयुङ्क्ते कंसं घातयति नटः । अत्राभिनयेन । पुष्येण युञ्जन्तं प्रयुङ्क्ते पुष्येण योजयति चन्द्रम् । अत्र कालज्ञानेन । उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां सूर्यमुद्गच्छन्तं प्रयुङ्क्ते माहिष्मत्यां सूर्यमुद्गमयति । अत्र प्राप्त्या । ननु कर्त्ताऽपि करणादीनां प्रयोजक इति तद्व्यापारेऽपि णिगस्त्विति चेत्, न, प्रयोक्तृग्रहणसामर्थ्यात् । तथा क्रियां कुर्वन्नेव कर्त्ताऽभिधीयते । तेन तूष्णीमासीने प्रयोज्ये मा पृच्छतु भवान् अनुयुङ्क्तां मां भवानित्यत्र णिग् न । पञ्चम्या बाधितत्वाद्वा । बाधिकार आबहुलवचनात्पक्षे वाक्यार्थः । ओर्जान्तस्थापवर्गेऽवर्णे । अबीभवत् । जुं इति सौत्रो धातुः । अजीजवत् । अयीयवत् । अरीरवत् । अलीलवत् । अपीपवत् । अमीमवत् । जान्तस्थापवर्ग इति किम् ?। जुहावयिषति । अवर्णान्त इति किम् ?। बुभूषति ॥ श्रुस्रुद्रुप्रुप्लुच्य्वोर्वा ॥ ४ । १ । ६१ ॥ सनि द्वित्वे सति पूर्वस्योकारान्तस्यावर्णान्तायामन्तस्थायां परस्यामिः । अशिश्रवत् । अशुश्रवत् । असिस्रवत् । असुस्रवत् । अदिद्रवत् । अदुद्रवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत् । अचुच्यवत् । अशशासत् । अडुढौकत् । अचचकासत् । अचीचकासदित्यपरे । राजयति । अरराजत् । चोरितवन्तं प्रयोजितवान् अचूचुरद्धनं चौरेण । अवीवदद्वीणां परिवादकेन ॥ घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे ॥ ४ । २ । २४ ॥ णौ । घटयति । अजीघटत् । स्मरयति । स्मृदृत्वरेति पूर्वस्यात्वम् । असस्मरत् । अददरत् । अतत्वरत् ॥ वा वेष्टचेष्टः ॥ ४ । १ । ६६ ॥ असमानलोपे ङपरे णौ द्वित्वे पूर्वस्याकारोऽन्तः । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् ॥ कगेवनूजनैजॄष्क्नसरञ्जः ॥ ४ । २ । २५ ॥ णौ ह्रस्वो ञिणम्परे तु णौ वा दीर्घः । कगे इति सौत्रो धातुः । कगयति । उपवनयति । जनयति । जरयति । क्नसयति । केचित्तु ष्णसूच् इत्यस्या पीच्छन्ति । घटादयः पठितार्था एव गृह्यन्ते । कगादीनां त्वर्थविशेषो नोपादीयते ॥ णौ मृगरमणे ॥ ४ । २ । ५१ ॥ रञ्जेरुपान्त्यनकारस्य लुक् । रजयति मृगान् व्याधः । मृगरमण इति किम् ?। रञ्जयति रजको वस्त्र-

म ॥ अमोऽकम्यमिचमः ॥ ४ । २ । २६ ॥ णौ ह्रस्वो ञिणम्परे तु णौ वा दीर्घः । रमयति । गमयति । कथं संक्रामयति । संक्रामन्तं करोतीति णिजन्ताण्णिजि भविष्यति । अकम्यमिचम इति किम् ?। कामयते । आमयति । आचामयति ॥ पर्यपात्स्खदः ॥ ४ । २ । २७ ॥ णौ ह्रस्वो ञिणम्परे तु वा दीर्घः । परिस्खदयति । अपस्खदयति । घटादिपाठेन सिद्धे नियमार्थं वचनम् । अन्योपसर्गपूर्वस्य मा भूत् । प्रस्खादयति । अन्ये तु पर्यपपूर्वस्य स्खदेर्ह्रस्वनिषेधमिच्छन्ति । अवादप्यन्ये । अवस्खदयति ॥ शमोऽदर्शने ॥ ४ । २ । २८ ॥ णौ ह्रस्वो ञिणम्परे तु वा दीर्घः । शमयति रोगम् । अदर्शनइति किम् ?। निशामयति रूपम् । दर्शन एव केचिदिच्छन्ति ॥ ज्वलह्वलह्मलग्लास्नावनूवमनमोऽनुपसर्गस्य वा ॥ ४ । २ । ३२ ॥ णौ ह्रस्वः । ज्वलयति । ज्वालयति । ह्वलयति ह्वालयति । ह्मलयति । ह्मालयति । ग्लपयति । ग्लापयति । स्नपयति । स्नापयति । वनयति । वानयति । वमयति । वामयति । नमयति । नामयति । अनुपसर्गस्येति किम् ?। प्रज्वलयति । ञिणम्परे दीर्घविकल्पस्तु सिद्ध एव । उभयत्र विभाषेयम् । नित्यादपि द्विर्वचनात्प्रागेवोपान्त्यह्रस्वः ओणेर्ऋदित्करणाज्ज्ञापकात् । मा भवान् अटिटत् । मा भवानिदिधत् । मा भवान् प्रेदिधत् । आटिटत् । आशिशत् । भ्राजयति । भ्राजभासेति ह्रस्वविकल्पः । अबिभ्रजत् अबभ्राजत् । इत्यादि । वर्त्तयति । ऋद्वर्णस्य । अवीवृतत् । अववर्त्तत् । अमीमृजत् । अममार्जत् । घ्रापयति ॥ जिघ्रतेरिः ॥ ४ । २ । ३८ ॥ उपान्त्यस्य ङपरे णौ वा । अजिघ्रिपत् । अजिघ्रपत् । तिव्निर्देशाद्यङ्लुपि न । अजाघ्रपत् ॥ तिष्ठतेः ॥ ४ । २ । ३९ ॥ उपान्त्यस्य ङपरे णाविः । अतिष्ठिपत् । तिव्निर्देशाद्यङ्लुपि न । अतास्थपत् । योगविभागो नित्यार्थः ॥ ऊदुदुषो णौ ॥ ४ । २ । ४० ॥ उपान्त्यस्य । दूषयति । णाविति किम् ? दोषः । धातोः स्वरूपग्रहणे तत्प्रत्ययविज्ञानादिह न । दोषणं दुट् भावे क्विप् । दुषमाचष्टे दुषयति । पुनर्णिग्रहणं ङनिवृत्त्यर्थम् । ङे ह्रस्वे नेत्यन्ये । तन्मतसङ्ग्रहार्थमूकारः प्रश्लेष्यः ॥ चित्ते वा ॥ ४ । २ । ४१ ॥ चित्तविषयस्य चित्तकर्तृकस्य-

दुषेरुपान्त्यस्य णौ ऊत्वं। चित्तं दूषयति दोषयति वा कामः। चित्तग्रहणेन प्रज्ञाया अपि ग्रहणात् प्रज्ञां दूषयति दोषयति वा। गोहः स्वरे। निगूहयति॥ श्वेर्वा॥ ४। १। ८९॥ सस्वरान्तस्था ङपरे सन्परे च णौ विषये य्वृत्। अशूशुवत्। अशिश्वयत्। विषयविज्ञानादन्तरङ्गमपि वृद्ध्यादिकं य्वृता बाध्यते कृते च तस्मिन् वृद्धिः। तत आवादेश उपान्त्यह्रस्वत्वम्। ततो णिकृतस्य स्थानिवत्त्वात् शोर्द्वित्वम्। ततः पूर्वस्य दीर्घ इति क्रमः। स्वपेर्यङ्ङे च। असूषुपत्। अर्त्तिरीव्लीह्रीक्नूयीक्ष्माय्यातां पुः। अर्पयति। रेपयति। व्लेपयति। ह्रेपयति॥ य्वोः प्वय्व्यञ्जने लुक्॥ ४। ४। १२२॥ पुग्रहणमप्रत्ययार्थम्। क्नोपयति। क्ष्मापयति। वर्जनं किम्? । क्नूयते। प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणादिह न। व्रश्चकः॥ णौ क्रीजीङः॥ ४। २। १०॥ आकारोऽन्तः। क्रापयति। जापयति। अध्यापयति॥ णौ सन्ङे वा॥ ४। ४। २७॥ इङो गाः। अध्यजीगपत्। अध्यापिपत्। णाविति किम्? । अधिजिगांसते। सन्ङ इति किम्? । अध्यापयति॥ सिध्यतेरज्ञाने॥ ४। २। ११॥ णौ स्वरस्याकारः। अन्नं साधयति निष्पादयतीत्यर्थः। अज्ञान इति किम्? । तपस्तपस्विनं सेधयति। साधिनैव सिद्धे सिध्यतेरज्ञाने सेधयतीति प्रयोगनिवृत्त्यर्थं वचनम्॥ चिस्फुरोर्नं वा॥ ४। २। १२॥ णौ स्वरस्यात्। चापयति। चाययति। स्फारयति। स्फोरयति। वियः प्रजने॥ ४। २। १३॥ णौ वाऽऽत्वम्। प्रजनो गर्भग्रहणम्। पुरो वातो गाः प्रवापयति। प्रवाययति। गर्भं ग्राहयतीत्यर्थः। वातेः प्रजने वृत्तिर्नास्तीत्यारम्भः॥ रुहः पः॥ ४। २। १४॥ णौ वा। रोपयति रोहयति वा तरुम्। रोहत्यर्थे रुप्यतिर्नास्तीत्यारम्भः। लियो नोऽन्तः इति ने, घृतं विलीनयति। विलाययति। आत्वे तु विलालयति। विलापयति॥ पातेः॥ ४। २। १७॥ लोऽन्तः। पालयति। पलण् रक्षणे इत्यनेनैव सिद्धे पाययतीति प्रयोगनिवृत्त्यर्थं वचनम्। तिवृनिर्देशात्पा पाने इत्यादादिकस्य न। यङ्लुब्निवृत्त्यर्थश्च सः। पापाययति॥ वो विधूनने जः॥ ४। २। १९॥ णावन्तः। पक्षकेण उपवाजयति। अवीवजत्। विधूनन इति किम्? । ओवैं, उच्चैः

केशानावापयति शोषयतीत्यर्थः ॥ पाशाच्छासावेव्याह्वो यः ॥ ४ । २ । २० ॥ णावन्तः । वे इत्यनात्वेन नि-
र्देशाद् वा गतिगन्धनयोः ओवैं शोषणे इत्यनयोर्न । कृतात्वानां ग्रहणादिह प्रकरणे लाक्षणिकस्यापि ग्रहणम्। तेन क्षाप-
यतीत्यादि सिद्धम् । पाययति । अपीपयत् । पैं इत्यस्येदम् । पिबतेस्तु ॥ ङे पिबः पीप्य् ॥४। १।३ ३॥ण्यन्तस्य न चायं
ङिः। अपीप्यत् । शाययति । अवच्छाययति । अवसाययति । वाययति । व्याययति । ह्वाययति ॥णौ ङसनि॥४।१।
८८॥ विषये ह्वयतेः सस्वरान्तस्था य्वृत् । अजूहवत् । अजुहावत्। विषयविज्ञानादन्तरङ्गमपि यकारागमं बाधित्वा य्वृत् ॥
स्फायः स्फाव् ॥४।२।२२॥ णौ। स्फावयति । अभेदनिर्देशोऽन्ताधिकारनिवृत्त्यर्थः॥ शदेरगतौ शात्॥४।२।२३॥णौ ।
पुष्पाणि शातयति । अगताविति किम् ? । गोपालको गाः शादयति । गमयतीत्यर्थः । साद्यति । ङवर्जनाम्न षत्व-
म् । न्यसीषदत् । एवं पर्यसीषिवत् ।व्यतस्तम्भत् । प्राणयति । प्राणिणत् । पर्याणिणत् । पर्यानिनत् । न बदनं सं-
योगादिः । औञ्जिजत् । आड्डिडत् । औन्दिदत् । अयिरः । आर्चिचत् ॥ रभोऽपरोक्षाशवि ॥ ४ । ४ । १०२
स्वरादौ प्रत्यये स्वरात्परो नोऽन्तः । आरम्भयति । अपरोक्षाशवीति किम् ?। आरेभे । आरभते ॥ लभः ॥ ४ ।
४ । १०४ ॥ पूर्वविषये स्वरात्परो नोऽन्तः । लम्भयति । लभेः परस्मैपदस्याप्यभिधानम् । लभन्ती स्त्रीति केचित्
योगविभाग उत्तरार्थः । ईर्ष्ययति । ऐर्षिष्यत् । केचित्तु ऐर्ष्यियदित्यपि ॥ णावज्ञाने गमुः ॥ ४ । ४ । २४ ॥
इणिकोर्णौ विषये । गमयति । अधिगमयति । ज्ञाने तु प्रत्याययति । अज्ञान इतीणो विशेषणं नेकोऽसम्भवात् । णा-
विको ज्ञानादन्यत्रेणश्च निवृत्त्यर्थं वचनम् । अर्थान् गमयन्तीति तु गामिनैव सिद्धम् ॥

इत श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रा-
परनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्री-
विजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां ण्यन्तप्रक्रिया ॥

## ॥ अथ सन्नन्तप्रक्रिया ॥

तुमर्हादिच्छायां सन्नतत्सनः ॥ ३ । ४ । २१ ॥ यो धातुरिषेः कर्म इषिणैव च समानकर्तृकः स तुमर्हः । तस्मादिच्छायां सन् वा न चेत्स इच्छासन्नन्तः । पठितुमिच्छति पिपठिषति । तुमर्हादिति किम् ? । गमनेनेच्छति । भोजनमिच्छति देवदत्तस्य । इच्छायामिति किम् ? । भोक्तुं व्रजति । अतत्सन इति किम् ? । चिकीर्षितुमिच्छति । तद्ग्रहणं किम् ? । जुगुप्सिषते । सनोऽकारः किम् ? । अर्थान् प्रतीषिषति । नकारः सन्ग्रहणेषु विशेषणार्थः । नदीकूल पिपतिषतीत्यादि तु पतितुमिच्छतीत्यादिवाक्यवदुपमानाद्भविष्यति । अपिपठिषीत् । पिपठिषाञ्चकार । पिपठिषिता । स्वरादेर्द्वितीयः । अटिटिषति । घस्लादेशः । जिघत्सति ॥ यिः सन्वेर्ष्यः ॥ ४ । १ । ११ ॥ द्वित्वाभाजो द्विः । ईर्ष्यियिषति । ईर्ष्यिषिषति ॥ ग्रहगुहश्च सनः ॥ ४ । ४ । ५९ ॥ उवर्णान्ताद्धातोर्विहितस्यादिरिड् न । गुहेरिटमपीच्छत्यन्यः ॥ रुदविदमुषग्रहस्वपप्रच्छः सन् च ॥ ४ । ३ । ३२ ॥ क्त्वा किद्वत् । जिघृक्षति । जुघुक्षति । बुभूषति । रुरुदिषति । विविदिषति । मुमुषिषति । सुषुप्सति ॥ नामिनोऽनिट् ॥ ४ । ३ । ३३ ॥ धातोः सन् किद्वत् । स्वरहनगमोः सनि धुटि ॥ ४ । १ । १०४ ॥ धातोः स्वरस्य दीर्घः । चिकीषति । चिचीषति । चिकीर्षति । जिघांसति । गम्विति इणिङिकादेशस्य ग्रहणम् । इङादेशस्यैव ग्रहणमिच्छन्त्येके ॥ सनीङश्च ॥ ४ । ४ २५ ॥ इणिकोरज्ञाने गमुः ॥ प्राग्वत् ॥ ३ । ३ । ७४ ॥ सनः पूर्वो यो धातुस्तस्मादिव सन्नन्तात्कर्त्तर्यात्मनेपदम् । यत्पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेण वात्मनेपदं दृष्टं तत्सन्नन्तादतिदिश्यते । शिशयिषते । निविविक्षते । अश्वेन संचिचरिषते । आचिक्रंसते । यत्पुनः सप्रत्ययधातुनिमित्तं तन्नातिदिश्यते । शिशत्सति । मुमूर्षति । अनुबन्धादिनिमित्तमपि विशेषविधानबाधया प्रागदृष्टं नातिदिश्यते । अनुचिकीर्षति । तितिक्षते । मीमांसत इत्यादौ प्रागदृष्टमपि आत्मनेपदमनुबन्धसामर्थ्याद् भवति । अवयवे वा कृतं लिंगं समुदायस्यापि विशेषकं भवति । यथैवं तितिक्षयती-

त्यादावपि प्राप्नोति । अवयवे कृतं लिङ्गं तस्यैव समुदायस्य विशेषकं भवति यं समुदायं सोऽवयवो न व्यभिचरति । तिजादयश्चार्थविशेषेषु सन्नन्तं समुदायं न व्यभिचरन्तीति भवति तद्विशेषकोऽनुबन्धो न णिगन्तस्य, तस्य तैर्व्यभिचारात् । अधिजिगांसते विद्याम् । अधिजिगमिषति ग्रामम् । अधिजिगांस्यते । संजिगांसते । मातुरधिजिगमिषति । अधिजिगांस्यते माता । ज्ञाने तु प्रतीषिषति । विभित्सति । विवृत्सति । विवर्तिषते । चिकृत्सति । चिकर्तिषति । निनृत्सति २ ॥ वौ व्यञ्जनादेः सन् चायवः ॥ ४ । ३ । २५ ॥ उपान्त्ये व्यञ्जनादेर्धातोः परः क्त्वा सन् च सेट् वा किद्वत्, यकारवकारान्ताच्च न । दिद्युतिषते । दिद्योतिषते । लिलिखिषति । लिलेखिषति । अयव इति किम् ? । दिदेविषति । इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृद्दरिद्रः सनः ॥ ४ । ४ । ४७ ॥ आदिरिट् वा । दुद्यूषति । दिदेविषति । सुस्यूषति । सिसेविषति । णिस्तोरेवेति वक्ष्यमाणनियमान्न षः ॥ ऋध ईर्त् ॥ ४ । १ । १७॥ सादौ सनि न चास्य द्विः । ईर्त्सति । सीत्येव । अर्दिधिषति । बिभ्रज्जिषति।बिभर्जिषति।बिभ्रक्षति।बिभर्क्षति।। दम्भो धिप् धी ॥ ४ । १ । १८ ॥ सादौ सनि न चास्य द्विः । धिप्सति । धीप्सति । सीत्येव । दिदम्भिषति । शिश्रीषति । शिश्रयिषति । युयूषति । यियविषति । प्रोर्णुनूषति । प्रोर्णुनुविषति २ । बुभूर्षति । बिभरिषति । शब्निर्देशो यङ्लुपो बिभर्तेश्च निवृत्त्यर्थः । बिभर्तेरपीच्छन्त्येके । इडभावपक्षे गुणमपि । तन्मतसंग्रहार्थं कृतगुणस्य भृगो निर्देशः ॥ ज्ञप्याप्यो ज्ञीपीप् न च द्विः सि सनि ॥ ४ । १ । १६ ॥ एकस्वरोंऽशः । ज्ञीप्सति । जिज्ञपयिषति । ईप्सति । कृतह्रस्वस्य ज्ञपेरुपादानात् जिज्ञापयिषति । सनीति सनतेः सनोतेश्च ग्रहणम् ॥ सनि ॥ ४ । २ । ६१ ॥ खनसनजनां धुडादौ सन्यात्वम् । सिषासति । धुटीत्येव । सिसनिषति ॥ तनो वा ॥ ४ । १ । १०५ ॥ धुडादौ सनि स्वरस्य दीर्घः । तितांसति । तितंसति । धुटीत्येव । तितनिषति ॥ रभलभशकपतपदामिः ॥ ४ । १ । २१ ॥ स्वरस्य सकारादौ सनि इकारो न चैषां द्विः । पित्सति । पिपतिषति । आरिप्सते । लिप्सते । शिक्षति । पित्सते ।

बहुवचनं शर्कीच्श्क्लृंटोरुभयोरपि परिग्रहार्थम् । वृ इति वृग्वृङ्कोर्ग्रहणम् । प्रावुवूर्षति । प्राविवरिषति । प्राविवरीषति । वुवूर्षते । विवरिषते । विवरीषते । तितीर्षति । तितरीषति । तितरिषति । चिकीर्षतीत्यत्र लाक्षणिकत्वान्न । दिदरिद्रासति । दिदरिद्रिषति ॥ ऋस्मिपूङ्ञशौकृगृदृधृप्रच्छः ॥ ४ । ४ । ४८ ॥ सन आदिरिट् । अरिरिषति । सिस्मयिषते । पिपविषते । अजिजिषति । अशिशिषते । चिकरिषति । चिकरीषति । जिगरिषति२ । जिगरीषति२ । अन्ये तु व्यवस्थितविभाषयाऽस्येटो दीर्घत्वं नेच्छन्ति । आदिदरिषते । आदिधरिषते । पिपृच्छिषति । प्रच्छसहचरिताः कृगृदृधृइत्येते तौदादिका धातवः । तेन कृणातेश्चिकीर्षति । चिकरिषति । चिकरीषति । गृणातेः, जिगीर्षति । जिगरिषति । जिगरीषति । धरतेर्दिधीर्षतीत्येव ॥ मिमीमादामित्स्वरस्य ॥ ४ । १ । २० ॥ सादौ सनि न चैषां द्विः । मिंग्ट्, मित्सति । मित्सते शतम् । मीति मींग्मींगशोर्ग्रहणम् । मित्सते । प्रमित्सति । प्रमित्सते शत्रून् । मेति मांमाङ्क्मेङां ग्रहणम् । मित्सति प्रमित्सते भूमिम् । अपमित्सते यवान् । मातेर्नेच्छन्त्येके । दाम्, प्रदित्सति दानम् । देङ्, दित्सते पुत्रम् । डुदांग्क्, दित्सति दित्सते वस्त्रम् । दोंच्, दित्सति दण्डम् । धें, धित्सति स्तनम् । डुधांग्क्, धित्सति धित्सते श्रुतम् । बहुवचनं व्याप्त्यर्थम् । तेन निरनुबन्धकग्रहणे न सानुबन्धकस्येत्यादि नाश्रीयते ॥ अव्याप्यस्य मुचेर्मोग् वा ॥ ४ । १ । १९ ॥ सादौ सनि, न चास्य द्विः । मोक्षति । मुमुक्षति चैत्रः । अव्याप्यस्येति किम् ? । मुमुक्षति वत्सं चैत्रः ॥ राधेर्वधे ॥ ४ । १ । २२ ॥ सादौ सनि स्वरस्येकारो न च द्विः । प्रतिरित्सति । अपरित्सति । वध इति किम् ? । आरिरात्सति गुरून् ॥ दीङः सनि वा ॥ ४ । २ । ६ ॥ आत्वम् । दिदासते । दिदीषते । उपदिदासते । उपदिदीषते । तितर्हिषति । तितृक्षति । जिं जये । जिगीषति । इषू एषिषिषति । नित्यमपि द्विर्वचनमुपान्त्यगुणेन बाध्यते । ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात् । प्राणिणिषति उच्छेः सनि । उचिच्छिषति । च्छाभ्यां सहितस्येटो द्वित्वम् । निमित्ताभावे नैमित्तिकस्याप्यभाव इति त्व-

नित्यम् । द्वित्वे ह्वः । आजुहूषति । श्वेर्वा । शुशावयिषति । शिश्वाययिषति । जुहावयिषति । पुस्फारयिषति । पुस्फोरयिषति । पिपावयिषति । लिलावयिषति । ओर्जान्तेतीत्वम् । सुश्रु इत्यादिना षत्वम् । शिश्रावयिषति । शुश्रावयिषति ॥ णिस्तोरेवास्वदस्विदसहः षणि ॥ २ । ३ । ३७ ॥ नाम्यन्तस्थाकवर्गात्परस्य सस्य षत्वम् । सिषेधयिषति । तुष्टूषति । स्वदादिपर्युदासः किम् ? । सिस्वादयिषति । सिस्वेदयिषति । सिसाहयिषति । णिस्तोरेवेति नियमादिह न । सुसूषति । सिसिक्षति । एवकारो विपरीतनियमनिवृत्त्यर्थः । तेन असीषिवत् । तुष्टाव । षणीति किम् ? । सिषेव । षत्वं किम् ? । सुषुप्सति । तिष्ठासति । कथमधीषिषति । प्रतीषिषति । षणि निमित्ते धातोः षत्वनियमस्योक्तत्वात् । इह तु सनो द्विरुक्तस्य षत्वम् । सोषुपिषते इत्यादौ तु यङि द्वित्वं पश्चात्सन्निति न प्रतिषेधः । येषां तु दर्शने पुनर्द्वित्वं तन्मते सुसोषुपिषत इत्यत्र सुशब्दात्परस्य सस्य षत्वं न भवत्येव ॥ सञ्जेर्वा ॥ २ । ३ । ३८ ॥ ण्यन्तस्य सञ्जेर्नाम्यादेः परस्य सः षणि ष् वा । सिषञ्जयिषति । सिसञ्जयिषति । नित्यं षत्वमित्येके ॥ स्वपो णावुः ॥ ४ । १ । ६२ ॥ द्वित्वे पूर्वस्य । सुष्वापयिषति । स्वपेर्णौ णके क्यनि णौ ङे च । असुष्वापकीयत् । स्वापेः क्विबन्तात्कर्तुः क्विपि यङ् । सोष्वाप्यते । अन्ये तु णौ सति द्विस्वनिमित्तानन्तर्ये एवेच्छन्ति । स्वापकीयतेः सनि सिष्वापकीयिषति । णाविति किम् ? । णकान्तात्क्यनि सनि च सिष्वापकीयिषति । स्वपो णाविति किम् ? । स्वापं चिकीर्षति सिष्वापयिषति । स्वपो णौ सति द्वित्व इति किम् ? । सोषोपयिषति । उपसर्गात्सुगिति सूत्रेऽद्वित्व इत्युक्तेरिह न षत्वम् । अभिसुसूषति । अभिसिषासति ॥

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां सन्नन्तप्रक्रिया ॥

## ॥ अथ यङन्तप्रक्रिया ॥

व्यञ्जनादेरेकस्वराद्भृशाभीक्ष्ण्ये यङ् वा ॥ ३ । ४ । ९ ॥ धातोः । गुणक्रियाणामधिश्रयणादीनां क्रियान्तराव्यवहितानां साकल्येन सम्पत्तिः फलातिरेको वा भृशत्वम् । प्रधानक्रियाया विक्लेदादेः क्रियान्तराव्यवधानेनावृत्तिराभीक्ष्ण्यम् । सन्यङश्चेति द्वित्वम् ॥ आगुणावन्यादेः ॥ ४। १। ४९॥ धातोर्यङन्तस्य द्वित्वे पूर्वस्य । न्यादिवर्जनं किम् ? । चनीवच्यते । यंयम्यते । नरीनृत्यते । अपवादत्वादेव न्यादिभिरेतद्बाधे सिद्धे तद्वर्जनं द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधक इति ज्ञापनार्थम् । तेनाचीकरदित्यत्र न दीर्घेण सन्वत्कार्यबाधः । भृशं पुनः पुनर्वा पचति । पापच्यते । बोभूयते । लोलूयते । आभीक्ष्ण्ययङन्तस्याभीक्ष्ण्ये द्वित्वं तु न । उक्तार्थत्वात् । यदा तु भृशार्थयङन्तादाभीक्ष्ण्यविवक्षा तदा भवत्येव । पापच्यते पापच्यत इति । एवं भृशार्थयङन्तादाभीक्ष्ण्ये आभीक्ष्ण्ययङन्ताद्वा भृशार्थे विवक्षिते यदा पञ्चमी केवला तदा सा केवला तदर्थद्योतने असमर्थेति तदर्थद्योतने द्विर्वचनमपेक्षते । पापच्यस्व पापच्यस्वेति । पूर्वसूत्रे धातोरित्येव । तेन सोपसर्गाच्च । भृशं प्राप्ति । व्यञ्जनादेरिति किम् ? । भृशमीक्षते । एकस्वरादिति किम् ? । भृशं चकास्ति । केचिज्जागर्तेरपीच्छन्ति । जाजागर्यते । सर्वस्माद्धातोरायादिप्रत्ययरहितात्केचिदिच्छन्ति । अवाव्यते । दादरिद्र्यते । भृशाभीक्ष्ण्य इति किम् ? । पचति । वेति किम् ? । लुनीहि लुनाहीत्येवायं लुनातीत्यादि यथा स्यात् ॥ योऽशिति ॥ ४ । ३ । ८० ॥ व्यञ्जनान्ताद्धातोः परस्य लुक् । अपापचिष्ट । पापचाञ्चक्रे । पापचिता । सोसूचिता शाशयिता कुषिभितेत्यादौ णिज्लोपे शयादेशेऽल्लोपे च व्यञ्जनान्तता । अन्ये तु लाक्षणिकव्यञ्जनान्तेभ्यो यलोपं नेच्छन्ति । तन्मतसङ्ग्रहार्थं धातोरिति विहितविशेषणं कार्यम् । धातोरित्येव । ईर्ष्यिता । व्यञ्जनादित्येव । लोलूयिता । अशितीति किम् । बेभिद्यते । दीर्घश्च्वीति दीर्घः । तोष्टूयते ॥ अट्यर्तिसूत्रिमूत्रि-

सुच्यशूर्णोः ॥ ३ । ४ । १० ॥ भृशाभीक्ष्ण्ये यङ् । अटाट्यते । अरार्यते । सोसूत्र्यते । मोमूत्र्यते । सोसूच्यते । अशाश्यते । प्रोर्णोनूयते ॥ गत्यर्थात्कुटिले ॥ ३ । ४ । ११ ॥ व्यञ्जनादेरेकस्वराद् गत्यर्थात्कुटिल एवार्थे वर्तमानाद्धातोर्यङ् न भृशाभीक्ष्ण्ये ॥ मुरतोऽनुनासिकस्य ॥ ४ । १ । ५१ ॥ आत्परो योऽनुनासिकस्तदन्तस्य यङन्तस्य द्वित्वे पूर्वस्य मुरन्तः । चङ्क्रम्यते ।२। बम्भण्यते । जङ्गम्यते । यलवानामनुनासिकत्वे तन्तर्य्यते । चंचल्यते । मंमव्यते । अननुनासिकत्वे तातर्यते । चाचल्यते । मामव्यते । अत इति किम् ? तेतिम्यते । बाभाम्यते । अनुनासिकस्येति किम् ? । पापच्यते । पूर्वसूत्रे कुटिल इति किम् ? । भृशं क्रामति । धात्वर्थविशेषणं किम् ? । कुटिलं पन्थानं गच्छति । तक्रकौण्डिन्यन्यायेन भृशाभीक्ष्ण्ययोर्निषेधार्थं वचनम् । भृशाभीक्ष्ण्ये कुटिलयुक्त एव यङ् न केवल इत्यन्ये । एवमुत्तरत्रापि । कथं जङ्गमः?रूढिशब्दोऽयम् । लक्षणया स्थावरेतरमात्रे वर्त्तते ॥ गॄलुपसदचरजपजभदशदहो गर्ह्ये ॥ ३ । ४ । १२ ॥ यङ् ॥ गोयङि ॥ २ । ३ । १०१॥ रस्य लत्वम् । गर्हितं निगिरति । निजेगिल्यते । अत्र परे लत्वे भ्वादेरित्यस्यासत्त्वम् । गृणातेस्तु यङेव नास्ति । केचित्तु तस्यापीच्छन्ति । लत्वं तु नेच्छन्ति । लोलुप्यते । सासद्यते ॥ चरफलाम् ॥ ४ । १ । ५३ ॥ यङन्तानां द्वित्वे पूर्वस्य मुरन्तः । बहुवचनं ञिफला विशरण इत्यस्यापि परिग्रहार्थम् ।। ति चोपान्त्यातोऽनोदुः ॥ ४ । १ । ५४ ॥ यङन्तानां चरफलान्तादौ प्रत्यये च । चञ्चूर्यते । २ । पंफुल्यते २ । अत इति किम ? । चारयतेः फालयतेश्च क्विपि आचारक्विपि यङि चञ्चार्यते । पम्फाल्यते । अनोदिति किम ? । चञ्चूर्त्ति । पम्फुल्ति । जपजभदहदशभञ्जपशः ॥ ४ । १ । ५२ ॥ यङन्तस्य द्वित्वे पूर्वस्य मुरन्तः । जञ्जप्यते २ । जञ्जभ्यते २ । दन्दह्यते२। दन्दश्यते२। बम्भज्यते२। पशिति सौत्रो धातुः । पम्पश्यते । दशिति निर्देशात् यङ्लुप्यपि नलोपः । दंदशति । अन्यस्तु तत्र नलोपं नेच्छति ॥ ऋमतां रीः ॥ ४ । १ । ५५ ॥ यङन्तानां द्वित्वे पूर्वस्यान्तः ॥ नृतेर्यङि ॥२ । ३ । ९५ ॥ नस्य णत्वं न । नरीनृत्यते । यङीति किम् ? । हरिणर्त्ती नाम कश्चित् ।

जरीगृह्यते । परीपृच्छ्यते । वरीवृश्च्यते । चलीक्लृप्यते । ऋमतामिति किम् ? । चेक्रीयते । बहुवचननिर्देशो लाक्षणिकपरिग्रहार्थः ॥ ईर्व्यञ्जनेऽयपि ॥ ४ । ३ । ८७ ॥ गापास्थासादामाहाकां क्ङित्यशिति प्रत्यये । गैं गाङ् वा जेगीयते । गाङो नेच्छन्त्यन्ये । पेपीयते । तेष्ठीयते । सों सेषीयते । सैं सेसीयते । अषोपदेशत्वान्न षत्वम् । देदीयते । देधीयते । मेति मामाङ्मेङां त्रयाणां ग्रहणम् । मेमीयते । मातेर्नेच्छन्त्यन्ये । अयपीति किम् ? । प्रगाय । आपीयेति तु पीङो भविष्यति । स्वरादावन्तलोपविधानाद् व्यञ्जनादाविति लब्धे व्यञ्जनग्रहणं साक्षाद्व्यञ्जनप्रतिपत्त्यर्थम् । तेन क्विब्लुकि स्थानिवद्भावेन न भवति शंस्थाः पुमान् ॥ घ्राध्मोर्यङि ॥ ४ । ३ । ९८ ॥ ईः । जेघ्रीयते । देध्मीयते ॥ हनो घ्नीर्वधे ॥ ४ । ३ । १०० ॥ यङि । जेघ्नीयते । वध इति किम् ? । गतौ जङ्घन्यते ॥ क्ङिति यि शय् ॥ ४ । ३ । १०५ ॥ शीङः । शाशय्यते । ङिन्निर्देशाद्यङ्लुपि न । संशेशीयते । संचेस्क्रीयते । पूर्वं गुणस्ततो द्वित्वम् । सास्मर्यते । वा परोक्षायङि । शोशूयते । शेश्वीयते । प्यायः पीः । पेपीयते । सोषुप्यते ॥ व्येस्यमो यङि ॥ ४ । १ । ८५ ॥ सस्वरान्तस्था य्वृत् । वेवीयते । सेसिम्यते ॥ चायः की ॥ ४ । १ । ८६ ॥ यङि । चेकीयते । दीर्घनिर्देशो यङ्लुबर्थः । चेकीतः । अयङीति प्रतिषेधात्, वावश्यते ॥ वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तो नीः ॥ ४ । १ । ५० ॥ यङन्तस्य द्वित्वे पूर्वस्य । वनीवच्यते । सनीस्रस्यते इत्यादि । दीर्घविधानसामर्थ्याद्ध्रस्वो न ॥ सिचो यङि ॥ २ । ३ । ६० ॥ सस्य षत्वं न । निसेसिच्यते । अभिसेसिच्यते । परत्वादुपसर्गलक्षणमपि षत्वं बाधते ॥ न कवतेर्यङः ॥ ४ । १ । ४७ ॥ द्वित्वे सति पूर्वस्य कश्चः । कोकूयते खरः । कवतेरिति किम् ? । कौतिकुवत्योः । चोकूयते । कवतिरव्यक्ते शब्दे कुवतिरार्त्तस्वरे कौतिः शब्दमात्रे यङ इति किम् ? । चुकुवे । तिव्निर्देशाद्यङ्लुपि चोकवीति । अन्ये तु तत्रापि प्रतिषेधयन्ति ॥ न गृणाशुभरुचः ॥ ३।४।१२॥ यङ् । गर्हितं गृणाति । भृशं शोभते । भृशं रोचते ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रा-

परमगुरुश्रीविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्री-
विजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां यङन्तप्रक्रिया ॥

## ॥ अथ यङ्लुबन्तप्रक्रिया ॥

॥ बहुलं लुप् ॥ ३ । ४ । १४ ॥ यङः । इह इश्ति इत्यादि सूत्रे न प्रवर्ततेऽनुबन्धनिर्देशात् । श्यादयोऽपि न, गणेन निर्देशात् । यङ्लुप् चेत्युक्तेर्यङ्लुबन्तानामदादित्वम् । तेन न शव् । यङ्तुरुस्तोरितीत् । बोभवीति । बोभोति । बोभूतः । बोभुवति । बोभूयात् । बोभवीतु । बोभोतु । बोभूहि । अबोभवीत् । अबोभोत् । अबोभूताम् । अबोभवुः । पिबैतिदेति सिज्लुप् । अबोभोत् । अबोभोताम् । अबोभूवन् । अबोभूवुः इति केचित् । बोभवाञ्चकार । बोभविता । बहुलग्रहणात् क्वचिन्न । लोलूया । पोपूया । तथा चाह “ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव । विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥ नानाथीति । नानात्ति । नानात्तः । नानाथति । अनानात् । पास्पर्धीति । पास्पर्द्धि । पास्पर्द्धः । पास्पर्द्धति । पास्पर्त्सि । हेर्धिः । पास्पर्द्धि । अपास्पर्त् । अपास्पर्द् । सिवि । अपास्पा इत्यपि । जगाद्धि । जागाधीति । जाघात्सि । आजाघात् । अजाघाः । दध् , दादधीति । दादद्धि । दादद्धः । दाधत्सि । अदादधीत् । अदाधत् । अदादधीत् । अदादाधीत् । चोस्कुन्दीति । चोस्कुन्ति । अचोस्कुन् । मोमुदीति । मोमोत्ति । अमोमुदीत् । अमोमोत् । सिवि अमोमोः इत्यपि । चोकूर्दीति । चोकूर्त्ति । अचोकूर्दीत् । सिवि पक्षे । अचोकूः । वनीवञ्चीति । वनीवङ्क्ति । वनीवक्तः । अवनीवञ्चीत् । अवनीवन् । जङ्गमीति । जङ्गन्ति । जङ्गतः । जङ्गमति । जङ्गन्मि । जङ्गन्वः । जङ्गहि । अजङ्गमीत् । एकस्वरग्रहणान्नेड्निषेधः । दीर्घोच्चारणसामर्थ्याद्यङ्लुप्यपि घ्नीः । जेघ्नयीति । जेघ्नेति । जेघ्नीतः । जेघ्नियति । केचित्तु यङ्लुपि घ्नीं नेच्छन्ति । वधादन्यत्र तु जङ्घ-

नीति । जङ्घन्ति । जङ्घतः । जङ्घ्नति । जहि । जङ्घहि इत्यन्ये । अवधीत् । वध्यात् । वधादेशस्य द्वित्वं तु न । लक्ष्ये लक्षणस्येति न्यायात् । तल्लक्ष्यत्वं च स्वीयप्राथमिकप्रवृत्त्युद्देश्यत्वेनाश्रीयमाणशब्दसमुदायविशिष्टाघटितत्वम् । स्वाघटकत्वस्वघटकोद्देश्यकविकारेतरत्वसम्बन्धाभ्यां च वैशिष्ट्यम् । आङ्पूर्वस्य तु आजङ्घत इत्यादि । चङ्खनीति । चङ्खन्ति ॥आः खनिसनिजनः॥ ४ । २ । ६०॥ धुडादौ क्ङिति । चङ्खातः । चङ्खनति । चञ्चूर्त्ति २। चञ्चूर्त्तः चञ्चुरति । अचञ्चुरीत् । अचञ्चूः । योयवीति । योयोति । अयोयवीत् । अयोयोत् । अयोयावीत् । योयूयात् । **न हाको लुपि** ॥ ४ । १ । ४९॥ यङो द्वित्वे पूर्वस्याकारः । जहेति । जहाति । लुपीति किम् ? । जेहीयते । आत्वमिच्छन्त्यन्ये । जहीतः । जहति । जहीहि । आशिषि जहायात् । इह इत्वादिकं न, तिवा शवेति निषेधात् । सोषुपीति । सोषोप्ति । अन्ये तु यङ्लुपि ष्वतं नेच्छन्ति । तन्मते सास्वपीति । सास्वप्ति । असास्वपीत् । असास्वपम् । सास्वप्यात् । आशिषि सासुप्यात् ॥ **रिरौ च लुपि** ॥ ४ । १ । ५६ ॥ ऋमतां धातूनां यङो द्वित्वे पूर्वस्य रीरन्तः । चरिकर्त्ति २ । चर्कर्त्ति२ । चरीकर्त्ति २ । चर्कृतः३ । चर्कृति ३ । चर्कर्मि ३। बहुलग्रहणान्नेट् । अचर्करीत् ३। अचर्कः ३ । आशिषि चर्क्रियात् ३ । चर्करिता ३ । वर्वर्त्ति ३ । अत्र बहुलग्रहणान्नेट् । अवर्वर्तीत् ३ । अवर्वर्त् । ३ । अवर्वर्तीः ३ । अवर्वर्त् ३ । अवर्वाः ३ इत्यप्यन्ये । अवर्वर्तीत् ३। गणनिर्दिष्टत्वादङ् न । एवं नर्नर्तीति ३। जर्गृधीति ३ । जर्गर्द्धि ३। अजर्धत् ३। अजरिगृध्याम ३ । अजर्धाः ३। जरिगृहीति३ । जरिगर्ढि । ३ । जर्गृढः ३ । जर्गृहति ३ । अजर्घट् ३ । यद्यपीह एकस्वरग्रहणाद् गस्य घो दुर्लभस्तथापि तिवा शवेत्यस्यानित्यत्वाभ्युपगमात्तत्सिद्धिः । अत एव बृहद्वृत्तौ अजजप् इति प्रत्युदाहरणं संगच्छते । परिपृच्छीति ३ । परिपर्ष्टि ३ । परिपृष्टः ३ । परिपृच्छति ३ । अत्र यङ्निमित्तो ष्वत । लुप्यत्वल्लेनदित्यत्र ष्वद्वर्जनाम स्थानिवद्भावनिषेधः । केचित्तु पाप्रच्छीति पाप्रष्टि पापृष्टः इत्यादीच्छन्ति । मरीमृजीति ६ । मरीमार्ष्टि३ । मरीमृजति३। मरीमार्जति ३ । अर्त्तेर्यङ्लुपि द्वित्वे ऋतोऽत् । अरर्त्ति । रि-

रीयोगे तु इय् पूर्वस्य, अरियर्त्ति। अररीति। अरियरीति। अर्रृतः। अरियृतः। आरति। इवर्णादेरिति ऋकारस्य रत्वे पूर्वरेफस्य लुक्. न च तस्मिन् कर्त्तव्ये रेफस्य स्थानिवत्त्वम्। न सन्धिङीति निषेधात्। अरियृति। आशिषि। आरियात्। रिलुक् दीर्घः। तिव्निर्देशान्न गुणः। अरिय्रियात्। ऋमतामित्यत्र ह्रस्वस्यैव ग्रहणादिह न। तातर्त्ति। २। तातीर्त्तः। तातिरति। एवं चाकरीति २। गृह्णातेः। जरिगृहीति ३। जरिगर्ढि ३। जरिगर्हिता ३। इटो दीर्घस्तु न। तत्र लुप्ततिव्निर्देशात्। जाह्यीति। जाह्ति। जाह्तः। जाह्यति। मव्यस्याः। जाह्यामि। जाह्यावः। जाह्यामः। जाहर्यीति। जाहर्त्ति। जाहर्त्तः। जाहर्यति। अजाहः। अजाहर्त्ताम्। मव्य्, मान्यीति। मामौति। मामौतः। मामव्यति। तेव्, तेतेवीति। तेतयोति। देदिवीति। देद्योति। सोषिवीति। सेष्योति। अन्ये तु क्ङित्येवोटमिच्छन्ति। तन्मते देदेति। सेषेति। केचित्तु स्त्रिविमविवर्जितानां यकारवकारान्तानां यङ्लुपं नेच्छन्ति॥ मव्यविश्रिविज्वरित्वरेरुपान्त्येन॥ ४। १। १०९॥ अनुनासिकादौ क्वौ धुडादौ च प्रत्यये वकारस्योट्। मामवीति। मामोति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। शेश्रिवीति। शेश्रोति। जाज्वरीति। जाजूर्त्ति। जाजूर्त्तः। तातूर्त्ति २। तातूर्त्तः। तुर्वै हिंसायाम्॥ राल्लुक्॥ ४। १। ११०॥ धातोच्छकारवकारयोरनुनासिकादौ क्वौ धुडादौ च प्रत्यये। शूटोऽपवादः। गुणः। तोतोर्त्ति। दीर्घः। तोतूर्त्तः। तोतूर्वति। तोथोर्ति। दोदोर्त्ति। दधोर्त्ति। जोहोर्त्ति। मोमोर्त्ति। मोमूर्त्तः। मोमूर्च्छति। शोशवीति। शेश्वयीति। वेवसेसिमीति। सेसेन्ति। आपेपयीति। आपेपेति। चेकयीति। चेकेति। चोकवीति। चोकोति। अजेर्वी, वेवयीति। वेवेति। यङो लुप्यपि विषयोऽस्त्येव यथा अवात्तामित्यत्र सिचः, यथा चाध्यर्धकंस इत्यत्र तद्धितस्य। केचित्तु लुपि यङो विषयाभावं मन्वानाबीभावमनङ्गीकुर्वन्तोऽस्य यङ्लुब्नास्तीति वदन्ति॥ ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां यङ्लुबन्तप्रक्रिया॥

## ॥ अथ नामधातुप्रक्रिया ॥

द्वितीयायाः काम्यः॥३।४।२॥ नाम्न इच्छायामर्थे वा । पुत्रमिच्छति पुत्रकाम्यति । इदंकाम्यति। यशस्काम्यति। किंकाम्यति। उच्चैःकाम्यति । स्वःकाम्यति । काम्येनैव कर्मण उक्तत्वात्कर्मणि नास्य प्रयोगः। द्वितीयाया इति किम्?। इष्टः पुत्रः। भ्रातुः पुत्रमिच्छतीत्यादौ तु न, सापेक्षत्वात् । अन्यमपेक्षमाणस्यान्येन सहैकार्थीभावाभावात्। समासे तु भ्रातुष्पुत्रकाम्यतीत्यादि भवत्येव, समर्थत्वात् । अघमिच्छति दुःखमिच्छतीत्यादावपि परस्येत्यपेक्षितत्वात्सापेक्षत्वम् । कथं तर्हि पुत्रकाम्यतीत्यादौ पुत्रस्यात्मीयता गम्यते ? । अन्यस्याश्रुतेः, इच्छायाश्चात्मविषयत्वात् ॥ अमाव्ययात्क्यन् च ॥ ३। ४ । २३ ॥ द्वितीयान्तान्नाम्न इच्छायामर्थे वा काम्यः ॥ क्यनि ॥ ४ । ३ । ११२ ॥ अवर्णान्तस्य ईः । पुत्रीयति । पुत्रकाम्यति । मालीयति २ । अमाव्ययादिति किम् ? । इदमिच्छति । किमिच्छति । स्वरिच्छति । उच्चैरिच्छति ॥ नं क्ये ॥ १ । १ । २२॥ क्यनि क्यङि क्यङ्षि च नाम पदम् । राजीयति । अहर्यति । गव्यति । नाव्यति । गव्यिता । सन्निपातपरिभाषया यस्य लोपोन । वाच्यति ॥ क्यो वा ॥ ४ । ३ । ८१ ॥ धातोर्व्यञ्जनात्परस्याशिति लुक् । क्यन्क्यङोः सामान्येन निर्देशः । क्यङ्षस्तु प्राप्तिरेव न । वाचिता । वाच्यिता । समिध्यति । समिधिता । समिध्यता । केचित्तु यकोऽपि लुग्विकल्पमिच्छन्ति । तन्मतसंग्रहार्थं ककारोपलक्षितो य् क्य् इति व्याख्येयम्। अन्यस्त्वाह, शिष्य इवाचरिता । शिषिता शिष्यितेति । यद्यस्ति प्रयोगस्तदा कृतक्यपोऽपि ग्रहणम् । क्य इति व्यञ्जनात्षष्ठी अतो लुकि कृते लुगर्थो । अन्यथाऽतो लुगपवादः क्यलुग् विज्ञायेत । अदस्यति । त्वद्यति । मद्यति । प्रकृत्यर्थस्यैकत्वाभावे तु युष्मद्यति । अस्मद्यति । भ्वादेरितिदीर्घः । गीर्यति । पूर्यति । भ्वादित्वाभावान्न दीर्घः । दिवमिच्छति दिव्यति । गार्गीयति । ऋतोरीः। कर्त्रीयति । पित्रीयति । दीर्घः। करीयति ॥आधाराच्चोपमानादाचारे ॥३।४।२४॥

अमाव्ययादुपमानाद् द्वितीयान्तादाधाराच्चाचारे क्यन् वा । पुत्रमिवाचरति पुत्रीयति छात्रम् । प्रासादीयति कुट्याम् । न प्रादिरप्रत्ययः । प्रासादीयत् । उपमानादिति किम् ? । छात्रादेर्मा भूत् । आधाराच्चेति किम् ?। परशुना दात्रेण वा चरति । अमाव्ययादिति किम् ? । इदमिवाचरति । स्वरिवाचरति । उपमानस्य नित्यमुपमेयापेक्षत्वात् सापेक्षत्वेऽपि सामर्थ्यम् ॥ क्षुत्तृड्गर्धेऽशनायोदन्यधनायम् ॥ ४ । ३ । ११३ ॥ यथासंख्यं निपात्यते । अशनायति । उदन्यति । धनायति । अन्यत्र । अशनीयति । उदकीयति । धनीयति दानाय ॥ वृषाश्वान्मैथुने स्सोऽन्तः ॥ ४ । ३ । ११४ ॥ क्यनि । वृषस्यति गौः । अश्वस्यति वडवा । वृषाश्वशब्दावत्र मैथुने वर्त्तेते । मनुष्यादावपि हि प्रयुज्येते । अन्यत्र वृषीयति । अश्वीयति । स्स इति द्विसकारनिर्देशः षत्वनिषेधार्थः । तेनोत्तरत्र दधिस्यति । मधुस्यति ॥ अस् च लौल्ये ॥ ४ । ३ । ११५॥ गम्ये नाम्नः स्सेऽन्तः क्यनि । दधिस्यति । दध्यस्यति । मधुस्यति । मध्वस्यति । क्षीरस्यति । अस्विधानमनकारान्तार्थम् । अकारान्तेषु लुकि विशेषाभावात् । अन्यस्तु लुकमकुर्वन् क्षीरास्यति लवणास्यति इत्युदाहरति । तच्च न बहुसम्मतम् । लौल्य इति किम् ? । क्षीरीयति दानाय ॥ कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित् ॥ ३ । ४ । २५ ॥ उपमानान्नाम्न आचारे वा । अश्वति । मालाति । अमालासीत् । दधयति । कवयति । अकवायीत् । अकवयीदित्यन्ये । वयति । विवाय । विव्यतुः। श्रयति । शिश्राय शिश्रियतुः। भवति । अभावीत् । बुभाव । पिबैतिदेति स्त्रुवोव इति भूस्वपोरिति च नात्र प्रवर्त्तन्ते गौणमुख्यन्यायात् । द्रवति । अद्रावीत् । पितरति । रायति । गवति । द्यवति । कति । चकचकावित्यन्ये । स्वति । सस्व । सस्वावित्यन्ये । अति । औ । अतुः । राजनति। अहनति । इदमति । पथेनति । अत्रोपान्त्यदीर्घमिच्छन्त्येके । अनडोहति । गेरति । पोरति । गल्भते । क्लीबते । होडते ॥ क्यङ् ॥ ३ । ४ । २६ ॥ कर्तुरुपमानादाचारे वा । श्येनायते । हंसायते । पण्डितायते मूर्खः । एतायते । गार्गायते । वात्सायते । युवायते । तरुणायते । पाचिकायते । पञ्चमीयते । माद्देश्वरीयते । चारुकेशीयते । ब्रा-

श्रमणीयते । वानरीयते । कायते । कायाञ्चक्रे । त्वद्यते । मद्यते । युष्मद्यते । अस्मद्यते । सपत्नीव सपत्नायते । सपत्नीयते । सपत्नीयते। पट्वीमृद्व्याविव पट्वीमृद्व्यते। एके तु कर्तुः सम्बन्धिन उपमानाद् द्वितीयान्तात् क्विप्पूर्वक्यङमिच्छन्ति। तन्मतसंग्रहार्थं कर्तुरिति षष्ठी व्याख्येया । द्वितीयाया इति चानुवर्त्तनीयम्। क्विबिति पूर्वप्रसिद्धानुवादः॥सो वा लुक् च ॥ ३ । ४ । २७ ॥ स इति पञ्चम्यन्तं षष्ठ्यन्तं च । सकारान्तात्कर्तुरुपमानादाचारे क्यङ् वा अन्त्यसस्य लुक् च वा । पयायते पयस्यते। तक्रम । सरायते । सरस्यते। अन्ये त्वप्सरस एव लोपो नान्यस्येत्याहुः । ओजोऽप्सरसः ॥ ३ । ४ । २८ ॥ कर्त्तुरुपमानादाचारे क्यङ् वा सलोपश्च । ओजःशब्दो वृत्तिविषये तद्वति । ओजायते । अप्सरायते । अन्ये त्वोजःशब्दे सलोपविकल्पमिच्छन्ति ॥ च्व्यर्थे भृशादेःस्तोः ॥ ३ । ४ । २९ ॥ कर्त्तुः क्यङ् वा लुक् च । अभृशो भृशो भवति भृशायते । च्व्यर्थ इत्यनेन लक्षणया भवत्यर्थविशिष्टं प्रागतत्तत्त्वमुच्यते । करोतिस्तु कर्त्तुरित्यनेन व्युदस्तः । उन्मनायते । न प्रादिरप्रत्ययः । उदमनायत । सुमनायते । स्वमनायत । अप्रत्यय इत्युक्तेः,औत्सुकायत । वेहायते । कर्तुरित्येव । अभृशं भृशं करोति । च्व्यर्थ इति किम् ?। भृशो भवति । प्रागतत्तत्त्वमात्रे च्वेर्विधानात् क्यङा च्विर्न बाध्यते । भृशीभवति ॥ डाज् लोहितादिभ्यः षित् ॥ ३ । ४ । ३० ॥ कर्तृभ्यश्च्व्यर्थे क्यङ् ॥ क्यङ्षो न वा ॥ ३ । ३ । ४३ ॥ धातोः कर्त्तर्यात्मनेपदम् । अपटत् पटत् भवति पटपटायति । पटपटायते । डाजन्तात् क्यङ्विधानात् क्यङ्षापि योगे डाच् । लोहितायति । लोहितायते । लिङ्गविशिष्टपरिभाषया लोहिनीयति । लोहिनीयते । कर्त्तुरित्येव । पटपटाकरोति । च्व्यर्थ इत्येव । लोहितो भवति । बहुवचनमाकृतिगणार्थम् । लोहितादिषु लोहितशब्दादेवेच्छन्त्यन्ये । धूमादीनां स्वतन्त्रार्थवृत्तीनां प्रकृतिविकारभावाप्रतीतेश्च्व्यर्थो नास्तीति तद्वद्वृत्तिभ्यः प्रत्ययः । अधूमवान् धूमवान् भवति धूमायति । धूमायते ॥ कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे ॥ ३ । ४ । ३१ ॥ कष्टादिभ्यश्चतुर्थ्यन्तेभ्यः पापवृत्तिभ्यः । क्यङ् । कष्टाय कर्मणे क्रामति । कष्टायते एवं

कक्षायते । कृच्छ्रायते । सत्रायते । गहनायते । चतुर्थीनिर्देशः किम् ? । रिपुःकष्टं क्रामति । पाप इति किम् ? । कष्टाय तपसे क्रामति । क्रमणमिह प्रवृत्तिमात्रम् । द्वितीयान्तेभ्यः पापचिकीर्षायामित्यन्ये ॥ **रोमन्थाद् व्याप्याडुच्चर्वणे ॥ ॥ ३ । ४ । ३२ ॥** क्यङ् वा । अभ्यवहृतं द्रव्यं रोमन्थः । रोमन्थमुच्चर्वयति रोमन्थायते गौः । उद्गीर्य चर्वयतीत्यर्थः । उच्चर्वण इति किम् ? । कीटो रोमन्थं वर्त्तयति । उद्गीर्य बहिस्त्यक्तं पृष्ठान्ते निर्गतं वा द्रव्यं गुटिकां करोतीत्यर्थः ॥ **फेनोष्मबाष्पधूमादुद्वमने ॥ ३ । ४ । ३३ ॥** कर्मणः क्यङ् वा । फेनमुद्वमति फेनायते । उष्मायते । बाष्पायते । धूमायते ॥ **सुखादेरनुभवे ॥ ३ । ४ । ३४ ॥** कर्मणः क्यङ् वा॥ साक्षात्कारोऽनुभवः। सुखायते । दुःखायते । अनुभव इति किम् ? । देवदत्तस्य सुखं वेदयते प्रसाधकः । सुखादिविकारेणानुमानतो निश्चिनोतीत्यर्थः ॥ **शब्दादेः कृतौ वा ॥ ३ । ४ । ३५ ॥** कर्मणः क्यङ् । णिजपवादः । शब्दं करोति शब्दायते । वैरायते । वाशब्दो व्यवस्थितविभाषार्थः । तेन यथादर्शनं णिजपि । शब्दयति । वैरयति । वाधिकारस्तु वाक्यार्थः ॥ **तपसः क्यन् ॥ ३ । ४ । ३६ ॥** कर्मणः करोत्यर्थे वा । तपः करोति तपस्यति । अत्र यदा व्रतपर्यायस्तपःशब्दस्तदा क्यन्कर्मणो वृत्तावन्तर्भूतत्वादकर्मकत्वम् । यदा तु सन्तापक्रियावचनस्तदा क्यन्कर्मणो वृत्तावन्तर्भावेऽपि स्वकर्मणा सकर्मक एव । तपस्यति शत्रून् ॥ **नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये ॥ ३ । ४ । ३७ ॥** कर्मणो यथासङ्ख्यं करोत्यर्थे क्यन् वा नमस्यति देवान् । वरिवस्यति गुरून् । चित्रीयते । ङकार आत्मनेपदार्थः । अर्चादिष्विति किम् ? । नमः करोति । नमःशब्दमुच्चारयतीत्यर्थः॥ **अङ्गान्निरसने णिङ् ॥ ३ । ४ । ३८॥** कर्मणो वा । हस्तौ निरस्यति । हस्तयते । पादयते निरसन इति किम् ? । हस्तं करोति हस्तयति । कर्मण इति किम्?। हस्तेन निरस्यति । ङकार आत्मनेपदार्थः। **पुच्छादुत्परिव्यसने ॥ ३ । ४ । ३९॥** पुच्छात्कर्मण उदसने पर्यसने व्यसने असने चार्थे णिङ् वा । पुच्छमुदस्यति । उत्पुच्छयते । पर्यस्यति,परिपुच्छयते । विविधं विरुद्धं वोत्क्षेपणं व्यसनम् । विपुच्छयते । पुच्छयते ॥ **भाण्डात्समा-**

चितौ ॥ ३ । ४ । ४० ॥ कर्मणो णिङ् वा । भाण्डानि समाचिनोति सम्भाण्डयते । परिभाण्डयते । राशीकरोतीत्यर्थः । समाचयनं समपरिभ्यां द्योत्यते ॥ चीवरात्परिधानार्जने ॥ ३ । ४ । ४१ ॥ कर्मणो णिङ् वा । चीवरं परिधत्ते परिचीवरयते । समाच्छादनमपि परिधानम् । संचीवरयते । चीवरमर्जयति चीवरयते । सम्मार्जनेऽप्यन्ये ॥ णिज्बहुलं नाम्नः कृगादिषु ॥ ३ । ४ । ४२ ॥ बहुलग्रहणं प्रयोगानुसरणार्थम् । तेन यस्मान्नाम्नो यद्विभक्त्यन्ताद्यस्मिन् धात्वर्थे दृश्यते तस्मात्तद्विभक्त्यन्ताद् तद्धात्वर्थ एव भवतीति नियमो लभ्यते । मुण्डं करोति मुण्डयति छात्रम् । मिश्रयत्योदनम् । लक्ष्णयति वस्त्रम् । लवणयति सूपम् । एभ्यश्च्व्यर्थ एवेति कश्चित् । व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति । प्रत्यये उत्पन्ने योऽसौ व्याकरणसूत्रयोः सम्बन्धः स निवर्त्तत इति न व्याकरणशब्दात्षष्ठी किन्तु सूत्रयतिक्रियासम्बन्धाद् द्वितीयैव । एवं द्वारमुद्घाटयतीत्यादि । ननु तपस्यतीत्यादिवत्कर्मणो वृत्तावन्तर्भावान्मुण्डिनाऽकर्मकेण भाव्यमिति चेन्न । सामान्यकर्मणोऽन्तर्भावेऽपि विशेषकर्मणा सकर्मकत्वात् । मुण्डयति छात्रमिति । पुत्रीयतीत्यादौ तु आचारक्यना बुद्धेरपहृतत्वादिच्छाक्यन्नन्तस्य विद्यमानमपि विशेषकर्म न प्रयुज्यते । पुत्रीयति छात्रमित्युक्ते पुत्रमिच्छतीति प्रतीत्यभावात् । तदुक्तम् " सदपीच्छाक्यनः कर्म तदाचारक्यना हृतम् । कौटिल्येनेव गत्यर्थाभ्यासो वृत्तौ न गम्यते । १ । " मुण्डं बलीवर्दं करोतीत्युभयधर्मविधाने मुण्डं शुक्लं करोतीत्यनुवादे वाऽनभिधानान्न भवति । पटुमाचष्टे पटयति । वृद्धौ कृतायामन्त्यस्वरादिलोपः । अपीपटत् । न च परत्वात्पूर्वं लोप एव स्यादिति वाच्यम् । हलिकलिवर्जनात्परस्यापि लोपस्य वृद्ध्या बाधात् । गोनावमाचष्टे गोनयति । अजूगुनत् । ह्रस्वे कर्त्तव्ये स्थानिवद्भावस्तु न, स्वरस्य पर इति स्थानिवद्भावस्यानित्यत्वात् । वृक्षमाचष्टे रोपयति वा वृक्षयति । कृतं गृह्णाति कृतयति । एवं वर्णयति । त्वचयति । रूपं दर्शयति रूपयति । रूपं निध्यापति निरूपयति । लोमान्यनुमार्ष्टि । अनुलोमयति । तूस्तानि विहन्ति उद्धहति वा वितूस्तयति उत्तूस्तयति केशान् । विजटीकरोतीत्यर्थः । वस्त्र-

वस्त्रेण वा समाच्छादयति संवस्त्रयति । वस्त्रं परिदधाति परिवस्त्रयति । तृणान्युत्प्लुत्य शातयति उत्तृणयति । हस्तिनातिक्रामति हस्तयति । एवमत्यश्वयति । वर्मणा संनह्यति संवर्मयति । वीणयोपगायत्युपवीणयति । सेनयाऽभियात्यभिषेणयति । चूर्णैरवध्वंसयति अवकिरति वा अवचूर्णयति । तूलैरनुकुष्णाति अवकुष्णति अनुगृह्णाति वा अनुतूलयति अवतूलयति । वास्या छिनत्ति वासयति । एवमसिना असयति। वास्या परिच्छिनत्ति परिवासयति। वाससोन्मोचयति उद्वासयति । परशुना परशयति । श्लोकैरुपस्तौति उपश्लोकयति । हस्तेनापक्षिपति अपहस्तयति । अश्वेन संयुनक्ति समश्वयति । गन्धेनार्चयति गन्धयति । एवं पुष्पयति । बलेन सहते बलयति । शीलेनाचरति शीलयति । एवं सामयति । सान्त्वयति । छन्दसोपचरति उपमंत्रयते वा उपच्छन्दयति । पाशेन संयच्छति। संपाशयति । पाशं पाशाद्वा विमोचयति विपाशयति । शूरो भवति शूरयति । वीर उत्सहते वीरयति । कूलमुल्लङ्घयति उत्कूलयति । कूलं प्रतीपं गच्छति प्रतिकूलयति । कूलमनुगच्छति अनुकूलयति । लोष्टानवमर्दयति अवलोष्टयति । पुत्रं सूते पुत्रयति इत्यादि । आख्यानं नलोपाख्यानं कंसवधं सीताहरणं रामप्रव्रजनं राजागमनं मृगरमणं आरात्रिविवासमाचष्टे इत्यादिषु इन्द्रियाणां जयं क्षीरस्य पानं देवानां यागं धान्यस्य क्रयं धनस्य त्यागमोदनस्य पाकं करोतीत्यादिषु च बहुलवचनान्न यत्रानेकविशेषणविशिष्टा क्रिया प्रत्ययार्थस्तत्र क्रियाविशेषाभिव्यक्तये उपसर्गप्रयोग आवश्यकः । यथा विपाशयति सम्पाशयतीति । एकविशेषणविशिष्टक्रियायाः प्रत्ययार्थत्वे तु नैवम्, सन्देहाभावात् । यथा श्येनायते । एवम् प्रत्ययस्यानेकार्थत्वेऽपि अर्थविशेषाभिव्यक्त्यर्थमुपसर्गप्रयोगः यथा अतिहस्तयति । अनेकोपसर्गविशिष्टक्रियायाः प्रत्ययार्थत्वे शब्दशक्तिस्वाभाव्यादेक एवोपसर्गार्थः प्रत्ययार्थेऽन्तर्भवति द्वितीयस्तूपसर्गेणैव प्रत्याय्यते । यथा भाण्डानि समाचिनोति सम्भाण्डयते ॥"विन्मतोर्णीष्ठेयसौ लुप्" इति लुपि स्रग्विणमाचष्टे स्रजयति। पयस्विनीं पययति । विन्मतोर्लुप्यनेकस्वरस्यान्त्यस्वरादेर्लुकं विकल्पनेच्छन्त्येके। लुगभावपक्षे णौ गुणं च। पयसयति २। त्वग्वन्तं त्वचयति। वसुमन्तं वसयति ।

वसवयति इत्यपि मतान्तरे। श्रीमन्ती श्रीमन्तं वा श्रययति। संज्ञापूर्वकत्वान्न वृद्धिः। अशिश्रयत्। अल्पं युवानं वा कनयति। पक्षे अल्पयति। यवयति। अयुयवत्। स्थूलं स्थवयति। दवयति। कथं दूरयत्यवनते विवस्वतीति? दूरमतति अयते वा दूरात् तं कुर्वन्तीत्यर्थः। ह्रसयति। क्षेपयति। क्षोदयति। अचुक्षोदत्। श्रयति। ज्ययति। साधयति। अससाधत्। नेदयति। प्रियमाचष्टे प्रापयति। स्थापयति। स्फापयति। वरयति। गरयति। वंहयति। त्रपयति। द्राघयति। वर्षयति। वृन्दयति। प्रथयति। अपप्रथत्। म्रदयति। भ्रशयति। क्रशयति। द्रढयति। परिव्रढयति। बहून्, भूययति। भावयतीति केचित्। बहयतीत्यन्ये। ऊढिमाचष्टे, ऊढयति। औजिढत्। ढत्वादीनामसत्त्वाड्ढतिशब्दस्य द्वित्वम्। केचित्तु औडिढत् इतीच्छन्ति। ऊढमाख्यत्। औजढत्। औडढत् इत्यन्ये। त्वयति। त्वां मा वाऽऽचष्टे। त्वदयति। मदयति। नित्यत्वादन्त्यस्वरादिलोपात्प्राक् त्वमादेशोऽन्तरङ्गत्वाल्लुगस्यादेत्यपदे इत्यकारस्य लुकि नैकस्वरस्येति निषेधादन्त्यस्वरादेर्लुग् न। वार्णात्प्राकृतं बलीय इति त्वनित्यम्। त्वापयति मापयतीत्यन्ये। त्वादयति। मादयतीत्यपरे। युवामावां वा आचष्टे युष्मयति। अस्मयति। विद्वांसं विद्वयति। णिवर्जनान्नोप्। विदावयतीत्यन्ये। विद्यतीत्यपरे। श्वानं श्वानयति। शावयतीत्यन्ये। शुनयतीत्यपरे। उदञ्चमाचष्टे उदयति। णिवर्जनान्नोदीच्। उदायत्। उदैयत्। उदीचयतीत्यन्ये। प्रत्यञ्चं प्रत्ययति। प्रत्यायत्। प्रतीचयतीत्यन्ये। दध्यञ्चम् दध्ययति। स्वरव्यञ्जनयोरभेदन्यायेन स्वरस्थानिकत्वादन्त्यस्वरादिलुचः स्थानिवत्त्वान्न वृद्धिः। मतान्तरे न वृद्धिरिति निषेधाद्वा। यत्वे तु न स्थानिवद्भावः। न संधिङीति निषेधात्। अदध्ययत्। अदद्ध्यत्। सम्यञ्चं सम्ययति। समीचयतीत्यन्ये। समिआयत्। सम्यायत्। तिर्यञ्चं तिर्ययति। अन्त्यस्वरादिलोपस्य बहिरङ्गत्वेनासिद्धत्वात्तिरसस्तिरिः। अतितिर्यत्। तिराययतीत्यन्ये। सध्र्यञ्चं सध्र्ययति। अससध्र्यत्। सध्रायपतीत्यन्ये। विष्वद्र्यञ्चं विष्वद्र्ययति। अविविष्वद्र्यत्। देवद्र्यञ्चं देवद्र्ययति। अदिदेवद्र्यत्। अदद्र्यञ्चम्। अदद्र्ययति। अदमुयञ्चम्। अदमुयति। अमुमुयञ्चम्। अमुमु-

यति । आसुसुयत् । हलिं कलिं वा गृह्णाति । हलयति । कलयति । अजहलत् । अचकलत् । नात्र सन्वद्भावदीर्घौ, नामिनोऽकलिहलेरिति वृद्ध्यभावेन समानलोपित्वात् । स्वश्वम् । स्वश्वयति । स्वाशश्वत् । भुवमाचष्टे भावयति । अबीभवत् । भ्रुवम् । भ्रावयति । अबुभ्रवत् । श्रियम् । अशिश्रयत् । गाम् अजूगवत् । रायम्, अरीरयत् । नावम्, अनूनवत् । कर्त्तारमाचष्टे करयति । अचकरत् । भ्रातरं भ्रातयति । अनर्थकत्वात्तृशब्दलोपो न । दरदमाचष्टे दारदयति । एनीम्, एतयति । ऐततत् ॥ **व्रताद्भुजितन्निवृत्त्योः ॥ ३ । ४ । ४३ ॥** कृगादिष्वर्थेषु णिज् बहुलम् ॥ व्रतं शास्त्रविहितो नियमः । पय एव मया भोक्तव्यमिति व्रतं करोति गृह्णाति वा पयो व्रतयति । सावद्यान्नं मया न भोक्तव्यमिति व्रतं करोति गृह्णाति वा सावद्यान्नं व्रतयति । अर्थनियमार्थ आरम्भः ॥ **सत्यार्थवेदस्याः ॥ ३ । ४ । ४४ ॥** णिच् तत्सन्नियोगे । सत्यापयति । अर्थापयति । आर्तीथपत् । वेदापयति ॥ **श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक् ॥ ३ । ४ । ४५ ॥** णिच् संनियोगे । श्वेताश्वमाचष्टे करोति तेनातिक्रामति वा श्वेतयति । अश्वयति । गालोडयति । आह्वरयति लुगर्थं वचनम् । णिच् तु पूर्वेण सिद्ध एव ॥

**इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां नामधातुप्रक्रिया ॥**

---

## ॥ अथ कण्ड्वादयः ॥

कण्डूग् गात्रविघर्षणे १ ॥ **धातोः कण्ड्वादेर्यक् ॥ ३ । ४ । ८ ॥** स्वार्थे । द्विविधाः कण्ड्वादयः । धातवो नामानि च । कण्डूयति । कण्डूयते । धातोरिति किम् ? । कण्डूः । यकः कित्त्वाद्धातोरेवायं विधिः धातुग्रहणमुत्तरार्थ-

मिह सुखार्थे च । महीङ् वृद्धौ पूजायां च २ । महीयते । हृणीङ् रोषलज्जयोः ३ । हृणीयते । वेङ् लाङ् धौर्त्ये पूर्वभावे स्वप्ने च ४ । मन्तु रोषवैमनस्ययोः ५ । अपराधे इत्येके । मन्तूयति । वल्गु माधुर्यपूजयोः६। असु मानसोपतापे । ७ । असूयति । असू असूग् इत्येके । अन्ये तु असूञ् दोषाविष्कृतौ रोगे चेत्याहुः । वेट्, लोट् वेङ्वत् । लाट् जीवने इत्येके। वेट् लाट् इत्यन्ये । लिट् अल्पार्थे कुत्सायां च ९। लोट् दीप्तौ १० । लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने चेत्यन्ये । लेला दीप्तावित्यपि केचित् । उरस् ऐश्वर्ये ११ । उरस्यति । उषस् प्रभातीभावे १२ । इरस् ईर्ष्यायाम् १३ । इरज् इरगित्यपि केचित् । तिरस् अन्तर्धौ १४ । इयस् इमस् असू पयस् प्रसृतौ १५ । सम्भूयस् प्रभूतभावे १६ । दुवस् परितापपरिचरणयोः १७ । दुरज् भिषज् चिकित्सायाम् १८ । भिष्णुज् उपसेवायाम् । १९ । रेखा श्लाघासादनयोः २० । लेखा विलासस्खलनयोः २१ । अदन्तोऽयमित्यपरे । एला वेला केला खेला विलासे २२ । इलेत्यन्ये । खल् इत्येके । गोधा मेधा आशुग्रहणे २३ । मगध परिवेष्टने २४ । नीचदास्य इत्यन्ये । इरध इषुध शरधारणे । २५ । कुषुभ् क्षेपे २६। सुख दुःख तत्क्रियायाम् २७ । अगद नीरोगत्वे २८ । गद्गद वाक्स्खलने २९ । गद्गदिङित्येके । तरणवरण गतौ । ३० । उरण तुरण त्वरायाम् ३१ । भुरण गतौ ३२ । भुरण धारणपोषणयुद्धेषु ३३ । चुरण मतिचौर्ययोः ३४ । भरण भर्त्सनार्थः ३५ । तपुस् तम्पस् दुःखार्थौ ३६ । तन्तस पम्पस इत्यन्यत्र । अरर आराकर्म्मणि ३७ । सपर पूजायाम् ३८ । समर युद्धे ३९ ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां कण्ड्वादयः ॥

## ॥ अथ प्रत्ययमाला ॥

अश्वीयतेः सनि ॥ नाम्नो द्वितीयाद्यथेष्टम् ॥ ४ । १ । ७ ॥ स्वरादेर्नाम्नो धातोर्द्विर्वचनभाजो द्वितीयादारभ्यैकस्वरोऽवयवो यथेष्टं द्विरुच्यते । अशिश्वीयिषति । अश्वीयियिषति । अश्वीयिषिषति । इन्दिद्रीयिषति । इन्द्रीयियिषति इन्द्रीयिषिषति ॥ अन्यस्य ॥ ४ । १ । ८ ॥ स्वरादेरन्यस्य नाम्नो धातोर्द्विर्वचनभाजः प्रथमादिरेकस्वरो यथेष्टं द्विः । पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । पुत्रीयिषिषति । चिचन्द्रीयिषति । चन्दिद्रीयिषति । चन्द्रीयियिषति । चन्द्रीयिषिषति । पुत्रीयन्तं प्रायुङ्क्त अपुपुत्रीयत् । अपुतित्रीयत् । अपुत्रीयियत् । प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति । पिप्रापयिषति । प्रापिपयिषति । प्रापयियिषति । प्रापयिषिषति । उरुं विवरयिषति । वरिरयिषति । वरयियिषति । वरयिषिषति ॥ कण्ड्वादेस्तृतीयः ॥ ४ । १ । ९ ॥ कण्ड्वादेर्धातोर्द्विवचनभाजस्तृतीय एवैकस्वरो द्विः । कण्डूयियिषति । असूयियिषति ॥ पुनरेकेषाम् ॥ ४ । १ । १० ॥ मते द्वित्वे कृते द्विः । सुसोषुपिषते । एकेषामिति किम् ? । सोषुपिषते । सन्नन्ताण्णिगि, बुभूषयति । यङन्ताण्णिगि बोभूययति । यङ्लुबन्ताण्णिगि बोभावयति । णिगन्ताण्णिग् भावयति । ण्यन्तात्सनि, बिभावयिषति । यङ् सन् ण्यन्तात्सन् । बोभूयिषयिषति । यङ् णिग् सन्नन्ताण्णिग् । बोभूययिषयतीत्यादि ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां प्रत्ययमालाः ॥

## ॥ अथात्मनेपदप्रक्रिया ॥

इङितः कर्त्तरि । आस्ते । शेते ॥ क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसो ह्वहश्चानन्योन्यार्थे ॥ ३ । ३ ।२३। कर्त्तर्यात्मनेपदम् । इतरेण चिकीर्षितायां क्रियायामितरेण हरणं करणं क्रियाव्यतिहारः । व्यतिलुनते । व्यतिपुनते ।

सम्प्रहरन्ते राजानः। व्यतिवहन्ते भारम् । संविवहन्ते वर्गाः। असक् श्रुत्रि । व्यतिस्ते । व्यतिषाते । व्यतिषते । व्यतिसे । व्यतिध्वे । व्यतिहे । व्यतिषीत । व्यत्यसै । व्यत्यास्त । व्यतिराते ३। व्यतिभाते ३। व्यतिबभे। क्रियेति किम् ?। द्रव्यव्यतिहारे मा भूत् । चैत्रस्य धान्यं व्यतिलुनन्ति । अत्र लुनातिरुपसंग्रहात्मके लवने वर्त्तते । चैत्रेण गृहीतं धान्यं पुरस्ताल्लवनेनोपसङ्गृह्णन्तीत्यर्थः । अगतीत्यादि किम् ? । व्यतिगच्छन्ति । व्यतिघ्नन्ति । व्यतिजल्पन्ति । व्यतिहसन्ति । अनन्योन्यार्थ इति किम् ? । अन्योन्यस्येतरेतरस्य परस्परस्य वा व्यतिलुनन्ति । क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योऽन्यादिभिः तत्कर्माभिसंबध्यते । कर्त्तरीत्येव । तेन भावकर्मणोः पूर्वेणैव गत्यर्थादिभ्योऽपि स्यात् । व्यतिगम्यन्ते ग्रामाः ॥ निविशः ॥ ३ । ३ । २४ ॥ कर्त्तर्यात्मनेपदम् । निविशते । न्यविशतेत्यटो धात्ववयवत्वान्न व्यवधायकत्वम् । मधुनि विशन्ति भ्रमरा इत्यादौ निविशोरसंबन्धादनर्थकत्वाच्च न भवति ॥ उपसर्गादस्योहो वा ॥ ३ । ३ । २५ ॥ कर्त्तर्यात्मनेपदम् । विपर्यस्यते । विपर्यस्यति । समूहते । समूहति ॥ उपसर्गादूहो ह्रस्वः ॥ ४ । ३ । १०६ ॥ क्ङिति यादौ । समुह्यात् । समुह्यते । उपसर्गादिति किम् ? । ऊह्यते । यीत्येव समूहितम् । ऊ ऊह इति प्रश्लेषात् आ ऊह्यते ओह्यते समोह्यते । उभत्रय विभाषेयम् । अन्ये त्वकर्मकाभ्यामेवेच्छन्ति, प्रत्युदाहरन्ति च, निरस्यति शत्रून् । समूहते पदार्थान् ॥ उत्स्वराद्युजेरयज्ञतत्पात्रे ॥ ३ । ३ । २६ ॥ उपसर्गात्कर्त्तर्यात्मनेपदम् । उद्युङ्क्ते । उपयुंक्ते । उत्स्वरादिति किम् ? । संयुनक्ति । अयज्ञतत्पात्र इति किम् ? । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । उभयसत्त्वे एव निषेधः । यज्ञे मन्त्रं रन्धनपात्राणि वा प्रयुङ्क्ते यज्ञपात्राणि रन्धने प्रयुङ्क्ते । युजिच् समाधावित्यस्येदित्वादात्मनेपदविधानमनर्थकम् ॥ परिव्यवात्क्रियः ॥ ३ । ३ । २७ ॥ उपसर्गात्कर्त्तर्यात्मनेपदम् । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । सर्वत्रेगितः फलवतोऽन्यत्र विधिः । उपसर्गादित्येव । उपरि क्रीणाति । क्री इत्यनुकरणमनुकार्येणार्थेनार्थवदिति नामत्वे स्यादयः । प्रकृतिवदनुकरणमिति न्यायाच्च

धातुकार्यमित्यादेशः। अत एव च ज्ञापकात् प्रकृतिवदनुकरणे कार्यं भवति । तेन मुनी इत्याह क्षिप्यचतीत्यादौ प्रकृतिभावषत्वविकल्पादि सिध्यति । परावेर्जः ॥ ३ । ३ । २८ ॥ उपसर्गात्कर्तर्यात्मनेपदम् । पराजयते । उपसर्गादित्येव। सेना पराजयति। बहु विजयति वनम् । समः क्ष्णोः ॥ ३ । ३ ॥ २९ ॥ कर्त्तर्यात्मनेपदम् । संक्ष्णुते शस्त्रम् । सम इति किम् ? । क्ष्णौति । उपसर्गादित्येव । आयसं क्ष्णौति । अपस्किरः ॥ ३ । ३। ३० ॥ अपपूर्वात्किरतेः सस्सट्कात्कर्त्तर्य्यात्मनेपदम् । अपाच्चातुष्पात्पक्षिशुनि हृष्टान्नाश्रयार्थे ॥ ४ । ४ । ८५ ॥ कर्त्तरि यथासंख्यं किरतेः स्सडादिः । अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी । श्वा आश्रयार्थी च । सस्सट्कनिर्देशादिह न । अपकिरति वृषभः । अपेति किम् ? । उपस्किरति । उदश्चरः साप्यात् ॥ ३ । ३ । ३१ ॥ कर्त्तर्यात्मनेपदम् । गुरुवचनमुच्चरते । व्युत्क्रम्य गच्छतीत्यर्थः । ग्रासमुच्चरते भक्षयतीत्यर्थः । साप्यादिति किम् ?। धूम उच्चरति । ऊर्ध्वं गच्छतीत्यर्थः ॥समस्तृतीयया ।३।३।३२॥ चरतेर्योगे कर्त्तर्यात्मनेपदम् । रथेन संचरते । तृतीययेति किम् ? । उभौ लोकौ संचरसि । किं त्वं करिष्यसि। रथ्यया संचरति चैत्र इत्यत्र तृतीयान्तेन योगाभावान्न । क्रीडोऽकूजने ॥३।३। ३३॥ संपूर्वात् कर्त्तर्यात्मनेपदम् । कूजनमव्यक्तः शब्दः । संक्रीडते । अकूजन इति किम् ? । संक्रीडन्ति शकटानि । अव्यक्तं शब्दं कुर्वन्तीत्यर्थः । अन्वाङ्परेः ॥ ३ । ३ । ३४ ॥ उपसर्गात्क्रीडः कर्त्तर्यात्मनेपदम् । अनुक्रीडते । आक्रीडते । परिक्रीडते । उपसर्गादित्येव । माणवकमनुक्रीडति । माणवकेन सह क्रीडत इत्यर्थः । धातुना अनोरसम्बन्धाद्वा न भवति। शप उपलम्भने ॥ ३ । ३ । ३५ ॥ उपलम्भनं ज्ञापनम् । मैत्राय शपते । मैत्रं कञ्चिदर्थं बोधयतीत्यर्थः । मैत्र इवैवंभूतोऽसावित्यन्यस्मै प्रकाशयतीत्येके । अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनं शपथ इति यावत् । मैत्राय शपते । वाचा मात्रादि शरीरस्पर्शनेन स्वाभिप्रायं बोधयतीत्यर्थः । प्रोषितस्य भावाभावोपलब्धौ कस्यचिदर्थस्यासेवनं चोपलम्भनम् । मैत्राय शपते । प्रोषिते मैत्रे तस्य भावाभावे चोपलब्धे तदनुरूपं किञ्चिदनु-

तिष्ठतीत्यर्थः । उपलम्भन इति किम्? । मैत्रं शपति। आक्रोशतीत्यर्थः ।"आशिषि नाथः ॥३।३।३६॥" सर्पिषो नाथते । हृगो गतताच्छील्ये ॥३।३।३८॥ कर्त्तर्यात्मनेपदम् । गतं प्रकारः सादृश्यम् । ताच्छील्यमुत्पत्तेः प्रभृत्या विनाशात्तत्स्वभावता । पैतृकमश्वा अनुहरन्ते । मातृकं गावः । पितुरागतं मातुरागतं गुणविषयं क्रियाविषयं वा सादृश्यमविकलं शीलयन्तीत्यर्थः । एवं पितुरनुहरते । पितरमनुहरते । गतेति किम् ?। पितुर्हरति । ताच्छील्य इति किम् ?। नटो राममनुहरति । यद्वा गतं गमनम् । तस्य पित्रादेः शीलमस्य तच्छीलस्तस्य भावस्ताच्छील्यम्। गतेन ताच्छील्यं गतताच्छील्यम् । पैतृकमश्वा अनुहरन्ते । पितुरागतं गमनमविच्छेदेन शीलयन्तीत्यर्थः। गतताच्छील्य इति किम्? । धर्मान्तरेण पितरमनुहरन्ति । अथवा गते गमने ताच्छील्ये चेत्यर्थः । पैतृकमनुहरन्ते तद्वद्गच्छन्ति शीलन्ति वेत्यर्थः ॥ पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः ॥३।३।३९॥ पूजाचार्यकभृतिषु यथासंख्यं कर्मकर्तृकधात्वर्थविशेषणेषु गम्यमानेषु उत्क्षेपणादिषु च धात्वर्थेषु नयतेः कर्त्तर्यात्मनेपदम् । नयते विद्वान् स्याद्वादे। जीवादीन् पदार्थान् युक्तिभिः स्थिरीकृत्य स्याद्वादे शिष्यबुद्धिं प्रापयतीत्यर्थः । ते युक्तिभिः स्थिरीकृताः पूजिता भवन्ति । माणवकमुपनयते । स्वयमाचार्यो भवन्नध्ययनायात्मसमीपं प्रापयतीत्यर्थः । कर्मकरानुपनयते । वेतनेनात्मसमीपं प्रापयतीत्यर्थः । शिशुमुदानयते । उत्क्षिपतीत्यर्थः । तत्त्वार्थे नयते । प्रमेयं निश्चिनोतीत्यर्थः । प्रमेयनिश्चयो ज्ञानम् । विगणनमृणादेः शोधनम् । कारं विनयन्ते । राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः । व्ययो धर्मादिषु विनियोगः । शतं विनयते । तीर्थादिषु धर्म्मार्थं विनियुङ्क्ते इत्यर्थः । एष्विति किम् ? । अजां नयति ग्रामम् । अफलवदर्थ आरम्भः ॥ कर्तृस्थामूर्त्ताप्यात् ॥ ३ ।३। ४० ॥ नियः कर्त्तर्यात्मनेपदम् । श्रमं विनयते। अपनयतीत्यर्थः । कर्तृस्थेति किम् ? । चैत्रो मैत्रस्य मन्युं विनयति। अमूर्तेति किम् ? । गड्डुं विनयति । आप्येति किम् ? । बुद्ध्या विनयति । श्रमापगमादेः फलस्य कर्तृसमवायित्वादात्मनेपदे सिद्धे नियमार्थं वचनम् । व्यवच्छेद्यं च प्रत्युदाहरणम् । शमयतिक्रियावचनादेव च नयतेरात्मनेपदं दृश्यते न

प्रापणार्थात् । यथा, विगणय्य नयन्ति पौरुषम् इति भारविः ॥ " शादेः शिति ॥ ३ । ३ । ४१ ॥ " शीयते ॥ " म्रियतेरद्यतन्याशिषि च ॥ ३ । ३ । ४२ ॥ " अमृत ॥ " क्यङ्षो न वा ॥ ३ । ३ । ४३ ॥ " ॥ पटपटायति । पटपटायते ॥ " द्युद्भ्योऽद्यतन्याम् ॥ ३ । ३ । ४४ ॥ " अद्युतत् । अद्योतिष्ट ॥ " वृद्भ्यः स्यसनोः ॥ ३ । ३ । ४५ ॥ " वर्त्स्यति । वर्त्तिष्यते ॥ " कृपः श्वस्तन्याम् ॥ ३ । ३ । ४६ ॥ " कल्प्तासि । कल्पितासे ॥ क्रमोनुपसर्गात् ३ । ३ । ४७ ॥ कर्त्तर्यात्मनेपदं वा । क्रामति । क्रमते । अनुपसर्गादिति किम् ?। अनुक्रामति । वृत्तिसर्गतायने ॥ ३ । ३ । ४८ ॥ क्रमः कर्त्तर्यात्मनेपदम् । वृत्तिरप्रतिबन्धः आत्मयापनं वा । शास्त्रे क्रमते बुद्धिः । न हन्यते आत्मानं यापयति वेत्यर्थः । सर्गं उत्साहः तात्पर्यं वा । सर्गेणातिसर्गस्य लक्षणादनुज्ञा वा । सूत्राय क्रमते । उत्सहते तत्परो वाऽनुज्ञातो वा । तायनं सन्तानः पालनं स्फीतता वा । क्रमन्तेऽस्मिन् योगाः स्फीता भवन्ति सन्तन्यन्ते पाल्यन्ते वेत्यर्थः । परोपात् ॥ ३ । ३ । ४९ ॥ आभ्यामेव क्रमेर्वृत्त्यादिषु कर्त्तर्यात्मनेपदम् । पराक्रमते । उपक्रमते । परोपादेवेति किम् ?। अनुक्रामति । वृत्त्यादिष्वित्येव । पराक्रामति । अन्ये तु परोपाभ्यां परात्क्रमेर्वृत्त्याद्यभावेपीच्छन्ति । वृत्त्यादिषु त्वन्योपसर्गपूर्वादपि पूर्वेण मन्यन्ते । वेः स्वार्थे ॥ ३ । ३ । ५० ॥ क्रमः कर्त्तर्यात्मनेपदम् । साधु विक्रमते गजः । स्वार्थ इत्येव । गजेन विक्रामति । विक्रामत्यजिनसन्धिः स्फुटतीत्यर्थः ॥ प्रोपादारम्भे ॥ ३ । ३ । ५१ ॥ क्रमेः कर्त्तर्यात्मनेपदम् । आरम्भ आदिकर्म्म । अङ्गीकरणं चेत्यन्ये । प्रक्रमते उपक्रमते भोक्तुम् । प्रारभते अङ्गीकरोति चेत्यर्थः ॥ आरम्भ इति किम् ?। प्रक्रामति यातीत्यर्थः । उपक्रामति । समीपमागच्छतीत्यर्थः । परोपादित्यनेनापि न भवति वृत्त्याद्यर्थस्य विवक्षितत्वात् । अन्ये तु स्वार्थविषय एवारम्भे मन्यन्ते ॥ आङो ज्योतिरुद्गमे ॥ ३ । ३ । ५२ ॥ क्रमेः कर्त्तर्यात्मनेपदम् । आक्रमते सूर्यः । उद्यत इत्यर्थः । दिवमाक्रममाणेन केतुना । ज्योतिरुद्गम इति किम् ?। माणवकः कुतुपमाक्रामति । अ-

वष्टभ्नातीत्यर्थः । ज्योतिरिति किम् ? । आक्रामति धूमः । उद्गच्छतीत्यर्थः । आक्रामति धूमो हर्म्यतलम् । उद्गच्छन् व्याप्नोतीत्यर्थः । उद्गम इति किम् ? । नभः समाक्रामति नष्टवर्त्मना स्थितैकचक्रेण रथेन भास्करः । इह व्याप्तिमात्रं विवक्षितम् । दागोऽस्वास्यप्रसारविकासे ॥ ३ । ३ । ५३ ॥ आङः कर्त्तर्यात्मनेपदम् । विद्यामादत्ते । अस्वास्येत्यादि किम् ? । उष्ट्रो मुखं व्याददाति । कूलं व्याददाति । स्वेति किम् ? व्याददते पिपीलिकाः पतङ्गस्य मुखम् । नुप्रच्छः ॥ ३ । ३ । ५४ ॥ आङः कर्त्तर्यात्मनेपदम् । आनुते शृगालः । उत्कण्ठितः शब्दं करोतीत्यर्थः । उत्कण्ठापूर्वके संशब्दे नौतेरयं विधिर्न सर्वत्र । आपृच्छते गुरून् । आपृच्छस्व प्रियसखम् । वियुज्यमानस्य प्रश्नेयं विधिः । गमेः क्षान्तौ ॥३ । ३ ।५५॥ आङः कर्त्तर्यात्मनेपदम् । क्षान्तिः कालहरणम् । आगमयते गुरून्, कञ्चित्कालं प्रतीक्षते । क्षान्तावित्येव । आगमयति विद्याम् । गृह्णातीत्यर्थः । क्षान्तौ गमिर्ण्यन्त एव । ह्वः स्पर्द्धे ॥ ३ । ३ । ५६ ॥ गम्ये आङः कर्त्तर्यात्मनेपदम् । मल्लो मल्लमाह्वयते । स्पर्द्धमान आकारयतीत्यर्थः । स्पर्द्ध इति किम् ? । गामाह्वयति । संनिवेः ॥ ३ । ३ । ५७ ॥ ह्वयतेः कर्त्तर्यात्मनेपदम् । संह्वयते । निह्वयते । विह्वयते । उपात् ॥ ३ । ३ । ५८ ॥ ह्वयतेः कर्त्तर्यात्मनेपदम् । उपह्वयते । यमः स्वीकारे ॥ ३ । ३ । ५९ ॥ उपात् कर्त्तर्यात्मनेपदम् । कन्यामुपयच्छते । वेश्यामुपयच्छते । च्विनिर्देशः किम् ? । शाटकाटकानुपयच्छति । नात्रास्वं स्वं क्रियते स्वत्वेन निर्ज्ञातस्यैव ग्रहणम् । उद्वाह एवेच्छन्त्यन्ये । वा स्वीकृतौ ॥ ४ । ३ । ४० ॥ यमेरात्मनेपदविषयः सिच् कित् । उपायत उपायंस्त वा महास्त्राणि । उपायत उपायंस्त कन्याम् । स्वीकृताविति किम् ? । आयंस्त पाणिम् । उद्वाह एवेच्छन्त्यन्ये । देवार्चामैत्रीसङ्गमपथिकर्तृकमन्त्रकरणे स्थः ॥ ३ । ३ । ६०॥ उपात्कर्त्तर्यात्मनेपदम् । देवार्चायाम् । जिनेन्द्रमुपतिष्ठते । बहूनामप्यचित्तानामेको भवति चित्तवान् । पश्य वानरसङ्घेऽस्मिन् यदर्कमुपतिष्ठते ।१। यदा तु नेयं देवपूजाऽपि तु चापलमिति विवक्षितं तदा न भवति । मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि

यथा वयम्। एतदप्यस्य कापेयं यदर्कमुपतिष्ठति।१। मित्रतया मित्रं वा कर्त्तुमाचरणं मैत्री उपस्थानस्य हेतुः फलं वा । महामात्रानुपतिष्ठते । मैत्र्या हेतुना फलेन वाराधयतीत्यर्थः । सङ्गमे, गङ्गायमुनामुपतिष्ठते । पथिकर्तृके, पन्थाः स्रुघ्नमुपतिष्ठते । मन्त्रकरणे, ऐन्द्या गार्हपत्यमुपतिष्ठते । आराधयतीत्यर्थः । मन्त्रादन्यत्र, भर्त्तारमुपतिष्ठति यौवनेन । करणग्रहणं किम् ? । गायत्रीमुपतिष्ठति ॥ वा लिप्सायाम् ॥ ३ । ३ । ६१ ॥ उपात्स्थः कर्त्तर्यात्मनेपदम् । भिक्षुकः प्रभुमुपतिष्ठति उपतिष्ठते वा ॥ उदोऽनूर्ध्वेहे ॥ ३ । ३ । ६२ ॥ स्थः कर्त्तर्यात्मनेपदम् । मुक्तावुत्तिष्ठते । मुक्त्यर्थं चेष्टत इत्यर्थः । अनूर्ध्वेति किम् ? । आसनादुत्तिष्ठति । ईहेति किम् ? । ग्रामाच्छतमुत्तिष्ठति । उत्पद्यत इत्यर्थः ॥ संविप्रावात् ॥३।३।६३॥ स्थः कर्त्तर्यात्मनेपदम् । संतिष्ठते । वितिष्ठते । प्रतिष्ठते। अवतिष्ठते ॥ ज्ञीप्सास्थेये ॥ ३ । ३ । ६४ ॥ ज्ञीप्सायां स्थेयविषयार्थे च वर्त्तमानात्स्थः कर्त्तर्यात्मनेपदम् । परपरितोषार्थमात्मरूपादिप्रकाशनं ज्ञीप्सा । तिष्ठते कन्या छात्रेभ्यः । स्वाभिप्रायप्रकाशनेनात्मानं रोचयतीत्यर्थः । विवादे निर्णेता प्रमाणभूतः पुरुषः स्थेयः । त्वयि तिष्ठते । संशय्य कर्णादिषु तिष्ठते यः । कर्णादिस्थेयोपदिष्टं निर्णयतीत्यर्थः ॥ प्रतिज्ञायाम् ॥ ३ । ३ । ६५ ॥ स्थः कर्त्तर्यात्मनेपदम् । नित्यं शब्दमातिष्ठते । अयमाङ्पूर्व एव प्रतिज्ञायाम् ॥ समो गिरः ॥ ३ । ३ । ६६ ॥ प्रतिज्ञायां कर्त्तर्यात्मनेपदम् ॥ स्याद्वादं संगिरते । प्रतिजानीत इत्यर्थः । प्रतिज्ञायामित्येव । संगिरति ग्रासम् । गिर इति निर्देशाद् गृणातेर्न ॥ अवात् ॥ ३ । ३ । ६७ ॥ गिरतेः कर्त्तर्यात्मनेपदम् । अवगिरते । पृथग्योगात्प्रतिज्ञायामिति निवृत्तम् । गिर इत्येव । अवगृणाति । अवाद्गृणातेः प्रयोगो नास्तीत्यन्ये ॥ निह्नवे ज्ञः । ३ । ३ । ६८ कर्त्तर्यात्मनेपदम् । शतमपजानीते । अपेन चास्यायमर्थोऽभिव्यज्यते । निह्नव इति किम् ? । तत्त्वं जानाति ॥ संप्रतेरस्मृतौ ॥ ३ । ३ । ६९ ॥ ज्ञः कर्त्तर्यात्मनेपदम् । शतं संजानीते । अवेक्षत इत्यर्थः । शतं प्रतिजानीते । शतेन संजानीते । अभ्युपगच्छतीत्यर्थः । अस्मृताविति किम् ? । मातुर्मातरं वा संजानाति । स्मरतीत्यर्थः ॥ अननोः

स्नः ॥ ३ । ३ । ७० ॥ जानातेः कर्त्तर्यात्मनेपदम् । धर्मं जिज्ञासते । अनन्वोरिति किम् ? । धर्ममनुजिज्ञासति । कथमौषधस्यानुजिज्ञासते । अकर्मकात् प्राग्वत् इत्यनेन भविष्यति ॥ श्रुवोऽनाङ्प्रतेः ॥ ३ । ३ । ७१ ॥ सन्नन्तात् कर्त्तर्यात्मनेपदम् । शुश्रूषते गुरून् । अनाङ्प्रतेरिति किम् ? । आशुश्रूषति । प्रतिशुश्रूषति । चैत्रं प्रति शुश्रूषत इत्यत्र तु न प्रतिषेधः, धातोः प्रतिना सम्बन्धाभावात् ॥ स्मृदृशः ॥ ३ । ३ । ७२ ॥ सनः कर्त्तर्यात्मनेपदम् । सुस्मूर्षते पूर्ववृत्तम् । दिदृक्षते देवम् ॥ शको जिज्ञासायाम् ॥ ३ । ३ । ७३ ॥ सन्नन्तात्कर्त्तर्यात्मनेपदम् । शिक्षते विद्याः । ज्ञातुं शक्नुयामितीच्छतीत्यर्थः । जिज्ञासायामिति किम् ? । शक्तुमिच्छति शिक्षति । शिक्षि विद्योपादान इत्यनेन सिद्धे आमनुप्रयोगार्थं वचनम् । तेन शिक्षाञ्चक्रे इति सिद्धम् । केचित्तु शकेः सन्नन्तस्यात्मनेपदमनिच्छन्तः शिक्षतेरेव जिज्ञासायामात्मनेपदमन्यत्र च परस्मैपदमिच्छन्ति " ॥ प्राग्वत् ॥ ३ । ३ । ७४ ॥ " शिशयिषते ॥" आमः कृगः ॥ ३ । ३ । ७५ ॥ " ईहाञ्चक्रे ॥ गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे ॥ ३ । ३ । ७६ ॥ करोतेः कर्त्तर्यात्मनेपदम् । गन्धनं द्रोहाभिप्रायेण परदोषोद्घाटनम् । प्रोत्साहनादिकमन्ये । उत्कुरुते । उदाकुरुते माम् । अध्याकुरुते जिघांसुः । अपकर्त्रे कथयतीत्यर्थः। अवक्षेपणं कुत्सनं भर्त्सनं वा । दुर्वृत्तानवकुरुते । कुत्सयतीत्यर्थः । श्येनो-वर्त्तिकामपकुरुते । भर्त्सयतीत्यर्थः । सेवाऽनुवृत्तिः । महामात्रानुपकुरुते । सेवत इत्यर्थः । साहसमविमृश्य प्रवृत्तिः । परदारान् प्रकुरुते । विनिपातमविभाव्य तान् अभिगच्छतीत्यर्थः । प्रतियत्नः सतो गुणान्तराधानम् । एधोदकस्योपस्कुरुते । तत्र गुणान्तरमादधातीत्यर्थः । प्रकथनं कथनारम्भः प्रकर्षेण कथनं वा । जनवादान् प्रकुरुते । उपयोगो धर्म्मादौ विनियोगः । शतं प्रकुरुते । धर्मादौ विनियुङ्क्त इत्यर्थः ॥ अधेः प्रसहने ॥ ३ । ३ । ७७ ॥ प्रसहनं पराभिभवः परेणापराजयो वा । तं ह्यधिचक्रे । तमभिभूतवान् । तेन वा न पराजितः । अथवा प्रसहनं प्रकर्षेण क्षमा । सा च द्विधा शक्तस्याशक्तस्य च । भवादृशाश्चेदधिकुर्वते परान् । समर्था अपि यद्युपेक्षन्ते तदा निराश्रया हन्त हता मना-

स्विता । अधिचक्रे न यं हरिः । सोढुमशक्तः सन् तेन न्यत्क्रियते स्म । प्रसहन इत्येव । तमधिकरोति ॥ दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः ॥ ३ । ३ । ७८ ॥ गम्यमाने कर्त्तर्यात्मनेपदम् । दीप्तिर्भासनम् । सा च कर्तृविशेषणम् । अथवा वदनसहचारिणी केवलैव वा धात्वर्थः । वदते स्याद्वादे । दीप्यमानो वदति । वदन् दीप्यते वा । दीप्यत इत्येव वार्थः । ज्ञानमवबोधः । तच्च वदिक्रियाया हेतुर्वा विषयि वा फलं वा केवलमेव वा धात्वर्थः । वदते तत्त्वार्थे । ज्ञात्वा वदतीति । जानाति वदितुमिति वा । वदन् जानातीति वा । जानातीत्येव वार्थः । यत्न उत्साहः । स च धात्वर्थस्य विषयो धात्वर्थ एव वा । श्रुते वदते । तद्विषयमुत्साहं वाचाविष्करोति तत्रोत्सहते वा । नाना मतिर्विमतिः । सा च धात्वर्थस्य हेतुर्धात्वर्थ एव वा । धर्मे विवदन्ते । विमतिपूर्वकं विचित्रं भाषन्ते । विविधं मन्यन्त इति वा । उपसम्भाषोपसान्त्वनमुपालम्भो वा । कर्मकरानुपवदते । उपसान्त्वयति उपालभते वेत्यर्थः। उपमन्त्रणं रहसि उपच्छन्दनम् । परदारानुपवदते । रहस्युपलोभयतीत्यर्थः ॥ व्यक्तवाचां सहोक्तौ ॥३।३। ७९ ॥ मनुष्यादीनां सम्भूयोच्चारणे वदः कर्त्तर्यात्मनेपदम् । सम्प्रवदन्ते ग्राम्याः । सम्प्रवदन्ते पिशाचाः । व्यक्तवाचामिति किम् ? । सम्प्रवदन्ति कुक्कुटाः । सम्प्रवदन्ति शुकाः । शुकसारिकादीनामपि व्यक्तवाक्त्वात्सहोक्ताविच्छन्त्यन्ये । सहोक्ताविति किम् ? । चैत्रेणोक्ते मैत्रो वदति ॥ विवादे वा ॥ ३ । ३ । ८० ॥ विवादरूपायां व्यक्तवाचां सहोक्तौ वदः कर्त्तर्यात्मनेपदम् । विप्रवदन्ते विप्रवदन्ति वा मौहूर्त्ताः। परस्परप्रतिषेधेन युगपद् विरुद्धं वदन्तीत्यर्थः । विवाद इति किम्? । विप्रवदन्ते वैयाकरणाः । सह वदन्तीत्यर्थः । व्यक्तवाचामित्येव । संप्रवदन्ति शकुनयः । नाना रुतं कुर्वन्ति जातिशक्तिभेदात् । सहोक्तावित्येव । मौहूर्त्तो मौहूर्त्तेन सह क्रमेण विप्रवदति ॥ अनोः कर्मण्यसति ॥ ३ । ३ । ८१ ॥ व्यक्तवाचां सम्बन्धिन्यर्थे वदः कर्त्तर्यात्मनेपदम् । अनुवदते चैत्रो मैत्रस्य । अनुवदते आचार्यस्य शिष्यः । अनुः सादृश्ये पश्चादर्थे वा । कर्मण्यसतीति किम् ? । उक्तमनुवदति । व्यक्तवाचामित्येव । अनुवदति वीणा । वाचिकषढिकौ

न संवदेते इति तु विमतिविवक्षायाम् । अकर्मकादित्यनुक्त्वा कर्मण्यसतीति निर्देश उत्तरत्र शब्दे स्वेऽङ्गे च कर्मणीति लाघवेन प्रतिपत्त्यर्थः॥ज्ञः ३।३।८२॥कर्मण्यसति कर्त्तर्य्यात्मनेपदम्।सर्पिषो जानीते।सर्पिषा करणेन भोक्तुं प्रवर्त्तत इत्यर्थः। मिथ्याज्ञानार्थो वा जानातिः।सर्पिषि रक्तः प्रतिहतो वोदकादिषु सर्पिष्ट्या ज्ञानवान् भवतीत्यर्थः।मिथ्याज्ञानं चाज्ञानमित्यज्ञानार्थत्वात्षष्ठी। अथवा सर्पिःसम्बन्धि ज्ञानं करोतीति विवक्षायां सम्बन्धे षष्ठी। कर्मण्यसतीत्येव । तैलं सर्पिषो जानाति । केचित्तु ज्ञानोपसर्जनायां प्रवृत्तावेवाकर्मकाज्जानातेरात्मनेपदमाहुः । अत एव ते 'सम्भविष्याव एकस्यामभिजानासि मातरि' इत्यादौ प्रवृत्त्यर्थाभावादात्मनेपदाभावं मन्यन्ते । ज्ञास्ये रात्राविति प्राज्ञः इत्यत्रापि ज्ञात्वा प्रवर्त्तिष्य इति व्याचक्षते । जाने कोपपराङ्मुखीत्यत्र तु ज्ञोऽनुपसर्गादित्यात्मनेपदमिच्छन्ति ॥ उपात्स्थः ॥ ३ । ३ । ८३ ॥ कर्मण्यसति कर्त्तर्यात्मनेपदम् । भोजनकाले उपतिष्ठते । सन्निधीयते इत्यर्थः । कर्मण्यसतीत्येव । राजानमुपतिष्ठति ॥ समो गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्त्तिदृशः ॥ ३ । ३ । ८४ ॥ कर्मण्यसति कर्त्तर्य्यात्मनेपदम् । सङ्गच्छते ॥ गमो वा ॥ ४ । ३ । ३७ ॥ आत्मनेपदविषयौ सिजाशिषौ किद्वत् । समगत । समगंस्त । सङ्गसीष्ट । सङ्गंसीष्ट । समृच्छते । समृच्छिष्यते । सम्पृच्छते । संशृणुते । नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणम् । संवित्ते । संविदाते ॥ वेत्तेर्नवा ॥ ४ । २ । ११६ ॥ आत्मनेपदस्थस्यान्तो रत् । संविद्रते संविदते । संस्वरते । अर्त्तीति भ्वादिरदादिश्च गृह्यते । समृच्छते । समियृते । समारत २। सम्पश्यते । स्वरत्यर्त्योरिशितनिर्देशो यङ्लुङ्निवृत्त्यर्थः । कर्मण्यसतीत्येव । संगच्छति सुहृदम् ॥ वेः कृगः शब्दे चानाशे ॥ ३ । ३ । ८५ ॥ कर्मण्यसति कर्मणि कर्त्तर्य्यात्मनेपदम् । विकुर्वते सैन्धवाः साधु दान्ताः शोभनं वल्गन्तीत्यर्थः । क्रोष्टा विकुरुते स्वरान् । नानोत्पादयतीत्यर्थः । शब्दे चेति किम् ?। विकरोति मृदम् । अनाश इति किम् ? । विकरोत्यध्यायम् । विनाशयतीत्यर्थः ॥ आङो यमहनः स्वेऽङ्गे च ॥ ३ । ३ । ८६ ॥ कर्मण्यसति कर्त्तुः कर्मणि कर्त्तर्यात्मनेपदम् । आयच्छते ।

आहते । आयच्छते पादम् । आहते शिरः । स्वेऽङ्गे चेति किम् ? । आयच्छति रज्जुम् । स्व इति किम् ? । आयच्छति पादौ चैत्रस्य । अङ्ग इति किम् ? । स्वामायच्छति रज्जुम् । पारिभाषिकस्वाङ्गनिवृत्त्यर्थमसमस्ताभिधानम् ॥ **यमः सूचने** ४ । ३ । ३८ ॥ आत्मनेपदविषयः सिच् कित् । उदायत । उदायसाताम् । सूचनं परदोषाविष्करणम् । सूचन इति किम् ? । उदायंस्त कूपाद्रज्जुम् । उद्धृतवानित्यर्थः । वधादेशः । आवधिष्ट । पक्षे ॥ **हनः सिच्** ॥ ४ । ३ । ३८ ॥ आत्मनेपदविषयः कित् ॥ आहत । आहसाताम् ॥ **व्युदस्तपः** ॥ ३ । ३ । ८७ ॥ **कर्मण्यसति स्वेऽङ्गे** च कर्मणि कर्त्तर्यात्मनेपदम् । वितपते उत्तपते रविः । दीप्यते इत्यर्थः । स्वेऽङ्गे, वितपते उत्तपते पाणिम् । तापयतीत्यर्थः ॥ **अणिक्कर्मणिक्कर्तृकाण्णिगोऽस्मृतौ** ॥ ३ । ३ । ८८ ॥ अणिगवस्थायां यत्कर्म तदेव णिगवस्थायां कर्त्ता यस्य सोऽणिक्कर्मणिक्कर्तृकस्तस्माण्णिगन्ताद्धातोः कर्त्तर्यात्मनेपदम् । हस्तिपका हस्तिनमारोहन्ति । आरोहयते हस्ती हस्तिपकान् आस्कन्दयत इत्यर्थः। पश्यन्ति राजानं भृत्याः । दर्शयते राजा भृत्यान् भृत्यैर्वा । अणिगिति किम् ? । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयन्ति हस्तिपकान् महामात्रः । आरोहयन्ति महामात्रेण हस्तिपकाः । गित्करणं किम् ? । गणयति गणं गोपालकः । गणयते गणो गोपालकम् । कर्मेति किम् ? । दर्शयति प्रदीपो भृत्यान् । णिगिति किम् ? । लुनाति केदारं चैत्रः । लूयते केदारः स्वयमेव । तं प्रयुङ्क्ते लावयति केदारं चैत्रः । कर्तृग्रहणं किम् ? । आरोहन्ति हस्तिनं हस्तिपकाः । तानेनमारोहयति महामात्रः । णिग इति किम् ? । आरोहन्ति हस्तिनं हस्तिपकाः । तानारोहयते हस्तीत्यणिगवस्थायां मा भूत् । प्रत्यासत्तेश्च यस्यैव धातोरणिगवस्था तस्यैव णिगवस्था गृह्यते। तेनेह न । आरुह्यमाणो हस्ती सेचयति पृष्ठं मूत्रेण। हस्तिपकैरारुह्यमाणो हस्ती स्थलमारोहयति नरानित्यत्र तु साधनभेदात् क्रियाभेदे धातुभेदः । अस्मृताविति किम् ? । स्मरयति वनगुल्मः कोकिलम् । ननु कथं

१ समुदाङ इत्यात्मनेपदम् ।

हन्त्यात्मानं घातयत्यात्मेति, उच्यते । द्वावात्मानौ शरीरात्मान्तरात्मा च । तत्र यस्याणिगि कर्मत्वं तस्यैव णिगि कर्मत्वं नाणिक्कर्त्तुरिति । शुष्यन्त्यातपे व्रीहयः शोषयते व्रीहीनातप इत्यादौ तु फलवत्कर्त्तरि भविष्यति । नन्वेवमारोहयते हस्तीत्यादावपि तथैवास्त्विति चेन्न । फलवतः कर्मस्थक्रियाच्चान्यत्रास्य विधेरभ्युपगमात् । तथा हि– लावयते केदारः भूषयते कन्या कारयते कटः गणयते गणः आरोहयते हस्ती स्वयमेवेत्यादौ कर्मस्थक्रियत्वादेकधातौ कर्मेति आत्मनेपदं भवति । न्यग्भावनार्थत्वे च रुहेः कर्मस्थक्रियत्वम् । तथाहि- आरोहयन्ति हस्तिनं हस्तिपका इति न्यग्भवनोपसर्जने न्यग्भावने रुहिर्वर्त्तते । द्वितीयावस्थायामारुह्यते हस्ती स्वयमेवेत्यस्यां कर्मकर्तृविषयो न्यग्भवनमात्रवृत्तिर्भवति । अथ चतुर्थ्यामन्तर्भूततृतीयायामारुह्यमाणं प्रयुञ्जत इति हस्तिपकव्यापारप्रधानायां णिगन्तः सन्नारोहयन्ति हस्तिनं हस्तिपका इत्यस्यां शुद्धारोहतिवन्न्यग्भवनोपसर्जने न्यग्भावने वर्त्तते । पुनर्यदाऽस्यैव प्रयोजकव्यापाराविवक्षा तदारोहयते हस्ती स्वयमेवेत्यस्यां पञ्चमावस्थायामारुह्यते हस्ती स्वयमेवेतिवन्न्यग्भवनलक्षणस्य विशेषस्य हस्तिसमवेतत्वेनोपलम्भाल्लावयते केदार इत्यादाविव कर्मस्थक्रियत्वमस्त्येवेति । तदुक्तम् । " न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते । अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्त्तरि । निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिगुच्यते इति ॥ प्रलम्भे गृधिवञ्चेः ॥ ३ । ३ । ८९ ॥ णिगन्तात्कर्त्तर्यात्मनेपदम् ॥ बटुं गर्धयते । बटुं वञ्चयते । प्रलम्भ इति किम् ? । श्वानं गर्धयति । प्रलोभयतीत्यर्थः । लिङ्लिनोऽर्चाभिभवे चाच्चाकर्त्तर्यपि ॥ ३ । ३ । ९०॥ णिगन्तात्प्रलम्भेऽर्थे कर्त्तर्यात्मनेपदम् । जटाभिरालापयते । परैरात्मानं पूजयतीत्यर्थः । श्येनो वर्त्तिकामपलापयते । अभिभवतीत्यर्थः । कस्त्वामुल्लापयते । वञ्चयतीत्यर्थः । अर्चाभिभवे चेति किम् ? । बालमुल्लापयति । उत्क्षिपतीत्यर्थः । अकर्त्तर्यपीति किम् ? । जटाभिरालाप्यते जटिलेन ॥ स्मिङः प्रयोक्तुः स्वार्थे ॥ ३ ।३।९१॥ णिगः कर्त्तर्यात्मनेपदमन्तस्य चाद्कर्त्तपि। जटिलो विस्मापयते । प्रयोक्तुः स्वार्थ इति किम् ? । रूपेण विस्मापयति। अकर्त्तर्यपीति किम् ?। विस्मापनम् । ङिन्निर्देशाद्यङ्लुपि न ।

**विभेतेर्भीष् च ॥ ३ । ३ । ९२ ॥** प्रयोक्तुः स्वार्थे वर्त्तमानाण्यन्तात्कर्त्तर्यात्मनेपदम्, पक्षेऽन्तस्याकारश्चाकर्त्तर्यपि । मुण्डो भीषयते । मुण्डो भापयते । प्रयोक्तुः स्वार्थे । इत्येव कुञ्चिकया भाययति। अकर्त्तर्यपीत्येव। भीषा। भापनम् । तिव्निर्देशाद्यङ्लुपि न ॥ **मिथ्याकृगोऽभ्यासे ॥ ३ । ३ । ९३ ॥** णिगः कर्त्तर्यात्मनेपदम् । अभ्यासः पुनः पुनः क्रियाभ्यावृत्तिः । पदं मिथ्या कारयते । स्वरादिदोषदुष्टमसकृदुच्चारयतीत्यर्थः। आत्मनेपदेन क्रियाभ्यावृत्तेर्द्योतितत्वादाभीक्ष्ण्ये द्विर्वचनं नेति केचित् । मिथ्येति किम् ?। पदं साधु कारयति । अभ्यास इति किम् ?। सकृत्पदं मिथ्या कारयति ॥ **परिमुहायमायसपाट्धेवदवसदमादरूचनृतः फलवति ॥ ३ । ३ । ९४ ॥** णिगन्तात्कर्त्तर्यात्मनेपदम् । फलवतीति भूम्न्यतिशायने वा मतुस्तेन फलं प्रधानं ग्राह्यं यदर्थमियमारभ्यते । परिमोहयते चैत्रम् । आयमयते सर्पम् । आयासयते मैत्रम् । पाययते बटुम् । धापयते शिशुम् । वादयते शिशुम् । वासयते पान्थम् । दमयतेऽश्वम् । आदयते चैत्रेण । अद्देर्नेच्छन्त्यन्ये । रोचयते मैत्रम् । नर्त्तयते नटम् । पिबत्यत्तिट्धेधातूनामाहारार्थत्वादौदासीन्यनिवृत्त्यर्थतायामकर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वादुत्तरसूत्राभ्यां परस्मैपदे प्राप्ते वचनम् । पावसोर्भौवादिकयोरेवग्रहणम् । ट्धेवदसाहचर्यात् "॥ ईगितः ॥३।३।९५॥" यजते । कुरुते ॥ **ज्ञोऽनुपसर्गात् ॥ ३। ३ । ९६ ॥** फलवति कर्त्तर्यात्मनेपदम् । गां जानीते । अनुपसर्गादिति किम् ?। स्वर्गं प्रजानाति । फलवतीत्येव । परस्य गां जानाति । अकर्मकात् पूर्वेण सिद्धे सकर्मकार्थं वचनम् ॥ **वदोऽपात् ॥ ३ । ३ । ९७ ॥** फलवति कर्त्तर्यात्मनेपदम् । एकान्तमपवदते । फलवतीत्येव । अपवदति परं स्वभावतः ॥ **समुदाङो यमेरग्रन्थे ॥ ३ । ३ । ९८ ॥** फलवति कर्त्तर्यात्मनेपदम् । संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते वस्त्रम् । अग्रन्थ इति किम् ?। वैद्यश्चिकित्सामुद्यच्छति । चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः । फलवतीत्येव । संयच्छति परस्य वस्त्रम् ॥ **पदान्तरगम्ये वा ॥ ३ । ३ । ९९ ॥** अनन्तरसूत्रपञ्चकेन यदात्मनेपदमुक्तम् तत्पदान्तरगम्ये फलवति कर्त्तरि वा । स्वं शत्रुं परिमोहयते

परिमोहयति वा । स्वं यज्ञं यजते यजति वा । स्वां गां जानीते जानाति वा । स्वं पुत्रमपवदते अपवदति वा । स्वान् व्रीहीन् संयच्छते संयच्छति वा ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां आत्मनेपदप्रक्रिया॥

## ॥ अथ परस्मैपदप्रक्रिया ॥

शेषात्परस्मै ॥ ३ । ३ । १०० ॥ भवति ॥ परानोः कृगः ॥ ३ । ३ । १०१ ॥ कर्त्तरि परस्मैपदम् । गन्धनादौ फलवति च कर्त्तरि प्राप्तस्यात्मनेपदस्यापवादोऽयम् । पराकरोति । अनुकरोति । कथं गङ्गामनु कुरुते तप इति ?। नात्र करोतिरनुना संबध्यते ॥ प्रत्यभ्यतेः क्षिपः ॥ ३ । ३ । १०२ ॥ प्रतिक्षिपति । अभिक्षिपति । अतिक्षिपति बटुम ॥ प्राद्वहः ॥ ३ । ३ । १०३ ॥ कर्त्तरि परस्मैपदम् । प्रवहति । परेर्मृषश्च ॥ ३ । ३ । १०४ ॥ वहः कर्त्तरि परस्मैपदम् । परिमृष्यति । परिवहति । वहनेंच्छन्त्यन्ये ॥ व्याङ्परे रमः ॥ ३ । ३ । १०५ ॥ कर्त्तरि परस्मैपदम् । विरमति । आरमति । परिरमति ॥ वोपात् ॥ ३ । ३ । १०६ ॥ भार्यामुपरमति उपरमते वा । अन्तर्भूतणिगर्थोऽत्र रमिः । उपसम्प्राप्तिपूर्विकायां रतौ वा वर्त्तते । उपरमति उपरमते वा सन्तापः । उपाद्रमेः सकर्मकात्परस्मैपदमेवेत्येके । आत्मनेपदमेवेत्यन्ये ॥ अणिगिप्राणिकर्तृकानाप्याण्णिगः ॥ ३ । ३ । १०७ ॥ कर्त्तरि परस्मैपदम् । आवासयति चैत्रम् । अणिगीति किम् ? । स्वयमेवारोहयमाणं हस्तिनं प्रयुङ्क्ते आरोहयते । अणिगिति गकारः किम् ? । चेतयमानं प्रयुङ्क्ते चेतयतीति । प्राणिकर्तृकेति किम् ? । शोषयते व्रीहिन्नातपः । इह प्राण्योषधिवृक्षेभ्य इति पृथग्निर्देशाल्लोके प्रतीता एव प्राणिनो गृह्यन्ते । अनाप्यादिति किम् ? । कटं कारयते ॥चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशूजन

॥३।३।१०८॥ णिगः कर्त्तरि परस्मैपदम् । चलयति कम्पयति शाखाम् । आशयति भोजयति चैत्रमन्नम् । सूत्रमध्यापयति शिष्यम् । बोधयति पद्मम् । योधयति काष्ठानि । प्रावयति राज्यम् । प्रापयतीत्यर्थः । द्रावयति अयः । विलाययतीत्यर्थः । स्रावयति तैलम् । स्यन्दयतीत्यर्थः नाशयति पापम् । जनयति पुण्यम् । प्रुद्रुस्रूणामचलनार्थार्थं शेषाणां सकर्मकार्थमप्राणिकर्तृकार्थं च वचनम् ॥ ॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठित-गीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीय-तपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां परस्मैपदप्रक्रिया ॥

---

## ॥ अथ भावकर्मप्रक्रिया ॥

अथ भावकर्मणोर्विभक्तयः । तत्साप्यादित्यादिनात्मनेपदम् ॥ क्यः शिति ॥ ३ । ४ । ७० ॥ धातोर्भावकर्मविहिते । भावो भावना उत्पादना क्रिया । सा च धातुत्वेन सकलधातुवाच्या भावार्थप्रत्ययेनानूद्यते । अनुक्ते कर्त्तरि तृतीया । त्वया मया अन्यैश्च भूयते । अभूयत ॥ भावकर्मणोः ॥ ३ । ४ । ६८ । । धातोर्विहितेऽद्यतन्यास्ते ञिच् तलुक् च । अभावि । बभूवे ॥ स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिट् वा ॥ ३ । ४ । ६९ ॥ विहितायां भावकर्मविषयायाम् । भाविषीष्ट २ । भाविता २। भाविष्यते २ । अभाविष्यत २ । उक्तत्वात्कर्मणि न द्वितीया । अनुभूयते आनन्दश्चैत्रेण । अनुभूयेते । । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम् । अन्वभविषाताम् । भाव्यते । भावयांचक्रे । भावयांबभूवे । भावयामहे । भाविता । भावयिता । बुभूष्यते । बुभूष्येत । बुभूषांचक्रे । बुभूषिता । बोभूय्यते । यङ्लुबन्तात्तु बोभूयते । अबोभावि । बोभवांचक्रे । बोभाविता २ । दीर्घः । स्तूयते । अस्तावि । अस्ताविषाताम् । अस्तोषाताम् । तुष्टुवे । अर्यते । स्मर्यते । परत्वाद्गुणे कृतेऽपि स्वरा-

न्ताच्चिड्वित्वस्याक्षतेर्ञ्णिट् । आरिषाताम् २। अस्मारिषाताम् २ । आरिता २ । स्मारिता २ । क्ययङाशीर्ये इत्यत्रौपदेशिकसंयोगग्रहणादिह न गुणः । संस्क्रियते । ईत्वम् । दीयते । धीयते । स्थीयते ॥ आत ऐः कृञ्ञ्णौ ॥ ४ । ३ । ५३ ॥ धातोर्ङ्णिति । अदायि । अदायिषाताम् । अदिषाताम् । कृदिति किम् ? । ददौ । ददे । दायिषीष्ट २ । ग्लायते । जग्ले । शीङ् । शय्यते । अशायि । हन्यते । अवधि । अघानि । अवधिषाताम् । अघानिषाताम् । अहसाताम् । घानिषीष्ट । वधिषीष्ट । वधादेशविधायके ञ्णिटो वर्जनात् तत्पक्षे न वधः । गृह्यते । अग्राहि । अग्राहिषाताम् । अग्रहीषाताम् । जगृहे । दृश्यते । अदर्शि । अदर्शिषाताम् । अदृक्षाताम् । गीर्यते । अद्यतन्यां ध्वमि सिज्लोपपक्षे चतुरधिकं शतम् । तथाहि । ञ्णिटि अगारिध्वम् । इटि वा दीर्घः । अगरीध्वम् । अगरिध्वम् । त्रयाणां लत्वं ढत्वं द्वित्वत्रयं चेति पञ्च वैकल्पिकानि । इत्थं षण्णवतिः । इडभावे अगीढ्वम् । ढवमानां द्वित्वविकल्पे अष्टौ । उक्तषण्णवत्या सह संकलने उक्ता संख्येति । इड्दीर्घश्च ञ्णिट् लत्वं ढत्वं द्वित्वत्रयं तथा । इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम् । इटो दीर्घे ढद्वित्वकथनन्तु मतान्तरसङ्ग्रहार्थम् । सिज्लोपाभावे तु ढत्वविकल्पाभावात् षट्पञ्चाशत् । नलोपः । स्रस्यते । उदित्वान्नलोपो न । नन्द्यते । ग्रन्थ् । इज्यते ॥ तनः क्ये ॥ ४ । २ । ६३॥ आद्वा । तायते । तन्यते । क्य इति किम् ?। तन्तन्यते । ये नवा । जायते । जन्यते ॥ तपः कर्त्रनुतापे च ॥ ३ । ४ । ९१ ॥ कर्मकर्त्तरि ञ्णिच् न । अतप्त तपांसि साधुः । ? अन्ववातप्त कितवः स्वयमेव । अनुतापग्रहणाद् भावे कर्मणि च । अन्वतप्त चैत्रेण । अन्ववातप्त पापः पापेन कर्मणा । कर्त्रनुतापे चेति किम् ? । अतापि पृथिवी राज्ञा । णिगन्तात्कर्मणि प्रत्ययः । घट्यते । घटादेर्ह्रस्व इत्यादिना वा दीर्घः । अघाटि । अघटि । अघाटिषाताम् । अघटिषाताम् । अघटयिषाताम् । शमोऽदर्शने । अशामि २ । अशामिषाताम् ३ । यङन्ताद् यङ्लुबन्ताच्च णौ । अशंशामि २ । अशंशामिषाताम् ३ । दीर्घे कर्त्तव्ये स्थानिवद्भावस्तु न । न सन्धिङीति निषेधात् । अत एव ह्रस्वविकल्पो न कृतः । ण्यन्तत्वाभावे तु ॥ मोऽकमियमि-

रमिनमिगमिवमाचमः ॥ ४ । ३ । ५५ ॥ धातोर्ञ्णिति कृति ञौ च वृद्धिर्न । अशमि । कम्यादिवर्जनं किम् ? । अकामि । अयामि । अरामि । अनामि । अगामि । अवामि । आचामि । न जनवधः । अवधि । वधेर्भौवादिकस्यार्थान्तरे सनोऽभावे रूपम् ॥ **विश्रमेर्वा** ॥ ४ । ३ । ५६॥ ञ्णिति कृति ञौ च वृद्धिः । व्यश्रामि । व्यश्रमि । अन्ये तु विश्रमेर्वृद्धिं नेच्छन्त्येव । अपरे तु नित्यमेव वृद्धिमुपयन्ति। एके तु घञ्येव विकल्पमातिष्ठन्ते । जागुर्ञ्णिवि । अजागारि ॥ **भञ्जेर्ञौ वा** ॥ ४ । २ । ४८ ॥ उपान्त्यनस्य लुक् । अभाजि । अभञ्जि ॥ **ञिणमोर्वा** ॥ ४ । ४ । १०६ ॥ लभेः स्वरात्परो नोऽन्तः । अलम्भि । अलाभि ॥ **उपसर्गात्खल्घञोश्च** ॥ ४ । ४ । १०७ ॥ ञिणमोर्लभेः स्वरात्परो नोऽन्तः । प्रालम्भि । उपसर्गादिति किम् ? । लाभः । ञिणमोर्नित्यार्थं खल्घञोस्तूपसर्गादेव खल्घञोरिति नियमार्थं च वचनम् ॥न स्सः॥ २ । ३ । ५८॥ द्विरुक्तसकारसम्बन्धिनः सस्य षो न । सुपिस्स्यते । अदीर्घादित्यादिना द्विर्भावः । गौर्दुह्यते पयः । अजा ग्रामं नीयते । बोध्यते माणवकं धर्मः । माणवको धर्ममिति वा । ग्रामं गम्यते चैत्रेण मैत्रः। कालाध्वादीनां कर्मसंज्ञाया अकर्मत्वस्य च विधानात्तद्योगे कर्मणि भावे चात्मनेपदादीनि । मासं मासो वा आस्यते चैत्रेण। णिगन्तात्तु प्रयोज्ये । मासमास्यते मैत्रः॥इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां भावकर्मप्रक्रिया ॥

---

## ॥ अथ कर्मकर्तृप्रक्रिया ॥

सौकर्यादविवक्षिते कर्तृव्यापारे कारकान्तराण्यपि कर्तृसंज्ञकानि भवन्ति । साध्वसिश्छिनत्ति । स्थाली पचति । कर्मणः कर्तृत्वविवक्षायां तु प्राक्सकर्मका अपि प्रायेणाकर्मकाः । तेभ्यो भावे कर्तरि च प्रत्ययः । भिद्यते कुशूलेन । अभेदि ।

कर्त्तरि तु ॥ एकधातौ कर्मक्रिययैकाकर्मक्रिये ॥ ३ । ४ । ८६ ॥ एकस्मिन् धातौ कर्मस्थक्रियया पूर्वदृष्टया एका अभिन्ना सम्मत्यकर्मिका क्रिया यस्य तस्मिन् कर्त्तरि कर्मकर्तृरूपे धातोर्ञिक्यात्मनेपदानि तथा भवन्ति, यथा पूर्वं विहितानि । क्रियते अकारि करिष्यते वा कटः स्वयमेव । भिद्यते कुशूलः स्वयमेव । अभेदि । एकधाताविति किम् ? । पचत्योदनं चैत्रः । सिध्यत्योदनः स्वयमेव । कर्मक्रिययेति किम्? । साध्वसिश्छिनत्ति।किञ्च कर्तृस्थक्रियेभ्यो मा भूत् । गच्छति ग्रामः । आरोहति हस्ती । 'अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च' । कर्मणि क्रियाकृतविशेषदर्शन एव क्रियायाः कर्मस्थत्वम् । अत्र तु न तथा । पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यादर्शनात् । करोतेरुत्पादनार्थ-त्वात्कर्मस्थक्रियत्वम् । एकक्रियेति किम् ? । स्रवत्युदकं कुण्डिका । स्रवत्युदकं कुण्डिकायाः । इह विसृजति निष्कामतीति क्रियाभेदः ।गलत्युदकं वलीकानि । गलत्युदकं वलीकेभ्य इत्यत्रापि मुञ्चतीति पततीति क्रियाभेदान्नैकक्रियत्वम् । अकर्मक्रिय इति किम् ? । भिद्यमानः कुशूलः पात्राणि भिनत्ति । अन्योन्यमाश्लिष्यतः । एकस्य कर्मत्वं कर्तृत्वं च कथमिति चेत्, उच्यते, सर्वमपि हि कर्म स्वव्यापारे स्वातन्त्र्यमनुभूय कर्तृव्यापारेण न्यक्कृतं सत् कर्मतामनुभवति । कर्तृ-व्यापाराविवक्षायां तु स्वव्यापारे स्वातन्त्र्यात् कर्तृत्वम् । यदाहुः- निर्वृत्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् । कर्त्रन्तराणां व्यापारे कर्म सम्पद्यते ततः ॥ १ ॥ निवृत्तप्रेषणं चैतत् स्वक्रियावयवे स्थितम् । निवर्त्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ॥ २ ॥ इति ॥ सृजः श्राद्धे ञिक्यात्मने तथा ॥ ३ । ४ । ९४ ॥ कर्त्तरि यथा पूर्वं विहितानि । सृज्यते, असर्जि, स्रक्ष्यते, वा मालां धार्मिकः । श्राद्ध इति किम् ? । व्यत्यसृष्ट माले मिथुनम् ॥ तपेस्तपः कर्मकात् ॥ ३ । ४ ।८५॥ कर्त्तरि ञिक्यात्मनेपदानि तथा । तप्यते तेपे वा तपः साधुः । तपिरत्र करोत्यर्थः । ञिच् तु न, तपः कर्त्रनुतापे चेति निषेधात् । अन्वतप्त तपः साधुः । तप इति किम् ? । उत्तपति सुवर्णं सुवर्णकारः । कर्मेति किम् ? । तपांसि साधुं तपन्ति । कर्मकर्त्तरि तु अन्वतप्यते अन्ववातप्त वा कितवः स्वयमेव ॥ पचिदुहेः ॥

॥ ३ । ४ । ८७ ॥ एकधातौ कर्मस्थक्रियया पूर्वदृष्टयाऽकर्मिकया सकर्मिकया वैकक्रिये कर्त्तरि कर्मकर्तृरूपे ञिक्यात्मनेपदानि भवन्ति अपवादविषयं मुक्त्वा । पच्यते अपाचि पक्ष्यते वा ओदनः स्वयमेव । दुग्धे अदोहि अदुग्ध धोक्ष्यते वा गौः स्वयमेव । उदुम्बरः फलं पच्यते अपक्त वा स्वयमेव । दुग्धे अदुग्ध धोक्ष्यते वा पयो गौः स्वयमेव ॥ दुहिपच्योः कर्मणि ञिचः प्रतिषेधस्तथाऽविशेषेण दुहेर्ञिचो विकल्पः क्यस्य च प्रतिषेधो वक्ष्यते । अकर्मकस्य पूर्वेणैव सिद्धे सकर्मकार्थं वचनम् ॥ न कर्मणा ञिच् ॥ ३ । ४ । ८८ ॥ पचिदुहेर्योगनन्तरोक्ते कर्त्तरि । अपक्तोदुम्बरः फलं स्वयमेव । अदुग्ध गौः पयः स्वयमेव । अतन्तरोक्ते कर्त्तरीत्येव । अपाच्युदुम्बरः फलं वायुना ॥ रुधः ॥ ३ । ४ । ८९ ॥ अनन्तरोक्ते कर्त्तरि ञिच् न । अरुद्ध गौः स्वयमेव । स्वरदुहो वा ॥ ३ । ४ । ९० ॥ अनन्तरोक्ते कर्त्तरि ञिच् न । अकृत अकारि वा कटः स्वयमेव । अदुग्ध अदोहि वा गौः स्वयमेव । अनन्तरोक्ते कर्त्तरीत्येव । अकारि कटश्चैत्रेण । णिस्नुश्र्यात्मनेपदाकर्मकात् ॥ ३ । ४ । ९२ ॥ कर्मकर्त्तरि ञिच् न । अपीपचदोदनं चैत्रेण मैत्रः । अपीपचतौदनः स्वयमेव । यदि वा स्वयमेव पच्यमान ओदनः स्वं प्रायुक्तेत्यर्थः। उभयत्र स्वयमेवापाचीत्यर्थः ॥ स्नोः॥ ४ । ४ । ५२ ॥ स्ताद्यशितोऽनात्मनेपदे आदिरिट् । प्रस्नविष्यति । स्नौतेरिट् सिद्ध एव. आत्मनेपदे इड्निषेधार्थं तु वचनम् । प्रास्नोष्ट गौः स्वयमेव । उदशिश्रियत दण्डः स्वयमेव । व्यकार्षीत् सैन्धवं चैत्रः । वल्गयति स्मेत्यर्थः । व्यकृत सैन्धवः स्वयमेव । विकरोतिर्वल्गनेऽन्तर्भूतण्यर्थः कर्मस्थक्रियः । ञिच् प्रतिषेधात् ञिट् भवत्येव । पाचिता, पाचिषीष्ट ओदनः स्वयमेव । पृथग्योगादुत्तरेणापि ञिटः प्रतिषेधो न ॥ भूषार्थसन्किरादिभ्यश्च ञिक्यौ ॥ ३ । ४ । ९३ ॥ णिस्नुश्र्यात्मनेपदाकर्मकेभ्यो धातुभ्यः कर्मकर्त्तरि न । अलंकुरुते कन्या स्वयमेव । अलमकृत । भूषयते कन्या स्वयमेव । अबूभुषत । भूषयिष्यते चिकीर्षते । अचिकीर्षिष्ट वा कटः स्वयमेव । किरते । अकीर्ष्ट वा पांसुः स्वयमेव । गिरते अगीर्ष्ट वा ग्रासः स्वयमेव । दुग्धे गौः स्वयमेव । ब्रूते अवोचत वा कथा स्वयमेव । श्रथ्नीते ग्रन्थीते वा माला स्व-

यमेव । नमते दण्डः स्वयमेव । कॄ गॄ दुह ब्रू श्रन्थ ग्रन्थ नम इति किरादयः । बहुवचनं शिष्टप्रयोगानुसरणार्थम् । णि, कारयते कटः स्वयमेव । उत्पुच्छयते गौः स्वयमेव । उदपुपुच्छत । प्रस्नुते गौः स्वयमेव । चोरयते गौः स्वयमेव । उच्छ्रूयते दण्डः स्वयमेव । विकुर्वते सैन्धवाः स्वयमेव । अन्ये तु णिस्नुश्र्यात्मनेपदाकर्मकेभ्यो ञिटोऽपि प्रतिषेधमिच्छन्ति । स्नुनम्योरन्तर्भूतण्यर्थत्वेन सकर्मकत्वादुगवादेः कर्मकर्तृत्वम् । ण्यर्थाभावे तु न कर्मकर्तृता । करणादिक्रियारूपस्य प्रकृत्यर्थस्य प्राधान्यात् णिसन्नन्तानां कर्मस्थक्रियत्वम्, ब्रूते कथेत्यत्र वचनं शब्दप्रकाशन फलत्वादुपाध्यायेनोक्तः करोतीतिवत् प्रेरणार्थत्वाद् वा कर्मस्थक्रियारूपम् । भूषाक्रियाणां च शोभाख्यं फलं कर्मणि दृश्यते इति कर्मस्थक्रियात्वम् ॥ करणक्रियया क्वचित् ॥ ३ । ४ । ८४ ॥ एकधातौ पूर्वदृष्टया एकाकर्मक्रिये कर्तरि ञिक्यात्मनेपदानि । परिवारयन्ते कण्टका वृक्षं स्वयमेव । क्वचिन्न । साध्वसिश्छनत्ति । कुषिरञ्जेर्व्याप्ये वा परस्मै ॥ ३ । ४।७४॥ कर्तरि शिद्विषये तत्सन्नियोगे श्यः । क्यात्मनेपदापवादौ । कुष्यति कुष्यते वा पादः स्वयमेव । रज्यति रज्यते वा वस्त्रं स्वयमेव । व्याप्ये कर्तरीति किम्? । कुष्णाति पादं रोगः । शितीत्येव । अकोषि । परस्मैपदसंनियोगविज्ञानादिह न । कतीह कुष्णानाः पादाः । क्यात्परस्मैपदविकल्पविधानेनैव सिद्धे श्यविधानं कुष्यन्ती रज्यन्तीत्यत्र नित्यमन्तादेशार्थम् ॥

॥ इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां कर्मकर्तृप्रक्रिया ॥

## ॥ अथ त्याद्यर्थप्रक्रिया ॥

**श्रुसद्वसूभ्यः परोक्षा वा ॥ ५ । २ । १ ॥** भूते । उपशुश्राव । उपससाद । अनूवास । यथास्वकालमद्यतनी ह्यस्तनी च । उपाश्रौषीत्। उपाशृणोत्। उपासदत् । उपासीदत् । अन्ववात्सीत् । अन्ववसत् । अन्ये तु श्रुवादिभ्यो भूतमात्रे क्वसुमेवेच्छन्ति न परोक्षाम् । ह्यस्तनीमपीच्छत्यन्यः । बहुवचनं व्याप्त्यर्थम् । तेन भूतानद्यतनेऽपीयं ह्यस्तन्या न बाध्यते । असरूपत्वादेवाद्यतन्यादिसिद्धौ वा वचनं विभक्तिष्वसरूपोत्सर्गविभक्त्यसमावेशार्थम् । तेन अयदीति सूत्रे वत्स्यन्तीविषये ह्यस्तनी न ॥ **विशेषाविवक्षाव्यामिश्रे ॥ ५ । २ । ५ ॥** अनद्यतनादिविशेषस्याविवक्षायां व्यामिश्रे च सति भूतेऽर्थे वर्त्तमानाद्धातोरद्यतनी । अकार्षीत् । रामो वनमगमत् । अनुदरा कन्येतिवत् सतोऽपि विशेषस्याऽविवक्षा । अद्य श्वो वाऽभुक्ष्महि ॥ **रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य ॥ ५ । २ । ६॥** रात्रौ भूतेऽर्थे वर्त्तमानाद्वसतेर्ह्यस्तन्यपवादोऽद्यतनी,स चेदर्थो यस्यां रात्रौ भूतस्तस्या एवान्त्ययामं व्याप्याऽस्वप्तरि कर्त्तरि वर्त्तते । अद्य, तेनैवान्त्ययामेनावच्छिन्नेऽद्यतने चेत्प्रयोगो भवति नाद्यतनान्तरे ।न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित्कश्चिदाह क्व भवानुषितः ? स आह अमुत्रावात्समिति । रात्र्यन्त्ययामे तु मुहूर्त्तमपि स्वापे ह्यस्तन्येव । अमुत्रावसमिति ॥ **ख्याते दृश्ये ॥ ५।२।८॥** भूतेऽनद्यतनेऽर्थे धातोर्ह्यस्तनी । अरुणत्सिद्धराजोऽवन्तीम् । ख्यात इति किम् ?। चकार कटं चैत्रः । दृश्ये इति किम् ?। जघान कंसं किल वासुदेवः ॥ **अयदि स्मृत्यर्थे भविष्यन्ती ॥ ५ । २ । ९ ॥** धातावुपपदे भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोः।अभिजानासि चैत्र ! कश्मीरेषु वत्स्यामः । स्मरसि साधो ! स्वर्गे स्थास्यामः । एवं बुध्यसे इत्यादियोगेऽपि । अयदीति किम् ? । अभिजानासि मित्र ! यत्कलिङ्गेष्ववसाम ॥ **वाऽऽकाङ्क्षायाम् ॥ ५ । २ । १०॥** स्मृत्यर्थे धातावुपपदे प्रयोक्तुः क्रियान्तराकाङ्क्षायां सत्यां भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोर्भविष्यन्ती । स्मरसि मित्र ! कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे । अवसाम अभुञ्ज्महीति वा । एवं यच्छब्दयोगेऽपि । वासो लक्षणं भोजनं लक्ष्यमित्युभयोः

सम्बन्धे प्रयोक्तुराकाङ्क्षा ॥ कृतास्मरणातिनिन्हवे परोक्षा ॥ ५ । २ । ११ ॥ भूतेऽनद्यतनेऽर्थे वर्त्तमानाद्धातोः ।
सुप्तोऽहं किल विललाप । अतिनिह्नवे । कलिङ्गेषु त्वया ब्राह्मणो हतः?कः कलिङ्गान् जगाम? को ब्राह्मणं ददर्श ? नाहं
कलिङ्गान् जगाम । अतिग्रहणादेकदेशादेपह्नवे ह्यस्तन्येव । न कलिङ्गेषु ब्राह्मणमहनम् ॥ हशश्वद्युगान्तःप्रच्छ्ये
ह्यस्तनी च ॥ ५ । २ । १३ ॥ हे शश्वति च प्रयुज्यमाने पञ्चवर्षमध्यप्रच्छ्ये च भूतानद्यतने परोक्षेऽर्थे वर्त्तमानाद्धा-
तोर्ह्यस्तनीपरोक्षे । इति हाकरोत् चकार वा । शश्वदकरोत् चकार वा । प्रच्छ्ये, किमगच्छस्त्वं मथुराम् ? । जगन्थेति
वा । वेत्येव कृते भूतानद्यतनमात्रभाविन्या ह्यस्तन्याः पक्षे सिद्धौ ह्यस्तनीविधानं स्मृत्यर्थयोगेऽपि ह्यस्तन्येव यथा स्यादि-
त्येवमर्थम् ॥ अविवक्षिते ॥ ५ । २ । १४ ॥ भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षितेऽर्थे,वर्त्तमानाद्धातोर्ह्यस्तनी ।
अभवत्सगरो राजा ।अहन् कंसं वासुदेवः । एवं च परोक्षानद्यतने विवक्षावशादद्यतनीह्यस्तनीपरोक्षास्तिस्रो विभक्तयः
सिद्धाः ॥ वाऽद्यतनी पुरादौ ॥ ५ । २ । १५॥ भूताद्यतने परोक्षेऽपरोक्षे चाऽर्थे वर्त्तमानाद्धातोः । अवात्सुरिह पुरा-
छात्राः । पक्षे यथाप्राप्ति ते अपि । अवसन् ऊषुर्वा । तदाभाषिष्ट राघवः । अभाषत । बभाषे वा । भूतानद्यतनपरोक्षे-
ऽद्यतनीं नेच्छन्त्यन्ये । एवमुत्तरसूत्रे पुरादियोगे वर्त्तमानाम् । हशश्वच्छब्दयोगेऽपि पुरादियोगे परत्वाद्विकल्पेनाद्य-
तनी । भूतमात्रविवक्षयाऽद्यतन्याः सिद्धौ पुरादियोगे तद्वचनं हशश्वत्संनियोगे सामान्यविवक्षयाऽद्यतनी नेति ज्ञापना-
र्थम् ॥ स्मे च वर्त्तमाना ॥ ५ । २ । १६ ॥ भूतानद्यतनेऽर्थे वर्त्तमानाद्धातोः पुरादावुपपदे । इति स्मोपाध्यायः कथ-
यति । वसन्तीह पुरा छात्राः । भाषते राघवस्तदा । अथाह वर्णी । आदिग्रहणमिह पूर्वत्र च प्रयोगानुसरणार्थम् । एवं
च पुरादियोगेऽद्यतनीह्यस्तनीपरोक्षावर्त्तमानाश्चतस्रो विभक्तयः सिद्धाः । स्मपुरायोगे तु परत्वाद्वर्त्तमानैव ॥ ननौ
पृष्टोक्तौ सद्वत् ॥ ५ । २ । १७॥ उपपदे भूतार्थाद्धातोर्वर्त्तमाना । सद्वद्वचनादत्र विषये शत्रानशावपि । किमकार्षीः
कटं चैत्र ? । ननु करोमि भोः । ननु कुर्वन्तं कुर्वाणं मां पश्य ॥ नन्वोर्विभाषा ॥ ५ । २ । १८ ॥ पृष्टोक्तौ भूते

वर्त्तमाना, सा च सद्वत् । किमकार्षीः कटं चैत्र ?। न करोमि भोः। न कुर्वन्तं न कुर्वाणं पश्य माम्। नाकार्षम्। नु करोमि भोः। कुर्वन्तं कुर्वाणं नु मां पश्य। न्वकार्षम् ॥ परिदेवने ॥ ५ । ३ । ६ ॥ गम्ये वर्त्स्यति वर्त्तमानाद्धातोः श्वस्तनी। परिदेवनमनुशोचनम्। अनद्यतनार्थं सूत्रम्। इयं तु कदा गन्ता यैवं पादौ निदधाति। विशेषविधानात् कदाकर्ह्योर्लक्षणा विभाषा बाध्यते ॥ पुरायावतोर्वर्त्तमाना ॥ ५ । ३ । ७ ॥ वर्त्स्यति वर्त्तमानाद्धातोः। पुरा भुङ्क्ते। यावद् भुङ्क्ते। भविष्यदनद्यतनेऽपि परत्वाद्वर्त्तमानैव। लाक्षणिकत्वादिह न। महत्या पुरा जेष्यति ग्रामम्। यावद्दास्यते तावद् भोक्ष्यते। यत्परिमाणमित्यर्थः ॥ कदाकर्ह्योर्न वा ॥ ५ । ३ । ८ ॥ धातोर्वर्त्तमाना। पक्षे भविष्यन्तीश्वस्तन्यावपि। कदा भुङ्क्ते?। भोक्ष्यते। भोक्ता वा। कर्हि भुङ्क्ते भोक्ष्यते भोक्ता वा?। कर्हिशब्दस्य अनद्यतनार्थवृत्तित्वाद्भविष्यन्ती प्राप्नोति न श्वो,गमिष्यतीत्यादिवत्तु भविष्यति ॥ किंवृत्ते लिप्सायाम् ॥५।३।९॥ उपपदे गम्यायां वर्त्स्यदर्थाद्धातोर्वर्त्तमाना वा। पक्षे भविष्यन्तीश्वस्तन्यावपि। विभक्त्यन्तस्य डतरडतमान्तस्य च किमो वृत्तं किंवृत्तमिति वैयाकरणसमयः।को भवतां भिक्षां ददाति दास्यति दाता वा ?। एवं कतरकतमशब्दयोरप्युपपदयोः। किंवृत्त इति किं ?। भिक्षां दास्यति। लिप्सायामिति किम् ?। कः पुरं यास्यति ॥ लिप्स्यसिद्धौ ॥ ५ । ३ । १० ॥ गम्यायां वर्त्स्यदर्थाद्धातोर्वर्त्तमाना वा। अकिंवृत्तार्थोऽयमारम्भः। यो भिक्षां ददाति दास्यति। दाता वा। स स्वर्गं याति यास्यति याता वा ॥ पञ्चम्यर्थहेतौ ॥ ५ । ३ । ११ ॥ वर्त्स्यति वर्त्तमानाद्धातोर्वर्त्तमाना वा। उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा। अथ त्वं सूत्रमधीष्व ॥ सप्तमी चोर्ध्वमौहूर्त्तिके ॥ ५ । ३ । १२ ॥ पञ्चम्यर्थहेतौ वर्त्स्यदर्थे वर्त्तमानाद्धातोर्वर्त्तमाना वा। ऊर्ध्वं मुहूर्त्तादुपरि मुहूर्तस्योपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा अथ त्वं तर्कमधीष्व ॥ क्रियायां क्रियार्थायां तुम्णकच् भविष्यन्ती ॥ ५ । ३ । १३॥ उपपदे वर्त्स्यदर्थाद्धातोः। कर्त्तुं व्रजति। कारको व्रजति। करिष्यामीति व्रजति। क्रियायामिति किम् ?। धावतस्ते

पतिष्यति वासः । सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधा माभूदिति णकज्विधानम् । असरूपविधिना णकोऽपि भविष्यतीति चेत् । एवं तर्हि असरूपविधिना तृजादयो मा भूवन्निति पुनर्णकज्विधानम् । तेनौदनस्य पाचको व्रजति, पक्ता व्रजति, पचो व्रजतीत्यादि न भवति ॥ **सत्सामीप्ये सद्वद्वा** ॥ ५ । ४ । १ ॥ भूते भविष्यति चार्थे वर्तमानाद्धातोः प्रत्ययाः । कदा चैत्रागतोऽसि ?। अयमागच्छामि आगच्छन्तमेव मां विद्धि । एषोऽस्म्यागतः । अयमागमम् । कदा गमिष्यसि ?। एष गच्छामि गच्छन्तमेव मां विद्धि । पक्षे गन्तास्मि । गमिष्यन्तमेव मां विद्धि । गमिष्यामि । वत्करणाद् येनैव प्रकृत्युपपदोपाध्यादिना विशेषेण वर्तमाने विहितास्तेनैव विशेषेण भूतभविष्यतोरपि । कदा भवान् सोमं पूतवान् पविष्यते वा?। एषोऽस्मि पवमानः ॥ **भूतवच्चाशंस्ये वा** ॥ ५ । ४ । २ ॥ वर्तमानाद्धातोः सद्वत्प्रत्यया वा । अनागतस्य प्रियस्यार्थस्याशंसनं प्राप्तुमिच्छा आशंसा । तद्विषय आशंस्यः । वाग्रहणाद्यथाप्राप्तमपि । उपाध्यायश्चेदागमत् एते तर्कमध्यगीष्महि। उपाध्यायश्चेदागच्छति एते तर्कमधीमहे । पक्षे उपाध्यायश्चेदागमिष्यत्यागन्ता वा एते तर्कमध्येष्यामहे अध्येतास्महे वा । सामान्यातिदेशे विशेषानतिदेशात् ह्यस्तनीपरोक्षे न । आशंस्य इति किम् ? । उपाध्याय आगमिष्यति तर्कमध्येष्यते मैत्रः ॥ **क्षिप्राशंसार्थयोर्भविष्यन्तीसप्तम्यौ** ॥ ५ । ४ । ३ ॥ उपपदयोराशंस्येऽर्थे वर्तमानाद्धातोर्यथासङ्ख्यम् । भूतवच्चेत्यस्यापवादः । उपाध्यायश्चेदागच्छति आगमत् आगमिष्यति आगन्ता एते क्षिप्रमाशु सिद्धान्तमध्येष्यामहे । क्षिप्रार्थे नेति वक्तव्ये भविष्यन्तीवचनं श्वस्तनीविषयेऽपि भविष्यन्ती यथास्यादित्येवमर्थम् । उपाध्यायश्चेदागच्छति आगमत् आगमिष्यति आशंसे संभावये युक्तोऽधीयीय । द्वयोरुपपदयोः सप्तम्येव शब्दतः परत्वात् । आशंसे क्षिप्रमधीयीय ॥ **संभावने सिद्धवत्** ॥ ५ । ४ । ४ ॥ हेतोः शक्तिश्रद्धानं सम्भावनम् । तस्मिन् विषयेऽसिद्धेऽपि वस्तुनि सिद्धवत्प्रत्ययाः । समये चेत्प्रयत्नोऽभूत् उदभूवन् विभूतयः ॥ **नानद्यतनः प्रबन्धासत्त्योः** ॥ ५ । ४ । ५ ॥ धात्वर्थस्य गम्ययोः प्रत्ययः । प्रबन्धः

सातत्यम् । ह्यस्तनीश्वस्तन्योः प्रतिषेधोऽयम् । यावज्जीवं भृशमन्नमदाद्दास्यति वा । आसत्तिः सामीप्यम् । तच्च सजातीयेन कालेनाव्यवधानम् । येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट । येयं पौर्णमास्यागामिनी एतस्यां जिनमहः प्रवर्त्तिष्यते । द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाय । केचित्तु अनद्यतनविशेषविहितानामपि परोक्षादीनां प्रतिषेधमिच्छन्ति ॥ एष्यत्यवधौ देशस्यार्वाग्भागे ॥ ५ । ४ । ६ ॥ देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः प्रत्ययो न । अप्रबन्धार्थमनासत्यर्थं च सूत्रम् । यद्यप्यनद्यतन इति प्रकृतं तथापीहैष्यतीति वचनात् श्वस्तन्या एव निषेधः । योऽयमध्वा गन्तव्य आशत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे । द्विः सक्तून् पास्यामः । एष्यतीति किम् ? । योऽयमध्वाऽतिक्रान्त आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र युक्ता द्विरध्यैमहि । अवधाविति किम् ? । योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे । अर्वाग्भाग इति किम् ? । योयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यत्परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे । द्विःसक्तून् पातास्मः ॥ कालस्यानहोरात्राणाम् ॥ ५ । ४ । ७ ॥ कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः प्रत्ययो न, न चेत्सोऽर्वाग्भागोऽहोरात्राणाम् । योऽयमागामी संवत्सरस्तस्य यदवरं आग्रहायण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे । एष्यतीत्येव । योऽयं संवत्सरोऽतीतस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता द्विरध्यैमहि । अनहोरात्राणामिति किम्?।योऽय मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्रयुक्ता द्विरध्येतास्महे। योगविभाग उत्तरार्थः॥परे वा॥५।४।८॥ कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परे भागेऽनहोरात्रसम्बन्धिनि य एष्यन्नर्थस्तत्र वर्त्तमानाद्धातोरनद्यतनविहितः प्रत्ययो न । आगामिनः संवत्सरस्याग्रहायण्याः परस्तात् द्विःसूत्रमध्येष्यामहे अध्येतास्महे । प्रबन्धासत्तिविवक्षायामपि परत्वादयमेव विकल्पः । आगामिनः संवत्सरस्याग्रहायण्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे अध्येतास्महे ॥ भूते ॥

५ । ४ । १० ॥ वर्त्तमानाद्धातोः क्रियातिपत्तौ सत्यां सप्तम्यर्थे क्रियातिपत्तिर्विभक्तिर्भवति । सप्तम्युताप्योर्बाढे इत्यारभ्यानेन विधानम् । दृष्टो मया चैत्रोऽन्नार्थी चंक्रम्यमाणः अपरश्चातिथ्यर्थी यदि स तेनाद्रक्ष्यत उताभोक्ष्यत अप्यभोक्ष्यत नतु दृष्टोऽन्येन पथा गत इति ॥ वोतात्प्राक् ॥५।४।११॥ सप्तम्युताप्योरित्यतः प्राक् सप्तमीनिमित्ते क्रियातिपत्तौ भूतेऽर्थे वर्त्तमानाद्धातोर्वा क्रियातिपत्तिर्विभक्तिः । कथं नाम संयतः सन्ननागाढे तत्र भवान् आधाकृतम् असेविष्यत धिग्गर्हामहे । पक्षे कथं सेवेत कथं सेवते धिग्गर्हामहे । उतात्प्रागिति किम् ? । कालो यद्भोक्ष्यत भवान् ॥ क्षेपेऽपिजात्वोर्वर्त्तमाना ॥ ५ । ४ । १२ ॥ गम्ये उपपदयोर्धातोर्वर्त्तमाना । कालसामान्ये विधानात् कालविशेषे विहिता अपि प्रत्ययाः परत्वादनेन बाध्यन्ते । अपि तत्र भवान् जन्तून् हिनस्ति । जातु तत्र भवान् भूतानि हिनस्ति । इह सप्तमीनिमित्ताभावात् क्रियातिपतने क्रियातिपत्तिर्न भवति ॥ कथमि सप्तमी च वा ॥ ५ । ४ । १३ ॥ उपपदे क्षेपे गम्ये कालत्रये वर्त्तमाना । कथं नाम तत्र भवान् मांसं भक्षयेत् भक्षयति वा गर्हामहे । अन्याय्यमेतत् । पक्षे अबभक्षत् । अभक्षयत् । भक्षयांचकार । भक्षयिता । भक्षयिष्यति । अत्रसप्तमी निमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः । कथं नाम तत्र भवान् मांसमभक्षयिष्यत् । पक्षे यथाप्राप्तम् । भविष्यति तु क्रियातिपतने नित्यमेव सा । कथं नाम तत्र भवान् मांसमभक्षयिष्यत् ॥ किंवृत्ते सप्तमीभविष्यन्त्यौ ॥ ५ । ४ । १४ ॥ उपपदे क्षेपे गम्ये धातोः सर्वविभक्त्यपवादः । किं तत्र भवान् अनृतं ब्रूयात् । वक्ष्यति वा । कः कतरः कतमो वा नाम यस्मै तत्र भवाननृतं ब्रूयात् । वक्ष्यति वा । क्रियातिपत्तौ प्राग्वत् ॥ अश्रद्धामर्षेऽन्यत्रापि ॥५।४।१५॥ उपपदे गम्ये सप्तमीभविष्यन्त्यौ । क्षेप इति निवृत्तम् । अश्रद्धाऽसंभावना । अमर्षोऽक्षमा । न श्रद्दधे न संभावयामि तत्र भवान्नामादत्तं गृण्हीयात् ग्रहीष्यति वा । न श्रद्दधे किं तत्र भवानदत्तमाददीत । आदास्यते वा । न मर्षयामि न क्षमे वा । तत्र भवान्नामादत्तं गृण्हीयात् ग्रहीष्यति वा । क्रियातिपत्तिः प्राग्वत् ॥ किंकिलास्त्यर्थयोर्भविष्यन्ती ॥५।४।१६॥ उप-

पदयोरश्रद्धामर्षयोर्गम्ययोः। न श्रद्दधे न मर्षयामि। किंकिल नाम तत्र भवान् परदारानुपकरिष्यते। न श्रद्दधे न मर्षयामि अस्ति नाम भवति नाम तत्र भवान् परदारानुपकरिष्यते॥ जातुयद्यदायदौ सप्तमी॥ ५। ४। १७॥ उपपदेऽश्रद्धामर्षयोः। न श्रद्दधे न क्षमे वा जातु यद्यदा यदि वा तत्र भवान् सुरां पिबेत्। क्रियातिपत्तिः प्राग्वत्॥ क्षेपे च यच्चयत्रे॥ ५। ४। १८॥ उपपदेऽश्रद्धामर्षयोः सप्तमी। अश्रद्धामर्षयोर्भविष्यन्त्याः क्षेपे तु सर्वविभक्तीनामपवादः। धिग् गर्हामहे यच्च यत्र वा तत्र भवानस्मानाक्रोशेत्। न श्रद्दधे न क्षमे यच्च यत्र वा तत्र भवान् परिवादं कथयेत्। क्रियातिपत्तिः प्राग्वत्॥ चित्रे॥ ५। ४। १९॥ गम्ये यच्चयत्रयोरुपपदयोः सप्तमी। सर्वविभक्त्यपवादः। चित्रमाश्चर्यं यच्च यत्र वा तत्र भवानकल्प्यं सेवेत। अत्रापि क्रियातिपत्तिः प्राग्वत्॥ शेषे भविष्यन्त्ययदौ॥५।४।२०॥ उपपदे चित्रे गम्यमाने भविष्यन्ती। चित्रमाश्चर्यमन्धो नाम पर्वतमारोक्ष्यति। नात्र क्रियातिपत्तिः सप्तमी निमित्ताभावात् शेष इति किम्?। यच्चयत्रयोः पूर्वेण सप्तम्येव। अयदाविति किम्?। आश्चर्यं यदि स भुञ्जीत। सप्तम्युताप्योर्बाढे॥ ५। ४ २१॥ उपपदयोः। उत अपि वा कुर्यात्। बाढं करिष्यतीत्यर्थः। बाढ इति किम्?। उत दण्डः पतिष्यति। अपिधास्यति द्वारम्। इत आरभ्य भूतेऽपि नित्यं क्रियातिपत्तिः॥ सम्भावनेऽलमर्थे तदर्थानुक्तौ॥ ५। ४। २२॥ गम्ये सप्तमी॥ शक्यसम्भावने, अपिमासमुपवसेत्। अशक्यसम्भावने, अपि शिरसा पर्वतं भिन्द्यात्। अलमर्थं इति किम्?। निर्देशस्थायी मे चैत्रः प्रायेण यास्यति। तदर्थानुक्ताविति किम्?। वसति चेत् सुराष्ट्रेषु वन्दिष्यतेऽलमुज्जयन्तम्। काकिन्या हेतोरपि मातुः स्तनं छिन्द्यादित्यत्र क्षेपेऽपिजात्वोरिति वर्त्तमानां चित्रमाश्चर्यमपि शिरसा गिरिं भिन्द्यादित्यत्र तु शेषे भविष्यन्तीति भविष्यन्तीं च बाधित्वा परत्वादनेन सप्तम्येव॥ अयदि श्रद्धाधातौ न वा॥५।४।२३॥ श्रद्धा सम्भावना तदर्थे धातावुपपदेऽलमर्थविषये सम्भावने गम्ये धातोः सप्तमी वा न तु यच्छब्दे। पूर्वेण नित्ये प्राप्ते विकल्पः। श्रद्दधे संभावयामि भुञ्जीत भवान्। पक्षे, भोक्ष्यते अभुङ्क्त अभुक्त वा। अय-

दीति किम् ?। संभावयामि यद् भुञ्जीत भवान्। अवधाताविति किम् ?। अपि शिरसा पर्वतं भिन्द्यात्॥ **सतीच्छार्थात्** ॥ ५।४।२४॥ वर्त्तमानात् सप्तमी वा। इच्छेत्। इच्छति। उदयात्। वष्टि। क्षेपेऽपिजात्वोर्वर्त्तमाना इत्यादावपि परत्वादयमेव। अपि संयतः सन्कल्प्यं सेवितुमिच्छेत् इच्छति धिग्गर्हामहे॥ **वर्त्स्यति हेतुफले** ॥ ५।४।२५॥ वर्त्तमानात् सप्तमी वा। यदि गुरूनुपासीत शास्त्रान्तं गच्छेत्। यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति। वर्त्स्यतीति किम् ?। दक्षिणेन चेद्याति न शकटं पर्याभवति। केचित्तु सर्वेषु कालेषु सर्वविभक्त्यपवादं सप्तमीं मन्यन्ते। हनिष्यतीति पलायिष्यते इत्यत्र तु इतिशब्देनैव हेतुफलभावस्य द्योतितत्वात्सप्तमी न॥ **कामोक्तावकच्चिति** ॥ ५।४।२६॥ गम्यायां धातोः सप्तमी। कामो मे भुञ्जीत भवान्। अकच्चितीति किम् ?। कच्चिज्जीवति मे माता॥ **इच्छार्थे सप्तमीपञ्चम्यौ** ॥ ५।४।२७॥ धातावुपपदे कामोक्तौ गम्यमानायाम्। सर्वविभक्त्यपवादः। इच्छामि भुञ्जीत भुङ्क्तां वा भवान्। कामोक्तावित्येव। इच्छया भुङ्क्ते। नात्र प्रयोक्तुः कामोक्तिः। अत्र सत्यपि सप्तमीनिमित्त इच्छार्थे उपपदे कामोक्तौ क्रियातिपतनस्यासामर्थ्येनासम्भवात् क्रियातिपत्तिर्न। अन्ये तु सप्तम्युताप्योरित्यत आरभ्य यत्र सप्तम्या एव केवलाया निमित्तमस्ति तत्रैव क्रियातिपतने क्रियातिपत्तिरिति मन्यन्ते॥ **इच्छार्थे कर्मणः सप्तमी** ॥ ५।४।२९॥ धातावुपपदे तुल्यकर्तृकार्थाद्धातोः सम्बन्धे। भुञ्जीयेतीच्छति कामयते वा। इच्छार्थे इति किम् ?। भोजको याति। कर्मण इति किम् ?। इच्छन् करोति। तुल्यकर्तृक इति किम् ?। इच्छामि भुङ्क्तां भवान्॥ "**विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने**॥५।४।२८॥" सप्तमीपञ्चम्यौ। कटं कुर्यात् करोतु वा इत्यादि॥ **सप्तमी चोर्ध्वमौहूर्त्तिके** ॥५।४।३०॥ प्रैषादिषु गम्येषु वर्त्तमानाद्धातोः कृत्यपञ्चम्यौ। ऊर्ध्वं मुहूर्त्ताद् भवान् कटं कुर्यात करोतु वा। भवता कटः कार्यः। भवान् हि प्रेषितोऽनुज्ञातः॥ भवतोऽवसरः कटकरणे॥ **स्मे पञ्चमी** ॥ ५।४।३१॥ उपपदे प्रैषादिषु गम्येषु ऊर्ध्वमौहूर्त्तिकेऽर्थे वर्त्तमानाद्धातोः। कृत्यसप्तम्यपवादः। ऊर्ध्वं मुहूर्त्ताद् भवान् कटं

करोतु स्म । भवान् हि प्रेषितोऽनुज्ञातः, भवतोऽवसरः कटकरणे ॥ अधीष्टौ ॥ ५ । ४ । ३२ ॥ स्मे उपपदे गम्यायां पञ्चमी । पृथग्योगादूर्ध्वमौहूर्त्तिक इति निवृत्तम् । सप्तम्यपवादः । अङ्ग स्म विद्वन्नणुव्रतानि रक्ष ॥ सप्तमी यदि ॥ ५ । ४ । ३४ ॥ कालवेलासमयेषूपपदेषु । कालो यदधीयीत भवान् । वेला यद् भुञ्जीत । समयो यच्छयीत । बहुलाधिकारात्कालो यदध्ययनस्येत्याद्यपि भवति ॥ शक्तार्हे कृत्याश्च ॥ ५ । ४ । ३५ ॥ कर्त्तरि गम्ये सप्तमी । त्वया भारो वाह्यः । उह्येन त्वं भारं वहेः त्वं हि शक्तः । त्वया खलु कन्या वोढव्या । उह्येन। त्वं खलु कन्यां वहेः। त्वमेतदर्हसि । सप्तम्या बाधो माभूदिति कृत्यग्रहणम् । बहुवचनमिहोत्तरत्र च यथासङ्ख्यनिवृत्त्यर्थम् ॥ धातोः सम्बन्धे प्रत्ययाः ॥ ५ । ४ । ४१ ॥ अयथाकालमपि साधवः । विश्वदृश्वाऽस्य पुत्रो भविता । कृतः कटः श्वो भविता । विशेषणं गुणत्वाद्विशेष्यकालमनुरुध्यते । तेन विपर्ययो न । तथा त्याद्यन्तमपि यदा परं त्याद्यन्तं प्रति विशेषणत्वेनोपादीयते तदा तस्यापि समुदायवाक्यार्थापेक्षया कालान्यत्वं भवत्येव । साटोपमुर्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोऽमी। तान्येकदेशान्निभृतं पयोधेः सोऽम्भांसि मेघान् पिबतो ददर्श । अत्र प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्शेति भूतानुगमः । बहुवचनाद्धात्वधिकारविहिता अपि प्रत्यया धातुसंबन्धे कालभेदे भवति । गोमानासीत् । अत्र चास्तिविवक्षायामुक्ताऽपि मतुब् भूते ॥ भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि ॥ ५ । ४ । ४२॥ भृशाभीक्ष्ण्यविशिष्टे सर्वकालेऽर्थे वर्त्तमानाद्धातोः सर्वविभक्तिसर्ववचनविषये हिस्वौ पञ्चमीसम्बन्धिनौ भवतः, यथाविधि धातोः सम्बन्धे यत एव धातोर्यस्मिन्नेव कारके हिस्वौ विधीयेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव सम्बन्धेऽनुप्रयोगरूपे सति, तथा तध्वमौ हिस्वसाहचर्यात् पञ्चम्या एव सम्बन्धिनौ तध्वमोः सम्बन्धी बहुत्वविशिष्टो यो युष्मदर्थस्तस्मिन्नभिधेये भवतः चकाराद्धिस्वौ च यथाविधि धातोः सम्बन्धे ॥ भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः ॥ ७ । ४ । ७३ ॥ द्योत्ये पदं वाक्यं वा । क्रियाया अवयवक्रियाणां कार्त्स्न्यं भृशार्थः । पौनःपुन्यमाभीक्ष्ण्यम् । क्रि-

यान्तराव्यवधानमविच्छेदः । लुनीहि लुनीहीत्येवायं लुनाति । अनुप्रयोगात्कालवचनभेदोऽभिव्यज्यते । भृशत्वविशिष्टम् आभीक्ष्ण्यविशिष्टं वा लवनं ह्यन्तस्यार्थः । एककर्तृकं वर्तमानकालिकं लवनं लुनातीत्यस्य, इति शब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति । एवं लुनीतः लुनन्ति इत्यादि । लुनीहि लुनीहीत्येवायमलावीत् । एवमधीष्वाधीष्वेत्येवायमधीते । इत्यादि । लुनीत लुनीतेत्येव यूयं लुनीथ । लुनीहि लुनीहीत्येव यूयं लुनीथ । अधीध्वमधीध्वमित्येव यूयमधीध्वे। अधीष्वाधीष्वेत्येवं यूयमधीध्वे । यथाविधीति किम ?। लुनीहि लुनीहीत्येवायं लुनाति छिनत्ति लूयते वेति धातोः सम्बन्धे मा भूत् । क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायात् भृशादियोगे द्विर्वचनम् । पुनः पुनः पचति । प्राक् तमबादेरिति किम ? । पचति पचतितमाम् ॥ **प्रचये वा सामान्यार्थस्य** ॥ ५ । ४ । ४३ ॥ गम्ये सम्बन्धे धातोः परौ हिस्वौ तध्वमौ च तद्युष्मदि । व्रीहीन् वप लुनीहि पुनीहीत्येवं यतते यत्यते वा । अत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः । पक्षे व्रीहीन् वपति लुनाति पुनातीत्येव यतते यत्यते वा । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवमधीते पठ्यते वा । पक्षे सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येवमधीते पठ्यते वा । व्रीहीन् वपत लुनीत पुनीतेत्येवं यतध्वे । व्रीहीन् वप लुनीहि पुनीहीत्येवं चेष्टध्वे । पक्षे व्रीहीन् वपथ लुनीथ पुनीथेत्येवं यतध्वे । सूत्रमधीध्वं नियुक्तिमधीध्वं भाष्यमधीध्वमित्येवमधीध्वे । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवमधीध्वे । पक्षे सूत्रमधीध्वे नियुक्तिमधीध्वे भाष्यमधीध्वे इत्येवमधीध्वे । सामान्यार्थस्येति किम ? । व्रीहीन् वप लुनीहि पुनीहि इत्येवं वपति लुनाति पुनातीति मा भूत् ॥

॥ इति **श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां त्याद्यर्थप्रक्रिया** ॥

## ॥ अथ कृदन्तप्रकरणम् ॥

॥ आतुमोऽत्यादिः कृत् ॥ ५।१।१॥ धातोर्विधीयमानो वक्ष्यमाणः । घनघात्यः । उदकेविशीर्णम् । अत्यादिरिति किम् ? । पणिस्ते ॥ बहुलम् ॥ ५ । १ । २ ॥ अधिकारोऽयम् । कृत्प्रत्ययो यथानिर्दिष्टादर्थादेरन्यत्रापि बहुलम् । पादाभ्यां ह्रियते पादहारकः । मुह्यत्यनेनात्येति मोहनी कर्म । सम्प्रदीयतेऽस्मा इति सम्प्रदानम् ॥ कर्तरि ॥ ५ । १ । ३ ॥ कृत्प्रत्ययोऽर्थविशेषोक्तिं विना । कर्ता ॥ व्याप्ये घुरकेलिमकृष्टपच्यम् ॥ ३ । १ । ४ ॥ कर्तरि घुरो वक्ष्यते । केलिमोऽत एव वचनाज् ज्ञायते । कृष्टपच्ये यश्च । भङ्गुरं काष्ठम् । एवं भिदुरः कुशूलः । छिदुरा रज्जुः । भासमिदविदां कर्तर्येव घुरः कर्मकर्तुरसम्भवात् । केचिच्छिदिभिदोरपि कर्तरि घुरमिच्छन्ति । पचेलिमा माषाः । भिदेलिमास्तण्डुलाः । कृष्टपच्याः शालयः ॥ सङ्गतेऽजर्यम् ॥ ५ । १ । ५ ॥ सङ्गतं सङ्गमनम् । तस्मिन् कर्त्रर्थभिधेये नञ्पूर्वाज्जीर्यतेर्यप्रत्ययो निपात्यते । अजर्यमार्यसङ्गतम् । सामान्यविशेषभावेन चोभयोरपि प्रयोगः । तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतम् । सङ्गत इति किम् ? । अजरः पटः । कर्तरीत्येव । अजार्यं सङ्गतेन ॥ रुच्याव्यथ्यवास्तव्यम् ॥ ५।१।६॥ एते कर्तरि निपात्यन्ते । रुच्यो मोदको मैत्राय । अव्यथ्यो मुनिः । इह पूर्वत्र च क्यप् । वास्तव्यः । अत्र नव्यण् ॥ भव्यगेयजन्यरम्यापात्याप्लाव्यं नवा ॥ ५। १।७ ॥ कर्तरि निपात्यते । भवतीति भव्यः पक्षे भाव्यमनेन । गेयो माणवकः साम्नाम् । गेयानि माणवकेन सामानि । जायतेऽसाविति जन्यः । जन्यमनेन । रमयतीत्यसौ रम्यः । रम्यते इति रम्यः । आपतत्यसावापात्यः । आपात्यमनेन । आप्लवतेऽसावाप्लाव्यः । आप्लाव्यमनेन ॥ प्रवचनीयादयः ॥ ५ । १ । ८ ॥ अनीयप्रत्ययान्ताः कर्तरि वा निपात्यन्ते । प्रवचनीयो गुरुः शास्त्रस्य प्रवचनीयं गुरुणा शास्त्रम् उपस्थानीयः शिष्यो गुरोः । उपस्थानीयः शिष्येण गुरुः । एवं रमणीयो देशः । मदनीया योषित् । दाप-

मैनतायनः । अनन्तरो मैमतिः॥ **भागवित्तितार्णविन्दवाऽऽकशापेयान्निन्दायामिकण् वा** ॥ ६ । १ । १०५ ॥ सौ-वीरेषु यो वृद्धस्तत्र वर्त्तमानाद्यूनि ॥ भागवित्तिकः । भागवित्तायनो वा जाल्मः । तार्णविन्दविकः । तार्णविन्दविः । आ-कशापेयिकः । आकशापेयिः ॥ निन्दायामिति किम् ? । अन्यत्र भागवित्तायनः ॥ **सौयामायनियामुन्दायनिवा-र्ष्यायणेरीयश्च वा** ॥ ६ । १ । १०६ ॥ सौवीरवृद्धवृत्तेर्यूनीकण् निन्दायाम् । सौयामायनीयः । सौयामायनिकः । सौया-मायनिर्वा निन्द्यो युवा । यामुन्दायनीयः । यामुन्दायनिकः । यामुन्दायनिः । वार्ष्यायणीयः । वार्ष्यायणिकः । वार्ष्या-यणिः ॥ निन्दायामित्येव । सौयामायनिः ॥ **तिकादेरायनिञ्** ॥ ६ । १ । १०७ ॥ अपत्ये । इञादेरपवादः । तैकायनिः । कैतवायनिः ॥**दगुकोशलकर्मारच्छागवृषाद्यादिः** ॥ ६ । १ । १०८ ॥ अपत्ये आयनिञ् ॥ दागव्याय-निः । कौशल्यायनिः । कार्मार्यायणिः । छाग्यायनिः । वार्ष्यायणिः ॥ **द्विस्वरादणः** ॥ ६ ॥ १ । १०९ ॥ अपत्ये आयनिञ् ॥ कार्त्रायणिः । द्विस्वरादिति किम् ? । औपगविः । अण इति किम् ? दाक्षायणः । वृद्धादेवायं विधिः, अवृद्धादुत्तरेण विकल्पः । अङ्गानां राजा आङ्गः तस्याङ्गिः । आङ्गायनिर्वा ॥ **वृद्धिर्यस्य स्वरेष्वादिः** ॥ ६ । १ । ८ ॥ स दुसंज्ञः ॥ **अवृद्धाद्दोर्नवा** ॥ ६ । १ । ११० ॥ अपत्ये आयनिञ् ॥ आम्रगुप्तायनिः । आम्रगुप्तिः ॥ अवृद्धादिति किम् ? । दाक्षायणः । दोरिति किम् ? । आकम्पनिः ॥ **वाशिन आयनौ** ॥ ७ । ४ । ४६ ॥ अन्त्यस्वरादेर्लुग् न ॥ वाशिनायनिः ॥ **पुत्रान्तात्** ॥ ६ । १ । १११ ॥ दोरपत्ये आयनिञ् वा ॥ गार्गीपुत्रायणिः । गार्गीपुत्रिः । उत्तरसूत्रप्रा-प्तकागमाभावार्थं वचनम् । पक्षे उत्तरेण कागमोऽपि । गार्गीपुत्रकायणिः ॥ **चर्मिवर्मिगारेटकार्कट्यकाकलङ्कावा-किनाच्च कश्चान्तोऽन्त्यस्वरात्** ॥ ६ । १ । ११२ ॥ पुत्रान्ताद्दोरायनिञ् वा ॥ चार्मिकायणिः । चार्मिणः । वार्मिकायणिः । वार्मिणः । गारेटकायनिः । गारेटिः । कार्कट्यकायनिः । कार्कट्यायनः । यदा तु अव्युत्पन्नः का-र्कट्यशब्दस्तदा पक्षे इञेव । काककायनिः । काकिः । लाङ्काकायनिः । लाङ्केयः । वाकिनकायनिः । वाकिनिः ।

गार्गीपुत्रकायणिः । गार्गीपुत्रिः । अन्त्यस्वरात्परतः ककारविधानं नलोपार्थम् । न च परादिरेव क्रियतामिति वाच्यम् । पुंवद्भावासिद्धेः । चर्मिण्या अपत्यं चार्मिकायणिः ॥ **अदोरायनिः प्रायः ॥ ६ । १ । ११३ ॥** अपत्ये वा ॥ ग्लुचुकायनिः । ग्लौचुकिः । प्रायः किम् ? । दाक्षिः । अदोरिति किम् ? । औपगविः ॥ **राष्ट्रक्षत्रियात्सरूपाद्राजापत्ये द्रिरञ् ॥ ६ । १ । ११४ ॥** यथासंख्यम् । विदेहानां राष्ट्रस्य राजा विदेहस्य राज्ञोऽपत्यं वा वैदेहः । वैदेहौ । विदेहाः राजानोऽपत्यानि वा ॥ ऐक्ष्वाकः । सरूपादिति किम् ? । दाशरथिः ॥ **गान्धारिसाल्वेयाभ्याम् ॥ ६ । १ । ११५ ॥** राष्ट्रक्षत्रियार्थाभ्यां सरूपाभ्यां राजापत्ये द्रिरञ् ॥ गान्धारयः । साल्वेयाः । एकत्वद्वित्वयोस्तु अपत्यार्थविवक्षायाम् अब्राह्मणादिति लुब् न, विधानसामर्थ्यात् ॥ **पुरुमगधकलिङ्गसूरमसद्विस्वरादण् ॥ ६ । १ । ११६ ॥** राष्ट्रक्षत्रियार्थात्सरूपाद्राजापत्ये द्रिः ॥ पौरवः । मागधः । मगधाः । कालिङ्गः । सौरमसः । आङ्गः । पुरुग्रहणमसरूपार्थम् । तत्रौत्सर्गिकेणैवाऽणा सिद्धे बहुषु लुबर्थमिदमण्विधानम् । अन्यत्र सिद्धेऽण्विधानं सङ्घाद्यणूबाधनार्थम् । तेन पौरवकम् ॥ **साल्वांशप्रत्यग्रथकालकूटाऽश्मकादिञ् ॥ ६ । १ । ११७ ॥** सरूपराष्ट्रक्षत्रियार्थाद्राजापत्ये द्रिः ॥ औदुम्बरिः । उदुम्बराः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः ॥ **दुनादिकुर्वित्कोशलाजादाञ्ञ्यः ॥ ६ । १ । ११८ ॥** सरूपराष्ट्रक्षत्रियार्थाद्राजापत्ये द्रिः आम्बष्ठ्यः । आम्बष्ठाः । नैषध्यः । कौरव्यः । आवन्त्यः । कौशल्यः । आजाद्यः ॥ **पाण्डोर्ड्यण् ॥ ६ । १ । ११९ ॥** राष्ट्रक्षत्रियार्थात्सरूपाद्राजापत्ये द्रिः ॥ पाण्ड्यः । पाण्ड्यौ । पाण्डवः ॥ **शकादिभ्यो द्रेर्लुप् ॥ ६ । १ । १२० ॥** शकानां राजा शकस्यापत्यं वा शकः । यवनः ॥ **कुन्त्यवन्तेः स्त्रियाम् ॥ ६ । १ । १२१ ॥** द्रेर्ञ्यस्य लुप् ॥ कुन्ती । अवन्ती । स्त्रियामिति किम् ? । कौन्त्यः । प्रकृतस्य द्रेर्लुब्विधानात् कौन्ती ॥ **कुरोर्वा ॥ ६ । १ । १२२ ॥** द्रेर्ञ्यस्य स्त्रियां लुप् । कुरुः । कौरव्यायणी **द्रेरञणोऽप्राच्यभर्गादेः ॥ ६ । १ १२३ ॥** स्त्रियां लुप् । शूरसेनी । मद्री । दरत् । मत्सी । अप्राच्येत्यादि कि-

म ? । पाञ्चाली । भार्गी । कारूषी ॥ **बहुष्वस्त्रियाम्** ॥ ६ । १ । १२४ ॥ यन्तस्य बह्वर्थस्य यो द्रिस्तस्य लुप् । पञ्चालाः । अस्त्रियामिति किम् ? । पाञ्चाल्यः ॥ ॥ **भृग्वङ्गिरस्कुत्सवशिष्ठगोतमाऽत्रेः** ॥ ६ । १ । १२८ ॥ यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यः प्रत्ययस्तस्यास्त्रियां लुप् ॥ भृगवः । अङ्गिरसः । कुत्साः । वशिष्ठाः । गोतमाः । अत्रयः ॥ **प्राग्भरते बहुस्वरादिञः** ॥ ६ । १ । १२९ ॥ बहुषु गोत्रे यः स प्रत्ययस्तस्यास्त्रियां लुप् । क्षीरकलम्भाः । उद्दालकाः । प्राग्भरत इति किम् ? । बालाकयः । बहुस्वरादिति किम् ? पौष्पयः ॥ ॥ **वोपकादेः** ॥ ६ । १ । १३० ॥ यः प्रत्ययस्तदन्तस्य बहुगोत्रार्थस्य यः स प्रत्ययस्तस्याऽस्त्रियां लुप् ॥ उपकाः । औपकायनाः । लमकाः । लामकायनाः ॥ **तिककितवादौ द्वन्द्वे** ॥ ६ । १ । १३१ ॥ यः स प्रत्ययस्तस्यास्त्रियां लुप् ॥ तिककितवाः । उब्जककुभाः ॥ **द्व्यादेस्तथा** ॥ ६ । १ । १३२ ॥ द्व्यादिप्रत्ययान्तानां द्वन्द्वे बह्वर्थे यः स द्व्यादिस्तस्य तथा लुप् यथापूर्वम् ॥ अङ्गवङ्गसुह्माः । वृकलोहध्वजकुण्डीविसाः । तथेति किम् ? । गार्गीवत्सवाजाः । तत्रास्त्रियामित्युक्तेर्गार्गी त्यत्र न स्यात् ॥ **वाऽन्येन** ॥ ६ । १ । १३३ ॥ द्व्यादेरन्येन सह द्व्यादीनां द्वन्द्वे बह्वर्थे यःस द्व्यादिस्तस्यास्त्रियां तथा लुब् यथा पूर्वम् ॥ अङ्गवङ्गदाक्षयः । आङ्गवाङ्गदाक्षयः ॥ **द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा** ॥ ६ । १ । १३४ ॥ षष्ठीतत्पुरुषे यत्पदं षष्ठ्या विषये द्वयोरेकस्मिंश्च स्यात्तस्य यः स यञादिस्तस्य तथा वा लुप् ॥ गर्गकुलम् । गार्ग्यकुलम् । विदकुलम् । बैदकुलम् । द्व्येकेष्विति किम् ? । गर्गाणां कुलं गर्गकुलम् ॥ ॥ **न प्राग्जितीये स्वरे** ॥ ६ । १ । १३५ ॥ गोत्रे उत्पन्नस्य बहुष्वित्यादिना या लुबुक्ता सा प्राग्जितीयेऽर्थे यः स्वरादिस्तद्धितस्तद्विषये न स्यात् ॥ गर्गाणां छात्राः गार्गीयाः । आत्रेयीयाः । प्राग्जितीय इति किम् ? । अत्रीयः । स्वर इति किम् ? । गर्गमयम् ॥ **गर्गभार्गविका** ६ । १ । १३६ ॥ द्वन्द्वात्प्राग्जितीये विवाहे योऽकल् तस्मिन्नणो लुबभावो निपात्यते ॥ गर्गभार्गविका ॥ ॥ **यूनि लुप्** ॥ ६ । १ । १३७ ॥ विहितस्य प्रत्ययस्य प्राग्जितीयेऽर्थे स्वरादौ प्रत्यये विषयभूते ॥ लुपि सत्यां यः प्राप्नोति

स स्यादित्यर्थः । पाण्टाहृतस्यापत्यं पाण्टाहृतिस्तस्यापत्यं युवा पाण्टाहृतः, तस्यच्छात्रा इति प्राग्जितीयेऽर्थे स्वरादौ प्रत्यये चिकीर्षिते णस्य लुप्, ततो वृद्धेञ् इत्यञ् पाण्टाहृताः ॥ **वाऽऽयनणाऽऽयनिञोः** ॥ ६ । १ । १३८ ॥ युवार्थयोः प्राग्जितीये स्वरादौ विषये लुप् ॥ गार्गीयाः । गार्ग्यायणीयाः । हौत्रीयाः । हौत्रायणीयाः ॥ **द्रीञो वा** ॥ ६ । १ । १३९ ॥ युवार्थस्य लुप् ॥ औदुम्बरिः । औदुम्बरायणः ॥ **अब्राह्मणात्** ॥ ६ । १ । १४१ ॥ वृद्धप्रत्ययान्ताद्युवार्थस्य लुप् ॥ आङ्गः पिता । आङ्गः पुत्रः । अब्राह्मणादिति किम् ?। गार्ग्यः पिता । गार्ग्यायणः पुत्रः **पैलादेः** ॥ ६ । १ । १४२ ॥ यूनि प्रत्ययस्य लुप् ॥ पैलः पिता पुत्रश्च । शालङ्किः पिता पुत्रश्च ॥ **प्राच्येञोऽतौल्वल्यादेः** ॥ ६ । १ । १४३ ॥ यूनि प्रत्ययस्य लुप् ॥ पान्नागारिः पिता पुत्रश्च । मान्थरषेणिः पिता पुत्रश्च । प्राच्येति किम् ?। दाक्षिः पिता । दाक्षायणः पुत्रः । तौल्वल्यादिवर्जनं किम् ?। तौल्वलिः पिता । तौल्वलायनः पुत्रः ॥ **इत्यपत्याधिकारः** ॥ ॥ **अथ रक्ताद्यर्थकाः** ॥ **रागाट्टो रक्ते** ॥ ६ । २ । १ ॥ रज्यते येन कुसुम्भादिना तदर्थात्तृतीयान्ताद्रक्तमित्यर्थे यथाविहितं प्रत्ययः । कुसुम्भेन रक्तं कौसुम्भं वासः । एवं काषायम् । रागादिति किम् ?। चैत्रेण रक्तम् । अत्र कुसुम्भादयो रागा ग्राह्यास्तेनेह न । कृष्णेन रक्तमित्यादि । एते हि वर्णा द्रव्यवृत्तयो न तु रागाख्याः । काषायौ गर्दभस्य कर्णौ हारिद्रौ कुक्कुटस्य पादाविति तूपमानोपमेयभावेन तद्गुणारोपाद्भविष्यति ॥ **लाक्षारोचनादिकण्** ॥ ६ । २ । २ ॥ टान्ताद्रक्ते । लाक्षिकम् । रौचनिकम् ॥ **शाकलकर्दमाद् वा** ॥ ६ । २ । ३ ॥ टान्ताद्रक्त इकण् । शाकलिकम् । शाकलम् । कार्दमिकम् । कार्दमम् ॥ **नीलपीतादकम्** ॥ ६ । २ । ४ ॥ टान्ताद्रक्ते यथासंख्यम् । नीलेन लिङ्गविशिष्टपरिभाषया नील्या वा रक्तं नीलम् । पीतकम् ॥ **उदितगुरोर्भाद्युक्तेऽब्दे** ॥ ६ । २ । ५ । टान्ताद्यथाविहितं प्रत्ययः । पौषं वर्षम् । भादिति किम् ?। उदितगुरुणा पूर्वरात्रेण युक्तं वर्षम् ॥ **चन्द्रयुक्तात्काले लुप्त्वप्रयुक्ते** ॥ ६ । २ । ६ ॥ टान्ताद्भाद्युक्ते यथावि-

हितं प्रत्ययः । पौषमहः । पौषी रात्रिः । अद्य पुष्यः ॥ **राधादीयः** ॥ ६ । २ । ७ ॥ टान्ताच्चन्द्रयुक्तभाद्युक्ते काले । राधानुराधीयमहः ॥ **श्रवणाश्वत्थान्नाम्न्यः** ॥ ६ । २ । ८ ॥ टान्ताच्चन्द्रयुक्तार्थाद्युक्ते काले । श्रवणा रात्रिः । अश्वत्था पौर्णमासी । नाम्नीति किम् ? । श्रावणमहः । आश्वत्थमहः ॥ **षष्ठ्याः समूहे** ॥ ६ । २ । ९ ॥ यथाविहितं प्रत्ययाः । चाषम् । स्त्रैणम् ॥ पञ्चकुमारीत्यत्र तु न तद्धितः । समासेन समूहार्थस्योक्तत्वात् । तेन ङीनिवृत्तिर्न ॥ **भिक्षादेः** ॥ ६ । २ । १० ॥ षष्ठ्यन्तात्समूहे यथाविहितं प्रत्ययाः । भैक्षम् ॥ **अनपत्ये** ॥ ७ । ४ । ६६ ॥ इन्नन्तस्याण्यन्त्यस्वरादेर्लुग् न । गार्भिणम् । यौवतम् । क्षैत्रम् । पुंवद्भावबाधनार्थोऽस्य पाठः । अन्ये तु युवतिशब्दं न पठन्ति । तन्मते यौवनम् ॥ **क्षुद्रकमालवात्सेनानाम्नि** ॥ ६ । २ । ११ ॥ षष्ठ्यन्तात्समूहेऽण् ॥ क्षौद्रकमालवी सेना । गोत्राकञ्बाधनार्थं वचनम् । समूहाधिकारे हि धेनोरनञ इति प्रतिषेधात्तदन्तग्रहणम् ॥ **गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ्** ॥ ६ । २ । १२ ॥ समूहे । गार्गकम् । औक्षकम् । वात्सकम् । औष्ट्रकम् । वार्द्धकम् । आजकम् । औरभ्रकम् ॥ **न राजन्यमनुष्ययोरके** ॥ ७ । ४ । ८४ ॥ यो लुक् । मानुष्यकम् । राजकम् । राजन्यकम् । राजपुत्रकम् ॥ **केदाराण्ण्यश्च** ॥ ६ । २ । १३ ॥ समूहेऽकञ् । कैदार्यम् । कैदारकम् ॥ **कवचिहस्त्यचित्ताच्चेकण्** ॥ ६ । २ । १४ ॥ केदारात्समूहे । कावचिकम् । हास्तिकम् । आपूपिकम् । शाष्कुलिकम् । कैदारिकम् । ण्याकञ्भ्यां बाधा मा भूदितीकण्विधानम् ॥ **धेनोरनञः** ॥ ६ । २ । १५ ॥ समूहे इकण् । **ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक्** ॥ ७ । ४ । ७१ ॥ धैनुकम् । अनञ इति किम् ? । आधैनवम् ॥ **ब्राह्मणमाणववाडवाद्यः** ॥ ६ । २ । १६ ॥ समूहे । ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ॥ **गणिकाया ण्यः** ॥ ६ । २ । १७ ॥ समूहे । गाणिक्यम् । ब्राह्मणादीनां यविधानं पुंवद्भावार्थम् । तेन ब्राह्मण्ययात्रः । ण्ये हि पुंवद्भावो न स्यात् ॥ **केशाद्वा** ॥ ६ । २ । १८ ॥ समूहे ण्यः । कैश्यम् । कैशिकम् ॥

वाऽश्वादीयः ॥ ६ । २ । १९ ॥ समूहे । अश्वीयम् । आश्वम् ॥ **पर्श्वा ड्वण्** ॥ ६ । २ । २० ॥ समूहे । पार्श्वम् ॥ **ईनोऽह्नः क्रतौ** ॥ ६ । २ । २१ ॥ समूहे । अहीनः क्रतुः । क्रताविति किम् ? । आह्नम् ॥ अनीनादट्यह्नोऽतः ॥ ७ । ४ । ६६ ॥ अपदस्य तद्धिते लुक् । इत्यतो लुक् ॥ **पृष्ठाद्यः** ॥ ६ । २ । २२ ॥ समूहे क्रतौ । पृष्ठ्यः । क्रतावित्येव । पार्ष्ठिकम् ॥ **चरणाद्धर्मवत्** ॥ ६ । २ । २३ ॥ समूहे प्रत्ययाः । कठानां धर्मः काठकम् । तथा समूहेऽपि ॥ **गोरथवातात्त्रल्कट्यल्लूलम्** ॥ ६ । २ । २४ ॥ समूहे यथासंख्यम् । गोत्रा । रथकट्या । वातूलः ॥ **पाशादेश्च ल्यः** ॥ ६ । २ । २५ ॥ गवादेः समूहे । पाश्या । तृण्या । गव्या । रथ्या । वात्या ॥ **श्वादिभ्योऽञ्** ॥ ६ । २ । २६ ॥ समूहे । शौवम् । आह्नम् ॥ **खलादिभ्यो लिन्** ॥ ६ । २ । २७ ॥ समूहे । खलिनी । पाशादित्वाल्ल्योऽपि । खल्यः । ऊकिनी ॥ **ग्रामजनबन्धुगजसहायात्तल्** ॥ ६ । २ । २८ । समूहे । ग्रामता । जनता । बन्धुता । गजता । सहायता ॥ **पुरुषात्कृतहितवधविकारे चैयञ्** ॥ ६ । २ । २९ ॥ समूहे । पौरुषेयो ग्रन्थः । पौरुषेयमार्हतं शासनम् । पौरुषेयो वधो विकारो वा । पौरुषेयम् ॥ **विकारे** ॥ ६ । २ । ३० ॥ षष्ठ्यन्ताद् यथाविहितं प्रत्ययाः ॥ वाऽश्मनो विकारे ॥ ७ । ४ । ६३ ॥ अपदस्य तद्धितेऽन्त्यस्वरादेर्लुक् । आश्मः । आश्मनः ॥ चर्मशुनः कोशसङ्कोचे ॥ ७ । ४ । ६४ ॥ अपदस्य यथासङ्ख्यं तद्धितेऽन्त्यस्वरादेर्लुक् ॥ चार्मः कोशः । कोशादन्यत्र चार्मणः । शुनोऽयं शौवः संकोचः । अन्यत्र शौवनः । शौवं मांसमित्यादि तु हेमादित्वादञि नोऽपदस्येति भविष्यति ॥ पदस्यानिति वा ॥ ७ । ४ । १२ ॥ श्वादेर्ञ्णिति तद्धिते वकारात्प्रागौकारः । श्वापदम् । शौवापदम् । अनितीति किम् ? । श्वापदिकः ॥ **प्राण्योषधिवृक्षेभ्योऽवयवे च** ॥ ६ । २ । ३१ ॥ षष्ठ्यन्तेभ्यो विकारे यथाविहितं प्रत्ययाः । कापोतं सक्थि मांसं वा । दौवम् । बैल्वं काण्डं भस्म वा । इतः परं विकारे प्राण्योषधिवृक्षेभ्योऽवयवे चेति द्वयमप्यधिक्रियते । तेनोत्तरे प्रत्य-

याः प्राण्योषधिवृक्षेभ्योऽवयवविकारयोरन्येभ्यस्तु विकारमात्रे भवन्तीति वेदितव्यम् । प्राणिग्रहणेनेह त्रसा एव गृह्यन्ते
॥ तालाद्धनुषि ॥ ६ । २ । ३२ ॥ विकारेऽण् । तालं धनुः । धनुषीति किम् । तालमयं काण्डम् ॥ त्रपुजतोः
षोऽन्तश्च ॥ ६ । २ । ३३ ॥ विकारेऽण् । त्रापुषम् । जातुषम् ॥ शम्याष्टलः ॥ ६ । २ । ३४ ॥ विकारेऽव-
यवे चाण् । शामीलं भस्म । शामीली शाखा ॥ पयोद्रोर्यः ॥ ६ । २ । ३५ ॥ विकारे । पयस्यम् । द्रव्यम् ॥
उष्ट्रादकञ् ॥ ६ । २ । ३६ ॥ विकारेऽवयवे च । औष्ट्रकं मांसमङ्गं वा ॥ उमोर्णाद्वा ॥ ६ । २ । ३७ ॥
विकारेऽवयवे चाकञ् । औमकम् । औमम् । और्णकम् । और्णः कम्बलः ॥ एण्या एयञ् ॥ ६ । २ । ३८ ॥
विकारेऽवयवे च । ऐणेयं मांसमङ्गं वा । स्त्रीलिङ्गनिर्देशात्पुंलिङ्गादणेव । ऐणं मांसम् ॥ कौशेयम् ॥ ६ । २ ।
३९ ॥ कौशेयं वस्त्रं सूत्रं वा । निपातनं रूढ्यर्थम् । तेन वस्त्रसूत्राभ्यामन्यत्र न । परशव्याद्यलुक् च ॥ ६ । २ ।
४० ॥ विकारेऽण् । पारशवम् । यग्रहणं यस्य समुदायस्य लोपार्थम् । तेन कांस्यमित्यत्रावर्णेवर्णस्येतीकारलोपः ॥
कंसीयाञ्ञ्यः ॥ ६ । २ । ४१ ॥ विकारे तद्योगे यलुक् च । कांस्यम् ॥ हेमार्थान्माने ॥ ६ । २ । ४२ ॥
विकारेऽण् । हाटको निष्कः । मान इति किम् ? । हाटकमयी यष्टिः ॥ द्रोर्वयः ॥ ६ । २ । ४३ ॥ माने विकारे ।
द्रुवयं मानम् ॥ मानात्क्रीतवत् ॥ ६ । २ । ४४ ॥ विकारे । मानं संख्यादि । शतेन क्रीतं शत्यम् । शतिकम् ।
एवं विकारेऽपि । वद्ग्रहणाल्लुबादिकस्याप्यतिदेशः । तेन द्विशत इत्यादि ॥ हेमादिभ्योऽञ् ॥ ६ । २ । ४५ ॥
विकारेऽवयवे च यथायोगम् । हैमम् । राजतः ॥ अभक्ष्याच्छादने वा मयट् ६ । २ । ४६ ॥ विकारेऽवयवे
च यथायोगम् । भस्ममयम् । भास्मनम् । अभक्ष्याच्छादन इति किम् ? । मौद्गः सूपः । कार्पासः पटः । भक्ष्या-
च्छादनयोर्मयडभावपक्षे च तालाद्धनुषि इत्यादिको विधिः सावकाशः । अयं च भस्ममयमित्यादौ । तत्रोभयप्राप्तौ
परत्वादनेन मयट् । तालमयं धनुः । एके तु तालाद्धनुषि द्रोः प्राणिवाचिभ्यश्च मयटं नेच्छन्ति ॥ शरदर्भकूदी-

**तृणसोमबल्वजात्** ॥ ६ । २ । ४७ । अभक्ष्याच्छादने विकारेऽवयवे च नित्यं मयट् । शरमयम् । दर्भमयम् । कूदीमयम् । तृणमयम् । सोममयम् । बल्वजमयम् ॥ **एकस्वरात्** ॥ ६ । २ । ४८ ॥ नाम्नोऽभक्ष्याच्छादने विकारेऽवयवे च नित्यं मयट् । वाङ्मयम् ॥ **दोरप्राणिनः** ॥ ६ । २ । ४९ ॥ अभक्ष्याच्छादने विकारेऽवयवे च मयट् । आम्रमयम् । अप्राणिन इति किम् ? । शौवाविधम् । श्वाविन्मयम् ॥ **गोः पुरीषे** ॥ ६ । २ । ५० ॥ नित्यं मयट् । गोमयम् । पयस्तु गव्यम् । पुरीषे नियमार्थं वचनम् ॥ **व्रीहेः पुरोडाशे** ६ । २ । ५१ ॥ विकारे नित्यं मयट् । व्रीहिमयः पुरोडाशः । पुरोडाश इति किम् ? । व्रैह ओदनः । व्रैहं भस्म ॥ **तिलयवादनाम्नि** ॥ ६ । २ । ५२ ॥ विकारेऽवयवे च मयट् । तिलमयम् । यवमयम् । अनाम्नीति किम् ? । तैलम् । यावः ॥ **पिष्टात्** ६ । २ । ५३ ॥ विकारेऽनाम्नि मयट् । पिष्टमयम् ॥ **नाम्नि कः** ६ । २ । ५४ ॥ पिष्टाद्विकारे । पिष्टिका ॥ **ह्योगोदोहादीनञ् हियङ्गुश्चास्य** ॥ ६ । २ । ५५ ॥ विकारे नाम्नि । हैयङ्गवीनं नवनीतं घृतं वा । नाम्नीत्येव । ह्यौगोदोहं तक्रम् ॥ **अपो यञ् वा** ॥ ६ । २ । ५६ ॥ विकारे । आप्यम् । अम्मयम् ॥ **लुब्बहुलं पुष्पमूले** ॥ ६ । २ । ५७ ॥ विकारावयवार्थस्य प्रत्ययस्य ॥ **ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः** २ । ४ । ८५ लुक् । सप्तकुमारः । पञ्चेन्द्रः । पञ्चयुवा । द्विपङ्गुः । गौणस्येति किम् ? । अवन्ती । अक्विप इति किम् ! । पञ्चकुमारी । अगोणीसूच्योरिति किम् ? । पञ्चगोणिः । दशसूचिः ॥ अनेन स्त्रीप्रत्ययनिवृत्तौ “ हरीतक्यादिप्रकृतिर्न लिङ्गमतिवर्त्तते ” इति लुबन्तस्य स्त्रीत्वात् पुनः स्त्रीप्रत्ययः । मल्लिका पुष्पम् । विदारी मूलम् । क्वचिन्न । वारणानि पुष्पाणि । ऐरण्डानि मूलानि । क्वचिद्विकल्पः । शिरीषाणि शैरीषाणि पुष्पाणि । ह्रीवेराणि ह्रैवेराणि मूलानि । क्वचिदन्यत्रापि । आमलकी वृक्षः ॥ **फले** ॥ ६ । २ । ५८ ॥ विकारेऽवयवे चार्थे प्रत्ययस्य लुप् । आमलकम् ॥ **प्लक्षादेरण्** ॥ ६ । २ । ५९ ॥ विकारेऽवयवे वा फले । विधानसामर्थ्याच्चास्य न लुप् । प्लाक्षम् । आश्वत्थम् ॥

न्यग्रोधस्य केवलस्य ॥ ७ । ४ । ७ ॥ यो यस्तत्सम्बन्धिनः स्वरेष्वादेः स्वरस्य वृद्धिप्राप्तौ तस्मादेव यः प्रागैत् ञ्णिति तद्धिते । नैयग्रोधम् । केवलस्येति किम् ? न्याग्रोधमूलाः शालयः ॥ **जम्ब्वा वा** ॥ ६ । २ । ६० ॥ विकारेऽवयवयोः वा फलेऽ । जाम्बवम् । जम्बु । जम्बूः । लुपि स्त्रीनपुंसकते ॥ **न द्विरद्रुवयगोमयफलात्** ॥ ६ । २ । ६१ । विकाराऽवयवोः प्रत्ययः । कापोतस्य विकाराऽवयवो वेति न मयट् । अद्रुवयेत्यादि किम् ? । द्रौवयं खण्डम् । गौमयं भस्म । कापित्थोरसः ॥ **पितृमातुर्व्यडुलं भ्रातरि** ॥ ६ । २ । ६ ॥ यथासंख्यम् । पितृव्यः । मातुलः ॥ **पित्रोर्डामहट्** ॥ ६ । २ । ६ ॥ पितृमातुः । पितामहः । पितामही । मातामहः । मातामही ॥ **अवेर्दुग्धे सोढदूसमरीसम्** ॥ ६ । २ । ६४ ॥ अविसोढम् । अविदूसम् । अविमरीसम् ॥ **राष्ट्रेऽनङ्गादिभ्यः** ॥ ६ । २ । ६५ ॥ षष्ठ्यन्तेभ्योऽण् । शैबम् । अङ्गादिवर्जनं किम् ? । अङ्गानां वङ्गानां वा राष्ट्रमिति वाक्यमेव । केचित्तु अङ्गादिप्रतिषेधं नेच्छन्ति ॥ **राजन्यादिभ्योऽकञ्** ॥ ६ । २ । ६६ ॥ राष्ट्रे । राजन्यकम् । दैवयातवकम् ॥ **वसातेर्वा** ॥ ६ । २ । ६७ ॥ राष्ट्रेऽकञ् । वासातकम् । वासातम् ॥ **भौरिक्यैषुकार्यादेर्विधभक्तम्** ॥ ६ । २ । ६८ ॥ राष्ट्रे यथासङ्ख्यम् । भौरिकिविधम् । भौलिकिविधम् । एषुकारिभक्तम् । सारसायनभक्तम् ॥ **निवासादूरभवे इति देशे नाम्नि** ॥ ६ । २ । ६९ ॥ षष्ठ्यन्ताद्यथाविहितं प्रत्ययः । इतिकरणो विवक्षार्थः । तेनानुवृत्ते व्यवहारमनुपतिते नाम्नि विज्ञेयं न सङ्गीते । आर्जुनावः । शैबम् । वैदिशं पुरम् ॥ **तदत्रास्ति** ॥ ६ । २ । ७० ॥ तदिति प्रथमान्तादत्रेति सप्तम्यर्थे यथाविहितं प्रत्ययः । प्रथमान्तं चेदस्तीति प्रत्ययान्तश्चेद्देशनाम । अत्रापीति करणोऽनुवर्तते । तेन प्रसिद्धे नाम्नि भूमादौ चार्थे भवति । अत एव चोभयप्राप्तौ परोऽपि मत्वर्थीयोऽनेन बाध्यते । औदुम्बरं नगरम् ॥ **तेन निर्वृत्ते च** ॥ ६ । २ । ७१ ॥ तेनेति तृतीयान्तान्निर्वृत्तेऽर्थे देशे नाम्नि यथाविहितं प्रत्ययः । कौशाम्बी नगरी । चकारश्चतुर्णां योगानामुत्तरत्रानुवृत्त्यर्थः ॥ **नद्यां मतुः** ॥ ६ । २ । ७२ ॥

निवासाद्यर्थचतुष्के यथायोगं देशनाम्नि ॥ **नाम्नि** ॥ २ । १ । ८५ ॥ मतोर्मो वः ॥ **अनजिरादिबहुस्वरशरादीनां मतौ** ॥ २ । २ । ७८ ॥ नाम्नि दीर्घः । उदुम्बरावती । शरावती । अहीवती । मुनीवती । अनजिरादीति किम् ? । अजिरवती । हिरण्यवती ॥ **मध्वादेः** ॥ ६ । २ । ७३ ॥ चातुरर्थिको मतुर्देशनाम्नि ॥ मधुमान् । विसवान् ॥ **नडकुमुदवेतसमहिषाड्डित्** ॥ ६ । २ । ७४ ॥ मतुश्चातुरर्थिको देशे नाम्नि । नड्वान् । कुमुद्वान् **नस्तं मत्वर्थे** ॥ १ । १ । २३ ॥ ॥ नाम यदम् वेतस्वान् । महिष्मान् ॥ **नडशादाड्वलः** ॥ ६ । २ । ७५ ॥ चातुरर्थिको देशनाम्नि डित् । नड्वलम् । शाड्वलम् ॥ **शिखायाः** ॥ ६ । २ । ७६ ॥ चातुरर्थिको वलः देशे नाम्नि । शिखावलं नगरम् ॥ **शिरीषादिककणौ** ६ । २ । ७७ चातुरर्थिकौ देशे नाम्नि । शिरीषिकः । शैरीषिकः ॥ **शर्कराया इकणीयाण् च** ॥ ६ । २ । ७८ ॥ चातुरर्थिक इककण देशे नाम्नि । शार्करिकः । शर्करीयः । शार्करः । शर्करिकः । शार्करकः ॥ **रोऽश्मादेः** ॥ ६ । २ । ७९ ॥ चातुरर्थिको देशे नाम्नि । अश्मरः । यूषरः ॥ **प्रेक्षादेरिन्** ॥ ६ । २ । ८० ॥ चातुरर्थिको देशे नाम्नि ॥ प्रेक्षी । फलकी ॥ **तृणादेः सल्** ॥ ६ । २ । ८१ ॥ चातुरर्थिको देशे नाम्नि । तृणसा नदसा ॥ **काशादेरिलः** ॥ ६ । २ । ८२ ॥ चातुरर्थिको देशे नाम्नि । काशिलम् । वाशिलम् ॥ **अरीहणादेरकण्** ॥ ६ । २ । ८३ ॥ चातुरर्थिको देशे नाम्नि । आरीहणकम् । खाण्डवकम् ॥ **सुपन्थ्यादेर्ञ्यः** ॥ ६ । २ । ८४ ॥ चातुरर्थिको देशे नाम्नि सौपन्थ्यम् । सौवन्थ्यम् । अत एव निपातनात्सुपाथन्शब्दस्य नागमः पस्य च वा वकारः ॥ **सुतंगमादेरिञ्** ॥ ६ । २ । ८५ ॥ चातुरर्थिको देशे नाम्नि । सौतंगमिः । मौनिचित्तिः ॥ **बलादेर्यः** ॥ ६ । २ । ८६ ॥ चातुरर्थिको देशे नाम्नि । बल्यम् । पुल्यम् ॥ **अह्रादिभ्योऽञ्** ॥ ६ । २ । ८७ ॥ चातुरर्थिको देशे नाम्नि । आह्नम् । लौमम् कालेकणोऽपवादः ॥ **सख्यादेरेयण्** ॥ ६ । २ । ८८ ॥ चातुरर्थिको देशे नाम्नि । साखेयः । साखिदत्तेयः ॥ **पन्थ्यादेरायनण्** ॥ ६ । २ । ८९ ॥ चातुरर्थिको

देशे नाम्नि । पान्थायनः । निपातनान्नागमः । पाशायनः ॥ **कर्णादेरायनिञ्** ॥ ६ । २ । ९० ॥ चातुरर्थिको देशे नाम्नि । कार्णायनिः । वासिष्ठायनिः ॥ **उत्करादेरीयः** ॥ ६ । २ । ९१ ॥ चातुरर्थिको देशे नाम्नि ॥ उत्करीयः । सङ्करीयः ॥ **नडादेः कीयः** ॥ ६ । २ । ९२ ॥ चातुरर्थिको देशे नाम्नि । नडकीयः । प्लक्षकीयः । बिल्वकीया नाम नदी । **बिल्वकीयादेरीयस्य** ॥ २ । ४ । ९३ ॥ तद्धितयस्वरे लुक् बैल्वकाः । एवं वैणुकाः बिल्वकीयादेरिति किम् ? । नाडकीयः ॥ **कृशाश्वादेरीयण्** ॥ ६ । २ । ९३ । चातुरर्थिको देशे नाम्नि । कार्शाश्वीयः । आरिष्टीयः ॥ **ऋश्यादेः कः** ॥ ६ । २ । ९४ ॥ चातुरर्थिको देशे नाम्नि । ऋश्यकः । न्यग्रोधकः ॥ **वराहादेः कण्** ॥ ६ । २ । ९५ ॥ चातुरर्थिको देशे नाम्नि । वाराहकः । पालाशकः ॥ **कुमुदादेरिकः** ॥ ६ । २ । ९६ ॥ चातुरर्थिको देशे नाम्नि । कुमुदिकम् । इक्कटिकम् ॥ **अश्वत्थादेरिकण्** ॥ ६ । २ । ९७ ॥ चातुरर्थिको देशे नाम्नि । आश्वत्थिकम् । कौमुदिकम् **सास्य पौर्णमासी** ॥ ६ । २ । ९८ ॥ सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं नाम्नि प्रत्ययः प्रथमान्तं चेत्पौर्णमासी । पौषो मासोऽर्धमासो वा । माघः । नाम्नीति किम् ? । पौषी पौर्णमासी अस्य पञ्चरात्रस्येति वाक्यमेव ॥ **आग्रहायण्यश्वत्थादिकण्** ॥ ६ । २ । ९९ ॥ प्रथमान्तात् षष्ठ्यर्थे तच्चेत् पौर्णमासी नाम्नि । आग्रहायणिको मासोऽर्धमासो वा । आश्वत्थिकः । अन्ये तु अश्वत्थशब्दमप्रत्ययान्तं पौर्णमास्यामपि पुंलिङ्गमिच्छन्ति ॥ **चैत्रीकार्त्तिकीफाल्गुनीश्रवणाद्वा** ॥ ६ । २ । १०० ॥ सास्य पौर्णमासीत्यस्मिन् विषये नाम्निकण् ॥ चैत्रीकः चैत्रो मासोऽर्धमासो वा । एवं कार्त्तिकिकः । कार्त्तिकः । फाल्गुनिकः । फाल्गुनः श्रावणिकः श्रावणः ॥ **देवता** ६ । २ । १०१ ॥ देवतार्थात्प्रथमान्तात् षष्ठ्यर्थे यथाविहितं प्रत्ययः । जैनः । आग्नेयः । आदित्यः ॥ **देवतानामात्वादौ** ॥ ७ । ४ । २८ ॥ पूर्वोत्तरपदयोः स्वरेष्वादेर्वृद्धिर्ञ्णिति तद्धिते । आग्नावैष्णवं सूक्तम् । आत्वादाविति किम् । । ब्राह्मप्राजापत्यम् ॥ **आतो नेन्द्रवरुणस्य** ॥ ७ । ४ । २९ ॥ पूर्वपदात्प-

रस्योत्तरपदस्य स्वरेष्वादेर्वृद्धिः । आग्नेन्द्रं सूक्तम् । ऐन्द्रावरुणम् । आत इति किम् ? । आग्निवारुणम् ॥ पैङ्गाक्षीपुत्रादेरीयः ॥ ६ । २ । १०२ ॥ सास्य देवतेति विषये । पैङ्गाक्षीपुत्रीयम् । तार्णविन्दवीयं हविः ॥ शुक्रादियः ॥ ६ । २ । १०३ ॥ सास्य देवतेति विषये । शुक्रियं हविः ॥ शतरुद्रात्तौ ॥ ६ । २ । १०४ ॥ सास्य देवतेति विषये । शतरुद्रीयम् । शतरुद्रियम् ॥ अपोनपादपान्नपातस्तृचातः ॥ ६ । २ । १०५ ॥ सास्य देवतेति विषये । ईय इयश्च । अपोनप्त्रीयम् । अपोनप्त्रियम् । अपान्नप्त्रीयम् अपान्नप्त्रियम् ॥ महेन्द्राद्वा ॥ ६ । २ । १०६ ॥ सास्यदेवतेति विषये तौ । महेन्द्रीयम् । महेन्द्रियम् । माहेन्द्रं हविः ॥ कसोमाट्ट्यण् ॥ ६ । २ । १०७ ॥ सास्य देवतेति विषये । कायं हविः । ण्विर्वर्णेयथ्यादालोपो न । सौम्यं हविः ॥ द्यावापृथिवीशुनासीराग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधादीययौ ॥ ६ । २ । १०८ ॥ सास्य देवतेति विषये । द्यावापृथिवीयम् । द्यावापृथिव्यम् । शुनासीरीयम् । शुनासीर्यम् । अग्नीषोमीयम् । अग्नीषोम्यम् । मरुत्वतीयम् मरुत्वत्यम् । वास्तोष्पतीयम् । वास्तोष्पत्यम् । गृहमेधीयम् । गृहमेध्यम् ॥ वाय्वृतुपित्रुषसो यः ॥ ६ । २ । १०९ ॥ सास्य देवतेति विषये । वायव्यम् । ऋतव्यम् । पित्र्यम् । उषस्यम् ॥ महाराजप्रोष्ठपदादिकण् ॥ ६ । २ । ११० ॥ सास्य देवतेति विषये । महाराजिकः । प्रौष्ठपदिकः ॥ कालाद्भववत् ॥ ६ । २ । १११ ॥ कालविशेषवाचिभ्यो यथा भवे प्रत्ययास्तथा सास्य देवतेति विषयेऽपि स्युः । यथा मासे भवं मासिकम् प्रावृषि प्रावृषेण्यम् । तथा मासप्रावृड्देवताकमपि ॥ आदेश्छन्दसः प्रगाथे ॥ ६ । २ । ११२ ॥ प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः । पाङ्क्तः प्रगाथः । आदेरिति किम् ? । अनुष्टुब् मध्यमस्य प्रगाथस्य ॥ योद्धृप्रयोजनाद्युद्धे ॥ ६ । २ । ११३ ॥ प्रथमान्तात्षष्ठ्यर्थे युद्धे यथाविहितं प्रत्ययः । वैद्याधरं युद्धम् । सौभद्रं युद्धम् ॥ भावघञोऽस्यां णः ॥ ६ । २ । ११४ ॥ प्रथमान्तात् । प्रापाता तिथिः । भावेति किम् ? । प्राकारोऽस्याम् ॥ श्यैनंपाता तैलंपाता ॥ ६ । २ । ११५ ॥ श्येनतिलयोः

भावघञन्ते पातशब्दे मोन्तो निपात्यते । श्यैनंपाता । तैलंपाता । तिथिः क्रिया भूमिः क्रीडा वा ॥ **प्रहरणात् क्रीडायां णः** ॥ ६ । २ । ११६ ॥ प्रथमान्तात्सप्तम्यर्थे । दाण्डा क्रीडा । क्रीडायामिति किम् ? । खड्गः प्रहरणमस्यां सेनायाम् ॥ **तद्वेत्त्यधीते** ॥ ६ । २ । ११७ द्वितीयान्ताद् यथाविहितं प्रत्ययः । मौहूर्त्तः नैमित्तः । केचित्तु मुहूर्त्तनिमित्तशब्दौ न्यायादौ पठन्ति । तन्मते मौहूर्त्तिकः । नैमित्तिकः । छान्दसः । वैयाकरणः । नैरुक्तः । घटं वेत्तीत्यादावनभिधानान्न । केचित्तु वेदनाध्ययनयोरेकविषयतायामेवेच्छन्ति । तन्मते अग्निष्टोमं यज्ञं वेत्तीत्यादावपि प्रत्ययो न ॥ **न्यायादेरिकण्** ॥ ६ । २ । ११८ ॥ वेत्त्यधीते वेत्यर्थे । नैयायिकः । नैयासिकः । ऐतिहासिकः ॥ **इकण्यथर्वणः** ॥ ७ । ४ । ४९ ॥ अन्त्यस्वरादेर्लुग्न । आथर्वणिकः ॥ **पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात्** ॥ ६ । २ । ११९ ॥ वेत्त्यधीते वेत्यर्थे इकण् । पौर्वपदिकः । मातृकल्पिकः । गौलक्षणिकः । आग्निष्टोमिकः । यावक्रीतिकः । वासवदत्तिकः ॥ **अकल्पात् सूत्रात्** ॥ ६ । २ १२० ॥ वेत्त्यधीते वेत्यर्थे इकण् । वार्त्तिसूत्रिकः । अकल्पादिति किम् ? । सौत्रः । काल्पसौत्रः ॥ **अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः** ॥ ६ । २ । १२१ ॥ वेत्त्यधीतेवेत्यर्थे इकण् । वायसविद्यिकः । अधर्मादेरिति किम् ! । वैद्यः । धार्मविद्यः । क्षात्रविद्यः । त्रैविद्यः । सांसर्गविद्यः । आङ्गविद्यः ॥ **याज्ञिकौक्थिकलौकायतिकम्** ॥ ६ । २ । १२२ ॥ एते वेत्त्यधीते वेत्यर्थे इकणन्ता निपात्यन्ते । याज्ञिकेति यज्ञशब्दाद्याज्ञिकाशब्दाच्चेकणि निपात्यते । याज्ञिकः । औक्थिकः । लौकायतिकः । लौकायतिका इति तु न्यायादिपाठात् ॥ **अनुब्राह्मणादिन्** ॥ ६ । २ १२३ ॥ वेत्त्यधीते वेत्यर्थे अनुब्राह्मणी । मत्वर्थीयेनैवेना सिद्धेऽनभिधानान्चेकस्याप्रवृत्तावण्बाधनार्थमिदम् ॥ **शतषष्टेः पथ इकट्** ॥ ६ । २ । १२४ ॥ वेत्त्यधीते वेत्यर्थे । शतपथिकः । शतपथिकी । षष्टिपथिकः । षष्टिपथिकी ॥ **पदोत्तरपदेभ्य इकः** ॥ ६ । २ । १२५ ॥ वेत्त्यधीते वेत्यर्थे । पूर्वपदिकः । पदिकः । पदोत्तरपदिकः ॥ **पदक्रमशिक्षामीमांसासाम्नोऽकः** ॥ ६ । २ । १२६ ॥ वेत्त्यधीते वेत्यर्थे । पदकः

। क्रमकः । शिक्षकः । मीमांसकः । सामकः ॥ **ससर्वपूर्वाल्लुप्** ॥ ६ । २ । १२७ ॥ वेत्त्यधीते वेत्यर्थे प्रत्ययस्य । सत्रान्तिकः । सर्ववेदः ॥ **संख्याकात् सूत्रे** ॥ ६ । २ । १२८ ॥ वेत्त्यधीते वेत्यर्थे प्रत्ययस्य लुप् । अष्टकाः पाणिनीयाः । दशका उमास्वातीयाः । द्वादशका आर्हताः । संख्याग्रहणं किम् ! । माहावार्तिकाः । कादिति किम् ?। चातुष्टयाः ॥ **प्रोक्तात्** ॥ ६ । २ । १२९ ॥ प्रोक्तार्थप्रत्ययान्ताद् वेत्त्यधीते वेत्यर्थे प्रत्ययस्य लुप् । गोतमेन प्रोक्तं गौतमम् । तद्वेत्त्यधीते वा गौतमः । सुधर्मेण सुधर्मणा वा प्रोक्तं सौधर्मं सौधर्मणं वा । तद्वेत्त्यधीते वा । सौधर्मः । सौधर्मणः । एवं भाद्रबाहवः । स्त्रियां विशेषः । गौतमा स्त्रीत्यादि ॥ **वेदेनब्राह्मणमत्रैव** ॥ ६ । २ । १३० ॥ प्रोक्तप्रत्ययान्तं प्रयुज्यते । कठेन प्रोक्तं वेदं विदन्त्यधीयते वा कठाः । ताण्ड्येन प्रोक्तं ब्राह्मणं विदन्त्यधीयते वा ताण्डिनः । ब्राह्मणेऽसिन्नन्तस्य नियमनिवृत्त्यर्थमिन्ब्राह्मणग्रहणम् । उभयावधारणार्थमेवकारः । प्रोक्तप्रत्ययान्तस्यात्रैव वृत्तिर्नान्यत्र तथात्र वृत्तिरेव न केवलस्यावस्थानम् । अन्यत्रत्वनियमात् क्वचित् स्वातन्त्र्यम् । अर्हता प्रोक्तमार्हतं शास्त्रम् । क्वचिदुपाध्यन्तरयोगः । आर्हतं महत्सुविहितम् । क्वचिद्वाक्यम् । आर्हतमधीते । क्वचिद्वृत्तिः । आर्हत इति । इह पुनर्नियमाद्युगपदेव विग्रहः । कठेन प्रोक्तमधीयते कठा इति ॥ **तेनच्छन्ने रथे** ॥ ६ । २ । १३१ ॥ तृतीयान्ताद्यथाविहितं प्रत्ययः । वास्त्रो रथः । काम्बलः । द्वैपः । वैयाघ्रः कौमारः पतिरिति तु भवार्थकेऽणि बोध्यम् । धवयोगे तु कौमारी भार्येत्यपि ॥ **पाण्डुकम्बलादिन्** ६ । २ । १३२ ॥ टान्ताच्छन्ने रथे । पाण्डुकम्बली रथः ॥ **दृष्टे साम्नि नाम्नि** ॥ ६ । २ । १३३ ॥ टान्ताद्यथाविहितं प्रत्ययः । क्रौञ्चं साम । वाशिष्ठम् । कालेयम् ॥ **गोत्रादङ्कवत्**॥ ६ । २ । १३४ ॥ टान्ताद् दृष्टे साम्नि प्रत्ययः । औपगवकं साम ॥ **वामदेवाद्यः** ॥ ६ । २ । १३५ ॥ टान्ताद् दृष्टे साम्नि । वामदेव्यं साम ॥ **ङिद्वाऽण्** ॥ ६ । २ । १३६ ॥ दृष्टे साम्नि । औशनम् । औशनसम् ॥ **तत्रोद्धृते पात्रेभ्यः** ॥ ६ । २ । १३८ ॥ तत्रेति सप्तम्यन्तात् पात्रार्थादुद्धृते यथाविहितं प्रत्ययः । शाराव ओदनः ।

बहुवचनं पात्रविशेषपरिग्रहार्थम् ॥ स्थण्डिलाच्छेते व्रती ॥ ६ । २ । १३९ ॥ सप्तम्यन्ताद् यथाविहितं प्रत्ययः । स्थाण्डिलो भिक्षुः ॥ संस्कृते भक्ष्ये ॥ ६ । २ । १४० ॥ सप्तम्यन्ताद् यथाविहितं प्रत्ययः । भ्राष्ट्रा अपूपाः ॥ शूलोखाद्यः ॥ ६ । २ । १४१ ॥ सप्तम्यन्ताद् संस्कृते भक्ष्ये । शूल्यम् । उख्यं मांसम् ॥ क्षीरादेयण् ॥ ॥ ६ । २ । १४२ ॥ सप्तम्यन्तात्संस्कृते भक्ष्ये । क्षैरेयी यवागूः ॥ दध्न इकण् ॥ ६ । २ । १४३ ॥ सप्तम्यन्तात् संस्कृते भक्ष्ये । दाधिकम् ॥ चोदश्वितः ॥ ६ । २ । १४४ ॥ सप्तम्यन्तात्संस्कृते भक्ष्ये इकण् । उदकेन श्वयति उदश्वित् तक्रम् । तत्र संस्कृतं भक्ष्यमौदश्वित्कम् औदश्वितम् ॥ क्वचित् ॥ ६ । २ । १४५ ॥ अपत्यादिभ्योऽन्यत्राप्यर्थे यथाविहितं प्रत्ययः । चाक्षुषं रूपम् । आश्वोरथः । साम्पतम् । साम्प्रतः ॥ इतिरक्ताद्यर्थकाः ॥

॥ शेषे ॥ ६ । ३ । १ ॥ अधिकारोऽयम् । अपत्यादिभ्योऽन्यस्मिन् प्राग्जितीयेऽर्थे इतोऽनुक्रम्यमाणं वेदितव्यम् । इदंविशेषेष्वपत्यसमूहादिष्वेयणाद्यभावार्थं प्राग्जितात् कृतादिषु सर्वेष्वर्थेषु प्रत्यया यथा स्युरित्येवमर्थं च शेषवचनम् ॥ नद्यादेरेयण् ॥ ६ । ३ । २ । प्राग्जितीये शेषेऽर्थे । नादेयः । वानेयः । शेष इति किम् ।। समूहे नादिकम् ॥ राष्ट्रादियः ॥ ६ । ३ । ३ ॥ प्राग्जितीये शेषेऽर्थे । राष्ट्रियः ॥ दूरादित्यः ॥ ६ । ३ । ४ ॥ शेषेऽर्थे । दूरेत्यः ॥ उत्तरादाहञ् ॥ ६ । ३ । ५ ॥ शेषे ॥ औत्तराहः ॥ पारावारादीनः ॥ ६ । ३ । ६ ॥ शेषे ॥ पारावारीणः ॥ व्यस्तव्यत्यस्तात् ॥ ६ । ३ । ७ ॥ पारावाराच्छेषे ईनः ॥ पारीणः । अवारीणः । अवारपारीणः ॥ द्युप्रागपागुदक्प्रतीचो यः ॥ ६ । ३ । ८ ॥ अव्ययानव्ययाच्छेषेऽर्थे । दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम् । कालवृत्तेस्तु प्राचिकं प्राक्तनम् ॥ ग्रामादीनञ् च ॥ ६ । ३ । ८ ॥ शेषे यः । ग्रामीणः । ग्राम्यः । नकारः पुंवद्भावप्रतिषेधार्थः । ग्रामीणाभार्यः ॥ कत्र्यादेश्चैयकञ् ॥ ६ । ३ । १० ॥ ग्रामाच्छेषे । कात्रेयकः । पौष्करेयकः । ग्रामेयकः ॥ कुण्ड्यादिभ्यो यलुक् च ॥ ६ । ३ । ११ ॥ शेषे एयकञ् । कौण्डेयकः । कौणेयकः ।

बहुवचनं प्रयोगानुसरणार्थम् ॥ **कुलकुक्षिग्रीवाच्छ्वाऽस्यलङ्कारे** ॥ ६ । ३ । १२ ॥ शेषे यथासंख्यमेयकञ् । अणोऽपवादः । कौलेयकः श्वा । कौक्षेयकोऽसिः । ग्रैवेयकोऽलङ्कारः ॥ **दक्षिणापश्चात्पुरसस्त्यण्** ॥ ६ । ३ । १३ ॥ शेषे । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः । साहचर्याद्दक्षिणा इति दिक्शब्दोऽव्ययं वा गृह्यते । तेनेह न दाक्षिणानि जुहोति । अव्ययादेवेच्छन्त्येके ॥ **वल्ह्युद्दिपर्दिकापिश्याष्टायनण्** ॥ ६ । ३ । १४ ॥ शेषे । वाल्हायनः । औद्दायिनः । पार्दायनः । कापिशायनी द्राक्षा ॥ **रङ्कोः प्राणिनि वा** ॥ ६ । ३ । १५ ॥ शेषे । ष्टायनण् । राङ्कवायणः । राङ्कवो गौः । कम्बलस्तु राङ्कवः । मनुष्ये तु कच्छादिपाठादकञ् राङ्कवको मनुष्यः ॥ **क्वेहामात्रतसस्त्यच्** ॥ ६ । ३ । १६ ॥ शेषे । क्वत्यः । इहत्यः अमात्यः । तत्रत्यः । कुतस्त्यः । चकारस्त्यण्त्यचोः सामान्यग्रहणाविघातार्थः ॥ **नेर्ध्रुवे** ॥ ६ । ३ । १७ ॥ त्यच् । नित्यं ध्रुवम् ॥ **निसो गते** ॥ ६ । ३ । १८ ॥ शेषे त्यच् ॥ **ह्रस्वान्नाम्नस्ति** ॥ २ । ३ । ३४ ॥ विहिते प्रत्यये नामिनः परस्य सः ष् । निष्ट्यश्चाण्डालः । बहिरङ्गत्वेन प्लुतस्यासिद्धत्वादिहापि स्यात् । सर्पि ३ ष्ट्र । नामिन इत्येव । तेजस्ता । नाम्न इति किम् ? । भिन्द्युस्तराम् । विहितविशेषणं किम् ? । सर्पिस्तत्र ॥ **ऐषमोह्यःश्वसो वा** ॥ ६ । ३ । १९ ॥ शेषे त्यच् । ऐषमस्त्यम् । ऐषमस्तनम् । ह्यस्त्यम् ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । श्वसस्तादिरितीकणपि । शौवस्तिकम् ॥ **कन्थाया इकण्** ॥ ६ । ३ । २० ॥ शेषे । कान्थिकः ॥ **वर्णावकञ्** ॥ ६ । ३ । २१ ॥ कन्थायाः शेषे । कान्थकः ॥ **रूप्योत्तरपदारण्याण्णः** ॥ ६ । ३ । २२ ॥ शेषे । वार्करूप्यः । आरण्याः सुमनसः । माणिरूप्यक इत्यत्र तु परत्वात्कदेव ॥ **दिक्पूर्वपदादनाम्नः** ॥ ६ । ३ । २३ ॥ शेषे णः ॥ पौर्वशालः । अनाम्न इति किम् ? । पूर्वेषुकामशमः ॥ **मद्रादञ्** ॥ ६ । ३ । २४ ॥ दिक्पूर्वपदाच्छेषे । पौर्वमद्री । बहुविषयेभ्य इत्यकञ्प्राप्तस्तदपवादे वृजिमद्राद्देशादिति के प्राप्ते अञ्वचनम् । केवलादेव मद्रादकञ्कविधिरिति चेत् तर्हि इदमेव ज्ञापकं सुसर्वार्धदिक्श-

भ्देभ्यो जनपदस्येति तदन्तविधेः । तेन सुपाञ्चालक इत्यादि सिद्धम् ॥ उदग्ग्रामाद्यकृल्लोम्नः ॥ ६ । ३ । २५
शेषेऽञ् । याकृल्लोमः । उदग्ग्रामादिति किम् ? । अन्यस्मादण् । याकृल्लोमनः ॥ गोष्ठीतैकीनैकेतीगोमती-
शूरसेनवाहीकरोमकपटच्चरात् ॥ ६ । ३ । २६ ॥ शेषेऽञ् । गौष्ठः । तैकः । नैकेतः । गौमतः । शौरसेनः ।
वाहीकः । रौमकः । पाटच्चरः ॥ शाकलादेर्यञः ॥ ६ । ३ । २७ ॥ शेषेऽञ् । शाकलाः । काण्ठाः । यञ इति
किम् ? । शाकलीयम् ॥ वृद्धेञः ॥ ६ । ३ । २८ ॥ शेषेऽञ् । दाक्षाः । वृद्धेति किम् ? । सौतङ्गमीयः ॥ न द्वि-
स्वरात्प्राग्भरतात् ॥ ६ । ३ । २९ ॥ वृद्धेञन्तादञ् । चैङ्कीयाः । काशीयाः । द्विस्वरादिति किम् ? । पाञ्चागा-
राः । प्राग्ग्रहणे भरतानामग्रहणात्स्वशब्देन ग्रहणम् ॥ भवतोरिकणीयसौ ॥ ६ । ३ । ३० ॥ शेषे । भावत्कम् ।
भवदीयम् । उकारान्तग्रहणाच्छत्रन्तान्न । भावतम् ॥ परजनराज्ञोऽकीयः ॥ ६ । ३ । ३१ ॥ शेषे । परकीयः ।
जनकीयः । राजकीयः । अकारः पुंवद्भावार्थः । ये तु स्वदेवशब्दाभ्यामकीयमिच्छन्ति तेषां सौवं दैवमायुरित्यादि
न सिध्यति । स्वकीयं देवकीयमिति तु स्वकदेवकयोर्गहादित्वात् सिद्धम् ॥ संज्ञा दुर्वा ॥ ६ । १ । ९ ॥ या संज्ञा
संव्यवहाराय हठान्नियुज्यते सा दुसंज्ञा वा ॥ त्यदादिः ॥ ६ । १ । ३ ॥ दुः ॥ प्राग्देशे ॥ ६ । १ । १० ॥ प्राग्दे-
शार्थस्य यस्य स्वराणामादिरेदौद्धा स इयादौ विधेये दुः । देश एवेतिनियमनिवृत्त्यर्थं वचनम् ॥ दोरीयः ॥ ६ । ३ ।
३२ ॥ शेषे । देवदत्तीयः । तदीयः । शालीयः । मालीयः । एणीपचनीयः । गोनर्दीयः । दोरिति किम् ? । साभा-
सन्नयनः ॥ उष्णादिभ्यः कालात् ॥ ६ । ३ । ३३ ॥ शेषे ईयः । उष्णकालीयः । बहुवचनं प्रयोगानुसरणार्थम् ॥
व्यादिभ्यो णिकेकणौ ॥ ६ । ३ । ३४ ॥ कालाच्छेषे । उभयोः स्त्रियां विशेषः । वैकालिका । वैकालिकी । आ-
नुकालिका । आनुकालिकी ॥ काश्यादेः ॥ ६ । ३ । ३५ ॥ दोः शेषे णिकेकणौ । काशिका । काशिकी । चैदि-
का । चैदिकी ॥ दोरित्येव देवदत्तं नामवाहीकग्रामस्तत्र जातो दैवदत्तः । प्राग्ग्रामेषु तु दुसंज्ञकत्वेन काश्यादित्वाद्भव-

स्यैव । दैवदत्तिका । दैवदत्तिकी ॥ **वाहीकेषु ग्रामात्** ॥ ६ । ३ । ३६ ॥ दोः शेषे णिकेकणौ ॥ कारन्तपिका । कारन्तपिकी ॥ **एदोद्देश एवेयादौ** ॥ ६ । १ । ८ ॥ देशार्थस्यैव यस्य स्वराणामादिरेदोच्च स ईयादौ विधातव्ये दुः । सैपुरिकः । स्कौनगरिका । स्कौनगरिकी ॥ **वोशीनरेषु** ॥ ६ । ३ । ३७ ॥ ग्रामार्थाद्दोः शेषे णिकेकणौ । आह्वजालिका । आह्वजालिकी । आह्वजालीयः ॥ **वृजिमद्राद्देशात्कः** ॥ ६ । ३ । ३८ ॥ शेषे । राष्ट्राकञोऽपवादः । वृजिकः । मद्रकः । सुमद्रकः । इत्यादि ॥ **उवर्णादिकण्** ॥ ६ । ३ । ३९ ॥ देशवाचिनः शेषे । अणोऽपवादः । परत्वादीयणिकेकणोऽपि बाधते । शाबरजम्बुकः ॥ **दोरेव प्राचः** ॥ ६ । ३ । ४० ॥ उवर्णान्तादिकण् । आषाढजम्बुकः । पूर्वेणैव सिद्धे नियमार्थं वचनम् । तेनेह न । माल्लवास्तवः । एवकार इष्टावधारणार्थः । दोः प्राच एवेति नियमो मा भूत् ॥ **ईतोऽकञ्** ॥ ६ । ३ । ४१ ॥ प्राग्देशवाचिनो दोः शेषे । काकन्दकः ॥ **रोपान्त्यात्** ॥ ६ । ३ । ४२ ॥ प्राचो दोः शेषेऽकञ् । पाटलिपुत्रकः ॥ **प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात्** ॥ ६ । ३ ।४३॥ देशवृत्तेर्दोः शेषेऽकञ् । धन्वन् शब्दो मरुदेशवाची । मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । सांकाश्यकः । पारेधन्वकः । अपारेधन्वकः ॥ **राष्ट्रेभ्यः** ॥ ६ । ३ । ४४ ॥ दुभ्यः शेषेऽकञ् । आभिसारकः । आदर्शकः । बहुवचनमकञः प्रकृतिबहुत्वं द्योतयदपवादविषयेऽपि प्रापणार्थम् । तेनेहापि भवति । अभिसारगर्त्तकः ॥ **बहुविषयेभ्य** ॥ ६ । ३ । ४५ ॥ राष्ट्रेभ्यः शेषेऽकञ् । आङ्गकः । विषयग्रहणमनन्यत्र भावार्थम् । तेन य एकत्वद्वित्वयोरपि वर्त्तते ततो माभूत् । वार्त्तनः ॥ **सुसर्वार्धाद्राष्ट्रस्य** ॥ ७ । ४ । १५ ॥ उत्तरपदस्य ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः ॥ **अमद्रस्य दिशः** ॥ ७ । ४ । १६ ॥ राष्ट्रस्य ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः । पूर्वपाञ्चालकः । अपरपाञ्चालकः ॥ **धूमादेः** ॥ ६ । ३ । ४६ ॥ देशवृत्तेः शेषेऽकञ् ॥ धौमकः । पाडण्डकः । **सौवीरेषु कूलात्** ॥ ६ । ३ । ४७ ॥ शेषेऽकञ् । कौलकः सौ-

चीरेषु । कौलोऽन्यत्र ॥ **समुद्रान्नृनावोः** ॥ ६ । ३ । ४८ ॥ देशार्थाच्छेषेऽकञ् । सामुद्रको ना । सामुद्रिका नौः । । सामुद्रमन्यत् ॥ **नगरात्कुत्सादाक्ष्ये** ॥ ६ । ३ । ४९ ॥ देशार्थाच्छेषेऽकञ् । चौरा हि नागरकाः । दक्षा हि नागरकाः । नागरोऽन्यः । संज्ञाशब्दात्तु कत्र्यादिपाठादेयकञ् । नागरेयकः । **कच्छाग्निवक्त्रवर्त्तोत्तरपदात्** ॥ ६ । ३ । ५० ॥ देशार्थाच्छेषेऽकञ् । भारुकच्छकः । काण्डाग्नकः । ऐन्दुवक्त्रकः । बाहुवर्त्तकः । उत्तरपदग्रहणमबहुप्रत्ययपूर्वार्थम् ॥ **अरण्यात्पथिन्यायाध्यायेभनरविहारे** ॥ ६ । ३ । ५१ ॥ देशार्थाच्छेषेऽकञ् । आरण्यकः । पन्था न्यायोऽध्याय इभो विहारो वा ॥ **गोमये वा** ॥ ६ । ३ । ५२ ॥ अरण्याद्देशार्थाच्छेषेऽकञ् । आरण्यका गोमयाः । आरण्या वा । केचित्तु हस्तिन्यामपि विकल्पमिच्छन्ति । एके तु नरवर्जं पूर्वसूत्रेऽपि विकल्पमाहुः ॥ **कुरुयुगन्धराद्वा**॥६ । ३ ।५३॥ देशार्थाच्छेषेऽकञ्। कौरवकः।कौरवः । यौगन्धरकः । यौगन्धरः ॥ **साल्वाद्गोयवाग्वपत्तौ** ॥ ६ । ३ । ५४ ॥ देशार्थान्मनुष्ये शेषेऽकञ् । साल्वको गौः । साल्विका यवागूः । साल्वको ना । गोयवागूग्रहणं प्रतिप्रसवार्थम् । नरि नियमार्थमपत्तिग्रहणम् ॥ **कच्छादेर्नृनृस्थे** ॥ ६ । ३ । ५५ ॥ देशार्थाच्छेषेऽकञ् । काच्छको ना काच्छकमस्य स्मितम् । सैन्धवकः ॥ **कोपान्त्याच्चाण्** ॥ ६ । ३ । ५६ ॥ कच्छादेर्देशार्थाच्छेषे । आर्षिकः । । काच्छः । सैन्धवः ॥ **गर्त्तोत्तरपदादीयः** ॥ ६ । ३ । ५७ ॥ देशार्थाच्छेषे । श्वाविद्गर्त्तीयः ॥ **कटपूर्वात्प्राचः** ॥ ६ । ३ । ५८ ॥ देशार्थाच्छेषे ईयः । कटग्रामीयः ॥ **कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदाद्दोः** ॥ ६ । ३ । ५९ ॥ देशार्थाच्छेषे इयः । आरोहणकीयः । कौटशिखीयः । दाक्षिकन्थीयः । दाक्षिपलदीयः । दाक्षिनगरीयः । माहकिग्रामीयः । दाक्षिह्रदीयः । दोरिति किम् ? । आर्षिकः । माडनगरः ॥ **पर्वतात्** ॥ ६ । ३ । ६० ॥ देशार्थाच्छेषे ईयः । पर्वतीयो राजा ॥ **अनरे वा** ॥६। ३ ।६१॥ पर्वताद्देशार्थादीयः । पर्वतीयानि पार्वतानि फलानि ॥ **पर्णकृकणाद्भारद्वाजात्** ॥६ । ३ ।६२॥ शेषे ईयः । पर्णीयः । कृकणीयः । भारद्वाजादिति किम् ? । पार्णः कार्कणः॥

गह्यादिभ्यः ।६।३।६३॥ यथासम्भवं देशवाचिभ्यः शेषे ईयः । गहीयः । अन्तःस्थीयः। बहुवचनमाकृतिगणार्थम् ॥ पृथिवीमध्यान्मध्यमश्चास्य ॥ ६ । ३ । ६४ ॥ देशार्थाच्छेषे ईयः । मध्यमीयः ॥ निवासाच्चरणेऽण् ॥६ । ३ । ६५ ॥ पृथिवीमध्याद्देशार्थान्निवस्तरि शेषे मध्यमादेशश्चास्य । माध्यमाश्चरणाः । चरण इति किम् ? । मध्यमीयः शूद्रः ॥ वेणुकादिभ्यः ईयण् ॥ ६ । ३ । ६६ ॥ यथायोगं देशार्थेभ्यः शेषे । वैणुकीयः । वैत्रकीयः ॥ वा युष्मदस्मदोऽञीनञौ युष्माकास्माकौ चास्यकत्वे तु तवकममकम् ॥ ६ । ३ । ६७ ॥ शेषे यौष्माकः । यौष्माकीणः । आस्माकः । आस्माकीनः । पक्षे युष्मदीयः । अस्मदीयः । तावकः । तावकीनः । मामकः । मामकीनः । त्वदीयः । मदीयः ॥ द्वीपादनुसमुद्रं ण्यः ॥ ६ । ३ । ६८ ॥ शेषे । द्वैप्यो ना तद्वासो वा अनुसमुद्रमिति किम् ? । द्वैपको व्यासः ॥ अर्धाद्यः ॥ ६ । ३ । ६९ ॥ शेषे । अर्ध्यम् ॥ सपूर्वादिकण् ॥ ६ । ३ । ७० ॥ अर्धाच्छेषे । पौष्करार्धिकः ॥ दिक्पूर्वपदात्तौ ॥ ६ । ३ । ७१ ॥ अर्द्धाच्छेषे । पूर्वार्ध्यम् । पौर्वार्धिकम् ॥ ग्रामराष्ट्रांशादणिकणौ ॥ ६ । ३ । ७२ ॥ दिक्पूर्वादर्धाच्छेषे । ग्रामस्य राष्ट्रस्य वा पूर्वार्धे भवः पौर्वार्धः पौर्वार्धिकः ॥ परावराधमोत्तमादेर्यः ॥ ६ । ३ । ७३ ॥ अर्धाच्छेषे । परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् । उत्तमार्ध्यम् ॥ अमोऽन्तावोऽधसः ॥ ६ । ३ । ७४ ॥ शेषे । अन्तमः । अवमः । अधमः । पश्चादाद्यन्ताग्रादिमः ॥ ६ । ३ । ७५ ॥ शेषे । पश्चिमः । आदिमः । अन्तिमः । अग्रिमः । आद्यन्ताभ्यां भवादन्यत्रायं विधिः । भवे तु परत्वाद्य एव ॥ मध्यान्मः । ६ । ३ । ७६ ॥ शेषे । मध्यमः ॥ मध्य उत्कर्षापकर्षयोरः ॥ ६ । ३ । ७७ मध्याच्छेषे । नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिमाणो मध्यो वैयाकरणः । यद्यपि मध्यशब्दो मध्यपरिमाणवाच्यपि वर्तते तथाप्यवस्थावस्थावतोः स्याद्वादाद्भेदविवक्षायामवस्थात्राचिप्रकृतेरवस्थावति प्रत्ययार्थे मो मा भूदिति वचनम् ॥ अध्यात्मादिभ्य इकण् । ६ । ३ । ७८ ॥ शेषे ॥ आध्यात्मिकम् । आधिदैविकम् । आधिभौतिकम् । और्ध्वंदमिकः । और्ध्वंदमिकः । औ-

र्ध्वदेहिकः । और्ध्वदेहिकः । अत एव पाठादूर्ध्वशब्दस्य दमदेहयोर्वा मोऽन्तः । केचित्त्वेनावनुशतिकादिषु पठन्ति । ऊर्ध्वमौहूर्त्तिकः । सप्तमी चोर्ध्वमौहूर्त्तिके इति ज्ञापकादुत्तरपदस्यैव वृद्धिः । आकस्मिकम् । आमुष्मिकम् । आमुत्रिकम् । पारत्रिकम् । ऐहिकम् । शैषिकम् । पाठसामर्थ्यात्सप्तम्या अलुप् ॥ **समानपूर्वलोकोत्तरपदात्** ॥ ६ । ३ । ७९ ॥ शेषे इकण् । सामानग्रामिकः । सामानदेशिकः । ऐहलौकिकः पारलौकिकः । योगद्वयेऽपि भवार्थ एव प्रत्यय इत्यन्ये ॥ **वर्षाकालेभ्यः** ॥ ६ । ३ । ८० ॥ शेषे इकण् । वार्षिकः । कालशब्दः कालविशेषवाची । मासिकः । बहुवचनं यथाकथंचित्कालवृत्तिप्रत्ययप्रापणार्थम् । नैशिकः । प्रादोषिकः । कादम्बपुष्पिकम् । व्रैहिपलालिकम् । ऋतोर्ञितप्रत्ययस्तदपवादे ऋत्वन्तादपि भवत्यभिधानात् ॥ **अंशादृतोः** ॥ ७ । ४ । १४ ॥ उत्तरपदस्य स्वरेष्वादेः स्वरस्य ञ्णिति तद्धिते वृद्धिः । पूर्ववार्षिकः । अपरवार्षिकः । अंशादिति किम् ? । सौवर्षिकः ॥ **शरदः श्राद्धे कर्मणि** ॥ ६ । ३ । ८१ ॥ शेषे इकण् । शारदिकं श्राद्धम् ॥ **नवा रोगातपे** ॥ ६ । ३ । ८२ ॥ शरदः शेषे इकण् । शारदिकः शारदो रोग आतपो वा ॥ **निशाप्रदोषात्** ॥ ६ । ३ । ८३ ॥ शेषे इकण् वा । नैशिकः । नैशः । प्रादोषिकः । प्रादोषः ॥ **श्वसस्तादिः** ॥ ६ । ३ । ८४ ॥ कालार्थाच्छेषे इकण् वा । शौवस्तिकः । श्वस्त्यः । श्वस्तनः ॥ **चिरपरुत्परारेस्त्नः** ॥ ६ । ३ । ८५ ॥ शेषे वा । चिरत्नम् । परुत्नम् । परारित्नम् । पक्षे सायमित्यादिना तनट् । चिरन्तनमित्यादि । परुत्परारिभ्यां विकल्पं नेच्छन्त्यन्ये । केचित्तु परुत्परार्योस्तिनटचन्त्यस्वरात् परं म्वागममिच्छन्ति ॥ **पुरोनः** ॥ ६ । ३ । ८६ ॥ कालार्थाच्छेषे वा । पुराणम् । पुरातनम् ॥ **पूर्वाह्णापराह्णात्तनट्** ॥ ६ । ३ । ८७ ॥ शेषे वा । पूर्वाह्णेतनः २ । अपराह्णेतनः २ । जयिनि वाच्ये व्यवस्थितविभाषाविज्ञानान्नित्यं सप्तम्या लुप् । पौर्वाह्णिकः । आपराह्णिकः ॥ **सायंचिरंप्राह्णेप्रगेऽव्ययात्** ॥ ६ । ३ । ८८ ॥ कालार्थाच्छेषे नित्यं तनट् । सायन्तनम् । चिरन्तनम् प्राह्णेतनम् । प्रगेतनम् । दिवातनम् । दोषातनम् । कालेभ्य इत्येव ।

। सौवम् । कालेकण्बाधनार्थं सायमादिग्रहणम् ॥ **भर्तुसंध्यादेरण्** ॥ ६ । ३ । ८९ ॥ कालार्थाच्छेषे । पौषः । ग्रैष्मः । सान्ध्यः । आमावास्यः । एकदेशविकृतत्वादमावस्याशब्दादपि । आमावस्यः । शाश्वतम् । ऋवर्णोवर्णादिति-सूत्रेऽशश्वदिति प्रतिषेधादिकणपि शाश्वतिकम् । अण्ग्रहणं स्वात्यादिभ्य ईय बाधनार्थम् । कालेभ्य इत्येव । स्वातीयम्॥ **संवत्सरात्फलपर्वणोः** ॥ ६ । ३ । ९० ॥ शेषेऽण् । सांवत्सरं फलं पर्व वा । फलपर्वणोरिति किम् ? । सांवत्सरिकं श्राद्धम् ॥ **हेमन्ताद्वा तलुक् च** ॥ ६ । ३ । ९१ ॥ शेषेऽण् । हैमनम् । हैमन्तम् । हैमन्तिकम् । पूर्वहैमनम् ॥ **प्रावृष एण्यः** ॥ ६ । ३ । ९२ ॥ शेषे प्रावृषेण्यः । एण्ये णकारो निर्निमित्तकः । प्रावृषेण्यतीति ण्यन्तात् क्विपि प्रावृषेण् इति मूर्धन्यार्थः ॥ **स्थामाजिनात्तल्लुप्** ॥ ६ । ३ । ९३ ॥ शैषिकस्य । अश्वत्थामा । सिंहाजिनः । भवार्थस्यैव लुपमिच्छन्त्यन्ये ॥ **तत्र कृतलब्धक्रीतसंभूते** ॥ ६ । ३ । ९४ ॥ यथायोगमणादय एयणादयश्च स्युः । स्रौघ्नः । माथुरः । औत्सः । बाह्यः । वाहीकः । नादेयः । राष्ट्रियः ॥ **कुशले** ॥ ६ । ३ । ९५ ॥ सप्तम्यन्ताद्यथाविहितमणेयणादयः । स्रौघ्नः । नादेयः योगविभाग उत्तरार्थः ॥ **पथोऽकः** ॥ ६ । ३ । ९६ ॥ सप्तम्यन्तात् कुशले । पथकः ॥ **कोऽश्मादेः** ॥ ६ । ३ । ९७ ॥ सप्तम्यन्तात् कुशले । अश्मकः । अशनिकः ॥ **जाते** ॥ ६ । ३ । ९८ ॥ सप्तम्यन्ताद्यथाविहितमणेणयणादयः । माथुरः । औत्सः । बाह्यः । नादेयः । राष्ट्रियः ॥ **पोष्ठभद्राज्जातेः** ॥ ७ । ४ । १३ ॥ पदोत्तरपदस्य स्वरेष्वादेः स्वरस्य ञिणति तद्धिते वृद्धिः । प्रोष्ठपादः । भद्रपादो बटुः ॥ **प्रावृष इकः** ॥ ६ । ३ । ९९ ॥ सप्तम्यन्ताज्जाते । प्रावृषिकः ॥ **नाम्नि शरदोऽकञ्** ॥ ६ । ३ । १०० ॥ सप्तम्यन्ताज्जाते । शारदका दर्भाः । नाम्नीति किम् ? । शारदं सस्यम् ॥ **सिन्ध्वपकरात्काणौ** ॥ ६ । ३ । १०१ ॥ सप्तम्यन्ताज्जाते नाम्नि । सिन्धुकः । सैन्धवः । अपकरकः । आपकरः ॥ **पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्कः** ॥ ६ । ३ । १०२ ॥ सप्तम्यन्ताज्जाते नाम्नि । पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः ।

अवरकरकः । केनैव सिद्धेऽकविधानमार्द्रिकेत्येवमर्थम् ॥ **पथः पन्थ च** ॥ ६ । ३ । १०३ ॥ सप्तम्यन्ताज्जातेऽको नाम्नि । पन्थकः ॥ **अश्च वामावास्याया:** ॥ ६ । ३ । १०४ ॥ अस्मात्सप्तम्यन्ताज्जाते अः अकश्च नाम्नि । अमावास्यः । अमावास्यकः । आमावास्यः । अमावस्यः ॥**श्रविष्ठाषाढादीयण च** ॥६।३।१०५॥ सप्तम्यन्ताज्जाते अः नाम्नि । श्राविष्ठीयः । श्रविष्ठः । आषाढीयः । आषाढः । अणमपीच्छन्त्यके ॥ **फल्गुन्याष्टः** ॥ ६ । ३ । १०६ सप्तम्यन्ताय। जाते नाम्नि । फल्गुनः । फल्गुनी । स्त्री । अणमपीच्छन्त्यके ॥ **बहुलानुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेर्लुप्** ॥ ६ । ३ । १०७ ॥ सप्तम्यन्ताद्भाणो जाते नाम्नि । बहुलः । अनुराधः । पुष्यः । तिष्यः । पुनर्वसुः । हस्तः । विशाखः । स्वातिः ॥ **चित्रारेवतीरोहिण्याः स्त्रियाम्** ॥ ६ । ३ । १०८ ॥ एभ्यः सप्तम्यन्तेभ्यो जाते नाम्नि स्त्रियां लु । चित्रा । रेवती । रोहिणी । पुंस्येषां विकल्प इत्येके ॥ **बहुलमन्येभ्यः** ॥ ६ । ३ । १०९ ॥ सप्तम्यन्तेभ्यो भाणो जाते लुप् नाम्नि । अभिजित् । आभिजितः । अश्वयुक् । आश्वयुजः । क्वचिन्नित्यम् । अश्विनः । क्वचिन्न । माघः ॥ **वा जाते द्विः** ॥ ६ । २ । १३७ ॥ योऽणू सद्विा । शातभिषः । शातभिषजः । द्विरिति किम् ! । हैमवतः ॥ **स्थानान्तगोशालखरशालात्** ॥ ६ । ३ । ११० ॥ सप्तम्यन्ताज्जाते प्रत्ययस्य नाम्नि लुप् । गोस्थानः । गोशालः । खरशालः शिशुः ॥ **वत्सशालाद्वा** ॥ ६ । ३ । १११ ॥ सप्तम्यन्ताज्जाते प्रत्ययस्य नाम्नि लुप् । वत्सशालः । वात्सशालः ॥ **सोदर्यसमानोदर्यौ** ॥ ६ । ३ । ११२ ॥ जाते निपात्येते । सोदर्यः । समानोदर्यो भ्राता ॥ **कालाद्देये ऋणे** ॥ ६ । ३ । ११३ ॥ सप्तम्यन्ताद्यथाविहितं प्रत्ययः । मासिकमृणम् । आर्धमासिकम् । ऋण इति किम् ! । मासे देया भिक्षा ॥ **कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः** ॥ ६ । ३ । ११४ ॥ कालार्थात् सप्तम्यन्ताद् देये ऋणे । कलापकम् । अश्वत्थकम् । यवबुसकम् । उमाव्यासकम् । ऐषमकमृणम् ॥ **ग्रीष्मावरसमादकञ्** ॥ ६ । ३ । ११५ ॥ कालार्थात्सप्तम्यन्ताद्देये ऋणे । ग्रै-

ष्मकम् । आवरसमकमृणम् । अपरसमादपीच्छन्त्यके ॥ **संवत्सराग्रहायण्या इकण् च** ॥ ६ । ३ । ११६ ॥ आभ्यां सप्तम्यन्ताभ्यां देये ऋणे इकणकञ् च । सांवत्सरिकम् । सांवत्सरकं । फलं पर्व वा । आग्रहायणिकम् । आग्रहायणकम् । वेत्यकृत्वेकण् चेति विधानमण्बाधनार्थम् ॥ **साधुपुष्यत्पच्यमाने** ॥ ६ । ३ । ११७ ॥ सप्तम्यन्तात्कालविशेषार्थाद्यथाविहितं प्रत्ययाः । हैमनमनुलेपनम् । हैमन्तम् । हैमन्तिकम् । वासन्त्यः कुन्दलताः । ग्रैष्मः पाटलाः । शारदाः शालयः ॥ **उप्ते** ॥ ६ । ३ । ११८ ॥ सप्तम्यन्तात्कालार्थाद्यथाविहितं प्रत्ययः । शारदा यवाः । हैमनाः ॥ **आश्वयुज्या अकञ्** ॥ ६ । ३ । ११९ ॥ अस्मात्सप्तम्यन्तादुप्तेऽकञ् । आश्वयुजका माषाः ॥ **ग्रीष्मवसन्ताद्वा** ॥ ६ । ३ । १२० ॥ सप्तम्यन्तादुप्तेऽकञ् । ग्रैष्मकं ग्रैष्मं सस्यम् । वासन्तकम् । वासन्तम् ॥ **व्याहरति मृगे** ॥ ६ । ३ । १२१ ॥ सप्तम्यन्तात्कालार्थाद्यथाविहितं प्रत्ययः । नैशिको नैशो वा शृगालः । प्रादोषिकः । प्रादोषो वा । मृग इति किम् ? । वसन्ते व्याहरति कोकिलः ॥ **जयिनि च** ॥ ६ । ३ । १२२ ॥ सप्तम्यन्तात्कालार्थाद्यथाविहितं प्रत्ययः । निशाभवमध्ययनं निशा । तत्र जयी नैशिकः । नैशः । प्रादोषिकः । प्रादोषः । वार्षिकः । चकारः कालादित्यनुकर्षणार्थः । तेन चानुकृष्टत्वान्नोत्तरत्रानुवर्त्तते ॥ **भवे** ॥ ६ । ३ । १२३ ॥ सप्तम्यन्ताद्यथाविहितमणेयणादयः । स्रौघ्नः । औत्सः । नादेयः । ग्राम्यः । ग्रामीणः ॥ **देविकाशिंशपादीर्घसत्त्रश्रेयसस्तत्प्राप्तावाः** ॥ ७ । ४ । ३ ॥ एषां स्वरेष्वादेः स्वरस्य ञ्णिति तद्धिते वृद्धिप्राप्तावाः । दाविकमुदकम् । दाविकाकूलाः शालयः । शांशपः स्तम्भः । दार्घसत्रम् । श्रायसं द्वादशाङ्गम् । तत्प्राप्ताविति किम् ? । सौदेविक इत्यत्र निषेधार्थं पूर्वोत्तरपदानामपि यथा स्यादित्येवमर्थं च । तेन पूर्वदाविकः । अत्र प्राग्ग्रामाणामित्युत्तरपदवृद्धिप्राप्तिः ॥ **प्राग्ग्रामाणाम्** ॥ ७ । ४ । १७ । प्राग्देशग्रामवाचिनां योऽवयवो दिग्वाची ततः परस्यावयवस्य दिशः परेषां च प्राग्ग्रामवाचिनां ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः । पूर्वकार्ष्णमृत्तिकः । पूर्वैषुकामशमः । पूर्वकान्यकुब्जः ॥

जङ्गलधेनुवलजस्योत्तरपदस्य तु वा ॥ ७ । ४ । २४ ॥ आदेर्ञिणति नञ्जिते स्वरेष्वादेः स्वरस्य नित्यं वृद्धिः । कौरुजङ्गलः । कौरुजाङ्गलः । वैश्वधेनवः । वैश्वधैनवः । सौवर्णवलजः । सौवर्णवालजः ॥ प्राचां नगरस्य ॥ ७ । ४ । २६ ॥ प्राग्देशार्थस्य नगरान्तस्य ञ्णिति तद्धिते पूर्वोत्तरपदयोः स्वरेष्वादेर्वृद्धिः । सौम्हनागरः । प्राचामिति किम् ? । माडनगरः ॥ दिगादिदेहांशाद्यः ॥ ६ । ३ । १२४ ॥ सप्तम्यन्ताद्भवे । दिश्यः । अप्सव्यः । मूर्धन्यः । देहांशात्तदन्तादपीच्छन्त्येके ॥ येऽवर्णे ॥ ३ । २ । १०० ॥ प्रत्यये नासिकाया नस् । नस्यम् ॥ शिरसः शीर्षन् ॥ ३ । २ ॥ १०१ ॥ ये । शीर्षण्यः स्वरः ॥ केशे वा ॥ ३ । २ । १०२ ॥ ये सिरसः शीर्षन् । । शीर्षण्याः शिरस्याः केशाः ॥ नाम्न्युदकात् ॥ ६ । ३ । १२' ॥ सप्तम्यन्ताद्भवे यः । उदक्या रजस्वला । नाम्नीति किम् ? । औदको मत्स्यः ॥ मध्यान्दिनाण्णेया मोऽन्तश्च ॥ ६ । ३ । १२६ ॥ सप्तम्यन्ताद्भवे । माध्यंदिनाः । माध्यमः । मध्यमीयः । अन्ये तु दिनं णितं नेच्छन्ति ॥ जिह्वामूलाङ्गुलेश्चेयः ॥ ६ । ३ । १२७ ॥ मध्याद्भवे । जिह्वामूलीयः । अङ्गुलीयः । मध्यीयः ॥ वर्गान्तात् ॥ ६ । ३ । १२८ ॥ सप्तम्यन्ताद्भवे ईयः । कवर्गीयो वर्णः ॥ ईनयौ चाशब्दे ॥ ६ । ३ । १२९ ॥ वर्गान्तात्सप्तम्यन्ताद्भवे ईयः । भरतवर्गीणः । भरतवर्ग्यः । भरतवर्गीयः । शब्दे तु कवर्गीयः ॥ दृतिकुक्षिकलशिवस्त्यहेरेयण् ॥ ६ । ३ । १३० ॥ सप्तम्यन्ताद्भवे । दार्तेयं जलम् । कौक्षेयो व्याधिः । कालसेयं तक्रम् । वास्तेयं पुरीषम् । आहेयं विषम् ॥ आस्तेयम् ॥ ६ । ३ । १३१ ॥ अस्तेर्धनविद्यमानार्थात्तत्र भवे एयण अस्तुनो वास्त्यादेशश्च । आस्तेयम् ॥ ग्रीवातोऽण् च ॥ ६ । ३ । १३२ ॥ भवे एयण् । ग्रैवम् । ग्रैवेयम् ॥ चतुर्मासान्नाम्नि ॥ ६ । ३ । १३३ ॥ तत्र भवे अण् । चातुर्मासी । आषाढादिपौर्णमासी । अत्र द्विगोरनपत्य इत्यादिना लुब् न विधानसामर्थ्यात् । नाम्नीति किम् ? । चतुर्मासः ॥ यज्ञे ञ्यः ॥ ॥ ६ । ३ । १३४ ॥ चतुर्मासात्तत्र भवे । चातुर्मास्यानि यज्ञकर्माणि ॥ गम्भीरपञ्चजनबहिर्देवात् ॥ ६ । ३ ।

१३५ ॥ तत्र भवे ञ्यः। गाम्भीर्यः। पाञ्चजन्यः। वाह्यः। दैव्यः। भवादन्यत्र गाम्भीरः। पाञ्चजनः। द्विगौ तु पञ्चजनः। बाहीकः। दैवः। भवेऽपि बाहीक इत्यके ॥ **परिमुखादेरव्ययीभावात्** ॥ ६। ३। १३६ ॥ तत्र भवे ञ्यः। पारिमुख्यः। पारिहनव्यः ॥ **अन्तःपूर्वादिकण्** ॥ ६। ३। १३७ ॥ अव्ययीभावात्तत्र भवे। आन्तरगारिकः। **पर्यनोर्ग्रामात्** ॥ ६। ३। १३८ ॥ अव्ययीभावात्तत्र भवे इकण्। पारिग्रामिकः। आनुग्रामिकः ॥ **उपाज्जानुनीविकर्णात् प्रायेण** ॥ ६। ३। १३९ ॥ अव्ययीभावादिकण् तत्रभवे। औपजानुकः। सेवकः। औपनीविकं ग्रीवादाम। औपकर्णिकः सूचकः। प्रायेणेति किम्?। नित्यं भवे मा भूत्। औपजानवं मांसम् ॥ **रूढावन्तःपुरादिकः** ॥ ६। ३। १४० ॥ तत्र भवे। अन्तःपुरिका स्त्री। रूढाविति किम्?। आन्तःपुरः ॥ **कर्णललाटात्कल्** ॥ ६। ३। १४१ ॥ तत्र भवे तदन्तस्य रूढौ। कर्णिका कर्णाभरणम्। ललाटिका ललामण्डनम्। लकारः स्त्र्यात्वार्थः। रूढावित्येव। कर्ण्यम् ॥ **तस्य व्याख्याने च ग्रन्थात्** ॥ ६। ३। १४२ ॥ तत्र भवे यथाविहितं प्रत्ययः। कार्त्तम्। प्रातिपदिकीयं व्याख्यानं भवं वा। 'तस्येदम्' 'भवे' इत्याभ्यां सिद्धे। वक्ष्यमाणः सकलोऽप्यपवादविधिरनयोरर्थयोर्यथा स्यादित्येवमर्थं सूत्रम् ॥ **प्रायोबहुस्वरादिकण्** ॥ ६। ३। १४३ ॥ ग्रन्थार्थात्तस्य व्याख्याने तत्र भवे च। पात्वणत्विकम्। प्रायोवचनात् सांहितम् ॥ **ऋगृद्धिस्वरयागेभ्यः** ॥ ६। ३। १४४ ॥ ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चेकण्। आर्चिकम्। चातुर्होतृकम्। आङ्गिकम्। राजसूयिकम्। ऋग्यागग्रहणं पूर्वस्यैव प्रपञ्चः ॥ **ऋषेरध्याये** ॥ ६। ३। १४५ ॥ ग्रन्थवृत्तेस्तस्य व्याख्याने तत्र भवे चेकण्। वासिष्ठिकोऽध्यायः। अध्याय इति किम्?। वासिष्ठी ऋक्। प्रायोबहुस्वरादिति प्रायोग्रहणादप्राप्तिकल्पनायां विध्यर्थम्। प्राप्तिकल्पनायामध्याय एवेति नियमार्थं वचनम् ॥ **पुरोडाशपौरोडाशादिकेकटौ** ॥ ६। ३। १४६ ॥ ग्रन्थार्थात्तस्य व्याख्याने तत्रभवे च। पुरोडाशिका। पुरोडाशिकी। पौरोडाशिका। पौरोडाशिकी ॥ **छन्दसोयः** ॥ ६। ३। १४७ ॥ ग्रन्थार्थात्त-

स्य व्याख्याने तत्रभवे च । छन्दस्यः ॥ शिक्षादेश्चाण् ॥ ६ । ३ । १४८ ॥ छन्दसो ग्रन्थार्थात्तस्य व्याख्याने तत्रभवे च । शैक्षः । आर्गयनः । छान्दसः ॥ तत आगते ॥ ६ । ३ । १४९ ॥ यथाविहितमणेयणादयः । स्रौघ्नः । गव्यः । नादेयः । ग्राम्यः । मुख्यापादानग्रहाद्भान्तरीयकापादानान्न ॥ विद्यायोनिसंबन्धादकञ् ॥ ६ । ३ । १५० ॥ तत आगते । आचार्यकम् । औपाध्यायकम् । पैतामहकम् । मातामहकम् ॥ पितुर्यो वा ॥ ६ । ३ । १५१ ॥ योनिसम्बन्धार्थात्तत आगते । पित्र्यम् । पैतृकम् ॥ ऋत इकण् ॥ ६ । ३ । १५२ ॥ विद्यायोनिसम्बन्धार्थात्तत आगते । हौतृकम् । मातृकम् ॥ आयस्थानात् ॥ ६ । ३ । १५३ ॥ स्वामिग्राह्यो भागो यत्रोत्पद्यते तदर्थात्तत आगते इकण् । आतरिकम् ॥ शुण्डिकादेरण् ॥ ६ । ३ । १५४ ॥ तत आगते । शौण्डिकम् । औदपानम् ॥ गोत्रादङ्कवत् ॥ ६ । ३ । १५५ ॥ तत आगते प्रत्ययः । बैदम् । अङ्कग्रहणेन तस्येदमित्यर्थसामान्यं लक्ष्यते । तेनाकञोऽप्यतिदेशः । औपगवकम् ॥ नृहेतुभ्यो रूप्यमयटौ वा ॥ ६ । ३ । १५६ ॥ चैत्ररूप्यम् । चैत्रमयम् । चैत्रीयम् । समरूप्यम् सममयम् । समीयम् ॥ प्रभवति ॥ ६ । ३ । १५७ ॥ पञ्चम्यन्तात्प्राग्रुपलभ्ये यथाविहितं प्रत्ययाः । हैमवती गङ्गा । अन्ये जायमाने इत्याहुः ॥ वैडूर्यः ॥ ६ । ३ । १५८ ॥ निपात्यते । वैडूर्यो मणिः ॥ त्यदादेर्मयट् ॥ ६ । ३ । १५९ ॥ ततः प्रभवति । तन्मयम् । भवन्मयी ॥ तस्येदम् ॥ ६ । ३ । १६० ॥ षष्ठ्यन्तादिदमित्यर्थे यथाविहितं प्रत्ययाः । औपगवम् । दैत्यम् । कालेयम् । नादेयम् । पारीणः । भानवीयः ॥ गोत्रोत्तरपदाद्गोत्रादिवाऽजिह्वाकात्यहरितकात्यात् ॥ ६ । १ । १२ ॥ गोत्रप्रत्ययान्तोत्तरपदात् गोत्रप्रत्ययान्तादिव तद्धितः । यथा चारायणीयास्तथा कम्बलचारायणीयाः । अजिह्वेत्यादि किम् ! । यथेह कातीयाः न तथा जैह्वाकाताः । हारितकाताः ॥ उक्ष्णो लुक् ॥ ७ । ४ । ५६ ॥ अनपत्येऽण्यन्त्यस्वरादेः । औक्षं पदम् । अनपत्य इत्येव । उक्ष्णोऽपत्यमौक्ष्णः ॥ ब्रह्मणः ॥ ७ । ४ । ५७ ॥ अनपत्येऽण्यन्त्यस्वरादेर्लुक् । ब्राह्मपत्रम् ॥ जातौ ॥ ७ । ४ ५८

॥ ब्रह्मणो ऽनपत्येऽण्यन्त्यस्वरादेलुक् । ब्राह्मी औषधिः । जातावनपत्ये एवेति नियमार्थं वचनम् । तेन ब्रह्मणोऽपत्यं ब्राह्मणः । जातावेिति किम् ? । ब्राह्मो नारदः ॥ न्यङ्कोर्वा ॥ ७ । ४ । ८ ॥ ञ्णिति तद्धिते यात्प्रागैत् । नैयङ्कवम् । न्याङ्कवम् ॥ नञः क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचेः ॥ ७ । ४ । २३ ॥ ञ्णिति तद्धिते स्वरेष्वादेर्वृद्धि र्नञ उत्तरतु वा । अक्षैत्रज्ञम् । आक्षैत्रज्ञम् । अनैश्वरम् । आनैश्वरम् । अकौशलम् । आकौशलम् । अचापलम् । आचापलम् । अनैपुणम् । आनैपुणम् । अशौचम् । आशौचम् । आयथातथ्यमिति समासात्प्रत्ययः । अयाथातथ्यमिति तु प्रत्ययान्तेन समासः । एवमायथापुर्यम् । अयाथापुर्यम् । यथाआचतुर्यम् । अचातुर्यमिति । यथा तथा यथापुरा इत्यखण्डमव्ययं वा नाम नाम्नेति वा समासो यथाऽथा इति अव्ययीभावो वाऽकारान्ताः ॥ हलसीरादिकण् ॥ ६ । ३ । १६१ ॥ तस्येदमित्यर्थे । हालिकम् । सैरिकम् ॥ समिध आधाने टेन्यण् ६ । ३ । १६२ ॥ तस्येदमित्यर्थे । सामिधेन्यो मन्त्रः । सामिधेनी ऋक् ॥ विवाहे द्वन्द्वादकल् ॥ ६ । ३ । १६३ ॥ तस्येदमित्यर्थे । अत्रिभरद्वाजिका ॥ अदेवासुरादिभ्यो वैरे ॥ ६ । ३ । १६४ ॥ द्वन्द्वेभ्यस्तस्येदमर्थे विवाहे ऽकल् । बाभ्रवशालङ्कायनिका। अदेवादीति किम् ! । दैवासुरम् । राक्षोसुरम् ॥ नटान्नृत्ते ञ्यः ॥ ६ । ३ । १६५ ॥ तस्येदमर्थे । नटानामिदं नृत्यं नाट्यम् ॥ छन्दोगौक्थिकयाज्ञिकबह्वृचाच्च धर्मनाम्नायसंघे ॥ ६ । ३ । १६६ ॥ नटान्तस्येदमर्थे ञ्यः । छान्दोग्यं धर्मादि । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् ॥ आथर्वणिकादणिकलुक्च ॥ ६ । ३ । १६७॥ तस्येदर्थे धर्मादौ । आथर्वणः ॥ चरणादकञ् ॥ ६ । ३ । १६८ ॥ तस्येदमर्थे धर्मादौ । काठको धर्मादिः । चारककः ॥ गोत्राददण्डमाणवशिष्ये ॥ ६ । ३ । १६९ ॥ तस्येदमर्थेऽकञ् । औपगवकम् । अदण्डेत्यादि किम् ?। काण्वा दण्डमाणवाः शिष्या वा ॥ रैवतिकादेरीयः ॥ ६ । ३ । १७० ॥ गोत्रार्थात्तस्येदमित्यर्थे । रैवतिकीयाः शिष्याः । गौरग्रीवीयं शकटम् ॥ कौपिञ्जलहास्तिपदादण् ॥ ६ । ३। १७१ ॥ गोत्रार्थात्तस्येदमित्यर्थे । कौपिञ्जलाः

शिष्याः । हास्तिपदाः । णित्वं ङ्यर्थं पुंवद्भावाभावार्थं च । कौपिञ्जलीस्थूणः ॥ संघघोषाङ्कलक्षणेऽञ्यञिञः ॥ ६।३।१७२॥ गोत्रार्थात्तस्येदमित्यर्थेऽण् । बैदः सङ्घादिः । बैदं लक्षणम् । एवं गार्गः । गार्गम् । दाक्षः । दाक्षम् । लक्ष्यस्यैव स्वं लक्षणम् । यथा शिखादि । स्वामिविशेषविज्ञापकोऽङ्कः स्वस्तिकादिर्गवादिस्थो न गवादीनामेव स्वम् ॥शाकलादकञ् च ॥६।३।१७३॥ तस्येदमित्यर्थे सङ्घादावण् । शाकलकः । शाकलः । सङ्घादिः । शाकलकम् । शाकलं लक्षणम् ॥गृहेऽग्नीधोरण् धश्च ॥ ६ । ३ । १७४ ॥ तस्येदमर्थे । आग्नीध्रम् ॥ रथात्सादेश्च वोढ्रङ्गे ॥ ६ । ३ । १७५॥ तस्येदमित्यर्थे प्रत्ययः । रथ्योऽश्वः । रथ्यं चक्रम् । द्विरथोऽश्वः । द्विरथं चक्रम् । अन्ये तु स्वरादेरेव लुपमिच्छन्ति तन्मते द्विरथ्यः । आश्वरथं चक्रम् । वोढ्रङ्गे एवेति नियमादन्यत्र वाक्यमेव ॥ यः ॥ ६ । ३ । १७६ ॥ रथात्सादेश्च तस्येदमर्थे । रथ्यः । द्विरथः । पत्रपूर्वादञ् ॥ ६ । ३ । १७७ ॥ रथात्तस्येदमर्थे । पत्रं वाहनम् । आश्वरथं चक्रम् ॥ वाहनात् ॥ ६ । ३ । १७८ ॥ तस्येदमर्थेऽञ् । औष्ट्रो रथः । हास्तः ॥ वाह्यपथ्युपकरणे ॥ ६ । ३ । १७९ ॥ वाहनादुक्तः प्रत्ययो वाह्यादावेव । आश्वो रथः । पन्था वा । आश्वं पल्ययनम् । आश्वी कसा । अन्यत्र तु वाक्यमेव । अश्वानां घासः ॥ वहेस्तुरिश्चादिः ॥ ६ । ३ । १८० ॥ तस्येदमर्थेऽञ् । सांवहित्रम् ॥ तेन प्रोक्ते ॥ ६ । ३ । १८१ ॥ यथाविहितं प्रत्ययः । प्रकर्षेण व्याख्यातमध्यापितं वा प्रोक्तं न तु कृतम् । भाद्रबाहवान्युत्तराध्ययनानि । गणधरप्रत्येकबुद्धादिभिः कृतानि तेन व्याख्यातानीत्यर्थः । पाणिनीयम् । बार्हस्पत्यम् ॥ कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्वणः ॥ ७ । ४ । ६२ ॥ अपदस्य तद्धितेऽन्त्यस्वरादेर्लुक् । कालापाः । कौथुमाः । तैतलाः । जाजलाः । लाङ्गलाः । शैखण्डाः । शैलालाः । साब्रह्मचाराः । पैठसर्पाः । सौकरसद्माः । सौपर्वाः ॥मौदादिभ्यः॥६।३।१८२॥ तेन प्रोक्ते यथाविहितमण् । मौदेन प्रोक्तं वेदं विदन्त्यधीयते वा मौदाः ।वेदेनब्राह्मणमत्रैवेति नियमात् वेदित्रध्येतृविषय एवाण् । पैप्पलादाः ॥कठादिभ्यो वेदे लुप्॥६।३।१८३॥

प्रोक्तप्रत्ययस्य । कठाः । चरकाः ॥ **तित्तिरिवरतन्तुखण्डिकोखादियण्** ॥६।३।१८४॥ तेन प्रोक्ते वेदे । तैत्तिरियाः। वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः । वेदे इत्येव । तैत्तिराः श्लोकाः ॥ **छगलिनो णेयिन्** । ६ ।३ ।१८५॥ तेन प्रोक्ते वेदे । छागलेयिनः ॥ **शौनकादिभ्यो णिन्** ॥ ६ । ३ । १८६ ॥ तेन प्रोक्ते वेदे । शौनकिनः । शार्ङ्गरविणः । आकृतिगणोऽयम् ॥ **पुराणे कल्पे** ॥ ६ । ३ । १८७ ॥ टान्तात्प्रोक्ते णिन् । पैङ्गीकल्पः ॥ **काश्यपकौशिकाद्वेदवच्च** ॥ ६ । ३ । १८८ ॥ तेन प्रोक्ते पुराणे कल्पे णिन् । काश्यपिनः । कौशिकिनः । काश्यपको धर्मादिः ॥ **शिलालिपाराशर्यान्नटभिक्षुसूत्रे** ॥ ६ । ३ । १८९ ॥ तेन प्रोक्ते णिन् वेदवच्च कार्य्यमस्मिन् । शैलालिनो नटाः । पाराशरिणो भिक्षवः ॥ **कृशाश्वकर्मन्दादिन्** ॥ ६ । ३ । १९० ॥ तेन प्रोक्ते यथासंख्यं नटसूत्रे भिक्षुसूत्रे च। वेदवच्च कार्य्यमस्मिन् । कृशाश्विनो नटाः कर्मन्दिनो भिक्षवः । अतिदेशादकञ् च । काशाश्वकम् । नटसूत्रे कापिलेयशब्दादपीच्छन्त्येके ॥ **उपज्ञाते** ॥ ६ । ३ । १९१ ॥ टान्ताद्यथाविहितं प्रत्ययः । पाणिनीयं शास्त्रम् ॥ **कृते** ॥ टान्ताद्यथाविहितं प्रत्ययः । शैवो ग्रन्थः । सिद्धसेनीयः स्तवः । कृते ग्रन्थे एवेच्छन्त्यन्ये ॥ **नाम्नि मक्षिकादिभ्यः**॥ ६ । ३ । १९३ ॥ टान्तेभ्यो यथाविहितं कृते प्रत्ययः । माक्षिकं मधु । सारघम् ॥ **कुलालादेरकञ्** ॥ ६ । ३ । १९४ ॥ तेन कृते नाम्नि । कौलालकं घटादिभाण्डम् । वारुटकं सूर्पपिटकादि ॥ **सर्वचर्मण ईनेनञौ** ॥ ६ । ३ । १९५ ॥ तेन कृते नाम्नि । सर्वचर्मीणः । सार्वचर्मीणः ॥ **उरसो याणौ** ॥ ६ । ३ । १९६ ॥ तेन कृते नाम्नि । उरस्यः । औरसः ॥ **छन्दस्यः** ॥ ६ । ३ । १९७ ॥ छन्दसस्तेन कृते नाम्नि यो निपात्यः । छन्दस्यः ॥ **अमोऽधिकृत्य ग्रन्थे** ॥ ६ । ३ । १९८ ॥ कृते यथाविहितं प्रत्ययः । भाद्रः । सौभद्रः । कथं वासवदत्ता आख्यायिकेति । उपचाराद् ग्रन्थे नाच्छब्दम् ॥ **ज्योतिष्यम्** ॥ ६ । ३ । १९९ ॥ ज्योतिषोऽमोधिकृत्य कृते ग्रन्थे ऽण् वृद्ध्यभावश्च निपात्यः ॥ **शिशुक्रन्दादिभ्य ईयः** ॥ ६ । ३ । २०० ॥ अमोऽधिकृत्य कृते ग्रन्थे । शिशुक्रन्दीयः । यमसभी-

यो ग्रन्थः । शिशुक्रन्दशब्दात्केचिदिच्छन्ति ॥ द्वन्द्वात्प्रायः ॥ ६ । ३ । २०१ ॥ अधिकृत्य कृते ग्रन्थे ईयः । वाक्यपदीयम् । प्राय इति किम् ? । दैवासुरम् ॥ अभिनिष्क्रामति द्वारे ॥ ६ । ३ । २०२ ॥ अमन्ताद्यथोक्तं प्रत्ययः । माथुरम् । नादेयम् । राष्ट्रियं द्वारम् ॥ गच्छति पथि दूते ॥ ६ । ३ । २०३ ॥ अमन्ताद्यथोक्तं प्रत्ययः । स्रौघ्नः पन्था दूतो वा । ग्राम्यः ॥ भजति ६ । ३ । २०४ ॥ अमो यथोक्तं प्रत्ययः । स्रौघ्नः । राष्ट्रियः ॥ महाराजादिकण् ॥ ६ । ३ । २०५ ॥ अमो भजति । माहाराजिकः ॥ अचित्तादेशकालात् ॥ ६ । ३ । २०६ ॥ अमो भजतीकण् । आपूपिकः । अचित्तादिति किम् ? । दैवदत्तः । अदेशेत्यादि किम् ? । स्रौघ्नः । हैमनः ॥ वासुदेवार्जुनादकः ॥ ६ । ३ ।२०७॥ अमन्ताद् भजत्यर्थे । वासुदेवकः । अर्जुनकः ॥गोत्रक्षत्रियेभ्योऽकञ् प्रायः ॥६। ३ । २०८ ॥ अमन्तेभ्यो भजति । औपगवकः । नाकुलकः । प्राय इति किम् ? । पाणिनीयः ॥ सरूपाद्द्रेः सर्वं राष्ट्रवत् ॥ ६ । ३ । २०९ ॥ राष्ट्रक्षत्रियार्थादमो भजति । वृजिकः । माद्रकः । पाण्डवकः । सरूपादिति किम् ? । पौरवीयः ॥ टस्तुल्यदिशि ॥ ६ । ३ । २१० ॥ यथोक्तं प्रत्ययः । सौदामनी विद्युत् ॥ तसिः ॥ ६ । ३ । २११ ॥ टान्तात्तुल्यदिक्के । सुदामतो विद्युत् ॥ यश्चोरसः ॥ ६ । ३ । २१२ ॥ टान्तात्तुल्यदिक्के तसिः । उरस्यः । उरस्तः ॥ सेर्निवासादस्य ॥ ६ । ३ । २१३ ॥ यथोक्तं प्रत्ययः । स्रौघ्नः । नादेयः ॥ आभिजनात् ॥ ६ । ३ । २१४ ॥ आभिजनाः पूर्वबान्धवास्तन्निवासात्स्यन्तात्षष्ठ्यर्थे यथोक्तं प्रत्ययः । स्रौघ्नः । राष्ट्रियः ॥ शाण्डिकादेर्ण्यः ॥ ६ । ३ । २१५ ॥ स्यन्तादाभिजननिवासार्थादस्येत्यर्थे । शाण्डिक्यः । कौचवार्यः ॥ सिन्ध्वादेरञ् ॥ ६ । ३ । २१६ ॥ स्यन्तादाभिजननिवासार्थात्षष्ठ्यर्थे । सैन्धवः । वार्णवः ॥ सलातुरादीयण् ॥ ६ । ३ । २१७ ॥ स्यन्तादाभिजननिवासार्थात्षष्ठ्यर्थे । सालातुरीयः । पाणिनिः ॥ तूदीवर्मत्या एयण् ॥ ६ । ३ । २१८ आभ्यां स्यन्ताभ्यामाभिजननिवासार्थाभ्यां षष्ठ्यर्थे एयण् । तौदेयः । वार्मतेयः ॥ गिरेरीयोऽस्त्राजीवे ॥ ६ । ३

।२१९॥ गिरेयं आभिजनो निवासस्तदर्थात्स्यन्तात्षष्ठ्यर्थेऽस्त्राजीवे ईयः । हृदुगोलीयः । गिरेरिति किम् ! । सांकाश्यकोऽस्त्राजीवः । अस्त्राजीव इति किम् ? । आर्क्षोदो ब्राह्मणः । पार्थिवः ॥ इति शैषिकाः ॥

इकण् ॥ ६ । ४ । १ । आपादान्ताद्यदनुक्तं स्यात्तत्रायमधिकृतो ज्ञेयः ॥ तेन जितजयद्दीव्यत्खनत्सु ॥ ६ । ४ । २ ॥ इकण् । आक्षिकम् । आक्षिकः । आभ्रिकः । इह तेनेति करणे तृतीया नान्यत्रानभिधानात् तेन देवदत्तेन जितं धनेन जितमित्यत्र न । बहुवचनं पृथगर्थताभिव्यक्त्यर्थम् ॥ संस्कृते ॥ ६ । ४ । ३ ॥ टान्तादिकण् । दाधिकम् । वैधिकम् । योगविभाग उत्तरार्थः ॥ कुलत्थकोपान्त्यादण् ॥ ६ । ४ । ४ ॥ तेन संस्कृते । कौलत्थम् । तैत्तिडीकम् ॥ संसृष्टे ॥ ६ । ४ । ५ ॥ टान्तादिकण् । दाधिकम् ॥ लवणादः ॥ ६ । ४ । ६ ॥ तेन संसृष्टे । लवणः सूपः ॥ चूर्णमुद्गाभ्यामिनणौ ॥ ६ । ४ । ७ ॥ तेन संसृष्टे । चूर्णिनोऽपूपाः । मौद्गी यवागूः ॥ व्यञ्जनेभ्य उपसिक्ते ॥ ६ । ४ । ८ ॥ टान्तेभ्य इकण् । तैलकं शाकम् । उपसिक्तं संसृष्टमेव तत्र संसृष्ट इत्येव सिद्धे नियमार्थं वचनम् । व्यञ्जनैः संसृष्टे उपसिक्त एव उपसिक्ते च व्यञ्जनैरेव ॥ तरति ॥ ६ । ४ । ९ ॥ टान्तादिकण् । औडुपिकः ॥ नौद्विस्वरादिकः ॥ ६ । ४ । १० ॥ टान्तात्तरति । नाविकः । बाहुका स्त्री ॥ चरति ॥ ६ । ४ । ११ ॥ टान्तादिकण् । हास्तिकः । दाधिकः ॥ पर्पादेरिकट् ॥ ६ । ४ । १२ ॥ टान्ताच्चरति । पर्पिकी । अश्विकी ॥ पदिकः । ६ । ४ । १३ ॥ पादाच्चरतीकट् पच्चास्य । पदिकः ॥ श्वगणाद्वा ॥ ६ । ४ । १४ ॥ चरतीकट् । श्वगणिकी । श्वागणिकः ॥ वेतनादेर्जीवति ॥ ६ । ४ । १५ ॥ टान्तादिकण् । वैतनिकः । वाहिकः ॥ व्यस्ताच्च क्रयविक्रयादिकः ॥ ६ । ४ । १६ ॥ समस्तात् तेन जीवतीकः । क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥ वस्नात् ॥ ६ । ४ । १७ ॥ तेन जीवतीकः । वस्निकः ॥ आयुधादीयश्च ॥ ६ । ४ । १८ ॥ तेन जीवतीकः । आयुधीयः । आयुधिकः ॥ व्रातादीनञ् ॥ ६ । ३ । १९ ॥ तेन जीवति व्रातीनाभार्यः ॥ निर्वृत्तेऽक्षद्यूतादेः ॥

६ । ४ । २० ॥ टान्तादिकण् । आक्षद्यूतिकम् । आकुक्रामहतिकं वैरम् ॥ भावादिमः ॥ ६ । ४ । २१ ॥ तेन निर्वृत्ते पाकिमम् ॥ याचितापमित्यात्कण् ॥ ६ । ४ । २२ ॥ तेन निर्वृत्ते याचितकम् । आपमित्यकम् ॥ हरत्युत्सङ्गादेः ॥ ६ । ४ । २३ ॥ टान्तादिकण् । औत्सङ्गिकः । औडुपिकः ॥ भस्त्रादेरिकट् ॥ ६ । ३ । २४ ॥ टान्ताद्धरति । भस्त्रिकी । भरटिकी ॥ विवधवीवधाद्वा ॥ ६ । ४ । २५ ॥ तेन हरतीकट् । विवधिकी । वीवधिकी । वैवधिकः ॥ कुटिलिकाया अण् ६ । ४ । २६ ॥ अस्माट्टान्ताद्धरति । कौटिलकः । कर्मारादिः ॥ ओजःसहोम्भसो वर्तते ॥ ६ । ४ । २७ ॥ टान्तादिकण् । औजसिकः । साहसिकः । आम्भसिकः ॥ तं प्रत्यनोर्लोमेपकूलात् ॥ ६ । ४ । २८॥ वर्त्तते इत्यर्थे इकण् । प्रातिलोमिकः । आनुलोमिकः । प्रातीपिकः । आन्वीपिकः । प्रातिकूलिकः । आनुकूलिकः । अकर्मकस्यापि वृत्तेर्योगे प्रतिलोमादेः क्रियाविशेषणत्वात् द्वितीया ॥ परेर्मुखपार्श्वात् ॥ ६ । ४ । २९ ॥ तृतीयान्ताद्वर्तत इत्यर्थे इकण् । पारिमुखिकः । पारिपार्श्विकः ॥ रक्षदुञ्छतोः ॥ ६ । ४ । ३० ॥ द्वितीयान्तादिकण् । सामाजिकः । नागरिकः । बादरिकः ॥ पक्षिमत्स्यमृगार्थाद्घ्नति ॥ ६ । ४ । ३१ ॥ द्वितीयान्तादिकण् । पाक्षिकः । मात्स्यिकः । मार्गिकः । अर्थग्रहणात्तत्पर्यायेभ्यो विशेषेभ्यश्च भवति ॥ परिपन्थात्तिष्ठति च ॥ ६ । ४ । ३२ ॥ द्वितीयान्ताद् घ्नतीकण् । पारिपन्थिकश्चौरः । अत एव निर्देशात्परिपथशब्दस्येकणोऽन्यत्रापि वा परिपन्थदेशः । तेन परिपन्थं गच्छति ॥ परिपथात् ॥ ६ । ४ । ३३ ॥ द्वितीयान्तात्तिष्ठत्यर्थे इकण् । पारिपथिकः ॥ अवृद्धेर्गृह्णति गर्ह्ये ॥ ६ । ४ । ३४ ॥ द्वितीयान्तादिकण् । द्वैगुणिकः । अवृद्धेरिति किम् ? । वृद्धिं गृण्हातीति वाक्यमेव ॥ कुसीदादिकट् ॥ ६ । ४ । ३५ ॥ द्वितीयान्ताद् गर्ह्ये गृह्णति । कुसीदिकी ॥ दशैकादशादिकश्च ॥ ६ । ४ । ३६ ॥ द्वितीयान्ताभिन्द्ये गृह्णतीकट् । दशैकादशिका । दशैकादशिकी । दशैकादशादित्यत एव निपातनादकारान्तत्वम् । तच्च वाक्ये प्रयोगार्थम् । दशैकादशान् गृह्णाति । अन्ये दशैकादशगृह्णातीति

विगृह्णन्ति । तदपि अबाधकान्यपि निपातनानीति न्यायादुपपद्यते ॥ अर्थपदपदोत्तरपदललामप्रतिकण्ठात् ॥ ६ । ४ । ३७ ॥ द्वितीयान्ताद् गृह्णतीकण् । आर्थिकः । पादिकः । पौर्वपदिकः । लालामिकः । प्रातिकण्ठिकः । अव्ययीभावसमासाश्रयणादिह न प्रतिगतः कण्ठः प्रतिकण्ठस्तं गृह्णाति ॥ परदारादिभ्यो गच्छति ॥ ६ । ४ । ३८ ॥ द्वितीयान्तेभ्य इकण् । पारदारिकः । गौरुदारिकः ॥ प्रतिपथादिकश्च ॥ ६ । ४ । ३९ ॥ द्वितीयान्ताद्गच्छतीकण् । प्रतिपथिकः । प्रातिपथिकः ॥ माथोत्तरपदपदव्याक्रन्दाद्धावति ॥ ६ । ४ । ४० ॥ द्वितीयान्तादिकण् । दाण्डमाथकः । पादविकः । आक्रन्दिकः ॥ पश्चात्यनुपदात् ॥ ६ । ४ । ४१ ॥ द्वितीयान्ताद्धावतीकण् । आनुपदिकः ॥ सुस्नातादिभ्यः पृच्छति ॥ ६ । ४ । ४२ ॥ द्वितीयान्तेभ्य इकण् । सौस्नातिकः । सौखरात्रिकः ॥ प्रभूतादिभ्यो ब्रुवति ॥ ६ । ४ । ४३ ॥ द्वितीयान्तेभ्य इकण् । प्राभूतिकः । पार्याप्तिकः । क्रियाविशेषणादयमिष्यते तेनेह न । प्रभूतमर्थं ब्रुते इति । क्वचिदक्रियाविशेषणादपि । सौवर्गमनिकः ॥ माशब्द इत्यादिभ्यः ॥ ६ । ४ । ४४ ॥ ब्रुवतीकण् । माशब्दिकः । कार्यशब्दिकः ॥ शाब्दिकदार्दुरिकलालाटिककौक्कुटिकम् ॥ ६ । ३ । ४९ ॥ इकण्प्रत्ययान्तं निपात्यते । शाब्दिको वैयाकरणः । दार्दुरिको वादित्रकृत् । लालाटिकः प्रमत्तः सेवाकृत् । कौक्कुटिको भिक्षुः ॥ समूहार्थात्समवेते ॥ ६ । ४ । ४६ ॥ द्वितीयान्तादिकण् । सामूहिकः । सामाजिकः ॥ पर्षदो ण्यः ॥ ६ । ४ । ४७ ॥ अस्माद् द्वितीयान्तात् समवेते ण्यः । पार्षद्यः । परिषच्छब्दादपीच्छन्त्यन्ये । पारिषद्यः ॥ सेनाया वा ॥ ६ । ४ । ४८ ॥ द्वितीयान्तात् समवेते ण्यः । सैन्यः । सैनिकः ॥ धर्माधर्माच्चरति ॥ ६ । ४ । ४९ ॥ द्वितीयान्तादिकण् । धार्मिकः । आधर्मिकः ॥ षष्ठ्या धर्म्ये ॥ ६ । ४ । ५० ॥ इकण् । शौल्कशालिकम् ॥ ऋन्नरादेरण् ॥ ६ । ४ । ५१ ॥ षष्ठ्यन्ताद्धर्म्ये । नारं नुर्धर्म्यम् । पैत्रम् । नारम् । नृशब्देनैव सिद्धे नरशब्दादिकण् मा भूदिति तद्ग्रहणम् । माहिषम् ॥ विभाजयितृविशसितुर्णीड्लुक् च ॥६ । ४ । ५२॥ षष्ठ्यन्ताद् धर्म्येऽण् । वै

भाजित्रम् । वैशस्त्रम् ॥ **अवक्रये** ॥ ६ । ४ । ५३ ॥ षष्ठ्यन्तादिकण् । आपणिकः । लोकपीडया धर्मातिक्रमेणापि अवक्रयो भवतीत्ययं धर्माद्भिद्यते ॥ **तदस्य पण्यम्** ॥ ६ । ४ । ५४ ॥ इकण् । आपूपिकः ॥ **किशरादेरिकट्** ॥ ॥ ६ । ४ । ५५ ॥ तदस्य पण्यमिति विषये । कीशरिकी । तगरिकी ॥ **शलालुनो वा** ॥ ६ । ४ । ५६ ॥ तदस्य पण्यमिति विषये इकट् । शलालुकी । शालालुकी । शलालुः सुगन्धिद्रव्यविशेषः ॥ **शिल्पम्** ॥ ६ । ४ । ५७ ॥ तदस्येत्यर्थे इकण् तच्छिल्पं चेत् । नार्त्तिकः । मार्दङ्गिकः । मृदङ्गादिशब्दा वादनार्थवृत्तयः प्रत्ययमुत्पादयन्ति न द्रव्यवृत्तयः । उत्पादनार्थवृत्तिभ्यस्त्वनभिधानान्न अत एव कुम्भकारादावभिधेये मृदङ्गकरणादिभ्य एव प्रत्ययः । मार्दङ्गकरणिकः ॥ **मड्डुकझर्झराद्वाऽण्** ॥ ६ । ४ । ५८ ॥ तदस्य शिल्पमिति विषये । माड्डुकः । माड्डुकिकः । झार्झरः । झार्झरिकः ॥ **शीलम्** ॥ ६ । ४ । ५९ ॥ तदस्येत्यर्थे इकण् । आपूपिकः ॥ **अस्थाच्छत्रादेरञ्** ॥ ६ । ४ । ६० ॥ तदस्य शीलमिति विषये । आस्थः । छात्रः । तापसः ॥ **तूष्णीकः** ॥ ६ । ४ । ६१ ॥ तूष्णीमस्तदस्य शीलमिति विषये को मलुप् च निपात्यते । तूष्णीकः ॥ **प्रहरणम्** ॥ ६ । ४ । ६२ ॥ तदस्येत्यर्थ इकण् । तत्प्रहरणं चेत् । आसिकः ॥ **परश्वधाद्वाण्** ॥ ६ । ४ । ६३ ॥ तदस्य प्रहरणमिति विषये । पारश्वधः । पारश्वधिकः ॥ **शक्तियष्टेष्टीकण्** ॥ ६ । ४ । ६४ ॥ तदस्य प्रहरणमिति विषये । शाक्तीकी । याष्टीकी ॥ **वेष्टयादिभ्यः** ॥ ६ । ४ । ६५ ॥ तदस्यप्रहरणमित्यर्थे टीकण् । ऐष्टीकी । ऐष्टिकी । ऐषीकी । ऐपिकी ॥ **नास्तिकास्तिकदैष्टिकम्** ॥ ६ । ४ । ६६ ॥ तदस्येत्यर्थे इकणन्तं निपात्यते । नास्तिकः । आस्तिकः । दैष्टिकः ॥ **वृत्तोऽपपाठोऽनुयोगे** ॥ ६ । ४ । ६७ ॥ तदस्त्यर्थे इकण् । ऐकान्यिकः । वृत्त इति किम् ? । वर्त्तमाने वर्त्स्यति च न भवति । अपपाठ इति किम् ? । एकमन्यदस्य दुःखमनुयोगे । वृत्तम् । अनुयोग इति किम् ? । स्वैराध्ययने मा भूत् । अन्ये तु अपपाठादन्यत्राप्यध्ययनमात्रे प्रत्ययमिच्छन्ति ॥ **बहुस्वरपूर्वादिकः** ॥ ६ । ४ । ६८ ॥ प्रथमान्तात्षष्ठ्यर्थे तच्चेत्परीक्षायां वृत्तोऽपपाठः । ए-

कादशान्यिकः । अत्राप्यन्ये पूर्ववदन्यत्रापीच्छन्ति । द्वादशरूपिकः ॥ **भक्ष्यं हितमस्मै** ॥ ६ । ४ । ६९ ॥ इकण् । आपूपिकः ॥ **नियुक्तं दीयते** ॥ ६ । ४ । ७० ॥ प्रथमान्ताच्चतुर्थ्यर्थे इकण् । तच्चेन्नियुक्तमव्यभिचारेण नित्यं वा दीयते । आग्रभोजनिकः ॥ **श्राणामांसौदनादिको वा** ॥ ६ । ४ । ७१ ॥ तदस्मै नियुक्तं दीयते इति विषये । श्राणिका । मांसौदनिका । पक्षे इकण् । श्राणिकी । मांसौदनिकी । अन्ये त्विकं नेच्छन्ति ॥ **भक्तौदनाद्वाणिकट्** ॥ ६ । ४ । ७२ ॥ तदस्मै नियुक्तं दीयते इति विषये । भाक्तः । ओदनिकी । भाक्तिकः । औदनीकः ॥ ओदनशब्दादिकणं नेच्छन्त्यन्ये ॥ **नवयज्ञादयोऽस्मिन् वर्तन्ते** ॥ ६ । ४ । ७३ ॥ इकण् । नावयज्ञिकः । पाकयज्ञिकः ॥ **तत्र नियुक्ते** ॥ ६ । ४ । ७४ ॥ इकण् । शौल्कशालिकः । दौवारिकः ॥ **अगारान्तादिकः** ॥ ६ । ४ । ७५ ॥ तत्र नियुक्ते । देवागारिकः ॥ **अदेशकालादध्यायिनि** ॥ ६ । ४ । ७६ ॥ सप्तम्यन्तादिकण् ॥ आशुचिकः । सान्ध्यिकः । अदेशकालादिति किम् ? । स्वाध्यायभूमावध्यायी ॥ **निकटादिषु वसति** ॥ ६ । ४ । ७७ ॥ इकण् । नैकटिकः । आरण्यिको भिक्षुः । वार्क्षमूलिकः ॥ **सतीर्थ्यः** ॥ ६ । ४ । ७८ ॥ समानतीर्थात्तत्र वसत्यर्थे यो निपात्यते समानस्य च सभावः । सतीर्थ्यः ॥ **प्रस्तारसंस्थानतदन्तकठिनान्तेभ्यो व्यवहरति** ॥ ६ । ४ । ७९॥ इकण् । प्रास्तारिकः । सांस्थानिकः । कांस्यप्रस्तारिकः । गौसंस्थानिकः । वांशकठिनिकः । बहुवचनं कठिनान्तेति स्वरूपग्रहणव्युदासार्थं रूढ्यर्थं च । प्रस्तारसंस्थानाभ्यां तदन्ताभ्यां केचिन्नेच्छन्ति ॥ **संख्यादेश्चार्हदलुचः** ॥ ६ । ४ । ८० ॥ वक्ष्यमाणः प्रत्ययः स्यात् । चान्द्रायणिकः । द्वैचन्द्रायणिकः । संख्यादेरिति किम् ! । परमपारायणमधीते । चकारः केवलार्थः । आर्हदित्यत्राकारोऽभिविधौ । तेनार्हदर्थेऽपि भवति । द्विसाहस्रः । अलुच इति किम् ? । द्विशूर्पेण क्रीतेन क्रीतं द्विशौर्पिकम् ॥ **गोदानादीनां ब्रह्मचर्ये** ॥ ६ । ४ । ८१ ॥ इकण् । गौदानिकम् । आदित्यव्रतिकम् ॥ **चन्द्रायणं च चरति** ॥ ६ । ४ । ८२ ॥ अस्माद् द्वितीयान्ताद् गोदानादेश्च चरत्यर्थे इकण् । चान्द्रायणिकः ।

गौदानिकः ॥ देवव्रतादीन् डिन् ॥ ६ । ४ । ८३ ॥ चरति । देवव्रती । महाव्रती ॥ डकश्चाष्टाचत्वारिंशतं वर्षाणाम् ॥ ६ । ४ । ८४ ॥ चरत्यर्थे डिन् । अष्टाचत्वारिंशकः । अष्टाचत्वारिंशी ॥ चातुर्मास्यं तौ यलुक् च॥ ६ । ४ । ८५ ॥ चरति । चातुर्मासकः । चातुर्मासी ॥ क्रोशयोजनपूर्वाच्छतायोजनाच्चाभिगमार्हे ॥ ६ । ४ ।८६॥ पञ्चम्यन्तादिकण् । क्रौशशतिको मुनिः । यौजनशतिकः । यौजनिको दूतः ॥ तद्यात्येभ्यः ॥ ६ । ४ । ८७ ॥ इकण् । क्रौशशतिकः । यौजनशतिकः । यौजनिको दूतः ॥ पथ इकट् ॥ ६ । ४ । ८८ ॥ यात्यर्थे । पथिकी । द्विपथिकी । कटमकृत्वा इकड्वचनं परत्वात्समासान्ते कृतेऽपि यथा स्यादित्येवमर्थम् ॥ नित्यं णः पन्थश्च ॥ ६ । ४ । ८९ ॥ पथो याति । पान्थः । द्वैपन्थः ॥ शङ्कूत्तरकान्ताराजवारिस्थलजङ्गलादेस्तेनाहृते च ॥ ६ । ४ । ९० ॥ पथिन्नन्ताद् याति चार्थे इकण् । शाङ्कुपथिकः । औत्तरपथिकः । कान्तारपथिकः । आजपथिकः । वारिपथिकः । स्थालपथिकः । जाङ्गलपथिकः ॥ स्थलादेर्मधुकमरिचेऽण् ॥ ६ । ४ । ९१ ॥ पथिन्नन्तादाहृते । स्थालपथं । मधुकं मरिचं वा । मधुकमरिच इति किम् ? । स्थालपथिकमन्यत् ॥ तुरायणपारायणं यजमानाधीयाने ॥ ६ । ४ । ९२ ॥ यथासंख्यमिकण् । तौरायणिकः । पारायणिकः ॥ संशयं प्राप्ते ज्ञेये ॥ ६ । ४ । ९३ ॥ इकण् । सांशयिकोऽर्थः । ज्ञेय इति किम् ? । संशयितरि मा भूत् ॥ तस्मै योगादेः शक्ते ॥ ६ । ४ । ९४ ॥ इकण् । यौगिकः । सान्तापिकः ॥ योगकर्मभ्यां योकञौ ॥ ६ । ४ । ९५ ॥ चतुर्थ्यन्ताभ्यां शक्ते । योग्यः । कार्मुकम् ॥ यज्ञानां दक्षिणायाम् ॥ ६ । ४ । ९६ ॥ इकण् । आग्निष्टोमिकी ॥ तेषु देये ॥ ६ । ४ । ९७ ॥ यज्ञार्थेभ्यः सप्तम्यन्तेभ्यो देये इकण् । आग्निष्टोमिकम् । वाजपेयिकं भक्तम् ॥ काले कार्ये च भववत् ॥ ६ । ४ । ९८ ॥ देये प्रत्ययः । यथा वर्षासु भवं वार्षिकम् । तथा कार्यं देयं च । प्रत्ययस्य भावोऽत्रातिदिश्यते । नामात्र इति द्विगोः परस्य लुब् न । द्वैमासिकम् ॥ व्युष्टादिष्वण् ॥ ६ । ४ । ९९ ॥ देये कार्ये च । वैयुष्टम् । नैत्यम् ॥ बहुवचनादाकृतिगणो-

ऽयम् ॥ यथाकथाचाण्णः ॥ ६ । ४ । १०० ॥ देये कार्ये च । याथाकथाचम् तेन हस्ताद्यः ॥ ६ । ४ । १०१ ॥ देये कार्ये च । हस्त्यम् ॥ शोभमाने ॥ ६ । ४ । १०२ ॥ टान्तादिकण् । कार्णवेष्टकिकं मुखम् । असमर्थ-नञ्समासोऽप्यस्मिन् विषये भवति । कर्णवेष्टकाभ्यां न शोभते अकार्णवेष्टकिकम् ॥ कर्मवेषाद्यः ॥ ६ । ४ । १०३॥ टान्ताच्छोभमाने । कर्मण्यम् । शौर्यम् । वेष्यो नटः । पूर्ववन्नञ्समासः । अकर्मण्यः । केचिद्वेषस्थाने वेशं पठन्ति । वे-श्या नर्त्तकी ॥ कालात्परिजय्यलभ्यकार्यसुकरे ॥ ६ । ४ । १०४ ॥ टान्तादिकण् । मासिको व्याधिः पटः चा-न्द्रायणं प्रासादो वा । कालादिति किम् ? । चैत्रेण परिजय्यम् ॥ निर्वृत्ते ॥ ६ । ४ । १०५॥ कालार्थाट्टान्तादिकण् आह्निकम् ॥ तं भाविभूते ॥ ६ । ४ । १०६ ॥ कालार्थादिकण् । मासिक उत्सवः ॥ तस्मै भृताधीष्टे च ॥ ६ । ४ । १०७ ॥ कालार्थादिकण् । मासिकः कर्मकर उपाध्यायो वा ॥ षण्मासाद्वयसि ण्येकौ ॥ ६ । ४ । १०८ ॥ कालार्थात्तेन निर्वृत्ते तं भाविनि भूते तस्मै भृताधीष्टे चेति विषये । षाण्मास्यः । षण्मासिकः । अवयसीति किम् ? । षण्मास्यः ॥ समाया ईनः ॥ ६ । ४ । १०९ ॥ तेन निर्वृत्त इत्यादिपञ्चकविषये ईनः । समीनः ॥ रा-त्र्यहःसंवत्सराच्च द्विगोर्वा ॥ ६ । ४ । ११०॥ समान्तात्तेन निर्वृत्ते इत्यादिपञ्चकविषये ईनः । द्विरात्रीणः । द्व्यहीनः । द्विसंवत्सरीणः । द्विसमीनः । पक्षे इकण् । द्वैरात्रिकः । द्वैयन्हिकः । द्वैयह्निक इति तु द्व्यहशब्दात्समाहारद्विगोरिकणि । राज्यन्तादहरन्ताच्च परमपि समासान्तं बाधित्वानवकाशत्वादीन एव । तथा च समासान्तसंनियोगे उच्यमानो नादेशो न ॥ मानसंवत्सरस्याशाणकुलिजस्यानाम्नि ॥ ७ । ४ । १९ ॥ संख्यार्थाधिकाभ्यां परस्य ञ्णिति तद्धिते स्वरे-ष्वादेः स्वरस्य वृद्धिः । द्विकौडविकः । अधिककौडविकः । द्विषाष्टिकः । द्विसांवत्सरिकः । अशाणकुलिजस्येति किम् ? । द्वैशाणम् । द्वैकुलिजिकं । अनाम्नीति किम् ! । पाञ्चलोहितिकम् । द्वैसमिकः ॥ वर्षाद्दश्च वा ॥ ६ । ४ । १११ ॥ कालवाचिनो द्विगोस्तेन निर्वृत्त इत्यादिपञ्चकविषये ईनः । द्विवर्षः । द्विवर्षीणः ॥ संख्याधिकाभ्यां वर्षस्या-

भाविनि ॥ ७ । ४ । १८ ॥ ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः । द्विवार्षिकः । अधिकवार्षिकः । अभाविनीति किम् ? । द्वैवर्षिकं धान्यम् । अधीष्टभृतयोः प्रत्ययो न भाविनीति प्रतिषेधो न । गम्यते ह्यत्र भविष्यत्ता न तु प्रत्ययार्थः ॥ **प्राणिनि भूते** ॥ ६ । ४ । ११२ ॥ कालार्थवर्षान्ताद् द्विगोरः । द्विवर्षो वत्सः । प्राणिनीति किम् ? । द्विवर्षः । द्विवर्षीणः । द्विवार्षीकः सरकः ॥ **मासाद्वयसि यः** ॥ ६ । ४ । ११३ ॥ द्विगोर्भूते । द्विमास्यःशिशुः । वयसीति किम् ? । द्वैमासिको व्याधिः ॥ **ईनञ् च** ॥ ६ । ४ । ११४ ॥ मासाद्भूते यो वयसि । मासीनो मास्यो दारकः । ञकारो वृद्धिहेतुत्वेन पुंवद्भावाभावार्थः ॥ **षण्मासाद्ययणिकण्** ॥ ६ । ४ । ११५ ॥ कालार्थाद् भूते वयसि । षण्मास्यः । षाण्मास्यः । षाण्मासिकः शिशुः ॥ **सोऽस्यब्रह्मचर्यतद्वतोः** ॥ ६ । ४ । ११६ ॥ प्रथमान्तात् कालार्थात् इकण् । मासिकं ब्रह्मचर्यम् । मासिकस्तद्वान् ॥ **प्रयोजनम्** ॥ ६ । ४ । ११७ ॥ तदस्येकण् ॥ जैनमहिकं देवागमनम् ॥ **एकागाराच्चौरे** ॥ ६ । ४ । ११८ ॥ तदस्य प्रयोजनमिति विषये इकण् । ऐकागारिकः । चौरे नियमार्थं वचनम् । तेनेह न एकागारं प्रयोजनमस्य भिक्षोः ॥ **चूडादिभ्योऽण्** ॥ ६ । ४ ।११९ ॥ तदस्य प्रयोजनमिति विषये । चौडम् । श्राद्धम् ॥ **विशाखाषाढान्मन्थदण्डे** ॥ ६ । ४ । १२० ॥ तदस्य प्रयोजनमिति विषये यथासंख्यमण् । वैशाखोमन्थः । आषाढो दण्डः ॥ **उत्थापनादेरीयः** ॥ ६ । ४ । १२१ ॥ तदस्य प्रयोजनमिति विषये । उत्थापनीयः । उपस्थापनीयः ॥ **विशिरुहिपदिपूरिसमापेरनात् सपूर्वपदात्** ॥ ६ । ४ । १२२ ॥ तदस्य प्रयोजनमिति विषये ईयः । गृहप्रवेशनीयम् । आरोहणीयम् । गोप्रपदनीयम् । प्रपापूरणीयम् । अङ्गसमापनीयम् ॥ **स्वर्गस्वस्तिवाचनादिभ्यो यलुपौ** ॥ ६ । ४ । १२३ ॥ तदस्य प्रयोजनमित्यर्थे यथासंख्यम् । स्वर्ग्यम् । आयुष्यम् । स्वस्तिवाचनम् । शान्तिवाचनम् । अत्रेकणो लुप् ॥ **समयात् प्राप्तः** ॥ ६ । ४ । १२४ ॥ प्रथमान्तात्षष्ठ्यर्थे इकण् चेत् समयः सामयिकं कार्यं ॥ **ऋत्वादिभ्योऽण्** ॥ ६ । ४ । १२५ ॥ प्रथमान्तेभ्यः सोऽ-

ऽस्य प्राप्त इत्यर्थे । आर्तवं फलम् । औपवस्त्रम् ॥ कालाद्यः ॥ ६ । ४ । १२६ ॥ सोऽस्य प्राप्त इत्यर्थे कालयस्तापसः । काल्या मेघाः ॥ दीर्घः ॥ ६ । ४ । १२७ ॥ कालात्प्रथमान्तादस्येत्यर्थे इकण् प्रथमान्तश्चेद्दीर्घः । कालिकमृणम् । योगविभागादिकण् ॥ आकालिकमिकश्चाद्यन्ते ॥ ६ । ४ । १२८ ॥ आकालादिक इकण् च भवत्यर्थे आदिरेव यद्यन्तः । आकालिकोऽनध्यायः । पूर्वेद्युर्यस्मिन् काले प्रवृत्तोऽपरेद्युरप्यातस्मात् कालाद्भवतीत्यर्थः । आकालिका आकालिकी वा विद्युत् । आजन्मकालमेव स्याज्जन्मानन्तरनाशिनीत्यर्थः ॥ त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे ॥ ६ । ४ । १२९ ॥ त्रिंशकम् । विंशकम् । त्रिंशकः । विंशकः आर्हदर्थं इत्यभिविधावाकारः । असंज्ञायामिति किम् ? । त्रिंशत्कम् । विंशतिकम् ॥ संख्याडतेश्चाशत्तिष्टेः कः ॥ ६ । ४ । १३० ॥ त्रिंशद्विंशतिभ्यामार्हदर्थे द्विकम् । बहुकम् । गणकम् । यावत्कम् । कतिकम् । त्रिंशत्कम् । विंशतिकम् । अशत्तिष्टेरिति किम् । चात्वारिंशत्कम् । साप्ततिकम् । षाष्टिकम् ॥ कसमासेऽध्यर्धः ॥ १ । १ । ४१ ॥ संख्यावत् । अध्यर्धकम् । अध्यर्धशूर्पम् ॥ अर्धपूर्वपदः पूरणः ॥ १ । १ । ४२ ॥ कसमासे संख्यावत् । अर्धपञ्चकम् । अर्धपञ्चमशूर्पम् ॥ शतात्केवलादतस्मिन्येकौ ॥ ६ । ४ । १३१ ॥ आर्हदर्थे । शत्यम् । शतिकम् । केवलादिति किम् । द्विशतकम् । अतस्मिन्निति किम् । शतकं स्तोत्रम् । अत्रहि प्रकृत्यर्थ एव श्लोकाध्यायशतं प्रत्ययान्तेनाभिधीयते अन्यस्मिंस्तु शते भवत्येव शत्यं शतिकं शाकटशतम् ॥ वातोरिकः ॥ ६ । ४ । १३२ ॥ संख्याया आर्हदर्थे । यावतिकम् । यावत्कम् । विधानसामर्थ्यादिकारलोपो न ॥ कार्षापणादिकट् प्रतिश्चास्य वा ॥ ६ । ४ । १३३ ॥ आर्हदर्थे । कार्षापणिकी । प्रतिकी ॥ अर्धात्पलकंसकर्षात् ॥ ६ । ४ । १३४ ॥ आर्हदर्थे इकट् । अर्धपलिकम् । अर्धकंसिकम् । अर्धकर्षिकी ॥ कंसार्धात् ॥ ६ । ४ । १३५ ॥ आर्हदर्थे इकट् । कंसिकी । अर्धिकी ॥ सहस्रशतमानादण् ॥ ६ । ४ । १३६ ॥ आर्हदर्थे । केकणोरपवादः । साहस्रः । शातमानः । वसनादित्यत्र सहस्रश-

तमानग्रहणमकृत्वा ऽणूवचनं नवाण इत्येवमर्थम् ॥ **शूर्पाद्वाञ्** ॥ ६ । ४ । १३७ ॥आर्हदर्थे । शौर्पम् । शौर्पिकम् ॥ **वसनात्** ॥ ६ । ४ । १३८ ॥ आर्हदर्थेऽञ् । वासनम् ॥ **विंशतिकात्** ॥ ६ । ४ । १३९ ॥ आर्हदर्थेऽञ् । वैंशतिकम् ॥ **द्विगोरीनः** ॥ ६ । ४ । १४० ॥ विंशतिकशब्दान्तादार्हदर्थे । द्विविंशतिकीनम् । विधानसामर्थ्याल्लुप् न ॥ **अनाम्न्यद्विः लुप्** ॥ ६ । ४ । १४१ ॥ द्विगोरार्हदर्थे जातस्य प्रत्ययस्य । द्विकंसम् । अनाम्नीति किम् ! । पाञ्चलोहितिकम् । अद्विरिति किम् ! । द्विशूर्पेण क्रीतम् । द्विशौर्पिकम् । संख्यान्ताद्द्विगोर्लुपं नेच्छन्त्येके ॥ **क्यङ्मानिपित्तद्धिते** ॥ ३ । २ । ६० ॥ परतःस्त्री पुंवदनूङ् । श्येतायते । दर्शनीयमानी । पञ्चगर्गः ॥ **नवाऽणः** ॥ ६ । ४ । १४२ ॥ द्विगोः परस्यार्हदर्थे पिल्लुब् न तु द्विः । द्विसहस्रम् । द्विसाहस्रम् ॥ **सुवर्णकार्षापणात्** ॥ ६ । ४ । १४३ ॥ द्विगोः परस्यार्हदर्थे प्रत्ययस्य वा लुप् न तु द्विः । द्विसुवर्णम् । द्विसौवर्णिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् । द्विप्रति । द्विप्रतिकम् ॥ **द्वित्रिबहोर्निष्कविस्तात्** ॥ ६ । ३ । १४४ ॥ द्विगोरार्हदर्थे प्रत्ययस्य लुब् वा न तु द्विः । द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् । बहुनिष्कम् । बहुनैष्किकम् । द्विविस्तम् । द्विवैस्तिकम् । त्रिविस्तम् । त्रिवैस्तिकम् । बहुविस्तम् । बहुवैस्तिकम् ॥**शताद्यः**॥ ६।४ । १४५॥ द्विगोरार्हदर्थे वा । द्विशत्यम् । द्विशतम् ॥ **शाणात्** ॥ ६ । ४ । १४६ ॥ द्विगोरार्हदर्थे यो वा । पञ्चशाण्यम् । पञ्चशाणम् ॥ **द्वित्र्यादेर्यण् वा** ॥ ६ । ४ । १४७ ॥ शाणान्तात् द्विगोरार्हदर्थे । वाग्रहणमुत्तरत्र वा निवृत्त्यर्थम् । द्विशाण्यम् । द्वैशाणम् । द्विशाणम्। त्रिशाण्यम् । त्रैशाणम् । त्रिशाणम् ॥ **पणपादमाषाद्यः** ॥ ६ । ४ । १४८ ॥ द्विगोरार्हदर्थे यः । विधानसामर्थ्यान्न लुप् । द्विपण्यम् । द्विपाद्यम् । अध्यर्धमाष्यम् ॥ **खारीकाकणीभ्यः कच्** ॥ ६ । ४ । १४९ ॥ एतदन्ताद् द्विगोराभ्यां चार्हदर्थे कच् । द्विखारीकम् । द्विकाकणीकम् । खारीकम् । काकणीकम् ॥ **मूल्यैः क्रीते** ॥ ६ । ४ । १५०॥ यथोक्तं प्रत्ययाः। प्रास्थिकम् । त्रिंशकम् वृत्तौ संख्याविशेषानवगमाद् द्विवचनबहुवचनान्तान्न । प्रस्थाभ्यां प्रस्थैर्वा क्रीत-

मिति । यत्र तु संख्याविशेषावगमे प्रमाणमस्ति तत्र भवत्येव । माषिकम् ॥ **अर्धात्परिमाणस्यानतो वा त्वादेः ॥ ७ । ४ । २०॥** ञ्णिति तद्धिते स्वरेष्वादेः स्वरस्य वृद्धिः । अर्धकौडविकम् । आर्द्धकौडविकम् ।अनत इति किम् ? । अर्धप्रस्थिकम् । आर्द्धप्रस्थिकम् । आदिविकल्प उत्तरवृद्ध्यनपेक्ष इति भवत्येव । अतः प्रतिषेधादाकारस्य वृद्धिः स्यादेव । तेनार्धखारीभार्यं इत्यत्र पुंवद्भावो न ॥ **तस्य वापे ॥ ६ । ४ । १५१ ॥** यथोक्तमिकणादयः । प्रास्थिकम् । खारीकम् ॥ **वातपित्तश्लेष्मसंनिपाताच्छमनकोपने ॥ ६ । ४ । १५२ ॥** षष्ठ्यन्ताद्यथोक्तमिकण् । वातिकम् । पैत्तिकम् । श्लैष्मिकम् । सान्निपातिकम् ॥ **हेतौ संयोगोत्पाते ॥ ६ । ४ । १५३ ॥** षष्ठ्यन्ताद्यथोक्तं प्रत्ययाः । शत्यः । शतिको दातृसंयोगः । सौमग्रहणिको भूमिकम्पः ॥ **पुत्राद्येयौ ॥ ६ । ४ । १५४ ॥** षष्ठ्यन्ताद्धेतौ चेद्धेतुः संयोग उत्पातो वा । पुत्र्यः । पुत्रीयः ॥ **द्विस्वरब्रह्मवर्चसाद्योऽसंख्यापरिमाणाश्वादेः ॥ ६ । ४ । १५५ ॥** षष्ठ्यन्ताद्धेतौ संयोगोत्पाते । धन्यः । ब्रह्मवर्चस्यः । गव्य इति तु गोस्वरे य इति भविष्यति । संख्यादिवर्जनं किम् ? । पञ्चकः । प्रास्थिकः । आश्विकः ।गाणिकः ॥ **पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ् ॥ ६ । ४ । १५६॥** षष्ठ्यन्तात्तस्य हेतुः संयोगोत्पात इति विषये । पार्थिवः । सार्वभौमः । ईशो ज्ञातः संयोगोत्पातरूपो हेतुर्वा ॥ **लोकसर्वलोकाज्ज्ञाते । ६ । ४ । १५७ ॥** षष्ठ्यन्तादिकण् । लौकिकः । सार्वलौकिकः ॥ **तदत्रास्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम् ॥ ६ । ४ । १५८ ॥** यथोक्तं प्रत्ययः ॥ वृद्धिः, पञ्चकं शतम् । आयः, पञ्चको ग्रामः । लाभः, पञ्चकः पटः । उपदा लञ्चा, पञ्चको व्यवहारः । शुल्कम्, पञ्चकं शतम् ।एवं शत्यं शतिकम् । पञ्चको देवदत्तः। वृद्ध्यादिग्रहणं किम् ? । पञ्चमूल्यमस्मिन्नस्मै वा दीयते ॥ **पूरणाद्‌ग्रन्थादिकः ॥ ६ । ४ । १५९ ॥** प्रथमान्तादस्मिन्नस्मै वा दीयते इत्यर्थयोः प्रथमान्तं चेद्वृद्ध्यादि । इकणिकटोरपवादः । द्वितीयमस्मिन्नस्मै वा वृद्ध्यादि देयम् । द्वितीयिकः । अर्धिकः ॥ **भागाद्येकौ ॥ ६ । ४ । १६० ॥** तदस्मिन्नस्मै वा वृद्ध्याद्यन्यतमं देयमिति विषये । भाग्यः । भागिकः ॥

तं पचति द्रोणाद्वाऽञ् ॥ ६ । ४ । १६१ ॥ द्रौणी । द्रौणिकी स्थाली गृहिणी वा ॥ संभवदवहरतोश्च ॥ ६ । ४ । १६२ ॥ द्वितीयान्तात्पचति यथोक्तं प्रत्ययः । आधेयस्य प्रमाणानतिरेकेण धारणं सम्भवः । अतिरेकेणावहारः । प्रास्थिकी स्थाली ॥ पात्राचिताढकादीनो वा ॥ ६ । ४ । १६३ ॥ द्वितीयान्तात् पचदाद्यर्थे । पात्रीणा । पात्रिकी । आचीतीना । आचितिकी । आढकीना । आढकिकी ॥ द्विगोरीनेकटौ वा ॥ ६ । ४ । १६४ ॥ पात्राचिताढकान्ताद् द्वितीयान्तात्पचदाद्यर्थे । पक्षे इकण् तस्य चानाम्नीत्यादिना लुप् , नानयोर्विधानबलात् । द्विपात्रीणा । द्विपात्रिकी । द्विपात्री । द्व्याचितीना । द्व्याचितिकी । द्व्याचिता । द्व्याढकीना । द्व्याढकिकी । द्व्याढकी ॥ कुलिजाद्वा लुप् च ॥ ६ । ४ । १६५ ॥ द्विगोर्द्वितीयान्तात्पचदाद्यर्थे ईनेकटौ वा । पक्षे इकण् तस्य च वा लुप् । द्विकुलिजीना । द्विकुलिजिकी । द्विकुलिजी । द्वैकुलिजिकी । अन्ये तु लुब् विकल्पं न मन्यन्ते ॥ वंशादेर्भाराद्धरद्वहदावहत्सु ॥ ६ । ४ । १६६ ॥ वंशादेः परो यो भारस्तदन्ताद् द्वितीयान्तादेष्वर्थेषु यथोक्तं प्रत्ययः । वांशभारिकः । कौटभारिकः । भारादिति किम् ! । वंशं हरतिः । अपरोऽर्थो भारभूतेभ्यो वंशादिभ्यो द्वितीयान्तेभ्यो हरदादिष्वर्थेषु यथोक्तं प्रत्ययः । वांशिकः । कौटिकः । बाल्वजिकः । भारादिति किम् ! । एकं वंशं हरति ॥ द्रव्यवस्नात्केकम् ॥ ६ । ४ । १६७ ॥ द्वितीयान्ताद्धरत्याद्यर्थे यथासंख्यम् । द्रव्यकः । वस्निकः ॥ सोऽस्य भृतिवस्नांशम् ॥ ६ । ४ । १६८ ॥ यथाविहितं प्रत्ययः । पञ्चकः कर्मकरः पटोग्रामो वा साहस्रः ॥ मानम् ॥ ६ । ४ । १६९ ॥ प्रथमान्तात्षष्ठ्यर्थे यथोक्तं प्रत्ययः स्यन्तं चेन्मानम् । द्रौणिकः । खारीको राशिः । मानसंवत्सरेत्यादौ संवत्सरग्रहणात् ॥ कालो न मानग्रहणेन गृह्यते । तेन मासोमानमस्येत्यादौ न प्रत्ययः ॥ जीवितस्य सन् ॥ ६ । ४ । १७० ॥ जीवितमानार्थात्स्यन्तात्षष्ठ्यर्थे यथोक्तं प्रत्ययस्तस्य च न लुप् । षाष्टिकः । द्विषाष्टिको ना । वृत्तौ वर्षशब्दलोपात्षष्ट्यादयो जीवितमानं भवन्ति । यथा शतायुर्वै पुरुष इति । मानमित्यनेनैव सिद्धे प्रास्थिक इत्यादौ व्रीह्यादय एव मेयास्त एव च

प्रत्ययार्थः अत्र तु जीवितं मेयं पुरुषस्तु प्रत्ययार्थ इत्येतदर्थं लुबभावार्थं चेदम् ॥ संख्यायाः संघसूत्रपाठे ॥ ६ । ४।१७१ ॥ अस्मात्स्यन्तादस्य मानमित्यर्थे यथोक्तं प्रत्ययः षष्ठ्यर्थश्चेत्सङ्घः सूत्रं पाठो वा । पञ्चकः संघः । अष्टकं पाणिनीयं सूत्रम् । अष्टकः पाठः । संघसूत्रपाठ इति किम् ? । पञ्चतयं पदम् । तयट् बाधनार्थं वचनम् । अभेदरूपापन्ने संघादौ तयायटोर्बाधकमिदम् । भेदरूपापन्ने तु तयडेव । स्याद्वादाश्रयणाच्चात्र भेदाभेदयोः सम्भवः ॥ नाम्नि ॥ ६ । ४ । १७२ ॥ संख्यार्थात्तदस्य मानमित्यर्थे प्रत्ययः । पञ्चकाः शकुनयः । योगविभागकरणात् पञ्चकास्त्रिका इति स्वार्थे एव वा प्रत्ययः ॥ विंशत्यादयः ॥ ६ । ४ । १७३ ॥ तदस्य मानमित्यर्थे साधवो नाम्नि । द्वौ दश तौ मानमेषां विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । शतम् । सहस्रम् । अयुतम् । नियुतम् । प्रयुतम् । अर्बुदम् । न्यर्बुदम् । बहुवचनाल्लक्ष्यकोटिखर्वनिखर्वादयः पङ्क्तिः । पङ्क्तिश्छन्दः । यदत्र लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । लिङ्गसंख्यानियमश्च विंशत्याद्याश्रितादिति सिद्धः ॥ त्रैंशं चात्वारिंशम् ॥ ॥ ६ । ४ । १७४ ॥ त्रिंशच्चत्वारिंशदित्येताभ्यां तदस्यमानमित्यर्थे ऽण् नाम्नि त्रैंशानि । चात्वारिंशानि ब्राह्मणानि ॥पञ्चद्दशद्वर्गे वा॥६।४।१७५॥ एतौ तदस्य मानमित्यर्थे वर्गेऽर्थे वा डत्प्रत्ययान्तौ निपात्येते । पञ्चत् । दशत् । पञ्चपञ्चकः । दशको वर्गः ॥ स्तोमे डट् ॥ ६ । ४ । १७६ ॥ संख्यार्थात्तदस्य मानमिति विषये । विंशः स्तोमः ॥ तमर्हति ॥ ६ । ४ । १७७ ॥ यथाविधि प्रत्ययः । वैषिकः । साहस्रः । भोजनमर्हतीत्यादावनभिधानान्न ॥ दण्डादेर्यः ॥ ६ । ४ । १७८ ॥ द्वितीयान्तादर्हति । दण्ड्यः । मुसल्यः । अर्घ्यः ॥ यज्ञादियः ॥ ६ । ४ । १७९ ॥ द्वितीयान्तादर्हति । यज्ञियो देशः ॥ पात्रात्तौ ॥ ६ । ४ । १८० ॥ द्वितीयान्तादर्हति । पात्र्यः । पात्रियः ॥ दक्षिणाकडङ्गरस्थालीबिलादीययौ ॥ ६ । ४ । १८१ ॥ द्वितीयान्तादर्हति । दक्षिणीयो दक्षिण्यो गुरुः । कडङ्गरीयो कडङ्गर्यो गौः । कडङ्गरं माषादिकाष्ठम् । स्थालीबिलीयाः स्थालीबिल्यास्तण्डुलाः ॥ छेदादेर्नित्यम् ॥ ६ । ४ । १२८॥

द्वितीयान्तादर्हति यथोक्तं प्रत्ययः । नित्यमित्यर्हतीत्यस्य विशेषणम् । छैदिकः । भैदिकः ॥ **विरागाद् विरङ्गश्च** ॥ ६ । ४ । १८३ ॥ द्वितीयान्तान्नित्यमर्हत्यर्थे यथाविधि प्रत्ययः । वैरङ्गिकः ॥ **शीर्षच्छेदाद्यो वा** ॥ ६ । ४ । १८४ ॥ द्वितीयान्तान्नित्यमर्हत्यर्थे । शीर्षच्छेद्यश्चौरः । शैर्षच्छेदिकः ॥ **शालीनकौपीनार्त्विजीनम्** ॥ ६ । ४ । १८५ ॥ एते तमर्हतीत्यर्थे ईनञन्ता निपात्याः । शालीनोऽधृष्टः । अकारस्य वृद्धिनिमित्तत्वात्पुंवद्भावो न । शालीनाभार्यः । कौपीनं पापकर्मेति । आर्त्विजीनो यजमानः ऋत्विग् वा ॥ इतीकणधिकारः ॥

॥ यः ॥ ७ । १ । १ ॥ यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रेपादर्वाग् य इत्यधिकृतं ज्ञेयम् ॥ **वहतिरथयुगप्रासङ्गात्** ॥ ७ । १ । २ ॥ तमित्यनुवर्त्तते । द्वितीयान्ताद्यः । रथ्यः । द्विरथ्यः । युग्यः । इहानभिधानान्न कालसंज्ञकं युगंवहति राजा । इदमर्थविवक्षायामणूबाधनार्थं युगग्रहणम् । प्रासङ्गो वत्सदमनस्कन्धकाष्ठम् । प्रासङ्ग्यः । यस्त्वन्यत् यत्प्रसङ्गादागतं प्रासङ्गमिति तद्वहति न भवत्यनभिधानात् । अलुगर्थं रथग्रहणम् । तेन द्विगौ रूपद्वयं संपन्नम् ॥ **धुरो यैयण्** ॥ ७ । १ । ३ ॥ द्वितीयान्ताद्वहति ॥ **न यि तद्धिते** ॥ २ । १ । ६५ ॥ र्वोः परयोर्नामिनो दीर्घः । धुर्यः । यिति किम् ? । गीर्वत् । तद्धित इति किम् ? । गीर्यति । गीर्यते । कीर्यते । केचित्तु क्यनक्यङोरपि प्रतिषेधमिच्छन्ति । धुर्यामित्यादौ तु बहिरङ्गस्य यत्वस्यासिद्धत्वान्न भवति । धौरेयः ॥ **वामाद्यादेरीनः** ॥ ७ । १ । ४ ॥ धुरन्तादमन्ताद्वहति । वामधुरीणः । सर्वधुरीणः ॥ **अश्चैकादेः** ॥ ७ । १ । ५ ॥ धुरन्तादमन्ताद्वहत्यर्थे ईनः । एकधुरः । एकधुरीणः ॥ **हलसीरादिकण्** ॥ ७ । १ । ६ ॥ तं वहत्यर्थे । हालिकः । सैरिकः ॥ **शकटादण्** ॥ ७ । १ । ७ ॥ तं वहत्यर्थे । शाकटो गौः । ननु तस्येदमिति शकटादण् हलसीरादिकण् इति हलसीराभ्यामिकण् च सिद्ध एव । सत्यम् । रथवदेव तदन्तार्थमुपादानम् । तेनात्रापि द्विगौ रूपद्वयम् । अन्ये तु शकटहलसीरेभ्य इदमर्थविवक्षायां प्रत्ययमिच्छन्ति न वहत्यर्थे । हलसीराभ्यां तु तदन्तविधिं नेच्छ-

स्येव ॥ विध्यत्यनन्येन ॥ ७ । १ । ८ ॥ द्वितीयान्ताद्यः । पद्याः शर्कराः । अनन्येनेति किम् ! । चौरं विध्यति चैत्रः । पादौ विध्यन्ति शर्कराः सुखेनेत्यत्र तु अप्रधानस्य सापेक्षत्वान्न । साधनप्रधाने हि तद्धिते क्रियाऽप्रधानमेव । अनभिधानाद्वा । सुखेन पद्या इत्युक्ते हि सुखस्योपलक्षणत्वं सह योगो वा प्रतीयते न व्यधनं प्रति करणत्वम् ॥ धनगणाल्लब्धरि ॥ ७ । १ । ९ ॥ अमन्ताद्यः । धन्यः । गण्यः ॥ णोऽन्नात् ॥ ७ । १ । १० ॥ अमन्ताल्लब्धरि । आन्नः ॥ हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम् ७ । १ । ११ ॥ एतेऽर्थविशेषेषु यान्ता निपात्याः । हृद्यमौषधम् । पद्यः । पङ्कः । तुल्यं भाण्डम् । मूल्यं धान्यम् । वश्यो गौः । पथ्यमोदनादि । वयस्यः सखा । धेनुष्याः पीतदुग्धा गौः । गार्हपत्यो नामाग्निः । जन्या वरवयस्याः । धर्म्यं सुखम् ; नौविषेण तार्यवध्ये ॥ ७ । १ । १२ ॥ यथासंख्यं यः । नाव्या नदी । विष्यो गजः ॥ न्यायार्थादनपेते ॥ ७ । १ । १३ ॥ यः । न्याय्यम् । अर्थ्यम् ॥ मतमदस्य करणे ॥ ७ । १ । १४ ॥ यः । करणं साधकतमं कृतिर्वा । मत्यम् । मद्यम् ॥ तत्र साधौ ॥ ७ । १ । १५ ॥ यः । सभ्यः ॥ पथ्यतिथिवसतिस्वपतेरेयण् ॥ ७ । १ । १६ ॥ तत्र साधौ । पाथेयम् । आतिथेयम् । वासतेयम् । स्वापतेयम् ॥ भक्ताण्णः ॥ ७ । १ । १७ ॥ तत्र साधौ । भाक्तः शालिः ॥ पर्षदो ण्यणौ ॥ ७ । १ । १८ ॥ तत्र साधौ । पार्षद्यः । पार्षदः । परिषदोऽपीच्छन्त्यन्ये ॥ सर्वजनाण्ण्येनञौ ॥ ७ । १ । १९ ॥ तत्र साधौ । सार्वजन्यः । सार्वजनीनः ॥ प्रतिजनादेरीनञ् ॥ ७ । १ । २० ॥ तत्र साधौ । प्रातिजनीनः । आनुजनीनः ॥ कथादेरिकण् ॥ ७ । १ । २१ ॥ तत्र साधौ । काथिकः । वैकथिकः ॥ देवतान्तात्तदर्थे ॥ ७ । १ । २२ ॥ यः । अग्निदेवत्यं हविः ॥ पाद्यार्घ्ये ॥ ७ । १ । २३ ॥ एतौ तदर्थे यान्तौ निपात्यौ । पाद्यम् । अर्घ्यम् ॥ एयोऽतिथेः ॥ ७ । १ । २४ ॥ तदर्थेऽर्थे । आतिथ्यम् ॥ सादेश्चातदः ॥ ॥ ७ । १ । २५ ॥ अधिकारोऽयम् । केवलस्य वक्ष्यमाणो विधिर्वेदितव्यः ॥ हलस्य कर्षे ॥ ७ । १ । २६ ॥ यः

। हल्या । द्विहल्या ॥ **सीतया संगते** ॥ ७ । १ । २७ ॥ यः । सीत्यम् । द्विसीत्यम् । इति याधिकारः ॥ **ईयः** ॥ ७ । १ । २८ ॥ आतदोऽर्थेष्वधिकृतो वेदितव्यः ॥ **हविरन्नभेदापूपादेर्यो वा** ॥ ७ । १ । २९ ॥ आतदोऽर्थेष्वधिक्रियते । ईयापवादः । आमिक्ष्यम् । आमिक्षीयम् । ओदन्याः । ओदनीयास्तण्डुलाः । अपूप्यम् । अपूपीयम् । यवापूप्यम् । यवापूपीयम् । अपूपादिषु येऽन्नभेदशब्दा अपूपादयस्तेषां केनचिदाकारसादृश्येनार्थान्तरवृत्तौ प्रत्ययार्थमुपादानम् । केचित्त्वपूपादिपठितान्नभेदव्यतिरिक्तानामन्नभेदानां तदन्तविधिं नेच्छन्ति ॥ **उवर्णयुगादेर्यः** ॥ ७ । १ । ३० ॥ आतदोऽर्थेषु । शङ्कव्यं दारु । युग्यम् । हविष्यम् । गव्यम् । सुयुग्यम् । गोग्रहणं तदन्तार्थम् । इह यग्रहणं बाधकबाधनार्थम् । सनङ्गव्यं चर्म ॥ **नाभेर्नभ् चाऽदेहांशात्** ॥ ७ । १ । ३१ ॥ आतदोऽर्थेषु यः । नभ्यमञ्जनम् । अदेहांशादिति किम् ? । नाभ्यं तैलम् ॥ **न् चोधसः** ॥ ७ । १ । ३२ ॥ आतदोऽर्थेषु यः । ऊधन्यम् ॥ **शुनो वश्चोदूत्** ॥ ७ । १ । ३३ ॥ आतदोऽर्थेषु यः । अभेदनिर्देशः सर्वादेशार्थः । शुन्यम् । शून्यम् ॥ **कम्बलान्नाम्नि** ॥ ७ । १ । ३४ ॥ आतदोऽर्थेषु यः । कम्बल्यमूर्णापलशतम् । अशीतिशतमित्यन्ये । षट्षष्टिशतमित्यपरे । नाम्नीति किम् ? । कम्बलीयोर्णा ॥ **तस्मै हिते** ॥ ७ । १ । ३५ ॥ यथाऽधिकृतं प्रत्ययः । वत्सीयः । आमिक्ष्यः । आमिक्षीयः । युग्यः ॥ **न राजाचार्यब्राह्मणवृष्णः** ॥ ॥ ७ । १ । ३६ ॥ चतुर्थ्यन्तात्तद्धितेऽधिकृतः प्रत्ययः । राज्ञे आचार्याय ब्राह्मणाय वृष्णे वा हितमिति वाक्यमेव ॥ **प्राण्यङ्गस्य खलतिलयववृषब्रह्ममाषाद्यः** ॥ ७ । १ । ३७ ॥ चतुर्थ्यन्ताद्धिते । दन्त्यम् । रथ्या भूमिः । खल्यम् । तिल्यम् । यव्यम् । वृष्यम् । ब्रह्मण्यो देशः । माष्यः । राजमाष्यः ॥ **अव्यजात्थ्यप्** ॥ ७ । १ । ३८ ॥ तस्मै हिते । अविथ्यम् । अजथ्यम् । पित्वं पुंवद्भावार्थम् । अजथ्या यूतिः ॥ **चरकमाणवादीनञ्** ॥ ७ । १ । ३९ ॥ तस्मै हिते । चारकीणः । माणवीनः ॥ **भोगोत्तरपदात्मभ्यामीनः** ॥ ७ । १ । ४० ॥ तस्मै हिते । मातृभोगीणः ॥ **क्षुभ्नादीनाम्** ॥ २ । ३ । ९६ ॥ नाण् न । आचा-

यँभोगीनः ॥ **ईनेऽध्वात्मनोः** ॥ ७ । ४ । ४८ ॥ अन्त्यस्वरादेर्लुग्न । आत्मनीनः ॥ **पञ्चसर्वविश्वाज्जनात्कर्मधारये** ॥ ७ । १ । ४१॥ तस्मै हिते । ईनः । पञ्चजनीनः । सर्वजनीनः । विश्वजनीनः । कर्मधारय इति किम् ।! पञ्चानाञ्जनाय हितः पञ्चजनीयः ॥ **महत्सर्वादिकण्** ॥ ७ । १ । ४२ ॥ जनात्कर्मधारयवृत्तेस्तस्मै हिते । माहाजनिकः । सार्वजनिकः ॥ **सर्वाण्णो वा** ॥ ७ । १ । ४३ ॥ तस्मै हिते । सार्वः । सर्वीयः ॥ **परिणामिनि तदर्थे** ॥ ७ । १ । ४४ ॥ चतुर्थ्यन्ताद्धेतौ यथाधिकृतं प्रत्ययः । अङ्गारीयाणि काष्ठानि । शंकव्यं दारु । परिणामिनीति किम् ?। उदकाय कूपः । तदर्थे इति किम् ! । मूत्राय यवागूः । यवागूर्मूत्रतया परिणमते न तु तदर्था अथवा तदर्थइति चतुर्थीविशेषणम् । तदर्थे या चतुर्थी तदन्तात्प्रत्ययः । इह तु सम्पद्यतौ चतुर्थीति न भवति ॥ **चर्मण्यञ्** ॥ ७ ।१ । ४५ । चतुर्थ्यन्तात्तदर्थे परिणामिनि । वार्ध्रं चर्म ॥ **ऋषभोपानहाञ्ञ्यः** ॥ ७ । १ । ४६ ॥ चतुर्थ्यन्तात्परिणामिनि तदर्थे । आर्षभ्यो वत्सः । औपानह्यो मुञ्जः । चर्मण्यपि परिणामिनि परत्वादयमेव । औपानह्यं चर्म ॥ **छदिर्बलेरेयण्** ॥ ७ । १ । ४७ ॥ चतुर्थ्यन्तात्परिणामिनि तदर्थे । छादिषेयाणि तृणानि । बालेयास्तण्डुलाः । चर्मण्यपि परत्वादयमेव । छादिषेयं चर्म । औपधेय इति तूपधेयशब्दात्स्वार्थिके प्रज्ञाद्यणि भविष्यति । अत उपधेः स्वार्थे एयणिति नारम्भणीयम् ॥ **परिखाऽस्य स्यात्** ॥ ७ । १ । ४८ ॥ अस्मात्स्यन्तात्षष्ठ्यर्थे परिणामिनि एयण् सा चेत्सम्भाव्या । पारिखेय्य इष्टकाः । पारिणामिनीत्येव । परिखास्य नगरस्य स्यात् ॥ **अत्र च** ॥ ७ । १ । ४९ ॥ परिखायाः स्यादिति सम्भाव्यायाः स्यन्तायाः सप्तम्यर्थे एयण् । पारिखेयी भूमिः ॥ **तद्** ॥ ७ । १ । ५० ॥ स्यन्तात्स्यादिति संभाव्यात्षष्ठ्यर्थे परिणामिनि सप्तम्यर्थे च यथाधिकृतं प्रत्ययः । प्राकारीया इष्टकाः । परशव्यमयः । मासादीयो देशः ॥ ॥ इतीयाधिकारः ॥

**तस्यार्हे क्रियायां वत्** ॥ ७ । १ । ५१ ॥ राजवद्वृत्तं राज्ञः । क्रियायामिति किम् ? । राज्ञोऽर्होमणिः ।

राज्ञि एकस्मिन् उपमानोपमेयभावाभावादुत्तरेण न सिध्यतीति वचनम् । यदा तु सगरादे राज्ञो वृत्तस्यार्हे इदानीन्तनः कश्चिद्राजेति भेदविवक्षा तदोत्तरेणैव सिद्धम् ॥ स्यादेरिवे ॥ ७ । १ । ५२ ॥ क्रियायां वत् । अश्ववद्याति चैत्रः । देववत् पश्यन्ति मुनिम् । क्रियायामित्येव । गौरिव गवयः । देवदत्तवत्स्थूलः इत्यादि तु तुल्यायामस्तौ भवतौ वाध्याह्रियमाणायां भविष्यति । ऋचं ब्राह्मणवदयं गाथामधीत इत्यत्र तु सापेक्षत्वान्न प्रत्ययः ॥ मनुर्नभोऽङ्गिरो वति ॥ १ । १ । २४ ॥ पदं न ।मनुष्वत् । नभस्वत् । अङ्गिरस्वत् ॥ तत्र ॥ ७ । १ । ५३ ॥ इवार्थे वत्स्यात् । स्रुघ्नवत्साकेते परिखा । अक्रियार्थ आरम्भः ॥ तस्य ॥ ७ । १ । ५४ ॥ इवार्थे वत् । चैत्रवन्मैत्रस्य भूः । अक्रियाविषयसादृश्यार्थ आरम्भः ॥ भावे त्वतल् ॥ ७ । १ । ५५ ॥ षष्ठ्यन्तात् । भवतोऽस्मात् अभिधानप्रत्ययाविति भावः शब्दस्य प्रवृत्तिनिमित्तम् । द्रव्यसंसर्गी भेदको गुणः । तत्र जातिगुणाज्जातिगुणे गोत्वम् । गोता शुक्लत्वम् । शुक्लता । समासकृत्तद्धितेषु सम्बन्धाभिधानमन्यत्र रूढ्यभिन्नरूपा व्यभिचरितसम्बन्धेभ्यः । राजपुरुषत्वम् । पाचकत्वम् । औपगवत्वम् । रूढ्यादौ तु जातिरेवाभीधीयते । गौरखरत्वम् । गर्गत्वम् । पञ्चालत्वम् । युगपदपत्यजनपदाभिधायिनः पञ्चालशब्दात्तु भावप्रत्ययेन जातिसंहतिरभिधीयते । यथा धवखदिरत्वमिति जातिसंहतिः । सत्त्वम् । सत्ता । डित्थादेः स्वरूपे । डित्थत्वम् । एवं गोजातेर्भावो गोत्वं गोतेति गोशब्दस्य स्वरूपम् । एवं देवदत्तत्वं चन्द्रत्वं सूर्यत्वं दिक्त्वमाकाशत्वमभावत्वमिति स्वरूपमेवोच्यते एके तु यदृच्छाशब्देषु शब्दस्वरूपं संज्ञासंज्ञिसम्बन्धो वा प्रवृत्तिनिमित्तमिति मन्यन्ते । अन्ये तु डित्थत्वं देवदत्तत्वमिति वयोऽवस्थाभेदभिन्नव्यक्तिसमवेतं सामान्यं चन्द्रत्वं सूर्यत्वमिति कालावस्थाभेदभिन्नव्यक्तिसमवेतं सामान्यं दिक्त्वमाकाशत्वमभावत्वमिति उपचरितभेदव्यक्तिसमवेतं सामान्यं प्रत्ययार्थ इति वदन्तोऽत्रापि जातिमेव त्वतलादिप्रत्ययप्रवृत्तिनिमित्तमभिदधति ॥ त्वते गुणः ॥ ३ । २ । ५९ ॥ परतः स्त्र्यनूङ् पुंवत् पट्व्या भावः पटुत्वम् । पटुता ॥ प्राक् त्वादगडुलादेः ॥ ७ । १ । ५६ ॥ त्वतलावधिकृतौ ज्ञेयौ । तत्रैवो-

दाहरिष्येते । अपवादैः समावेशार्थः कर्मणि विधानार्थश्चाधिकारः । अगडुलादेरिति किम् ? । गाडुल्यम् । कामण्डलवम् । गडुलादेरपि केचिदिच्छन्ति ॥ नञ्तत्पुरुषादबुधादेः ॥ ७ । १ । ५७ ॥ भावत्वात्त्वतलावेव स्यातामित्यधिकृतं ज्ञेयम् । अशुक्लत्वम् । अशुक्लता अपतित्वम् । अपतिता । अबुधादेरिति किम् ? । आबुध्यम् । आचतुर्यम् । अबौध्यमिति नञ्समासो भवतीत्येके । न भवतीत्यन्ये । ट्यणादिबाधनार्थं सूत्रम् ॥ पृथ्व्यादेरिमन् वा ॥ ७ । १ । ५८ ॥ भावे भावत्वादित्यधिकारात्त्वतलौ च । वावचनादणादिरपि ॥ पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः ॥ ७ । ४ । ३९ ॥ इमनि णीष्ठेयस्सु च । केचित्तु वृढशब्दस्यापीच्छन्ति ॥ अन्त्यस्वरादेः ॥ ७ । ४ । ४३ ॥ इमनि णीष्ठेयस्सु च लुक् । प्रथिमा । पृथुत्वम् । पृथुता । पार्थवम् । म्रदिमा । मृदुत्वम् । मृदुता । मार्दवम् ॥ प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकस्येमनि च प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम् ॥ ७ । ४ । ३८ ॥ यथासम्भवं णीष्ठेयस्सु । प्रेमा । दृढादेराकृतिगणत्वादिमन् स्थेमा । वरिमा । गरिमा । बंहिमा । त्रपिमा । द्राघिमा । वर्षिमा । वृन्दिमा ॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः ॥ ७ । ४ । ४२ ॥ यथासम्भवमिमनि णीष्ठेयस्सु च लुक् । ह्रसिमा । क्षेपिमा । क्षोदिमा । उत्तरेणान्त्यस्वरस्यानेनार्थादन्तस्थाया लोपे सिद्धे अन्तस्थादेरिति किमर्थम् ? । अन्त्यस्वरादिलोपं बाधित्वाऽनेनान्तस्थाया एव लोपो माभूत् । केचित्तु स्थूलदूरयूनां करोत्यर्थे णौ नेच्छन्ति ॥ भूर्लुक् चेवर्णस्य ॥ ७ । ४ । ४१ ॥ बहोरीयसाविम्नि च ॥ भूमा ॥ वर्णदृढादिभ्यष्ट्यण् च वा ॥ ७ । १ । ५९ ॥ भावे इमन् । शौक्ल्यम् । शुक्लिमा । शुक्लत्वम् । शुक्लता । शैत्यम् । शितिमा । शितित्वम् । शितिता । शैतम् । दार्ढ्यम् । दृढिमा । दृढत्वम् । दृढता । वार्ढ्यम् । व्रढिमा । वृढत्वम् । वृढता । वैमत्यम् । विमतिमा । विमतित्वम् । विमतिता । वैमतम् ॥ पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ॥ ७ । १ । ६० ॥ तस्य भावे ट्यण् । आधिपत्यम् । अधिपतित्वम् । अधिपतिता । एवमाधिराज्यम् ३ । मौढ्यम् ३ । राज्य-

म् ३ । काव्यम् ३ । राजादिराकृतिगणः ॥ **अर्हतस्तो न्त् च** ॥ ७ । १ ।६१ । तस्य भावे कर्मणि च ट्यण् । आर्हन्त्यम् । अर्हन्ती । अर्हत्त्वम् । आर्हत्ता ॥ **सहायाद्वा** ॥ ७ । १ । ६२ ॥ तस्य भावे कर्मणि च ट्यण् । साहाय्यम् । पक्षे साहायकम् । प्राक्त्वादिति त्वतलौ सहायत्वम् । सहायता ॥ **सखिवणिग्दूताद्यः** ॥ ७ । १ । ६३ ॥ तस्य भावे कर्मणि च । सख्यम् । सखित्वम् । सखिता । वणिज्या । वणिज्यम् । वणिक्त्वम् । वणिक्ता । वाणिज्यम् । दूत्यम् । दूतत्वम् । दूतता । दौत्यम् ॥ **स्तेनान्नलुक् च** ॥७।१।६४॥ तस्य भावे कर्मणि च यः। स्तेयम् ४॥ **कपिज्ञातेरेयण्** ॥७ । १ । ६५ ॥ तस्य भावे कर्मणि च । कापेयम् । कपिता कपित्वम् । ज्ञातेयम् । ज्ञातित्वम् । ज्ञातिता ॥ **प्राणिजातिवयोऽर्थादञ्** ॥ ७ । १ । ६६ ॥ तस्य भावे कर्मणि च । आश्वम् ३ । कौमारम् ३ ॥ **युवादेरण्** ॥ ७ । १ । ६७ ॥ तस्य भावे कर्मणि च । यूनो लिंगविशिष्टस्य ग्रहणाद् युवतेर्वा भावः कर्म वा यौवनम् । युवत्वम् । युवता । स्थाविरम् । स्थविरत्वम् । स्थविरता ॥ **हायनान्तात्** ॥ ७ । १ । ६८ ॥ द्वैहायनम् ३ । द्विहायनत्वम् द्विहायनता । वयसि तु पूर्वेणाम् ॥ **वृवर्णाल्लघ्वादेः** ॥७ । १ । ६९॥ तस्य भावे कर्मणि चाण् । शौचम् ३ । हारीतकम् ३ । पाटवम् ३ । बाधवम् ३ । पैत्रम् ३ । लघ्वादेरिति किम् ? । पाण्डुत्वम् ॥ **पुरुषहृदयादसमासे** ॥ ७ । १ । ७० ॥ तस्य भावे कर्मणि चाण् ॥ पौरुषम् ३ । हार्दम् ३ । असमास इति किम् ? । परमपुरुषत्वम् । परमपौरुषमिति मा भूत् ॥ **श्रोत्रियाद्यलुक् च** ॥ ७ । १ । ७१ ॥ तस्य भावे कर्मणि चाण् । श्रौत्रम् । श्रोत्रियत्वम् । श्रोत्रियता । । चौरादिपाठादकञपि । श्रौत्रियकम् ॥ **योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्** ॥ ७ । १ । ७२ ॥ तस्य भावे कर्मणि च । अन्त्यस्य समीपमुपोत्तमम् । रामणीयकम् । रमणीयत्वम् । रमणीयता । गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि भवति । आचार्यकम् । गुरूपोत्तमादिति किम् ? । क्षत्रियत्वम् । कायत्वम् । असुप्रख्यादिति किम् ? । सुप्रख्यत्वम् । सौप्रख्यम् ॥ **चौरादेः** ॥ ७ । १ । ७३ ॥ तस्य भावे कर्मणि चाकञ् । चौरिका । चौरत्वम् । चौरता । एवं धौर्ति-

का ३ ॥ यूनोऽके ॥ ७ । ४ । ६० ॥ अन्त्यस्वरादेर्लुग् न । यौवनिका ॥ द्वन्द्वाल्लित् ॥ ७ । १ । ७४ ॥ तस्य भावे कर्मणि चाकञ् । गोपालपशुपालिका ३ ॥ गोत्रचरणाच्छ्लाघाऽत्याकारप्राप्त्यवगमे ॥ ७ । १ । ७५ ॥ तस्य भावे कर्मणि च लिदकञ् । श्लाघा विकत्थनम् । अत्याकारः पराधिक्षेपः । गार्गिकया श्लाघते अत्याकुरुते वा । गार्गिकां प्राप्तोऽवगतो वा । एवं काठिकयेत्यादि । श्लाघादिष्विति किम् ? । गार्ग्यम् । काठम् ॥ होत्राभ्य ईयः ॥ ७ । १ । ७६ ॥ तस्य भावे कर्मणि च । होत्रा ऋत्विग्विशेषः । मैत्रावरुणीयम् । त्वतलावपि ॥ ब्रह्मणस्त्वः ॥ ७ । १ । ७७ ॥ ऋत्विगर्थात्तस्य भावे कर्मणि च । ब्रह्मणो भावः कर्म वा ब्रह्मत्वम् । इति भावकर्मार्थाः ॥ शाकटशाकिनौ क्षेत्रे ॥ ७ । १ । ७८ ॥ षष्ठ्यन्तात् । इक्षूणां क्षेत्रम् । इक्षुशाकटम् । शाकशाकिनम् ॥ धान्येभ्य ईनञ् ॥ ॥ ७ । १ । ७९ ॥ षष्ठ्यन्तेभ्यः क्षेत्रे ॥ मौद्गीनम् । कौद्रवीणम् ॥ व्रीहिशाले रेयण् ॥ ७ । १ । ८० ॥ तस्य क्षेत्रे । वैहेयम् । शालेयम् ॥ यवयवकषष्टिकाद्यः ॥ ७ । १ । ८१ ॥ तस्य क्षेत्रे । यव्यम् । यवक्यम् । षष्टिक्यम् ॥ वाणुमाषात् ॥ ७ । १ । ८२ ॥ तस्य क्षेत्रेऽर्थे यः । अणव्यम् । आणवीनम् । माष्यम् । माषीणम् ॥ वोमाभङ्गातिलात् ॥ ७ । १ । ८३ ॥ तस्य क्षेत्रेऽर्थे यः । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । तिल्यम् । तैलीनम् ॥ अलाब्वाश्च कटो रजसि ॥ ७ । १ । ८४ ॥ षष्ठ्यन्तादुमादेः । अलाबूकटम् । उमाकटम् । भङ्गाकटम् । तिलकटम् ॥ अन्हा गम्येऽश्वादीनञ् ॥ ७ । १ । ८५ ॥ षष्ठ्यन्तात् । आश्वीनोऽध्वा ॥ कुलाज्जल्पे ॥ ७ । १ । ८६ ॥ षष्ठ्यन्तादीनञ् । कौलीनम् ॥ पील्वादेः कुणः पाके ॥ ७ । १ । ८७ ॥ षष्ठ्यन्तात् । पीलुकुणः । शमीकुणः ॥ कर्णादेर्मूले जाहः । ७ । १ । ८८ ॥ षष्ठ्यन्तात् । कर्णजाहम् । अक्षिजाहम् ॥ पक्षात्तिः ॥ ७ । १ । ८९ ॥ तस्य मूले ॥ पक्षतिः ॥ हिमादेलुः सहे ॥ ७ । १ । ९० ॥ षष्ठ्यन्तात् । हिमेलुः ॥ बलवातादूलः ॥ ७ । १ । ९१ ॥ तस्य सहे । बलूलः । वातूलः ॥ शीतोष्णतृप्रादालुरसहे ॥ ७ । १ ९२ ॥ षष्ठ्यन्तात् । शीतालुः उष्णालुः ।

तृमाजुः । तृमे दुःखम् ॥ **यथामुखसम्मुखादीनस्तद् दृश्यतेऽस्मिन्** ॥ ७ । १ । ९३ ॥ यथामुखं प्रतिबिम्बम् । यथामुखीनः । सम्मुखीनः । अत एव निपातनादव्ययीभावः समोऽन्तलोपश्च ॥ **सर्वादेः पथ्यङ्गकर्मपत्रपात्रशरावं व्याप्नोति** ॥ ७ । १ । ९४ ॥ ईनः । सर्वपथीनो रथः । सर्वाङ्गीणस्तापः । सर्वकर्मीणोना । सर्वपत्रीणो यन्ता । सर्वपात्रीणं भक्तम् । सर्वशरावीण ओदनः ॥ **आप्रपदम्** ॥ ७ । १ । ९५ ॥ अस्मादमन्ताद् व्याप्नोतीत्यर्थे ईनः । आप्रपदीनः पटः ॥ **अनुपदं बद्धा** ॥ ७ । १ । ९६ ॥ ईनः । अनुपदीना उपानत् ॥ **अयानयं नेयः** ॥ ७ । १ । ९७ ॥ ईनः । अयानयीनः ॥ **सर्वान्नमत्ति** ॥ ७ । १ । ९८ ॥ ईनः । सर्वान्नीनो भिक्षुः ॥ **परोवरीणपरंपरीणपुत्रपौत्रीणम्** ॥ ७ । १ । ९९ ॥ एतेऽनुभवत्यर्थे ईनान्ता निपात्याः । परोवरीणः अवरस्येत्वं । निपातनात् । परंपरीणः । पुत्रपौत्रीणः ॥ **यथाकामानुकामात्यन्तं गामिनि** ॥ ७ । १ । १०० ॥ ईनः । यथाकामीनः । अनुकामीनः । अत्यन्तीनः ॥ **पारावारं व्यस्तव्यत्यस्तं च** ॥ ७ । १ । १०१ ॥ गामिनीनः । पारावारीणः । पारीणः । अवारीणः । अवारपारीणः ॥ **अनुग्वलम्** ॥ ७ । १ । १०२ ॥ गामिनीनः । अनुगवीनो गोपः ॥ **अध्वानं येनौ** ॥ ७ । १ । १०३ ॥ अलंगामिनि । अध्वन्यः । अध्वनीनः ॥ **अभ्यमित्रमीयश्च** ॥ ७ । १ । १०४ ॥ अलंगामिनी । येनौ च । अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः ॥ **समांसमीनाद्यश्वीनाद्यप्रातीनागवीनसाप्तपदीनम्** ॥ ७ । १ । १०५ ॥ एते ईना निपात्याः । साप्तपदीनस्त्वीनन्तः । समांसमीना गौः अद्यश्वीना गौः । अद्यप्रातीनो लाभः । आगवीनः कर्मकृत् । साप्तपदीनं सख्यम् ॥ **अषडक्षाशितंग्वलंकर्मालंपुरुषादीनः** ॥ ७ । १ । १०६ ॥ स्वार्थे । अविद्यमानानि षडक्षीण्यस्मिन् अषडक्षीणो मन्त्रः । आशितं गवीनमरण्यम् । अलंकर्मीणः । अलंपुरुषीणः ॥ **अदिक् स्त्रियां वाञ्चः** ॥ ७ । १ । १०७ ॥ नाम्नः स्वार्थे ईनः । प्राचीनम् । प्राक् । प्राचीना शाखा । प्राची । अदिक्स्त्रियामिति किम् ? । प्राची दिक् ॥ **तस्य तुल्ये कः संज्ञाप्रतिकृत्योः** ॥ ७ ।

१ । १०८ ॥ अश्वकः । अश्वकं रूपम् ॥ **न नृपूजार्थध्वजचित्रे** ॥ ७ । १ । १०९ ॥ कः । चञ्चातुल्यः पुरुष
श्चञ्चा । अर्हन् । ध्वजे सिंहः । चित्रे भीमः ॥ **अपण्ये जीवने** ॥ ७ । १ । ११० ॥ को न । शिवसदृशः शिवः ।
अपण्य इति किम् ? । हस्तिकान् विक्रीणीते ॥ **देवपथादिभ्यः** ॥ ७ । १ । १११ ॥ संज्ञाप्रतिकृत्योः को न तुल्ये ।
देवपथः । हंसपथः ॥ **बस्तेरेयञ्** ॥ ७ । १ । ११२ ॥ तस्य तुल्ये । बास्तेयी प्रणालिका ॥ **शिलाया एयच्** ॥
७ । १ । ११३ ॥ एयच् । शिलेयम् । शैलेयम् ॥ **शाखादेर्यः** ॥ ७ । १ । ११४ ॥ तस्य तुल्ये । शाख्यः । मुख्यः
॥ **द्रोर्भव्ये** ॥ ७ । १ । ११५ ॥ तस्य तुल्ये यः । द्रव्यमयं ना स्वर्णादि च ॥ **कुशाग्रादीयः** ॥ ७ । १ । १-
१६ । तस्य तुल्ये । कुशाग्रीया बुद्धिः ॥ **काकतालीयादयः** ॥ ७ । १ । ११७ ॥ तस्य तुल्ये ईयाम्ताः साधवः ।
काकतालीयम् । खलति बिल्वीयम् । अन्धकवर्तिकीयम् । अजाकृपाणीयम् । बहुवचनाद् घुणाक्षरीयमित्यादि ॥ **श-
र्करादेरण्** ॥ ७ । १ । ११८ ॥ तस्य तुल्ये । शार्करं दधि । कापालीकम् ॥ **अः सपत्न्याः** ॥ ७ । १ । ११९ ॥
तस्य तुल्ये । सपत्नः ॥ **एकशालाया इकः** ॥ ७ । १ । १२० ॥ तस्य तुल्ये । एकशालिकम् ॥ **गोण्यादेश्चेकण्** ॥
७ । १ । १२१ ॥ एकशालायास्तस्य तुल्ये । गौणिकम् । आङ्गुलिकम् । ऐकशालिकम् ॥ **कर्कलोहितादीकण् च**
॥ ७ । १ । १२२ ॥ तस्य तुल्ये इकण् । शुक्लोऽश्वः कर्कः । तस्य तुल्यः कार्कीकः । कार्किकः । लौहितीकः । लौ-
हितिकः ॥ **वेर्विस्तृते शालशङ्कटौ** ॥ ७ । १ । १२३ ॥ विशालः । विशङ्कटः । **कटः** ॥ ७ । १ । १२४ ॥
वेर्विस्तृते । विकटः ॥ **संप्रोन्नेः सङ्कीर्णप्रकाशाधिकसमीपे** ॥ ७ । १ । १२५ ॥ यथासंख्यं कटः । सङ्कटः । प्रकटः
। उत्कटः । निकटः ॥ **अवात्कुटारश्चावनते** ॥ ७ । १ । १२६ ॥ कटः । अवकुटारः । अवकटः ॥ **नासान-
तितद्वतोष्टीटनाटभ्रटम्** ॥ ७ । १ । १२७ ॥ अवटीटम् । अवनाटम् । अवभ्रटं । नासानमनम् । तद्वद्वा नासादि॥
**नेरिनपिटकाश्चिक्चिचिकश्चास्य** ॥ ७ । १ । १२८ ॥ नासानतौ तद्वति च । चिकिनम् । चिपिटम् चिक्कं ।

नासानमनं नासादि च ॥ **बिडबिरीसौ नीरन्ध्रे च** ॥ ७ । १ । १२९ ॥ नासानतितद्वतोः । निबिडम् । निबिरीसं नासानमनं नासादि च ॥ **क्लिन्नाल्लश्चक्षुषि चिल् पिल् चुल् चास्य** ॥ ७ । १ । १३० ॥ चिल्लम् । पिल्लम् । चुल्लम् । चक्षुः ॥ **उपत्यकाधित्यके** ॥ ७ । १ । १३१ ॥ एतौ निपात्येते । उपत्यका गिर्यासन्ना भूः । अधित्यका पर्वताधिरूढा भूः ॥ **अवेस्संघातविस्तारे कटपटम्** ॥ ७ । १ । १३२ ॥ यथासंख्यम् । अविकटः संघातः । अविपटो विस्तारः ॥ **पशुभ्यः स्थाने गोष्ठः** ॥ ७ । १ । १३३ ॥ गोगोष्ठम् । महिषीगोष्ठम् ॥ **द्वित्वे गोयुगः** ॥ ७ । १ । १३४ ॥ पश्वर्थेभ्यः । गोगोयुगम् ॥ **षट्त्वे षड्गवः** ॥ ७ । १ । १३५ ॥ पश्वर्थेभ्यः । उष्ट्रषड्गवम् ॥ **तिलादिभ्यः स्नेहे तैलः** ॥ ७ । १ । १३६ ॥ तिलतैलः । सर्षपतैलः ॥ **तत्र घटते कर्मणष्ठः** ॥ ७ । १ । १३७ ॥ कर्मठः ॥ **तदस्य सञ्जातं तारकादिभ्य इतः** ॥ ७ । १ । १३८ ॥ तारकितं नभः । पुष्पितस्तरुः । बहुवचनमाकृतिगणार्थम् ॥ **गर्भादप्राणिनि** ॥ ७ । १ । १३९ । तदस्य सञ्जातमित्यर्थे इतः । गर्भितो व्रीहिः ॥ **प्रमाणान् मात्रट्** ॥ ७ । १ । १४० ॥ स्यन्तात्षष्ठ्यर्थे । जानुमात्रमुदकम् । तन्मात्री भूः ॥ **हस्तिपुरुषाद्वाण्** ॥ ७ । १ । १४१ ॥ स्यन्तात्प्रमाणार्थात्षष्ठ्यर्थे । हास्तिनम् । हस्तिमात्रम् । हस्तिदघ्नम् । हस्तिद्वयसं जलम् । एवं पौरुषम् ॥ **वोर्ध्वं दघ्नट् द्वयसट्** ॥ ७ । १ । १४२ ॥ ऊर्ध्वप्रमाणार्थात्स्यन्तात्षष्ठ्यर्थे । ऊरुदघ्नम् । ऊरुद्वयसम् । उरुमात्रम् । ऊर्ध्वमिति किम् ? । रज्जुमात्री भूः ॥ **मानादसंशये लुप्** ॥ ७ । १ । १४३ ॥ मानार्थ एव साक्षाद्यः प्रमाणशब्दो हस्तवितस्त्यादिर्न तु रज्वादिः तस्मात्प्रस्तुतस्य मात्रडादेः । हस्तः । वितस्तिः । मानादिति किम् ? । ऊरुमात्रं जलम् । असंशय इति किम् ? । शममात्रं स्यात् ॥ **द्विगोः संशये च** ॥ ७ । १ । १४४ ॥ मानान्तादसंशये प्रस्तुतमात्रडादेर्लुप् । द्विवितस्तिः । द्विप्रस्थः स्यात् ॥ **मात्रट्** ॥ ७ । १ । १४५ ॥ प्रथमान्तान्मानार्थात्षष्ठ्यर्थे संशये । प्रस्थमात्रं धान्यम् ॥ **शन्शद्विंशतेः** ॥ ७ । १ । १४६ ॥ शन्नन्ताच्छदन्ताच्च संख्याशब्दाद्विंशति-

शब्दाच्च मानवृत्तेः स्यन्तात्षष्ठ्यर्थे मात्रट् । दशमात्राः । पञ्चदशमात्राः । त्रिंशन्मात्राः । त्रयस्त्रिंशन्मात्राः । विंशतिमात्राः ॥ **डिन्** ॥ ७ । १ । १४७ ॥ शन् शद् विंशतिभ्यः स्यन्तेभ्यो मानार्थेभ्यः षष्ठ्यर्थे । संशय इति निवृत्तम् ॥ पञ्चदश्यर्धमासः । त्रिंशी । विंशिनो भवनेन्द्राः ॥ **इदंकिमोऽतुरिय् किय् चास्य** ॥ ७ । १ । १४८ ॥ मानार्थात्षष्ठ्यर्थे मेये । इयान् । कियान् । पटः ॥ **यत्तदेतदो डावादिः** ॥ ७ । १ । १४९ ॥ मानार्थात्षष्ठ्यर्थे मेये डतुः । यावान् । तावान् । एतावान् । धान्यराशिः ॥ **यत्तत्किमः सङ्ख्याया डतिर्वा** ॥ ७ । १ । १५० ॥ मानात्षष्ठ्यर्थे संख्येये । यति । यावन्तः । । एवं तति । तावन्तः । कति । कियन्तः । एतौ चातुडतिप्रत्ययौ स्वभावाद्बहुवचनविषयावेव ॥ **अवयवात्तयट्** ॥ ७ । १ । १५१ ॥ संख्यार्थात्स्यन्तात्षष्ठ्यर्थेऽवयविनि । चतुष्टयी शब्दानां प्रवृत्तिः । पञ्चतयो यमः ॥ **द्वित्रिभ्यामयट् वा** ॥ ७ । १ । १५२ ॥ स्यन्तात्षष्ठ्यर्थे । द्वयम् । द्वितयम् । त्रयम् । त्रितयम् ॥ **द्व्यादेर्गुणान्मूल्यक्रेये मयट्** ॥ ७ । १ । ५३ ॥ स्यन्तात्षष्ठ्यर्थे । द्विमयमुदश्विद्यवानाम् । एवं त्रिमयम् । द्विमया यवा उदश्वितः । एवं त्रिमयाः । गुणादिति किम् ? । द्वौ व्रीहियवौ मूल्यमस्योदश्वितः ॥**अधिकं तत्सङ्ख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः** ॥ ७ । १ । १५४ ॥ स्यन्तायाः संख्यायाः । विंशं योजनशतं योजनसहस्रं वा । एवं त्रिंशतम् । एकादशम् । तत्संख्यमिति किम् ? । विंशतिर्दण्डा अधिका अस्मिन् योजनशते ॥ **संख्यापूरणेऽट्** ॥ ७ । १ । १५५ ॥ संख्यायाः । एकादशी । संख्येति किम् ? । एकादशानामुष्ट्रिकाणां पुराणो घटः ॥ **विंशत्यादेर्वा तमट्** ॥ ७ । १ । १५६ ॥ संख्यायाः संख्यापूरणे । विंशतितमः । विंशः । त्रिंशत्तमः । त्रिंशः ॥ **शतादिमासार्द्धमाससंवत्सरात्** ॥ ७ । १ । १५७॥ संख्यापूरणे तम् । शततमी सहस्रतमी । मासतमः । अर्द्धमासतमः । संवत्सरतमो दिवसः ॥ **षष्ठ्यादेरसंख्यादेः** ॥ ७ । १ । १५८ ॥ संख्यापूरणे तमट् । षष्टीतमः । सप्ततितमः । असंख्यादेरिति किम् । एकषष्ठः ॥ **नो मट्** ॥ ७ । १ । १५९ ॥ असंख्यादेः संख्यायाः संख्यापूरणे । पञ्चमी । असं-

ख्यादेरित्येव । द्वादशः ॥ **पित्तिथट् बहुगणपूगसंघात्** ॥ ७ । १ । १६० ॥ संख्यापूरणे । बहुतिथी । गणतिथः । पुगतिथः । संघतिथः । पित्करणं पुंवद्भावार्थम् ॥ **अतोरिथट्** ॥ ७ । १ । १६१ ॥ संख्यापूरणे । इयतिथः । तावतिथः ॥ **षट्कतिकतिपयात् थट्** ॥ ७ । १ । १६२ ॥ संख्यापूरणे । षष्ठी । कतिथः । कतिपयथः ॥ **चतुरः** ॥ ७ । १ । १६३ ॥ संख्यापूरणे थट् । चतुर्थी । योगविभाग उत्तरार्थः ॥ **येयौ च लुक् च** ॥ ७ । १ । १६४ ॥ चतुरः । संख्यापूरणे । तुर्यः । तुरीयः ॥ **द्वेस्तीयः** ॥ ७ । १ । १६५ ॥ संख्यापूरणे । द्वितीयः ॥ **त्रेस्तृ च** ॥ ७ । १ । १६६ ॥ संख्यापूरणे तीयः । तृतीयः ॥ **पूर्वमनेन सादेश्चेन्** ॥ ७ । १ । १६७ ॥ पूर्वमिति क्रियाविशेषणाद् द्वितीयान्तात् केवलात् सादेश्च तृतीयार्थे कर्त्तरि इन् । पूर्वी । कृतपूर्वी ॥ **इष्टादेः** ॥ ७ । १ । १६८ ॥ स्यन्तात्तृार्थे कर्त्तरीन् इष्टी । पूर्ती । श्राद्धे व्याप्ये क्तेन इति सप्तमी ॥ **श्राद्धमद्य भुक्तमिकेनौ** ॥ ७ । १ । १६९ ॥ कर्त्तरि । श्राद्धमनेनाद्य भुक्तं श्राद्धिकः । श्राद्धी । श्राद्धशब्दः कर्मसाधने द्रव्ये वर्त्तते ॥ **अनुपद्यन्वेष्टा** ॥ ७ । १ । १७० ॥ अनुपदमन्वेष्टा अनुपदी गवाम् ॥ **दाण्डाजिनिकायःशूलिकपार्श्वकम्** ॥ ७ । १ । १७१ ॥ एते यथायोगमिकणूकान्ता निपात्याः अन्वेष्टर्यर्थे । दाण्डाजिनिको दाम्भिकः । आयःशूलिकः । तीक्ष्णोपायोऽर्थान्वेष्टा । पार्श्वकोऽनृजूपायः स एव ॥ **क्षेत्रेऽन्यस्मिन्नाश्य इयः** ॥ ७ । १ । १७२ ॥ सप्तम्यन्तात्क्षेत्रशब्दात् । अन्यस्मिन् क्षेत्रे नाश्यः क्षेत्रियो व्याधिः जारश्च ॥ **छन्दोऽधीते श्रोत्रश्च वा** ॥ ७ । १ । १७३ ॥ इयः । छन्दोऽधीते श्रोत्रियः । पक्षे छान्दसः ॥ **इन्द्रियम्** ॥ ७ । १ । १७४ ॥ इन्द्रादियो निपात्यः । इन्द्रस्य लिङ्गमिन्द्रियम् ॥ **तेन वित्ते चञ्चुचणौ** ॥ ७ । १ । १७५ ॥ विद्याचञ्चुः । विद्याचणः । केशचणः ॥ **पूरणाद् ग्रन्थस्य ग्राहके को लुक् चास्य** ॥ ७ । १ । १७६ ॥ तृतीयान्तात् । द्विकः शिष्यः ॥ **ग्रहणाद्वा** ॥ ७ । १ । १७७ ॥ गृह्यतेऽनेनेति ग्रहणम् रूपादि । ग्रन्थस्य ग्रहणार्थात्पूरणप्रत्ययान्तात्कः स्वार्थे तद्योगे च पूरणार्थस्य लुग्वा । द्विकं द्वितीयकं वा ग्रन्थग्रहणम् ॥ **सस्याद् गुणात्परिजाते** ॥

७ । १ । १७८ तेन कः । सस्यकः शालिः । गुणादिति किम् ? । सस्येन परिजातं क्षेत्रम् ॥ धनहिरण्ये कामे ॥ ७ । १ । १७९ ॥ कः । धनकः । हिरण्यको मैत्रस्य ॥ स्वाङ्गेषु सक्ते ॥ ७ । १ । १८० ॥ कः । नखकः । केशनखकः । दन्तौष्ठकः ॥ उदरे त्विकणाद्यूने ॥ ७ । १ । १८१ ॥ सक्ते । औदरिकः । अन्यत्रोदरकः ॥ अंशं हारिणिकः ॥ ७ । १ । १८२ ॥ अंशको दायादः ॥तन्त्रादचिरोद्धृते॥ ७ । १ । १८३॥ कः तन्त्रकः पटः॥ ब्राह्मणान्नाम्नि ॥ ७ । १ । १८४ ॥ अचिरोद्धृते कः । ब्राह्मणको नाम देशः । यत्रायुधजीविनः काण्डस्पृष्टा नाम ब्राह्मणा भवन्ति । आयुधजीवी ब्राह्मण एव ब्राह्मणक इत्यन्ये ॥ उष्णात् ॥ ७ । १ । १८५ ॥ अचिरोध्धृतेऽर्थे को नाम्नि । उष्णिका यवागूः ॥ शीताच्च कारिणि ॥ ७ । १ । १८६॥ उष्णादन्तात्क नाम्नि । शीतं मन्दं करोति शीतकोऽलसः । उष्णको दक्षः ॥ अधेरारूढे ॥ ७ । १ । १८७ ॥ वर्त्तमानात्स्वार्थे कः । आरूढशब्दे कर्त्तरि कर्मणि च क्तः । अधिको द्रोणः खार्याः । अधिका खारी द्रोणेन ॥ अनोः कमितरि ॥ ७ । १ । १८८ ॥ कः । अनुकामयतेऽनुकः ॥ अभेरीश्च वा ॥ ७ । १ । १८९ ॥ कः समुदायेन चेत् कमिता गम्यते । अभिकः । अभीकः ॥ सोऽस्य मुख्यः ॥ ७ । १ । १९० ॥ कः । देवदत्तकः संघः । मुख्य इति किम् ? । देवदत्तः शत्रुरेषाम् ॥ शृङ्खलकः करभे ॥ ७ । १ । १९१ ॥ कमत्ययान्तो निपात्यते । शृङ्खलकः करभः ॥ उदुत्सोरुन्मनसि ॥ ७ । १ । १९२ ॥ उत्कः । उत्सुकः ॥ कालहेतुफलाद्रोगे ॥ ७ । १ । १९३ ॥ स्यन्तादस्येतिकः । द्वितीयको ज्वरः । पर्वतको रोगः । शीतको ज्वरः ॥ प्रायोऽन्नमस्मिन्नाम्नि ॥ ७ । १ । १९४ ॥ स्यन्तात्कः । गुडापूपिका पौर्णमासी ॥ कुल्माषादण् ॥ ७ । १ । १९५ ॥ स्यन्तात्प्रायोऽन्नमस्मिन्नित्यर्थे नाम्नि । कौल्माषी पौर्णमासी ॥ वटकादिन् ॥ ७ । १ । १९६ ॥ स्यन्तात्प्रायोऽन्नमस्मिन्नित्यर्थे नाम्नि । वटकिनी पौर्णमासी ॥ साक्षाद्द्रष्टा ॥ ७ । १ । १९७ ॥ इन् नाम्नि । साक्षी । प्रायोऽव्ययस्येत्यन्तस्वरादिलोपः ॥ इति क्षेत्राद्यर्थकाः ॥

## ॥ अथ मत्वर्थीयाः ॥

**तदस्यास्त्यस्मिन्निति मतुः॥७।२।१॥** प्रथमान्तात् षष्ठ्यर्थे सप्तम्यर्थे वा मतुः । तत्प्रथमान्तमस्तीति चेद्भवति अस्ति समानाधिकरणं भवतीत्यर्थः । गोमान् । यवमान् । वृक्षवान् पर्वतः । अस्तिमान् । अस्तीति वर्तमानकालोपादानाद्वर्त्तमानसत्तायां भवति न भूतभविष्यत्सत्तायां । गावोऽस्यासन् गावोऽस्य भवितार इति । इतिकरणो विवक्षार्थः । तेन भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने संसर्गेऽस्ति विवक्षायां प्रायो मत्वादयो मताः ।१। भूम्नि, गोमान्। निन्दायाम, शङ्खोदकी । प्रशंसायाम, रूपवती कन्या । नित्ययोगे, क्षीरिणो वृक्षाः । अतिशायन, उदरिणी कन्या । बलवान् मल्लः। संसर्गे, दण्डी । प्रायिकमेतद्भूमादिदर्शनं सत्तामात्रेऽपि प्रत्ययो दृश्यते। व्याघ्रवान् पर्वतः । तथा मत्वर्थान्मत्वर्थीयः सरूपो न भवति । गोमन्तोऽस्य सन्तीति मतुर्न भवति । विरूपस्तु स्यादेव । दण्डिमती शाला । विरूपोऽपि समानायां वृत्तौ न भवति । दण्ड एषामस्तीति दण्डिनः दण्डिका वा । दण्डिनो दण्डिका वाऽस्य सन्तीति नेन्मतू । शैषिकाच्छैकिको नेष्टः सरूपः प्रत्ययः क्वचित् । समानवृत्तौ मत्वर्थान्मत्वर्थीयोऽपि नेष्यते । १ । क्वचिदिति समानायामसमानायां च वृत्तौ ।शाली यस्यायं शालीये भवो वेति पुनरीयो न भवति । विरूपस्तु स्यादेव आहिच्छत्रीयः । तथा असंज्ञाभूतात्कर्मधारयान्मत्वर्थीयो न भवति । वीरपुरुषा अस्मिन् ग्रामे सन्तीति । अत्र बहुव्रीहेरेव भवति । संज्ञायास्तु भवत्येव । गौरखरवदरण्यकम् । कथमेकगविकः सर्वधनीति । एकादेः कर्मधारयात् इत्याद्यारम्भसामर्थ्याद्भविष्यति । तथा गुणे गुणिनि च वर्त्तमानेभ्यो गुणशब्देभ्यो न भवति । शुक्लः पटः । प्रत्ययमन्तरेणापि हि शुक्लादि शब्दानां तदभिधाने सामर्थ्यम् ॥ **मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः ॥ २ । १ । ९४ ॥** किंवान् । शमीवान् । वृक्षवान्। मालावान । अहर्वान । भास्वान । मरुत्वान् ॥ **चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वत् ॥ २ । १ । ९६ ॥** एते

संज्ञायां निपात्यन्ते । चर्मणो न लोपाभावो णत्वं च । चर्मण्वती नाम नदी । अस्थिशब्दस्याष्ठीभावः । अष्ठीवान् जानुः चक्रशब्दस्य चक्रीभावः । चक्रीवान् नाम खरः । चक्रीवान् नाम राजा । कक्ष्याशब्दस्य कक्षीभावः । कक्षीवान्नाम ऋषिः । लवणशब्दस्य रुमण्भावः । रुमण्वान्नाम पर्वतः । नाम्नीत्येव । चर्मवती । अस्थिमान् । चक्रवान् । कक्ष्यावान् । लवणवान् ॥ **उदन्वानब्धौ च** ॥ २ । १ । ९७ ॥ नाम्नि निपात्यते । अब्धिर्जलाधारः । उदन्वान् घटः । उदन्वान् मेघः अब्धौ चेति किम् ? । उदकवान् घटः । अत्र घटस्योदकसम्बन्धमात्रे विवक्षितं न दधातीत्यर्थः ॥ **राजन्वान् सुराज्ञि** ॥ २ । १ । ९८ ॥ निपात्यते । राजन्वान् देशः । राजन्वत्यः प्रजाः । सुराज्ञीति किम् ? । राजवान् ॥ **नोर्म्यादिभ्यः** ॥ २ । १ । ९९ ॥ मतोर्मो वः । ऊर्मिमान् । दल्मिमान् इत्यादि । बहुवचनमाकृतिगणार्थम् ॥ **आ यात्** ॥ ७ । २ । २ ॥ " रूपात् प्रशस्ताहतात् " इत्यायविधेर्वक्ष्यमाणप्रकृतिभ्यो मतुः, तदस्यास्ति तदस्मिन्नस्तीति विषये । । अपवादैर्बाधा माभूदिति वचनम् । कुमारीमान् । व्रीहिमान् ॥ **नावादेरिकः** ॥ ७ । २ । ३ ॥ मत्वर्थे । नाविकः । नौमान् । कुमारीकः । कुमारीमान् ॥ **शिखादिभ्य इन्** ॥७। २ । ४॥ मत्वर्थे । शिखी । शिखावान् । माली । मालावान् ॥ **व्रीह्यादिभ्यस्तौ** ॥ ७ । २ । ५ ॥ मत्वर्थे । व्रीहिकः । व्रीही । व्रीहिमान् । मायिकः । मायी । मायावान् ॥ **अतोऽनेकस्वरात्** ॥ ७ । २ । ६ ॥ मत्वर्थे इकेनौ । दण्डिकः । दण्डी । दण्डवान् । अनेकस्वरादिति किम् ? । स्वरवान् । अभिधानार्थस्येति करणस्यानुवृत्तेः कृदन्तान्न राप्यवान् । क्वचिद्भवतः । कार्यिकः । कार्यी । जातिशब्देभ्यो न । व्याघ्रवान् । क्वचिद्भवतः । तण्डुलिकः । तण्डुली । सप्तम्यर्थे च न । दण्डवद्गृहम् । क्वचिद्भवतः । खलिनी भूमिः तदेवं व्यभिचारे सूत्रणादभिधानमेव श्रेयः ॥ **अशिरसोऽशीर्षश्च** ॥ ७ । २ । ७ ॥ अस्मान्मत्वर्थे इकेनौ मतुश्च । अशीर्षिकः । अशीर्षी । अशीर्षवान् ॥ **अर्थार्थान्ताद्भावात्** ॥ ७ । २ । ८ ॥ अर्थादर्थान्ताच्च भावार्थादेव इकेनावेव स्याताम् । अर्थिकः । अर्थी । प्रत्यर्थिकः । प्रत्यर्थी । अत्र मतुर्न । भावादिति किम् ? । धनार्थान्मतुरेव । अर्थवान् ।

व्रीह्यर्थतुन्दादेरिलश्च ॥ ७ । २ । ९ ॥ चादिकेनौ । शालिलः । शालिकः । शाली । शालिमान् । तुन्दिलः । तुन्दिकः । तुन्दी । तुन्दवान् । उदरिलः । उदरिकः । उदरी । उदरवान् ॥ स्वाङ्गाद्विवृद्धात्ते ॥ ७ । २ । १० ॥ मत्वर्थे इलेकेनाः स्युः । कर्णिलः । कर्णिकः । कर्णी । कर्णवान् ॥ वृन्दादारकः ॥ ७ । २ । ११ ॥ मत्वर्थे । वृन्दारकः । वृन्दवान् ॥ शृङ्गात् ॥ ७ । २ । १२ ॥ मत्वर्थे आरकः । शृङ्गारकः । शृङ्गवान् ॥ फलबर्हाच्चेनः ॥ ७ । २ । १३ ॥ शृङ्गान्मत्वर्थे । फलिनः । फलवान् । बर्हिणः२ । शृङ्गिणः२ । शिखादित्वात् फली । बर्ही ॥ मलादीमसश्च ॥ ७ । २ । १४ ॥ चादिनः । मलीमसः । मलिनः । मलवान् ॥ मरुत्पर्वणस्तः ॥ ७ । २ । १५ ॥ मत्वर्थे । मरुत्तः । पर्वतः । पक्षे मरुत्वान् । पर्ववान् ॥ वलिवटितुण्डेर्भः ॥ ७ । २ । १६ ॥ मत्वर्थे । वलिभः । वटिभः । तुण्डिभः । वलिमान् ॥ ऊर्णाहंशुभमो युस् ॥ ७ । २ । १७ ॥ मत्वर्थे । ऊर्णायुः । अहंयुः । शुभंयुः ॥ कंशंभ्यां युस्तियस्तुतवभम् ॥ ७ । २ । १८ ॥ मत्वर्थे । कंयुः । शंयुः । कन्तिः । शन्तिः । कंयः । शंयः । कंतुः । शन्तुः । कन्तः । शन्तः । कंवः । शंवः । कंभः । शंभः ॥ बलवातदन्तललाटादूलः ॥ ७ । २ । १९ ॥ बलूलः । वातूलः । दन्तूलः । ललाटूलः । बलवान् ॥ प्राण्यङ्गादातोलः ॥ ७ । २ । २० ॥ मत्वर्थे । चूडालः । चूडावान् । प्राण्यङ्गादिति किम् ? । जङ्घावान् प्रासादः ॥ सिध्मादिक्षुद्रजन्तुरुग्भ्यः ॥ ७ । २ । २१ ॥ मत्वर्थे लः । सिध्मलः । सिध्मवान् । वध्मलः यूकालः । मूर्छालः ॥ प्रज्ञापर्णोदकफेनाल्लेलौ ॥ ७ । २ । २२ ॥ प्रज्ञालः । प्रज्ञिलः । पर्णलः । पर्णिलः । उदकलः । उदकिलः । फेनलः । फेनिलः । फेनवान् ॥ कालाजटाघाटात् क्षेपे ॥ ७ । २ । २३ ॥ मत्वर्थे लेलौ । कालालः । कालिलः । जटालः । जटिलः । घाटालः । घाटिलः । क्षेप इति किम् ? । कालावान् ॥ वाच आलाटौ ॥ ७ । २ । २४ ॥ मत्वर्थे क्षेपे । वाचालः । वाचाटः ॥ ग्मिन् ॥ ७ । २ । २५ ॥ वाचो मत्वर्थे । वाग्मी । वाग्वान् ॥ मध्वादिभ्यो रः ॥ ७ । २ । २६ ॥ मत्वर्थे । मधुरो रसः । खरो गर्दभः ॥ कृष्यादिभ्यो वलच् ॥

७ । २ । २७ ॥ मत्वर्थे ॥ वलच्यपित्रादेः ॥ ३ । २ । ८२ ॥ दीर्घः । कृषीवलः कुटुम्बी । कृषिमत् क्षेत्रम् । आसुतीवलः । कल्यपालः । आसुतिमान् । अपित्रादेरिति किम् ? । पितृवलः । मातृवलः ॥ लोमपिच्छादेः शेलम् ॥ ७ । २ । २८ ॥ मत्वर्थे यथासंख्यम् । लोमशः । लोमवान् । गिरिशः । पिच्छिलः । पिच्छवान् । उरसिलः ॥ नोऽङ्गादेः ॥ ७ । २ । २९ ॥ मत्वर्थे । अङ्गना चार्वङ्गी स्त्री । पामनः । पामवान् ॥ शाकीपलालीदद्र्वा ह्रस्वश्च ॥ ७ । २ । ३० ॥ मत्वर्थे नश्च । शाकिनः । शाकीमान् । पलालिनः । दद्रुणः ॥ विष्वचो विषुश्च ॥ ७ । २ । ३१ ॥ मत्वर्थे नः । विषुणःरविर्वायुर्वा । विष्वग्वान् ॥ लक्ष्म्या अनः ॥ ७ । २ । ३२ ॥ मत्वर्थे । लक्ष्मणः । लक्ष्मीवान् ॥ प्रज्ञाश्रद्धार्चावृत्तेर्णः ॥ ७ । २ । ३३ ॥ मत्वर्थे । प्राज्ञः । प्रज्ञावान् । श्राद्धः । श्रद्धावान् । आर्च्चः । अर्चावान् । वार्त्तः । वृत्तिमान् ॥ ज्योत्स्नादिभ्योऽण् ॥ ७ । २ । ३४ ॥ मत्वर्थे । ज्यौत्स्नी रात्रिः । तामिस्त्री ॥ सिकताशर्करात् ॥ ७ । २ । ३५ ॥ मत्वर्थेऽण् । सैकतः । सिकतावान् । शार्करः ॥ इलश्च देशे ॥ ७ । २ । ३६ ॥ सिकताशर्कराभ्यां मत्वर्थे ऽण् । सिकतिलः । सैकतः । सिकतावान् । शर्करिलः । शार्करो देशः ॥ द्युद्रोर्मः ॥ ७ । २ । ३७ ॥ मत्वर्थे । द्युमः । द्रुमः ॥ काण्डाण्डभाण्डादीरः ॥ ७ । २ । ३८ ॥ मत्वर्थे काण्डीरः । काण्डवान् । आण्डीरः । भाण्डीरः ॥ कच्छ्वा डुरः ॥ ७ । २ । ३९ ॥ कच्छुरः । कच्छूमान् ॥ दन्तादुन्नतात् ॥ ७ । २ । ४० ॥ उन्नत्युपाधेर्दन्ताड्डुरो मत्वर्थे । दन्तुरः । उन्नतादिति किम् ? । दन्तवान् ॥ मेधारथान्नवेरः ॥ ७ । २ ।४१॥ मत्वर्थे । मेधिरः ॥ मेधावान् । पक्षे वक्ष्यमाणो विन् । मेधावी । रथिरः । रथिकः । रथी ॥ कृपाहृदयादालुः ॥ ७ । २ । ४२ ॥ मत्वर्थे । कृपालुः । हृदयालुः । हृदयी ॥ केशाद्वः ॥ ७ । २ । ४३ ॥ मत्वर्थे वा स्यात् । केशवः । केशवान् । केशी ॥ मण्यादिभ्यः ॥ ७ । २ । ४४ ॥ मत्वर्थे वः स्यात् । मणिवः । हिरण्यवः । मणिमान् ॥ हीनात्स्वाङ्गादः ॥ ७ । २ । ४५ ॥ मत्वर्थे । कर्णः । हीनादिति किम् ? । कर्णवान् ॥ अभ्रादिभ्यः ॥ ७ ।

२ । ४६ ॥ मत्वर्थे अः स्यात् ॥ अभ्रं नभः । अर्शसो मेघः ॥ **अस्तपोमायामेधास्रजो विन्** ॥ ७ । २ । ४७ ॥
मत्वर्थे । यशस्वी । यशस्वान् । तपस्वी । मायावी । मायावान्। मेधावी । स्रग्वी । ज्योत्स्नाद्यणा बाधो मा भूदित्येवमर्थं
तपसो ग्रहणम् ॥ **आमयाद्दीर्घश्च** ॥ ७ । २ । ४८ ॥ मत्वर्थे विन् । आमयावी । आमयवान् ॥ **स्वामिन्नीशे** ॥ ७
। २ । ४९ ॥ स्वशब्दान्मत्वर्थे मिन् दीर्घश्चास्य निपात्यते । स्वमस्यास्तीति स्वामी ॥ **गोः** ॥ ७ । २ । ५० ॥
मत्वर्थे मिन् स्यात् । गोमी । गोमान् ॥ **ऊर्जो विन्वलावश्चान्तः** ॥ ७ । १ । ५१ ॥ मत्वर्थे । ऊर्जस्वी । ऊर्जस्वलः ।
ऊर्ग्वान् ॥ **तमिस्रार्णवज्योत्स्नाः** ॥ ७ । २ । ५२ ॥ एते मत्वर्थे निपात्याः । तमिस्रा रात्रिः । तमःशब्दाद्र उपा-
न्त्यस्येत्वं च निपात्यते । तमिस्राणि गुहामुखानि । मतुश्च । तमस्वान् । अर्णसो वः मत्ययोऽन्त्यलोपश्च । अर्णवः॥
ज्योतिःशब्दान्न उपान्त्यलोपश्च । ज्योत्स्ना चन्द्रप्रभा ॥ **गुणादिभ्यो यः** ॥ ७ । २ । ५३ ॥ मत्वर्थे । गुण्यो ना ।
हिम्यो गिरिः । हिमवान् ॥ **रूपात् प्रशस्ताहतात्** ॥ ७ । २ । ५४ ॥ प्रशस्तोपाधेराहतोपाधेश्च रूपान्मत्वर्थे यः
। रूप्यो गौः । रूप्यं कार्षापणम् । रूपवानन्यः ॥ **पूर्णमासोऽण्** ॥ ७ । २ । ५५ ॥ मत्वर्थे । पूर्णो माश्चन्द्रमा
अस्यामिति पौर्णमासी ॥ **गोपूर्वादत इकण्** ॥ ७ । २ । ५६ ॥ मत्वर्थे । गौशतिकः । अत इति किम् ? । गोविं-
शतिमान् ॥ **निष्कादेः शतसहस्रात्** ॥ ७ । २ । ५७ ॥ मत्वर्थे इकण् । नैष्कशतिकः । नैष्कसहस्रिकः। आदेरि-
ति किम् ?। स्वर्णनिष्कशतमस्यास्ति ॥ **एकादेः कर्मधारयात्** ॥ ७ । २ । ५८ ॥ अदन्तादिकण् । मत्वर्थे ।
ऐकगविकः ॥ **सर्वादेरिन्** ॥ ७ । २ । ५९ ॥ अदन्तात् कर्मधारयान्मत्वर्थे । सर्वधनी ॥ **प्राणिस्थादस्वाङ्गाद्**
**द्वन्द्वरुग्निन्द्यात्** ॥ ७ । २ । ६० ॥ अदन्तादिन् । कटकवलयिनी । कुष्ठी । ककुदावर्त्ती । प्राणिस्थादिति किम् ?
। पुष्पफलवान् वृक्षः । अस्वाङ्गादिति किम् ? । स्तनकेशवती ॥ **वातातीसारपिशाचात्कश्चान्तः** ॥ ७ । २ ।
६१ ॥ वातकी । अतीसारकी । पिशाचकी ॥ **पूरणाद्वयसि** ॥ ७ । २ । ६२ ॥ मत्वर्थे इन्नेव । पञ्चमी बालः ॥

सुखादेः ॥ ७ । २ । ६३ ॥ मत्वर्थे । इन्नेव । सुखी । दुःखी ॥ मालायाः क्षेपे ॥ ७ । २ । ६४ ॥ मत्वर्थ इन्नेव । माली । क्षेप इति किम् ? । मालावान् ॥ धर्मशीलवर्णान्तात् ॥ ७ । २ । ६५ ॥ मत्वर्थे इन्नेव । मुनिधर्मी । यतिशीली । ब्राह्मणवर्णी ॥ बाह्वर्वादेर्बलात् ॥ ७ । २ । ६६ ॥ मत्वर्थे इन्नेव । बाहुबली । ऊरुबली ॥ मन्माब्जादेर्नाम्नि ॥ ७ । २ । ६७ ॥ मत्वर्थे इन्नेव । दामिनी । सोमिनी । अब्जिनी । कमलिनी ॥ हस्तदन्तकराज्जातौ ॥ ७ । २ । ६८ ॥ मत्वर्थे इन्नेव । हस्ती । दन्ती । करी ॥ वर्णाद्ब्रह्मचारिणि ॥ ७ । २ । ६९ ॥ मत्वर्थे इन्नेव । वर्णी । ब्रह्मचारीत्यर्थः । वर्णवानन्यः ॥ पुष्करादेर्देशे ॥ ७ । २ । ७० ॥ मत्वर्थे इन्नेव । पुष्करिणी । पद्मिनी । देश इति किम् ? । पुष्करवान् हस्ती ॥ सूक्तसाम्नोरीयः ॥ ७ । २ । ७१ ॥ मत्वर्थे । अच्छावाकीयं सूक्तम् । यज्ञायज्ञीयं साम ॥ लुब् वाऽध्यायानुवाके ॥ ७ । २ । ७२ । मत्वर्थे ईयस्य । लुग्विधेरेवेयोऽनुमीयते । गर्दभाण्डः । गर्दभाण्डीयोऽध्यायोऽनुवाको वा ॥ विमुक्तादेरण् ॥ ७ । २ । ७३॥ मत्वर्थेऽध्यायानुवाकयोः । वैमुक्तः । दैवासुरः अध्यायोऽनुवाको वा ॥ घोषदादेरकः ॥ ७ । २ । ७४ ॥ मत्वर्थेऽध्यायानुवाकयोः । घोषदकः । गोषदकः अध्यायोऽनुवाको वा ॥ प्रकारे जातीयर् ॥ ७ । २ । ७५ ॥ प्रथमान्तात् षष्ठ्यर्थे । सामान्यस्य विशेषो विशेषान्तरानुप्रवृत्तः प्रकारः । पटुजातीयः ॥ रिति ॥ ३ । २ । ५८ ॥ परतः ङ्यनूङ्पुंवत् । पट्वी प्रकारोऽस्याः पटुजातीया ॥ कोऽण्वादेः ॥ ७ । २ । ७६ ॥ पूर्वसूत्रविषये । अणुकः । स्थूलकः पटः ॥ जीर्णगोमूत्रावदातसुरायवकृष्णाच्छाल्याच्छादनसुराहिव्रीहितिले ॥ ७ । २ । ७७ ॥ तदस्य प्रकार इति विषये कः । जीर्णकः-शालिः । गोमूत्रकमाच्छादनम् । अवदातिका सुरा । सुरकोऽहिः । यवकोऽहिः । यवको व्रीहिः । कृष्णकास्तिलाः ॥

॥ इति मत्वर्थीयाः ॥

## ॥ अथ स्वार्थिकाः ॥

भूतपूर्वे प्चरट् ॥ ७।२।७८ ॥ अतः परं प्रायः स्वार्थिकाः प्रत्ययाः । तत्रोपाधिः प्रततेर्विज्ञायते स च प्रत्ययस्य द्योत्यः तत्र वर्तमानान्नाम्नः प्चरट् । पूर्वं भूतो भूतपूर्वः । भूतपूर्व आढ्य आढ्यचरः । आढ्यचरी । टकारो ङ्यर्थः। पकारः पुंवद्भावार्थः । भूतशब्दो वर्तमानेऽप्यस्ति पूर्वशब्दो दिगादावपीति अतिक्रान्त कालप्रतिपत्त्यर्थमुभयोरुपादानम् । प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य भूतपूर्वत्वेऽयं प्रत्ययः तेनेह नार्जुनो माहिष्मत्यां भूतपूर्व इति ॥ गोष्ठादीनञ् ॥७ । २ । ७९॥ भूतपूर्वे । गौष्ठीनो देशः ॥ षष्ठ्या रूप्य प्चरट् ॥७।२।८०॥ भूतपूर्वे । देवदत्तरूप्यो गौः । देवदत्तचरः ॥व्याश्रये तसुः॥७।२।८१॥ षष्ठ्यन्तान्नानापक्षाश्रये गम्ये तसुः । देवा अर्जुनतोऽभवन् । रविः कर्णतोऽभवत् ॥ रोगात्प्रतीकारे॥७।२।८२॥ षष्ठ्यन्तादपनयने गम्ये तसुः। प्रवाहिकातः कुरु तच्चिकित्सां कुर्वित्यर्थः॥पर्यभेः सर्वोभये ॥७।२।८३॥ यथासंख्यं तसुः । परितः सर्वत इत्यर्थः। अभितः उभयत इत्यर्थः। सर्वोभय इति किम् ?। वृक्षं परि अभि वा ॥ आद्यादिभ्यः ॥७।२।८४॥ सम्भवद्विभक्त्यन्तेभ्यस्तसुः । आदौ आदेर्वा आदितः । अन्ततः । मध्यतः ॥ क्षेपातिग्रहाव्यथेष्वकर्तुस्तृतीयायाः॥७।२।८५॥ तसुः। वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः वृत्ततोऽतिगृह्यते। साधुवृत्तोऽन्यानतिक्रम्य वृत्तेन गृह्यते । साध्वाचार इति सम्भाव्यत इत्यर्थः। वृत्ततो न व्यथते न चलति न बिभेति चेत्यर्थः । अकर्तुरिति किम् ?। मैत्रेण क्षिप्तः ॥पापहीयमानेन॥७।२।८६॥ योगे तृतीयान्तादकर्तुस्तसुः । वृत्ततः पापः । वृत्ततो हीयते ॥ प्रतिना पञ्चम्याः ॥ ७ । २ । ८७ ॥ प्रतिना योगे या पञ्चमी विहिता तदन्तात्तसुर्वा । अभिमन्युरर्जुनादर्जुनतो वा प्रति ॥ अहीयरुहोऽपादाने ॥ ७ । २ । ८८॥ पञ्चम्यन्तात्तसुर्वा । ग्रामाद् ग्रामतो वैति । अहीयरुह इति किम् ?। सार्थाद्धीनः गिरेरवरोहति ॥ किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस् ॥ ७ । २ । ८९॥ पञ्चम्यन्तात् ॥

इतोऽतः कुतः ॥ ७ । २ । ९० ॥ एते तसन्ता निपात्यन्ते । इदमः सर्वादेश इः । इतः । एतद अः सर्वादेशः । अतः । किमः कुः । कुतः । सर्वतः । आद्यादेः । यतः । ततः । बहुतः । द्व्यादिवर्जनं किम् ? । द्वाभ्यां । त्वत् । अवैपुल्येति किम् ? । बहोः सुपात् ॥ भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात् ॥ ७ । २ । ९१ ॥ किमद्व्यादिसर्वाद्यवैपुल्यबहोः सर्वविभक्त्यन्तात्तस् वा । स भवान् ततोभवान् । ते भवन्तः ततोभवन्तः । स आयुष्मान् तत आयुष्मान् । स दीर्घायुः ततोदीर्घायुः । तं देवानांप्रियं ततोदेवानांप्रियम् ॥ त्रप्च ॥ ७ । २ । ९२ ॥ भवत्वाद्यैः समानाधिकरणात् किमद्व्यादिसर्वाद्यवैपुल्यबहोः सर्वस्याद्यन्तात् वा । स भवान् । तत्रभवान् । ततोभवान् । तस्मिन् भवति । तत्रभवति ततोभवति । आयुष्मदादिनाऽप्येवम् ॥ सप्तम्याः ॥ ७ । २ । ९४ ॥ किमद्व्यादिसर्वाद्यवैपुल्यबहोस्त्रप् ॥ क्व कुत्रात्रेह ॥ ७ । २ । ९३ एते त्रबन्ता निपात्याः । किमः क्वादेशस्त्रपोऽकारः । क्व । किमः कुः । कुत्र । एतदोऽकारः । अत्र । इदम इकारादेशस्त्रपो हादेशः । इह । त्रमात्रे चैते आदेशाः । तेन भवदादियोगेऽपि । क्व भवान् । कुत्र भवान् ॥ किं यत्तत्सर्वैकान्यात्काले दा ॥ ७ । २ । ९५ ॥ सप्तम्यन्तात् । कस्मिन् काले कदा । यदा । तदा । सर्वदा । एकदा । अन्यदा ॥ सदाऽधुनेदानींतदानीमेतर्हि ॥ ७ । २ । ९६ ॥ एते काले वाच्ये निपात्यन्ते । सर्वशब्दाद्दाप्रत्ययः सभावश्चास्य । सर्वस्मिन् काले सदा । इदमोऽधुना प्रत्ययोऽकारादेशश्च । अस्मिन् कालेऽधुना । इदमो दानीं प्रत्यय इकारादेशश्च । इदानीम् । तदो दानीं प्रत्ययः । तदानीम् । इदमो र्हिः एतादेशश्च । एतर्हि । सद्योऽद्यपरेद्यव्यह्नि ॥ ७।२।९७ ॥ एतेऽह्नि काले निपात्याः । समानेऽह्नि सद्यः । समानशब्दात् सप्तम्यन्तात् द्यस् प्रत्ययः समानस्य सभावश्च । अस्मिन्नहनि अद्य । इदमो द्यः प्रत्ययः अकारादेशश्चास्य । परस्मिन्नहनि परेद्यवि । परशब्दात् एद्यविः प्रत्ययः । सद्य इति केचित् कालमात्रे निपातयन्ति ॥ पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ॥ ७ । २ । ९८ ॥ अह्नि काले । पूर्वस्मिन्नहनि पूर्वेद्युः । अपरेद्युः । अधरेद्युः । उत्तरेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः ॥ उभयाद् द्युश्च ॥

७ । २ । ९९ ॥ एद्युस् अह्नि । उभयद्युः । उभयेद्युः ॥ ऐषमःपरुत्परारि वर्षे ॥ ७ । २ । १०० ॥ निपात्यते ।
अस्मिन् संवत्सरे ऐषमः । इदम्शब्दात्समसण् प्रत्ययः इदमश्चैकारादेशः । पूर्वस्मिन् परस्मिन् वा संवत्सरे परुत् । पूर्व
शब्दात्परशब्दाद्वा उत्प्रत्ययः तस्य च परादेशः । पूर्वतरे परतरे वा संवत्सरे परारि । पूर्वतरशब्दात्परतरशब्दाद्वा
आरि प्रत्ययः प्रकृतेः परादेशश्च ॥ अनद्यतने र्हिः ॥ ७ । २ । १०१ ॥ सप्तम्यन्तात् काले वर्तमा-
द्यथासम्भवं किमद्यादिसर्वाद्यवैपुल्यबहोः । कस्मिन्ननद्यतने काले कर्हि । यर्हि । तर्हि । बहुर्हि ॥ प्रकारे था ॥ ७ । २
। १०२ ॥ सम्भवद्विभक्त्यन्तात्किमद्यादिसर्वाद्यवैपुल्यबहोः । सर्वथा । अन्यथा ॥ कथमित्थम् ॥ ७ । २ । १०३ ॥
एतौ प्रकारे निपात्यौ । किमस्थापवादस्थम् । कथम् । इदम एतदो वा थम् । इदादेशश्च । इत्थम् ॥ सङ्ख्याया धा ॥
७ । २ । १०४ ॥ प्रकारे । एकधा । द्विधा । कतिधा ॥ विचाले च ॥ ७ । २ । १०५ ॥ एकस्यानेकीभावोऽनेक-
स्य चैकीभावो विचालः । तस्मिन् गम्ये संख्याया धा वा । एको राशिर्द्वौ द्विधा वा क्रियते । अनेकमेकमेकधा वा करो-
ति ॥ वैकाद्ध्यमञ् ॥ ७ । २ । १०६ ॥ संख्यार्थात्प्रकारवृत्तेर्विचाले च गम्ये । ऐकध्यम् एकधा वा भुङ्क्ते ।
अनेकमेकं करोति ऐकध्यम् । एकधा वा करोति ॥ द्वित्रेर्धमञेधौ वा ॥ ७ । २ । १०७ ॥ प्रकारार्थाद्विचाले च
गम्ये । द्वैधम् । त्रैधम् । द्वेधा । त्रेधा । द्विधा । त्रिधा । भुङ्क्ते । एकराशिं द्वौ करोति द्वैधम् । त्रैधम् । द्वेधा । त्रेधा ।
द्विधा । त्रिधा । करोति ॥ तद्वति धण् ॥ ७ । २ । १०८ ॥ द्वित्रिभ्याम् । द्वैधानि त्रैधानि ॥ वारे कृत्वस् ॥
७ । २ । १०९ ॥ वारो धात्वर्थस्यायौगपद्येन वृत्तिः तत्कालो वा । तद्वृत्तेः संख्यार्थाद्वारवति धात्वर्थे कृत्वस् । पञ्च-
कृत्वो भुङ्क्ते ॥ द्वित्रिचतुरः सुच् ॥ ७ । २ । ११० ॥ वारार्थेभ्यस्तद्वति । द्विः । त्रिः । चतुः भुङ्क्ते ॥ एका-
त्सकृच्चास्य ॥ ७ । २ । १११ ॥ वारार्थात्तद्वति सुच् । सकृद्भुङ्क्ते ॥ बहोर्धाऽऽसन्ने ॥ ७ । २ । ११२ ॥ बहोः
संख्यार्थाद्दूरवारार्थात्तद्वति धा । बहुधा भुङ्क्ते ॥ दिक्शब्दाद्दिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः ॥ ७ । २ ।

११३ ॥ वर्तमानात्स्वार्थेधा ॥ लुबञ्चेः ॥ ७ । २ । १२३ ॥ दिक्शब्दाद्दिगादिवृत्तेः प्रथमाद्यन्ताद्विहितो या धा एतो धा तस्य । प्राची दिक् रम्या प्राग्रम्यम् । प्राङ् देशः कालो वा रम्यः प्राग्रम्यम् । प्राच्या दिशो देशात्कालाद्वा आगतः प्रागागतः । प्राच्यां दिशि प्राचोर्देशकालयोर्वा वासः प्राग्वासः ॥ ऊर्ध्वादुपरिष्टाताद्रिपश्चास्य ॥ ७ । २ । ११४ ॥ दिग्देशकालार्थात्प्रथमाद्यन्तात् । उपरि उपरिष्टाद्रम्यम् । आगतो वासो वा ॥ पूर्वावराधरेभ्यो ऽस्तस्तातौ पुरवधश्चैषाम् ॥ ७ । २ । ११५॥ दिगादिवृत्तिभ्यः प्रथमान्तेभ्यः । पुरः । अवः । अधः । पुरस्तात् । अवरस्तात् । अधरस्तात् । रम्यमागतो वासो वा ॥ परावरात्स्तात् ॥ ७ । २ । ११६ ॥ दिगाद्यर्थात् प्रथमाद्यन्तात्स्वार्थे परस्तात् । अवरस्तात् । रम्यमागतो वासो वा ॥ दक्षिणोत्तराच्चातस् ॥ ७ । २ । ११७ ॥ चात्परावराभ्यां च दिगाद्यर्थाभ्यां प्रथमाद्यन्ताभ्यां स्वार्थे । दक्षिणतः । उत्तरतः । परतः । अवरतः । रम्यमागतो वासो वा ॥ अधरापराच्चात् ॥ ७ । २ । ११८ ॥ दक्षिणोत्तराभ्यां च दिगाद्यर्थाभ्यां प्रथमाद्यन्ताभ्यां । अधरात् ॥ पश्चोऽपरस्य दिक्पूर्वस्य चाति ॥ ७ । २ । १२४ ॥ पश्चात् । दक्षिणपश्चात् । दक्षिणात् । उत्तरात् । रम्यमागतो वासो वा ॥ वा दक्षिणात्प्रथमासप्तम्या आः ॥ ७ । २ । ११९ ॥ दिगाद्यर्थात् । दक्षिणा । दक्षिणतः । दक्षिणाद्रम्यं वासो वा ॥ आही दूरे ॥ ७ । २ । १२० ॥ दूरदिग्देशार्थात् प्रथमासप्तम्यन्ताद्दक्षिणाद्वा आहिश्च स्यात् । ग्रामाद्दक्षिणा दक्षिणाहि रम्यं वासो वा ॥ वोत्तरात् ॥ ७।२।१२१ ॥ दिगाद्यर्थात् सिद्ध्यन्ताद्वा आहिश्च वा । उत्तरा । उत्तराहि । उत्तरतः । उत्तरात् रम्यं वासो वा ॥ अदूरे एनः ॥ ७ । २ । १२२ ॥ दिक्शब्दाददूरदिगाद्यर्थात् सिद्ध्यन्तादेनः । पूर्वेणास्य रम्यं वसति वा ॥ कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्त्वे च्विः ॥ ७ । २ । १२६ ॥ कर्मार्थात्कृगा योगे कर्त्रर्थाद्भ्वास्तियोगे गम्ये च्विः ॥ ईश्च्वाववर्णस्यानव्ययस्य ॥ ४ । ३ । १११ ॥ शुक्लीकरोति पटम् । प्रागशुक्लं शुक्लं करोतीत्यर्थः । शुक्ली भवति । शुक्ली स्यात् पटः । अनव्ययस्येति किम् ? दिवाभूता रात्रिः । पूर्वसूत्रे प्रागिति कि-

म ?। अशुक्लं शुक्लं करोत्येकदा ॥ दीर्घश्च्वियङ्यक्क्येषु च ॥ ४ । ३ । १०८ ॥ यादावाशिषि च दीर्घः। शुचीकरोति ॥ अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ ॥ ७ । २ । १२७ ॥ अरूस्यात् । बहुवचनात्तदन्तानामपि ग्रहणम्। महारूस्यात् । उन्मनास्यात । चक्षूस्यात् । चेतीस्यात् । रहीस्यात् । रजीस्यात् ॥ इसुसोर्बहुलम् ॥ ७ । २ । १२८ ॥ च्वौ लुक् । सर्पीकरोति नवनीतम् । धनूस्यात् । न च भवति । सर्पिर्भवति । धनुर्भवति ॥ व्यञ्जनस्यान्त ईः ॥ ७ । २ । १२९ ॥ च्वौ बहुलम् । दृषदीभवति शिला । न च भवति । दृषद् भवति शिला ॥ आपत्यस्य क्यच्च्व्योः ॥ २ । ४ । ९१ ॥ व्यञ्जनाद्यो लुक् । गार्गीभवति । आपत्यस्येति किम् ?। साङ्काश्यीयति । व्यञ्जनादित्येव । कारिकेयीवति ॥ ऋतो रीः ॥ ४ । ३ । १०९ ॥ च्वियङ्यक्येषु । पित्रीस्यात् ॥ व्याप्तौ स्सात् ॥ ७ । २ । १३० ॥ कृभ्वस्तिभ्यां योगे कर्मकर्तृभ्यां प्राग्न तत्त्व इति विषये सादिः सात् प्रागतत्त्वस्य सर्वात्मना द्रव्येण सम्बन्धे गम्ये । द्विसकारनिर्देशाश्च षः । अग्निसात् काष्ठं करोति । अग्निसाद्भवति । अग्निसात्स्यात् ॥जातेः संपदा च॥ ७ । २ । १३१॥ कृभ्वस्तिभिर्योगे कृग्कर्मणो भ्वस्तिसम्पत्कर्तुश्च प्रागतत्त्वेन सामान्यस्य व्याप्तौ स्सात् । अस्यां सेनायां सर्वं शस्त्रमग्निसात्करोति दैवम् । अग्निसाद्भवति । अग्निसात्स्यात् । अग्निसात्सम्पद्यते ॥ तत्राधीने ॥ ७ । २ । १३२ ॥ तत्रेति सप्तम्यन्तात् कृभ्वस्तिसंपद्योगे स्सात् । राजसात् करोति । राजसाद्भवति । राजसात्स्यात् । राजसात्सम्पद्यते ॥ देये त्रा च ॥ ७ । २ । १३३ ॥ सप्तम्यन्तादधीने कृभ्वस्तिसंपद्योगे । चकारः कृभ्वस्तिभ्यां सम्पदा चेत्यस्यानुकर्षणार्थो न तु स्सातः । तेनोत्तरत्र नानुवर्त्तते । देवत्राकरोति द्रव्यम् । विप्रत्राभवति स्यात् सम्पद्यते वा देय इति किम् ?। राजसात् स्यात् राष्ट्रम् ॥ सप्तमी द्वितीयाद्देवादिभ्यः ॥ ७ । २ । १३४ ॥ स्वार्थे त्रा । देवत्रा वसेत् भवेत् स्यात् करोति वा एवं मनुष्यत्रा ॥ तीयशम्बबीजात्कृगा कृषौ डाच् ॥ ७ । २ ।

१३५ ॥ द्वितीयं वारं करोति द्वितीयाकरोति क्षेत्रम् । द्वितीयं वारं कृषतीत्यर्थः । एवं तृतीया करोति । शम्बा करोति क्षेत्रम् । अनुलोमकृष्टं पुनस्तिर्यक् कृषतीत्यर्थः । अन्ये त्वाहुः शम्बसाधनः कृषिरिति शम्बेन कृषतीत्यर्थः । बीजाकरोति । उप्ते पश्चादबीजेन सह कृषतीत्यर्थः । कृगेति किम् ? । द्वितीयं वारं कृषति । कृषाविति किम् ? । द्वितीयं पटं करोति ॥ **संख्यादेर्गुणात्** ॥ ७ । २ । १३६ ॥ कृग्योगे कृषिविषये डाच् । द्विगुणा करोति क्षेत्रम् । द्विगुणं कृषतीत्यर्थः ॥ **समयाद्यापनायाम्** ॥ ७ । २ । १३७ ॥ कृग्योगे डाच् । समया करोति । कालं क्षिपतीत्यर्थः ॥ **सपत्रनिष्पत्रादतिव्यथने** ॥ ७ । २ । १३८॥ गम्ये कृग्योगे डाच् । सपत्राकरोति मृगम् । पत्रं शरस्तेन सहितं करोति । शरमस्य शरीरे प्रवेशयतीत्यर्थः । निष्पत्रा करोति । शरमस्यापरपार्श्वेन निष्क्रमयतीत्यर्थः । सपत्राकरोति वृक्षं वायुः । निष्पत्राकरोति । अत्र पत्रशातनमेवातिव्यथनम् । सपत्राकरोतीत्यपि मङ्गलाभिप्रायेण निष्पत्राकरणमेवोच्यते । यथा दीपो नन्दतीति विध्वंसः । अतिव्यथन इति किम् ? । सपत्रं करोति वृक्षं सेकः ॥ **निष्कुलान्निष्कोषणे** ॥ ७ । २ । १३८॥ कृग्योगे डाच् । निष्कुला करोति दाडिमम् । अन्तरवयवान् बहिर्निःसारयतीत्यर्थः । निष्कोषण इति किम् ? । निष्कुलं करोति शत्रुम् ॥ **प्रियसुखादानुकूल्ये** ॥ ७ । २ । १४० ॥ गम्ये कृग्योगे डाच् । प्रियाकरोति गुरुम् । सुखाकरोति । गुरोरानुकूल्यं करोति तमाराधयतीत्यर्थः । आनुकूल्य इति किम् ? । प्रियं करोति साम । सुखं करोत्यौषधपानम् ॥ **दुःखात्प्रातिकूल्ये** ॥ ७ । २ । १४१ ॥ गम्ये कृग्योगे डाच् । दुःखाकरोति शत्रुम् । अनभिमतानुष्ठानेन तं पीडयतीत्यर्थः । प्रातिकूल्य इति किम् ? । दुःखं करोति रोगः ॥ **शूलात्पाके** ॥ ७ । २ । १४२ ॥ कृग्योगे डाच् । शूलाकरोति मांसम् । शूलेन पचतीत्यर्थः ॥ **सत्यादशपथे** ॥ ७ । २ । १४३ ॥ कृग्योगे डाच् । सत्याकरोति वणिग्भाण्डम् । कार्षापणादिदानेन मयावश्यमेतत् क्रेतव्यमिति विक्रेतारं प्रत्याययतीत्यर्थः । अशपथ इति किम् ? । सत्यं करोति । शपथमित्यर्थः ॥ **मद्रभद्राद्वपने** ॥ ७ । २ । १४४ ॥ कृग्योगे डाच् । मद्राक-

रोति भद्राकरोति नापितः । शिखोमाङ्गल्यं केशच्छेदनं करोतीत्यर्थः । वपन इति किम् ? । भद्रं करोति साधुः ॥ अव्यक्तानुकरणादनेकस्वरात्कृभ्वस्तिनाऽनितौ द्विश्च ॥ ७ । २ । १४५ ॥ डाज् वा यस्मिन् ध्वनौ वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्तः ॥ डाच्यादौ ॥ ७ । २ । १४९ ॥ अव्यक्तानुकरणस्यानेकस्वरस्याच्छब्दान्तस्य द्वित्वे सति तो लुक् । पटपटाकरोति भवेत् स्याद्वा । आदाविति किम् ? । पतपताकरोति । पूर्वसूत्रेऽनेकस्वरादिति किम् ? । खाट् करोति । अनिताविति किम् ? । पटिति करोति ॥ बह्वल्पार्थात्कारकादिष्टानिष्टे प्शस् ॥ ७ । २ । १५० ॥ यथासंख्यम् । इष्टं प्राशित्रादि । अनिष्टं श्राद्धादि । ग्रामे बहवो बहुशो वा ददाति । एवं भूरिशः । अल्पमल्पशो वा दत्ते श्राद्धे । एवं स्तोकशः । इष्टानिष्ट इति किम् ? । बहुदत्ते श्राद्धे । अल्पं प्राशित्रे ॥ सङ्ख्यैकार्थाद्वीप्सायां शस् ७ । २ । १५१ ॥ कारकार्थाद् वा । एकैकमेकशो वा दत्ते । माषं माषं माषशो वा देहि । संख्यैकार्थादिति किम् ? । माषौ माषौ दत्ते । वीप्सायामिति किम् ? । द्वौ दत्ते ॥ सङ्ख्यादेः पादादिभ्यो दानदण्डे चाकल्लुक् च ॥ ७ । २ । १५२ ॥ वीप्सायां विषये तद्योगे च प्रकृतेरन्तस्य । द्वौ द्वौ पादौ इति द्विपदिकां दत्ते दण्डितो भुङ्क्ते वा । एवं द्विशतिकाम् ॥ तीयाट्टीकण् न विद्या चेत् ॥ ७ । २ । १५३ ॥ तीयान्तादविद्यार्थात् स्वार्थे टीकण् वा । द्वितीयम् द्वैतीयीकम् । विद्या तु द्वितीया ॥ निष्फले तिलात्पिञ्जपेजौ ॥ ७ । २ । १५४ ॥ निष्फलस्तिलः तिलपेजः । तिलपिञ्जः । प्रायोऽतोर्द्वयसट् मात्रट् ॥ ७ । २ । १५५ ॥ स्वार्थे । यावद् द्वयसम् । यावन्मात्रम् । प्रायोग्रहणं प्रयोगानुसरणार्थम् ॥ वर्णाव्ययात् स्वरूपे कारः ॥ ७ । २ । १५६ ॥ स्वार्थे वा । अकारः । ककारः । ओँकारः । स्वरूप इति किम् ? । अः विष्णुः ॥ रादेफः ॥ ७ । २ । १५७ ॥ वा स्यात् । रेफः । प्रायोऽधिकाराद्रकार इत्यपि ॥ नामरूपभागाद्धेयः ॥ ७ । २ । १५८ ॥ स्वार्थे । नामधेयम् । रूपधेयम् । भागधेयम् ॥ मर्तादिभ्यो यः ॥ ७ । २ । १५९ ॥ स्वार्थे । मर्त्यः । सूर्यः ॥ नवादीनतनत्नं च नू चास्य ॥ ७ । २ । १६० ॥ स्वार्थे यो वा । नवीनम् । नू-

तनम् । नूत्नम् । नव्यम् ॥ प्रात्पुराणे नश्च ॥ ७ २ । १६१ ॥ इनतनत्नाः । प्रणम् । प्रीणम् । प्रतनम् । प्रत्नम् । पुराणमित्यर्थः ॥ देवात्तल् ॥ ७ । २ । १६२ ॥ स्वार्थे वा । देवता ॥ होत्राया ईयः ॥ ७ । २ । १६३ ॥ स्वार्थे वा । होत्रीयम् ॥ भेषजादिभ्यष्ट्यण् ॥ ७ । २ । १६४ ॥ स्वार्थे वा । भैषज्यम् । आनन्त्यम् ॥ प्रज्ञादिभ्योऽण् ॥ ७ । २ । १६५ ॥ स्वार्थे वा । प्राज्ञः । वाणिजः ॥ श्रोत्रौषधिकृष्णाच्छरीरभेषजमृगे ॥ ७ । २ । १६६ ॥ यथासंख्यं स्वार्थेऽण् वा । श्रौत्रं वपुः । औषधं भेषजम् । कार्ष्णो मृगः ॥ कर्मणः सन्दिष्टे ॥ ७ । १ । १६७ ॥ स्वार्थेऽण् वा । अन्येनान्योऽन्यस्मै यदाह त्वयेदं कार्यमिति तत्सन्दिष्टं कर्म । कार्मणं करोति । सन्दिष्टं कर्म करोतीत्यर्थः ॥ वाच इकण् ॥ ७ । २ । १६८ ॥ सन्दिष्टे । वाचिकं वक्ति ॥ विनयादिभ्यः ॥ ७ । २ । १६९ ॥ स्वार्थे इकण् वा । वैनयिकम् । सामयिकम् ॥ उपायाद् ह्रस्वश्च ॥ ७ । २ । १७० ॥ स्वार्थे इकण् वा । औपयिकम् ॥ मृदस्तिकः ॥ ७ । २ । १७१ ॥ स्वार्थे वा । मृत्तिका । मृत् ॥ सस्नौ प्रशस्ते ॥ ७ । २ । १७२ ॥ मृदो वा । मृत्सा मृत्स्ना ॥ प्रकृते मयट् ॥ ७ । ३ । १ ॥ स्वार्थे प्राचुर्येण प्राधान्येन वा कृतं प्रकृतम् । अन्नमयम् । पूजामयम् । अस्मिन् ॥ ७ । ३ । २ ॥ प्रकृतार्थान्मयट् । अन्नमयं भोजनम् ॥ तयोः समूहवच्च बहुषु ॥ ७ । ३ । ३ ॥ प्रकृतेऽस्मिन् इत्येतयोर्विषययोर्मयट् । आपूपकम् । अपूपमयम् अपूपास्तत्पर्वं वा ॥ निन्द्ये पाशप् ॥ ७ । ३ । ४ ॥ स्वार्थे । वैयाकरणपाशः ॥ प्रकृष्टे तमप् ॥ ७ । ३ । ५ ॥ सुकुमारतमः । कारकतमः । पकारः पुंवद्भावार्थः ॥ वान्तिकतमान्तितोऽन्तियान्तिषद् ॥ ७ । ४ । ३१ ॥ एते तमबाद्यन्ताः कृतनिकादिलोपादयो वा निपात्यन्ते । अतिशयेनान्तिक अन्तमः । अत्र तिकशब्दलोपो नो प्रशान इति सत्त्वाभावश्च निपात्यते । पक्षे अन्तिकतमः । अन्तिमः । अत्र क शब्दस्य लोपः । अन्तिकतमः । अन्तितः ॥ अपादानलक्षणे तसौ कस्य लोपः । अन्तिकतः । अन्तिके साधुः । अन्तियः । कलोप इकारस्य च लोपाभावः । अन्तिकयः । अन्तिके सीदति अन्तिषत् । अत्र कलोपः सस्य षत्वं च । पक्षे अन्ति-

कसत् ॥ **द्वयोर्विभज्ये च तरप्** ॥ ७ । ३ । ६ ॥ द्वयोर्मध्ये प्रकृष्टे विभज्ये च वर्त्तमानात्तरप् । पटुतरः । एवं साङ्काश्यकेभ्यः पाटलिपुत्रका आढ्यतराः ॥ **क्वचित्** ॥ ७ । ३ । ७ ॥ स्वार्थेऽपि तरप् । अभिन्नमेव अभिन्नतरकम् । उच्चैस्तराम् । क्वचिद्ग्रहणं शिष्टप्रयोगानुसरणार्थं ॥ **किं त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम्** ॥ ७ । ३ । ८ ॥ तमप्तरपोः । किंतराम् । किंतमाम् । पचतितराम् । पचतितमाम् । अपराण्हेतराम् । अपराण्हेतमाम् । नितराम् । नितमाम् । सत्त्वे तु उच्चैस्तमस्तरुः ॥ **गुणाङ्गाद्वेष्ठेयसू** ॥ ७ । ३ । ९ ॥ तमप्तरपोर्विषये यथासंख्यम् । पक्षे यथाप्राप्तं तमप्तरपौ पटिष्ठः । पटुतमः । पटीयान् । पटुतरः । गुणग्रहणं किम् ? गौतमः । गोतरः । अङ्गग्रहणं किम् ? शुक्लतमम् । कतरं रूपम् । **विन्मतोर्णीष्टेयसौ लुप्** ॥ ७ । ४ । ३२ ॥ ॥ **नैकस्वरस्य** ॥ ७ । ४ । ४४ ॥ अन्त्यस्वरादेरिणिण्यादौ च लुक् । स्रजिष्ठः । स्रजीयान् । त्वचिष्ठः । त्वचीयान् ॥ **अल्पयूनोः कन् वा** ॥ ७ । ४ । ३३ ॥ णीष्ठेयसौ कनिष्ठः । कनीयान् । अल्पिष्ठः । अल्पीयान् । यविष्ठः । यवीयान् ॥ **प्रशस्यस्य श्रः** ॥ ७ । ४ । ३४ ॥ णीष्ठेयसौ । श्रेष्ठः । श्रेयान् ॥ **वृद्धस्य च ज्यः** ॥ ७।४।३५ ॥ प्रशस्यस्य णीष्ठेयसौ । ज्येष्ठः ॥ **ज्यायान्** ॥ ७ । ४ । ३६ ॥ निपात्यते । ज्यायान् ॥ **बाढान्तिकयोः साधनेदौ** ॥ ७ । ४ । ३७ ॥ णीष्ठेयसौ ॥ साधिष्ठः । साधीयान् । नेदिष्ठः । नेदीयान् । प्रियस्थिरेति प्रादय आदेशाः । प्रेष्ठः । प्रेयान् । स्थेष्ठः । स्थेयान् । स्फेष्ठः । स्फेयान् । वरिष्ठः । वरीयानित्यादि । पृथुमृदुभृशेत्यादिना ऋकारस्य रः । प्रथिष्ठः । प्रथीयान् । म्रदिष्ठः । म्रदीयान् इत्यादि ॥ **बहोर्णीष्ठे भूय्** ॥ ७ । ४ । ४० ॥ भूयिष्ठः । ' भूलुंक् चेवर्णस्य ' भूयान् । भूऊ इत्यूकारप्रश्लेषादवादेशो न । स्थूलदूरेत्यादिनान्तस्थादिलोपे गुणे च । स्थविष्ठः । स्थवीयान् । दविष्ठः । दवीयान् । ह्रसिष्ठः ह्रसीयान् । क्षेपिष्ठः । क्षेपीयान् । क्षोदिष्ठः । क्षोदीयान् । त्र्यन्तस्वरादेः । करिष्ठः । करीयान् ॥ **त्यादेश्च प्रशस्ते रूपप्** ॥ ७ । ३ । १० ॥ नाम्नः । पचतिरूपम् । त्याद्यन्तानां क्रियाप्रधानत्वात् साध्यत्वेन लिङ्गसंख्याद्यनन्वयात् रूपवन्तस्यौत्सर्गिक-

मेकवचनं नपुंसकलिङ्गं च । पण्डितरूपः ॥ **अतमबादेरीषदसमाप्ते कल्पप् देश्यप् देशीयर्** ॥ ७ । ३ । ११ ॥ त्याद्यन्तान्नाम्नश्च । ईषदसमाप्तं पचति पचतिकल्पम् । पचतिदेश्यम् । पचतिदेशीयम् । पटुकल्पा । पटुदेश्या । पटुदेशीया ॥ **नाम्नः प्राग्बहुर्वा** ॥ ७ । ३ । १२ ॥ ईषदसमाप्ते ॥ बहुपटुः । पटुकल्पः ॥ **न तमबादिः कपोऽच्छिन्नादिभ्यः** ॥ ७ । ३ । १३ ॥ अयमेषामनयोर्वा प्रकृष्टः पटुकः । अच्छिन्नादिभ्य इति किम् ? । छिन्नकतमः ॥ **अनत्यन्ते** ॥ ७ । ३ । १४ ॥ कबन्तात्तमबादिर्न ॥ छिन्नाद्यर्थं वचनम् । इदमेषामनयोर्वा प्रकृष्टं छिन्नकं । भिन्नकम् ॥ **यावादिभ्य कः** ॥ ७ । ३ । १५ ॥ स्वार्थे । यावकः । मणिकः । यावादिराकृतिगणस्तेनाभिन्नतरकम् । बहुतरकमित्यादि सिद्धम् ॥ **कुमारीक्रीडनेयसोः** ॥ ७ । ३ । १६ ॥ स्वार्थे कः ॥ कन्दुकः ॥ श्रेयस्कः ॥ **लोहितान्मणौ** ॥ ७ । ३ । १७ ॥ स्वार्थे को वा । लोहितको लोहितो मणिः ॥ **रक्ताऽनित्यवर्णयोः** ॥ ७ । ३ । १८ ॥ लोहितात् को वा ॥ लोहितकः पटः । लोहितकमक्षिकोपेन ॥ **कालात्** ॥ ७ । ३ । १९ ॥ कज्जलादिरक्तेऽनत्यवर्णे च वर्त्तमानात् को वा । कालकः पटः । कालकं मुखं वैलक्ष्येण ॥ **शीतोष्णादृतौ** ॥ ७ । ३ । २० ॥ को वा । शीतक ऋतुः । उष्णक ऋतुः । ऋताविति किम् ? शीतो वायुः । उष्णः स्पर्शः ॥ **लूनवियातात्पशौ** ॥ ७ । ३ । २१ ॥ को वा । लूनकः । वियातकः पशुः ॥ **स्नानाद्वेदसमाप्तौ** ॥ ७ । ३ । २२ ॥ गम्यायां स्नातात्कः । वेदं समाप्य स्नातः स्नातकः ॥ ॥ **तनुपुत्राणुबृहतीशून्यात् सूत्रकृत्रिमनिपुणाच्छादनरिक्ते** ॥ ७ । ३ । २३ ॥ यथासंख्यं कः । तनुकं सूत्रम् । पुत्रकः कृत्रिमः । अणुकः । बृहतिका आच्छादनविशेषः । शून्यको रिक्तः ॥ **भागेऽष्टमाञ्ञः** ॥ ७ । ३ । २४ ॥ वा । आष्टमो भागः ॥ **षष्ठात्** ॥ ७ । ३ । २५ ॥ भागे ञो वा । षाष्ठो भागः । योगविभाग उत्तरार्थः ॥ **माने कश्च** ॥ ७ । ३ । २६ । भागे षष्ठाज् ञो वा । चेत् षष्ठकः षाष्ठो भागः मानम् ॥ **एकादाकिन् चासहाये** ॥ ७ । ३ । २७ ॥ कः । एकाकी । एककः ॥ असहाय इति किम् ? एक आचार्याः ॥ **प्राग्नित्यात्कप्** ॥ ७ । ३ । २८ ॥ नित्यश-

ब्दसंकीर्त्तनात्प्राग् येऽर्थास्तेषु द्योत्येषु कबधिकृतो ज्ञेयः । कुत्सिताऽल्पोऽज्ञातो वाऽश्वोऽश्वकः । पकारः पुंवद्भावार्थः ॥
**त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक्** ॥ ७ । ३ । २९ प्राग्नित्यात् । कुत्सितमल्पमज्ञातं वा पचति पचतकि ।
सर्वके । विश्वके ॥ **युष्मदस्मदोऽसोभादिस्यादेः** ॥ ७ । ३ । ३० ॥ स्वरेष्वन्त्यात्पूर्वोऽक् । त्वयका । मयका ।
असोभादिस्यादेरिति किम् ? युष्मकासु । युवकयोः । युवकाभ्यां ॥ **अव्ययस्य को द् च** ॥ ७ । ३ । ३१ ॥ प्रा-
ग्नित्याद्येऽर्थास्तेषु द्योत्येषु स्वरात्पूर्वोऽक् तत्सन्नियोगे । कुत्सितमुच्चैः । उच्चकैः । नीच्चकैः । धकित् ॥ पृथकद् ॥
**तूष्णीकाम्** ॥ ७ । २ । ३२ ॥ तूष्णीमो मःप्राक्का इत्यन्तो निपात्यते प्राग्नित्यात् । कुत्सितादि तूष्णी तूष्णीकामा-
स्ते ॥ **कुत्सिताल्पाज्ञाते** ॥ ७ । ३ । ३३ ॥ यथायोगं कबादयः । अश्वकः । पचतकिः । उच्चकैः ॥ **अनुकम्पात
द्युक्तनीत्योः** ॥ ७ । ३ । ३४ ॥ गम्ययोर्यथायोगं कबादयः । पुत्रकः । अनुकम्पितः पुत्र इत्यर्थः । स्वपिषकि । पु-
त्रक एहकि उत्सङ्गके उपविश । कर्दमकेनासि दिग्धकः ॥ **अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा** ॥ ७ । ३ । ३५ ॥
अनुकम्पायां गम्यायाम् । तद्युक्तनीताविति न वर्त्तते अनुकम्प्ययादेव प्रत्ययविधानात् ॥ **द्वितीयात्स्वरादूर्ध्वम्** ॥
७ । ३ । ४१ ॥ अनुकम्पायां विहिते स्वरादौ प्रत्यये शब्दस्वरूपस्य लुक् । देवियः । देविकः । देविलः । देवदत्तकः ।
अजादेरिति किम् ? । महिषकः ॥ **वोपादेरडाकौ च** ॥ ७ । ३ । ३६ ॥ अजातेर्मनुष्यनामधेयाद्बहुस्वरादनुकम्पाया-
मियेकेलाः । अनुकम्पित उपेन्द्रदत्त उपडः । उपकः । उपियः । उपिकः । उपिलः । उपेन्द्रदत्तकः ॥ **ऋवर्णोवर्णात्स्व-
रादेरादेर्लुक प्रकृत्या च** ॥ ७ । २ । ३७ ॥ अनुकम्पोत्पन्नस्य प्रत्ययस्य । मातृयः । मातृकः । मातृलः । वायुयः ।
वायुकः । वायुलः । स्वरादेरिति किम् ? । मद्रबाहुकः ॥ **लुक्युत्तरपदस्य कप् न** ॥ ७ । ३ । ३८ ॥ नृनाम्नोऽनुक-
म्पायां गम्यायाम् । देवदत्तो देवः । ते लुग्वेत्युत्तरपदलोपः । अनुकम्पितो देवो देवकः । देवका । उत्तरपदस्येति किम् ?
दत्तिका ॥ **लुक् चाजिनान्तात्** ॥ ७ । ३ । ३९ ॥ मनुष्यनाम्नः कप् न तत्सन्नियोगे लुगुत्तरपदस्य । व्याघ्रकः ॥

**षड्वर्जैकस्वरपूर्वपदस्य स्वरे** ॥ ७ । ३ । ४० ॥ उत्तरपदस्यानुकम्पार्थे प्रत्यये लुक् ॥ उत्तरसूत्रस्यापवादः । अनुकम्पितो वागाशीर्दत्तो वागाशीर्दत्तो वा वाचियः । वाचिकः । वाचिलः । षड्वर्जेत्यादि किम् ? अनुकम्पित उपेन्द्रदत्त उपडः ॥ षडङ्गुलिः षडियः । स्वर इति किम् ? वागाशीर्दत्तकः ॥ **द्वितीयात्स्वरादूर्ध्वम्** ॥ ७ । ३ । ४१ ॥ अनुकम्पार्थे स्वरादौ प्रत्यये लुक् । देवियः ॥ **सन्ध्यक्षरात्तेन** ॥ ७ । ३ । ४२ ॥ अनुकम्पार्थे स्वरादौ प्रत्यये प्रकृतेर्द्वितीयात्स्वरादूर्ध्वं लुक् ॥ कुबेरदत्तः कुबियः । कुबिकः । कुबिलः । सन्ध्यक्षरादिति किम् ? अनुकम्पितो गुरुदत्तो गुरुयः ॥ **शेवलाद्यादेस्तृतीयात्** ॥ ७ । ३ । ४३ ॥ मनुष्यनाम्नोऽनुकम्पायां विहिते स्वरादौ प्रत्यये स्वरादूर्ध्वं लुक् ॥ शेवलियः । शेवलिकः । शेवलिलः ॥ **क्वचित्तुर्यात्** ॥ ७ । ३ । ४४ ॥ एवं सुपरिय इत्यादि बृहस्पतियः ॥ **पूर्वपदस्य वा** ॥ ७ । ३ । ४५ ॥ दत्तियः । दत्तिकः । दत्तलः । वा वचनाद्यथाप्राप्तम् । देवियः । देविकः । देविलः ॥ **ह्रस्वे** ॥ ७ । ३ । ४६ ॥ यथायोगं कबादयः । पटकः । पचतकि ॥ **कुटीशुण्डाद्रः** ॥ ७ । ३ । ४७ ॥ ह्रस्वे ॥ कुटीरः । शुण्डारः ॥ **शम्या रुरौ** ॥ ७ । ३ । ४८ ॥ ह्रस्वे ॥ शमीरुः । शमीरः ॥ **कुत्वा डुपः** ॥ ७ । ३ । ४९ ॥ ह्रस्वे ॥ कुतुपः । कुतूरिति चर्ममयं तैलाद्यावपनमुच्यते ॥ **कासूगोणीभ्यां तरट्** ॥ ७ । ३ । ५० ॥ ह्रस्वे । कासूतरी । गोणीतरी । कासूः शक्तिर्नामायुधम् । गोणी धान्यावपनम् ॥ **वत्सोक्षाश्वर्षभाद् ह्रासे पित्** ॥ ७ । ३ । ५१ ॥ स्वप्रवृत्तिनिमित्तस्य गम्ये तरट् ॥ वत्सतरः । उक्षतरः । अश्वतरः । ऋषभतरः ॥ **वैकाद् द्वयोर्निर्धार्ये डतरः** ॥ ७ । ३ । ५२ ॥ वा । समुदायादेकदेशो जातिगुणक्रियासंज्ञाद्रव्यैर्निष्कृष्य बुद्ध्या पृथक्क्रियमाणो निर्धार्यः । एकतरो भवतोः कटः । पटुर्गन्ता देवदत्तो दण्डी वा । पक्षे एककः ॥ **यत्तत्किमन्यात्** ॥ ७ । ३ । ५३ ॥ द्वयोरेकस्मिन्निर्धार्ये डतरः । यतरो भवतोः कठादिस्ततर आगच्छेत् । एवं कतरः । अन्यतरः । **बहूनां प्रश्ने डतमश्च वा** ॥ ७ । ३ । ५४ ॥ यदादिभ्यो निर्धार्ये उत्तरः ॥ यतमो यतरो वा भवतां कटस्ततमस्ततरो वा यातु । एवं

कतमः । कतरः । अन्यतमः । अन्यतरः । पक्षे यको यो वा । सकः स वा भवतां कठ इत्यादि ॥ **वैकात्** ॥ ७ । ३ । ५५ ॥ बहूनामेकस्मिन्निर्धार्ये वतमः । एकतमः । एककः । एको वा भवतां कठः ॥ **क्तात्तमबादेश्चानत्यन्ते** ॥ ७ । ३ । ५६ ॥ कप् । अनत्यन्तं भिन्नं । भिन्नकम् । भिन्नतमकम् । भिन्नतरकम् ॥ **न सामिवचने** ॥ ७ । ३ । ५७ ॥ उपपदे अनत्यन्तार्थात् क्तान्तात् केवलात्तमबाद्यन्ताच्च कप् ॥ सामि अनत्यन्तं भिन्नम् । अर्धमनत्यन्तं भिन्नम् ॥ **नित्यं ञिनोऽण्** ॥ ७ । ३ । ५८ ॥ स्वार्थे । नित्यग्रहणान्महाविभाषा निवृत्ता । व्यावक्रोशी । सां कूटिनम् । **विसारिणो मत्स्ये** ॥ ७ । ३ । ५९ ॥ स्वार्थेऽण् । विसरतीति विसारी । ग्रहादित्वाण्णिन् । वैसारिणो मत्स्यः । विसारी अन्यः ॥ **पूगादमुख्यकाञ्ञ्यो द्रिः** ॥ ७ । ३ । ६० ॥ नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः । तद्वाचिनो नाम्नः स्वार्थे ञ्यः स च द्रिसंज्ञः, न चेत्पूगार्थं मुख्यार्थकान्तम् । लौहध्वज्यः । लोहध्वजाः पूगाः । अमुख्यकादिति किम् ? देवदत्तकः पूगः ॥ **व्रातादस्त्रियाम्** ॥ ७ । ३ । ६१ ॥ नानाजातीया अनियतवृत्तयः शरीरायासजीविनः संघा व्राताः, तदर्थात्स्वार्थे ञ्यो द्रिः ॥ कापोतपाक्यः । अस्त्रियामिति किम् ? । कपोतपाका ॥ **शस्त्रजीविसंघाञ्ञ्यड् वा** ॥ ७ । ३ । ६२ ॥ स्वार्थे, स च द्रिः । शाबर्यः । शबराः । पुलिन्दाः । पक्षे शबरः । संघादिति किम् ? वागुरः ॥ **वाहीकेष्वब्राह्मणराजन्येभ्यः** ॥ ७ । ३ । ६३ ॥ शस्त्रजीविसंघवाचिनः स्वार्थे ञ्यट् स च द्रिः । कौण्डीविश्यः । कुण्डीविशाः । अब्राह्मणेत्यादिति किम् ? गौपालिः । राजन्यः ॥ **वृकाट्टेण्यण्** ॥ ७ । ३ । ६४ ॥ शस्त्रजीविसंघवाचिनः स्वार्थे स च द्रिः । वार्केण्यः । वृकाः । वाहीकत्वे नित्यमवाहीकत्वे तु विकल्पेन ञ्यटि प्राप्ते वचनम् । एवमुत्तरसूत्रत्रयमपि ॥ **यौधेयादेरञ्** ॥ ७ । ३ । ६५ । शस्त्रजीविसंघार्थाद् द्रिः । यौधेयः । घार्तेयः ॥ **पर्श्वादेरण्** ॥ ७ । ३ । ६६ ॥ शस्त्रजीविसंघार्थात् स्वार्थे द्रिः । पार्शवः । राक्षसः । स्त्रियां तु पर्शूः । द्रेरञणोऽप्राच्यभर्गादेरित्यणो लुपि उतोऽप्राणिनश्चेत्यादि नोङ् ॥ **दामन्यादेरीयः** ॥ ७ । ३ । ६७ ॥ शस्त्रजीवि-

संघार्थाद् द्विः । दामनीयः । औलपीयः । **श्रुमच्छमीवच्छिखावच्छालादूर्णावद्विदभृदभिजितो गोत्रेऽणो यञ्** ॥ ७ । ३ । ६८ ॥ **स्वार्थे स च द्विः** ॥ श्रुमतोऽपत्यमण् तदन्ताद्यञ् ॥ श्रौमत्यः । शामीवत्यः । शैखावत्यः । शालावत्यः । और्णावत्यः । वैदभृत्यः । आभिजित्यः । गोत्र इति किम् ? । श्रुमते इदं श्रौमतम् ॥ इति स्वार्थिकाः ॥

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीविजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां तद्धितप्रकरणम् ॥

## ॥ अथ द्विरुक्तप्रक्रिया ॥

॥ **असकृत्सम्भ्रमे** ॥ ७।४।७२ ॥ पदं वाक्यं वा प्रयुज्यते । अहिरहिः । बुध्यस्व बुध्यस्व । अहि बुध्यस्व बुध्यस्व बुध्यस्व । हस्त्यागच्छति हस्त्यागच्छति । लघुपलायध्वं लघुपलायध्वम् ॥ **नानावधारणे** ॥ ७।४।७४ ॥ नानाभूतानामियत्तपरिच्छेदे गम्ये शब्दो द्विः । अस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहि । अत्र कार्षापणसम्बन्धिनो माषा न साकल्येन दित्सिताः किन्तु प्रत्येकं माषमात्रमेवेति न वीप्साऽस्ति । अवधारण इति किम् ? अस्मात्कार्षापणादिह भवद्भ्यां माषं द्वौ त्रीन् वा देहि ॥ **आधिक्यानुपूर्व्ये** ॥ ७ । ४ । ७५ ॥ द्विः । नमो नमः । मूले २ स्थूलाः ॥ **डतरडतमौ समानां स्त्रीभावप्रश्ने** ॥ ७ । ४ । ७६ ॥ उभाविमावाढ्यौ । कतरा कतरा अनयोराढ्यता । कतमा कतमा एषामाढ्यता । भावेति किम् ? उभाविमौ लक्ष्मीवन्तौ कतरानयोर्लक्ष्मीः ॥ **पूर्वप्रथमावन्यतोऽतिशये** ॥ ७ । ४ । ७७ ॥ स्वार्थस्य द्योत्ये द्विः ॥ आतिशायिकापवादः । पूर्वं पूर्वं पुष्यन्ति । प्रथमं प्रथमं पच्यन्ते ॥ **प्रोपोत्सं पादपूरणे** ॥ ७ । ४ । ७८ ॥ द्विः ॥ प्रप्रशान्तकषायाग्नेरुपोपप्लववर्जितम् । उदुज्ज्वलं तपो यस्य स संश्र-

यत तं जिनम् ॥ **सामीप्येऽधोऽध्युपरि** ॥ ७ । ४ । ७९ ॥ द्विः ॥ अधोऽधो ग्रामम् । अध्यधि ग्रामम् । उपर्युपरि ग्रामम् ॥ **वीप्सायाम्** ॥ ७ । ४ । ८० ॥ वर्त्तमानं द्विः ॥ पृथक् संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा ॥ वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः ॥ **प्लुप् चादावेकस्य स्यादेः** ॥ ७ । ४ । ८१ ॥ वीप्सायां द्विरुक्तस्य ॥ पित्करणादतद्धितेऽपि लुपि पुंवद्भावः । एकैका । एक एका । विरामे विवक्षिते सन्धिर्नभवति । आदिपदस्य स्यादेः प्लुत्युत्तरेणाभेदाश्रयणे स्याद्यन्तत्वात् सर्वादयो स्यादाविनि पुंवद्भावो न प्राप्नोतीति लुपः पित्त्वं विधीयते । इह द्विर्वचनं पूर्वेणैव सिद्धं प्लुब्मात्रं विधीयते । आदाविनि किम् ? उत्तरोक्तो माभूत् ॥ **द्वन्द्वं वा**॥ ७ । ४ । ८२ ॥ वीप्सायां द्विरुक्तस्य द्वेरादेः स्यादेः प्लुप् एश्चाम्, उत्तरत्रेनोत्त्वं स्यादेश्चाम्भावो वा निपात्यते द्वन्द्वं द्वौ द्वौ वा तिष्ठतः ॥ **रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगे** ॥ ॥ ७ । ४ । ८३ ॥ वीप्सायामिति निवृत्तम् । द्वेर्द्विवचनं शेषं पूर्ववन्निपात्यते । द्वन्द्वं मन्त्रयन्ते । पशवो द्वन्द्वं मिथुनायन्ते । द्वन्द्वं व्युत्क्रान्ताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ॥ **लोकज्ञातेऽत्यन्तसाहचर्ये** ॥ ७ । ४ । ८४ ॥ द्योत्ये द्वन्द्वमिति निपात्यते । द्वन्द्वं रामलक्ष्मणौ । द्वन्द्वं बलदेववासुदेवौ ॥ **आबाधे** ॥ ७ । ४ । ८५ ॥ द्विरादौ स्यादेश्च प्लुप् ॥ रुक् रुक् । गतगतः ॥ **नवा गुणसदृशेरित्** ॥ ७ । ४ । ८६ ॥ गुणशब्दो मुख्यसदृशे गुणे गुणिनि वा वर्त्तमानो द्विर्वा आदौ स्यादेः प्लुप् स च रित् ॥ रित्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य रितीति विधानार्थम् ॥ शुक्लं शुक्लं रूपम् । कालककालिका । पक्षे शुक्लजातीयम् ॥**प्रियसुखं चाकृच्छ्रे**॥ ७ । ४ । ८७॥ वा द्विरादौ स्यादेः प्लुप् च॥ प्रियप्रियेण प्रियेण वा दत्ते ॥ सुखसुखेन वाऽधीते ॥ **वाक्यस्य परिर्वर्जने** ॥ ७ । ४ । ८८ ॥ वर्जनार्थो वाक्यांशः परिर्वा द्विः ॥ परिपरि परि वा त्रिगर्त्तेभ्यो वृष्टो मेघः॥ वाक्यस्येति किम् ? परित्रिगर्त्तं वृष्टो मेघः ॥ **परस्पराऽन्योऽन्येतरेतरस्याम् स्यादेर्वापुंसि** ॥ ३ । २ । १॥ प्रयुज्यमानस्य सम्बन्धिनः ॥ इमे सख्यौ कुले वा परस्परां परस्प-

रम् अन्योन्याम् । अन्योन्यम् अन्योन्यम् इतरेतराम् इतरेतरम् भोजयतः । आभिः सखीभिः कुलैर्वा परस्परां परस्परेण अन्योन्याम् अन्योन्येन इतरेतराम् इतरेतरेण भोज्यते । अपुंसीति किम् ? इमे नराः परस्परं भोजयन्ति । अपरोऽर्थः । परस्परादीनामपुंसि प्रयुज्यमानानां सम्बन्धिनः स्यादेरम् वा । आभिः सखीभिः कुलैर्वा परस्परं परस्परेण भोज्यते पुंसीतिच्छित्त्वा अभिधानमपि एभिर्नरैः परस्परं परस्परेण वा भोज्यते । इमे परस्परादयः शब्दाः स्वभावादेकत्वपुंस्त्ववृत्तयः कर्मव्यतीहारविषयाः । अस्मादेव च निर्देशात् परान्येतरशब्दानां सर्वनाम्नां द्विर्वचनादि निपात्यते ॥ इति ॥

॥ इति द्विरुक्तप्रक्रिया ॥

इति श्रीतपोगच्छाचार्यविजयदेवसूरिविजयसिंहसूरिपट्टपरम्पराप्रतिष्ठितगीतार्थत्वादिगुणोपेतवृद्धिचन्द्रापरनामवृद्धिविजयचरणकमलमिलिन्दायमानान्तेवासिसंविग्नशाखीयतपोगच्छाचार्यभट्टारकश्रीमद्विजयनेमिसूरिविरचितायां बृहद्धेमप्रभायां

पूर्वार्द्धं सम्पूर्णम् ॥